PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51-6

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

VI

Adhyāya 3 Pāda 1-4

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1979

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

(Vol. VI)

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 6

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

VI

Adhyāya 3 Pāda 1-4

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1979

© Institut Français d'Indologie 1979

Imprimerie de Sri Aurobindo Ashram,
Pondichéry, Inde

उपोद्घातः

'महाभाष्यप्रदीपव्याख्यानानि' इति ग्रन्थनाम्नास्मिन् विमर्शालये सन् १९७८ संवत्सरपर्यन्ते द्वितीयाध्यायान्तो भागः प्राकाश्यत। अस्मिन् १९७९ सन्संवत्सरे तृतीयाध्यायभागोऽत्र प्रकाश्यते। अस्य तृतीयाध्यायभागस्योपलब्धानि त्रीणि व्याख्यानानि कात्स्न्येन — श्रीमदन्नंभट्टकृतं **महाभाष्यप्रदीपोद्द्योतनम्**, श्रीशिवरामेन्द्रसरस्वतीविरचितो **महाभाष्यसिद्धान्तरत्नप्रकाशः**, श्रीनारायणकृतं **महाभाष्यप्रदीपविवरणं** चेति। तत्रोद्द्योतनस्य तिस्रो मातृकाः, रत्नप्रकाशस्य द्वे मातृके, नारायणीयविवरणस्य द्वे मातृके च लब्धाः।

अत्रोपयुक्तानां मातृकाणां संकेतादिनिर्देशः

अ. अडैयार्कोशागारात्लिखिता आस्माकीनकोशालये T. No. 155 संकेतिता। इयमुद्द्योतनमातृका प्रथमाध्यायप्रथमपादतृतीयाह्निकारम्भे किंचिद्भागहीना पञ्चमाध्याये 'रजःकृषि' (५.२.११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तभागहीना च।

ऋ. G. O. M. L. R. No. 2248 Vol. I देवनागरीलिपिमयी पाण्डुपत्रलिखितोद्द्योतनमातृका। अत्र प्रथमाध्यायद्वितीयपादारम्भात् प्रभृति द्वितीयाध्यायसमाप्त्यन्तं वर्तते। षष्टयुत्तरचतुश्शती पत्राण्यस्यां सन्ति। प्रतिपुटं विंशतिः पङ्क्तयो वर्तन्ते।

R. No. 2248 Vol II अत्र तृतीयाध्यायात् प्रभृति 'केशाद् वोऽन्यतरस्याम्' (५-२-१०९) इति सूत्रपर्यन्तं वर्तते त्रिनवतिचतुश्शतीपुटान्ते। 'रजःकृषि' (५.२.११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तो भागो नास्ति। द्वितीयाह्निकात् षष्ठाध्यायसमाप्त्यन्तं वर्तते। पञ्चनवत्युत्तरषट्शती पुटान्यत्र कोशे सन्ति।

R. No. 2248 Vol III षण्णवत्युत्तरषट्शतीतः पुटात् प्रभृति नवोत्तरशतसहस्रपुटपर्यन्तेऽस्मिन् कोशे सप्तमाष्टामाध्यायौ विद्येते।

ऌ. (a) बडोदा O. I. No. 7778 अङ्किता तालपत्रकोशात्मिकोद्द्योतनमातृका आन्ध्रलिपिमयी। अस्यां तृतीयाध्यायारम्भात् षष्ठाध्यायतृतीयपादान्तमुपलभ्यते। द्व्युत्तरत्रिशती पुटानि सन्त्यत्र। प्रतिपुटं सप्त पङ्क्तयश्च। त्रयोदशसहस्री ग्रन्था वर्तन्तेऽस्याम्।

(b) No. 6257 अङ्कितस्तालपत्रकोश आन्ध्रलिपिमयः। अत्र विंशत्युत्तरद्विशती पत्राणि सन्ति। प्रतिपुटं सप्त पङ्क्तयः। सप्तशत्युत्तरसप्तसहस्री ग्रन्था अत्र सन्ति। षष्ठाध्यायचतुर्थपादात् प्रभृत्यष्टमाध्यायान्तमत्र विद्यते।

प. वाराणसेयविश्वविद्यालयसरस्वतीभवने Ms. No. 38002 देवनागरीलिपिमयी पाण्डुपत्रलिखिता रत्नप्रकाशस्य मातृका। अत्र प्रथमतः १-३३, ३४ तमपत्रं नास्ति, ३५-६६ पत्राणि। अत्र प्रथमाध्यायद्वितीयपादारम्भात् 'त्यदादीनि सर्वैर्नित्यम्' (१.२.७२) इति सूत्रान्तं वर्तते। ६७ पत्रात् प्रभृति ९९ पत्रान्तं नास्ति। अथ १००-१२९ पत्राणि। अत्र प्रथमाध्यायतृतीयपादे 'क्रीडोऽनुसंपरिभ्यश्च' (१.३.२१) इति सूत्रात् 'विप्रतिषेधे परं कार्यम्' (१.४.२) इति सूत्र—

मध्यपर्यन्तं वर्तते। १३० तमपत्रं नास्ति। तदनु १३१-१९२ पत्राणि। अत्र प्रथमाध्याय-चतुर्थपादद्वितीयसूत्रान्तिमभागात् प्रथमाध्यायसमाप्त्यन्तं वर्तते। ततः २-२९७ पत्राणि। अत्र 'समर्थः पदविधिः' (२.१.१) इति सूत्रात् (आरम्भे कियांश्चिद् भागो नास्ति) 'आर्धधातुकं शेषः' (३.४.११४) इति सूत्रमध्यभागपर्यन्तं वर्तते। अनन्तरं २-७८ पत्राणि, (७४ तमपत्रं नास्ति।) अत्र चतुर्थाध्यायारम्भात् (आरम्भे कियांश्चिद्भागो नास्ति) 'गोत्राद्यून्यस्त्रियाम्' (४-१-९४) इति सूत्रारम्भभागपर्यन्तं विद्यते। अथो १२०-१४१ पत्राणि। अत्र 'छन्दो-ब्राह्मणानि च तद्विषयाणि (४.२.६६) इति सूत्रमध्यभागात् चतुर्थाध्यायसमाप्त्यन्तं विद्यते।

ब. बडोदा O. I. Acc. No. 11203 अङ्किता देवनागरीलिपिमयी पाण्डुपत्रलिखिता, अस्याः प्रतिकृतिरस्मदीयकोशालये T. No. 498 अङ्किता रत्नप्रकाशस्य मातृका। अस्यां प्रथमा-ध्यायारम्भात् चतुर्थध्यायान्तो भागो वर्तते। प्रथमाध्यायद्वितीयपादे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (१.२.४३) इति सूत्रे 'अन्वर्थसंज्ञायामपि तत्र दोष इत्याशङ्क्यान्वर्थसंज्ञामाश्रित्यैव परिहृतत्वेन परिहारान्तराप्रसिद्धेः' इत्येतत्पर्यन्तं वर्तते, उपरि प्रथमाध्यायचतुर्थपादान्तिम-भागपर्यन्तग्रन्थो नास्ति। द्वितीयाध्यायप्रथमपादे प्रथमाह्निकात् प्रभृति द्वितीयाह्निके 'नदी-भिश्च' (२.१.२०) इति सूत्रव्याख्यानपर्यन्तं विद्यते। 'द्विगुश्च' (२.१.२३) इति सूत्राद् द्वितीयाह्निकसमाप्त्यन्तो ग्रन्थो नास्ति। अयं त्यक्तभागः 'प' संकेतितकोशेऽपि नोपलभ्यते। वाराणसीविश्वविद्यालयसरस्वतीभवनस्थमातृकान्तरेऽप्ययं भागो न लभ्यते।

घ. नारायणकृतमहाभाष्यप्रदीपविवरणस्यैषा मातृका होशियार्पूर्विश्वेश्वरानन्दवैदिकशोधसंस्थानत आनीतात् तालपत्रकोशाद्विलिखिता। अस्मत्कोशागारे T. No. 633 अङ्कितेयम्। अस्यां २९७ तालपत्राणि सन्ति, येषु प्रतिपुटं दश पङ्क्तयः। प्रायो ग्रन्थलिप्यां स्थलद्वये केरल-लिप्यां च लिखिता। ग्रन्थारम्भे तालपत्रं भग्नम्, अन्ते तु निगमनपूर्वकं परिसमाप्तिरस्ति। तृतीयाध्यायात् प्रभृत्यष्टमाध्यायान्तं वर्तते। अनेकेषु स्थलेषु ग्रन्थपातश्चास्ति। अस्या मातृ-काया अन्ते केचन श्लोकाः सन्ति। तत्र केरलदेशीयाग्रहारे जातोऽयं नारायणः ऋग्वेदी साङ्ग वेदाध्यायी व्याकरणं कृत्स्नमधीत्य शिष्येभ्यश्च बहुवारं प्रावोचदिति चोच्यते, अस्य पिता देवशर्मेति माता आर्याख्येति च।

ङ. T. No. 528 नारायणीयभाष्यप्रदीपविवरणमातृकेयम्। अत्रापि तृतीयाध्यायप्रभृत्येव वर्तते। चतुर्थाध्याये 'एको गोत्रे' (४.१.९३) इति सूत्रमध्यभागपर्यन्तं वर्तते। उपरि चतुर्था-ध्यायसमाप्तिपर्यन्तं नास्ति। पञ्चमाध्याये च 'छेदादिभ्यो नित्यम्' (५.१.६४) इति सूत्रमध्य-भागात् प्रभृति पञ्चमाध्यायान्तं नास्ति। उपरि षष्ठात् प्रभृत्यष्टमाध्यायान्तं वर्तते। 'घ' मातृकायामन्ते विद्यमानाः श्लोका अत्र नोपलभ्यन्ते।

एतद्ग्रन्थमातृकादानेनोपकृतवताम् अडैयार्कोशागार-बडोदाकोशागार-मद्रपुरीराजकीय-कोशागार-वाराणसीविश्वविद्यालयसरस्वतीभवन-होशियार्पूर् वैदिकशोधसंस्थानाध्यक्षमहाशयानां तथैतद्ग्रन्थमातृकालेखनेनोपकृतवतां पण्डितवर्याणां वाराणसीवास्तव्यानां श्रीमन्मध्वाचार्याणां मुद्रणशोधनादौ साह्यं कृतवतोः श्रीसंबन्धशिवाचार्यशेषाद्रिसंज्ञकयोरस्मत्सुहृदोश्च कृतज्ञतां निवेदयामः। एवमेतादृशप्राचीनग्रन्थप्रकाशने श्रद्धातिशयमुद्वहतामस्मद्विमर्शालयाध्यक्षाणां च कृते केवलकृतज्ञतानिवेदनेनैव कृतार्था भवामः। इति शम्।

इत्थम् उभयवेदान्तविद्वान् M. S. नरसिंहाचार्यः व्याकरणशिरोमणिः

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

महाभाष्यप्रदीपव्याख्यानानि

(तृतीयाध्याये १–४ पादाः)

तृतीयाध्यायस्य प्रथमपादे प्रथममाह्निकम्

महाभाष्यप्रदीपोद्द्योतनम् अन्नंभट्टकृतम्

प्रत्ययः ३.१.१.

[३, ३ – ७]

(उद्द्योतनम्) ननु प्रत्ययसंज्ञा प्रकृत्यादीनामपि प्राप्नोतीत्येव वक्तव्यम्, अधिकारेणेति किमर्थमुक्तम्, अत आह — **यदि त्विति**। प्रकारान्तरमेवाह — [1]**संज्ञीति**। यावत्संज्ञ्युच्चारणेनेत्यर्थः। आदिना प्रत्याहारग्रहः। नन्वतिप्रसङ्गाभावात् प्रकारान्तरमेवाद्रियतामित्याशङ्क्य दोषान्तर[2]संभवान्नाश्रितमित्याह — **यदेति**। 'गौरवातिप्रसङ्ग' इति पाठे गौरवं प्रत्याहारपाठे संशयस्याप्युपलक्षणम्। [3]'गौरवादिप्रसङ्ग' इति पाठे आदिना संशयग्रहणम्। कथं प्रकारान्तरे गौरवादि, अत आह — **तत्रेति**। **अनेकस्येति**। [4]'ऋदोरप्' टाप् ङीप् इत्यादेः। यद्यप्यणादाविव[5] व्याख्यानतः कपः पकारेणेति निश्चयः संभवति, तथापि व्याख्यानसापेक्षत्वे गौरवमित्यत्र तात्पर्यम्। अधिकारपक्षेऽप्यतिप्रसङ्गाभावं शङ्कते — **नन्विति**। तमेवोपपादयति — **तथा हीति**। 'ते च' इत्यनेन विभक्त्यन्तराध्याहारोऽप्यमानक इति सूचितम्। भवतु वाक्यभेदः, अत आह — **न चेति**। [6]'संभवत्येकवाक्यत्वे' इति न्यायात्। **नैतदिति**। [7]'यश्चोभयोः' इति न्यायादित्यर्थः। तत्र हेतुः — **न हीति**। तावता कथं वाक्यभेदः, अत आह — **तत्रेति**। [8]नन्वेवमपि ममैकस्मिन् सूत्रे वाक्यद्वयम्, [9]तव त्रयं स्यात्, अत आह — **ततश्चेति**। अर्थभेदेन वाक्यभेदाङ्गीकारे [10]द्वित्वत्रित्वयोरविशेषादिति भावः। विभक्त्यन्तराध्याहारे मानमाह — [11]**प्रतिसंज्ञीति**। ननु विधेयतया प्रधानत्वात् सनादेरेव प्रत्ययसंज्ञाविधानम्, न तु सनादिविधानार्थतयाप्रधानस्य[12] प्रकृत्यादेः, अत आह — **सनादीति**। **स्वार्थता** स्वार्थप्रधानता। यथा प्रत्ययविध्यर्थस्य सप्तमीनिर्दिष्टस्यापि [13]'स्तम्बकर्णयोः' इत्यादेरुपपदसंज्ञासंबन्धस्तथा प्रकृत्यादित्रिकस्य प्रत्यय[14]संज्ञासंबन्धः स्यात्, अत आह — **यथा चेति**। [15]ननूपाधिविशेषणयोरभेदात् किमुपलक्षणत्वेन, अत आह — **क्वचिदिति**। [16]'उपदेशोऽजनुनासिक इत्' इति सूत्र इत्यर्थः। तत्रत्यं भाष्यमुदाहरति — **यथेति**। तयोर्भेदे

संज्ञेति — अ.

संभवान्नाप्रसरमित्याह — अ.

गौरवादेः प्रसङ्गेति — अ.

पा. सू. ३.३.५७.

यथा अण्प्रत्याहारविषये 'अणुदित्' इत्येतद्विहायान्यत्र पूर्वणकारेण प्रत्याहारः, इण्ग्रहणे सर्वत्र परणकारेणेति व्याख्यानान्निश्चीयते तद्वदिति भावः।

गौ. न्या. साहस्री. पृष्ठम् ५८.

[7] लौ. न्या. साहस्री पृष्ठम् २४५.

[8] नन्विदमपि — अ.

[9] पदत्रयं स्यात् — अ.

[10] वाक्येत्यादिः।

[11] प्रतिसंज्ञेति — अ, ऋ, लृ.

[12] अप्रधानस्येति छेदः।

[13] पा. सू. ३.२.१३.

[14] 'संज्ञा' इति नास्ति — अ.

[15] ननूपलक्षणविशेषणयोः — ऋ.

[16] पा. सू. १.३.२.

हरिसंमतिमाह — **अर्थेति**। **तदन्तवाच्यः** प्रत्ययान्तवाच्यः। अत एव **समानः** पर्यायः **शब्दः** पश्वादिशब्दो यस्यार्थस्य। दृतिहर्यादिशब्दस्य पश्वर्थत्वात् पशुशब्देन पर्यायत्वम्। तथा च दृतिहर्यादिः पशुशब्देन सह प्रयोगाभावः। **अतः** प्रत्ययान्तवाच्यात्, अन्यः **अनुपाधिः** [1]'उपाधिभिन्नो विशेषणमित्यन्वयः। [2]तदुदाहरति — **श्लाघादि यद्वदिति**। यथा श्लाघादीत्यर्थः। आदिनात्याकारतदवेतग्रहः। [3]'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' इत्यत्र श्लाघादिकं नोपाधिः, किं तु विशेषणम्। अत एव 'गार्गिकया श्लाघते' इति सहप्रयोगः। श्लाघादिसंबन्ध[4]प्रतीतावेव गोत्रादिभ्यो वुञ् नान्यथेत्यर्थान्तर[5]संबन्धे प्रत्ययव्यावर्तकत्वाद्विशेषणत्वोपपत्तिरिति [6]संप्रदायः। ननु 'किं च स्यात्' इत्ययुक्तम्, प्रकृत्यादेः प्रत्ययसंज्ञाया एवानिष्टायाः प्रसङ्गात्, अत आह — [6]**नात्रेति**। **सनादिभिरेवेति**। [7]'गुप्तिज्किद्भ्यः' इति पञ्चमीनिर्देशात् तेषामवधित्वमेव, [8]'सनः परत्वमेवेति सूत्रेणैव प्रतिपन्नमित्यर्थः। ननु [9]प्रतिसंज्ञि परश्चेत्युपस्थानात् प्रकृत्यादयोऽपि परे भवन्तोऽवध्यन्तरानुपस्थितावपि संनिहितात् सनादेः परे भवन्ति, अत आह — **न चेति**। यौगपद्येन तावदसंभवः, पर्यायश्चामानक इति भावः। **समासे** [10]'उपपदमतिङ्' इत्यनेन। यद्यप्युपसर्जनपूर्वत्वप्रत्ययपरत्वयोः सावकाशयोः परत्वात् प्रत्ययपरत्वेनैव भाव्यम्, तथापि पूर्वविप्रतिषेधेन परशब्दस्येष्टवाचित्वेन वा [11]तत्त्वनियमः सिध्येदिति भावः। [12]लौकिके प्रयोगे पौर्वापर्यस्य नियमाभावात् उपाधेरपि परत्वाभाव इत्यन्वयः। [13]लोकेऽनियतमपि परत्वं शास्त्रेण नियम्यताम्, अत आह — **स्थिरस्यैवेति**। प्रयुक्तान्वाख्यानत्वादित्यर्थः। विधायकत्वेऽप्याह — **अर्थस्य चेति**। **तेषां** प्रकृत्यादीनाम्। [14]'धातोः' [15]'फिषः' इत्यादिभिरित्यर्थः। **विधानेति**। [16]'यस्मात् प्रत्ययविधिः' इति लक्षणात्। [17]'परश्च' इति नियमः परस्परापेक्षो न संभवति, अत आह — **शब्दान्तरेति**। 'पापाज्जुगुप्सते' इत्येव प्रयोगः, न तु वैपरीत्येनेति नियमप्रयोजनमिति भावः। 'इत्येतत्' इति कर्म। ननु [18]'ङ्याप्प्रातिपदिकात्' इति प्रत्ययाधिकारे प्रातिपदिकग्रहणेन राजादीनामपि निर्दिष्टत्वात् प्रत्ययसंज्ञायां राजपुरुष इत्यत्रापि [19]'परश्च' इत्यस्य प्राप्तौ कथं तत्रोपसर्जनपूर्वत्वं सावकाशम्, अत आह — **भोक्तुमिति**। [20]'तुमुन्ण्वुलौ क्रियायाम्' इति सप्तमीनिर्देशात् तिङन्तस्योपपदत्वम्। [21]'उपपदमतिङ्' इति वचनाच्च [22]न समासः। [23]तत्रोपसर्जनपूर्वत्वाभावात् प्रत्ययपरत्वं नियतं स्यादित्यर्थः। अर्थस्य परत्वासंभवादित्युक्तं निराह — **उपाधिवाचिनोऽपीति**। अनुवादकं शास्त्र-

---

[1] 'उपाधिभिन्नः' इत्यस्मादनन्तरम् 'अर्थः' इत्यधिकम् — ऋ.

[2] विशेषणमुदाहरतीत्यर्थः॥ तमुदाहरति — अ.

[3] पा. सू. ५.१.१३४.

[4] प्रतिपादनादेव — अ.

[5] संबन्धितया व्यावर्तकत्वात् — अ.

[6] प्रदीपे 'न हि संज्ञाप्रवृत्ति' इत्यत्र 'नात्र संज्ञाप्रवृत्ति' इत्यभ्रंभट्टपाठ इति भाति।

[7] पा. सू. ३.१.५.

[8] 'सनः परत्वमेव' इति नास्ति — ऋ, लृ.

[9] प्रतिसंज्ञं — अ.

[10] पा. सू. २.२.१९.

[11] उपसर्जनपूर्वत्वनियम इत्यर्थः।

[12] लौकिकप्रयोगे — अ.

[13] लोके नियतमनियतमपि — अ.

[14] पा. सू. ६.१.१६२.

[15] फिट्सूत्रम् १.

[16] पा. सू. १.४.१३.

[17] पा. सू. ३.१.२.

[18] पा. सू. ४.१.१.

[19] पा. सू. ३.१.२.

[20] पा. सू. ३.३.१०.

[21] पा. सू. २.२.१९.

[22] 'न' इति नास्ति — अ.

[23] तत्रोपसर्जनत्वाभावात् — ऋ, लृ.

मित्युक्तं निराह — **यः प्रत्यय इति**। [1]'परश्च' इत्यस्य सिद्धान्तेऽपि नियमार्थत्वात्। **स्वरान्तरमिति**। यदि स्वरान्तरं निरवकाशं तदा पर्यायोऽस्त्वित्यर्थः। **सिद्धेति**। प्रत्ययस्याप्यज्ञातज्ञापनं विधानम्, नापूर्वस्योत्पत्तिः। तच्च प्रकृत्यादेरपीत्यर्थः। तथापि कस्माच्चित् परतो [2]न विधानम्, अत आह — **परत्वेन चेति**। तथा चाक्षिप्तावधेः परत्वेन विधिरस्तीत्यर्थः। अङ्गसंज्ञापादनं दूषयति — **पूर्वेति**। [3]'परश्च' इति सूत्रं न विधायकम्, किं तु लक्षणान्तरविहितानां प्रयोगनियामकम्। यथा [4]'प्राग् धातोः' [5]इत्यत्र नियमे पूर्वस्य परस्य वा न विधिः, तद्वदिति भावः। प्रकृत्यादेर्निमित्तत्वे मानं वदन् वार्तिकार्थमाह — **प्रकृत्यादीनामिति**। सप्तमीपञ्चम्यादेस्तदन्तात् सिद्धार्थप्रतीतेर्भूतविभक्तित्वम्। [6]'समे यजेत' इत्यादौ सप्तमीनिर्दिष्टस्यापि विधेयत्वेन प्राधान्यं दृष्टम्, अत आह — **सनादीति**। **स्वेति**। संस्कार्यत्वे प्राधान्यं स्यात्, एकस्य प्रधानत्वाप्रधानत्वे युगपद्विरुद्धे इत्यर्थः। ननु सनाद्युत्पत्तिवाक्ये गुणत्वेऽपि संज्ञावाक्ये प्राधान्यं स्यात्, अत आह — **तत्रेति**। **निमित्तत्वात्** प्रकृत्यादिनिमित्तापेक्षया प्रधानत्वात्। **तां** प्रत्ययसंज्ञाम्। **योग्यविभक्तिः** प्रथमा। अनुवृत्तसंज्ञायाः सनादिसंबन्धेन चरितार्थत्वाद्योग्यविभक्त्यध्याहारेण प्रकृत्यादिसंबन्धोऽमानकः। [7]उपहोमादिवदानर्थक्यनिरासायान्यतराकाङ्क्षयापि संबन्धो भवेत्। न चात्र तदस्तीत्याशयेनाह — **द्वयोश्चेति**। सनादेः संज्ञान्तरानुक्तेः संज्ञाकाङ्क्षेत्युभयाकाङ्क्षा। प्रकृत्यादेर्धात्वादिसंज्ञान्तरसत्त्वाद् विविभक्तित्वाच्च न संज्ञाकाङ्क्षा। उपपदसंज्ञा तु वैयर्थ्यपरिहारायान्यतराकाङ्क्षयापि [8]"सप्तमीस्थम्' इति प्रथमानिर्दिष्टेन सप्तम्यन्तेन संबध्यत इति भावः। **नित्यत्वादिति**। [9]निमित्तत्वं हेतुत्वमिति मत्वा प्रश्न इत्यर्थः। प्रक्रियाकालेऽनित्यत्वपक्षाश्रयेण हेतुत्वं संभवतीत्याह — [10]**सनादीनामिति**। **प्रतिपादकानां** विधायकानाम्। **तदनुगुणेति**। सनादौ प्रथमा प्रकृत्यादौ पञ्चमी चोपायोपेयभावानुगुणा[11] निर्दिष्टा। **उपाधीति**। 'द्वयोः, बहूनाम्' इति न वक्तव्यम्, बहूनामपि निर्धारणे डतरच इष्टत्वादिति [12]वक्ष्यत इत्यर्थः। भाष्ये 'किं पुनः' इति निमित्तनिमित्तिशब्दार्थस्य दृष्टान्तदार्ष्टान्तिकसाधारणस्य प्रश्नः॥

---

[1] पा. सू. ३.१.२.

[2] 'न' इति नास्ति — ऋ, लृ.

[3] पा. सू. ३.१.२.

[4] पा. सू. १.४.८०.

[5] इत्यनियमे — ऋ, लृ.

[6] दर्शपूर्णमासप्रकरणे समे यजेतेत्यत्र विहितस्य कर्मणोऽनुवादेन देशसंबन्धोऽप्राप्तो विधीयत इति मीमांसायां द्वितीयाध्यायतृतीयपादत्रयोदशाधिकरणे निर्णीतम्। तदिहानुसंधेयम्।

[7] अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेदिति विहितनक्षत्रेष्टिषु नारिष्टहोमानामतिदेशप्राप्तानां क्लृप्तोपकारकत्वात् उभयाकाङ्क्षया संबन्ध इति तेषां पूर्वमनुष्ठानम्, उपहोमानां 'सोऽत्र जुहोति, अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा' इत्यादीनां संनिधिपठितानामानर्थक्यपरिहारायान्यतराकाङ्क्षया पश्चादनुष्ठानमिति मीमांसायां पञ्चमतृतीयपादनवमाधिकरणे निर्णीतम्। तदत्र बोध्यम्।

[8] पा. सू. ३.१.९२.

[9] निमित्तत्वं वोपाधित्वमिति मत्वा — अ.

[10] प्रदीपे 'प्रतिपादकानां शब्दानाम्' इत्यत्र 'सनादीनां प्रतिपादकानां शब्दानाम्' इत्यन्नंभट्टपाठ इति भाति।

[11] अत्रोपेयभावानुगुणा प्रथमा, उपायभावानुगुणा पञ्चमीति यथायोग्यं ग्राह्यम्, न तु यथाक्रमम्।

[12] 'किंयत्तदो निर्धारणे' इति सूत्रे कैयट इत्यर्थः।

रत्नप्रकाशः श्रीशिवरामेन्द्रसरस्वतीकृतः

[३, ३–७]

(**रत्नप्रकाशः**) प्रत्ययसंज्ञातिप्रसङ्गपरिहारपरं वार्तिकमवतारयति — **अधिकारेणेति**। [1]'वृद्धिरादैच्' इत्यादौ प्रातिस्विकरूपेण संज्ञिनिर्देशादन्यस्यानिर्देशाच्च नातिप्रसङ्गशङ्का। अत्र सनादीन् सर्वान् [2]प्रातिस्विकरूपेण निर्दिश्य संज्ञायां क्रियमाणायामत्यन्तगौरवं स्यात्। सनः सकारमारभ्य कपः पकारेण प्रत्याहारमाश्रित्य 'सप् प्रत्ययः' इत्युक्तेऽप्यधिकारपक्षे यो दोषः स तु प्रसज्यत एव, प्रकृत्युपपदोपाधिविकारागमानामपि प्रत्याहारान्तर्गतत्वात्। सप् इति द्विमात्रोच्चारणगौरवप्रसङ्गाच्च। एतेन 'अनेकस्य पकारस्य संभवात् केन[3] पकारेण स प्रत्याहार इति संदेहः स्यात्' इति निरस्तम्। पञ्चमाध्यायान्ते 'सप् प्रत्ययः' इति सूत्रे कृते [4]तु तदुक्तसंदेहाभावात्। ननु तर्हि तथैव सूत्रयितुमुचितम्, अधिकारेण संज्ञायां क्रियमाणायां प्रतिसूत्रं वाक्यभेदेन प्रत्ययसंज्ञाया विधेयत्वेनात्यन्तं प्रतिपत्तिगौरवापत्तेः। अधिकारपक्ष इवास्मिन् पक्षेऽपि प्रकृत्यादेः प्रत्ययसंज्ञावारणसंभवादिति चेत्, सत्यम्, तथा तु न कृतम्, स्वतन्त्रेच्छत्वान्महर्षेः[5] शब्दसंग्रहे तात्पर्येण [6]द्विमात्रगौरवप्रसङ्गाच्च। **प्राप्नोतीति**। [7]'गुप्तिज्किद्भ्यः सन्' गुपादिभ्यः सन् स्यात्, ते प्रत्ययसंज्ञाश्चेति द्वितीयवाक्यस्वरूपसंभवादिति भावः। विधेयभेदप्रयुक्तवाक्यभेदस्त्वनिवार्य एव। तत्रोपाधिशब्देन विशेषणमपि गृह्यते। तेन [8]'उदि कूले रुजिवहोः' इत्यादावुदादेरपि सा प्राप्नोति। विधीयमानप्रत्ययान्तार्थनिर्देश **उपाधिः**, प्रकृतेर्विशेषकं प्रयोगोपाधिश्च विशेषणमिति अत्र पारिभाषिके उपाधिविशेषणे ज्ञेये। तदुक्तं [9]हरिणा — अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः। अनुपाधिरतोऽन्यः स्यात् श्लाघादि विशेषणं यद्वत्॥ इति। **किं च स्यादिति**। संज्ञाप्रवृत्तिमात्रे न दोषः, यथा **यमानामनुनासिकसंज्ञाप्रवृत्तिः**। अतस्तत्प्रयुक्तं किंचिदनिष्टं कार्यं निदर्शनीयमिति भावः। **परत्वमिति**। प्रकृतिप्रत्यययोः पर्यायेण परस्परं परत्वं स्यात्। तथोपपदस्यापि प्रत्ययान्तात् परत्वं स्यात्, राजपुरुष इत्यादौ सावकाशस्योपसर्जनपूर्वत्वस्य परेणानेन बाधसंभवात्। तिङन्तोपपदस्थले च 'भोक्तुं व्रजति' इत्येव प्रयोगः स्यात्, न तु 'व्रजति भोक्तुम्' इति। तथोपाधेरपि परत्वम्, [10]'ते प्राग् धातोः' इत्यस्यान्यत्र चरितार्थत्वादिति मन्यते। **आद्युदात्तत्वमिति**। फिट्स्वरादीनामन्यत्र चरितार्थत्वादिति मन्यते। **अङ्गसंज्ञेति**। प्रत्ययस्येव प्रकृत्यादेरपि वाक्यभेदेन परत्वविधानात् प्रकृतेरिव प्रत्ययादीनामप्यङ्गसंज्ञा स्यादिति भावः। एतेन [11]'पूर्वापेक्षेऽपि परत्वे तस्माद्विधिर्नास्तीत्यङ्गसंज्ञा न भविष्यतीति चिन्त्यमेतत्' इति निरस्तम्। विधिमन्तरेण प्रकृत्यादेः प्रत्ययादिपरत्वासंभवेन [12]परस्वीकारेऽङ्गसंज्ञाया अस्वीकारे चार्धजरतीया-

---

[1] पा. सू. १.१.१.

[2] प्रातिस्विकरूपेणानिर्दिश्य — प.

[3] संदेह इत्यस्य विवरणमिदम्।

[4] तुशब्दो नास्ति — ब.

[5] महर्षेरित्यस्य काकाक्षिन्यायेन पूर्वत्र परत्र चान्वयो बोध्यः।

[6] द्विमात्रशब्दे समाहारद्वन्द्वः, पात्रादित्वान्नपुंसकत्वम्।

[7] पा. सू. ३.१.५.

[8] पा. सू. ३.२.३१.

[9] वाक्यपदीये इदं न दृश्यते। 'अर्थविशेष-उपाधिरित्यादि कात्यायनवचनमिति न्यायवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्राः' इत्युद्घुते नागेशः।

[10] पा. सू. १.४.८०.

[11] प्रदीपे 'पूर्वाक्षेपेऽपि परत्वे' इत्यत्र 'पूर्वापेक्षेऽपि परत्वे' इति निर्णयसागरमुद्रिते पाठः।

[12] परत्वस्वीकार इत्यर्थः।

पत्तेः। **निमित्तिकार्यार्थत्वादिति**। निमित्तमस्यास्तीति निमित्ति, तस्य कार्यं निमित्तिकार्यं, तदेवार्थः प्रयोजनं यस्य तत्त्वादित्यर्थः। तथा च प्रकृत्यादीनां निमित्तानां सनादिनिमित्तिकार्यमात्रार्थत्वात् तेषां तत्कार्यप्रसक्त्यभावेन तत्प्रतिषेधोऽनर्थक इति फलितम्। एतेन 'प्रकृत्यादीनां भूतविभक्त्या निर्देशात् सनाद्युत्पत्तौ निमित्तभावेनोपादानात् पारार्थ्यात् स्वसंस्कारं प्रति प्रयोजकत्वाभावादित्यर्थः' इति निरस्तम्। प्रकृते तदर्थकत्वाभावात्। सप्तानामपि विभक्तीनां भूतभविष्यद्वर्तमानसंबन्धसंभवेन प्रकारान्तरेण भगवता तेषां निमित्तत्वस्योपपादयिष्यमाणत्वेन च भूतविभक्तिनिर्देशेन निमित्ततासाधनानौचित्याच्च। ननु प्रथमेतरविभक्तिर्भूतविभक्तिः, प्रथमा तु निमित्तिविभक्तिरिति नोक्तदोष इति चेन्न, [1]'अणुदित् सवर्णस्य चाप्रत्ययः' [2]'स्वं रूपं शब्दस्य' [3]'इग्यणः' इत्यादावप्रथमाया अपि [4]निमित्तिविभक्तेरस्मिन्नेव शास्त्रे दर्शनात्। लोके च कतरो देवदत्त इति पृष्टे यः पीठे, यं पश्यसि, येन दृश्यसे, यस्मायद्य राज्ञा गौर्दत्ता, यस्मात् स्रस्तं वस्त्रं, यस्य शिरोवेष्टनमस्ति, यस्मिन् पीताम्बरं तिष्ठति, इति सप्तभिर्विभक्तिभिर्निमित्ति[5]निदर्शनात्। यदप्युक्तम् 'द्वयोश्च परस्पराकाङ्क्षायां संबन्धः, न त्वन्यतराकाङ्क्षायां सीतारावणयोरिवेति सत्यामपि संज्ञाया आकाङ्क्षायां प्रकृत्यादीनां विशेषणत्वादनाकाङ्क्षत्वात् संज्ञासंबन्धाभावः' इति। तदपि न, अचेतनानां चेतनदृष्टान्तेनाकाङ्क्षानाकाङ्क्षोपपादनानौचित्यात्। तत्पुरुषनिष्ठाकाङ्क्षाया एवार्थेषूपचरणीयत्वेन पुरुषाकाङ्क्षानाकाङ्क्षाबीजस्य वार्तिकभाष्यारूढत्वेन पृथग्यत्नानौचित्यात्। निमित्तनिमित्तिविभागानभिज्ञः पृच्छति — **किं पुनर्निमित्तमिति**। प्रकृताधिकारे प्रकृत्युपपदोपाधीनां निमित्तत्वम्, सनादीनां निमित्तित्वम्, एवमन्यत्राप्यूहनीयमित्याशयेनोत्तरमाह — **प्रकृत्युपपदोपाधय इति**। **प्रत्यय इति**। सनादिरित्यर्थः। वस्तुगत्या सनादेरेव प्रत्ययत्वमिति प्रत्ययशब्देन तन्निर्देशः कृतः। एतेन 'नित्यत्वाच्छब्दानां निमित्तनिमित्तिभावो नोपपद्यत इति प्रश्नः। प्रतिपादकानां शब्दानामुपायभावेन शास्त्रेण व्यवस्थापनात् तदनुगुणविभक्तिनिर्देशादस्ति निमित्तनिमित्तिभाव इति प्रतिवचनम्' इति निरस्तम्। शब्दानां नित्यत्वे निमित्तनिमित्तिभावस्यानित्यमात्रविषयत्वे च मानाभावेन प्रश्नस्यानुपपन्नत्वात्। शास्त्रेणार्थप्रतिपादकानां व्युत्पादितत्वेऽप्युपायभावेनाव्यवस्थापितत्वेन योग्यविभक्तेरनिर्वचनेन च समाधानस्याप्यनुपपत्तेः। निमित्तनिमित्तिभावज्ञानसौकर्यार्थं लौकिकं वाक्यं दर्शयितुमाह — **अन्यत्रापीति**। **कतर इति**। [6]'कियत्तदो निर्धारणे द्वयोरेकस्य डतरच्' [7]'वा बहूनां जातिपरिप्रश्ने डतमच्' इति सूत्रद्वये द्वयोर्बहूनामित्युपाधिविशेषणप्रत्याख्यानाद् [8]'बहूनामप्येकस्य निर्धारणे डतरच् भवति। [9]**अश्वे य इति**। प्रागस्मदुक्तरीत्या सप्तानामपि विभक्तीनामुपलक्षणमिदम्। निमित्तनिमित्तिनोर्लक्षणे पृच्छति — **किं पुनरिति**। [10]'निमित्तत्वं निमित्तित्वमित्यर्थः। निमित्तनिमित्तिशब्दावत्र भावप्रधानौ। **निर्ज्ञात इति**। [11]'निर्ज्ञातत्वम्। [[12]**अनिर्ज्ञात इति**।] अनिर्ज्ञातत्वम्। **निमित्तत्वेनोपादीयन्त इति**। सनादिकं ज्ञापयितुमिति शेषः॥

---

[1] पा. सू. १.१.६९.
[2] पा. सू. १.१.६८.
[3] पा. सू. १.१.४५.
[4] निमित्तविभक्तेः — ब.
[5] निदर्शनाद्वा — ब.
[6] पा. सू. ५.३.९२.
[7] पा. सू. ५.३.९३.
[8] बहूनामप्येकस्यानिर्धारणे — ब.
[9] 'योऽश्व इति' इति युक्तम्।
[10] 'निमित्तत्वं निमित्तित्वमित्यर्थः' इति नास्ति — ब.
[11] भावप्रधाननिर्देश इत्याशयः।
[12] 'अनिर्ज्ञात इति। अनिर्ज्ञातत्वमित्यर्थः' इति नास्ति — ब; 'अनिर्ज्ञात इति' इति नास्ति — प.

महाभाष्यप्रदीपविवरणम् नारायणकृतम्

[३, ३–७]

(नारायणीयम्) नन्वियं संज्ञा प्रकृत्यादीनामपि प्राप्नोतीति वक्तव्ये ‘अधिकारेण’ इत्यादिरनुवादः किमर्थ इत्याशङ्क्य प्रकारान्तरेण संज्ञाया विधानेऽतिप्रसङ्गाभावप्रदर्शनायेत्याह — **यदि त्विति**। यदि प्रकारान्तरेऽतिप्रसङ्गो नास्ति तर्हि तदेवाश्रीयतामित्याशङ्क्य दोषान्तरप्रसङ्गभयात् तदनाश्रयणमित्याह — **यदा त्विति**। एतदेवोपपादयति — **तत्रेति**। संज्ञिनः स्वरूपे सति ‘सन् प्रत्ययः, क्यप् प्रत्ययः, क्यङ प्रत्ययः’ इत्यादिसंज्ञिस्वरूपोच्चारणेनेत्यर्थः। **संदेहः स्यादिति**। यदि प्रत्यासत्तिन्याय आश्रीयते तदा [1]‘‘सिब्बहुलं लेटि’ इति सिपः पकारेण स्यात्। अथ[2]व्याप्तिः, तदा [3]‘तप्तनप्तन’ इति तनपा स्यात्। अतः कपः पकारेण ग्रहणं दुर्लभमिति भावः। ननु यथा सनादीनामेकेन वाक्येन प्रत्ययसंज्ञा विधीयते तथा प्रकृत्यादीनां किं न स्यादित्याशङ्क्य योग्यविभक्त्या निर्देशाभावाद् वाक्यभेदेनैव तेषां संज्ञा विधेयेत्याशयेनाह — **तथा हीति**। संभवत्येकवाक्यत्वे वाक्यभेदो दोषः, न त्वसंभव इत्याशयेन परिहरति — **नैतदिति**। **तत्रैकेनेति**। [4]‘गुपादिभ्यः सन् भवतीत्येकं वाक्यम्, स च सन् प्रत्ययसंज्ञो भवतीति द्वितीयम्। ननु योग्य[5]विभक्त्यभावाद्वाक्यभेदेनापि कथं प्रकृत्यादीनां संज्ञासंबन्धः स्यादित्याशङ्क्य विभक्त्यन्तरस्वीकारे सामर्थ्यं प्रमाणं दर्शयति — **प्रतिसंज्ञीति**। ननु सनादीनां विधेयत्वात् प्राधान्यम्, तदर्थत्वात् प्रकृत्यादीनामप्राधान्यात् प्रत्ययसंज्ञा तेषां [6]न भविष्यतीत्याह — **सनादीति**। यथा प्रत्ययोत्पत्तौ गुणभूतानामपि कर्मादीनामुपपदसंज्ञा भवति तथात्रापि स्यादित्याह — [7]**यथा चेति**। **तुल्यन्यायत्वादिति**। प्रत्ययसंज्ञाप्राप्तेरुपाधिविशेषणयोः समानत्वादित्यर्थः। कः पुनरुपाधिविशेषणयोर्भेद इत्यत्राह — **अर्थविशेष इति**। सोऽर्थविशेष **उपाधिः यः तदन्तवाच्यः** प्रत्ययान्तवाच्यः। अत एव **समानशब्दः** समानविभक्तिकः शब्दो वाचको यस्य स तथा, समानाधिकरणपद इति यावत्। यथा पश्वादिः। दृतिहरिः पशुरिति। अतोऽन्यः प्रत्ययान्तेनावाच्यः व्यधिकरणपदश्च यः, [8]तद्विशेषणमेव, नोपाधिः, यथा श्लाघादि। [9]‘गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु’ गार्गिकया श्लाघते, इति। **अवधिविशेषेति**। यस्यावधिविशेष उपादीयते गुप्तिज्किद्भ्य इत्यादिस्तस्यैव परत्वप्रतिपत्तिर्युक्तेत्यर्थः। ननु प्रतिसंज्ञि [10]‘परश्च’ इत्युपस्थाने प्रकृत्यादीनामपि परत्वं विधेयम्, तत्र संनिधानात् सनादेः परे भवन्त्वित्यत आह — **न चेति**। उपाधेरपि परत्वाभाव इत्यन्वयः, कुत [11]इत्याह — **पौर्वापर्यस्येति**। नन्वनियतमपि लौकिके प्रयोगे परत्वं शास्त्रेण विधीयतामित्यत्राह — **स्थितस्यैवेति**। अन्यथा शब्दानामनित्यत्वप्रसङ्गात्। ननु कार्यशब्दिकदर्शने लौकिकप्रयोगानपेक्षया शास्त्रेण परत्वं नियम्यतामिति, तत्राह — [12]**अर्थस्य चेति**। **यथास्वं लक्षणेनेति**। [13]‘फिषोऽन्त उदात्तः’ इत्यादिना। **प्रकृतिप्रत्यययोः पर्यायेणेति**। यौगपद्य एव परस्परापेक्षस्य परत्वस्य विरोधः, न तु पर्या-

---

[1] पा. सू. ३.१.३४.

[2] आश्रीयत इत्यनुषङ्गः।

[3] पा. सू. ७.१.४५.

[4] सुपादिभ्यः सन्न भवतीति — ङ.

[5] विभक्तिभावात् — ङ.

[6] न भविष्यतीत्यत आहेत्यर्थः।

[7] यथा वेति — ङ.

[8] तदिति नपुंसकत्वं विधेयानुरोधात्।

[9] पा. सू. ५.१.१३४.

[10] पा. सू. ३.१.२.

[11] इत्याशङ्कायामाहेत्यर्थः।

[12] अर्थस्य वेति — ङ.

[13] फिट्सूत्रम् १.

येण प्रवृत्तावित्यर्थः। ननु राजपुरुषादिष्वपि पूर्वपदस्य राजादेः [1]'ङ्याप्प्रातिपदिकात्' इत्यत्र प्रत्ययाधिकारे निर्दिष्टत्वात् प्रत्ययसंज्ञायां [2]'परश्च' इत्यस्य प्राप्तत्वात् कथं तत्र [3]'उपसर्जनं पूर्वम्' इत्यस्य सावकाशत्वं स्यात्। अतो निरवकाशत्वात् समासे सति पूर्वनिपात एव स्यात्, न तु परत्वमित्याशङ्क्याह — **भोक्तुं व्रजतीति**। अत्र समासाभावात् [4]'उपसर्जनं पूर्वम्' इत्यस्याप्रवर्तनादुपपदस्य परत्वं नियमेन स्यादित्यर्थः। **उपाधिवाचिन इति**। अर्थस्य प्रत्ययसंज्ञाया इहानुपयोगादुपाधिवाचिनः शब्दस्यैव [5]सा भवति। तत्र कार्यशब्ददर्शने [6]'परश्च' इत्यस्य विधायकत्वान्नियमः स्यादेवेत्यर्थः। **स्वरान्तरं बाधित्वेति**। विशेषविहितत्वात्। [7]**परत्वेन तस्माद्विधिर्नास्तीति**। यस्मात् परः प्रत्ययो विधीयते तत् प्रत्यये परतोऽङ्गमित्यर्थाश्रयणात्। ननु वाक्यभेदेन प्रत्ययसंज्ञाया विधेयत्वात् प्रथमे वाक्ये पारार्थ्येऽपि प्रकृत्यादीनां द्वितीये स्वार्थता स्यादित्युक्तमित्यत्राह — **तत्र वाक्यभेदेनापीति**। **तेषामेवेति**। सनादीनामेव प्राधान्याद्योग्यविभक्तिनिर्देशाच्च संज्ञां प्रत्याकाङ्क्षा, न प्रकृत्यादीनाम्, तद्विपर्ययात्। तत्र यद्यपि [8]प्रत्ययसंज्ञायाः संज्ञित्वेन प्रकृत्याद्यपेक्षा विद्यते, तथापि प्रकृत्यादीनां तां प्रत्यपेक्षाया अभावात् संज्ञा [9]न भविष्यतीत्याह — **द्वयोश्चेति**। **सीतारावणयोरिवेति**। रावणस्य साकाङ्क्षत्वेऽपि सीताया अनाकाङ्क्षतया संबन्धाभावः प्रसिद्धः। **प्रतिपादकानामिति**। यद्यप्युपेयानां नित्यानां शब्दानां निमित्तनिमित्तिभावो न संभवति, तथापि तत्प्रतिपादनोपायभूतानां रेखागवयस्थानीयानां प्रकृतिप्रत्ययादीनां निमित्तनिमित्तिभावः प्रक्रियायामुपपद्यत एवेत्यर्थः॥

[३, ७–१२]

(उद्द्योतनम्) 'प्रधाने कार्यसंप्रत्ययात्' इत्यस्य 'निमित्तस्य निमित्तिकार्यार्थत्वात्' [10]इत्यादिना पौनरुक्त्यं निराह — **प्रत्ययसंज्ञेति**। पूर्वं प्रत्ययसंज्ञाया [11]आकाङ्क्षामङ्गीकृत्य प्रकृत्यादीनां निराकाङ्क्षत्वात् संज्ञासंबन्धो नास्तीत्युक्तम्, इदानीं प्रत्ययसंज्ञाया अप्याकाङ्क्षा[12] नास्तीत्युच्यत इति भेद इति भावः। लोक[13]शास्त्रसाधारणमर्थमाह — **प्रयोजनेति**। अपूर्वोपदेशेन कथं प्राधान्यम्, अत आह — **तदर्थत्वादिति**। प्रकृत्यादीनां सनाद्युपदेशार्थत्वात् [14]प्राधान्यमित्यर्थः। विकारादावप्रसङ्गं शङ्कते — **नन्विति**। **नैतदिति**। सनादीनामिव विकारादेरपि संज्ञासंबन्धप्रयोजकरूपसद्भावात् तत्संबन्धः स्यादेव। सर्वेषां पृथग्विधियुक्तत्वेन सनादितुल्यत्वादित्यर्थः। अनुपसर्गे सुपि हन्तेः क्यप् स्याद् भावे, ततश्चान्तदेशः। ब्रह्महत्या। त्रपुजतुभ्यामण् स्याद्विकारावयवयोः, षुक् चागमः। त्रापुषम्, जातुषम्। केषांचिद्यथाश्रुतभाष्यव्याख्यानं दूषयति — **यः पर इति**। परत्वनिमित्ता चेत् प्रत्ययसंज्ञा श्नमादीनां न स्यादित्याह — **तथा**

---

[1] पा. सू. ४.१.१.
[2] पा. सू. ३.१.२.
[3] पा. सू. २.२.३०.
[4] पा. सू. २.२.३०.
[5] प्रत्ययसंज्ञेत्यर्थः।
[6] पा. सू. ३.१.२.
[7] प्रदीपे 'पूर्वाक्षेपेऽपि परत्वे तस्माद्विधिर्नास्ति' इत्यत्र 'पूर्वाक्षेपेऽपि परत्वेन तस्माद्विधिर्नास्ति' इति पाठान्तरं निर्णयसागरमुद्रितेऽधो निर्दिष्टम्। तदत्र स्वीकृतम्।
[8] प्रत्ययसंज्ञायां संज्ञित्वेन — ङ.
[9] न भविष्यतीत्यत आह — ङ.
[10] इत्यस्य पौनरुक्त्यं — ऋ, ऌ.
[11] प्रकृत्यादिविषय इत्यादिः।
[12] प्रकृत्यादिविषय इत्यादिः।
[13] 'शास्त्र' इति नास्ति — ऋ.
[14] सनादेरित्यादिः।

चेति। असंभवे हेतुः — **षष्ठचेति**। [1]'षष्ठी स्थानेयोगा' [2]'आद्यन्तौ' इति परिभाषात इत्यर्थः। प्रत्ययसंज्ञाप्रयोजनमाद्युदात्तत्व[3]मप्यागमानां नास्तीत्याह — **आगमानां चेति**। आगमानुदात्तत्वम् [4]'आद्युदात्तश्च' इत्यत्र वक्ष्यते। विकाराणामप्याद्युदात्तत्वं न संभवतीत्याह — **विकारा अपीति**। प्रत्ययसंज्ञाप्रयोजनमङ्गसंज्ञापि विकारादि[5]निमित्तान्यस्य नास्तीत्याह — **अङ्गसंज्ञेति**। **सा** अङ्गसंज्ञा। एवं प्रयोजनाभावात् संज्ञाभावमुक्त्वा प्रयोजनसत्त्वे आगमस्यापि प्रत्ययसंज्ञास्त्येवेत्याह — **प्रयोजनेति**। ननु हेतौ तृतीया, न पञ्चमी, अत आह — **विभाषेति**। ननु प्रत्ययसंज्ञायाः परत्वविज्ञानं फलम्, तस्य कथं संज्ञाहेतुत्वम्, अत आह — **फलमपीति**। प्रवृत्तिप्रयोजकज्ञानविषयत्वं हेतुत्वमित्यर्थः। पञ्चमीं प्रसाध्य स्वोक्तेऽर्थे वार्तिकं संगमयति — **ततश्चेति**। प्रश्नाशयमाह — **परत्वमेवेति**। **पूर्वोदितस्य** स्थानसंबन्धस्यावयवसंबन्धस्य चेत्यर्थः। ननु पञ्चमीनिर्देशेऽपि प्रकृतेः पूर्वं सनादिः किं न स्यात्, दिग्योगलक्षणपञ्चम्या उभयत्र तुल्यत्वात्, अत आह — **पञ्चमीनिर्देश इति**। गुपादिभ्यः सन्नित्यादौ नानुपपत्तिः, अत आह — **षष्ठीति**। क्वचित् षष्ठीनिर्देशेऽप्यनुपपत्त्यभावात् प्रश्न इत्याह — **गापोरिति**। श्रुतयोः संबन्धप्रतिपादन एवेत्येवकारान्वयः। यद्वा, श्रुतयोरेव, न त्वश्रुतयोः [6]प्रकृतिप्रत्यययोः संबन्धप्रतिपादनसामर्थ्यमित्यर्थः। वाक्यभेदेन प्रत्ययविधिरित्याशयेनाह — **प्रकृतीति**। प्रत्ययविधावप्युपयोगोऽस्तु[7], अत आह — **विविभक्तित्वादिति**। पूर्वोत्तरयोर्भेदमाह — **पूर्वमिति**। **विशिनष्टि** पञ्चम्यन्तत्वेनेत्यर्थः। अनेन विकारादिव्यावृत्तिं दर्शयति — [8]**अन्वर्थेति**। ननु शब्दस्य [9]प्रतीतार्थत्यागायोगात् 'वक्तव्यम्' इत्ययुक्तम्, अत आह — **पूर्वेति**। वृद्धचादिसंज्ञावत् प्रसिद्धार्थत्यागेनार्थान्तरे विनियोगाद्वचनं विनार्थग्रहणं न संभवतीत्यर्थः। उक्तरीत्या महत्त्वेऽप्यर्थविवक्षा न लभ्यते, अत आह — **महत्त्वादिति**। आवृत्तौ लब्धमाह — **तेनेति**। एकः [10]प्रत्यायकपरः, द्वितीयः संज्ञापर इत्यर्थः। आवृत्तिस्तन्त्रैकशेषयोरप्युपलक्षणम्। **प्रकारान्तरमपीति**। [11]'गुरुसंज्ञाकरणात् सर्वादीनां धर्मविशेषोऽनुमीयते — नूनमेतानि संज्ञाप्रवृत्तिनिमित्तेन सर्वनामत्वेन युक्तानि; यतस्तेषां तदनुरूपा संज्ञा कृता' इति तत्रोक्तम्। एवमत्रापि गुरुसंज्ञाकरणात् सनादीनां प्रत्यायकत्वरूपप्रवृत्तिनिमित्तयुक्तत्वमनुमीयते। तेन प्रत्यायकत्वं यस्य तस्यैव प्रत्ययसंज्ञा, नाप्रत्यायकस्यागमस्येत्यर्थः। ननु वर्णसमुदायस्यार्थप्रत्यायकत्वे [12]ककारस्यापि प्रत्यायकत्वमस्तीति 'न हि' इत्ययुक्तम्, अत आह — **अन्वयेति**। तत्र हेतुः — **तदभावेऽपीति**। **केवलायाः** [13]अविशब्दादपीत्यर्थः। [14]**कल्पनामात्रम्** अमानकम्। यद्वा, प्रत्ययत्वसिद्धचुत्तरकालिकम्, न तु तदुपयोगि। तदेवाह — **सत्यर्थवत्त्व इति**। [15]**असदुत्तरत्वात्** [16]प्रत्ययत्वे सिद्धे [17]'अनिर्दिष्टार्थाः' इत्यनेन प्रकृत्यर्थत्वसिद्धिः,

---

[1] पा. सू. १.१.४९.

[2] पा. सू. १.१.४६.

[3] अपिशब्दो नास्ति — ऋ.

[4] पा. सू. ३.१.३.

[5] विकारादिनिमित्ताङ्गसंज्ञाप्यन्यस्य नास्तीत्यन्वयः।

[6] 'प्रकृतिप्रत्यययोः' इति नास्ति — ऋ, लृ.

[7] अस्त्यत आह — अ.

[8] अन्यथेति — अ, ऋ, लृ.

[9] प्रतीतावर्थस्य त्यागायोगात् — ऋ, लृ.

[10] प्रत्यायनपरः — अ.

[11] अयं सर्वादिसूत्रस्थकैयटग्रन्थः।

[12] अविकशब्दस्थकप्रत्ययस्यापीत्यर्थः।

[13] अवधिशब्दादपीत्यर्थः — अ.

[14] कल्पनारूपम् — अ.

[15] प्रदीपे 'दुरुत्तरत्वात्' इत्यस्य स्थाने 'असदुत्तरत्वात्' इत्यन्नंभट्टपाठ इति प्रतीयते।

[16] प्रत्ययत्वेन सिद्धे — ऋ.

[17] परिभाषा १२२.

तत्सिद्धौ च प्रत्ययसंज्ञासिद्धिरित्यन्योन्याश्रयग्रस्तत्वादित्यर्थः। ननु शब्देनार्थः प्रत्याय्यः, न [1]कादिः। न ह्यर्थस्य प्रत्ययसंज्ञा, अत आह — **अभिधेयेति**। अनेन कथं [2]कादिसंग्रहः, अत आह — **अयमत्रेति**। यद्यप्युक्तेतरेतराश्रयत्वं न परिहृतम्, तथाप्यव्यविकशब्दयोः पर्यायत्वात् ककारस्य प्रकृत्यर्थत्वं लोकसिद्धमेवेत्याशयः। इच्छासनोऽत्र ग्रहणम्, न गुपादिसनः, तस्य स्वार्थिकत्वेन [3]कादितुल्यतया व्याप्त्यभावादित्याह — **न हीति**। [4]इच्छासनो ग्रहणे हेतुः — **य इति**। नन्वर्थद्वयप्रतिपादनाय शब्दद्वयाधिकारः स्यात्, अत आह — **एक एवेति**। ननु व्युत्पत्तिद्वयेऽपि प्रतिपूर्वादिणो ण्यन्तादचि [5]'णेरनिटि' इति णिलोपे प्रत्ययलक्षणेन [6]'वृद्धौ 'प्रत्यायः' इति स्यात्, अत आह — **ण्यन्तस्येति**। नन्वर्थप्रत्यायकत्वाभावेनागमातिव्याप्तिनिरासात् 'एवमपि' इत्यनेन किमुच्यते, अत आह — **आगमस्येति**॥

[३, ७–१२]

(**रत्नप्रकाशः**) 'प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः' इति न्यायेनापि प्रकृत्यादिवारणं संभवतीत्याह — **अथवेति**। एतेन 'प्रत्ययसंज्ञा स्वविषयप्रक्लृप्तये प्रधानमपेक्षते, न तु पारतन्त्र्यादप्रधानमित्यर्थः' इति निरस्तम्। तस्य भाष्यस्य तदर्थकत्वाभावात्। तत्राकाङ्क्षानाकाङ्क्षयोरचेतनेऽसंभवात्। उक्तपरिभाषया सम्यग् ज्ञानस्य जायमानत्वेनान्यथा तदर्थवर्णनासंभवाच्च। प्राधान्ये कारणं पृच्छति — **किंकृतमिति**। एतेन 'भवतु राज्ञः प्राधान्यम्, तदधीनस्थितिकत्वादन्येषाम्। इह तु कथमिति प्रश्नः' इति निरस्तम्। अस्य प्रश्नस्य दृष्टान्तदार्ष्टान्तिक[7]साधारणताया दृष्टान्तमात्रपरताया वोचितत्वेन दार्ष्टान्तिकविषयतानौचित्यात्। दार्ष्टान्तिकविषयकप्रश्नस्याग्रे करिष्यमाणत्वाच्च। उत्तरमाह — **अर्थकृतमिति**। धनकृतमित्यर्थः। धनवान् हि राजा भवति। एतेन 'प्रयोजनकृतमित्यर्थः' इति निरस्तम्। सेवकानामपि प्रयोजनस्य सत्त्वेन प्राधान्यापत्तेः। ननु राज्ञि भवत्वर्थकृतं प्राधान्यम्, शब्दस्य तु किंकृतं तदिति पृच्छति — **यथा पुनरिति**। उत्तरमाह — **शब्दस्येति**। **अपूर्वोपदेश इति**। [8]'अपूर्वत्वमज्ञातविषयकत्वम्, उपदेशो ज्ञापनम्। ननु किं प्राधान्यमिति मया न पृष्टम्, किं तु किंकृतं प्राधान्यमिति। तत्र [9]चापूर्वोपदेशः प्राधान्यमिति प्राधान्यस्वरूप[10]कथनमयुक्तमिति चेन्न, तत्रोपदेशशब्दस्योपदेशकृतलक्षकत्वादित्याशयेनाह — **यस्येति**। **स प्रधानमिति**। तथा चापूर्वोपदेशकृतं प्राधान्यमिति फलितम्। एतेन 'तदर्थत्वादन्येषां तस्यैव प्राधान्यमित्यर्थः' इति निरस्तम्। तस्य भाष्यस्य तदर्थकत्वाभावात्। अन्येषां तादर्थ्ये मानाभावात्। तत्कार्यार्थत्वात् तादर्थ्यमुपचर्यत इति चेन्न, तेन हेतुना प्रकृत्यादीनां साक्षादेव प्रत्ययसंज्ञाभावस्य साधितत्वेन प्राधान्यस्यापूर्वोपदेशकृतत्वस्य स्पष्टं भाष्यकृतोक्तत्वेन च तदबुद्ध्वा प्राधान्यस्य पूर्वहेतु[11]कृतताकथने चातुर्याभावाच्च। इदानीमुक्ताभ्यां हेतुभ्यां प्रकृत्यादीनां प्रत्ययत्वाभावसाधनमभ्युपेत्य ताभ्यां यत्र तदभावः [12]साधितुं न शक्यते तत्र तत्प्रसङ्गमाह — **यद्येवेति**।

---

[1] कप्रत्ययादिरित्यर्थः।

[2] कप्रत्ययादिसंग्रह इत्यर्थः।

कप्रत्ययादितुल्यतयेत्यर्थः।

[4] इच्छासन्ग्रहणे — ऋ.

[5] पा. सू. ६.४.५१.

[6] वृद्धौ कथं प्रत्यय इति स्यात् — अ.

[7] साधारणतया दृष्टान्त — ब.

[8] अपूर्वं न प्रज्ञातविषयत्वम् — प.

[9] चापूर्व उपदेशः — प, ब.

[10] कथनमुक्तमिति — ब.

[11] कृताकथने — ब.

[12] 'साधयितुम्' इत्युचितम्।

न भवतीति। प्रत्ययसंज्ञेत्यस्तु नामेति शेषः। **प्राप्नोतीति**। प्रत्ययसंज्ञेति शेषः। **एतेषामिति**। तकारशुकोर्विकारागममात्रोपलक्षणत्वाद् बहुवचनमुपपन्नम्। **प्राधान्यं निमित्तिनश्चेति**। तथा चोक्तहेतुभ्यां तेषां प्रत्ययसंज्ञावारणं नेति भावः। एतेन 'ननु ये तावत् प्रकृतेर्विकारागमास्ते प्रकृत्यनुप्रवेशात् प्रकृतिवत् संज्ञया न संभन्त्स्यन्ते। ये तु प्रत्ययस्य, ते तद्ग्रहणेन गृह्यन्त इति [1]'नास्त्यतिप्रसङ्गः' इति निरस्तम्। प्रकृतेः प्रकृतित्वेन प्रकृत्यनुप्रवेशेन वा प्रत्ययसंज्ञाया अवारितत्वेन तदनुप्रवेशहेतुना प्रकृतिदृष्टान्तेन तत्संज्ञासंबन्धाभावसाधनानौचित्यात्। [2]प्रत्ययविकारागमानां प्रत्ययावयवत्वेनाप्रत्ययसंज्ञकत्वेन तद्घटितानां प्रत्ययशब्देन गृह्यमाणत्वेऽपि तेषां प्रत्ययसंज्ञाभावेनातिप्रसङ्गस्य स्फुटत्वाच्च। यदप्युक्तम् 'नैतदस्ति। प्रकृतिविकारागमानां तत्संबन्धित्वेऽपि प्रयोजकत्वात् प्रधानत्वाच्च स्यादेव प्रत्ययसंज्ञा' [इति,] तदपि न, ताभ्यामेव हेतुभ्यां विकारागमेषु प्रत्ययसंज्ञाया आपादितत्वेन तदुपर्यसंबद्धप्रलापरूपाशङ्कां कृत्वा पुनस्ताभ्यामेव हेतुभ्यां समाधाने पुनस्तथैव शङ्कायाः संभवात्। पुनस्तथैव समाधाने शङ्कासमाधानयोरनवस्थापाताच्च। यदप्युक्तम् 'प्रत्ययसंबन्धिनामपि तदवयवत्वे सिद्धे पृथक् प्रत्ययसंज्ञा स्यादेव, योग्यतासंभवात्' इति। तदपि न, प्रत्ययग्रहणेन प्रत्ययागमानां ग्रहणमाश्रित्य कृताया आशङ्कायास्तेषां प्रत्ययग्रहणेन ग्रहणाभावमनिदर्श्य प्रत्ययावयवत्वेन पृथक् संज्ञासाधने पुनः सैवाशङ्का पुनस्तदेव समाधानमित्यनवस्थाप्रसङ्गात्। **विकारागमेष्विति**। विकारागमेषु प्रत्ययसंज्ञा न भवति, परस्य प्रत्ययसंज्ञाविज्ञानाद् विकारागमयोः परत्वेन विधानाभावादित्यर्थः। **प्रत्यय इति**। सनादिरित्यर्थः। हीति शेषः। **न चेति**। न त्वित्यर्थः। एतेन 'यः परः स प्रत्ययः। न च विकारागमाः परे। तेन तेषां प्रत्ययसंज्ञा न भविष्यतीत्येवं न व्याख्येयम्। न हि परत्वनिमित्ता प्रत्ययसंज्ञा। अपि तु प्रत्ययसंज्ञानिमित्तं परत्वम्। तथा च परत्वाभावेऽपि श्नम्बहुजकचां प्रत्ययसंज्ञा भवति। तस्मादेवं व्याख्येयम्— प्रयोजनाभावाद्विकारागमानां प्रत्ययसंज्ञा न भवति। तथा हि—परविज्ञानं प्रत्ययसंज्ञाफलम्। तत् तेषां न संभवति, षष्ठ्या स्थानसंबन्धस्यावयवसंबन्धस्य च प्रतिपादनात्। आगमानां चानुदात्तत्वेन भवितव्यमित्याद्युदात्तत्वाभावः। विकारा अपि येऽनच्कास्ते न स्वरभाजः। ये तु साच्कास्ते प्रवृत्तिकाल एवान्तरङ्गत्वात् स्थानिस्वरयुक्ताः। अङ्गसंज्ञापि तन्निमित्तान्यस्य न प्राप्नोति। सा हि प्रत्ययविधानपरत्वनिबद्धा। प्रयोजनसद्भावात् श्नम आगमत्वेऽपि शकारस्येत्संज्ञार्थं प्रत्ययसंज्ञा प्रवर्तत एव' इति निरस्तम्। भाष्यवार्तिकसूत्राननुगुणत्वात्, निर्युक्तिकत्वाच्च[3]। तथा हि— प्रकृत्युपपदोपाधीनां निमित्तत्वेनाप्राधान्येन च प्रत्ययसंज्ञां वारयतोर्भाष्यवार्तिककृतोर्मते सन् गुपादिभ्यः परः स्यात् प्रत्ययसंज्ञ आद्युदात्तश्चेत्यादिरूपो [4]'गुप्तिज्किद्भ्यः सन्' इत्यादिसूत्राणामर्थ इति निर्विवादम्। प्रथमवाक्ये सनादेर्निमित्तित्वप्राधान्ययोः प्रकृत्यादेर्निमित्तत्वाप्राधान्ययोश्च स्फुटत्वात्। सूत्रस्वरसेनापि स एव तत्सूत्रार्थः। [5]'गुप्तिज्किद्भ्यः सन्' इत्यादिसूत्राणामनुवर्तमानेषु[6] [7]मध्यमेन सहैकवाक्यता संभवति, तेन सह प्राथमिकं वाक्यं भवति, ततो[8]ऽन्याभ्यामन्ये वाक्ये इति वक्तुं युक्तत्वात्। 'विकारागमेषु च' इति प्रकृतवार्तिकतद्भाष्याभ्यामपि स एव तत्सूत्रार्थ इति गम्यते। अन्यथा तदभिमतं परविज्ञानस्य विकारागमयोः प्रत्ययसंज्ञाभावे हेतुत्वमनुपपन्नं स्यात्।

---

[1] 'नास्त्यनिष्टप्रसङ्गः' इति प्रदीपे दृश्यते।
[2] प्रत्ययस्य ये विकारागमास्तेषामित्यर्थः।
[3] चकारो नास्ति— प.
[4] पा. सू. ३.१.५.
[5] पा. सू. ३.१.५.
[6] प्रत्ययः, परश्च, आद्युदात्तश्चेति त्रिषु सूत्रेष्विति शेषः।
[7] परश्चेत्यनेन सहेत्यर्थः।
[8] प्रत्ययः, आद्युदात्तश्चेत्याभ्यामित्यर्थः।

[1]'रुधादिभ्यः श्नम्' इति सूत्रस्यापि श्नम् [2]रुधादिभ्यः परः स्यात् प्रत्ययसंज्ञ आद्युदात्तश्चेत्येवार्थः। तत्र परत्वोक्तेः प्रत्ययसंज्ञाप्रापणेन चरितार्थतया [3]तद् बाधित्वा मित्त्वसामर्थ्येन [4]'मिदचोऽन्त्यात् परः' इत्यन्त्यादचः परः श्नम् भवति। [5]'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यस्य त्वयमर्थः। अकच् अव्ययसर्वनाम्नां टेः प्राक् स्यात् प्रत्ययसंज्ञश्चेति। आद्युदात्तश्चेति वाक्यं तत्राकचश्चित्त्व-सामर्थ्येन [6]'चितोऽन्त उदात्तः' इत्यनेन बाध्यते। [7]'विभाषा सुपो बहुच् पुरस्तात्तु' इत्यस्य तु [8]'बहुच् तु सुबन्तात् पुरस्ताद्विभाषा स्यात् प्रत्ययसंज्ञश्चेत्यर्थः। तथा च वार्तिकस्थं परविज्ञाना-दिति परग्रहणं प्राक्पुरस्तादुपलक्षणमिति सर्वमनवद्यमाद्ये पक्षे। प्रयोजनाभावाद्विकारागमयोः प्रत्ययसंज्ञा नेति पक्षस्त्वतितुच्छः। तथा हि — [9]'हनस्त च' इत्यत्र हनस्तः स्यात् स च क्यप् च प्रत्ययसंज्ञौ स्तो हनः परावाद्युदात्तौ चेति वाक्यार्थस्य हन इति षष्ठीनिर्देशसामर्थ्येन तदन्त्य-नकारनिवृत्तेश्च संभवेन तकारस्य प्रत्ययसंज्ञाद्युदात्तत्वयोर्विधानसामर्थ्येन [10]'एकाच उपदेशेऽनुदात्तात्' इति निषेधं बाधित्वेडागमे सति 'ब्रह्महेत्, [11]ब्रह्महत्या' इति रूपद्वयस्य प्रयोजनत्वं संभवति। [12]'त्रपुजतुनोः षुक्' इत्यत्र च षुगणौ प्रत्ययसंज्ञौ स्तस्त्रपुजतुभ्यां परावाद्युदात्तौ चेति वाक्यार्थस्य षुक आगमत्वसामर्थ्येन तस्य विधीयमानाद्युदात्तत्वस्य तदन्तसंबन्धस्य च संभवेन षुकि परतः पूर्व-स्याङ्गसंज्ञादिवृद्धिसंभवेन च 'त्रापुट्, त्रापवम्' इत्याद्युदात्तरूपद्वयं प्रयोजनं संभवति। एवं च प्रयोजनाभावरूपो हेतुः स्वरूपासिद्ध इति न तेन किंचित् साधयितुं शक्यत इत्यलं प्रसक्तानुप्रस-क्तेन। **किं पुनः कारणमिति**। किं पुनर्विनिगमकमित्यर्थः। **समान इति**। सतीति शेषः। **पर इति**। भवतीति शेषः। **पर इति**। भवन्तीत्यत्रेति शेषः। एतेन '**किं पुनरिति**। पर-त्वमेव भवतु प्रत्ययसंज्ञाप्रयोजनमिति भावः' इति निरस्तम्। तद्भाष्यस्य तदभिप्रायकत्वाभावात्। विनिगमकमाह — **षष्ठीनिर्दिष्टस्येति**। विकारागमताभिमतयोः षष्ठ्यन्तनिर्दिष्टसंबन्धेन विकार-त्वागमत्वे एव भवतः, न तु परत्वमिति भावः। अनवयववाचकपरशब्दयोगे हि पञ्चमी न्याय्या, न तु षष्ठी। एतेन 'षष्ठ्या पूर्वोदितस्य संबन्धस्य प्रतिपादनाद्विरोधात् परत्वाभाव इत्यर्थः' इति निरस्तम्। विरोधाभावस्य प्रागेव दर्शितत्वात्। प्रकृतभाष्यस्यान्यार्थकत्वाच्च। **पञ्चमी-निर्दिष्टाच्चेति**। दिक्शब्दयोगे पञ्चम्या विहितत्वात् तदन्तेन सह यो निर्दिष्टः सनादिः स एव [13]ततः परत्वेन बोध्यत इति भावः। एतेन "पञ्चमीनिर्देशे पर्यायेण [14]पूर्वत्वपरत्वयोः प्राप्तयोः [15]'परश्च' इत्यनेन परत्वं नियम्यत इति नास्ति कश्चिद्विरोध इत्यर्थः" इति निरस्तम्। प्रकृत-भाष्यस्य तदर्थकत्वाभावात्। वाक्यगतानां सर्वेषां पदानां तदुक्तरीत्या नियमार्थताया एव सत्त्वेन तत्कीर्तनेनाप्रसक्तविरोधनिराकरणानौचित्याच्च। तदेवं विकारागमयोः प्रत्ययत्वे निराकृते तद्विधौ

---

[1] पा. सू. ३.१.७८.

[2] 'रुधादिभ्यः' इत्यस्यानन्तरं चकारोऽधिकः—ब.

[3] परत्वं बाधित्वेत्यर्थः।

[4] पा. सू. १.१.४७.

[5] पा. सू. ५.३.७१.

[6] पा. सू. ६. १. १६३. अन्त उदात्त इत्यनु-वृत्तिप्रदर्शनम्।

[7] पा. सू. ५.३.६८.

[8] अकच् तु — ब.

[9] पा. सू. ३.१.१०८.

[10] पा. सू. ७.२.१०.

[11] क्यपि नलोपे ह्रस्वस्य पितीति तुकीति भावः।

[12] पा. सू. ४.३.१३८.

[13] तत्परत्वेन — प.

[14] प्रदीपे 'पूर्वपरत्वयोः' इत्यत्र पूर्वशब्दस्य भाव-प्रधाननिर्देशाभिप्रायेण वा पूर्वपरशब्दयो-र्द्वन्द्वं कृत्वा ततस्त्वप्रत्यये द्वन्द्वान्ते श्रूयमाणस्य तस्य प्रत्येकं संबन्धाभिप्रायेण वा पूर्वत्वेत्य-नुवादः।

[15] पा. सू. ३.१.२.

प्रत्ययविधिरेव न संभवतीति शङ्कते — **प्रत्ययविधानानुपपत्तिरिति**। एतेन 'षष्ठीनिर्देशेष्विति भावः' इति निरस्तम्। 'यत्र विकारागमा विधीयन्ते' इति वाक्यशेषस्य तेनैव वक्ष्यमाणत्वेन तद्विरोधेन षष्ठीनिर्देशेष्विति षष्ठ्यन्तमात्रनिर्देशविषयत्वकथनानौचित्यात्। अनुपपत्तिविषयपरिज्ञानाय पृच्छति — **क्वेति**। एतेन "[1]'गापोष्टक्' इत्यादावानन्तर्यसंबन्धे षष्ठीविज्ञानादुपपद्यत एव प्रत्ययविधिरिति प्रश्नः" इति निरस्तम्। शङ्कित्रा षष्ठीनिर्देशेष्विति प्रागनुक्तत्वेन समाधातुरेतादृशाशयासंभवेन च तस्य प्रागुत्पन्नाज्ञानाङ्कुरपल्लवत्वात्। इतरोऽनुपपत्तिविषयं दर्शयति — **यत्रेति**। तथा च 'विकारागमविधौ' इति वाक्यशेषः फलितः। **किं पुनः कारणमिति**। 'न कर्तव्यः' इत्यादिना वक्ष्यमाणोऽभिप्रायः। [2]इतरस्तावत्तत्र कारणमाह — **विकारागमयुक्तत्वादिति**। विकारागमयुक्तत्वेऽपि पञ्चमीनिर्देशे सति प्रत्ययविधानं संभवत्येवेत्यत आह — **अपञ्चमीनिर्दिष्टत्वाच्चेति**। पञ्चमीनिर्देशाभावाच्चेत्यर्थः। स एवाह — **तस्मात् तत्रेति**। **पञ्चमीनिर्देशः कर्तव्य इति**। 'हनस्त च, तस्मात्' इति वक्तव्यमिति भावः। विनैव सूत्रे तस्माद्ग्रहणमनुवर्तमानपञ्चम्यन्तेनैव प्रत्ययविधिरुपपद्यत इत्याशयेनाह — **न कर्तव्य इति**। इतरोऽतिप्रसङ्गमाह — **यद्येवमिति**। **धातुमात्रात् क्यप् प्राप्नोतीति**। हन्ग्रहणस्यादेशनिधावुपक्षीणत्वादन्यस्य धातुविशेषकस्याभावाच्चेति भावः। **परिगणनं करोतीति**। धातुविशेषनिर्देशेन क्यपं विदधातीति भावः। यथाश्रुताश्रयणे तु हनधातोः क्यब्न साधितः स्यात्। ननु धातुविशेषात् पुनः क्यब्विधानेन धातोः क्यप् स्यादित्यस्यासार्वत्रिकत्वमात्रं ज्ञापनीयम्, न तु हन्तेरेव क्यब् भवतीतीत्यस्वरसादाह — **अथवेति**। **[अभि] संभन्त्स्याम इति**। प्रत्यासत्त्येति शेषः। **हनस्त इति**। हनस्तः स्यात्, तस्माद्धातोः परः क्यप् स्यात्, स प्रत्ययसंज्ञक आद्युदात्तश्चेति तत्सूत्रार्थो ज्ञेयः। ननु हन्तेर्धातोः परः क्यप् स्यात् हनस्तकारः स्यात् स प्रत्ययसंज्ञ आद्युदात्तश्चेत्यपि वाक्यार्थसंभवाद्विकारागमयोः प्रत्ययसंज्ञा स्यादेवेत्यस्वरसादाह — **अर्थाश्रयत्वाद्वेति**। **तमर्थमिति**। भावकर्मकर्त्रादिकं यथायथमर्थः, तमित्यर्थः। **स प्रत्यय इति**। अन्तर्भावितण्यर्थादिणः पचाद्यच्। अर्थवान् प्रत्यय इत्येतादृशं वचनमभ्युपगतमिति मन्यमान आह — **किं वक्तव्यमेतदिति**। इतरोऽन्वर्थसंज्ञाबलात् तत् सिद्धमित्याह — **न हीति**। **अन्वर्थसंज्ञा यथा विज्ञायेतेति**। तथा च विकारागमयोः प्रवर्तमानायां संज्ञायामन्वर्थता न संभवतीति सा तत्र न प्रवर्तत इति भावः। एतेन 'महत्त्वात् प्रत्ययशब्दस्यावृत्तिरनुमीयते। तेन यः प्रत्यायकः स प्रत्यय इति' इति निरस्तम्। अन्वर्थसंज्ञाबलात् हन्तेस्तकारः स्यात्, तस्माद्धातोः परः क्यप् स्यात् स प्रत्ययसंज्ञ आद्युदात्तश्चेत्येव वाक्यक्रम इत्यत्र भाष्यतात्पर्यसंभवेन प्रत्ययपदावृत्तौ मानाभावात्। 'यः प्रत्यायकः स प्रत्ययः' इति पृथग्वाक्याङ्गीकारे प्रकृत्युपपदोपाधीनामपि प्रत्ययसंज्ञापत्तेश्च। अत्यन्तस्वार्थिकानां कनादीनामन्वयव्यतिरेकाभ्यामर्थवत्त्वनिर्णयासंभवेन तत्र प्रत्ययसंज्ञा नोपपद्यत इत्याशयेनाह — **यदीति**। **न हि ते किंचित् प्रत्याययन्तीति**। यदि किंचित् ते प्रत्याययन्ति तर्हि तेषां प्रयोगे यत् प्रतीयते तत् तेषामप्रयोगे न प्रतीयेत। प्रतीयते तु तत्। अतस्ते न किंचित् प्रत्याययन्तीति भावः। कनादयोऽपि प्रकृत्यर्थेनैवार्थवन्तः, प्रकृतिरेव हि स्वार्थमभिदधती कनादिनाभिधापयतीत्याशयेन समाधत्ते — **एवं तर्हीति**। **प्रत्याय्यत इति**। अन्तर्भावितण्यर्थादिणो णिचि ततः कर्मणि लट्। ज्ञानार्थत्वात् प्रतिपूर्वादिणः [3]'गतिबुद्धि' इत्यादिसूत्रेणाणौ कर्तुः कनादेर्ण्यन्ते कर्मत्वम्। तत्प्रयोजकत्वं तु प्रकृतेरिति ज्ञेयम्। **प्रत्यय इति**। [4]अन्तर्भावितद्विण्यर्थादिणः [5]'एरच्'। एतेन 'अभि-

---

[1] पा. सू. ३.२.८.

[2] इतरस्तावदत्र — ब.

[3] पा. सू. १.४.५२.

[4] अन्तर्भावितौ द्वौ ण्यर्थौ येनेति विग्रहः।

[5] पा. सू. ३.३.५६.

धेयधर्मस्याभिधान उपचारादेवमुक्तम्। अयमत्रार्थः — यस्यार्थः प्रकृत्या प्रत्याय्यते स प्रत्याय्यमानार्थत्वात् प्रत्याय्यमानः स्वार्थिकः प्रत्ययसंज्ञो भवति' इति वदन् निरस्तः। 'न हि' इति पूर्वप्रतीकगतेन 'अन्वयव्यतिरेकाभ्यां कादीनां वाच्योऽर्थो नावधार्यते। तदभावेऽपि केवलाया एव प्रकृतेस्तदर्थावगमात्। नापि तरबादिवत् [१]कश्चिद्द्योत्योऽर्थ इति भावः' इति शङ्कितृभावाभिधानादुत्तरेण यदप्युच्यते — [२]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति प्रकृत्यर्थ एव तेषामर्थः' इति। तदपि कल्पनामात्रम्, सत्यर्थवत्त्वे प्रत्ययसंज्ञया भाव्यमित्यभिहिते तदभावेऽप्यर्थावगमादर्थवत्त्वं कादीनां नोपपद्यत इत्युक्तस्य [३]'दुरुत्तरत्वात्' इति स्वग्रन्थेन विरोधात्। तेन हि ग्रन्थेन कथंचिदपि कादीनामर्थवत्ता न संभवतीति प्रतिपादितम्। अनेन तु तेषामर्थवत्त्वमाश्रित्यैव समाहितमिति स्पष्ट एव तयोर्विरोधः। यदि शङ्कित्रभिप्रायवर्णनोत्तरं स ग्रन्थो नोपन्यस्तो वा स्यात् तस्यात्र परिहारो वा कृतः स्यात्, तदायं ग्रन्थः कथंचिद्युज्येत। किं चाभिधेयधर्मस्याभिधान आरोपणे बकबन्धप्रयासः, अभिधानत्वेनैव प्रत्ययत्वोपपत्तेः। अस्मन्मते तु सनादिवत् स्वातन्त्र्याभावोऽर्थविशेषे कादीनामुच्यत इति भवति चमत्कारः। ननु तदाश्रितस्य बकबन्धप्रयासस्यापि भवदभिहितपारतन्त्र्यख्यापनमेव फलम्। तत्तु 'अयमत्रार्थः' इत्यादिना दर्शित एवेति चेन्न, प्रत्याय्यत इति पदेन तदभिमतार्थस्यागम्यत्वात्। ऋजुमार्गेण सिध्यतोऽर्थस्यातिक्लेशेन साधने चमत्काराभावाच्च। तस्माद्यत्किंचिदेतत्। इदानीं प्रत्याय्यते यः स प्रत्यय इति व्युत्पत्त्याश्रयणे इच्छासनादीनां स्वतन्त्राणां प्रत्ययसंज्ञा न प्राप्नोतीत्याह — **एवमपीति**। एवं चेदित्यर्थः। **उभयसाधन इति**। अर्थभेदेऽपि शब्दैक्यमिति मतस्य व्यवहारसिद्धस्याश्रयणाद् यथोचितं प्रवृत्तिनिमित्तमाश्रित्य सनादिषु कनादिषु च प्रत्ययसंज्ञा व्यवस्थापयितुं शक्यत इति भावः। यत्तु 'ण्यन्तस्य च निपातनादचि णिलुक्' इति। तन्न, धातूनामनेकार्थत्वस्य क्लृप्तत्वेन केवलादचि कृतेऽपि प्रत्ययशब्दस्योक्तार्थकतासंभवेन तत्र णिज्लुग्निपातनकल्पनायां मानप्रयोजनयोरभावात्। अर्थाश्रयेण प्रत्ययसंज्ञायां विधीयमानायामपि विकारागमयोः सा संज्ञा प्रसज्यत एवेति मन्यमान आह — **एवमपीति**। एतेन 'आगमस्यार्थवत्त्वं निराकर्तुमुपन्यासः' इति निरस्तम्। विकारस्याप्यर्थवत्त्वनिराकरणार्थत्वे बाधकाभावात्। **तमिति**। विकाररूपमित्यर्थः। उत्तरमाह — **अन्यत्रापीति**। [४]षकाररहितस्थलेऽपीत्यर्थः। **न पुनः षकार इति**। तमर्थं प्रत्याययतीत्यनुषज्यते। तत्र [५]हेतुरकाररहितस्थले षकारेणार्थावचनं ज्ञातव्यः। एवं विकारेऽप्यूहनीयम्॥

[३, ७–१२]

(नारायणीयम्) ननु 'प्रधाने कार्यसंप्रत्ययात्' इत्यस्य पूर्वस्मात् परिहारात् को विशेष इत्यत्राह — **प्रत्ययसंज्ञेति**। पूर्वं प्रत्ययसंज्ञाया आकाङ्क्षामभ्युपगम्य प्रकृत्यादीनां निराकाङ्क्षत्वात् तत्संबन्धाभाव उक्तः। इदानीं तु प्रत्ययसंज्ञाया अप्याकाङ्क्षा नास्ति, पूर्ववाक्ये प्रधानतयावगतस्यैव संज्ञित्वेन तयाकाङ्क्ष्यमाणत्वादिति सुतरां [६]तेषां तत्र संबन्धाभावोपपत्तिरिति प्रतिपाद्यत इति स्पष्टो भेद इत्याशयः। **प्रयोजनकृतमिति**। फलकृतमित्यर्थः। भृत्यादयो हि परिपालनाद्यर्थं राजानमपेक्षन्त इत्येतद्राज्ञः प्राधान्यम्। एवं सर्वत्र द्रष्टव्यमित्याशयः। **प्रयोजकत्वादिति**। योग्य-

---

[१] कश्चिद्द्योत्यार्थ इति — प.
[२] परिभाषा १२२.
[३] दुरुद्धरत्वात् — ब.
[४] विकाररहित — प, ब.
[५] हेतुर्ज्ञातव्य इत्यन्वयः।
[६] प्रकृत्यादीनां प्रत्ययसंज्ञायामित्यर्थः।

विभक्तिनिर्देशात् संज्ञां प्रति प्रयोजकत्वादित्यर्थः। 'परविज्ञानात्' इत्यस्य प्रतिभासिकमर्थमुपन्यस्य दूषयित्वा समीचीनमर्थं दर्शयति — **यः पर इति। न हीति।** 'यः परः स प्रत्ययसंज्ञः' इत्येवं न सूत्रार्थः, कथं तर्हि, यः प्रत्ययः स पर इति। **[1]आगमानां चेति।** [2]'आगमा अनुदात्ता भवन्ति' इति वक्ष्यमाणत्वात्। **येऽनच्का इति।** [3]'हनस्त च' इत्यादयः। **ये तु साच्का इति।** [4]'मूर्तौ घनः' इत्यादयः। प्रयोजनाभावात् प्रत्ययसंज्ञा न भवतीत्येतदेव विशदयितुमाह — **प्रयोजनसद्भावे त्विति।** उक्तेऽर्थे वार्तिकं योजयितुमाह — **विभाषा गुण इति। फलमपीति।** न केवलमुत्पादकमेव। भाष्यमप्युक्तेऽर्थे नेयम्। नन्वानन्तर्ये षष्ठीविज्ञानाद्विकारागमानामपि [5]परत्वं विद्यत इति किमुच्यते 'षष्ठीनिर्दिष्टस्य च तद्युक्तत्वात्' इति, तत्राह — **षष्ठ्या च पूर्वोदितस्येति।** [6]'षष्ठी स्थानेयोगा' [7]'आद्यन्तौ टकितौ' इति परिभाषाद्वयोपस्थानात् स्थानसंबन्धस्यावयवसंबन्धस्य च प्रतिपादनादित्यर्थः। [8]पञ्चमीनिर्देशेषु परत्वस्योपपत्तिं वक्तुं 'पञ्चमीनिर्दिष्टाच्च' इत्युक्तमित्याह — **पञ्चमीनिर्देश इति।** दिक्छब्दाध्याहारेण पञ्चमीविज्ञानात्। **नास्ति कश्चिदिति।** यथा षष्ठीनिर्देशे परत्वस्य विरोधः, न तथा पञ्चमीनिर्देश [9]इत्यर्थः। न सर्वत्र प्रत्ययविधानानुपपत्तिश्चोद्यते, किं तर्हि, प्रकृतत्वात् षष्ठीनिर्देशेष्वित्याह — **षष्ठीति।** षष्ठीनिर्देशेष्वपि न सर्वत्र तदनुपपत्तिरिति [10]प्रतिपादयितुं चोद्यसमाधाने इत्याह — **गापोष्टगित्यादाविति। वाक्यस्योपयोगादिति।** एकस्य वाक्यस्यैकार्थत्वनियमात्। **प्रकृतिप्रत्ययानुवृत्तिसामर्थ्यादिति।** धातोः क्यप्, प्रातिपदिकादणिति। **विविभक्तित्वाच्चेति।** हन इति षष्ठी धातोरिति पञ्चमीति भिन्नविभक्तित्वाद्विशेषणविशेष्यत्वायोग इत्यर्थः। पूर्वोत्तरयोः परिहारयोर्भेदं स्फोरयति — **पूर्वमिति। धातुं च विशिनष्टीति।** वाक्यान्तरे विभक्तिविपरिणामेन संबन्धस्योपपन्नत्वात्। नानन्तरप्रकृतापेक्षया [11]'अर्थाश्रयत्वाद्वा' इति परिहारान्तरकथनम्, किं तर्हि, परमप्रकृतापेक्षयेत्याशयेनाह — **अन्वर्थसंज्ञेति। स्वरूपेणैवेति।** स्वरूपासञ्जनस्य तत्र प्रवृत्तिनिमित्तत्वाद्व्युत्पत्तिसिद्धमर्थं परित्यज्य संज्ञात्वं संज्ञाशब्दाः प्रतिपद्यन्त इत्यर्थः। **महत्त्वसूचितमिति।** तन्त्रमेकशेषो वा। 'किंचित्' इति वाच्यं द्योत्यं चेति विवक्षितमित्याह — **अन्वयेति। नापि तरबादिवदिति।** तरबादिषु प्रकर्षादेः [12]प्रकृत्यर्थविशेषणत्वेनोपादानात् प्रत्ययद्योत्यत्वमभ्युपगम्यते, नैवं कादिष्वित्यर्थः। **कल्पनामात्रमिति।** न प्रमाणसिद्धमित्यर्थः। प्रमाणाभावमेवोपपादयति — **सत्यर्थवत्त्व इति।** ननु प्रत्याय्यमानस्य प्रत्ययसंज्ञायामर्थस्य संज्ञा स्यात्, तत्तु[13] न युक्तमित्यत आह — **अभिधेयधर्मस्येति।** [14]सनादीनामप्राप्तिमुपपादयति — **न हीति।** नन्वेकस्य शब्दस्यैकार्थत्वात् कथमुभयसाधनः स्यादित्यत आह — **एक एवेति। अचि गिलुगिति।** कर्तृसाधने पचाद्यच्, कर्मसाधने [15]'एरच्'।

---

[1] आगमाश्चेति — ङ.
[2] महाभाष्यम् ३.१.३.
[3] पा. सू. ३.१.१०८.
[4] पा. सू. ३.३.७७.
[5] परत्वं न विद्यत इति — ङ.
[6] पा. सू. १.१.४९.
[7] पा. सू. १.१.४६.
[8] 'घ' मातृकायां प्रत्ययसूत्रारम्भात् 'पञ्चमीनिर्देशेषु' इत्यन्तो ग्रन्थस्त्रुटितः।
[9] 'इत्यर्थः। न' इति लुप्तम् — घ.
[10] प्रतिपादयितुश्चोद्य — ङ.
[11] अर्थाश्रयत्वाच्चेति — ङ.
[12] 'प्रकृत्यर्थ' इत्यतः 'न प्रमाणसिद्धमित्यर्थः' इत्यन्तं नास्ति — ङ.
[13] तुशब्दो नास्ति — घ.
[14] सनादीनां प्राप्तिमुप — घ.
[15] पा. सू. ३.३.५६.

[1]"एरजण्यन्तानाम्' इति तु नास्त्येव। [2]"कल्पादिभ्यः प्रतिषेधः' इत्येवास्ति। **प्रत्ययस्येति**। अन्वयव्यतिरेकसद्भावात् प्रत्ययस्यार्थवत्त्वमवसीयते, आगमस्य तु तदभावादर्थवत्त्वाभाव इत्यर्थः॥

परश्च ३.१.२.

[३, १२-१६]

(उद्द्योतनम्) सूत्रं विनापि तदर्थलाभात् प्रश्न इत्याह — **पञ्चमीति**। षष्ठीस्थलेऽपि नियमार्थत्वमाह — **तथेति**। नन्वेतावता प्रत्ययान्तरस्य कथं प्रकृतिपूर्वत्वाभावः, बहुच् तु पुरस्तादेवेति नियमार्थत्वोपपत्तेः, अत आह — **बहुजेवेति**। देशनियमोऽयम्, न प्रत्ययनियम इत्यर्थः। ननु गुपादिभ्य इति दिग्योग[3]लक्षणा पञ्चमी, [4]तत्र कथं मध्ये सनः प्राप्तिः, अत आह — **षष्ठीति**। [5]"गापोष्टक्' इत्यादौ। 'प्राक् टेः' इत्यस्य नियमार्थत्वमुपपादयति — **अव्ययेति**। [6]अत्रापि देशनियम इत्याह — **अकजेवेति**। ननु मध्यविशेषश्रुतौ मध्यसामान्यनियमः किमर्थमुच्यते, अत आह — **मध्यमात्रेति**। **अन्यथा** विशेषाश्रयणे। [7]**मध्यान्तर इति**। [8]"व्रीहिशाल्योर्ढक्' इत्यत्र हकारेकारयो रेफवकारयोश्च मध्ये ढक् स्यादित्यर्थः। [9]तथापि 'टेः प्राक्' इत्युक्तौ मध्यसामान्यं कथं लभ्यते, अत आह — **मध्येति**। देशनियमपक्षे 'एवमपि' इत्यनुपपन्नमित्याशङ्क्य प्रत्ययनियममापाद्याभिधानपरतया व्याचष्टे — **बहुजकचोरिति**। प्रत्ययनियममभिनयति — **पुरस्तादेवेति**। [10]ननु 'ये प्रत्यया नियम्यन्ते' इति वक्तव्यम्, न तु 'येषां देशो नियम्यते' इति। तस्मिन् पक्षे [11]दोषाप्रसङ्गात्, अत आह — **प्रत्ययेति**। प्रत्ययस्यानियतदेशसंबन्धप्रसङ्गे नियतदेशसंबन्धः प्रत्ययनियमेन क्रियत इत्येतावता प्रत्ययनियम एव देशनियमशब्देन उक्त इत्यर्थः। 'मातुः' [12]इत्यस्य प्रकृतोपयोगमाह — **अनेनेति**। ननु पञ्चमीनिर्देशे कथं प्रत्ययपरत्वसिद्धिः, अत आह — **तस्मादिति**। स्वाभाविकं परत्वं चेत् किं [13]'तस्मादित्युत्तरस्य' इत्यनेन, अत आह — **नित्या इति**। [14]अपूर्वोत्पत्तौ न [15]'तस्याः प्रवृत्तिरित्युक्तं निराह — **तस्मादिति**। यद्वा, उत्तरस्येति नेयं कर्तरि षष्ठी, अतः कथं [16]'परः स्यादिति लभ्यते, अत आह — **तस्मादिति**। तस्मिन् सूत्रे प्रतियोगिविशेषानुपादानादिति भावः। **अर्थेति**। योग्येत्यादिः। **यत्रेति**। [17]"द्व्यचन्तः' इत्यादौ। **असत एवेति**। सनादेः। **नन्वेवमिति**। प्रत्ययविधावपि [18]"तस्मात्' इत्यस्योपस्थानाङ्गीकारे सन्निति प्रथमाया अनुपयोगः। अनुपस्थाने तु विधेयसमर्पकत्वेनोपयोग इत्यर्थः। **निर्देशेति**। प्रातिपदिकार्थमात्रोपस्थापकत्वेन लाघवादिति भावः। ननु प्रत्ययविधौ पञ्चम्याः

---

[1] इदम् एरच्सूत्रे प्रदीपे उक्तम्।
[2] का. वा. ३.३.५६-३.
[3] लक्षणपञ्चमी — अ.
[4] तत्र सनः कथं प्राप्तिः — अ.
[5] पा. सू. ३.२.८.
[6] अतोऽपि — अ.
[7] मध्यान्तरेणेति — अ, ऋ, लृ.
[8] पा. सू. ५.२.२.
[9] तथापीति। प्रागित्युक्तौ — अ, ऋ, लृ.
[10] ननु यः प्रत्ययो नियम्यत इति — अ.
[11] दोषाप्रसङ्गादाह — अ.
[12] इत्यत्र — ऋ.
[13] पा. सू. १.१.६७.
[14] पूर्वोत्तरोत्पत्तौ — अ.
[15] तस्मादित्युत्तरस्येति परिभाषाया इत्यर्थः।
[16] परस्या इति — ऋ, लृ.
[17] पा. सू ६.३.९७.
[18] पा. सू. १.१.६७.

षष्ठीप्रकल्पकत्वाङ्गीकारः [१]"तस्मादित्युत्तरस्य' इत्यादौ तदनङ्गीकारेण विरुध्यते, अत आह **यत्त्विति**। ननु परस्य संज्ञाविधौ [२]प्रत्ययस्य देशनियमः कथं सिध्येत्, अत आह — **अयमर्थ इति**। [३]'गापोष्टक्' इत्यादावविकारागमाभावात् कथं परत्वसिद्धिः, अत आह — [४]**तदेवेति**। अनुगतिमेवाह — **गापोरिति**। [५]पूर्वं परवचनानर्थक्यस्योक्तत्वात् 'वा' इत्ययुक्तम्, अत आह — **वाशब्द इति**। परशब्दस्य प्रत्यक्ष[६]परत्वेनावैयर्थ्यमाह — **परेणेति**। **सताया इति**। तथा च कार्यापेक्षया संबन्धषष्ठी उत्पत्त्यपेक्षया कर्तरि षष्ठी वा न संभवतीति परिभाषानुपस्थानमित्यर्थः। नन्वसतोऽनेनापि कथं परभूतस्य लोपप्रतीतिः, अत आह — [७]**अस्मिन् हीति**। परलोपस्य प्रयोजनमाह — **तत्रेति**। कार्यदर्शने [८]"तस्मात्' इत्यस्यानुपस्थानमुक्तं स्थापयितुं शङ्कते — **नन्विति**। **लोपेति**। उत्पत्तिक्षणानन्तरमेव लोपो भवतीति न तेषां भावः प्रत्यक्षगोचर इत्यर्थः। वस्तुतः क्षणमात्रावस्थानमपि नास्ति, तत्रापि मानाभावात्। नित्यदर्शन इव कार्यदर्शनेऽपि लोपान्वाख्यानेन कार्यमात्रस्यैव[९] प्रापणादित्याह — **स्वरूपलाभो हीति**। पाक्षिकप्रयोजनं शङ्कते — **नन्विति**। पक्षे आनर्थक्यहानाय लिङ्गत्वमावश्यकमित्याह — [१०]**एवमिति**। आत्यन्तिकानर्थक्यस्थलमाह — **स्पृशोऽनुदक इति**। क्विबादावनेकेभ्यो धातुभ्यो भिन्नाः पञ्चम्य इति काचित् पूर्वाध्याहारेण काचित् पराध्याहारेणेति संभवति। अत्र त्वेका पञ्चमी, [११]पूर्वाध्याहारेऽनुबन्धवैयर्थ्यात् पराध्याहार एव वाच्य इति ज्ञापकत्वमित्यर्थः॥

[३, १२–१६]

(रत्नप्रकाशः) **किमर्थमिति**। 'नैतदस्ति' इत्यादिना वक्ष्यमाणोऽभिप्रायः। **पूर्वो मा भूदिति**। परशब्दाभावे दिक्शब्द[१२]योगे पञ्चमीनिर्देशसामर्थ्येन परशब्दस्येव पूर्वशब्दस्याप्यध्याहारः स्यात्, विनिगमनाविरहात्। अतः परग्रहणं कर्तव्यमिति भावः। **यमिच्छतीति**। तथा च बहुजेव पुरस्ताद् भवति नान्य इति नियमाद् अन्यः पर एव भविष्यतीति मन्यते। **मध्ये तर्हीति**। [१३]'गापोष्टक्' इत्यादौ षष्ठीनिर्देशे मध्यशब्दाध्याहारेण वाक्यार्थः स्यादिति संभावना। **मध्ये [ऽपि] यमिच्छतीति**। टेः प्राग्विधानेऽपि मध्ये विधानं भवतीति मध्यापेक्षया नियमो भविष्यति, अकजेव मध्ये नान्य इति मन्यते। एतेन "[१४]'अव्ययसर्वनाम्नाम्' इति मध्यशब्दाध्याहारेण षष्ठीविधानादकच् प्राक्टेः सिद्ध एवेति प्राक्टेरिति नियमार्थम् — अकजेव प्रकृतिमध्ये भवति, नान्य इति मध्यमात्रपरिग्रहेण च[१५] नियमो विज्ञायते, न त्वकजेव प्राक्टेरित्येवं मध्यविशेषाश्रयेण। अन्यथा मध्यान्तरे प्रत्ययान्तरं स्यात्। मध्यविशेषे तु यन्मध्यसामान्यमस्ति तदाश्रयेण नियमे विज्ञायमाने नास्ति दोषः" इति निरस्तम्। मध्यशब्दाध्याहारमन्तरेण यथाश्रुतसूत्रेण टेः प्रागकचि विधीयमानेऽपि तस्य वस्तुगत्या मध्ये विहितत्वसत्त्वेन तदाश्रयेणाभिमतनियमसिद्धेः।

---

[१] पा. सू. १.१.६७.
[२] प्रत्ययस्यादेश्च नियमः — अ.
[३] पा. सू. ३.२.८.
[४] तयैवेति — अ, ऋ, लृ.
[५] पूर्वं द्विवचनानर्थक्यस्योक्तत्वात् — अ.
[६] परत्वेन वैयर्थ्यमाह — अ.
[७] तस्मिन् हीति — अ.
[८] पा. सू. १.१.६७.
[९] एवकारो नास्ति — अ.
[१०] विधिरिति — अ; एभिरिति — ऋ, लृ.
[११] पूर्वाध्याहारेण संबन्धवैयर्थ्यात् — अ.
[१२] योगपञ्चमी — ब.
[१३] पा. सू. ३.२.८.
[१४] पा. सू. ५.३.७१.
[१५] चशब्दो नास्ति — ब.

तादृशवास्तविकधर्माश्रयेण [1]'कृत्तद्धित' इति सूत्रे समासग्रहणस्य नियमार्थताया भाष्यकारादिभिः सर्वैराश्रितत्वात्। [2]मध्यशब्दाध्याहारेणाकचि विधीयमाने तस्य [3]टेः प्राग् यत्र कुत्रचिन्मध्ये प्रसङ्गाच्च। अनियतदेशत्वेन बहुजादीनां प्राप्ततया पुरस्तादेव बहुच्, मध्य एवाकच् इति [4]नियमस्यैवोचितत्वेन सनादीनामनियतदेशत्वं मा भूदिति 'परश्च' इति कर्तव्यमेवेत्याशयेनाह — **एवमपीति**। [5]अकजादीनां देशनियमे सिद्धेऽपीत्यर्थः। **येषामिति**। श्नमो मित्त्वसामर्थ्येनान्त्यादचः परत्वेन विधानाद् बहुवचनोपपत्तिः। **देशो नियम्यत इति**। यत्रैवकारः स एव नियम्यत इति व्यवहारानुसारेणेदम्। यत्रैवकारस्ततोऽन्यत्र नियम इति व्यवहारपक्षे तु ये प्रत्यया देशविशेषे नियतास्ते नियतदेशाः स्युरित्यादि ज्ञेयम्। एतेन 'बहुजकचोर्विधेयतया प्राधान्यात् तावेव देशविशेषे नियम्येयाताम् — पुरस्तादेव बहुच्, प्राक्टेरेवाकच्, इत्येवमिति भावः' [इति निरस्तम्]। विधेयस्य प्राधान्यात् तेनैवैवकारयोगः स्यादित्यपि वक्तुं शक्यत्वात्। उक्तानियतदेशत्वे दृष्टान्तमाह — **तद्यथा मातुर्वत्स इति**। एतेन 'अनेन प्रकृतेः कार्यशब्ददर्शने मातृस्थानीयत्वमुच्यते' इति निरस्तम्। नित्यशब्दत्वपक्षेऽपि प्रकृतेर्मातृस्थानत्वसंभवेन 'कार्यशब्ददर्शने' इत्यस्यानर्थक्यात्। न हि गौर्वत्समिव प्रकृतिः प्रत्ययं प्रसूत इत्युक्तमस्ति भाष्ये, येन तत् सार्थकं भवेत्। [6]'तस्मादित्युत्तरस्य' इति परिभाषयेष्टव्यवस्था सिध्यतीति परग्रहणं व्यर्थमेवेति मन्यमान आह — **परवचनमनर्थकमिति**। परिहरति — **विषम इति**। **सतस्तत्रेति**। [7]'द्व्यन्तरुपसर्गेभ्यः' [8]इत्यत्रेति शेषः। **इहेति**। सनादिविधाविति शेषः। **कस्य सत इति**। न कस्यापीति भावः। तथा च विधीयमानादेशागममात्रव्यवस्थापिका सा परिभाषा, न तु प्रत्ययस्यापीति फलितम्। सिद्धानां शब्दानां शास्त्रेणान्वाख्यानमात्रस्य कर्तव्यत्वेन परत्वेनावस्थितानामेव सनादीनां [9]'गुप्तिज्किद्भ्यः सन्' इत्यादिना साधुत्वमात्रान्वाख्यानात् तत्रत्यपञ्चम्या परग्रहणस्यैवाक्षेपेण प्रकृतं परग्रहणं व्यर्थमेवेति शङ्कते — **इहापीति**। [10]'गुप्तिज्किद्भ्यः सन्' इत्येवमादावपीत्यर्थः। **परत्वं स्वाभाविकमिति**। न तु वाचनिकमिति भावः। **वाचनिके च नार्थ इति**। वाचनिकताभ्युपगन्तुं न युज्यते, [11]'सिद्धे शब्दार्थसंबन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति सिद्धान्तव्याघातादिति भावः। यथाश्रुतं तु न युज्यते, वचनं विना वाचनिकत्वस्वीकारानौचित्यात्। प्रतिज्ञातं प्रयोजनाभावमुपपादयति — **एतद्धीति**। **परस्येति**। परशब्दस्येत्यर्थः। **असाविति**। सनादिरित्यर्थः। [12]**परः स्यादिति**। तत्तु न युज्यते, सिद्धशब्दान्वाख्यानसिद्धान्तविरोधादिति शेषः। एतेन "[13]'तस्मादित्युत्तरस्य' इत्यस्य प्रदेशेष्वर्थाभिव्यक्तिर्भवति। ततश्च यत्र सदेव कार्यित्वेनोपादीयते तत्रोत्तरस्य कार्यं भवतीति [14]कार्यापेक्षा संबन्धे षष्ठी। यत्र त्वसत एवोत्पत्तिः क्रियते तत्रोत्तरस्य भावो भवतीति भावापेक्षया कर्तृषष्ठी विज्ञायत इत्यर्थः" इति निरस्तम्। 'नित्याः शब्दाः प्रयोगस्थाः, तत्र स्वभावत एव गुपादिभ्यः परस्य सनादेः साधुत्वमात्रं प्रतिपाद्यत इत्यर्थः' इति पूर्वग्रन्थविरो-

---

[1] पा. सू. १.२.४६.
[2] मध्यशब्दाध्याहारेण क्वचिद्विधीयमाने — ब.
[3] 'टेः प्राक्' इति नास्ति — ब.
[4] नियमस्योचितत्वेन — प.
[5] 'अकजादीनाम्' इत्यादि 'बहुवचनोपपत्तिः' इत्यन्तं नास्ति — प.
[6] पा. सू. १.१.६७.
[7] पा. सू. ६.३.९७.
[8] 'इत्यत्रेत्यर्थः' इति युक्तं भाति।
[9] पा. सू. ३.१.५.
[10] पा. सू. ३.१.५.
[11] का. वा. १.
[12] भाष्ये 'यदसौ परतः स्यात्' इत्यत्र 'यदसौ परः स्यात्' इति निर्णयसागरमुद्रितेऽधो निर्दिश्यते पाठः।
[13] पा. सू. १.१.६७.
[14] कार्यापेक्षया — ब.

धात्। स्वाभाविकं परत्वमाश्रित्य [1]'तस्मादित्युत्तरस्य' इति परिभाषायास्तत्राश्रयणानौचित्याच्च। यदप्युक्तम् '**परस्य कार्यमिति।** उत्पत्तिरेव कार्यमित्यर्थः' इति। तदपि न, तत्र परशब्दस्य प्रकृतसूत्रगतपरशब्दपरामर्शकत्वेन तादृशार्थकथनानौचित्यात्। यदप्युक्तम् 'नन्वेवं सति सन्नित्यादि-प्रथमानिर्देशः षष्ठीप्रकल्पने सति निरर्थकः स्यात्। नैष दोषः। निर्देशमात्रार्था प्रथमा स्यात्। उत्तरकालं तु षष्ठी प्रकल्पते' इति। तदपि न, स्वाभाविकपरत्वाश्रयणेन शङ्कायाः प्रवृत्तत्वेन [2]'गुप्तिज्किद्भ्यः' इति पञ्चम्या परशब्दस्यैवाक्षेपेण गुप्तिज्किद्भ्यः परः सन् साधुर्भवतीति सूत्रार्थस्य शङ्कितुरभिमतत्वेन [3]'तस्मात्' इति परिभाषायाः शङ्कित्रोपेक्षिततया षष्ठीकल्पनाया निर्मूलत्वेन शङ्कायास्तुच्छत्वात्। निर्देशानर्थक्यशङ्काया निर्देशमात्रप्रयोजनत्वकथनेन समाधान-स्यापि तुच्छत्वात्। यदप्युक्तम् 'यत्त्वन्यत्रोच्यते — न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका इति। तदस्मिन् सूत्रे स्थित इति द्रष्टव्यम्' इति। तदपि न, असत्यप्यस्मिन् तस्योपपन्नत्वात्। ननु साधुत्वेन रूपेण साधुत्वमत्र न बोध्यते, किं तु प्रकृतिप्रत्ययादेशागमादिनिदर्शनद्वारा साधुशब्दा व्यु-त्पाद्यन्ते। तथा च गुपादिभ्यः परः सन् साधुरिति सूत्रार्थवर्णनं न युज्यत इत्यत आह — **अथ-वेति। संज्ञा स्यादिति।** तत् परस्य कार्यमिति शेषः। तथा च गुप्तिज्किद्भ्यः परः सन् प्रत्ययसंज्ञः स्यादाद्युदात्तश्चेत्यादिः सूत्रार्थः प्रकृतसूत्रमन्तरेणैव भवतीति भावः। एतेन 'अय-मर्थः — उत्पत्तिः सनादेरनियतदेशा भवतु। पश्चात्तु सत एव परस्य यत् कृत्कृत्यप्रत्ययादिसंज्ञा-शास्त्रकार्यं विधीयते तन्नान्यदेशस्य। यद्देशस्य च शास्त्रीयं कार्यं तद्देशस्यैव साधुत्वात् प्रयोगो भविष्यति' इति निरस्तम्। [4]ऐजागमस्येव शास्त्रीयकार्यसंबन्धाभावेऽपि पूर्वभागे जातस्य सनः साधुत्वापत्तेः। शास्त्रेण विहितस्य शास्त्रेण विहितकार्यान्तरसंबन्धे सत्येव साधुत्वमित्यत्र माना-भावात्। समाधाताह — **यत्र तर्हीति।** शङ्किताह — **विकारागमेषु चोक्तमिति।** [5]'गापो-ष्टक्' इत्यत्रापि धातोरिति पञ्चम्यन्तानुवृत्त्या तत्सामानाधिकरण्यलाभाय व्यत्ययेन पञ्चम्यर्थे षष्ठ्याश्रयणान्न दोषः। समाधाताह — **अत्यन्तापरदृष्टानामिति।** परत्वेन दृष्टः परदृष्टः, न परदृष्टः, अत्यन्तमपरदृष्टोऽत्यन्तापरदृष्ट इति मयूरव्यंसकादिः। सनादयः प्रयोगे परत्वेन सन्त इति तेषां भवतु प्रत्ययसंज्ञाविधिरुपपन्नः, च्विक्विप्क्विन्ण्विविचां तु प्रयोगे दर्शनाभावेन तेषां परत्वेन बोधनं कृत्वा [6]ततः प्रत्ययसंज्ञामपृक्तसंज्ञां च विधाय ततः [7]'वेरपृक्तस्य' [इति] लोपं विधातुं प्रकृतसूत्रमपेक्षितमिति भावः। किं च लक्षणैक[8]चक्षुष्काणामुपयोगीदं शास्त्रम्। तथा च ते प्रयोगं दृष्ट्वा सूत्रार्थं निर्णेतुमसमर्था इति सनादिः पर एव यथा स्यात् पूर्वो मा भूदिति कर्तव्य-मेव 'परश्च' इति सूत्रम्। **किति णितीति।** 'भूसुप्, देवेट्' इत्यादौ [9]'वचिस्वपियजादीनां कि-ति' इति संप्रसारणम्। 'फलभाक्[10], अंशभाक्' इत्यादौ [11]'अत उपधायाः' इति वृद्धिरिति भावः। उपलक्षणमिदम्, शुक्लीकरोतीत्यादौ [12]'अस्य च्वौ' इत्यादेः। शङ्किता तदपि ज्ञापकेन सिध्यती-त्याह — **एतदपि नास्तीति।** [13]अस्मिन् पूर्वस्मिंश्च प्रतीके यदन्येन व्यर्थं बहु जल्पितं तद् दूषयितु-मप्यनर्हमित्युपेक्षितम्॥

---

[1] पा. सू. १.१.६७.
[2] पा. सू. ३.१.५.
[3] पा. सू. १.१.६७.
[4] ऐजागमस्यैव — प, ब.
[5] पा. सू. ३.२.८.
[6] यतः — ब.
[7] पा. सू. ६.१.६७.
[8] चक्षुषामुपयोगीदम् — ब.
[9] पा. सू. ६.१.१५.
[10] अत्र 'भजो ण्विः' इति ण्विप्रत्ययः।
[11] पा. सू. ७.२.११६.
[12] पा. सू. ७.४.३२.
[13] 'अस्मिन्' इत्यादि 'उपेक्षितम्' इत्यन्तं नास्ति — ब.

(**नारायणीयम्**) **पूर्वशब्देति**। दिक्छब्दाध्याहारेण पञ्चमी[१]विज्ञाने नियमकारणाभावात् पूर्वशब्दाध्याहारेणापि स्यादित्यर्थः। ननु [२]'गुप्तिज्किद्भ्यः' इत्यादौ दिक्छब्दयोगे पञ्चमीविज्ञानान्मध्ये कथं सनादेः प्राप्तिरित्यत आह — **षष्ठीनिर्देशेष्विति**। **मध्यमात्रपरिग्रहेणेति**। मध्यसामान्याश्रयेणेत्यर्थः। **अन्यथेति**। [३]'व्रीहिशाल्योर्ढक्' इत्यादौ वकाररेफयो रेफेकारयोरिकारहकारयोर्वा मध्ये ढक् स्यादित्यर्थः। कथं पुनर्मध्यविशेषस्य सूत्रे निर्देशात् मध्यसामान्याश्रयेण नियमः स्यादित्यत आह — **मध्यविशेषे त्विति**। ननु प्रत्यययोर्नियमे 'देशो नियम्यते' इति भाष्यमसंगतमित्याशङ्क्य तदपि योजयति — **प्रत्ययनियमेऽपीति**। न च शब्दानां नित्यत्वात् प्रकृतिप्रत्यययोर्मातृवत्ससाम्यमुक्तमयुक्तमित्यत्राह — [४]**मातुर्वत्स इत्यनेनेति**। [५]**यत्र विद्यमानमेवेति**। उत्तरस्येति कार्यापेक्षया शेषषष्ठीविज्ञानात्। **कस्य सत इति**। किंशब्दः सत्त्वाक्षेपार्थ इत्याह **असन्नेवेति**। कथं स्वाभाविकं परत्वम्, तथा सति शास्त्रस्यार्थवत्त्वमपि कथमित्यत्राह — **नित्याः शब्दा इति**। ननूत्तरस्येति संबन्ध[६]षष्ठ्यां कथं परः स्यादित्यर्थो लभ्यत इत्यत आह — **तस्मादित्युत्तरस्येति**। प्रदेशेषु प्रतियोगिविशेषोपादानबलादर्थविशेषाभिव्यक्तिरित्यर्थः। एतदेवोपपादयति — **तत्रचेति**। उत्तरस्येति षष्ठीबलात् प्रतिसंबन्धिनमध्याहृत्य योजनीयम्। तत् क्वचित् कार्यमित्यपेक्ष्यते, क्वचिद् भाव इति। अतः सर्वत्र यथायोगं परिभाषा प्रवर्तत इत्यर्थः। **निर्देशमात्रार्थेति**। लाघवेन निर्देशः प्रथमायाः प्रयोजनमित्यर्थः। **तदस्मिन् सूत्रे स्थित इति**। यदा तु [७]'तस्मादित्युत्तरस्य' इति परिभाषया सिद्धत्वादेतत् सूत्रं प्रत्याख्यायते तदा [८]तन्नास्तीत्यर्थः। नन्वनया परिभाषया परस्य सतः संज्ञाविधाने प्रत्ययानामनियतदेशः प्रयोगः स्यादित्यत आह — **अयमर्थ इति**। ननु [९]'गापोष्टक्' इत्यादावानन्तर्यसंबन्धे षष्ठीविज्ञानात् कदाचित् पूर्वोऽपि टगादिः स्यादसत्यस्मिन् सूत्र इति, तत्राह — **गापोष्टगिति**। **वाशब्दस्तर्ह्यर्थ इति**। वार्तिककारस्यापि तर्ह्यर्थ एव वाशब्दोऽभिमतः, न विकल्प इत्यर्थः। **प्रधानेनेति**। प्रत्यक्षपूर्वकत्वात् प्रमाणान्तराणां तस्य प्राधान्यम्। न हि क्विबादीनां लौकिके प्रयोगे [१०]श्रौत्रेण प्रत्यक्षेण क्वचिदुपलब्धिरस्ति। ननु कृतेऽप्यस्मिन् सूत्रे कथमत्यन्तादृष्टानां क्विबादीनां परत्वमुपपद्यत इत्यत्राह—**अस्मिन् हीति**। परभूतलोपे प्रयोजनं भाष्योक्तमुपपादयति — [११]**तदेति**। परभूतलोप इत्यर्थः। यदि शशविषाणतुल्यत्वं क्विबादीनां तर्हि शास्त्रे तेषामुपदेशोऽनर्थक इति चेन्नेत्याह — **केवलमिति**। कादाचित्कमनुबन्धासङ्गस्यानर्थक्यमुक्त्वात्यन्तिकमानर्थक्यं दर्शयति। **स्पृशोऽनुदक इति**। धातोरित्यधिकारात् पञ्चमी तत्र तत्रोपस्थानादसकृत् श्रुता। तत्र क्वचित् पूर्वशब्दाध्याहारेण क्वचित् परशब्दाध्याहारेणेति कदाचिदनुबन्धासङ्गोऽनर्थकः स्यात्। स्पृश इति पञ्चम्येकैव। तत्र पूर्वविधावत्यन्तमानर्थक्यं तस्य स्यादित्यर्थः॥

---

[१] विज्ञातेति चरमकारणाभावात् — ङ.

[२] पा. सू, ३.१.५.

[३] पा. सू. ५.२.२.

[४] प्रदीपपुस्तकेषु 'मातुर्वत्स इति' इति प्रतीकतया मुद्रणमुपलभ्यते। 'मातुर्वत्स इत्यनेन' इति विशिष्टः प्रदीपग्रन्थत्वेनात्राभिसंहितः।

[५] अत्र — घ, ङ.

[६] षष्ठ्या कथं — ङ.

[७] पा. सू. १.१.६७.

[८] न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका इत्येतदित्यर्थः।

[९] पा. सू. ३.२.८.

[१०] श्रोत्रेण — घ, ङ.

[११] प्रदीपे 'तत्राग्निचिदित्यादौ' इत्यत्र 'तदाग्निचिदित्यादौ' इति पाठोऽभिमत इति भाति।

[३, १६-१९]

(उद्द्योतनम्) वाशब्दस्य तर्हीति व्याख्यानमयुक्तम्, प्रयोजनान्तरपरत्वेन सार्थकत्वात्, अत आह — **पूर्वमिति**। देवदत्तादयः शब्दा अपत्यप्रत्ययरहिता अपत्येषु प्रयुज्यन्ते। तेषामनेनासाधुत्वमुच्यत इत्याह — **देवदत्तादय इति**। **नन्विति**। अभेदोपचाराल्लक्षणया प्रयोगोपपत्तेः कथमसाधुत्वमित्यर्थः। **नैतदिति**। नियतापत्यप्रतीतिर्दृश्यते। सा न लक्षणया, तस्या अतिप्रसक्तत्वात्। तस्मात् प्रत्ययेनैव नियतापत्यप्रतीतिर्वाच्या। तत्र केवलप्रकृतिप्रयोगोऽसाधुरेवेत्यर्थः। उक्तेऽर्थे संमतिमाह — **तदुक्तमिति**। प्रत्ययरहितप्रकृति[1]प्रयोगस्यासाधुत्वमुपसंहरति — **तस्मादिति**। **गर्गा इति**। तत्र [2]'यञञोश्च' इति लुग्विधानात् साधुत्वम्, नैकवचन इत्यर्थः। बभ्र्वादित्रयमेवोदाहरणम्, 'क्व स' इत्यादिकं तु [3]दृष्टान्ततयेति कैश्चिद्व्याख्यातम्, तदाह — **अत्र केचिदिति**। 'क्व' इत्यत्र [4]'अव्ययादाप्सुपः' इति लुक्। 'स देवदत्तः' इत्यत्र [5]'एतत्तदोः' इति सोर्लोपः। ननु तिथुक् प्रकृतेरागमः, ततः 'तिथी' इति कथं प्रत्ययमात्रप्रयोगस्योदाहरणम्, अत आह — **बहुतिथीति**। प्रकृतिं विना प्रयोगस्य तदप्युदाहरणमेवेत्याशयः। **यस्त्विति**। [6]'कृदिकारादक्तिनः' इत्यनेन। 'यथा बहुः' इति वैधर्म्यदृष्टान्तत्वेन व्याचष्टे — **ईषदिति**। साधर्म्यदृष्टान्तत्वेन व्याचष्टे — **अन्ये त्विति**। ननु 'परश्च' [7]इत्यनेन वावचने पक्षे [8]प्रत्ययानुत्पत्तिः कथं प्रतिपादयितुं शक्यते, अत आह — **तस्मादिति**। तदेव व्यनक्ति — **वा पर इति**। [9]परत्वस्यैव कथं न विकल्पः, अत आह — **न त्विति**। वचनाधीनत्वेऽप्याह — **तस्मादिति**। संज्ञाविकल्पमुपपादयति — **प्रतियोगमिति**। **कृते त्विति**। 'परश्च' इति सूत्रेण कार्यदर्शनमाश्रित्य पक्षे परत्वोपलक्षितप्रत्ययानुत्पत्तिर्ज्ञाप्यत इति तात्पर्यार्थः। **वृत्तिपक्ष इति**। वृत्तिवाक्ययोर्भिन्नार्थत्वाद् वावचनं व्यर्थमित्यर्थः। **प्रयोगनियमार्थमिदं** प्रयोगनियमार्थमेवेदम्। 'अन्तरेणापि' इति भाष्यतात्पर्यमाह — **सिद्ध इति**॥

[३, १६-१९]

(रत्नप्रकाशः) [10]'तुष्यतु'न्यायेन समाधाताह — **प्रयोगनियमार्थमिति**। 'न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः' इत्येवंनियमफलो यः प्रत्ययः प्रकृतेः परः प्रयोक्तव्य एव, प्रत्ययः प्रकृतेः पर एव प्रयोक्तव्य इति द्विविधो नियमः, तदर्थमित्यर्थः। **परभूतानामिति**। **परं** प्रत्ययं **भूतानां** प्राप्तानामेव प्रकृतीनां, प्रकृतेः परत्वेन भूतानां सतामेव प्रत्ययानां चेत्यर्थः। **अपरभूतानामिति**। [11]परभूतेतराणां केवलानां प्रकृतीनां प्रत्ययानां चेत्यर्थः। प्रत्ययरहितानां प्रकृतीनां प्रकृतिरहितानां च प्रत्ययानां कुत्रापि प्रयोगो न दृश्यत इति व्यर्थ एव प्रयोगनियम इति मन्यमानः

---

[1] प्रयोगस्य साधुत्वमुप — अ.
[2] पा. सू. २.४.६४. यञिञोश्चेति — ऋ.
[3] दृष्टान्तान्तरमिति — अ.
[4] पा. सू. २.४.८२.
[5] पा. सू. ६.१.१३२.
[6] बह्वादिभ्यश्चेत्यत्र गणसूत्रम्।
[7] 'इत्यनेन' इत्यस्मादनन्तरं 'वावचनेन' इत्यधिकम् — ऋ.
[8] प्रत्ययानुत्पत्तेः — अ, लृ.
[9] परस्यैव कथनं न विकल्पः — अ.
[10] लौ. न्या. द्वितीयभागे पुटम् ३५.
[11] परभूतानि इतराणि येभ्यस्तानि तेषामिति बहुव्रीहिर्बोध्यः। तत्पुरुषे परभूतेतरेषामित्युचितत्वात्।

पृच्छति — **अस्ति किंचिदिति**। उत्तरमाह — **अस्तीति**। **अर्थाभिधान इति**। अर्थो विशिष्टोऽभिधीयतेऽनेनेत्यर्थाभिधानम्, अर्थबोधार्थं प्रयुज्यमानं वाक्यं, तत्रेत्यर्थः। **दृश्यते** श्रूयत इत्यर्थः। अत एव [1]'अदर्शनं लोपः' इत्यत्र दर्शनं श्रवणमिति व्याख्यातम्। **क्व स देवदत्त इति**। 'क्व' इत्यस्याव्ययत्वात् ततः सुपो [2]लुक्। 'स' इत्यत्र तु [3]'एतत्तदोः' इति सुलोपः। तथा च 'क्व, स' इत्यप्रत्ययिके प्रकृती, तथा बभ्रुमण्डुशब्दौ यञ्प्रत्ययप्रकृतिभूतौ यञं विना तदर्थे लक्षणया प्रयुक्तावप्रत्ययिके प्रकृती, तथा लमकशब्दः फक्प्रत्ययप्रकृतिः, तं विना। तदेवं प्रत्ययं विना प्रकृतिप्रयोगं निदर्श्य प्रकृतिं विना प्रत्ययप्रयोगं दर्शयति — **द्वयसजादीनामिति**। **किमस्य द्वयसमिति**। किमस्य परिमाणमित्यर्थः। **काद्य तिथीति**। काद्य बहूनां पूरणीत्यर्थः। बहूनां पूरणी बहुतिथीत्यत्र डटि परतो बहुशब्दस्य तिथुगागमः कृत इत्यन्वयव्यतिरेकाभ्यां स डट एवावयव उचित इति तिथप्रत्ययोऽप्रकृतिकः। ङीप् तु तिथान्ताद्विहितो बहुशब्दाभावेऽप्येकदेशविकृतन्यायेन[4] तिथान्तात् पर एवेति नाप्रकृतिकः। [5]अप्रत्ययकप्रयोगे परिहारमलब्ध्वोक्ताप्रकृतिकप्रत्ययप्रयोगे परिहारमाह — [6]**द्वयसजादय इति**। **वृत्तिजसदृशा इति**। धातूनामनेकार्थत्वाद् भवनार्थकाज्जनेः सप्तम्यन्ते वृत्तिशब्दप्रकृतिक उपपदे डे वृत्तिजा द्वयसजादयः प्रत्ययाः, तत्सदृशा अवृत्तिजाः वृत्तिजद्वयसजादिभिन्नाः 'किमस्य द्वयसम्' इत्यादिप्रयोगगता द्वयसजादय इत्यर्थः। तत्र दृष्टान्तमाह — **यथा बहुरिति**। [7]'ईषदसमाप्तौ' [8]'विभाषा सुपो बहुच् पुरस्तात्' इति विहितबहुच्सदृशो बहुशब्दः संख्यावैपुल्यवाची यथा तद्भिन्नस्तथेत्यर्थः। यत्तु 'केवल एव ईषदसमाप्तौ यो बहुशब्दो लोके प्रयुज्यते स दृष्टान्तोऽसाधुत्वे द्वयसजादीनामुपात्तः' इति। तत्तुच्छम्, दार्ष्टान्तिकपदे [9]दृष्टान्तपदे वा भाष्येऽसाधुशब्दस्यानुपात्तत्वेन तथा व्याख्यानानौचित्यात्। 'काद्य तिथी, किं बहु' इतिवत् 'किमस्य द्वयसम्' 'किमस्य मात्रम्' इति प्रयोगयोरपि प्रकृतभाष्यस्वरसेन साधुत्वस्य स्वीकर्तुमुचितत्वात्। यदप्युक्तम् '**क्व स देवदत्त इति**। देवदत्तादयस्तदपत्येषु वर्तमाना दृश्यन्ते, तेषामनेन नियमेनासाधुत्वं प्रतिपाद्यते — न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः प्रयोक्तव्य इति' इति। तदपि न, 'क्व स देवदत्तः, क्व स यज्ञदत्तः' इत्यत्र 'क्व, स' [10]इत्यनयोरेवाप्रत्ययिकयोर्दर्शितत्वेन देवदत्तयज्ञदत्तशब्दयोस्तदपत्यलक्षणया प्रयुज्यत इत्यत्र प्रकृतभाष्यतात्पर्यकल्पने मानाभावात्। बभ्रुमण्डुलमकशब्दानां तदपत्ये लक्षणया प्रयोगसंभवेन विभक्तिपराणामेव प्रयुक्तत्वेन [11]चासाधुत्वे मानाभावात्। तद्धितं प्रति प्रकृतित्वेन दृष्टानां तद्धितं विना प्रयोग[12]दर्शनेनाप्रत्ययकप्रयोगोक्तेरप्युपपन्नत्वात् 'न केवला प्रकृतिः' इत्यादिनियमस्य बभ्रुर्मण्डुरित्यादिविषयत्वासंभवाच्च। यदप्युक्तम् 'देवदत्तादिशब्दानां तदपत्ये लक्षणया साधुत्वं न संभवति, भृत्यादावपि तेषां लक्षणया प्रयोगसंभवेन नियमेनापत्यार्थस्याप्रतीतेः' इति। तदपि न, लक्षणोच्छेदापत्तेः। न हि गवादिशब्देन लक्षणया प्रयुज्यमानेन बाहीकादिकं नियमेन प्रतीयते, येन लक्षणोच्छेदो न

---

[1] पा. सू. १.१.६०.

[2] अव्ययादाप्सुप इत्यनेनेत्यर्थः।

[3] पा. सू. ६.१.१३२.

[4] परिभाषा ३७.

[5] अप्रत्ययिकप्रयोगे — ब.

[6] भाष्ये 'द्वयसादयो वै' इत्यत्र 'द्वयसजादयो वै' इति चौखाम्बामुद्रिते पाठः। कैयटेऽप्येवमेव प्रतीको दृश्यते।

[7] पा. सू, ५.३.६७. अनुवृत्तिप्रदर्शनमिदम्।

[8] पा. सू. ५.३.६८.

[9] दृष्टान्तपरे वा — ब.

[10] इत्यनयोरेवाप्रकृतिकयोः — प, ब.

[11] च साधुत्वे — ब.

[12] दर्शनेनाप्रकृतिकप्रयोगोक्तेरपि — ब.

स्यात्। एतेन "[1]सोऽयमित्यभिसंबन्धात् तद्धितेन विना यदि। बभ्र्वादयः प्रयुज्येरन्नापत्ये नियमो भवेत्॥' इति हरिकारिकापि निरस्ता। यदप्युक्तम् "'क्व, स' इति यथा सुपो लुग्लोपयोः कृतयोः केवला प्रकृतिः प्रयुज्यमाना दृश्यते तथा बभ्र्वादयोऽपीति दृष्टान्तोपन्यासः" इति। तदपि न, तद्भाष्यस्य क्वसबभ्र्वादिशब्दानां [2]सर्वेषामप्रत्ययकानां प्रयोगस्य दृष्टत्वेन तद्वत् हस्ताभ्यां घटमानयेति वक्तव्ये ताभ्यां घटानयेत्यादिप्रयोगो मा भूदित्येतत्फलकनियमार्थता 'परश्च' इत्यस्येत्ये-तत्तात्पर्यकत्वेन तत्र दृष्टान्तमात्रप्रदर्शनभागे किंचिद् दृष्टान्तप्रतिपादनपरं किंचिद्दार्ष्टान्तिकप्रतिपादन-परमित्यत्र मानप्रयोजनयोरभावात्। तदुक्तदृष्टान्तदार्ष्टान्तिकयोर्वैपरीत्यसंभवाच्च। तस्मा-द्यत्किंचिदेतत्। **वावचने चेति**। चकारः प्रयोगनियमार्थमित्युक्तप्रयोजनसमुच्चयार्थः। न च 'द्वयसजादयो वृत्तिजसदृशाः' इत्यनेन दृष्टान्तविघटनद्वारा तत्प्रयोजनं निराकृतमिति वाच्यम्, अप्रत्ययप्रकृतिप्रयोगदृष्टान्तस्यानिराकृतत्वात्। 'अधुना, व्यतिसे, इयती' इत्यादेरप्रकृतिकप्रत्ययप्रयोग-दृष्टान्तान्तरसंभवाच्च। यत्तु "[3]'तस्मादित्युत्तरस्य' इत्येव प्रत्ययस्य सिद्धे परत्वे पुनः परवचनं [4]वावचनेन प्रत्ययस्य पक्षेऽनुत्पत्तिं प्रतिपादयति — वा परः सन् भवति, परत्वोपलक्षितः सन् पक्षे भवति, पक्षे तु नैवोत्पद्यत इत्यर्थः" इति। तत्र [5]'तस्मात्' इति परिभाषासंचारो न युक्त इति प्रागेव प्रपञ्चितम्। शङ्किता पृच्छति — **अथ क्रियमाणेऽपीति**। उत्तरमाह — [6]**क्रिय-माणे हीति। पर इत्येतदभिसंबध्यत इति**। तत्र परत्वस्य प्रयोगे नियतत्वेनाविकल्पनीय-तयोत्पत्तिरेव विकल्पनीयेति भावः। **अन्यदतः संज्ञाया इति**। तथा च प्रत्ययशब्देन वाग्रहण-स्यान्वयासंभवादानर्थक्यं स्यादिति भावः। तत्परिहरत्यन्यः — **वावचने चोक्तमिति**। समर्थ-सूत्र इति शेषः। **नित्यत्वात् सन इति**। तत्रत्य[7]'स्वभावसिद्धत्वात्'इत्यनेन सामान्यतो दर्शितो-ऽर्थोऽत्र [8]विशेषरूपेण दर्शितः। तदेवं द्वितीये प्रयोजने निराकृते पूर्वमेव प्रयोजनं स्थिरी-कर्तुं परिगृह्णाति — **प्रयोगनियमार्थमिति। प्रकृतिपर एवेति**। प्रकृतेः पर एवेत्यर्थः। अधुनेत्यादौ प्रकृतिलोपस्य स्थानिवद्भावेन प्रकृतिसंज्ञास्तीति प्रकृतेः पर एव प्रयुज्यते प्रत्यय इति न कोऽपि दोषः। **प्रत्ययपरैवेति**। प्रत्ययः परो यस्याः सैवेत्यर्थः। 'क्व, स' इत्यादौ प्रत्यय-लोपस्य प्रत्ययसंज्ञकत्वात् प्रत्ययपरैव प्रकृतिः प्रयुज्यते। बभ्रुर्मण्डुरित्यादौ च विभक्तिपरैव प्रकृतिः प्रयुज्यत इति न कोऽपि दोषः। यद्यपि रामौ रामा इत्यादावेकादेशे सति प्रत्ययस्य प्रकृतेः परत्वं नास्ति, प्रकृतेश्च प्रत्ययपरत्वम्, तथापि न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः प्रयो-क्तव्य इति निषेधे तस्य नियमस्य तात्पर्येण न दोषः। **न प्राप्नोतीति**। एकेन वाक्येन नियम-द्वयं न लभ्यमिति मन्यते। आपादितप्रयोगे दृष्टान्तमाह — **क्व सेति, किमस्य द्वयसमिति च**। द्वयसजादीनां दृष्टान्तताया निराकृतत्वेन तत् 'अधुना, व्यतिसे, इयती' इत्येतत्तात्पर्यकं ज्ञेयम्। **उभयनियमादिति**। [9]'ब्रह्मभ्रूणवृत्रेषु क्विप्' इत्यादेरिवैकस्मादपि वाक्यान्नियमद्वयलाभ इति भावः। **किं वक्तव्यमेतदिति**। परग्रहणं नियमार्थं भवतीत्येतद्वक्तव्यं किमित्यर्थः। **न हीति**। सिद्धे सत्यारम्भो नियमार्थ इत्येव नियमार्थतासिद्धिरिति भावः। [10]**स्यादेवायं पर इति**। दिग्योग-

---

[1] वाक्यपदीयम् ३.१४.८४. तत्र 'प्रत्ययेन विना यदि' इति पाठ उपलभ्यते।

[2] सर्वेषामप्रकृतिकानां प्रयोगस्य — प, ब.

[3] पा. सू. १.१.६७.

[4] वावचने प्रत्ययस्य —ब.

[5] पा. सू. १.१.६७.

[6] भाष्ये 'क्रियमाणे परग्रहणे' इत्यत्र 'क्रियमाणे हि परग्रहणे' इति रत्नप्रकाशकृत्पाठ इति भाति।

[7] का. वा. ३.१.१–२.

[8] विशिष्टरूपेण —ब.

[9] पा. सू. ३.२.८७.

[10] भाष्ये 'स्यादयं परः' इत्यत्र 'स्यादेवायंरः' इति निर्णयसागरमुद्रिते पाठः।

पञ्चमीनिर्देशादिति शेषः। तस्मात् 'परश्च' इति सूत्रं नियमार्थं कर्तव्यमेवेत्युपसंहरति — **पर एव यथा स्यादित्येवमर्थमिति**। अस्य 'तस्मात्' इत्यादिः 'परश्चेति कर्तव्यम्' इत्यन्तश्च ज्ञेयः। तत्र 'पर एव' इत्यनेन नियमत्रयं भगवतोऽभिमतं ज्ञेयम्। तत्र नियमद्वयं समनन्तरमुक्तम्, तृतीयस्त्वादावेवोक्तः — पर एव यथा स्यात् पूर्वो मा भूदिति। समर्थितश्च स प्रागेवास्माभिः॥

[३, १६–१९]

(नारायणीयम्) 'प्रयोगनियमार्थं 'वा' इत्यत्रापि[1] पूर्ववद् वाक्यकृता तदर्थे वाशब्दः प्रयुक्त इति भ्रान्तिं निराकरोति — **पूर्वं प्रयोजनमिति**। तर्हि 'प्रयोगनियमार्थं तर्हि' इति भाष्यं कथं संगच्छत इत्यत्राह — **भाष्यकारेण त्विति**। **अपत्ये प्रयोगादिति**। तथा च प्रयोगो दृश्यते — भृगुश्चरति, अङ्गिराश्चरति, इति। **गर्गा इति बहुवचनान्तवदिति**। [2]अत्र ह्यपत्यप्रत्ययस्य लुग्विधानादपत्यार्थो नियमेन प्रतीयते। एवमेकवचनान्ता बभ्र्वादयः प्रयुज्यमानाः साधव एवेति भ्रान्तिः स्यात्। तन्निराकरणाय परश्चेति वचनमित्यर्थः। **केचिदाहुरिति**। अस्मिन् पक्षे देवदत्तादिशब्दः स्वार्थ एव वर्तते नापत्य इति नोदाहरणम्। **यस्तु तिथिशब्दादिति**। प्रतिपदादिवचनात् तिथिशब्दात् [3]"कृदिकारादक्तिनः" इति ङीषि यस्तिथीशब्दस्तस्य साधुत्वात् स इह नोदाहृतः। **अन्ये त्विति**। अस्मिन् पक्षे बहुशब्दस्य पक्षान्तर्भावेऽपि प्रसिद्धतरत्वाद् दृष्टान्तत्वोक्तिरिति द्रष्टव्यम्। कथं पुनः परश्चेत्यनेन वावचने प्रत्ययस्य पक्षेऽनुत्पत्तिः प्रतिपादयितुं शक्यत इत्याशङ्क्य वचनसामर्थ्यात् तत्प्रतिपत्तिप्रकारं दर्शयितुमाह — **तस्मादित्युत्तरस्येत्येवेति**। वा परः सन् प्रत्ययो भवतीत्यत्र किं परत्वं विकल्प्यते, उत प्रत्ययसंज्ञा, आहोस्वित् सन् इति विशये, परत्वं तावन्न विकल्प्यते, असंभवादित्याह — **न त्वत्रेति**। संज्ञाया विकल्पाभावो भाष्य एव दर्शितः। ततश्च पारिशेष्यात् कार्यदर्शनमाश्रित्य सनादेरुत्पत्तिर्विकल्प्यत इति परश्चेत्यस्य प्रतियोगमुपस्थाने प्रयोजनमिति। तदाह — **कृते त्विति**। ननु 'नित्यत्वात् सनः' इत्यसिद्धो हेतुरित्याशङ्क्य व्याचष्टे — **वृत्तिपक्ष इति**। ननूभयनियमे वाक्यद्वयं प्रयोक्तव्यमित्याशङ्क्यैकेन वाक्येन तत्सिद्धिप्रकारं दर्शयति — **सिद्धे तस्मादिति**॥

आद्युदात्तश्च ३.१.३.

[३, २०–२५]

(उद्द्योतनम्) ननु स्वररहितस्याप्युच्चारणसंभवात् 'अन्तोदात्त एव चित्' इत्यादिप्रत्ययनियमे च प्रत्ययान्तरस्यानियतस्वरनिवृत्तये सूत्रमावश्यकम्, अत आह — **अस्वरकस्येति**। वैदिकाभिप्रायेण। लोके उदात्तादिहीनस्याप्युच्चारणसंभवात्। [4]"दुष्टः शब्दः" इति स्वरहीनप्रयोगनिषेधाभिप्रायेण वा। **स्वरान्तरस्येति**। 'चिदेवान्तोदात्तः' इत्यादिस्वर[5]नियमसंभवादित्यर्थः। प्रत्यय-

---

[1] चेत्यत्रापि — ङ.

[2] अत्र त्वपत्यप्रत्ययान्तस्यालुग्विधानात् — ङ.

[3] बह्वादिभ्यश्चेत्यत्र बह्वादिगणसूत्रमिदम्।

[4] महाभाष्यम् पस्पशाह्निकम्।

[5] नियमादिसंभवादित्यर्थः — अ.

नियमाश्रयेण समाधानमित्याह — **चिदादीनामिति**। [1]ननु प्रत्ययस्य स स्वरोऽपि प्रत्ययाश्रित-कार्यमेव, अत आह — **तदन्तेति**। प्रत्ययसंनियोगेन स्वरविधौ तु नायं दोष इत्याह — **आद्युदात्त इति**। ननु [2]'ञ्नित्यादिर्नित्यम्' 'प्रत्ययस्य च' इति सूत्रद्वयेऽपि प्रत्ययग्रहणपरिभाषोपस्थितौ [3]'ञ्नित्यादिर्नित्यम्' इत्यस्य वैयर्थ्यमित्येतावता कथं 'प्रत्ययस्य च' इत्यत्र [4]परिभाषानुपस्थानम्, [5]'ञ्नित्यादिर्नित्यम्' इत्यत्र तदनुपस्थानेनापि [6]सूत्रद्वयार्थवत्त्वोपपत्तेः, अत आह — **प्रत्ययस्य चेति**। [7]'प्रत्ययस्य च' इत्यत्र परिभाषोपस्थितौ [8]'ञ्नित्यादिः' इत्यत्रानुपस्थानेऽपि तद्वैयर्थ्यमपरिहार्यमिति 'प्रत्ययस्य च' इत्यत्र [9]तदनुपस्थानं ज्ञापयतीत्यर्थः। प्रातिपदिकान्तोदात्तस्यापि श्रवणस्थलमाह — **कृष्णतर इति**। तरपः पित्त्वेनानुदात्तत्वादित्यर्थः। एवं प्रकृतिस्वरस्य प्रयोजनमुक्त्वा तस्य तदन्त-विध्यभावज्ञापकत्वमाह — **यदि चेति**। **आस्त इति**। [10]अत्र पञ्चमीनिर्देशेन [11]'तस्मादित्युत्तरस्य' इति परिभाषोपस्थानाल्लसार्वधातुकस्यैवानुदात्तत्वम्, न तु तदन्तस्येति भावः। **तत्रापीति**। तास्यादेः परं यल्लसार्वधातुकं तदन्तमनुदात्तमिति विधिसंभवाच्छेषनिघातेन[12] निरवकाशत्वमेवेत्यर्थः। 'न वा प्रकृतेः' इत्यादिना तदादितदन्तग्रहणाभावस्य ज्ञापक[13]सिद्धत्वोक्तेर्वाकारो न विकल्पार्थ इत्याह — **तर्हीति**। संनियोगेनाद्युदात्तत्वस्यागमानुदात्तसाधकत्वमाह — **लवितव्यमिति**। 'लविता' इत्यत्र [14]तृचि [15]चित्स्वरेणेटोऽनुदात्तत्वं तृनि नित्स्वरेण, अत आह — **लुडिति**। [16]अत्रेटो-ऽनुदात्तत्वेन [17]ताकारस्योदात्तनिवृत्तिस्वरः प्रयोजनमित्यन्वयव्यतिरेकाभ्यां दर्शयति — **अत्रेति**। स्वरभिन्नेऽपि शब्दान्तरप्राप्तिरेवेत्याह — **रूपवदिति**। प्रत्ययाश्रयणे प्रकृतेरप्याश्रयणे हेतुमाह — **प्रत्ययग्रहणेति**। आद्युदात्तस्यान्तरङ्गत्वे प्रकृते किं [18]फलितम्, अत आह — **तत इति**। नन्वत्रापि [19]सीयुटोऽन्तरङ्गमुदात्तत्वमितीट इव सीयुटोऽप्यनुदात्तत्वं वचनं विनापि स्यात्, अत आह — **अत्रेति**। न च पूर्वं सीयुटि तत्सहितस्यादेशप्रसङ्ग इति वाच्यम्, [20]'निर्दिश्यमानस्यादेशाः' इति न्यायात्। न च [21]सीयुटा व्यवधानाद्धातोरनन्तरत्वाभावाल्लादेशाप्रसङ्ग इति वाच्यम्, प्राग्ला-देशाद्धात्वधिकारात्। आतृतीयसमाप्तेर्धात्वधिकारेऽपि विहितविशेषणत्वाश्रयणाद् व्यवहितेऽपि लादेशप्रवृत्तिरिति भावः। पिदर्थत्वमुदाहरति — **चिनुयादिति**। ननु प्रत्ययाद्युदात्तत्वे प्रकृते-रवधित्वेनानपेक्षणात् कथमागमैर्व्यवधानम्, अत आह — **विच्छिन्नत्वादिति**। पूर्वमागमे कृते तस्यैव प्रत्ययादित्वं नाकारस्येत्यर्थः। प्रत्ययसंनियोगेनोदात्तत्वे तु नायं दोष इत्याह — **आरब्ध**

---

[1] 'ननु' इत्यस्यानन्तरं 'न' इत्यधिकं दृश्यते 'अ, ऋ, लृ' कोशेषु। तत् प्रकृतासंगत-त्वात् त्यक्तम्।

[2] पा. सू. ६.१.१९७.

[3] पा. सू. ६.१.१९७.

[4] परिभाषानुपस्थापनम् — अ.

[5] पा. सू. ६.१.१९७.

[6] मात्रद्वयार्थत्वोपपत्तेः — अ.

[7] प्रत्यये चेत्यत्र — अ.

[8] पा. सू. ६.१.१९७.

[9] परिभाषानुपस्थानं — अ.

[10] तास्यनुदात्तेदिति सूत्र इत्यर्थः।

[11] पा. सू. १.१.६७.

[12] लसार्वधातुकान्तस्य विधीयमानमनुदात्तत्वम् 'अलोऽन्त्यस्य' इत्यन्त्यस्य स्यात्। ततः शेषनिघातेन धातोरनुदात्तत्वादिति भावः।

[13] सिद्धत्वोक्ते वाकारः — ऋ.

[14] 'तृचि' इति नास्ति — अ.

[15] चित्स्वरेणान्तस्योदात्तत्वे सति शेषनिघाते-नेति भावः। एवमुपरिष्टादपि नित्स्व-रेणाद्युदात्तत्वे सति शेषनिघातेनेत्यूह्यम्।

[16] तत्रेटः — अ.

[17] टाकारस्योदात्त — अ; डाकारस्योदात्त — ऋ.

[18] फलितमाह — लृ.

[19] सीयुट इति पञ्चमी। सीयुडपेक्षयेत्यर्थः।

[20] परिभाषा १२.

[21] सीयुड्व्यवधानात् — अ.

इति। [1]'इटोऽत्' इति [2]तकारस्योच्चारणार्थत्वेन [3]'तित् स्वरितम्' इति स्वरितत्वाभावात् [4]'इटोऽत्' इत्यकार उदात्तः। **तृन्नन्तत्वादिति**। [5]तृजन्तत्वे लुडन्तत्वे वान्तोदात्तत्वेनानुदात्तस्य[6] स्वरितत्वाप्रसङ्गादिति भावः। भाष्ये **निष्ठेति**। निष्ठान्तं द्वयच्कमाद्युदात्तं संज्ञायाम्, न चेन्निष्ठाया आदिराकारः। गुप्तः। द्वयच् किम्, रक्षितः। अनात् किम्, त्रातः। प्रत्ययस्वरः प्रत्युदाहरणम्। उदात्तवचनस्याविद्यमानवद्भावज्ञापकत्वमुपपादयति — **यदि प्रत्ययेति**। **तत्** [7]यासुट उदात्तत्वम्। [8]अवश्यमागमाविद्यमानवत्त्वमाश्रयणीयम्। अन्यथा प्रत्ययसंनियोगेनाद्युदात्तत्वेऽपि 'लविषीय' इत्यत्रादेशात् पूर्वं प्रत्ययस्यानच्कत्वेनाद्युदात्तत्वाप्राप्तेरादेशात् पूर्वं सीयुट्प्राप्तौ तेन [9]व्यवधानादादेशे कृते प्रत्ययस्वरो न स्यादिति भावः॥

[३, २०–२५]

(**रत्नप्रकाशः**) **किमर्थमिति**। 'नैतदस्ति' इत्यादिना वक्ष्यमाणोऽभिप्रायः। **उपोत्तमं रितीति**। रिदन्तस्योपोत्तममुदात्तमित्युक्तेऽनीयरो [10]'मध्य उदात्तः संपद्यते' इति भावः। **आद्युदात्त एव भविष्यतीति**। 'चिदेवान्तोदात्तः, रिदेव मध्योदात्तः, सुप्पिताववानुदात्तौ, तिदेव स्वरितः' इति स्वरनियमाश्रयणादिति भावः। **स्वरो नियम्यत इति**। चिदादीनामनियमेनान्तोदात्तत्वादिप्राप्तौ चिदन्तोदात्त एवेत्यादिरेव नियमो न्याय्य इत्यन्येऽनियतस्वराः स्युरिति भावः। इदानीमाद्युदात्तत्वस्य प्रत्ययसंज्ञासंनियोगे प्रयोजनं प्रतिपादयद्वार्तिकमवतारयति — **अथ किमर्थमित्यादिना**। तद्वार्तिकं पठति — **आद्युदात्तत्वस्येति**। **तस्येति**। तस्यैवेत्यर्थः। **यस्मात्** [11]**स तदादेरिति**। [12]'प्रत्ययग्रहणं चापञ्चम्याः' इति तदन्तविधौ सति [13]'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणम्' इति नियमात् तदादेरेव स्यादिति भावः। **तदन्तस्य चानुदात्तत्वमिति**। सुप्पितौ यस्माद्विहितौ तदादेस्तदन्तस्य सर्वस्यानुदात्तत्वं स्यादिति भावः। शङ्कते — **अथेति**। उत्तरमाह — **उत्पन्न इति**। सनादीनामुत्पत्त्युत्तरं प्रत्यय[14]संज्ञेति तत्र सनादिग्रहणस्य प्रत्ययग्रहणत्वाभावात् [15]तदन्तविध्यभाव इति भावः। **प्रत्ययाश्रयाणामिति**। प्रत्ययसंज्ञाश्रयाणामित्यर्थः। तत्र दृष्टान्तमाह — **तद्यथेति**। **घटाश्रयाणामिति**। अयं घट इति व्यवहारादीनामित्यर्थः। ज्ञापकेनोक्तं दोषं परिहरति — **न वेति**। **प्रकृतेराद्युदात्तत्वं शास्तीति**। एतेन 'ञ्निदन्तस्य निदन्तस्य चादिरुदात्तः' इति तत् सूत्रं [16]व्याचक्षाणा निरस्ताः, प्रकृतभाष्यविरोधात्। **यत्र ह्यनुदात्तः प्रत्यय इति**। प्रत्ययस्योदात्तत्वे सति शिष्टत्वात् [17]स एव स्यादिति प्रकृतेरन्तोदात्तत्वविधानं तत्र व्यर्थमिति यत्र

---

[1] पा. सू. ३.४.१०६.
[2] तकारस्योच्चारणार्थत्वे सति तित् — अ.
[3] पा. सू. ६.१.१८५.
[4] पा. सू. ३.४.१०६.
[5] तृन्नन्तत्वे — अ.
[6] अनुदात्तत्वस्य स्वरितत्वाप्रसङ्गात् — अ; अनुदात्तत्वस्येटः स्वरितत्वाप्रसङ्गादिति – ऋ.
[7] यासुटश्चुदात्तत्वम् — अ.
[8] अवश्यमागमाविद्यमानत्वं — अ.
[9] व्यवधानेनादेशे — अ.
[10] मध्योदात्तः — प, ब.
[11] वार्तिके 'स विहितस्तदादेः' इत्यत्र 'विहितः' इति क्वचिन्नेति हरयाणामुद्रितेऽधो निर्दिष्टम्।
[12] का. वा. १.१.७२–२८.
[13] परिभाषा २३.
[14] संज्ञेति यत्र — ब.
[15] तदन्तस्य विध्यभाव इति — प.
[16] सिद्धान्तकौमुद्यां स्वरप्रक्रियायामेवं व्याख्या कृता।
[17] प्रत्ययस्वर एवेति भावः।

प्रत्ययोऽनुदात्तस्तत्रैव तत् सावकाशमिति प्रत्ययान्तस्यानुदात्तत्वाभावं ज्ञापयतीति भावः। ननु 'आस्ते, शेते' इत्यादौ [1]"तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः' इति लसार्वधातुकानुदात्ते धातोरन्तोदात्तविधानं सावकाशमिति चेत्, सत्यम्, प्रातिपदिकान्तोदात्तत्वविधानमेव सामान्यापेक्षं ज्ञापकं [2]'सुप्पितौ' इत्यत्र तदन्तानुदात्तत्वाभावस्येति न दोषः। यत्तु 'लसार्वधातुकानुदात्तत्वमपि तदन्तस्यैव प्राप्नोति' इति। तन्न, [3]'प्रत्ययग्रहणं चापञ्चम्याः' इत्युक्तत्वेन तत्र पञ्चमीनिर्देशसत्त्वेन च तदन्तविधेरप्रवृत्तेः। **आगमानुदात्तार्थं वेति**। प्रत्ययस्य क्रियमाणा य आगमास्तेऽनुदात्ता भवन्त्वित्येतदर्थं प्रत्ययत्वसंनियोगेनाद्युदात्तत्वं विधीयत इत्यर्थः। तत्रान्तरङ्गाद्युदात्तप्रवृत्त्युत्तरं शेषनिघाते जातेऽपि तदनन्तरं जायमानः प्रत्ययस्येडागमः शेष एवेति तस्याप्यनुदात्तत्वसिद्धिः। वस्तुतस्तु शेषनिघातं बाधित्वा परत्वादिटि कृते पुनः प्रसङ्गविज्ञानेन शेषनिघातो जायमान इडागमस्यापि भविष्यतीति न काप्यनुपपत्तिः। [4]"ञ्नित्यादिर्नित्यम्' इत्यस्यानन्तरं प्रत्ययग्रहणे कृते तु परत्वादिडागमे सति प्रवर्तमानं प्रत्ययाद्युदात्तत्वं 'भवितव्यम्' इत्यादाविडागमस्यैव स्यादिति दोषः। 'आगमा अनुदात्ताः' इत्यवश्याश्रयणीयवचनेनैव सिद्धे प्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वं न विधेयमित्याह—**न वेति**। के वा आगमाः 'आगमा अनुदात्ताः' इति वचनं प्रयोजयन्तीति पृच्छति—**के पुनरिति**। **लवितेति**। लुट्, तिप्, डा, तासिः, इट्। तत्र यदीटोऽनुदात्तत्वं न स्यात् तदा तासिभक्तस्येट उदात्तत्वे सति तकाराकारस्य शेषनिघाते सति तदादेडिति लोपे डादेशस्योदात्तनिवृत्तिस्वरो न स्यात्। इटस्त्वनुदात्तत्वे सति तकाराकार एवोदात्त इति [5]तस्योदात्तनिवृत्तिस्वरः सिध्यतीति भावः। **अन्यथास्वरस्येति**। अन्यस्वरस्येत्यर्थः। **स्वरभिन्नस्येति**। वर्णवत् स्वरस्यापि भेदकत्वमनुभवसिद्धमित्युपपादितं भगवता [6]"वृद्धिरादैच्' सूत्रे। **उत्पत्तिसंनियोगेनाद्युदात्तत्वमिति**। [7]"ञ्नित्यादिर्नित्यम्' इति प्रकृतेराद्युदात्तत्वविधानेन ज्ञापितं प्रत्ययस्वरविधौ तदन्तविध्यभाव इति। तथा चान्तरङ्गत्वात् पूर्वं भवतीत्येतावतोत्पत्तिसंनियोगशिष्ट इत्युपचारः। तस्याशयमविद्वानाह—**आद्युदात्तत्वमपीति**। **प्रकृतिरप्याश्रितेति**। [8]"प्रत्ययग्रहणं चापञ्चम्याः' इत्युक्तेरिति मन्यते। इतर आह—**अन्तरङ्गमेवेति**। तदेवमिट आगमानुदात्तवचनाप्रयोजकत्वे व्यवस्थापिते तत्प्रयोजकत्वेन सीयुटं परिगृह्णाति—**सीयुट् तर्हीति**। **लविषीयेति**। आशिषि लिङ्। लादेशात् पूर्वमेव परत्वात् सीयुट्। ततो लादेशे सति तत्संनियोगेन विधीयमानमाद्युदात्तत्वं सीयुटः स्यात्। तन्मा भूदिति 'आगमा अनुदात्ताः' इति वचनं कर्तव्यमिति भावः। **उदात्तो ङिच्चेत्याहेति**। परस्मैपदविषयस्य लिङो यासुडागमः स्यात् स चोदात्तो ङिच्चेति सूत्रार्थाश्रयणात् सीयुड्वद् यासुडपि लादेशेभ्यः पूर्वमेव भवतीति लादेशानां प्रत्यय[त्व]संनियोगेन प्रवर्तमानमाद्युदात्तत्वं यासुडागमस्यैव भविष्यतीति तस्योदात्तविधानं व्यर्थं सत् 'आगमा अनुदात्ता भवन्ति' इति ज्ञापयतीति भावः। एतेन 'लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तो ङिच्च' इति तत्सूत्रं [9]व्याचक्षाणा निरस्ताः। प्रकृतभाष्यविरोधात्। तादृशव्याख्याने हि [10]'यासुटः शेषनिघाते प्राप्ते उदात्तत्वं [11]विहितमित्यत एव सार्थक्येनोक्तज्ञाप-

[1] पा. सू. ६.१.१८६.
[2] पा. सू. ३.१.४.
[3] का. वा. १.१.७२–२८.
[4] पा. सू. ६.१.१९७.
[5] डादेशस्येत्यर्थः।
[6] पा. सू. १.१.१.
[7] पा. सू. ६.१.१९७.
[8] का. वा. १.१.७२–२८.
[9] सिद्धान्तकौमुद्यामेतद्व्याख्यानम्।
[10] सीयुटः — प, ब.
[11] विहितमित्यस्य सार्थक्येनोक्त — ब.

कत्वं न स्यात्। अथवा परस्मैपदानां विषयस्थ लिङ इति तात्पर्यसत्त्वेन [1]तदुपपादनीयम्। **पिदर्थमिति**। चिनुयादित्यादौ पिद्भक्तत्वाद्यासुटोऽनुदात्तत्वं प्राप्तमिति तत्र सार्थकमुदात्तविधानं न ज्ञापकमिति भावः। **अपिच्च लिङिति**। यासुटो विहितमपित्त्वं लिङ्द्वारा तिबादिषु फलिष्यतीति भावः। सूत्रस्थापनवाद्याह — **शक्यमिति**। **आगमैस्तु व्यवहितत्वादिति**। आगमैरादित्वस्य विच्छिन्नत्वादित्यर्थः। यत्तु 'आरब्धे तु सूत्रे प्रत्ययसंज्ञासंनियोगेन कृते [2]आद्युदात्तत्वे भवन्त्यागमा इति न दोषः' इति। तन्न, सीयुटो लादेशात् [3]पूर्वमेव प्रवर्तमानत्वेन लविषीयेत्यादौ प्रत्ययाद्युदात्ततायाः सूत्रे विद्यमानेऽप्यसिद्धेः। इतर आह — **आगमा अविद्यमानवदिति**। 'न वक्तव्यम्' इत्यादिना वक्ष्यमाणोऽभिप्रायः। तमाशयमविद्वानाह — **यदीति**। तद्बुद्धिपरीक्षार्थमितर आह — **स्वरविधाविति**। **लवितेति**। तृन्नन्तमाद्युदात्तमिदम्। **प्रत्ययस्वरेति**। प्रत्ययाद्युदात्तत्वेत्यर्थः। **यदयमिति**। यद्यागमा अविद्यमानवन्न स्युस्तदा यासुट एवोदात्तत्वं स्यादिति तदुदात्तविधानं व्यर्थं सदागमानामविद्यमानतां ज्ञापयतीति भावः॥

[३, २०–२५]

(**नारायणीयम्**) न तावदत्यन्ताप्राप्तौ विध्यर्थमिदं वचनं कर्तव्यमित्याह — **अस्वरकस्येति**। तर्हि नियममुखेन स्वरान्तरनिवृत्त्यर्थमिति चेत् तदपि नेत्याह — **स्वरान्तरस्येति**। एतच्च 'यमिच्छति' इत्यादिना भाष्य एव वक्ष्यते। **अन्तोदात्त एव चिदित्येवं नियमादिति**। [4]न तु चिदेवान्तोदात्त इति नियम आश्रीयते, चिदादीनामनियमप्रसङ्गादिति भावः। **उत्पद्यमान एवेति**। ततस्तदन्तस्य स्वरो न भविष्यतीति, तदाह — **इति दोषाभाव इति**। ननु [5]'ञ्नित्यादिर्नित्यम्' 'प्रत्ययस्य च'[6] इति सूत्रद्वयेऽपि प्रत्ययग्रहणपरिभाषाया [7]उपस्थानेऽन्यतरस्य वैयर्थ्य[8]प्रसङ्गात् 'ञ्नित्यादिः'[9] इत्यत्र तदनुपस्थानेनाप्युपपत्तेः 'प्रत्ययस्य' इत्यत्र तदादेर्ग्रहणं स्यादेवेत्यत आह — [10]**प्रत्ययस्येत्यनेनेति**। [11]'ञ्नित्यादिर्नित्यम्' इत्यत्र तावद्बाधकाभावात् तदन्तग्रहणं प्रतिपन्नम्, ततः 'प्रत्ययस्य' इत्यत्रापि यदि तदादितदन्तस्य ग्रहणं स्यात् तदा पूर्वसूत्रस्य वैयर्थ्यं स्यादिति प्रत्ययस्येत्यत्र परिभाषाया अप्रवृत्तिर्ज्ञाप्यत इत्यर्थः। **आस्ते शेत इत्यादौ चेति**। अत्र हि लसार्वधातुकस्यैवानुदात्तत्वं विधीयते, न तदन्तस्य, पञ्चमीनिर्देशात् [12]'तस्मादित्युत्तरस्य' इति परिभाषोपस्थानादिति भावः। कथं पुनः प्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वविधाने सत्यागमानामनुदात्तत्वं स्यादित्यत्राह — **लवितव्यमित्यादाविति**। **अन्यथेति**। प्रत्ययसंनियोगेन विधानाभाव इत्यर्थः। **अन्योऽत्रेति**। [13]योऽत्र पूर्वपक्षी तस्मादन्य इत्यर्थः। 'लविता' इति तृजन्तत्वे चित्स्वरेणान्तोदात्तत्वे शेषनिघातेनेटोऽनुदात्तत्वं सिध्यति। तृन्नन्तत्वेऽपि नित्स्वरेणाद्युदात्तत्वे परिशिष्टमनुदात्तमिति 'आगमा अनुदात्ताः' इत्यस्य नैतदुदाहरणमित्यत आह — [14]**लुडिति**। अत्राकारस्योदात्तनिवृत्ति-

---

[1] तादृशव्याख्यानमित्यर्थः।
[2] आद्युदात्ते — ब.
[3] पूर्वमेव वर्तमानत्वेन — ब.
[4] ननु — घ, ङ.
[5] पा. सू. ६.१.१९७.
[6] चकारो नास्ति — ङ.
[7] उपस्थानेऽनन्तरस्य — ङ.
[8] प्रसङ्गः — घ.
[9] पा. सू. ६.१.१९७.
[10] प्रदीपे 'प्रत्ययस्य चेत्यनेन' इत्यत्र 'प्रत्ययस्येत्यनेन' इति पाठो निर्णयसागरमुद्रिते।
[11] पा. सू. ६.१.१९७.
[12] पा. सू. १.१.६७.
[13] योऽत्रत्यपूर्वपक्षी — ङ.
[14] लवितेति — ङ.

स्वरेणोदात्तत्वमिष्यते। तच्चेटोऽनुदात्तत्वाभावे न सिध्यतीत्याह — **अत्र यदीति**। कथं पुनः प्रत्ययाश्रयणे प्रकृतेरप्याश्रयणं स्यादित्यत्राह — **प्रत्ययग्रहणेति**। अत्र फलितमाह — **तत इति**। [1]**परत्वाद्वेति**। कृतेषु लादेशेषु प्रवर्तनात् सीयुटोऽपि यदि सावकाशत्वमाश्रीयते तदा परत्वात् सीयुट्। न च पूर्वं सीयुटि तदादेर्लादेशाः स्युरिति वाच्यम्, [2]'निर्दिश्यमानस्यादेशा भवन्ति' इति वचनात्। प्राग्लादेशाद्धात्वधिकाराद्विहितविशेषणत्वाश्रयणाद्वा सीयुटा व्यवधानेऽपि लादेशाः प्रवर्तन्त एवेति भावः। **इटोऽदित्यकारस्येति**। तकारस्योच्चारणार्थत्वात् स्वरितत्वाभावादिति भावः। व्यवहितत्वेन विच्छिन्नत्वं लक्ष्यत इत्याह — **विच्छिन्नत्वादिति**। यस्य स्वर इष्यते तस्यादित्वं नास्तीत्याद्युदात्तत्वं न स्यादित्यर्थः। **तृन्नन्तत्वादिति**। तृन्नन्तत्व एवेटः स्वरितत्वप्राप्तिः। तृजन्तत्वे त्वन्तोदात्तत्वेनोदात्तादुत्तरोऽनुदात्त इण् न भवतीति स्वरितत्वाभावः। एवं लुङन्तत्वेऽपीति भावः। **प्रत्ययाद्युदात्तत्वे कर्तव्य इति**। नान्यस्वरविधौ॥

[३, २६–३०]

(**उद्द्योतनम्**) ननु [3]'स्रौघ्नशब्दात् 'प्रत्ययस्य च' इति कृतप्रत्ययाद्युदात्तान्ङीप्युदात्तनिवृत्तिस्वरः सेत्स्यत्येव, अत आह — **विभज्येति**। **न दोष इति**। लोपात् पूर्वं प्रत्ययोत्पत्तिसमय एव आद्युदात्तत्वादित्यर्थः। बहिरङ्गेकारसापेक्षत्वाल्लोपो बहिरङ्ग इत्याह — **स्वार्थेति**। स्वार्थद्रव्यलिङ्गसंख्याकारकाणां क्रमेण प्रतीतौ विलम्बितप्रतीतिकलिङ्गनिमित्तेकारस्य बहिरङ्गत्वमित्यर्थः। स्वार्थादीनां युगपत् प्रतीतावप्याह — **अथवेति**। 'औत्सी, कंसिकी' इत्यत्रोदात्तनिवृत्तिस्वरो नेष्यते, 'आत्रेयी' इत्यत्रेष्यते। स्वरस्यान्तरङ्गत्वानङ्गीकारे तन्न सिध्यतीत्युपपादयति — **उत्स इत्यादिना**। **तदा प्रत्ययस्येति**। ञ्नित्स्वरस्य प्रत्ययस्वरापवादस्य लोपेन बाधात् [4]प्रत्ययाद्युदात्तत्वस्य प्रवर्तनादित्यर्थः। **ङीपि चेति**। [5]टित्त्वात्। नन्विकादेशानन्तरमाद्युदात्तत्वमिकारस्यैव न तु [6]ककाराकारस्येति कथमत्रोदात्तनिवृत्ति[7]स्वरप्रसङ्गः, अत आह — **अकृत इति**। आयन्नादिषूपदेशिवद्वचनात् 'मन्यते' इत्युक्तम्। ननु 'आत्रेयी' इत्यत्र [8]'यस्य' इति लोपेन [9]कित्स्वरस्यान्तोदात्तत्वस्य बाधेऽपि प्रत्ययस्वरेणैवान्तोदात्तत्वादुदात्तनिवृत्तिस्वरः सिध्येत्, अत आह — **आयन्नादिष्विति**। अत एकारस्यैव प्रत्ययाद्युदात्तत्वं स्यात्, न त्वन्त्यस्येतीकार उदात्तो न स्यादित्यर्थः। **अन्तरङ्गत्व इति**। [10]'यस्य' इति लोपात् पूर्वमन्तरङ्गत्वात् [11]ञ्नित्स्वरेषु कृतेषु पश्चाल्लोपे नोक्तातिप्रसङ्गावित्यर्थः। 'आयन्नादिषु' [इत्यत्र] आदिशब्दस्य व्यवस्थावाचित्वे ठचोऽग्रहणादाह — **ठच इति**। [12]'कुसीददशैकादशात् ष्ठन्ष्ठचौ'। चित्करणमन्तोदात्तार्थम्। इकादेशात् पूर्वमेव स्वरे प्रत्ययस्वरेणैवान्तोदात्तत्वसिद्धेश्चित्करणं स्वरात् पूर्वमिकादेशं ज्ञापयतीत्यर्थः। ननु 'आद्युदात्तश्च' इत्यस्य प्रत्याख्यानात् कथं विप्रतिषेध उच्यते, अत आह — **इदानीमिति**। ननु 'प्रत्ययस्य च' इत्यने-

---

[1] परत्वाच्चेति — ङ.
[2] परिभाषा १२.
[3] स्रुघ्नशब्दात् — अ.
[4] प्रत्ययाद्युदात्तस्य — अ.
[5] पित्त्वात् — अ.
[6] कक्कारस्येति — अ.
[7] 'स्वर' इति नास्ति — अ.
[8] पा. सू. ६.४.१४८.
[9] लित् — अ.
[10] पा. सू. ६.४.१४८.
[11] ञ्नित्कित्स्वरेषु — अ.
[12] पा. सू. ४.४.३१.

नैतत् सिध्यति, अत आह — **यदेति**। भाष्ये **समत्वं सिमत्वमिति**। [1]'त्वत्त्वसमसिमेत्यनुच्चानि' इति समसिमशब्दावनुदात्तौ। [यदि] लसार्वधातुकानन्तरं 'सुप्पितौ च' इत्युच्येत तदा तित्स्वरं पित्स्वरो बाधेत। यथान्यासे तु पित्स्वरं [2]तित्स्वरो बाधत इत्याह — **एतदिति**। ननु परत्वात् स्वरितत्वे सति [3]पश्चादेकादेश आन्तरतम्यात् स्वरित एव स्यादिति किं विप्रतिषेधेन, अत आह — **स्वरितत्वादिति**। अनुदात्तात् प्रागित्यपि द्रष्टव्यम्। एकादेशानन्तरमुभयप्राप्तिमाह — **तत्रेति**। भाष्ये [4]चलनः, चोपनः। [5]'चलनशब्दार्थादकर्मकाद्युच्'। भाष्ये आम्बष्ठ्या। 'आम्बष्ठस्यापत्यं स्त्री [6]'वृद्धेत्कोसल' इति ञ्यङ, [7]'यङश्चाप्'। तयोरेकादेशः। एवं सौवीर्या। चापः पित्त्वचित्त्व-सत्त्वेऽपि चित्स्वर एव भवति, न पित्स्वर इत्यर्थः। **नास्ति विप्रतिषेध इति**। विप्रतिषेध एव निराक्रियते, न तत्फलमिति भावः। एकादेशापेक्षया स्वरितत्वं कथमन्तरङ्गम्, अत आह — **स्त्रीत्वापेक्षेति**। स्वरितस्य कथमनुदात्तान्तरतम्यम्, अत आह — **स्वरित इति**। आबिति सामान्यग्रहणाविघातार्थश्चकारः किं न स्यात्, अत आह — **यदीति**॥

[३, २६–३०]

(**रत्नप्रकाशः**) **स्रौघ्नीति**। विभज्यान्वाख्यानपक्षे स्रुघ्न अ ई इति स्थिते परत्वात् [8]'यस्य' इति लोपे कृते ईकारस्योदात्तनिवृत्तिस्वरो न स्यादिति मन्यते। **बहिरङ्गलक्षण इति**। ङीप-स्तत्प्रकृतेश्चाश्रयणाल्लोपो बहिरङ्गः। अण्प्रत्ययमात्राश्रितस्त्वाद्युदात्तोऽन्तरङ्गः। यत्तु 'स्वार्था-दीनां क्रमेण प्रतीतिरिति स्त्रीत्वनिमित्त ईकारो बहिरङ्ग इति तन्निमित्तो लोपो बहिरङ्गः' इति। तन्न, [9]'यस्य' इति लोपविधौ स्त्रीत्वस्यानाश्रितत्वेन तन्निमित्तबहिरङ्गत्वकथनस्यानौचित्यात्। प्रकृतभाष्यस्यान्यथोपपन्नत्वात्। अत एव तदुपेक्ष्य पक्षान्तरस्य तत्रैव परिगृहीतत्वात्। **औत्सीति**। उत्से जाता, [10]'उत्सादिभ्योऽञ्' ङीप्। [11]तत्र ञिति परे प्रकृतेः क्रियमाणमाद्युदात्तत्वमन्तरङ्गम्। ञिदन्तस्य ङीपि क्रियमाणो लोपो बहिरङ्गः। तत्र बहिरङ्गपरिभाषानाश्रयणे [12]ञित्स्वराप्रवृत्तौ प्रत्याद्युदात्तमेवोत्पत्तिशिष्टं स्यादिति ङीप उदात्तनिवृत्तिस्वरप्रसङ्ग इति मन्यते। **कंसिकीति**। कंसेन क्रीता। कंसाट्टिठनि टिल्लक्षणो ङीप्। तत्र टिठनष्टकारेकारयोर्नकारस्य चावयवत्व-मारोपितमिति ठमात्रस्य प्रत्ययत्वेन तस्याद्युदात्तत्वे ठकारस्येकि [13]कृतेऽकारस्य [14]'यस्य' इति लोपे उदात्तनिवृत्तिस्वरः स्यान्ङीप इति मन्यते। **आत्रेयीति**। अत्रेरपत्यं स्त्री [15]'इतश्चानिञः' इति ढक्, ङीप्। तत्र ढकारस्य [16]'आयन्नादिषूपदेशिवद्वचनम्' इत्येयादेशे कृते ततः प्रत्ययाद्युदात्तत्वेऽ-

---

[1] फिट्सूत्रम् ७८.

[2] 'तित्स्वरः' इत्यस्यानन्तरं 'वा' इत्यधिकम् — अ.

[3] पश्चादेकादेशादान्तरतम्यात् — अ.

[4] भाष्ये 'चलनः कम्पनः' इति दृश्यते। 'चलनः चोपनः' इत्यत्रंभट्टाभिमतभाष्यपाठ इति भाति। पूनामुद्रितेऽयं पाठो दृश्यते।

[5] पा. सू. ३.२.१४८.

[6] पा. सू. ४.१.१७१.

[7] पा.सू. ४.१.७४.

[8] पा. सू. ६.४.१४८.

[9] पा. सू. ६.४.१४८.

[10] पा. सू. ४.१.८६.

[11] तत्राञिति — ब.

[12] नित्स्वराप्रवृत्तौ — ब.

[13] 'ठस्येकः' इत्यत्र स्थानिबोधकशब्दे आदेशे चाकारस्योच्चारणार्थत्वमभिमतमिति भाति।

[14] पा. सू. ६.४.१४८.

[15] पा. सू. ४.१.१२२.

[16] का. वा. ७.१.२–१.

कारोऽनुदात्तो लुप्यत इत्युदात्तनिवृत्तिस्वरो न स्यादिति मन्यते। **भूयानिति**। स्वार्थे ईयसुन्। वैपुल्ये बहुशब्दः। परिहारद्वयसमुदायस्यैकपरिहारापेक्षया वैपुल्यं बोध्यम्। तत्र ठचश्चित्त्वसामर्थ्यादादावेव ठस्यैकादेशे ततः प्रत्ययाद्युदात्तत्वेऽनुदात्त एव लुप्यत इति दोषाभावः। **कित्स्वरं बाधेतेति**। तथा चैतदर्थं सा परिभाषावश्यमाश्रयणीयेति तयैवोपपत्तौ प्रकृतसूत्रं न कर्तव्यमिति भावः। तदेतत् सर्वं विचारचातुरीमात्रमध्येतृबुद्धिवैशद्यायाधिकार्थनिरूपणाय च कृतं ज्ञेयम्, न तु सूत्रप्रत्याख्यानाय, ज्ञापकाद्याश्रयेण सूत्रप्रत्याख्यानानौचित्यात्। तदेतदभिप्रेत्याह वार्तिककारः—— **प्रत्ययाद्युदात्तत्वादिति**। यत्तु "यदा [1]'ञ्नित्यादिर्नित्यम्' इत्यस्यानन्तरं 'प्रत्ययस्य च' [2]इत्युच्यते तदा परत्वाद्धातुस्वरं प्रत्ययस्वरो बाधेत। यथाश्रुतन्यासे तु प्रत्ययस्वरं धातुस्वरो बाधते" इति। तन्न, तथापि प्रत्ययस्वरस्यान्तरङ्गत्वेनादौ प्रवृत्तौ ततः सतिशिष्टधातुस्वरेणेष्टसिद्धेः। यदप्युक्तम् '**पित्स्वरादिति**। एतदत्रानुदात्तविधाने सिध्यति, नान्यत्रेति भावः' इति। तदपि न, अन्यत्रानुदात्तविधानेऽपि प्रकृतिप्रत्ययाश्रयैकादेशापेक्षया प्रत्ययमात्राश्रयतयान्तरङ्गेऽनुदात्ते सति तत एकादेशेऽन्तरतमेऽभिमतसिद्धेः। **कार्येति**। स्वरितत्वात् पूर्वमेकादेशे तत्रैकादेशस्य परादित्वेन परोऽनुदात्त एव तित्स्वरं बाधित्वा स्यादिति मन्यते। इदानीं भगवान् वार्तिककाराभिमतं विप्रतिषेधं निराकरोति—— **न वेति**। प्रत्ययाद्युदात्तत्वस्यान्तरङ्गत्वेन तस्य बाधनं बहिरङ्गेण न युज्यते, [3]निष्फलं चेति भावः। **परत्वात् स्वरितत्वमिति**। पाठतोऽन्तरङ्गतश्च परत्वमिति भावः। एतेन 'अन्तरङ्गत्वं स्वरितस्यानपेक्ष्यैतदुक्तम्' इति निरस्तम्। विप्रतिषेधसूत्रेऽन्तरङ्गस्य परत्वख्यापनात्। पाठत एव परत्वं गृहीतमिति मन्यमान आह—— **नित्य एकादेश इति**। [4]यक्षानुरूपबलिन्यायेनाह —— **स्वरितत्वमपीति**। **आन्तर्यत इति**। स्वरितेऽप्यनुदात्तभागस्य सत्त्वेन स्वरितानुदात्तोभयान्तरतमः स्वरित इति भावः। **चापि चित्करणादिति**। यदि सामान्यग्रहणाविघातार्थत्वमेव चकारस्य स्यात् तदा टापमेव कुर्यादिति भावः॥

[३, २६–३०]

(**नारायणीयम्**) स्रौग्घ्नीत्यादौ स्वरलोपयोर्युगपत्प्राप्तिमुपपादयति—— **विभज्येति**। **स्वार्थादीनामिति**। स्वार्थद्रव्यलिङ्गसंख्याकर्मादीनाम्। **अथवेति**। बह्वपेक्षत्वाल्लोपो बहिरङ्गः, प्रत्ययत्वमात्राश्रयत्वात् स्वरोऽन्तरङ्ग इत्यर्थः। **ङीपि च** वाच्यमित्युदात्तनिवृत्तिस्वर ईकारस्य स्यादिति [शेषः]। **ठकारस्याकृत इति**। कृते त्विकादेशे उदात्तत्वे दोषाभावः। [5]**पूर्वमेयादेश इति**। तत आद्युदात्तत्वे उदात्तलोपाभावादुदात्तनिवृत्तिस्वर [6]ईकारस्य न स्यादिति। तदाह—— [7]**ङीपोऽत्रेति**। **दोषाभाव इति**। 'औत्सी, [8]'कंसिकी' इत्यत्रोदात्तनिवृत्तिस्वरो न भवति, 'आत्रेयी' इत्यत्र तु भवतीत्यर्थः। नन्वन्तरङ्गत्वाट्ठस्यैकादेशात् पूर्वमुदात्तत्वे कृते लोपे च सत्युदात्तनिवृत्तिस्वरः स्यादेवेत्यत आह—— **ठचश्चित्करणादिति**। यदि पूर्वं प्रत्ययस्वरः स्यात् तदा ठचश्चित्करणमन्तो-

---

[1] पा. सू. ६.१.१९७.

[2] प्रदीपे 'इत्युच्येत' इत्यत्र 'इत्युच्यते' इति निर्णयसागरमुद्रिते पाठः।

[3] निष्पन्नं चेति —— प.

[4] लौ. न्या. साहस्री पृष्ठम् ६४.

[5] पूर्वमेकादेश इति —— ङ.

[6] इकारस्य —— ङ.

[7] प्रदीपे 'पूर्वमेयादेशे ङीप्। अत्रोदात्तनिवृत्तिस्वरो न स्यात्' इत्युपलभ्यते। 'पूर्वमेयादेशे ङीपोऽत्रोदात्तनिवृत्तिस्वरो न स्यात्' इति पाठोऽभिमत इति भाति।

[8] 'कंसिकी' इति नास्ति —— ङ.

दात्तार्थं न कुर्यात्, प्रत्ययस्वरेणैव सिद्धत्वात्। कृतं तु पूर्वमिकादेशं ज्ञापयतीत्यर्थः। **तत उदात्तेति**। अन्तरङ्गत्वात् पूर्वं कित्स्वरे सति लोपे उदात्तनिवृत्तिस्वरः सिध्यतीत्यर्थः। नात्र पूर्वं विचारमुपसंहृत्य विप्रतिषेधः पठ्यत इति मन्तव्यमित्याह — **इदानीमिति**। प्रत्ययसंज्ञासंनियोगेन स्वरविधावेव विप्रतिषेधात् [1]'स्वरविधिर्व्यर्थ इत्येतदेव विशदयितुमाह — [2]**यदि ञ्नित्यादिरिति**। **एतदत्रेति**। प्रत्ययसंज्ञासंनियोगेनानुदात्तत्वविधाने प्रयोजनमनेन विप्रतिषेधपाठेन प्रदर्श्यत इत्यर्थः। **नान्यत्रेति**। यदि 'लसार्वधातुकमनुदात्तम्' इत्यस्यानन्तरम् [3]'अनुदात्तौ सुप्पितौ च' इत्युच्येत तदा परत्वात् [तित्]स्वरं बाधित्वा पित्स्वरः स्यादित्यर्थः। ननु टाप एकादेशाद्वा पूर्वमन्तरङ्गत्वात् स्वरितत्वे युगपत्प्राप्त्यभावाद्विप्रतिषेधो नोपपद्यत इत्यत आह — **स्वरितत्वादिति**। 'मन्यते' इत्यनेन पूर्वपक्षत्वान्न्यायाभासावष्टम्भेनैतदुक्तमिति दर्शयति। ननु चापश्चित्करणस्य सामान्यग्रहणाविघातार्थत्वात् कथं तत्सामर्थ्यादन्तोदात्तत्वसिद्धिरित्यत आह — **यदीति**। **यङ्ष्टाब्व्यधास्येतेति**। एवं हि प्रत्ययान्तरं न कर्तव्यमिति लाघवं भवति॥

गुप्तिज्किद्भ्यः सन् ३.१.

[३, ३०–३१]

(**उद्द्योतनम्**) [4]"कित' इति संपातायातमित्याह — **अनुक्रमेति**। सौत्रेत्यादिः। **न त्विति**। [5]तेन चिकित्सतीति परस्मैपदमेव भवति। केवलेभ्य आत्मनेपदाभावादाह — **सन्नन्तेभ्य इति**। पूर्वस्यात्मनेपदाभावात् कथं तदतिदेशः, अत आह — **लिङ्गेति**। लिङ्गातिदेशेऽनिष्टमाह — **अनुचिकीर्षतीति**। तत्रात्मनेपदनिमित्तङ्कारसत्त्वेऽपि [6]'अनुपराभ्याम्' इति परस्मैपदमेव कर्तृगेऽपि फले नियतमिति सन्नन्तान्नात्मनेपदमित्यर्थः। व्यवधानान्नात्मनेपदमित्युक्तं निराह — **व्यवधानेऽपीति**। **शिष्टमिति**। यद्यपि 'तद्यथा गोः सक्थनि' इत्यादिभाष्यं तत्रापि न व्याख्यातम्, तथापि तत्सूत्रभाष्यं तत्र व्याख्यातम्, तदेवात्राप्युपयुक्तं ग्राह्यमित्यर्थः॥

[३, ३०–३१]

(**रत्नप्रकाशः**) गुप्तिज्मान्बधा अनुदात्तेतः। दानशानौ स्वरितेतौ। तेषामनुबन्धकरणं व्यर्थम्, नित्यसन्नन्तत्वादिति मत्वा पृच्छति — **गुपादिष्विति**। **आत्मनेपदार्थमिति**। तत्प्रकृतिकात् सन्नन्तादात्मनेपदं भवत्वित्येवमर्थमिति भावः। **क्रियमाणेष्विति**। अनुबन्धव्यक्तिभेदाद् बहुवचनोपपत्तिः। **सना व्यवहितत्वादिति**। [7]'तस्मादित्युत्तरस्य' इत्युक्तत्वाद्व्यवहिते आत्मनेपदनियमो न स्यादिति भावः। **पूर्ववत्सन इति**। पूर्ववत् सन्नन्तस्यात्मनेपदलिङ्गं भवतीति

---

[1] प्रत्ययस्य चेति स्वरविधिरित्यर्थः॥ स्वरसिद्धिर्व्यर्थेत्येतदेव — ङ.

[2] प्रदीपे 'यदा ञ्नित्यादिः' इत्यत्र 'यदि ञ्नित्यादिः' इति पाठोऽभिमत इति भाति।

[3] अनुवृत्तिलब्धार्थकथनम् — अनुदात्ताविति।

[4] हरयाणामुद्रिते भाष्ये 'गुप्तिज्कित्मानाः' इति दृश्यते कुण्डलमध्ये। गुप्तिज्कितमानाः' इति निर्णयसागरचौखाम्बामुद्रितयोः पाठः॥ कितीति — अ, ऋ, लृ.

[5] 'तेन' इति नास्ति — अ.

[6] पा. सू. १.३.७९.

[7] पा. सू. १.१.६७.

सूत्रार्थ आश्रयिष्यत इति मन्यते। तत्र सन इति पञ्चम्यन्तमाश्रित्यात्मनेपदमेवातिदेष्टुमुचितम्, अन्यथा 'आरिरंसति, परिरंसति, विरिरंसति' इत्यादावात्मनेपदप्रसङ्गादित्याशयेनाह — **पूर्ववत्सन इत्युच्यत इति**। **भविष्यतीति**। व्यवहितेऽपि नियम इति शेषः। सामर्थ्याश्रयणमन्तरेण न्यायसिद्धमेव समुदायस्य तदनुबन्धकत्वमित्याशयेनाह — **अथवेति**॥

[३, ३०–३१]

(**नारायणीयम्**) **न त्वयमिति**। तेन विचिकित्सतीति परस्मैपदमेव भवति। तथा च प्रयोगो दृश्यते — [१]'य एवं विद्वान् विचिकित्सति, [२]'यत् प्रजापतिर्व्यचिकित्सत्' इति। नन्वनुबन्धकरणस्यात्मनेपदार्थत्वात् प्रश्नोऽयमसमञ्जस इत्यत्राह — **नित्यसन्विषयत्वादिति**। [३]**पूर्ववदिति लिङ्गातिदेशादिति**। पूर्वस्य धातोर्यल्लिङ्गमनुदात्तेत्त्वादिकं तत् सन्नन्तस्यापि भवतीति सूत्रार्थं मन्यत इत्यर्थः। **अनुचिकीर्षतीत्यादावपीति**। ञित्त्वस्य लिङ्गस्यातिदेशात्। कार्यातिदेशे तु [४]'अनुपराभ्यां कृञः' इत्यात्मनेपदापवादस्य परस्मैपदस्य विधानादात्मनेपदाभावः सिद्धो भवति। उभयोः परिहारयोर्विशेषं विशदयति — **सना व्यवधानेऽपीति**॥

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ३.१.६.

[३, ३१–३२]

(**उद्द्योतनम्**) ननु परत्वादित्वेऽभ्यासदीर्घः प्रवर्तमानः कथमकारस्य[५] स्यात्, अत आह — **सामान्येति**। प्रश्नाशयमाह — **यथेति**। [६]अपवादस्योत्सर्गबाधकत्वे साधकमाह — **एतच्चेति**। 'यंयम्यते' इत्यादावपवादत्वान्नुकि कृते दीर्घाप्रसक्तेरकित इति व्यर्थं सदभ्यासविकारेष्वपवादा उत्सर्गं न बाधन्त इति सामान्येन ज्ञापकमित्यर्थः। 'ई चाचः' इत्यनेन कथं हलादिशेषसिद्धिः, अत आह — **अजन्तस्येति**। [७]नन्वभ्यासविकारस्य दीर्घे कथमिकारस्य दीर्घसिद्धिः, अत आह — [८]**स चेति**। ननु लोपह्रस्वादेरभ्यासविकारस्य सत्त्वात् 'स चेत्वमेव' इत्ययुक्तम्, अत आह — **लोपस्य तावदिति**। **तद्धितेति**। अभ्यासस्य दीर्घ इत्युक्ते [९]'अलोऽन्त्यस्य' [१०]इत्यन्त्यस्य ह्रस्वस्यैव दीर्घसंभवात् 'आभ्यासस्य' इति तद्धितनिर्देशो व्यर्थ इत्यर्थः। ननु हलन्तव्यावृत्तये तद्धितनिर्देशः स्यात्, अत आह — **दीर्घेति**। **विशेषाभावात्** तद्धितकृतेत्यादिः। दीर्घग्रहणं दृष्टान्तार्थम्। **अथवेति**। तद्धितग्रहणसामर्थ्याद्विकारविशेष एव ग्रहीष्यत इत्यर्थः। ननु [११]बधेरभ्यासविकारान्तराभावादित्वमेव विकार इत्यवैरूप्याय मानादिष्वपीत्वमेव विकारो [१२]ग्रहीष्यत इति किमित्व-

---

[१] तै. ब्रा. २.१.२.

[२] शत. ब्रा. २, २, ४, ९.

[३] प्रदीपे 'पूर्ववदिति' इति प्रतीकतया मुद्रणं दृश्यते। 'पूर्ववदिति लिङ्गातिदेशात्' इति विशिष्टः कैयटग्रन्थत्वेनात्राभिप्रेतः।

[४] पा. सू. १.३.७९.

[५] अवर्णस्येत्यर्थः।

[६] अपवादस्योत्सर्गबाधकत्वे — अ.

[७] नन्वभ्यासाकारस्य — अ, ऋ लृ.

[८] न चेति — अ.

[९] पा. सू. १.१.५२.

[१०] इत्यस्य — अ.

[११] वधेरभ्यासस्य विकारान्तराभावात् — अ.

[१२] गृह्यत इति — अ.

ग्रहणे बहुयत्नः कृतः, अत आह — **ह्रस्वश्चेति** यथा पर्जन्यः समुद्रे क्षेत्रे च काले वर्षति तथा लक्षणवशात् ह्रस्वेऽपि ह्रस्वः स्यादेवेति तन्निवृत्तये यत्न आस्थित इत्यर्थः ॥

[३, ३१–३२]

(**रत्नप्रकाशः**) अत्र विशेषविहितेन दीर्घेण [1]"सन्यतः" इतीत्वं बाध्यत इत्याशयेनाह — **अभ्यासदीर्घत्व इति**। **इत्वे कृत इति**। 'न वा' इत्यादिना वक्ष्यमाणो भावः। तमजानन्नाह — **कथं पुनरिति**। तद्बुद्धिपरीक्षार्थमाह — **अथ कथमिति**। **अभ्यासविकारेष्विति**। [2]'दीर्घोऽकितः' इत्यकिद्ग्रहणेनाभ्यासविकारेषु बाधका न बाधन्त इति ज्ञापितम्। तस्य विशेषमुखेनात्र निदर्शनं कृतम्। परिहार[3]विभवार्थमाह — **अथवेति**। **ई चाच इति**। तथा च हलादिशेषमन्तरेणाभ्यासस्याजन्तता नेति हलादिशेषसिद्धिरिति भावः। **अभ्यासस्य विकार इति**। स चेत्वरूप एव गृह्यते, न तु तत्स्थानी, तस्य बधेरभ्यासापेक्षया विकारत्वाभावात्। ननु पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वस्यापि ह्रस्वे कृते विकारो भवत्येव स इति चेन्न, शास्त्रमर्यादया तस्य तत्प्रवृत्तावपि तस्य [4]श्रुतिग्राह्यविकारत्वाभावात्। किं च तद्धितान्ताभ्यास[5]शब्दग्रहणसामर्थ्यात् ह्रस्वस्य ग्रहणं न भवति। अच एव हि दीर्घो भवति। अपि च प्रत्यासत्तिबलात् सन्निमित्त एव विकारो गृह्यत इत्यभ्यासह्रस्वस्य लिडादिसाधारणस्याग्रहणम्। लोपस्तु विकार एव न भवति, [6]"लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयति" इति पस्पशाह्निके भगवता विकारात् पृथग् लोपस्य ग्रहणात्। न च [7]गोबलीवर्दन्यायेन तत्र लोपशब्दस्य सार्थक्यमिति लोपस्य विकारत्वाभावं न ज्ञापयति [8]स इति वाच्यम्, लोके कथंचिद् बलीवर्दादिशब्दानां [9]तादृशे वाक्ये सार्थक्येऽप्यार्षग्रन्थे तत्कल्पनानौचित्यात्। यत्तु 'लोपस्यादेशो विधातुमशक्यः, अतः स न गृह्यते' इति। तन्न, गामिच्छति गव्यतीत्यत्र क्यचि [10]"सुपो धातुप्रातिपदिकयोः" इत्यमो लुकि तस्य स्थानिवत्त्वेनाम्संज्ञकत्वात् [11]"औतोऽम्शसोः" इत्याकार एकादेशः स्यादित्याशङ्क्य 'अच्यमि' इत्यजनुवृत्त्या भाष्य एव परिहृतत्वात् ॥

[३, ३१–३२]

(**नारायणीयम्**) ननु परत्वादित्वे कृते दीर्घः प्रवर्तमानः कथमवर्णस्य स्यादित्यत आह — **सामान्येति**। सामान्येनेत्वे प्राप्ते दीर्घस्यारम्भात् तद् बाधित्वावर्णस्य दीर्घः प्राप्नोतीति[12]। ननु चोद्ये सति परिहारेऽभिधातव्ये परस्यापि चोद्यमनुपपन्नमित्याशङ्क्याशयमाह — **यथेति**। **एतच्चेति**। यंयम्यत इत्यादौ विशेषविहितत्वान्नुकि कृतेऽनजन्तत्वादेव दीर्घो न भविष्यतीति 'अकितः' इति न कर्तव्यम्। कृतं त्वभ्यासविकारेषूत्सर्गानपवादा न बाधन्त इति सामान्येन

---

[1] पा. सू. ७.४.७९.
[2] पा. सू. ७.४.८३.
[3] आधिक्यार्थमित्यर्थः।
[4] स्तुतिग्राह्य — ब.
[5] आभ्यासशब्देति छेदः।.
[6] पस्पशाह्निके व्याकरणप्रयोजनकथनावसरे भाष्य एतदुक्तम्।
[7] लौ. न्या. साहस्री. पृष्ठम्
[8] लोपशब्द इत्यर्थः।
[9] तादृशवाक्ये — प.
[10] पा. सू. २.४.७१.
[11] पा. सू. ६.१.९३.
[12] इतिशब्दो नास्ति — घ.

ज्ञापयतीत्यर्थः। **अजन्तस्येति**। अचाभ्यासस्य विशेषणात् तदन्तविधिः। ततश्च हलादिशेषे कृते ईकारः सिध्यतीत्याह — **न चेति**। ननु तर्हि तद्धितान्तग्रहणेऽपि ह्रस्वादेरप्यभ्यासविकारत्वात् तदवस्थ एव दोष इत्यत आह — **स चेत्वमेवेति**। **लोपस्येति**। हलादिशेषेण निवृत्तिर्लोपो विवक्षितः। **आहत्येति**। सन्प्रत्ययसंनियोगेन दीर्घविधानात् सञ्छब्दमुच्चार्य यो विहितोऽभ्यासविकारस्तस्य ग्रहणं विज्ञास्यत इत्यर्थः। ननु तद्धितनिर्देशो ह्रस्वस्याभ्यासविकारस्य ग्रहणेऽप्यर्थवान्, बधेः प्रयोजनाभावाद्ध्रस्वप्रवृत्त्यभावात् [1]तन्निवर्तनेनेत्यत आह — **ह्रस्वश्चेति**॥

धातोः कर्मणः समानकर्तृकादिच्छायां वा ३.१.७.

[३, ३३–३९]

(**उद्द्योतनम्**) ननु धातोः कर्मत्वं [2]समानकर्तृकत्वं च न संभवति, क्रियायास्तथात्वात्। अर्थद्वारा तत्संभवेऽपि क्रियाविशेषानुपादानात् 'किंक्रियानिमित्ते [3]कर्मत्वसमानकर्तृकत्वे' इत्यनिश्चयः, अत आह — **धातोरिति**। उपस्थितेच्छाग्रहणे न केवलमनुपस्थितकल्पनाप्रसङ्गाभावः, किंतु प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययार्थः प्राधान्येनेत्यपि सिद्धं भवतीत्याह — **एवं चेति**। जिगमिषतीत्युक्ते गमनकर्मकेच्छा तत्समानकर्तृका प्रतीयते, [4]न क्रियान्तरकर्मत्वाद्युपादाने। प्रश्नाशयमाह — **अयमिति**। उत्तराशयमाह— **संघातेनेति**। सोपसर्गादुत्पत्तावनिष्टमाह — **ततश्चेति**। **अत एवेति**। [5]'कर्तरि च' इति निषेधोऽनित्य इत्यर्थः। ननु संघातस्य क्रियाविशेषाभिधायित्वात् कर्मत्वं युक्तम्, अत आह — **अयमर्थ इति**। [6]विशिष्टस्य कर्मत्वाभावे संमतिः — **यथोक्तमिति**। [7]'अनभिहित' सूत्रस्थमिदम्। विशेषणस्य कर्मत्वमपि तत्रोक्तं शङ्कते — **अथेति**। **तथापीति**। उपसर्गार्थोऽपि कर्म, धात्वर्थोऽपि। तत्समुदायस्याकर्मत्वात् समुदायान्न भविष्यतीत्यर्थः। न चोपसर्गमात्रादुत्पत्तिप्रसङ्गः, तस्य स्वातन्त्र्येण प्रयोगाभावात्। वस्तुत उपसर्गाणां द्योतकत्वेन तदर्थस्य न कर्मत्वम्, नापि समुदायाभिधेया क्रियेत्यत्र तात्पर्यम्। सोपसर्गस्य कर्मत्वे धातुग्रहणेऽपि धातुमात्रात् सन उत्पत्तिर्न संभवतीत्याह — **यदीति**। **संघातस्य** धातूपसर्गसमुदायस्य। **अवयवस्य** धातोः। **कर्मण इति**। पञ्चमीत्वे धातुसामानाधिकरण्यासंभवादयं दोषः, न तु षष्ठीत्व इत्याह — **षष्ठ्यां त्विति**। कर्मण इत्यवयवसंबन्धे षष्ठी।

---

[1] बधिनिवर्तनेनेत्यर्थः।

[2] समानकर्तृत्वं च — अ, ऋ, लृ.

[3] 'कर्मत्वसमानकर्तृकत्वे' इति नास्ति — अ.

[4] 'न' इति नास्ति — अ, ऋ.

[5] पा. सू. २.२.१६. सिद्धान्तकौमुद्यां 'कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः' इत्यर्थं कृत्वा 'अपां स्रष्टा, ओदनस्य पाचकः' इत्युदाहृतत्वात् अनेनैव सूत्रेणात्र निषेधस्य प्राप्तत्वात् तस्यैव निर्देश उचितः, तथापि वृत्तौ 'कर्तृग्रहणस्य षष्ठीविशेषणत्वमाश्रित्य कर्तरि या षष्ठी सा तृचाकेन च सह न समस्यत इत्यर्थस्याश्रितत्वात् कर्तरि चेति सूत्रस्य च कर्तरि यौ तृचकौ ताभ्यां सह षष्ठी न समस्यत इति व्याख्याय 'अपां स्रष्टा, ओदनस्य भोजकः' इत्युदाहृतत्वात् तदनुरोधेनात्र कर्तरि चेति सूत्रनिर्देशः।

[6] विशेषस्य — ऋ.

[7] पा. सू. २.३.१.

[1]वाकारः सन्विकल्पार्थः सौत्रो गृहीतः। उक्तमर्थं [2]सप्रयोजनं श्लोकेन संगृह्णाति — **तस्मादिति**। धातूपसर्गयोरडादिव्यवस्थायै पृथक्त्वेन 'अयं धातुः, अयमुपसर्गः' इति भेदेन कल्पनात् तयोर्धातुः क्रियावाची, उपसर्गस्तु वाचको भवतु वा मा वेत्यर्थः। अनवकाशैः क्यजादिभिः सनो बाधं निराह — **विकल्पितत्वादिति**। प्रातिपदिकादिति त्यक्त्वा सुबन्तादित्युक्तौ हेतुमाह — **प्रातिपदिकादिति**। **अवश्यमिति**। द्वितीयां विना कर्मत्वानभिव्यक्तेरित्यर्थः। [3]विशेषस्य सामान्यबाधकत्वमित्याह — **कर्ममात्रादिति**। धातोरित्यनुक्तावित्यर्थः। ननु क्यजादेरपि विकल्पितत्वात् तदभावपक्षे सन् कुतो न स्यात्, अत आह — **यत्र चेति**। **वाक्यमेवेति**। [4]'पारेमध्ये षष्ठ्या वा' इति वाकारेणायमर्थो ज्ञापितः। **न्याय्येति**। लक्ष्यव्यवस्थार्थत्वाल्लक्षणस्येत्यर्थः। समानकर्तृकादित्यनेन सुबन्तान्न भविष्यतीति वक्तव्येऽनास्थयापवादत्वं क्यजादीनामुक्तमिति 'व्यपदेश्यम्' इत्यादिभाष्यतात्पर्यमित्याह — **सच्छोभनमिति**। सुबन्तस्य केनापि कारकेणान्वययोग्यता नास्तीत्याह — **पुत्रादेरिति**। ननु द्वितीयान्तेन सुबन्तेन साध्यमभिधीयते, अत आह — **कटमिति**। **शब्दान्तरं** करोत्यादिकम्। 'निर्वर्त्यः' [5]इत्यादिनोत्पाद्यादिकर्मत्रयमुक्तम्[6] **साधनाश्रयः** [7]कर्मत्वरूपकारकाश्रयः। **सिद्धरूप** एवाभिधीयत इत्यन्वयः। शब्दशक्तिस्वाभाव्यात् तुमुनन्तेन साध्याभिधानमित्याह — **तुमुनन्तस्येति**। अपवादपक्षेऽपि तुमुनन्तात् क्यजभावात् सनः प्रसङ्ग इत्याह — [8]**क्यचीति**। तुमुनः साध्यरूपप्रकृत्यर्थाभिधायित्वेनेच्छाभिधायित्वाभावात् 'तुमुनोक्तत्वात्' इत्ययुक्तम्, अत आह — **तुमुन्निमित्तेनेति**। [9]'समानकर्तृकेषु तुमुन्' इत्यत्र 'इच्छार्थेषु' इत्यनुवृत्तेस्तुमुनः 'इच्छति' इत्येतन्निमित्तम्। नन्विच्छतीति त्यक्त्वेच्छाबोधनाय तुमुनन्तात् सनेव प्रयुज्यताम्, अत आह — **न चेति**। **उपपदेति**। इच्छार्थेषूपपदेषु तुमुन्विधानादित्यर्थः। अत्र पौनरुक्त्यशङ्का नास्तीत्याह — **ल्युडिति**। नन्वासनशब्दस्य सुबन्तत्वात् समानकर्तृकत्वं नास्ति, अत आह — **धात्विति**। आसिधातुवाच्यक्रियामादाय समानकर्तृकत्वमित्यर्थः। इच्छार्थे सन्विधीयते। आसनशब्दादुत्पन्नेन सना सा न प्रतीयत इति ततः सन् न भवतीति प्रतिपादनाय 'इह' इत्यादिभाष्यम्। तत्रोपाधिविशेषयोर्भेदमाह — **समानशब्द इति**। [10]'अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः। अनुपाधिरतोऽन्यः स्याच्छ्लाघादि विशेषणं यद्वत्' इति प्रत्ययसूत्रोक्ते तात्पर्यम्। **क्वचिदिति**। 'प्रत्ययाधिकारे प्रकृत्युपपदोपाधीनामप्रतिषेधः' इत्यत्रोपाधिविशेषणयोरभेदविवक्षयोपाधिशब्देन द्वयोर्ग्रहणम्। 'यश्चेह' इत्यादि सदृष्टान्तं भाष्यं व्याचष्टे — **वृत्तीति**। वाक्यवत् सनन्तादपि समानकर्तृकत्वं न प्रतीयत इत्याह — **न ह्यत इति**। आसनशब्दादित्यर्थः। ननु संगतमित्यस्य धातुत्वाभावाद् धातु[11]ग्रहणे कथमत्र प्रसङ्गः, अत आह — **केवलस्येति**। अत्र समाकर्तृकत्वसंदेहदशायां सना न भाव्यम्। तन्निश्चयेन तत्प्रतिपिपादयिषायां [12]भवितव्यमेवेत्याह

---

[1] प्रदीपे 'धातोः सन्नित्याश्रीयमाणे' इत्यत्र 'धातोः सन् वेत्याश्रीयमाणे' इति पाठोऽन्नंभट्टाभिमतः स्यादिति भाति।

[2] 'सप्रयोजनम्' इत्यस्यानन्तरम् 'अपि'शब्दोऽधिकः — अ.

[3] विशेष्यस्य — अ.

[4] पा. सू. २.१.१८.

[5] इत्यादिनोत्सार्यादि — अ.

[6] 'उक्तम्' इति नास्ति — ऋ, ऌ.

[7] कर्मरूप — ऋ.

[8] क्यचि चेति — ऋ.

[9] पा. सू. ३.३.१५८.

[10] इदं 'कात्यायनवचनमिति न्यायवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्राः' इति प्रत्यय इति सूत्रे उद्द्योते।

[11] ग्रहणेन कथमत्र — ऋ.

[12] चोदितव्यमेवेत्याह — ऋ.

— **अत्र चेति**। **संजिगंसत इति**। [१]‘समो गमि’ इति प्रकृतेरात्मनेपदित्वात् [२]‘पूर्ववत् सनः’ इत्यात्मनेपदम्। [३]‘गमेर्दीर्घत्व इङ्ग्रहणम्’ इति वचनादनादेशस्य[४] दीर्घाभावः। नन्वनभिधानम् [५]‘अगतिका गतिः’ इत्युक्तम्, अत आह— **इच्छाया इति**। इच्छायाः सकर्मकत्वेन कर्माकाङ्क्षायां प्रकृत्यर्थ एव कर्मत्वेनापेक्ष्यते। प्रकृत्यर्थकर्तैवेच्छायाम्, इच्छाकर्तैव वा प्रकृत्यर्थ इत्याश्रयिष्यते, अनुपस्थितकल्पने मानाभावादित्यर्थः। ननु प्रकृत्यर्थव्यतिरिक्तमपि कर्म सनो [६]व्याप्तिसिद्ध्यर्थमाश्रीयताम्, एवं भिन्नकर्तृकत्वमपि, अत आह — **इह नित्यानामिति**। भोजनमित्यत्रेच्छतीत्यनुषङ्गः[७]। अनेनानभिधानमेव पुरस्कृतमिति ज्ञेयम्। परिमाणस्यावश्यकत्वमाह — **इच्छायां वेति**। **त्रितये** धातोः, कर्मणः, [८]‘समानकर्तृकादिति त्रितये। अन्यतरान्यतमशब्दौ द्विबहुविषये निर्धारणे वर्तेते इति पस्पशायां [९]प्रदीपकृतोक्तम्। **गौरवेति**। प्रकृत्यर्थस्य कर्मत्वे [१०]तत्कर्तरि चेच्छाकर्तृत्वेन ग्रहणसंभवात् तद्ग्रहणं व्यर्थमित्यर्थः। एवकारतात्पर्यमाह — **कार्यान्तरस्येति**। प्रत्ययपरत्वेनाक्षेपादपि धातुरायास्यति, अत आह — **धातुशब्देति**। [११]**तदभावेन** धातोरित्युच्चार्य [१२]विहितत्वाभावेन। अत्र धातोरित्यनुक्तावपि ज्ञापकात् सन आर्धधातुकत्वं शङ्कते — **नन्विति**। **नैतदिति**। सामान्यज्ञापकत्वे गुपादिसनोऽप्यार्धधातुकत्वं स्यात्। विशेषज्ञापकत्वे [१३]‘इको झल्’ इत्युक्तेरिगन्त[१४]प्रकृतेरेवार्धधातुकत्वं स्यात्। जिगमिषतीत्यादौ न स्यादित्यर्थः। ‘स्वपक्षः’ इत्यनेन किं दूषणमुक्तम्, अत आह — **यद्यपीति**। **प्रक्रमात्** बोधनात्। उपसर्गस्य विशेषकत्वपक्षेऽपि संघातस्यैव कर्मत्वमित्याह — **विशिष्टैवेति**। उपसर्गद्योत्य[१५]विशेषविशिष्टैवेत्यर्थः। उपसर्गस्य द्योतकत्वपक्षेऽपि धातुग्रहणाभावे सोपसर्गादुत्पत्तिः [१६]स्यादित्याह — **तत्र यद्यपीति**। विशिष्टैव निर्वर्त्यत इत्यत्र भाष्यान्तरविरोधं निराह — **उपपदमिति**। **विशिष्टाया एवेति**। [१७]क्रियां विशिष्टक्रियामित्यर्थः। **अथवेति**। अन्यत्र पूर्वं धातोः साधनयोगेऽप्यत्र कर्मत्वस्य समुदायनिष्ठत्वात् सनः पूर्वं धातोरुपसर्गयोगो वक्तव्य इत्यर्थः। सोपसर्गस्य कर्मत्वकथनप्रयोजनमाह — **धातुग्रहण इति**। व्याप्तिमेवाह — **पञ्चम्यां हीति**। अनुपसर्गे धातोरेव कर्मत्वात् स्यात्, सोपसर्गे[१८]धातोरकर्मत्वान्न स्यादित्यर्थः। **सोपसर्गादिति**। धातोः कर्मा-

---

[१] पा. सू. १.३.२९.

[२] पा. सू. १.३.६२.

[३] का. वा. ६.४.१६–१.

[४] अज्झनेति दीर्घविधौ इङादेशस्यैव गमेर्ग्रहणात् संजिगंसत इत्यत्र गम्धातोर्दीर्घाभाव इत्यर्थः।

[५] अगतिकगतिः — ऋ, लृ.

[६] अधिकदेशप्रवृत्तिसिद्ध्यर्थमित्यर्थः।

[७] प्रदीपे ‘न च गमनेनेच्छति, देवदत्तस्य भोजनमित्यत्रार्थे’ इति पाठोऽन्नंभट्टाभिमत इति सूच्यते। दृश्यमानेषु तु प्रदीपकोशेषु ‘देवदत्तस्य भोजनमिच्छतीत्यत्रार्थे’ इत्येवोपलभ्यते।

[८] ‘समानकर्तृकात्’ इत्यस्यानन्तरम् ‘इच्छायां वा’ इत्यधिकम् — अ.

[९] पस्पशाह्निके ‘अन्यतरोपदेशेन कृतं स्यात्’ इति भाष्यव्याख्यानावसरे प्रदीप इदमुक्तम्।

[१०] तत्कर्तृके चेच्छाकर्तृत्वेन — अ ; तत्कर्तृके वेच्छाकर्तृत्वेन — ऋ, लृ.

[११] प्रदीपे ‘तदभावाज्जुगुप्सत इत्यादौ’ इत्यत्र ‘तदभावेन जुगुप्सत इत्यादौ’ इत्यन्नंभट्टपाठ- इति भाति।

[१२] विधानाभावेन — अ, लृ.

[१३] पा. सू. १.२.९.

[१४] बहुव्रीहिर्बोध्यः, सन इति विशेष्यं बोध्यम्।

[१५] ‘विशेष’ इति नास्ति — अ, लृ.

[१६] स्यात्, अत आह — ऋ, लृ.

[१७] ‘क्रियां निर्वर्तयति’ इति भाष्ये ‘क्रियाम्’ इत्यस्यार्थमाहानेन।

[१८] धातोरकर्मकत्वात् — अ, ऋ, लृ.

वयवत्वादित्यर्थः। ननु [१]केवलस्य सोपसर्गत्वाभावात् कथं कर्मावयवत्वम्, अत आह — **प्रयोगभेदादिति।** प्रयोगस्यैव भेदः, न धातुस्वरूपस्य। तथा च सोपसर्गेऽवयवस्यान्यत्राप्यवयवत्वमविहतमित्यर्थः। 'कामम्' इत्यस्य प्रयोजनमाह — **इच्छाया इति।** [२]क्यज्विधौ [३]परिभाषोपस्थानमाह — **सुबन्तादिति।** ननु सोपसर्गस्थले उपसर्गार्थसापेक्षाद्धातोः कथं सन् स्यात्, अत आह — **सन्विधाविति।** ननु सुबन्तोपसर्ग[४]सहितस्यैव कर्माभिधायित्वात् परिभाषोपतिष्ठेत, अत आह — **अथवेति। वृत्तेरिति।** भिन्नार्थत्वाद्वावचनं विनापि प्रयोगद्वयसिद्धिरित्यर्थः। न केवलं वैयर्थ्यम्, क्रियमाणेऽनिष्टमपीत्याह — **अनर्थ इति।** तमेवाह — **प्रत्ययेति।** तन्निबन्धनकार्यमाद्युदात्तत्वादि ॥

[३, ३३–३९]

(रत्नप्रकाशः) धातोः कर्मत्वं समानकर्तृकत्वं च प्रत्ययार्थेच्छानिरूपिततद्धर्मविशिष्टवाचकत्वाद् ज्ञेयम्। धातुग्रहणानर्थक्यकथनपरं वार्तिकमवतारयति — **धातोरिति किमर्थमिति। सोपसर्गादिति।** तेनैव विशिष्टक्रियाप्रतिपादनादिति भावः। सोपसर्गात् तदुत्पत्तौ तु द्विर्वचनाडागमयोर्दोषः। **कर्मग्रहणादिति।** इदमुपलक्षणं समानकर्तृकग्रहणादित्यस्य। तदेव स्पष्टयति — **कर्मणः समानकर्तृकादिति। इत्येव धातोरिति।** तस्यैव क्रियावाचकत्वादिति भावः। द्वितीयं वार्तिकमवतारयति — **सोपसर्गमिति।** अन्वयव्यतिरेकाभ्यामुपसर्गविशिष्टमेव क्रियावाचकमिति मन्यते। **सोपसर्गं कर्मेति चेदिति।** [५]तन्नेति शेषः। कुत इत्यत आह — [६]**कर्मविशेषकत्वादिति।** यत उपसर्गस्य क्रियाविशेषकत्वेनानुपसर्गो धातुरेव क्रियावाचकस्तत इति भावः। तत्र शेषषष्ठ्यन्तस्य[७] विशेषकशब्देन समासो ज्ञेयः। [८]''तृजकाभ्यां कर्तरि' इति निषेधस्तु कारकषष्ठ्याः। तत्र मानमिदं वार्तिकं भाष्यं च। न वा याजकादित्वं विशेषकशब्दस्य, तस्मिन् पठितगणे तस्यादर्शनात्। न च प्रकृतभाष्यस्वरसेन विशेषकशब्देन सह [९]'तृजकाभ्याम्' इति षष्ठीसमासनिषेधो नेत्येतावदेव कल्प्यमिति वाच्यम्, [१०]'गुणग्राहकः, त्रिभुवनविधातुः' इत्यादिलौकिकप्रयोगानुसारेण [११]'जनिकर्तुः प्रकृतिः' [१२]'तत्प्रयोजको हेतुश्च' इति सौत्रप्रयोगानुसारेण चास्मदुक्तकल्पनाया एवौचित्यात्। न चैवं शेषषष्ठ्याः स निषेधोऽस्तु, न तु कारकषष्ठ्या इति वाच्यम्; तृजकयोः कृत्त्वेन तत्र प्रतिपदोक्तकृद्योगलक्षणषष्ठ्या एव निषेधस्योचितत्वात्। किं च यत्र शेषषष्ठ्याः कारकषष्ठ्याश्च संभवस्तत्र कारकषष्ठ्या एव समासनिषेधात्। यत्र च सामान्यविहिता विशेषविहिता च कारकषष्ठी संभवति तत्र विशेषविहिताया एव समासनिषेधात्। प्रकृतेऽपि विशेषविहितकारकषष्ठ्या एव निषेध इति कल्पयितुमुचितमिति सर्वमनवद्यम्। एतेन 'अत एव वचनात् षष्ठीसमासप्रतिषेधोऽनित्यः' इति निरस्तम्। मदुक्तरीत्या व्यवस्थोपपत्तौ सामान्य[१३]रूपेणानित्यताकल्पनानौचि-

---

[१] केवलस्योपसर्गत्वाभावात् — अ, ऋ, लृ.
[२] क्यङ्विधौ — ऋ.
[३] समर्थपरिभाषेत्यर्थः।
[४] स्मारितस्यैव — अ.
[५] तन्नेति दोषः — प, ब.
[६] कर्मत्वविशेषकत्वादिति — ब.
[७] कर्मशब्दस्येति शेषः।
[८] पा. सू. २. २.१५.
[९] पा. सू. २.२.१५.
[१०] गुणग्राहः — प, ब.
[११] पा. सू. १.४.३०.
[१२] पा. सू. १.४.५५.
[१३] रूपेण नित्यता — ब.

त्यात्। तत्कल्पनायां [१]'याजकादिभिश्च' इति सूत्रानर्थक्यापत्तेश्च। **अकर्मत्वादिति**। [२]क्रियावाचकत्वाभावेन धातोरकर्मत्वादिति भावः। [३]**सुबन्तादिति**। सनो वैकल्पिकत्वात् पक्षे क्यजादयः सावकाशा इति मन्यते। प्रातिपदिकान्मा भूदिति तु नोक्तम्। उत्तरसूत्रे सुब्ग्रहणस्य प्रत्याख्यास्यमानत्वेन सुबन्तान्मा भूदित्यस्य निराकरणेनैव तस्यापि निराकरणसंभवात्। एतेन 'प्रातिपदिकादिति तु नोक्तम्, कर्मण इति वचनात्, कर्मत्वे च सुबन्ततायां अवश्यंभावात्' इति निरस्तम्। उत्तरसूत्रेण कर्मपरप्रातिपदिकादेव क्यचोऽङ्गीकारात्, प्रातिपदिकाद्धात्वर्थे णिचो विधानाच्च। **क्यजादीनामिति**। यत्रोत्सर्गापवादौ विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवतीति [४]ज्ञापितत्वात् सुबन्तात् सन्न भविष्यतीति भावः। **अनभिधानाद्वेति**। [५]'अभिधानलक्षणाः कृत्तद्धितसमासाः' इत्यत्र कृदादिग्रहणमुपलक्षणमिति मन्यते। [६]**अगतिका गतिरिति**। यत्र समाधानान्तरं नास्ति तत्रानभिधानमाश्रयितुं युक्तम्, न त्वत्र। 'क्यजादीनामपवादत्वात्' इति समाधानस्योक्तत्वादिति भावः। इदानीं धातोरित्येवाश्रयणीयमित्याशयेन तदपि समाधानमाक्षिपति — **यदप्युच्यत इति**। **परेच्छायां [तु] प्राप्नोतीति**। तत्र क्यजादेरप्रसङ्गादिति भावः। **व्यपदेश्यं सदिति**। द्वितीयैकवचनान्ते। [७]'लः शतृशानचावप्रथमासमानाधिकरणे' इति शता। व्यपदेश्यत्वेन वर्तमानभवनाश्रयं न व्यपदिशतीत्यर्थः। एतेन 'सच्छोभनं यद् व्यपदेशार्हं तन्न व्यपदिशति' इति निरस्तम्। व्यपदेश्यमित्यनेनैव शोभनत्वस्योक्तत्वेन तत्र [८]'सच्छब्देन प्रकृतसूत्रे तत्सत्त्वस्यैव प्रतिपादयितुमुचितत्वात्। **न च सुबन्तस्येति**। अक्रियावाचकत्वादिति भावः। क्रियां प्रत्येव हि स्वातन्त्र्येण विवक्षितः कर्ता भवति। एतेन 'पुत्रादेः सत्त्वभूतार्थाभिधायित्वात् साध्यस्यैव साधनसंबन्धयोग्यत्वादिति भावः' इति निरस्तम्। ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात्। यदप्युक्तम् 'कटं करोतीत्यादावपि सुबन्तेन सिद्धरूपोऽर्थोऽभिधीयते। शब्दान्तरसंनिधानात्तु साध्यता प्रतीयते' इति। तदपि न, धात्वर्थस्यापि क्वचित् सिद्धत्वेन क्वचित् साध्यत्वेन च प्रतीयमानत्वेन सिद्धसाध्यविचारस्य प्रकृतानुपयोगात्। या तु हरिकारिका — [९]'निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः। क्रियाणामेव साध्यत्वात् सिद्धरूपोऽभिधीयते॥' इति। सापि प्रकृतोपयोगिनी न[१०] भवति, कारकाधिकारे क्रियां प्रत्येवापादानादिसंज्ञानां व्यवस्थापितत्वात्। **आसितुमिच्छतीति**। आसिक्रियायाः समानकर्तृकत्वं कर्मत्वं चास्तीति तुमुनन्तप्रकृतिकात् सुबन्तात् सन् स्यादिति मन्यते। एतेन 'तुमुनन्तस्य साध्यरूपाभिधायित्वादस्ति कर्त्रा योग इति भावः' इति निरस्तम्। तुमुनन्तस्य साध्यरूपाभिधायित्वे मानाभावात्। यदप्युक्तम् "[११]'क्यचि मान्ताव्ययप्रतिषेधः' इति क्यजत्र [१२]प्रतिषिध्यते" इति। तदपि मन्यत इत्यनुक्त्या न्यूनताग्रस्तम्। **तुमुनोक्तत्वादिति**। इच्छार्थेषूपपदेषु सत्सु जायमानस्य तुमुनः स्वार्थिकस्येच्छार्थकत्वाभावेऽप्युपपदेन गम्यमानस्येच्छारूपस्यार्थस्य तुमुनोक्तत्वमुपचर्यते। **आसनमिच्छतीति**। उपपदनैरपेक्ष्येण भावे ल्युड्विहित इति [१३]पूर्वोक्तदोषाभावेन कर्मत्वसमानकर्तृकत्वसत्त्वेन चासनशब्दात् सन् स्यादिति भावः।

---

[१] पा. सू. २.२.९.

[२] सोपसर्गस्यैव क्रियावाचित्वे धातोः क्रियावाचित्वाभावात् इच्छानिरूपितकर्मार्थवाचित्वं नास्तीत्याशयः।

[३] एवं तर्हीति — प.

[४] पारेमध्ये षष्ठ्या वेत्यादिनेति भावः।

[५] महाभाष्यम् ३.३.१९.

[६] अगतिकगतिरिति — ब.

[७] पा. सू. ३.२.१२४.

[८] सच्छब्दस्य — प, ब.

[९] वाक्यपदीयम् ३.७.७९.

[१०] 'न' इति नास्ति — प.

[११] का. वा. ३.१.८–१.

[१२] 'प्रतिषिद्धः' इति प्रदीपे पाठः।

[१३] पूर्वोक्तत्वाभावेन — ब.

इदानीमाक्षेप्ता धातोरिति कृतेऽप्यनभिधानमवश्यमाश्रयणीयमित्याशयेनाह — **इहेति**। **विशेष उपाधिर्वेति**। विधीयमानप्रत्ययार्थः **उपाधिः**। यथा [1]"हरतेर्दृतिनाथयोः पशौ" इत्यत्र पशुः। प्रकृते त्विच्छा। उपाधिभिन्नो निमित्ततयोपात्तोऽर्थो **विशेषः**। स एव विशेषणमित्यप्युच्यते। यथा [2]"गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु" इत्यादौ श्लाघादयः। **आसितुमिच्छतीति**। अनेन वाक्येन योऽर्थो गम्यते स चेदासनशब्दात् सनि कृते गम्येत तदा ततः सन् स्यात्। स तु न गम्यते। न हि 'आसिसिषते' इत्यनेनेव 'आसिसनिषति' इत्यनेन सोऽर्थः प्रतीयत इति भावः। तद्वत् 'आसनमिच्छति' इति वाक्येनापि सोऽर्थो न प्रतीयत इत्याशयेनाह — **आसनमिच्छतीति**। **संगतमिच्छतीति**। संबन्धमिच्छतीत्यर्थः। संबन्धार्थाद् गमिधातोः कर्मणः समानकर्तृकात् सन् न भवति, [3]संबन्धमिच्छतीत्यनेन प्रतीयमानस्यार्थस्य संगन्तुमिच्छतीत्यनेन वाक्येन 'संजिगंसते' इत्यनेन [4]वाप्रतीतेरित्येवञ्च तत्र सन् वारणीय इति भावः। एतेन "किमात्मकर्तृकं [5]संगमनमिच्छति, अथ परकर्तृकमिति संदेहाद् यदा समानकर्तृकत्वं नावधार्यते तदा न भाव्यम्, यदा तु समानकर्तृकत्वं प्रतिपिपादयिषितं तदा भवितव्यमेव सना 'संजिगंसते वत्सो मात्रा' इति" इति निरस्तम्। व्याख्येयभाष्यस्यासंगतत्वापत्तेः। न हि सूत्रे समानकर्तृकादिति पदे विद्यमानेऽसमानकर्तृकाद्धातोः सनोऽभावं दृष्टान्तीकृत्यानभिधानेन सुबन्तात् सनोऽभावं साधयितुं कश्चिदभ्रान्त इच्छति। तदेवमावश्यकेनानभिधानेन धातुग्रहणं निराकृत्य तेनैव कर्मसमानकर्तृकग्रहणे अपि निराकरोति — **कर्मेति**। इदानीम् 'इच्छायां सन्' इत्येतावति सूत्रे कृतेऽनभिधानेनातिप्रसङ्गे वारितेऽप्यङ्गपरिमाणार्थं सन आर्धधातुकसंज्ञालाभार्थं च धातुग्रहणं कर्तव्यमित्याशयेनाह — **अङ्गपरिमाणार्थं त्विति**। सोपसर्गेणैव धातुना क्वचिदर्थोऽभिधीयत इति तस्मात् सन् मा भूत्, केवलादेव [6]धातोः स्यादित्येवमर्थं धातोरिति वक्तव्यम्। तेन 'प्राचिकीर्षत्' इत्यादावड्द्वित्वयोर्व्यवस्था सिध्यतीति भावः। **अन्यतरदिति**। कर्मसमानकर्तृकग्रहणमेकं धातुग्रहणमेकमिति तन्निराकरणग्रन्थानुसारेण द्वयोरेकस्य निर्धारणमिति तरबुपपत्तिः। **कर्मग्रहणमिति**। समानकर्तृकग्रहणस्योपलक्षणमिदम्। एतेन "त्रितये प्रत्याख्याते 'अन्यतमम्' इत्येव वक्तव्ये समानकर्तृकग्रहणं न कर्तव्यमेव गौरवादिति मत्वा 'अन्यतरत्' इत्युक्तम्" इति निरस्तम्। कर्मसमानकर्तृकग्रहणस्यैकत्वेन निरस्तत्वेन तयोरकर्तव्यतायास्तुल्यत्वेन तदपेक्षया यथाश्रुतभाष्यस्योपपन्नत्वेन चार्धजरतीयाश्रयेण प्रकृतभाष्यव्याख्याने चातुर्याभावात्। **धातुग्रहणमेवेति**। सूत्रकारमते उपसर्गाणां द्योतकत्वेन तेषां तद्विशिष्टानां च धातुसंज्ञा वारितैवेति धातुग्रहणादिष्टसिद्धिरिति भावः। ननु 'कर्मणः' इत्युक्तेऽपि सूत्रकारमतेऽङ्ग[7]परिमाणलाभो भवत्येवेति कथं धातुग्रहणस्य ज्यायस्त्वमित्यत आह — **अपि चेति**। इदानीं धातुग्रहणप्रत्याख्यानवादिना यदनुपसर्गस्य कर्मत्वं [8]व्यवस्थापितं तन्निराकृत्य सोपसर्गस्य तस्यास्मिन्ननभिधानाश्रयणपक्षे तद्व्यवस्थापयितुमाह — **यच्चापीति**। **स्वपक्षोऽनेन वर्णित इति**। परपक्षदूषणावसरे परपक्ष एव स्वपक्षत्वेनानेन कर्मादिग्रहणनिराकर्त्रा वर्णित इति भावः। किं तत इत्यत आह — **युक्तमिह द्रष्टव्यमिति**। अस्मिन् अनभिधानावलम्बनेन कर्मादिग्रहणनिराकरणपक्षे कस्य कर्मत्वं न्याय्यमिति विचारणीयमिति भावः। तर्हि किं न्याय्यमित्यत आह — **एतच्चात्रेति**। एतदेवात्रेत्यर्थः। अन्वयव्यतिरेकाभ्यां सोपसर्गेणैव विशिष्टा क्रियोच्यत इति तस्यैव कर्मत्वं न्याय्यमिति भावः। इदं तु

---

[1] पा. सू. ३.२.२५.
[2] पा. सू. ५.१.१३४.
[3] संबन्धुमिच्छतीत्यनेन — ब.
[4] वा, अप्रतीतेरिति छेदः।
[5] संगतमिच्छतीत्यस्यार्थानुवादः।
[6] धातोर्मा भूदित्येवमर्थं — प, ब.
[7] परिणामलाभः — ब.
[8] 'व्यवस्थापितम्' इत्यस्यानन्तरं 'यत्' इत्यधिकम् — ब.

वार्तिककारमतवर्णनमात्रपरम्, न तु सर्वथेदमेव युक्तमिति। धातुरेव क्रियावाचकः, उपसर्गस्तु द्योतक इति पक्षस्यैव क्षोदक्षमस्य स्वीकर्तुमुचितत्वात्। अन्यथा धातूनां सकर्मकत्वाकर्मकत्वव्यवस्थोच्छेदापत्तेः। एतेन प्रकृतमतद्वयं संकीर्णतया व्युत्पादयन् निरस्तः। ननु वार्तिककारेण यद् दूषणमुक्तं धातुग्रहणे सत्यपि सनो विधिर्नभवतीति तत्कर्मग्रहणे कथंचिद्विद्यमाने वार्तिककारेण कथं परिहर्तव्यमित्याशयेनाह — **ननु चेति**। **अवयवयोगैषा षष्ठीति**। अस्मिन् पक्षे समानकर्तृकादिति पञ्चम्यन्तं सर्वथा न युज्यत एव, धातुमात्रस्य क्रियावाचकत्वाभावेन समानकर्तृकत्वासंभवात्। **व्यपदेशिवद्भावेनेति**। अभेदेऽपि भेदोपचारेणेति भावः। एतेन 'प्रयोगभेदान्नानारूपस्य कर्माभिधायिनोऽवयवः सन्प्रकृतित्वेनाश्रीयमाणो धातुरित्यर्थः' इति निरस्तम्। अभेदे भेदोपचारस्यैव व्यपदेशिवद्भावत्वेन भेदोपपादनस्य व्यर्थत्वात्। **कामं तर्हीति**। एवं तर्हीत्यर्थः। एतेन 'इच्छयेत्यर्थः। इच्छाया व्याघाताभावादित्यर्थः' इति निरस्तम्। लक्षणस्येच्छानुसारित्वाभावेनासंबद्धप्रलापत्वात्। **असामर्थ्यादिति**। सुबन्तात् क्यज्विधानात् समर्थपरिभाषया तत्र वारणमिति भावः। प्रकृते तु धातोरुपसर्गसापेक्षत्वेऽपि पदविधित्वाभावेन समर्थपरिभाषानुपस्थानान्न दोषः। यत्तु 'धातुरेव विशिष्टां क्रियामाह। उपसर्गस्तु द्योतक इति सापेक्षत्वाभावः' इति तन्न, सोपसर्गस्य कर्मत्वमिति मतावलम्बनेन [1]प्रवृत्तेऽस्मिन् धातोरेव कर्मत्वाश्रयणे व्याघातात्। 'वावचनानर्थक्यं च' इत्यादिः 'नार्थो वावचनेन' इत्यन्तो ग्रन्थः समर्थसूत्रे व्याख्यातः। यत्तु 'वृत्तेरेकार्थीभावविषयत्वाद् व्यपेक्षाविषयत्वाच्च वाक्यस्य भिन्नार्थत्वाद् बाध्यबाधकभावाप्रसङ्गादिति भावः' इति। तत्तुच्छम्, वृत्ताविव वाक्येऽपि विशिष्टार्थबोधनशक्तिमभ्युपगच्छतां वैयाकरणानां मते वाक्यस्य व्यपेक्षाविषयत्वकल्पनानौचित्यात्॥

[३, ३३–३९]

(**नारायणीयम्**) ननु धातोः कर्मणः समानकर्तृकादिति सामानाधिकरण्येनान्वयो नोपपद्यते। धातोरिति [2]हि शब्दस्वरूपं सन्प्रकृतित्वेन [3]गृह्यते। तस्येच्छां प्रति कर्मत्वं समानकर्तृकत्वं वा न संभवति। यद्यपि 'करोतिमिच्छति' इत्यादौ स्वरूपेणापि कर्मत्वसंभवः, तथापि समानकर्तृकत्वं कथंचिदपि [4]नोपपद्यते, तस्य धात्वर्थविषयत्वादित्याशङ्क्याह — **धातोरर्थद्वारक इति**। धात्वर्थस्य कर्मत्वसमानकर्तृकत्वसद्भावाद्धातुस्तथा व्यपदिश्यते। शब्दार्थयोः साहचर्यादर्थधर्मस्य शब्द आरोपादित्यर्थः। **ते चेच्छाया इति**। इच्छायामिति सप्तमीनिर्देशात् प्रत्ययार्थत्वेनेच्छायाः श्रुतत्वेऽपि कर्मत्वसमानकर्तृकत्वयोः क्रियापेक्षत्वात् संनिधानाद्विभक्तिविपरिणामेनेच्छया ते विशेष्येते इत्यर्थः। अत्र युक्त्यन्तरमाह — [5]**एवं चेति**। **अन्यथेति**। यदि क्रियान्तरं प्रति [6]प्रकृत्यर्थस्य कर्मत्वं समानकर्तृकत्वं [7]च स्यात्, इच्छा तु प्रत्ययार्थः, तदा विशेषणविशेष्यभावेन प्रकृतिप्रत्यययोरन्वयो न स्यादित्यर्थः। ननु सोपसर्गस्यार्थद्वारेण कर्मत्वसमानकर्तृकत्वयोगात् सन उत्पत्तिर्मा भूदित्येवमर्थं धातुग्रहणं स्यादित्यत आह — **अयं भाव इति**। **संघातादेरेव द्विर्वचनादिति**। [8]सन्नन्तस्य द्विर्वचनविधानात् प्रत्ययग्रहणपरिभाषया यस्मात् सन्विधिस्तस्य सन्नन्तत्वात्। आदिशब्दे-

[1] प्रकृतेऽस्मिन् — प, ब.
[2] हिशब्दो नास्ति — घ.
[3] पृच्छ्यते — घ.
[4] नोपपद्येत् — ङ.
[5] एवं वेति — ङ.
[6] 'प्रकृत्यर्थस्य' इत्यादि 'प्रकृति' इत्यन्तं नास्ति — ङ.
[7] न स्यात् — घ.
[8] संघातस्य — ङ.

नाडादि संगृह्यते। अत एव 'प्राचिकीर्षत्' इति भाष्य उदाहृतम्। 'कर्मविशेषकः' इति षष्ठी-समासोऽनुपपन्नः, [1]'तृजकाभ्यां कर्तरि' [2]'कर्तरि च' इति प्रतिषेधादित्यत आह — **अत एवेति**। **धातुरेवेति**। अन्वयव्यतिरेकाभ्यां धातुरेव क्रियावाची, उपसर्गस्तु संनिधिमात्रेणोपकारकः, न तु कस्यचिदर्थस्याभिधायक इति भूवादिसूत्रे स्थापितम्। विशेषणस्याकर्मत्वमन्यत्र दर्शितमित्याह — **यथोक्तमिति**। विशेषणस्यापि कर्मत्वपक्षे कथं समुदायादुत्पत्तिर्न [3]भवेदित्याशङ्क्याह — [4]**अथवेति**। ननु कर्मण इति नैषा धातुसमानाधिकरणा पञ्चमी, किं तर्हि, षष्ठी, — कर्मणोऽवयवाद्धातोरिति। ततश्चावयवात् सनुत्पत्तिरविरुद्धेत्यत आह — [5]**षष्ठ्यां हीति**। उक्तमर्थं श्लोकेन निगमयति — **अडादीनामिति**। 'धातूपसर्गयोः' इति पूर्वत्र परत्र च संबध्यते। **धातुः क्रियावाचीति**। धातुरेव क्रियावाची, उपसर्गस्तु द्योतक इत्यर्थः। ननु सुबन्तात् क्यजादयो निरवकाशत्वात् सनो बाधका भविष्यन्तीत्यत्राह — **विकल्पितत्वादिति**। ननु प्रातिपदिकादुत्पत्तिर्मा भूदिति किमिति नोक्तमित्यत्राह — **प्रातिपदिकादिति**। **कर्मत्वे [च] सति सुबन्तताया इति**। वाचकत्वेन द्योतकत्वेन वा कर्मार्थप्रत्यायनाय सुबुत्पत्तेरवश्याश्रयुणीयत्वात्। क्यजादीनामपवादत्वमुपपादयति — **कर्ममात्रादिति**। ननु सना मुक्ते विषये क्यजादीनां सावकाशत्वमुक्तमिति कथं बाधकत्वं स्यादित्यत आह — **यत्र चेति**। **वाक्यमेवेति**। वाक्याभ्यनुज्ञानाय महाविभाषाधिकारात्। **गत्यन्तराभावादिति**। गत्यन्तरसंभवे तु लक्षणैकशरणानां मन्दबुद्धीनामनुग्रहाय तदेवाश्रयणीयमिति भावः। सच्छब्दोऽत्र [6]प्रशस्तवाची, न विद्यमानवाचीत्याह — **सच्छोभनमिति**। समीचीनं परिहारं सन्तमपि वार्तिककारो न कथयतीत्यर्थः। सुबन्तार्थस्य कर्तृसंबन्धो नास्तीति भाष्यार्थं दर्शयन्नाशयमाह — **पुत्रादेरिति**। ननु कटं करोतीत्यादौ कर्मणः साध्यत्वं प्रतीयत इति कथं साधनसंबन्धायोग्यतेत्याशङ्क्याह — **कटं करोतीत्यादावपीति**। **निर्वर्त्यो वेति**। **साधनाश्रयः** कर्मशक्त्याधारो निष्पन्नरूप एवार्थो नामपदैरुच्यते निर्वर्त्यत्वादिविशिष्टः — कटं करोति, काष्ठानि भस्म करोति, आदित्यं पश्यति, इत्यादौ। आख्यात[7]पदैस्तु साध्यस्वभावा क्रियाभिधीयत इति [8]साध्येन रूपेण लक्षणमुच्यते। यदुक्तं भाष्ये 'क्रिया चैव हि भाव्यते, स्वभावसिद्धं द्रव्यम्' इति। क्रियार्थत्वात्तु साधनानां वस्तुतः क्रियाधर्मेण व्यपदेश इति कटादीनां क्रियमाणतादिप्रतीतिरित्यर्थः। ननु तुमुनन्तात् क्यज् बाधकः प्राप्नोतीति कथं तस्मात् [9]सनः प्रसङ्ग इत्यत्राह — **क्यचीति**। ननु तुमुनः स्वार्थे विधानादिच्छाभिधायित्वाभावात् कथमिच्छार्थस्य तुमुनाभिहितत्वमुच्यत इत्यत आह — **तुमुन्निमित्तेनेति**। **उपपदनिमित्तत्वात् तुमुन इति**। 'समानकर्तृकेषु तुमुन्' इत्यत्रेच्छार्थेष्वित्यधिकारात् तुमुन 'इच्छति' इत्येतन्निमित्तम्। 'आसनमिच्छति' इत्युदाहरणान्तरस्य पूर्वस्माद्विशेषमाह — **ल्युड् भावमात्र इति**। अत्र क्यज् बाधको भविष्यति। ल्युडर्थस्य कर्मत्वेऽपि तत्र कारकाणामनन्वयात् समानकर्तृकत्वाभावः। धात्वर्थे कारकान्वयेन समानकर्तृकत्वेऽपि कर्मत्वाभावान्न प्राप्नोतीति चिन्त्यमेतत्। उपाधिविशेषयोर्भेद-

---

[1] पा. सू. २.२.१५.

[2] पा. सू. २.२.१६. अत्र तृजकाभ्यां कर्तरीत्यनुवृत्त्यर्थमुक्तम्। कर्तरि चेति सूत्रेणेति भावः। काशिकावृत्त्यनुरोधेनेदम्।

[3] भवतीत्याशङ्क्याह —ङ.

[4] प्रदीपे 'अथापि विशेषणस्य पृथक्कर्मत्वम्' इत्यत्र 'अथवा विशेषणस्य पृथक्कर्मत्वम्' इति पाठोऽभिमत इति भाति।

[5] प्रदीपे 'षष्ठ्यां तु सत्याम्' इत्यत्र 'षष्ठ्यां हि सत्याम्' इति पाठोऽभिमत इति प्रतीयते।

[6] 'सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्' इत्यमरः।

[7] पदैस्तत्साध्य — ङ.

[8] शाब्देन रूपेण — घ, ङ.

[9] पुनः प्रसङ्गः — घ.

माह — **समानशब्द इति**। **अन्यस्तु विशेष इति**। विशेषणमेव विशेषः श्लाघादिः। **क्वचित्स्वभेदेनेति**। [1]"प्रकृत्युपपदोपाधीनाम्" इत्यादौ। ननु क्रियमाणे धातुग्रहणे 'संगतमिच्छति' इत्यत्र क्तान्तस्याधातुत्वात् कथं सनः प्राप्तिरित्यत आह — **केवलस्येति**। **संजिगंसत इति**। मात्रा सहात्मकर्तृकं संगमनमिच्छतीत्यत्रार्थः। [2]"गमेर्दीर्घत्व इङ्ग्रहणम्" इत्यनादेशस्य गमेर्दीर्घाभावः। [3]"समो गम्यृच्छि" इत्यात्मनेपदविधानात् [4]"पूर्ववत् सनः" इति सन्नन्तादात्मनेपदम्। अनभिधानस्य न्यायमूलत्वं दर्शयितुमाह — **इच्छायाः कर्मणेति**। **गमनेनेच्छतीति सन् न भविष्यतीति**। यद्यपीच्छायाः करणेऽप्यपेक्षा, तथापि प्रसिद्धतरा कर्मापेक्षेति कर्मण एव सन उत्पत्तिरिति भावः। **एतन्न्यायमूलमिति**। प्रत्यासत्तिन्यायाश्रयमित्यर्थः। ननु व्याप्तिन्यायस्यापि भावात् प्रकृत्यर्थव्यतिरिक्तमपि कर्माश्रयितुं युक्तमेव, तथा भिन्नकर्तृकत्वेऽपि प्राप्नोतीत्याशङ्क्य तत्राप्यतिप्रसङ्गाभावमुपपादयति — **इह नित्यानामिति**। यथा गाव्यादीनां गवादीनां च संकरेण प्रयोगे प्राप्ते गाव्यादिनिवृत्त्यर्थं [5]"गमेर्डोः" इत्यादिशास्त्रमारब्धम्। यत्र तु संकीर्णप्रयोगो न दृश्यते तत्र व्यावर्त्याभावाच्छास्त्रस्यानर्थक्यमित्याह — **न चेति**। ननु प्रकृतेरनुपादानेऽङ्गस्वरूपमेव न ज्ञातुं शक्यत इति किमुच्यतेऽङ्गपरिमाणार्थमिति तत्राह — **इच्छायां वेति**। **प्रकृतिराक्षिप्यत इति**। ततस्तदाश्रयेणाङ्गसंज्ञा तावत् सिध्यति। परिमाणं तु न ज्ञायत इत्याह — **तथापीति**। **अन्यतममिति वक्तव्य इति**। अन्यतरान्यतमशब्दावव्युत्पन्नौ। तत्रान्यतरशब्दो द्वयोरेकस्य निर्धारणे रूढः, अन्यतमशब्दो बहूनामित्यत्रेति 'अन्यतमम्' इति वक्तुमुचितमिति भावः। [6]वस्तुतस्त्वङ्गसंज्ञानिमित्तत्वं द्वयोरेवेति 'अन्यतरत्' इत्युक्तम्। ननु 'कर्मणः' इत्यनेन धातोरेव ग्रहणात् तस्मात् परस्य सन आर्धधातुकसंज्ञा सिध्यत्येवेत्यत आह — **धातुशब्देति**। **नन्विको झलिति**। चिचीषतीत्यादावेतत्सूत्रविहितस्य सनः कित्त्वविधानं गुणनिषेधार्थं सदार्धधातुकसंज्ञाया ज्ञापकमित्यर्थः। ननु स्वपक्षवर्णने न दोष इत्याशङ्क्याशयमाह — **यद्यपीति**। एतदेव विशदयितुमुत्तरं भाष्यमित्याह — **यदेव न्याय्यमिति**। **अन्यत उत्पन्नेनेति**। साधनादन्यस्माद्वस्तुन इत्यर्थः। साधनस्यैव क्रियानिष्पत्तिहेतुत्वात्। **वाचकद्योतकविभागस्येति**। वाचकादेवोत्पत्तिर्न द्योतकादिति विभागः शब्देन न प्रतिपादित इत्यर्थः। अन्यत्रोक्तेनेहत्यभाष्यस्य विरोधमाशङ्क्य परिहरति — **उपपदमिति**। **विशिष्टाया एव क्रियाया इति**। साधनं विशिष्टां क्रियां निष्पादयति, तं विशेषमुपसर्गो द्योतयतीति भाष्यं योजनीयमिति न विरोध इत्यर्थः। अन्यत्र पूर्वं धातोः साधनेन योगेऽपीह पूर्वमुपसर्गेण संबन्धोऽवश्याभ्युपेय इत्यत्राशय इति न विरोध इति परिहारान्तरमाह — **अथवेति**। ननु सामानाधिकरण्येन संबन्धे संभवति वैयधिकरण्याश्रयणमयुक्तमित्याशङ्क्याह — **व्याप्तिग्रहणायेति**। **प्रयोगभेदादिति**। यथा 'राहोः शिरः' इत्यादावौपचारिको भेदव्यवहारः, तथात्रापीत्यर्थः। यथा क्यजसामर्थ्यान्न भवति तथा सोपसर्गात् सन्नपि न स्यादित्याशङ्क्याह — **सन्विधौ त्विति**। सापेक्षत्वमेवेह नास्तीति परिहारान्तरमाह — **अथवेति**। वाक्यवृत्त्योर्विषय-

---

[1] का. वा. ३.१.१–१.

[2] का. वा. ६.४.१६–१. गमेर्दीर्घत्व आदेशग्रहणमिति — ङ.

[3] पा. सू. १.३.२९. 'समो गम्यृच्छिभ्याम्' इति सूत्रे 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्, अर्तिश्रुदृशिभ्यश्च' इति वार्तिके पठिते। काशिकायां 'समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः' इति सूत्रत्वेन पठित्वा 'दृशेश्चेति वक्तव्यम्' इति वार्तिकं पठितम्। तदनुरोधेनेदं बोध्यम्।

[4] पा. सू. १.३.६२.

[5] उणादिसूत्रम् २३५.

[6] 'वस्तुतस्तु' इत्यादि 'अन्यतरदित्युक्तम्' इत्यन्तं नास्ति — घ.

भेदं दर्शयन् वृत्त्या वाक्यस्य बाधायोगाद् वाक्याभ्यनुज्ञानाय वावचनं न कर्तव्यमिति वार्तिकाशयं दर्शयति — **वृत्तेरिति**। 'न च संज्ञायाः' इत्यादिभाष्यस्य प्रकृते क उपयोग इत्याशङ्क्याह — **अनर्थ इति**। न केवलं प्रयोजनाभावः, किं तर्हि, दोषोऽपि वाग्रहणे सति स्यादिति प्रदर्शनार्थं तदुक्तमित्यर्थः ॥

[३, ३९-४५]

(उद्द्योतनम्) सूत्रस्यादुष्टत्वात् न्यासान्तरं किमर्थम्, अत आह — **लघ्विति**। नन्विच्छतीत्युपपदेनेच्छाया उक्तत्वात् तुमुनन्तात् सन् न भविष्यति, अत आह — **वचनेति**। **तदीये** इच्छतीत्यर्थे। नन्वस्मिन् न्यासे इच्छाग्रहणाभावेन सनः स्वार्थिकत्वात् कथमुपपदबाधकत्वम्, अत आह — **इच्छेति**। **नलोपेति**। हन्तुमिच्छति 'जिघांसति' [1]इत्यत्र नलोपप्रसङ्गः। सन्सापेक्षत्वाल्लुको [2]बहिरङ्गत्वम्। **एतस्मिन्** 'तुमुनन्ताद्वा तस्य लुक्' इत्येतस्मिन्। **इष्टसिद्धय इति**। [3]'इको झल्' इत्यत्रेच्छासन एव संभवात् तस्य सर्वस्यार्धधातुकत्वं ज्ञाप्यत इति [4]नाप्रसङ्गातिप्रसङ्गाविति भावः। संभावनाकाले पाताभावादाह — **वर्तमानेति**। शुन [5]इच्छासंभवात् किमाशङ्कायां सना, अत आह — **शुन इति**। **तिर्यक्त्वादिति**। मनुष्यस्य तु [6]दृश्यत इति भावः। **कार्येणेति**। इच्छाज्ञानं सन्प्रयोगे निमित्तम्, अनिच्छत्यपि देवदत्ते लिङ्गाभासेन [7]तज्ज्ञाने 'जिगमिषति' इति प्रयोगदर्शनात्। इच्छाज्ञानं चारोपरूपमश्मादावपि संभवतीति तात्पर्यम्। पूर्वसमाधानेऽरुचिमाह — **यदिति**। अश्मादाविच्छा[8]व्यतिरेकनिश्चयदशायामपि प्रयोगदर्शनादित्यपि ज्ञेयम्। तिङर्थस्य सादृश्याभावे हेतुमाह — **क्रियाया इति**। [9]क्वचिदिवशब्दप्रयोगे क्रियाया अपि सिद्धत्वारोपात् सादृश्यप्रतीतिरस्तीत्याह — **इवशब्देति**। क्रियायाः सादृश्याभावे [10]हर्युक्तं प्रकारमाह — **परिपूर्णेति**। **समाप्ता** परिपूर्णा। **येन** पतनक्रियारूपेण, **तस्य** पतनस्य, [11]पक्षित्वव्याप्यजातौ **समाप्तत्वात्** संपूर्णत्वात्। एवं जात्यन्तरेऽपीत्युपमार्थो नास्तीत्यर्थः। सजातीयानां न्यूनाधिकभावाभावात् सादृश्याभावः। विजातीयानां तु तच्छङ्कैव नास्तीत्याह — **भिन्नेति**। क्रियावैलक्षण्यमिच्छाया आह — **इच्छेति**। मुख्यसंभवे गौणग्रहणं न स्यात्, अत आह — **गौणेति**। पिपतिषतीत्यादावपि मुख्य एव प्रयोग इति वक्तुं 'सर्वस्य वा' इति। तत्र हेतुमाह — **आत्मेति**। 'पठति' इत्यस्यार्थमाह — **प्रतिपादयतीति**। [12]'शृणोत ग्रावाणः' इत्यादिनेत्यर्थः। ननु सर्वेषां चेतनावत्त्वे [13]पाषाणादावपि पातादिचेष्टाप्रसङ्गः, अत आह — **वैचित्र्येणेति**। देवमनुष्यपशुषु तारतम्यदर्शनान्न सर्वेषां [14]साम्यं शङ्कास्पदमिति भावः। **शेति**। इषु इच्छायां तुदादिः, इष

---

[1] इत्यत्र लोपप्रसङ्गः — अ.

[2] बहिरङ्गत्वात् — ऋ.

[3] पा. सू. १.२.९.

[4] नातिप्रसङ्गादिति भावः — अ.

[5] इच्छाभावात् — ऋ.

[6] मर्तुमिच्छेत्यादिः।

[7] 'तत्' इति नास्ति — अ.

[8] व्यतिरेकदर्शनदशायामपि — अ.

[9] क्वचिदेव शब्दप्रयोगे — अ.

[10] हर्युक्तप्रकारमाह — अ.

[11] परिसमाप्तत्वजातौ — अ; परिसमाप्तत्वाज्जातौ — ऋ, लृ.

[12] तै. सं. १.३.१३.

[13] पाषाणदारुसहितादिचेष्टा — अ; पाषाणादावपि हितादिचेष्टा — ऋ.

[14] साम्यशङ्कास्पदमिति — ऋ.

आभीक्ष्ण्ये क्र्यादिः, [1]इषु सर्पणे दिवादिः। इच्छायामित्युक्तौ कथं संदेहः, अत आह — **इच्छेति**। **शप्रत्यय इति**। भावे शप्रत्ययः। तस्य सार्वधातुकत्वाद् यकि प्राप्ते तदभावश्चात्र निपात्यत इत्यर्थः। **छत्वमिति**। [2]'इषुगमि' इत्यनेन। धात्वन्तरस्य तु तदपि निपात्यमिति गौरवमिति भावः। **तौदादिकस्यैवेति**। अर्थस्त्वन्वेषणम्, तत्र [3]सन्नेष्यते। **निपातनमिति**। [4]'इच्छा' इति निपातनमित्यर्थः। **तत्क्रियस्येति**। कर्मशब्दः क्रियावाचीत्यर्थः। [5]कर्तुमन्विच्छतीत्यत्राति-प्रसङ्गं निराह — **अन्विच्छतीत्यस्येति**। ननु ग्रामकर्मकगमनस्येच्छाकर्मत्वे ग्रामस्यापीच्छाकर्मत्वात् संदेहो न युक्तः, अत आह — **क्रियाद्वयेति**। **अन्यस्य** ग्रामविशिष्टगमनकामस्य। विशिष्टगमने-च्छायामुभयोः कर्मत्वं संभवतीत्याह — **यो हीति**। गतिकर्मत्वाभावे इदं दूषणमित्याह — **इषिकर्मत्व इति**। परसाधन इति व्याचष्टे — **परस्येति**। ननूभयोरिषिकर्मत्वे भिन्नकक्ष्यतयैकेन लकारेण कर्म[6]द्वयाभिधानासंभवात् कदाचित् 'इष्यते [7]ग्रामं गन्तुम्' इति प्रयोगः स्यात्, अत आह — **इष्यत इति**। [8]**ग्रामस्यैवेति**। तथा च 'इष्यते [9]ग्रामं गन्तुम्' इति न कदाचिदपि प्रयोग इत्यर्थः। ननु तथापि गमिकर्मत्वमादाय 'इष्यते ग्रामो गन्तुम्' इत्यत्र ग्रामशब्दाद् द्वितीयाचतुर्थ्यौ [10]किं न स्याताम्, अत आह — **इषिक्रियाया इति**। प्रश्नाशयमाह — **प्रयोगेति**। नन्विच्छा-भेदात् कथमुक्तार्थत्वम्, अत आह — **एकत्वादिति**। इच्छाविषयकेच्छान्तराभावात् धात्वर्थविषय-केच्छायाः सनाभिहितत्वादित्यर्थः। नन्विच्छायाः कथमिषिकर्मत्वम्, अत आह — **तथा हीति**। [11]वेदानुवचनवाक्ये ब्रह्मज्ञानेच्छाया अपि फलत्वेनेषिकर्मत्वस्याचार्यवाचस्पतिमिश्रैरुक्तत्वाच्चेति भावः। तुमुनः कालविशेषानुपादानेन विधानात् सर्वकालत्वमित्याह — **समानेति**। मतुबर्थी-यादिनिरासस्यासंगतिं निराह — **सन्प्रसङ्गेनेति**। **प्रतिव्यक्तीति**। व्यक्तिपक्षे वाचनिको निषेधः। तद्व्यक्तौ प्रवृत्तस्य निषेधं विना बाधायोगात्। निषेधेन तद्व्यक्तावप्रवृत्त्यनुमानमेव बाधः। आकृतिपक्षे तु न्यायसिद्धानुवादोऽयमित्याह — **आकृतीति**। **तत्प्रवृत्तेरिति**। [12]सन्प्रवृत्तेः पूर्वं सन्नन्तस्य [13]प्रकृतित्वासंभवात् पूर्वं तत्प्रवृत्तिर्वाच्या। ततः सकृत्प्रवृत्त्या चरितार्थं शास्त्रं पुनर्न प्रवर्तत इत्यर्थः। सरूपपदस्य व्यावर्त्यं वदन्नुदाहरति — **तत्रेति**। स्वार्थसन्नन्तात् सनप्यत्र संगृहीत इत्याह — **सन्नन्तादिति**। इच्छा[14]सन्नेवार्थतः सरूप इतीच्छासन्नन्तादिच्छासन् [15]न भवति। स्वार्थसन्नन्तात्तु तद्विरूप इच्छासन् भवत्येवेत्यर्थः॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यस्य
सूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने
तृतीयाध्यायस्य प्रथमे पादे प्रथममाह्निकम्॥

---

[1] 'इष गतौ' इति धातोरर्थानुवादः। 'इष' इत्युचितम्।

[2] पा. सू ७.३.७७.

[3] सन्निष्यते — अ.

[4] पा. सू. ३.३.१०१.

[5] कर्तुमन्विच्छतीत्यत्रापि प्रसङ्गं — अ.

[6] द्वयाभिधानसंभवात् — अ.

[7] ग्रामो गन्तुमिति — अ, ऋ, लृ.

[8] अयं प्रतीको न दृश्यते — ऋ.

[9] ग्रामो गन्तुमिति — ऋ.

[10] किं च स्याताम् — ऋ.

[11] 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' इति वाक्य इत्यर्थः। शारीरकमीमांसायां सर्वापेक्षा-धिकरण इदमुक्तम्।

[12] सन्प्रकृतेः पूर्वं — ऋ.

[13] विकृतित्वासंभवात् — अ, ऋ, लृ.

[14] सन्निवार्थतः — अ.

[15] 'न भवति' इत्यस्यानन्तरम् 'इति' शब्दोऽधिकः — अ.

[३, ३९–४५]

(**रत्नप्रकाशः**) तदेवं 'धातोरिच्छायां सन्' इत्येतावत् सूत्रं व्यवस्थाप्य वचनान्तरमपि तत्समं कर्तुं शक्यत इत्याह — **तुमुनन्ताद्वेति**। नन्विच्छार्थेषूपपदेषु तुमुनो विहितत्वेन तुमुनो लुक्यपीच्छार्थस्योपपदस्य निवृत्त्यर्थमपि वचनमाश्रयणीयम्। अन्यथा 'पिपठषतीच्छति' इत्यादिप्रयोगापत्तेरित्यस्वरसादाह — **लिङ्ग्त्तमाद्वेति**। अत्र 'समानकर्तृकात्' इति पदमन्तरेण तदर्थलाभाल्लाघवम्। यथाश्रुतन्यासे तु गौरवम्। [१]'कर्मसमानकर्तृकग्रहणत्यागे त्वगतिकगतिभूतानभिधानेनासमानकर्तृकव्यावृत्त्या क्लिष्टतेति मन्यते। वस्तुतस्तु यथाश्रुतमेव भगवतः पाणिनेः सूत्रं रमणीयम्। अगत्या 'संगतमिच्छति' इत्यत्रानभिधानेन सनो वारणेऽपि तदवलम्बनेन [२]कर्मसमानकर्तृकग्रहणनिराकरणानौचित्यात्। धातुपदरहितलक्षणान्तरकरणमप्ययुक्तं भवति, सन आर्धधातुकसंज्ञानापत्तेः। [३]'इको झल्' [४]'हलन्ताच्च' इति कित्त्वविधानसामर्थ्यादार्धधातुकत्वे सन आश्रीयमाणेऽर्धजरतीयं दोषः। तेनैव ज्ञापकेन सनोऽपि कल्पयितुं शक्यत्वात्। **आशङ्कायामिति**। संभावनायामित्यर्थः। **लुलुठिषत इति**। [५]'रुठ लुठ उपघाते' इति द्युतादिषु पठ्यते। वर्तमानसामीप्ये लट्। भगवानाह — **अचेतनेति**। **श्वा मुमूर्षतीति**। शुनश्चैतन्येऽपि जीवितस्य प्रियत्वाद् व्याध्याद्यभिभवेऽपि तिर्यक्त्वान्मर्तुमिच्छा नास्ति। वार्तिकमेव न कर्तव्यमित्याह — **न वेति**। **प्रवृत्तित इति**। व्यापारादित्यर्थः। इच्छानन्तरं हि चेतनेषु प्रवृत्तिर्दृश्यते। तथा च कार्येण कारणानुमानं युज्यत इति भावः। औपचारिक एव तत्र सन्प्रत्यय इत्याशयेनाह — **उपमानाद्वेति**। **न वै तिङन्तेनेति**। 'लुलुठिषत इव' इतीवशब्दप्रयोगे तिङन्तस्योपमानपरत्वेऽपीवशब्दमन्तरेणोपमानपरत्वं तस्य नाश्रयणीयमिति भावः। यत्तु [६]"तिङन्तार्थस्य क्रियायाः साध्यैकस्वभावत्वादनिष्पन्नरूपत्वात् 'इदं, तत्' इति परामर्शविषयवस्तुगोचरत्वादुपमानोपमेयभावस्य 'इदं तत्' इति परामर्शाभावादिति भावः। इवशब्दप्रयोगे त्वध्यारोपो विद्यते। 'रोदितीव गायति, नृत्यतीव गच्छति देवदत्तः' इति। परिपूर्णेन च न्यूनस्योपमानं भवति। क्रिया च सर्वा स्वाश्रये समाप्तेति न्यूनत्वासंभवस्तस्याः[७]। तदुक्तम् [८]'येनैव हेतुना हंसः पततीत्यभिधीयते। आतौ तस्य समाप्तत्वादुपमार्थो न विद्यते॥' इति। भिन्नजातीयानां च क्रियाणां सादृश्यं नास्ति भुङ्क्त इव गच्छतीति" [इति।] तत् सर्वं तिङन्तस्य धात्वर्थप्राधान्यभ्रममूलकम्, इवशब्दप्रयोगे उपमानत्वाभ्युपगमेन [९]व्याहतं च ज्ञेयम्। तिङर्थप्राधान्यवादे तु तिङर्थस्येवशब्दप्रयोगे उपमानत्वं युक्तं भवति। इवशब्दाभावे तु तस्योप-

---

[१] 'कर्म' इति नास्ति — ब.

[२] कर्मसमानाधिकरणग्रहनिराकरणानौचित्यात्— प, ब.

[३] पा. सू. १.२.९.

[४] पा. सू. १.२.१०.

[५] 'रुठ लुठ उठ उपघाते' इति भ्वादौ परस्मैपदिषु पठितम्। भ्वादावेव द्युतादौ 'रुट लुट लुठ प्रतिघाते' इति कौमुद्यामुपलभ्यते आत्मनेपदित्वेन। अत्र भाष्ये 'लुलुठिषते' इत्यात्मनेपदित्वेन प्रदर्शनात् द्युतादिरेवायमिति निश्चीयते। अत्र माधवीयधातुवृत्तावप्येवमेव प्रदर्श्य 'आद्यौ प्रथमान्तौ, अन्त्यो द्वितीयान्तः। अयं पाठो देवमैत्रेयादीनाम्। हरियोगिनस्तु आद्यावेव। धातोः कर्मण इत्यत्र कैयटे द्वाविमौ द्वितीयान्तौ पठितौ' इत्युक्तम्। कैयटे तथैवोपलभ्यते च। तदेवानुसृतमत्र रत्नप्रकाशकृता। प्रतिघातोपघातयोर्नार्थभेदः।

[६] इदं फलितार्थकथनम्।

[७] प्रदीपे 'तस्याम्' इत्यत्र 'तस्याः' इति पाठोऽभिमत इति भाति।

[८] वाक्यपदीयम् ३.८.५७.

[९] व्याहृतं च — ब.

मानत्वेन प्रयोगः प्रकृतभाष्येणैव वारित इति सर्वमनवद्यम्। **एवं तर्हीच्छेवेति**। सन्नेव तत्र लाक्षणिक आश्रीयते। 'कूलं पिपतिषति' इत्यस्य कूलं पतनानुगुणं भवतीत्यर्थ इति भावः। एतेन 'इच्छाशब्दस्य सत्त्वभूतार्थाभिधायित्वादस्ति तदर्थस्योपमानत्वम्। ततश्चेच्छासदृशेऽपि '[1]व्यापारे सन् भवति। गौणमुख्यन्यायश्च क्वचिल्लक्ष्यापेक्षया नाङ्गीक्रियते' इति निरस्तम्। कूलं पिपतिषतीत्यादावुपमानोपमेयभावभाने मानाभावात्। इच्छायां विहितस्य सनोऽन्यत्र लक्षणया प्रयोगोपपत्तौ गौणमुख्य[2]न्यायानाश्रयणोक्तेरसंबद्धप्रलापत्वाच्च। अचेतनत्वेन येऽभिमतास्तेष्वपि चेतनव्यवहारदर्शनेन सर्वं चेतनमेव भवतीत्याशयेनाह — **सर्वस्य वेति**। एतेन 'आत्माद्वैतदर्शनेनेति भावः' इति निरस्तम्। द्वैतेऽपि प्रकृतभाष्यस्योपपन्नत्वात्। **कंसकाः सर्पन्तीति**। मन्त्रविशेषेण कंसकाश्चोरसमीपं गच्छन्तीति लोकप्रसिद्धम्। **शिरीषोऽयं स्वपितीति**। कस्यांचित् तिथौ महानिशि फलोत्पत्तिसमये शिरीषो भूमौ स्वपिति। तस्मिन् समये महावीरेण सकल[3]भूतनिग्रहसमर्थेन तच्छाखां छित्त्वानीय तया पादुके कार्येते चेत् ताभ्यां खेचरगमनं भवतीति वदन्ति। **सुवर्चलेति**। ओषधिविशेषस्य कुसुमान्यादित्याभिमुखान्येव [4]सदा भवन्ति। **आस्कन्द कपिलकेति**। कंसकेन तुल्यमेतत्। **अयस्कान्तमिति**। पाषाणविशेषो लोहाकर्षणशक्तिकः। **ऋषिरिति**। वेद इत्यर्थः। एतेन 'ग्रावाणः प्लवन्ते' इत्यादिवाक्यार्थस्यासत्त्वं वदन्तो निरस्ताः। प्रकृतभाष्यविरोधात्। शरीराणामिव सर्वेषां घटपटादीनां कादाचित्कचैतन्ययोगे बाधकाभावाच्च। **इम इषय इति**। शश्नाश्यन्विकरणा इत्यर्थः। **तत्र न ज्ञायत इति**। [5]'इच्छा' इति निपातनं त्रयाणामिति मन्यते। **छत्वभाविन इति**। [6]'इषगमियमां छः' इति छत्वं शविकरणस्यैव भवतीति [7]'इच्छा' इत्यत्र शप्रत्ययो यगभावश्चेत्युभयमेव निपात्यत इति भावः। छत्वभाविन '[8]इषेरन्वेषणाप्यर्थ इति तस्यामपि सन् स्यादिति शङ्कते — **यद्येवमिति**। अनुपूर्व एवेषिरन्वेषणायां वर्तते। केवलस्त्विषिः कान्तौ वर्तत इति नात्रातिव्याप्तिरित्याशयेन समाधत्ते — **एवं तर्हीति**। **यस्येति**। यदर्थकस्येत्यर्थः। **कस्येति**। किमर्थकस्येत्यर्थः। **कान्तिकर्मण इति**। तत्र कान्तिरिच्छैव। विचारान्तरमुपक्रमते — **अथेति**। **कस्य किं कर्मेति**। उक्तवाक्ये ग्रामो गमनं चोभे कर्मणी, गमनमिच्छा चोभे क्रिये। तत्र कस्यां क्रियायां किं कर्मेत्यर्थः। एतेन 'क्रियाद्वयसंनिधानाच्चङ्क्रमणादिकामस्य गमनमात्रेप्सासंभवादन्यस्योभयेप्सासंभवात् प्रश्नः' इति निरस्तम्। चङ्क्रमणशब्दस्यादिशब्दस्य च तत्रासंगतार्थकत्वात्। गमनेच्छोर्गमनेच्छा संभवति, ग्रामगमनेच्छोर्ग्रामगमनोभयेप्सा संभवतीत्येतत्कथनेन व्याख्यानचातुरीविशेषानवगमाच्च। **इषेरुभे कर्मणी इति**। कदाचिद् ग्रामः, कदाचिद् गमनमित्यर्थः। यदा ग्रामः कर्म तदा गमनस्येष्यमाणत्वमार्थिकम्, न तु शाब्दम्। यदा तु गमनमिषेः कर्म, तदा गमने ग्रामः कर्मेति ज्ञेयम्। एतेन 'यो हि ग्रामगमनमिच्छति तस्येषिक्रिययोभयमीप्सितम्, न केवलो ग्रामः, नापि केवलं गमनमित्यर्थः' इति निरस्तम्।

---

[1] 'व्यापारे' इति नास्ति — प.

[2] न्यायाश्रयणोक्तेः — प, ब.

[3] भूतविग्रहसमर्थेन — ब.

[4] 'सदा' इति नास्ति — प.

[5] पा. सू. ३.३.१०१.

[6] पा. सू. ७.३.७७ तुदादौ 'इषु इच्छायाम्' इति पाठमुदितोऽङ्गीकृत्य 'इषुगमियमां छः' इति सूत्रेऽप्युदिन्निर्देशं स्वीकृत्य छत्वविधौ तुदादेर्ग्रहणमित्यङ्गीकुर्वन्ति केचित्। अन्ये तु तुदादावपि 'इष' इत्यङ्गीकृत्य 'इषगमि' इति च पाठं स्वीकृत्य क्सस्याचीत्यतोऽचीत्यनुवर्त्याजादौ शितीति स्वीकृत्य तौदादिकस्यैव छत्वमिति वदन्ति। इदं काशिकायां वृत्तौ माधवीयधातुवृत्तौ च स्पष्टम्। कैयटेनापि 'इषुगमि' इति पाठोऽनार्षः इति वदता 'इषगमि' इत्येव सूत्रपाठ इत्यङ्गीक्रियते।

[7] पा. सू. ३.३.१०१.

[8] इषेरन्वेषणार्थं इति — ब.

ग्रामगमनयोः परस्परानन्वितयोर्यौगपद्येनेषौ कर्मत्वे मानाभावात्। प्रकृतभाष्यस्य मदुक्तरीत्योपपन्नत्वाच्च। मदुक्तभाष्याशयानभिज्ञो ग्रामगमनयोः परस्परानन्वितयोर्यौगपद्येनेषिकर्मत्वमुक्तमिति मन्यमान आह — **यद्येवमिति**। उक्तदोषपरिहारमात्रोपयोगिनं स्वाभिप्रायलेशमाह — **एवं तर्हीति**। **इष्यते ग्रामो गन्तुमिति**। गमनेन ग्राम इष्यत इत्यर्थः। तत्र गमनस्यात्मकर्तृकत्वत्वमार्थिकम्। **परसाधन इति**। ग्रामस्येषिकर्मत्वाभावे गम्यपेक्षयेषिः परः, 'तत्साधने गमनरूपे कर्मण्युत्पद्यमानेन लेन ग्रामस्याभिधानं न स्यादिति मन्यते। **गमेर्ग्रामः कर्मेति**। यदा गमिरिषेः कर्म तदेत्यर्थः। **इषेरुभे कर्मणी इति**। ग्रामो गमिश्च पर्यायेणेति शेषः। एतेन 'इष्यते ग्रामो गन्तुमित्यत्र गमनस्य ग्रामार्थत्वादप्राधान्याद् भिन्नकक्षयोः कर्मणोरेकेन शब्देनाभिधानासंभवात् प्रधाने कार्यसंप्रत्ययाद् ग्रामस्यैवाभिधानं लकारेण भवति। इषिक्रियायाश्चाख्यातवाच्यत्वात् प्राधान्यमिति प्रधानक्रियाशक्त्यभिधाने गुणक्रियाशक्तेरभिहितवच्चकासनाद् गमिक्रियापेक्षे द्वितीयाचतुर्थ्यौ न भवतः' इति निरस्तम्। ग्रामाय गमनमित्येतदपेक्षया गमनाय ग्राम इत्यस्यैव क्षोदक्षमत्वेन 'ग्रामं गन्तुमिष्यते' इति प्रयोगस्यापीष्टत्वेन च तत्र प्रधाने ग्रामरूपे कर्मणि लकार इत्यस्यायुक्तत्वात्। ग्रामगमनयोर्युगपदिषिकर्मत्वाभावेनैव तत्र [1]गमने कर्मणि [2]लकारोत्पत्त्यसंभवेन प्रधानाप्रधानन्यायसंचारानर्थक्यात्। ग्रामस्येषिकर्मत्वविवक्षायां गमिकर्मत्वाभावादेव ग्रामशब्दाद् द्वितीयाचतुर्थ्योरप्रसङ्गस्य सिद्धत्वेन 'प्रधानक्रियाशक्त्यभिधाने गुणक्रियाशक्तेरभिहितवच्चकासनम्' इति निर्मूलनिष्प्रयोजनवचनेन तत्र तदभावसाधनानौचित्याच्च। एतेन [3]'प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यदा गुणे तदा तद्वदनुक्तापि [4]प्रतीयते' इति वाक्यपदीयमपि निरस्तम्। निर्मूलत्वान्निष्प्रयोजनत्वाच्च। 'पक्त्वौदनो भुज्यते' इत्यादौ पच्यादिक्रियां प्रति कर्मत्वस्याविवक्षणादेव द्वितीयाया अप्रसक्तिः। अन्यथा 'ओदनं पक्त्वा भुज्यते' इति प्रयोगो न स्यात्। तत्र तु भुजिं प्रत्योदनस्य कर्मत्वं विवक्षितं न भवतीति कृत्वैव प्रथमा न भवति। तत्राविवक्षितस्य कर्मणो [5]बोधस्तु मानसिकः, योग्यताबलात्। इच्छासन्नन्तात् सन्नेति व्यवस्थापयितुं प्रश्नमुत्थापयति — **अथेति**। **तस्यार्थस्येति**। इच्छारूपस्येति शेषः। **न तर्हीति**। इषिधातुनैवेच्छाया उक्तत्वात् ततः सन् न स्यादिति भावः। **एकस्येति**। इच्छतीत्यत्र वर्तमानस्य। **इषिरिति**। एषितुमिति पदोपस्थापितः। **साधनमिति**। कर्मेत्यर्थः। **अपरस्येति**। एषितुमित्यत्र वर्तमानस्य। **बाह्यमिति**। अध्ययनादि। यस्याध्ययनादिनिष्ठस्य रोगवशादशक्तस्याध्ययनादाविच्छा नोदेति, तस्य भवत्येषितुमिच्छेति तत्र भवति 'एषितुमिच्छति' इति प्रयोगः। **सर्वकाल इति**। तत्र तुमुनः कालविशेषे विधानाभावेन सर्वकालतेति भावः। लब्धावकाशः प्रष्टाह — **इहापीति**। विषयान्तरसाधारणं संग्रहश्लोकं पठति — **शैषिकादिति**। यद्यपि जातिपक्षाश्रयेण क्वचिल्लक्षणं न प्रवर्तत इति न्यायेन रेफस्यानुनासिकवारणवत् शैषिकाद्यन्ताच्छैषिकादिर्न भवतीति वक्तुं शक्यते, तथापि [6]तदगतिकगतिभूतं वचनसमकक्षमेवेति साक्षाद्वचनमेवात्र स्पष्टप्रतिपत्तये आश्रितम्। **सन्नन्तान्न सनिष्यत इति**। सरूप इत्यनुषज्यते। सारूप्यं चार्थैक्यकृतम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य[7]हरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य [8]प्रथमे पादे प्रथममाह्निकम्॥

---

[1] गमनकर्मणि — ब.

[2] लकारोत्पत्तिसंभवेन — प, ब.

[3] वाक्यपदीयम् ३.७.८१, ८२.

[4] 'प्रकाशते' इति पाठस्तत्रोपलभ्यते।

[5] 'बोधस्तु' इति नास्ति — प.

[6] तदगतिकगतिकं वचन — प, ब.

[7] हरिहरेन्द्रपूज्यपाद — प.

[8] प्रथमपादे — ब.

[३, ३९–४५]

(नारायणीयम्) यथान्यासमपास्य लक्षणान्तरं किमर्थं क्रियत इत्यत्राह — [१]**लघ्वेतदिति**। 'तुमुन इच्छायां सन् लोपश्च' इत्येतत्। **वचनसामर्थ्याच्चेति**। यद्यपीच्छार्थेषूपपदेषु तुमुन् विधीयते, तथापीच्छार्थ एव सन् विधीयमान उपपदप्रयोगं बाधित्वा भवति। न च तुमुन्विधानस्यानर्थक्यम्, सनो विकल्पेन विधानात् तेन मुक्ते विषये सावकाशत्वादित्याह — **पक्ष इति**। **तुमुनो लुको बहिरङ्गत्वादिति**। सना सह विधानात् प्रत्ययापेक्षत्वाद् बहिरङ्गो लुक्। नलोपादीनां तु प्रकृतिमात्रापेक्षत्वादन्तरङ्गत्वम्। **एतस्मिंस्त्विति**। 'तुमुन इच्छायाम्' इत्यस्मिन् न्यास इत्यर्थः। ननु [२]'इको झल्' इत्यस्य ज्ञापकत्वमयुक्तमित्यत आह — **इष्टसिद्धय इति**। [३]'इको झल्' इत्यत्र 'धातोः कर्मणः' [४]इत्यनेनैव विहितस्य सनः संभवात् तस्यार्धधातुकसंज्ञा भवतीति तेन ज्ञाप्यत इति भावः। **आशङ्का संभावनेति**। **संभावना** उत्प्रेक्षा, ऊहः, [५]आबाधादिवत् प्रयोक्तृधर्मः। प्रकृत्यर्थविशेषणं चैतदित्याह — **तद्विशिष्टेति**। 'लुलुठिषते' इत्यत्र [६]'पुगन्त' इति गुणप्राप्तिमाशङ्क्याह — **रुठ लुठ प्रतीघात इति** [७]**कुटादिष्विति**। **वर्तमानसामीप्य इति**। क्रियाप्रवृत्तेः पूर्वं हि तत्संभावना भवतीति वर्तमानसामीप्ये भविष्यति लट्प्रत्ययः। **व्याध्याद्यभिभवेऽपीति**। यद्यपि विशिष्टज्ञानवतां मनुष्याणां व्याध्याद्यभिभवान्मर्तुमिच्छा संभवति, तथापि [८]तिर्यक्त्वात् तदसंभव इत्यर्थः। **वास्तवेति**। कार्येणानुमेयामिच्छामाश्रित्य सन् प्रयुज्यते। कार्यमपि न वास्तवम्, किं तर्हि, लोकव्यवहाराश्रयमित्यर्थः। अत एव [९]पक्षान्तरोत्थितिः। अन्यथा मुख्यसंभवे गौणग्रहणस्यान्याय्यत्वात् पक्षान्तरोक्तिरयुक्ता स्यादित्याह — **यदिच्छानिमित्तमिति**। कथं पुनस्तिङन्तार्थेनोपमानं न भवतीत्याशङ्क्य तदुपपादनायाह — **क्रियाया इति**। इदं तदिति परामर्शाभावादुपमानोपमेयभावाभाव इत्यन्वयः। इदंतदादि[१०]परामर्शाभावे हेतुः — **साध्यैकस्वभावत्वादनिष्पन्नरूपत्वादिति**। इदंतदादिपदविमर्शाभावेऽप्युपमानोपमेयभावोऽस्त्विति चेत् तत्राह — [११]**इदंतदादिपरामर्शेति**। सिद्धयोरेवार्थयोः साधर्म्यं प्रतिपादयितुं पार्यते। यथा चन्द्र इवास्या मुखमिति। तिङन्तपदैस्त्वनिष्पन्न एव साध्यरूपः क्रियालक्षणोऽर्थः प्राधान्येन प्रतिपाद्यत इति न तत्रोपमानोपमेयभाव इत्यर्थः। कथं तर्हि 'रोदितीव गायति' इत्यादिप्रयोगोपपत्तिरित्यत्राह — **अध्यारोप इति**।

---

[१] प्रदीपे 'लघ्वेवं लक्षणम्' इत्यत्र 'लघ्वेतल्लक्षणम्' इति पाठोऽभिमतः।

[२] पा. सू. १.२.९.

[३] पा. सू. १.२.९.

[४] इत्यस्य स्थाने कृतेन 'तुमुन इच्छायाम्' इत्यनेनैवेत्यर्थः।

[५] आबाधे चेति सूत्रे आबाधनमाबाधा, पीडा, प्रयोक्तृधर्मः, इति काशिकायामुक्तमनुसंधेयम्।

[६] पा. सू. ७.३.८६.

[७] प्रदीपे 'रुठ लुठ प्रतीघात इति द्युतादिषु पठ्यते' इत्यस्ति। भ्वादिषु 'रुठ लुठ उपघाते' इति परस्मैपदिषु पठितम्। तत्र द्युतादिष्वात्मनेपदित्वाय 'रुठ लुठ प्रतीघाते' इति। भाष्ये 'लुलुठिषते' इत्यात्मनेपदोदाहरणात् तत्र द्युतादिषु पठित एवाभिसंहित इति प्रतीयते। नागेशेनैतद्विवृतम्। गुणाभावस्यापि हेतुर्नागेशेनोक्तः 'रलो व्युपधादिति कित्त्वात्' इति। कुटादौ रुठ लुठ धात्वोः पाठो नैवोपलभ्यते। अत एतादृशपाठाश्रयणे प्रमाणं चिन्त्यम्।

[८] तिर्यक्षु तदसंभवः — घ.

[९] यत्नान्तरोत्थितिः — ङ.

[१०] परामर्शाभावहेतुः — ङ.

[११] प्रदीपे 'इदंतदिति परामर्शविषय' इत्यत्र 'इदंतदादिपरामर्शविषय' इति पाठः स्वीकृतः।

अत्रापि पूर्वोक्तेन न्यायेन क्रिययोरुपमानोपमेयभावो नोपपद्यते। साधनद्वारेण तु भवति। स त्वध्यारोप एव [1]फलतः, न तूपमा। यदस्य गानं तद्रोदनमेवेति। तद्द्योतानायेवशब्दः। [2]'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः' इत्यत्रोत्प्रेक्षैव, नोपमा, उपमेयानिर्देशात्। [3]इतश्च क्रिययोरुपमानोपमेयभावाभाव इति हेत्वन्तरमाह — **परिपूर्णेन चेति**। [4]चन्द्र इव दर्शनीयं मुखमस्या इत्यादौ परिपूर्णगुणमुपमानं प्रसिद्धम्, उपमेयं तु न्यूनगुणम्। क्रिया तु साधनसाध्या सर्वत्र समाप्तेति न्यूनत्वाभावान्नोपमाविषयः। अत्रोदाहरणं प्रदर्शयितुमाह — **तदुक्तं येनैवेति**। पक्षाभ्यां गमिक्रियां कुर्वन् हंसः पततीत्युच्यते। आतिरपि पक्षिविशेषस्तथैव गमिक्रियां निष्पादयन् पततीत्यभिधीयत इति [5]प्रत्याश्रयं परिसमाप्तत्वान्न्यूनाधिकभावाभावात् सजातीययोः क्रिययोः 'गवय इव गवयः' इतिवन्नोपमास्तीत्यर्थः। 'हंसः इव पतत्यातिः' इति तु साधनयोरेवोपमानोपमेयता, न क्रिययोः। तर्हि विजातीययोः क्रिययोरुपमार्थः स्यादित्यत्राह — **भिन्नजातीयानामिति**। नन्विच्छाशब्दस्य क्रियैवार्थः, इषु इच्छायामित्यस्माद् भावे शप्रत्ययस्य निपातनात्। अतः [6]पूर्वोक्तेन न्यायेन तस्योपमानत्वमयुक्तमित्यत आह — **इच्छाशब्दस्येति**। कृद्न्तैः सत्त्वभूतोऽर्थोऽभिधीयते, न साध्यरूप इति तस्योपमानता न विरुध्यत इत्यर्थः। **क्वचिदिति**। छत्रायश्शूलादिषु। **आत्माद्वैतदर्शनेनेति**। आत्मनश्चैतन्यरूपस्य विवर्तः सर्वः प्रपञ्चः। स्वेन सृष्टे तस्मिन् प्रपञ्चे [7]'तत् सृष्ट्वा। तदेवानुप्राविशत्' इत्यनुप्रवेशश्रवणात् चेतनरूपाः सर्वे पदार्था इति कूलादीनां चेतनधर्मेच्छायोगोपपत्तिरित्यर्थः। **ऋषिशब्दो**ऽत्र वेदवचनः, न द्रष्टृवचनः, **पठनं** प्रतिपादनं न तूच्चारणमिति व्याचष्टे — **वेदः सर्वभावानामिति**। अचेतनानां ग्राव्णां संबुद्ध्याद्यनुपपत्तेरधिष्ठाने [8]'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति' [9]'इदं सर्वं यदयमात्मा' [10]'आत्मैवेदं सर्वम्' [11]'ब्रह्मैवेदं सर्वम्' इत्यादि[12]श्रुतिभिः कारणभूताद् ब्रह्मणः कार्यप्रपञ्चस्यानन्यत्वश्रवणाच्च चेत्र्यश्चेतना देवता अभ्युपगम्यन्ते। एवं सर्वेषां पदार्थनां चेतनावत्त्वमनेनैव प्रतिपादितं भवतीत्यर्थः। नन्वेवं सति लोष्टमृदादिषु चेतनधर्मः कथं नोपलभ्यत इत्यत्राह — **वैचित्र्येण चेति**। सर्वत्र वस्तुतश्चिद्रूपान्वयेऽप्यविद्याकल्पिते व्यवहारे उपलब्धीनां वैचित्र्यात् प्रतीत्यनुसारेण चेतनधर्मावधारणादतिप्रसङ्गो नोद्भावनीय इत्यर्थः। **शश्नाश्यन्विकरणा इति**। 'इषु इच्छायाम्' इति तुदादौ पठ्यते। 'इष आभीक्ष्ण्ये' इति क्र्यादौ, 'इष गतौ' इति दिवादौ। उक्तं च — [13]'इष्णात्याभीक्ष्ण्य इच्छायामिच्छेद् गत्यर्थ इष्यति।' इति। **इच्छेति निपातनमिति**। निपातनत्वादेव छत्वादेः सिद्धत्वात्। उत्तरवादिन आशयं दर्शयति — **इच्छेति शप्रत्यय इति**। प्रकृतत्वात् तस्यैव प्रत्ययत्वेन [14]निपातनं युक्तम्। तस्य [15]च भावाभिधायित्वात् सार्वधातुकत्वाच्च यकि प्राप्ते तदभावो निपातनीय इत्याह — **यगभावश्चेति**। यत् पुनर्लक्षणान्तरेणैव सिध्यति न तस्य निपातनार्हतेति छत्वं

---

[1] फलति — ङ.

[2] चन्द्रालोकः श्लो. ३३.

[3] अतश्च — ङ.

[4] चन्द्रवद्दर्शनीयं — ङ.

[5] प्रत्याश्रयपरिसमाप्तत्वात् — ङ.

[6] क्रियायाः प्रत्याश्रयं समाप्तत्वमिति न्यायेनेत्यर्थः।

[7] तै. उपनिषत्. २.६.

[8] बृहदारण्यकोपनिषत् ४.५.६.

[9] बृहदारण्यकोपनिषत् २.४.६.

[10] छान्दोग्योपनिषत् ७.२५.२.

[11] नृसिंहोपनिषत् ७.३.

[12] श्रुतिभ्यः — ङ.

[13] 'श्लो १६८. देवः।' इति कृदन्तधातुरूपावलौ।

[14] निपातनाद्युक्तम् — ङ.

[15] चकारो नास्ति — ङ.

न निपात्यमित्याह — **छत्वं त्विति**। ततश्च [1]शविकरणस्येच्छार्थस्य निपातनसिद्धिरित्याह — **तच्च शविकरणस्यैवेति**। [2]'इषुगमियमाम्' इत्युदितो ग्रहणादिच्छार्थस्यैव छत्वमित्यर्थः। तौदादिकस्य छत्वनिपातनेऽप्यतिप्रसङ्ग इति चोदकाशयं प्रदर्शयति — **अन्विच्छतीति**। **अर्थविशेष इति**। यथोक्तम् — 'रूढ्यर्थं च निपातनम्', इति। कान्तिकर्मण इत्यनेनेच्छार्थस्य निपातनमित्युक्तं भवतीति व्याचष्टे — **कान्तिः कामनेति**। ततश्चातिप्रसङ्गाभाव इत्याह — **अन्विच्छतीत्यस्येति**। ग्रामं गन्तुमिच्छतीत्यत्र कर्मविषयस्य संशयस्य किं बीजमित्यत्राह — **क्रियाद्वयसंनिधानादिति**। **अन्यस्य [3]चेति**। ग्रामप्राप्तिकामस्य ग्रामगमने उभे अपीच्छाकर्मत्वेनाभिमते इत्यर्थः। **यो हि ग्रामगमनमिति**। न चङ्क्रमणमात्रम्। **न केवलो ग्राम इति**। केवलस्य ग्रामस्येप्सितत्वे लाभादिनापीष्टत्वं [4]प्रतीयेत। **नापीति**। केवलस्य गमनस्येष्टत्वे गन्तुमिच्छतीत्येवालमित्याशयः। 'परसाधने' इति [न] कर्मधारयः, किं तर्हि, षष्ठीसमास इत्याह — **परस्येति**। यदीषेरुभे कर्मणी तर्हि लकारेण कर्मद्वयेऽपि पर्यायेणोत्पत्तव्यम्। तत्र यदा ग्रामे कर्मण्युत्पद्यते तदा 'इष्यते ग्रामो गन्तुम्' इतीष्टरूपं सिध्यति। यदा तु गमिः कर्म तदा ग्रामस्य लकारेणानभिधानात् तस्माद् द्वितीया स्यात् 'इष्यते ग्रामं गन्तुम्' इति। तच्च नेष्यत इत्यत आह — **इष्यते ग्राम इति**। [5]**भिन्नकक्ष्ययोरिति**। तुल्यकक्ष्ययोस्त्वेकेन शब्देनाभिधानमुपपद्यते — ओदनौ पच्येते इति। नन्वेवमपीषिक्रियाशक्तेरभिधानेऽपि गमिक्रियाशक्तेरनभिधानात् [6]'गत्यर्थकर्मणि' इति ग्रामशब्दाद् द्वितीयाचतुर्थ्यौ स्यातामित्यत आह — **इषिक्रियायाश्चेति**। **गुणक्रियाशक्तेरभिहितवदिति**। कृद्वाच्यत्वादप्राधान्यात् प्रधानानुरोधित्वाद् गुणानां प्रधानविरोधिस्वकार्यानारम्भात्। प्रश्नस्योपपत्तिमाह — **प्रयोगेति**। **इषिणैवेति**। [7]उक्तेनैव न्यायेनेषेरपि सन्न प्राप्नोतीत्यर्थः। कथं पुनरिषेरिषिः कर्मोपपद्यत इत्याशङ्क्याह — **तथा हीति**। **इच्छामेवेति**। इच्छा तावन्मम स्यादिति प्रार्थना भवतीत्यर्थः। ननु शैषिकाद्यनुत्पत्तिप्रतिपादनमत्र न संगतमित्याशङ्क्य न्यायसाम्यात् प्रासङ्गिकसंगतिरित्याह — **सन्प्रसङ्गेनेति**। **प्रतिव्यक्तीति**। सनः पूर्वो यो धातुस्तत्र लक्षणं प्रवृत्तम्। ततोऽन्यत् सन्नन्तात् [8]प्राप्नोतीति तत्सामर्थ्यात् सन्नन्तादपि सन्प्रसङ्गे प्रतिषेधो विधेयः। एवं शैषिकादावपि द्रष्टव्यम्। **तत्प्रवृत्तेरिति**। सनादिशास्त्रप्रवृत्तेः प्राक् सनादिप्रत्ययान्तायाः प्रकृतेरसंभवात् सकृत्प्रवृत्तिपक्षे सनाद्यन्तात् सनाद्युत्पत्तिर्न भविष्यतीत्यर्थः। 'सरूपः' इति विशेषणकृत्यं दर्शयति — **विरूपस्त्विति**। ननु सन्नन्तात् सनोऽनिष्टत्वेन 'जुगुप्सिषते' इत्यादिप्रयोगोऽसाधुः स्यादित्यत आह — **सरूप इत्यपेक्ष्यत इति**। **सारूप्येण चेति**। सारूप्यस्याव्यभिचाराद्विशेषणानर्थक्यान्मुख्यार्थस्य बाधाल्लक्षणाश्रीयत इत्यर्थः। **तच्चार्थद्वारकमिति**। न तु सारूप्यनिबन्धनम्। ततश्चातिव्याप्तिनिराससिद्धिरित्याह — **इतीच्छासन्नन्तादिति**॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे
तृतीयस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम्

---

[1] शविकरणस्येष्टार्थस्य — ङ.
[2] पा. सू. ७.३.७७.
[3] वेति — ङ.
[4] प्रतीयते — ङ.
[5] प्रदीपे 'भिन्नकक्षयोः' इत्यस्य स्थाने 'भिन्नकक्ष्ययोः' इति पाठः चौखाम्बामुद्रिते।
[6] पा. सू. २.३.१२.
[7] उक्तार्थानामप्रयोग इति न्यायेनेति भावः।
[8] प्राप्नोतीति च सामर्थ्यात् — ङ.

तृतीयाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्

सुप आत्मनः क्यच्. ३.१.८.

[३, ४५–५६]

(उद्द्योतनम्) वक्ष्यमाण इति। स्वरार्थो न भवतीति वक्ष्यमाण इत्यर्थः। प्रत्ययस्वरेणैव तत् सिद्धम्, अत आह — **शिष्येति। यद्यपीति।** [1]'सनाद्यन्ताः' इति क्यजन्तस्य धातुत्वात् परत्वाच्च[2] धातुस्वरस्येत्यर्थः। **तथापीति।** विशेषाभावादनास्थया [3]प्राथमकल्पिक उक्त इत्यर्थः। ननु [4]क्यङोऽपि ककारानुबन्धयुक्तत्वात् कथं तदनुबन्धकपरिभाषया तस्याग्रहणम्, अत आह — **स एवेति। एतद्वचनेति।** तदनुबन्धकस्येति परिभाषासामर्थ्यादित्यर्थः। सूत्रे यदनुबन्धको गृहीतस्तदनुबन्धरहितस्य ग्रहणं न प्रसक्तम्। तदनुबन्धे सत्यनुबन्धान्तरविशिष्टस्यापि यदि ग्रहणं स्यात् तदैतत्परिभाषा व्यर्था स्यादिति भावः। नन्वात्मेच्छेत्यत्र न कर्तृ[5]षष्ठ्याः समासः, इच्छायाः सुबन्तद्वारात्मसंबन्धाङ्गीकारेण साक्षात्संबन्धस्याविवक्षितत्वात् [6]परेच्छायामित्यत्रासंभवाच्च। नापि कर्मणि [7]षष्ठ्याः, इच्छायाः पुत्रविषयतयात्मविषयत्वाभावात्, अत आह — **आत्मन इति।** विवक्षितं विशेषसंबन्धमाह — **सुबन्तेति। न त्विति।** कर्तृत्वलक्षण इत्यर्थः। फलितमाह — **तेनेति। एवमिति।** परस्य सुबन्तार्थं [8]यदीच्छतीत्यर्थः। शङ्काशयमाह — **क्रियेति।** आत्मशब्दस्येच्छाविशेषणत्वे वैयर्थ्यात् सुबन्तविशेषणत्वमित्याह — **आत्मेति।** ऐहिकसुखार्थं पापमपि कश्चिदिच्छतीत्यत आह — **अघमिति। न चेति।** [9]'उपमानादाचारे' इत्यत्र 'आत्मन [10]इच्छायाम्' [11]इत्यननुवृत्तेरित्यर्थः। अश्वस्याघस्य च क्यचि परे आकारोऽन्तादेशश्छन्दसि। [12]'क्याच्छन्दसि' इत्युप्रत्ययान्तोऽघायुशब्दः। ननु 'महान्तं पुत्रमिच्छति' इत्यत्र [13]समुदायात् क्यचि [14]'सन्महत्' इति समासे [15]'आन्महतः' इत्यात्वे 'महापुत्रीयति' इति भविष्यतीति किं तदनङ्गीकारेण, अत आह — **यद्यत्रेति। समासाभावात्** असामर्थ्येनेत्यादिः। 'महान्तं पुत्रमिच्छति' इत्यत्र पुत्रशब्दात् क्यजनुत्पत्तौ हेतुः 'समानाधिकरणानाम्' इति। [16]तद्व्याचष्टे — **समानाधिकरणानामिति।** समुदायेनैव योगे हेतुः — **सगुणस्येति।** महत्त्वविशिष्टस्येत्यर्थः। सगुणस्यैवेषिणा

---

[1] पा. सू. ३.१.३२.
[2] चकारो नास्ति — अ.
[3] प्रथमे कल्पित उक्तः — अ.
[4] क्यचोऽपि — अ.
[5] षष्ठ्या समासः — अ.
[6] परेच्छायामित्यत्र संभवाच्च — अ.
[7] षष्ठ्या — अ.
[8] यथेच्छतीत्यर्थः — अ.
[9] पा. सू. ३.१.१०.
[10] इच्छायाः — ऋ, लृ.
[11] इतीच्छाननुवृत्तेरित्यर्थः — अ; इत्यनुवृत्तेरित्यर्थः — लृ.
[12] पा. सू. ३.२.१७०.
[13] 'समुदायात्' इत्यतः 'महान्तं पुत्रमिच्छतीत्यत्र' इत्यन्तं नास्ति — अ.
[14] पा. सू. २.१.६१.
[15] पा. सू. ६.३.४६.
[16] 'तद्व्याचष्टे-समानाधिकरणानामिति' इति नास्ति — अ.

योगो न केवलस्येत्यत्र [१]द्वितीयानुपपत्तिं विविनक्ति — **यदीति**। **तस्येति**। समासग्रहणस्य नियमार्थत्वेनार्थवत्समुदायस्याप्रातिपदिकत्वमित्यर्थः। ननु [२]प्रातिपदिकद्वयाद् द्वितीया भवतु, अत आह — **गुणे चेति**। प्रातिपदिकादित्येकत्वस्य विवक्षितत्वादिति भावः। **गुणानां** महत्त्वादीनाम्। [३]**ईप्साप्रकर्षाभावात्** अतो नेप्सिततमत्वलक्षणं कर्मत्वं [४]गुणेष्वस्ति। तर्हि 'महान्तम्' इति कथं द्वितीया, अत आह — **स्वयमिति**। वक्तव्यस्यावश्यकत्वमाह — **एकस्येति**। गाव्यादीनां शक्तिभ्रमात् साधुशब्दानुमानाद्वार्थप्रत्यायकत्वमस्ति। अत्र [५]तु गमकत्वमेव नास्तीत्यगमकशब्दसूचितमर्थमाह — **लौकिक इति**। **इत्यादेरिति**। पञ्चमी। नन्वप्रयुक्तस्यापि लक्षणमस्तु, अत आह — [६]**नित्यानामिति**। प्रयुक्तानामेवान्वाख्यानादित्यर्थः। 'न ब्रूमः' इत्यस्य गाव्यादिभ्योऽपि [७]निकर्षप्रतिपादनार्थत्वमाह — **अपशब्द इति**। गाव्यादिः। [८]'मुण्डं करोति णिचि मुण्डयति। नेदं परिगणनमित्याह — **कर्मेति**। [९]तत्र हेतुः — **अधिकरणेति**। यत्र येन वा पुत्रीया तत् पुत्रीयनमित्यादिप्रयोग इष्यत इत्यर्थः। क्रियारूपस्य भावस्य साध्यतया कथं साधनत्वम्, अत आह — **भावस्य चेति**। **जीवतीति**। प्राणरूपकर्मणो धात्वर्थान्तर्भूतत्वाद् बाह्यकर्माभावाद्यथास्याकर्मकत्वं तथा क्यजन्तस्यापीत्यर्थः। 'पुत्रीयति द्विजम्' इत्यत्राचारक्यजन्तस्य सकर्मकत्वात् 'इच्छाक्यजन्तस्य' इत्युक्तम्। नन्विच्छायाः सुन्दरवस्तुमात्रं कर्मेति कथं कर्मान्तराभावः, अत आह — **नियतेति**। इच्छामात्रं न क्यजर्थः, किं तु प्रकृत्यर्थकर्मिका। तस्या न कर्मान्तरमित्यर्थः। **अस्तीति**। धात्वर्थे। **वाक्य एवेति**। तथा चैकं[१०] कर्मान्तर्भूतम्, द्वितीयेन सकर्मकत्वमित्यर्थः। शङ्काशयमाह — **मुण्डेति**। वस्तुतः कर्मभेदाभावेऽपि तत्साम्यमस्तीत्याह — **ण्यन्त इति**। **न त्विति**। माणवकमित्यनुक्त्वा मुण्डयतीत्युक्ते माणवकं मुण्डं करोतीत्यप्रतीतेरिति भावः। **परिहृतमिति**। 'यत्र च गमकत्वं भवति तत्र [११]वृत्तिः' इत्यत्र। 'न हि माणवकत्वं क्रियते' इत्यनेन सूचितमाह — **मौण्ड्यमेवेति**। ननु वाक्ये पदद्वयेऽपि कर्मत्वाधीनद्वितीयादर्शनाद् वृत्तावपि द्वयोः कर्मत्वं वाच्यम्, अत आह — **मुण्डमिति**। तर्हि माणवकस्य विशेष्यत्वात् कर्मत्वं, न मुण्डस्येति तस्माण्णिच् न स्यात्, अत आह — **गुणप्रधानेति**। तर्हि 'माणवकं मुण्डयति' इत्यत्र माणवकाद् द्वितीया न स्यात्, द्वितीयान्तमुण्डसामानाधिकरण्यस्य वृत्तावभावात्, अत आह — **मुण्डयतेश्चेति**। **क्रियाविशेषेति**। मुण्डनरूपेत्यादिः। बलीवर्दस्योत्पन्नस्य कथं करोतिकर्मत्वम्, अत आह — **आत्मसंबन्धित्वेनेति**। णिच्साम्यमाह — **अत्रापीति**। [१२]उभयोरिषिकर्मत्वमुपपादयति — **माणवकस्येति**। [१३]**प्रत्ययः** क्यच् प्रत्ययः। वचनात् क्यजपि स्यादित्याशङ्क्य णिजेवानवकाशत्वात् स्यात्, न तु सावकाशः क्यजित्याह — **वचनेति**। **प्रत्ययः** णिच्। **नन्विति**। निरपेक्षे गुणमात्रकरणे [१४]सावकाशो णिजपि सापेक्षे द्रव्यकरणे न स्यादित्यर्थः। मौण्ड्यमात्रकरणे प्रयोगं दर्श-

---

[१] द्वितीयानुत्पत्तिं — अ.

[२] प्रातिपदिकत्वाद् द्वितीया — अ.

[३] चिकीर्षाभावात् — अ, ऋ, लृ.

[४] गुणेह्यास्ति — अ, लृ; गुणेवास्ति — ऋ.

[५] तुशब्दो नास्ति — अ.

[६] प्रदीपे 'सिद्धानां च शब्दानाम्' इत्यत्र 'नित्यानां च शब्दानाम्' इत्यत्रंभट्टपाठः स्यादिति भाति।

निष्कर्ष — अ, ऋ, लृ.

[८] मुण्डमिच्छति — अ, ऋ, लृ.

[९] अत्र — ऋ.

[१०] 'एकम्' इति नास्ति — अ.

[११] 'वृत्तिरित्यत्र' इति नास्ति — ऋ, लृ; प्रवृत्तिरित्यत्र — अ.

[१२] उभयोरिति कर्मत्वं — अ, ऋ, लृ.

[१३] '**प्रत्यय** क्यच्प्रत्यय' इति युक्तं भाति।

[१४] 'सावकाशः' इत्यादि 'द्रव्यकरणे' इत्यन्तं नास्ति — ऋ.

यति — **मुण्डयतीति** । **द्रव्येति** । माणवकद्रव्येत्यर्थः । **नैष इति** । णिजपि करोत्यर्थे विधीयत इति सापेक्षार्थमेव वचनमित्यर्थः । गणे पाठाभावादाह — **सौत्रा इति** । तर्हि मुण्डनक्रियाविशेषवाचित्वं कथमित्याशङ्क्य 'न चैव' इति भाष्यम्, तद्व्याचष्टे — **यद्यपीति** । [1]वस्त्रादीनां न क्रियावाचित्वं प्रसिद्धम्, अत आह — [2]**यथा चेति** । धातवः प्रातिपदिकानि चेति यथा कण्ड्वादयो द्विविधास्तथा [3]मुण्डादयोऽपि । तत्र धातुभ्यः स्वार्थे णिच्, प्रातिपदिकेभ्यश्च [4]कृञ् स्वार्थे इति विभागः । तथा च माणवकं मुण्डयतीत्यत्र न सापेक्षत्वमिति भावः । पूर्वस्माद् भेदमाह — [5]**पूर्वस्मिन्निति** । **कर्मेति** । तथा च माणवकमिति द्वितीयोपपत्तिः । **यथेति** । यद्यपि पयो मुख्यं कर्म पूर्वमन्वेति, पश्चात् पयोदुहिना गौः, तथापि कारकान्वयस्य विवक्षाधीनत्वादेवमन्वयः संभवतीति [6]दृष्टान्तोपपत्तिः । अत्रारुच्या 'अथवा' [इति] इत्यवतारयति — **अनेनेति** । मुण्डविशिष्टेनेच्छतिना तमाप्तुमिच्छतीति संभवात् । कर्म[7]सामान्ये प्रत्यय इति पूर्वपरिहारेऽप्यत्र क्यच्प्रसङ्ग इत्युभयत्रायमस्वरसः । 'नात्र' इत्यस्यैतद्रूपसिद्ध्यर्थं प्रयत्नो न कर्तव्यः, सापेक्षत्वेऽपि गमकत्वात् [8]प्रत्ययसिद्धेरित्यर्थ इत्याह — **व्यापार इति** । माणवकं मुण्डमिच्छतीत्यत्र क्यज् न भवतीत्याह — **क्यजिति** । इच्छाक्यजन्तात् कर्मणि प्रत्ययो नास्तीत्यत्र हरिसंमतिमाह — **तदुक्तमिति** । यदिच्छाक्यचः कर्म तदाचारक्यचो[9] लकारवाच्यत्वेन परिहृतम् । 'पुत्रमिच्छति, पुत्रमिवाचरति' इत्युभयत्र 'पुत्रीयति' इति रूपमेकम् । तथा चाचारक्यजन्तात् कर्मणि प्रत्ययो भवति, नेच्छाक्यजन्तादिति विवक्षितार्थः । तत्राचारक्यजन्तात् कर्मणि प्रत्यये हेतुः — **वाक्येति** । वाक्ये उपमानोपमेयरूपं कर्मद्वयम् । तत्रोपमानमन्तर्भूतम्, उपमेये प्रत्ययः । इच्छाक्यचस्तु न कर्मद्वयमिति वैषम्यमित्यर्थः । यद्वा, इच्छाक्यचः कर्म लकारवाच्यं [10]न भवति चेत् कस्य तद्वाच्यम्, अत आह — **वाक्येति** । तत्र हेतुः — **अत इति** । वाक्ये पुत्रमिच्छतीत्यत्र द्वितीयया कर्मत्वमभिव्यज्यत इत्यर्थः । यथा [11]पदवर्गक्रमादिषु [12]वेदविषयोऽभ्यासो व्यज्यते तथा वाक्ये कर्मत्वमभिव्यज्यत इति दृष्टान्तार्थः । 'अभ्यासक्रमादिषु' इति समस्तपाठे 'अभ्यास' इति कर्मणि घञ्, [13]अभ्यस्तक्रमादिषु यथा वर्णाभिव्यक्तिस्तथा वाक्ये कर्माभिव्यक्तिरित्यर्थः । 'अथेह' इत्यादेः प्रकृतसंगतिमाह — **इच्छेति** । तदेवाह — [14]**तथा हीति** । **इच्छामात्रस्य** न तु पुत्रविषय-

---

[1] मुण्डमिश्रेति सूत्रे उपात्तानां वस्त्रादिशब्दानामित्यर्थः ।

[2] प्रदीपे 'यथा कण्ड्वादयः' इत्यत्र 'यथा च कण्ड्वादयः' इति पाठोऽन्नंभट्टस्येति प्रतीयते । निर्णयसागरमुद्रिते पाठान्तरत्वेनाधो निर्दिष्टोऽयम् ।

[3] 'मुण्डादयोऽपि' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — अ.

[4] प्रातिपदिकप्रकृतिकसुबन्ते सति कृञ्धातोः स्वार्थे प्रयोग एव 'मुण्डं करोति' इति, इति भावः ।

[5] अस्मिन्निति — अ.

[6] दृष्टान्तोपपत्तेः — ऋ.

[7] सामान्यप्रत्यय इति — अ, ऋ, लृ.

[8] प्रत्ययसिद्धिरित्यर्थः — अ, ऋ.

[9] क्यजन्तादुत्पन्नलकारेत्यर्थः ।

[10] न भवतीति चेत् — ऋ.

[11] अयमर्थो विवरणकारोक्त इति ज्ञायत उद्द्योतदर्शनेन । अत्र क्रमादिधातुष्वभ्यासः पौनःपुन्यं वाक्येनैव गम्यते, न तु यङा । तत्प्रकृतिकस्य तस्य कौटिल्ये निरूढेरिति नागेशेन हरिकारिकान्तरसंवादप्रदर्शनपूर्वकं भावं प्रकाश्य विवरणकृदुक्तार्थो दूष्यते ।

[12] वेदिविषयेऽभ्यासः — अ.

[13] अभ्यासक्रमादिषु — अ; अभ्यस्तक्रियादिषु — ऋ.

[14] यथेति — अ.

केच्छायाः। 'इष्टः' इत्यादौ कर्मणः [1]प्राधान्यादेव तत्र क्यच् नोत्पद्यते, किं त्विच्छामात्र एवेत्यर्थः। नन्विष्टशब्देन कर्मोक्तावपि क्यचि सति [2]स न प्रयुज्यत इति कथं स्वशब्देनोक्तत्वम्, अत आह — **इष्टशब्देति**। पुत्र इत्यनेन प्रतिपादनादित्यन्वयः। [3]पुत्र इत्यस्य कर्मप्रतिपादकत्वसमर्थनायेष्टशब्दसामानाधिकरण्यमुक्तम्। [4]**निर्भुक्तेऽपि** इष्टशब्दाभावे [5]तन्निमित्तकर्मत्वानभिव्यक्तावपि। क्रियापेक्षः कर्मभावः कर्मत्वं यस्य पुत्ररूपस्यार्थस्येति विग्रहः। नन्वेतावता क्यजनुपपत्तौ न कोऽपि हेतुरुक्तः, अत आह — **अयमर्थ इति**। **क्रियाफलस्य** पुत्रादेः। **न त्विति**। क्यच् न कर्मणि, धात्वर्थव्यतिरिक्तकर्माभावात्। अत एव क्यजन्तादपि न कर्मणि प्रत्यय इत्यर्थः। 'पुत्रमिच्छति, पुत्र इष्टः' इत्यादिवाक्ये कर्मकर्तृप्रतीतावपीच्छामात्रमेव क्यजर्थः, न तु कर्म, कर्ता वा। इच्छायाश्च सकर्मकत्वात् कर्मणि प्रत्ययः [6]स्यादेवेत्यत आह — **इच्छाया इति**। विद्यमानस्य [7]'कर्मणोऽप्रतीतिरनेन[8]' नोच्यते, किं तु कर्मैव नास्तीत्युच्यत इत्याह — **प्रत्ययान्तस्येति**। **ऋकारान्तस्य च** असंभवादित्यन्वयः। अस्मिन् मते दोषमाह — **अस्मिन्निति**। तर्हि भाष्यकृता किमर्थमुपन्यस्तम्, अत आह — **भाष्यकारेणेति**। न त्वयं सिद्धान्तः, किं तु मान्ताव्ययप्रतिषेध इत्यपीष्ट इति भावः॥

[३, ४५–५६]

(रत्नप्रकाशः) **किमर्थ इति**। स्वरार्थो विशेषणार्थः सामान्यग्रहणार्थो वेति भावः। **प्रत्ययस्वरेणेति**। यद्यप्यत्र सतिशिष्टेन धातुस्वरेण भवितव्यम्, तथापि प्रत्ययस्वरेणाप्यत्रेष्टं सिध्यतीति तथोक्तम्। वस्तुतस्तु धातुस्वरं बाधित्वा परत्वात् [9]'चितः' इत्यन्तोदात्तो भवतीत्यन्यदेतत्। **तदनुबन्धकेति**। सोऽनुबन्धो यस्य स इत्यर्थः। **अतदनुबन्धकस्येति**। स नेत्यसः, असोऽनुबन्धो यस्य तस्येत्यर्थः। एतेन 'स एव यस्यानुबन्धस्तस्य ग्रहणम्। यस्य तु स चान्यश्च तस्य न ग्रहणमित्येवमेतद्वचनसामर्थ्यादाश्रीयते' इति निरस्तम्। तदभिमतार्थस्य यथाश्रुतवचनेनैव लभ्यत्वेन 'एतद्वचनसामर्थ्यादाश्रीयते' इत्यस्यासंबद्धप्रलापत्वात्। **आत्मेच्छायामिति**। शेषषष्ठ्याः कर्तृषष्ठ्या वा [10]'षष्ठी' इति वा [11]'कृद्योगा च' इति वा समासः। एतेन 'आत्मन इच्छेति शेष[12]षष्ठ्याः समासः, न तु कर्तृषष्ठ्याः। सुबन्तद्वारकश्चात्मन इच्छया संबन्धः, न तु साक्षात्। तेनायमर्थः — आत्मनः सुबन्तार्थं यदेच्छति तदा यथा स्यादिति। एवं परेच्छायामित्यपि व्याख्येयमिति' इति निरस्तम्। 'क्रियमाणेऽपि' इति शङ्काग्रन्थानुसारि'नात्मग्रहणेनेच्छा संबध्यते' इति समाधानग्रन्थानुसारेणात्रात्मशब्दस्येच्छाशब्देनैव साक्षात्संबन्धाश्रयणस्यैवौचित्यात्। सिद्धान्ते 'आत्मनः सुपो यथा स्यात् परस्य सुपो मा भूत्' इत्येव समाधानग्रन्थतात्पर्य-

---

[1] प्राधान्येऽपि तत्र — अ, ऋ.

[2] इष्टशब्द इत्यर्थः॥ सन्न प्रयुज्यते — अ, ऋ, लृ.

[3] पुत्रशब्दस्य कर्म — ऋ.

[4] प्रदीपे 'निर्भुक्तेषिक्रियापेक्ष' इत्यत्र 'निर्भुक्तेऽपि क्रियापेक्ष' इत्यत्रभट्टपाठ इति भाति।

[5] निमित्तकर्मत्वादिव्यक्तावपि — अ; तन्निमित्तकर्मभावानभिव्यक्तावपि — लृ.

[6] स्यादेवेत्याह — अ, ऋ, लृ.

[7] कर्मणः प्रतीतिः — ऋ.

[8] अनेनोच्यते — अ, ऋ, लृ.

[9] पा. सू. ६.१.१६३.

[10] पा. सू. २.२.८.

[11] का. वा. २.२.८–१.

[12] प्रदीपे 'शेषषष्ठ्या समासः, न कर्तृषष्ठ्या' इत्यत्र 'शेषषष्ठ्याः समासः, न कर्तृषष्ठ्याः' इति रत्नप्रकाशकृत्पाठ इति भाति।

स्योचिततत्वेन सुबन्तद्वाराप्यात्मन इच्छयान्वयाभावादिच्छां प्रति परस्य कर्तृत्वकर्मत्वयोरनभिमतत्वेन तत्र कथंचित् शेषषष्ठ्या एव समाससंभवाच्च। **कर्तरि षष्ठीति**। शेषे षष्ठ्यपीच्छान्वये कर्तृक्रियाभावे पर्यवस्यतीति भावः। एतेन 'कियाकारकसंबन्धस्यान्तरङ्गत्वादिति भावः' इति निरस्तम्। तस्यान्तरङ्गत्वे मानाभावात्। स्वनिष्ठाव्यवस्थितान्तरङ्गतायाः शास्त्रविषये आरोपणानौचित्याच्च। **नात्मग्रहणेनेच्छा[भि]संबध्यत इति**। [1]'संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्' इति न्यायेन व्यभिचाराभावे संभवमात्रेणात्मग्रहणेनेच्छा न विशेष्यत इति भावः। **आत्मनो यत् सुबन्तमिति**। अर्थद्वारक आत्मनः सुबन्तान्वयः। **अघायव इति**। हिंसेच्छव इत्यर्थः। [2]'अश्वाघस्यात्' इत्यात्, [3]'क्याच्छन्दसि' इत्युप्रत्ययः। अघशब्दोऽत्र हिंसापरः। हिंसा च प्राणवियोगानुकूलव्यापारः। **तस्मादिति**। यस्माच्छन्दसि परस्य सुपः क्यजिष्टस्तस्मादित्यर्थः। **कश्चात्मन इति**। न कोऽपि तदेषितुमर्हतीति भावः। **तस्मादात्मग्रहणं कर्तव्यमिति**। यस्माद्वेद इव लोकेऽघशब्दात् क्यज् न भवति तस्मात् 'आत्मनः' इति कर्तव्यमेव। कृते तु तस्मिन् आत्मनोऽघं न कोऽपीच्छतीति [4]तस्मात् क्यजभावो लोके सिध्यतीति भावः। **यदयमिति**। न च तदाचारे क्यजर्थं स्यादिति वाच्यम्, छन्दस्यघशब्दादाचारे क्यचः प्रयोगो नास्तीत्येतद्भाष्यस्वरसेन ज्ञातुं शक्यत्वात्। **महान्तं पुत्रमिच्छतीति**। [5]'यद्यत्र सुबन्तसमुदायात् क्यच् स्यात् तदा [6]'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि 'महत्पुत्रीयति' इति स्यात्। समानाधिकरण उत्तरपदे विधीयमानस्यात्वस्यासमानाधि[7]करणेऽनुत्तरपदे पुत्रशब्देऽप्रवृत्तेः। एतेन 'प्रत्ययार्थाभिधाने पदद्वयस्य प्रवर्तनात् परस्परसमासाभावादुत्तरपदनिबन्धनमात्वं न स्यात्' इति निरस्तम्। प्रत्ययार्थाभिधाने पदद्वयं प्रवृत्तमित्यत्र मानाभावात्। समासस्य वैकल्पिकत्वेन तदभावपक्ष एव वाक्यात् क्यच आपादितत्वेन तत्र पुनः समास[8]शङ्कासंभवेनैवोपपत्तौ यत्किंचिज्जल्पनेन समासपरिहारानौचित्याच्च। शङ्किता समाधातारं प्रत्याह — **अथ यदत्रेति**। **सुबन्तमिति**। पुत्रमि[ती]ति शेषः। [9]'समानाधिकरणमसमर्थं भवति' [10]'सापेक्षमसमर्थं भवति' इति च द्वेधा सामर्थ्यस्य निषिद्धत्वेनासामर्थ्यान्न भवतीति प्रसिद्धे समाधाने विद्यमानेऽपि [11]'यक्षानुरूपबलिन्यायेन समाधानान्तरमाह — **समानाधिकरणानामिति**। लक्ष्यबाहुल्यसंभवाज्जात्यभिप्रायेण वा बहुवचनम्। समानाधिकरणस्य समुदायान्वयिना सह सर्वत्र वृत्तिर्न भवति, समुदायान्वयिनः **एकेन** अवयवेन, **योगस्य** संबन्धस्याभावादिति भावः। एतेन 'समानाधिकरणानां पदानां मध्ये एकेन पदेनायोगात् समुदायेनैव योगाद् वृत्तिर्न भवतीत्यर्थः' इति निरस्तम्। भाष्यकारनिर्दर्शितान्वयपरित्यागेनान्यथान्वयनिदर्शने मानप्रयोजनयोरभावात्। तस्याप्यन्वयस्य भाष्यकृतैव निर्दर्शितप्रायत्वेन तन्निदर्शनेन यथाश्रुतभाष्यनिर्दर्शितान्वयत्यागपूर्वकेण चातुर्यालाभाच्च। **वृत्तिर्न भवतीति**। समुदायान्वयिना सहेति शेषः। **अयोगादेकेनेति**। समुदायान्वयिन इति शेषः। **अत्र** ऋद्धस्य राज्ञः पुरुष इत्यादौ। **षष्ठ्यन्तस्य** राज्ञ इत्यस्य। **सुबन्तेन** पुरुष इत्यनेन। **सामर्थ्ये सतीति**। योगे सतीत्यर्थः। एवमुत्तरयोः सामर्थ्यशब्दयोरर्थो ज्ञेयः। कुत इत्यत आह — **वाक्यमिति**। हीति शेषः। **योग इति**। सतीति शेषः। पूर्ववाक्ये सामर्थ्यशब्देन दर्शितोऽर्थोऽत्र योगशब्देन

---

[1] लौ. न्या. साहस्री पृष्ठम् ७९.
[2] पा. सू. ७.४.३७.
[3] पा. सू. ३.२.१७०.
[4] अघशब्दादित्यर्थः।
[5] यद्यप्यत्र — ब.
[6] पा. सू. २.४.७१.
[7] करणे उत्तरपदे — प.
[8] शङ्काया असंभवेनेत्यर्थः।
[9] महाभाष्यम् २.१.१.
[10] महाभाष्यम् २.१.१.
[11] लौ. न्या. द्वितीयभागे पुटम् ६५.

स्पष्टं दर्शितः। पुनः शङ्कितामाह — **समानाधिकरणानामित्युच्यत इति**। समाधत्ते — **एवं तर्हीति**। शङ्किता तत्समाधानमयुक्तमित्याशयेनाह — **द्वितीयानुपपत्तिरिति**। **यदीति**। यस्मादित्यर्थः। **नेषिकर्मेति**। उक्तं त्वया, तस्मादिति शेषः। द्वितीयानुपपत्तिः सर्वविभक्त्यनुपपत्त्युपलक्षणमित्याह — [1]**न चावश्यमिति**। समाधाताह — **पुत्र एवेति**। शङ्किताह — **वृत्तिस्तर्हि कस्मान्न भवतीति**। महान्तं पुत्रमिच्छतीति [2]पुत्रशब्दात् क्यच् कुतो नेति भावः। **सविशेषणानामिति**। व्याख्यातमिदं समर्थसूत्रे। यत्तु 'एकस्यैकदा व्यपेक्षैकार्थीभावविरोधादिति भावः' इति, तत्तु तत्रैव निरस्तम्। **मुण्डयति माणवकमिति**। अत्र [3]'मुण्डमिश्र' इत्यादिना मुण्डशब्दात् सविशेषणात् णिज् न स्यादिति भावः। **अगमकत्वादिति**। महान्तं पुत्रमिच्छतीति वाक्येन गम्यमानस्यार्थस्य महान्तं पुत्रीयतीति वाक्यं यतो न गमकम्, अतस्तत्र नेति भावः। [4]**न ब्रूमोऽपशब्दः स्यादितीति**। यदि स प्रत्यायितार्थकः सन्नपशब्दः स्यात् तर्हि तन्निवारणे यत्नः कर्तव्यः स्यादिति भावः। सन्नन्ताद् भावकर्मकर्तृलादयो भवन्ति यथा, तथा किं क्यजन्ताद् भवन्ति न वेति संदिहानः पृच्छति — **अथेति**। **अस्येति**। प्रकृतसूत्रविषयस्येत्यर्थः। उत्तरमाह — **भावः कर्ता चेति**। एतेन 'कर्मभावप्रतिपादनपरमेतत्। अधिकरणादौ हि ल्युडादयो यथायोगं भवन्त्येव' इति निरस्तम्। धातुमात्रसाधारणाधिकरणादेः प्रकृतविचारविषयताभ्युपगमे चातुर्याभावात्। प्रकृतभाष्याननुगुणत्वाच्च। **अभिहितं तत्कर्मेति**। 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन पुत्रशब्देनाभिहितं सद् धात्वर्थः संपन्न इति भावः। **न चेदानीमन्यदिति**। पुत्रादीनामक्रियात्मकत्वेन तद्द्वारा कर्मान्तरं न संभवतीति भावः। सन्प्रकृत्यर्थस्य क्रियात्वात् तद्द्वारा सन्नन्ते कर्मान्तरं संभवतीति वैषम्यम्। तथा च जीवतिप्रभृतेरिवेच्छाक्यजन्तस्याकर्मकत्वमिति सिद्धम्। पचनादिप्रकृतिकात् सुबन्तात् क्यचि तु भवतु कर्मान्तरं — 'पचनीयत्योदनस्य, पचनीय्यते ओदनः' इति। न च प्रकृतभाष्यविरोधः, तस्याक्रियाप्रकृतिकविषयत्वात्। अक्रियाप्रकृतिक [5]'आचारक्यजन्ते कथं सकर्मकतेति पृच्छति — **कथं तर्हीति**। **द्वे [हि] अत्रेति**। उपमानोपमेयभावे विवक्षिते उपमेयसापेक्षत्वेऽपि पुत्रादेः क्यज् भवतीति भावः। एवं 'काकः श्येनायते' इत्यत्र क्यङ् द्रष्टव्यः। **मुण्डयति माणवकमिति**। महान्तं पुत्रमिच्छतीत्यत्र क्यज् यथा न भवति, एवं माणवकं मुण्डं करोतीत्यत्र णिज् न स्यात्, विशेषाभावादिति मन्यते। तदभिप्रायं तद्वचनेनैव प्रकटयितुमाहान्यः — **अत्रापीति**। इतरः स्वाशयमाह — **ननु चेति**। तत्र कश्चिदाह — **नात्रोभाविति**। मुण्डमाणवकयोरुभयोर्यदि करोतिकर्मत्वं स्यात् तदा सापेक्षत्वात् णिज् न स्यात्। मुण्ड एव तु करोतिकर्म, माणवकस्तु [6]'मुण्डविशेषणमिति न सापेक्षतेति मन्यते। इतरस्तदयुक्तमित्याशयेनाह — **कामं तर्हीति**। एवं तर्हीत्यर्थः। समाधत्तेऽन्यः — **उभावत्रेति**। मुण्डस्य साक्षात्कर्मत्वम्, तदभेदेन माणवकस्येति भावः। **गुणवचना इति**। क्रियावचना इत्यर्थः। **सापेक्षा इति**। संबन्धिशब्दत्वान्नित्यसापेक्षा इति भावः। ननु तर्हि नित्यसापेक्षत्वे मुण्डादीनां माणवकं मुण्डमिच्छतीति क्यजपि स्यादित्यत आह — **वचनादिति**। [7]'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे [8]'मुण्डमिश्र' इत्यादिना पुनर्विधानात् सापेक्षादपि णिज् भवति। विशेषवचनाभावात् क्यज् न भवतीति भावः। मुण्डादयश्चुरादयोऽदन्ता धातव एवाङ्गीकर्तुमुचिताः, क्रियावाचकत्वस्य स्वतःसिद्धस्य

---

[1] न वावश्यमिति — ब.

[2] पुत्रशब्दात् सन् कुतो नेति — ब.

[3] पा. सू. ३.१.२१.

[4] ~~न~~ ब्रूमोऽयमपशब्दः — ब.

[5] आचारक्विबन्ते — प, ब.

[6] मुण्डिविशेषणमिति — ब.

[7] चुरादिगणसूत्रम्.

[8] पा. सू. ३.१.२१.

सत्त्वात्। तथा च मुण्डादयः क्रियावचनाः केचन णिज्विधौ पृथङ् न पठनीया एवेत्याशयेनाह — **अथवा धातव एवेति**। शिष्यबुद्धिपरीक्षार्थं प्रातिपदिकत्वमेव मुण्डादीनामाश्रित्य समाधानान्तरमाह — **अथवा नेदमिति**। नन्वेवं मुण्डमिच्छतीति[1] मुण्डीयतीति क्यचि सति विशेषार्थिना विशेषः प्रयोक्तव्य इति, मुण्डीयति, कमित्यपेक्षायां माणवकमिति संबध्येतेत्यस्वरसादाह — **मुण्डविशिष्टेनेति**। **करोतिना तमाप्तुमिति**। णिजर्थेनैव माणवकमाप्तुमिच्छतीति मुण्डस्य सापेक्षत्वाभावेन ततो णिज् भविष्यतीति भावः। ननु मुण्डविशिष्टेनेषिणा माणवकमाप्तुमिच्छतीत्यपि वक्तुं शक्यत इत्यत आह — **अथ वोक्तमिति**। उक्तप्रायत्वादुक्तमिति निर्देशः। **व्यापारः** यत्नविशेषः, **अनुगन्तव्यः** आश्रयणीयः। कुतो नाश्रयणीयो यत्नविशेष इत्यत आह — **गमकत्वादिति**। यत इत्यादिर्बोध्यः। **माणवकमितीति**। अत इति शेषः। माणवकं मुण्डमिच्छतीत्यत्र त्वगमकत्वात् क्यज् न भविष्यतीति भावः। सुप इति सामान्येन निर्देशाद् द्वितीयान्तादिच्छायां क्यचि कर्तरि लकारो यथा भवति, तथा प्रथमान्तात् क्यचि कर्मणि लकारः कुतो न भवतीत्याशयेन पृच्छति — **अथेहेति**। उत्तरमाह — **केचित्ताद्वदिति**। **स्वशब्देनोक्तत्वादिति**। पुत्रस्येषिं प्रति कर्मताया विवक्षितत्वेन कर्मणि द्वितीयाया एवोचितत्वेन च द्वितीयान्तादेव क्यचा भवितव्यम्। द्वितीयान्तेनाभिहितस्य कर्मणो धात्वर्थेऽन्तर्भावाद्धातोश्चाकर्मकत्वेन ततः कर्मणि लकारो न भविष्यतीति भावः। एतेन 'इष्टशब्दसामानाधिकरण्यात् पुत्र इत्यनेन निर्भुक्तेषिक्रियापेक्षकर्मभावस्यार्थस्य प्रतिपादनादित्यर्थः' इति निरस्तम्। इच्छतिशब्दसामानाधिकरण्यात् पुत्र इत्यनेन निर्भुक्तेषिक्रियाकर्तृभावस्यार्थस्य प्रतिपादनात् कर्तर्यपि क्यजन्ताल्लकारानापत्तिरिति शङ्कित्रापि वक्तुं शक्यत्वात्। तस्मादुक्त एव समाधिः। [2]द्वितीयान्तादेव क्यज् भवति, क्यजन्ताया वृत्तेस्तु विग्रहः पुत्रमिच्छतीति कर्तृलकारान्तेनेव कर्मलकारान्तेनापि भवतु नाम। न तावता कश्चिद्दोषः। आख्यातं हि क्रियाप्रधानम्। तेन 'पुत्रमिच्छति' इत्यनेन 'इष्यते पुत्रः' इत्यस्य तुल्योऽर्थ इति मन्यमाना देवानांप्रियाः केचिदाहुरित्याशयेनाह — **अपर आहुरिति**। तिङर्थप्रधानं तिङन्तम्, न तु क्रियाप्रधानम्। तथा च 'इष्टः पुत्रः' इति वा 'इष्यते पुत्रः' इति वा पुत्रीयतीत्यस्य विग्रहो न युज्यते। किं तु पुत्रमिच्छतीत्येव भवतीति जानन्तो वैयाकरणशिखामणय एवमाहुरित्याशयेनाह — **इहभवन्तस्त्विति**। पूज्यास्त्वित्यर्थः। **न भवितव्यमिति**। 'इष्टः पुत्रः, इष्यते पुत्रः' इति विग्रहे 'पुत्रीयति' इत्यनेन वा, 'पुत्रीयति' इत्यस्यार्थे 'इष्टः पुत्रः, इष्यते पुत्रः'इति विग्रहेण वा न भवितव्यमित्यर्थः। **यश्चेति**। पुत्र इषिकर्म सन् वर्तमानभवनाश्रय इत्येवंरूप इत्यर्थः। **इष्टः पुत्र इति**। भवतीत्यस्तीति [3]वाप्रयुज्यमानमपि गम्यत इति 'इष्यते पुत्रः' इत्यनेन तुल्यार्थकमिदम्। **प्रत्ययान्तेनेति**। पुत्रीयतीत्यनेनेत्यर्थः। तस्य [4]हि पुत्रकर्मकेच्छाश्रयः सन् वर्तमानभवनाश्रय इत्यर्थः। एतेन 'प्रत्ययान्तस्याकर्मकत्वात् कर्मणि प्रत्ययोत्पत्त्यसंभवादित्यर्थः' इति निरस्तम्। प्रकृतभाष्यस्य तदर्थकत्वाभावात्। **मान्ताव्ययानामिति**। मान्तानामव्ययानां चेत्यर्थः। तेभ्यः क्यज् न भवतीति वाच्यमिति भावः। **गोसमानाक्षरनान्तादिति**। गोशब्दादगन्तात् नान्ताच्चेत्यर्थः। इदं मतं भगवतोऽनभिमतमपाणिनीयं च। वाच्यतीत्याद्यपि हि भगवत इष्टम्॥

---

[1] इत्यर्थे इत्यर्थः।

[2] एतदारभ्योत्तरस्यावतारिका।

[3] वा, अप्रयुज्यमानमिति छेदः।

[4] हिशब्दो नास्ति — ब.

[३, ४५–५६]

(नारायणीयम्) **पूर्वं प्रत्ययस्वर इति**। प्रत्ययेन सह शिष्टत्वात्। **पश्चादिति**। उत्पन्ने प्रत्यये तदन्तस्य धातुसंज्ञायां तत्स्वरस्य प्राप्तत्वात्। [1]तत्र प्रथमप्राप्तिमाश्रित्यैतदुक्तमिति न दोषः। ननु क्यङोऽपि ककारानुबन्धयुक्तत्वात् कथं तदनुबन्धकग्रहणपरिभाषया तस्य ग्रहणं न भवतीत्यत आह — **स एवेति**। यदनुबन्धविशिष्टः सूत्रे गृहीतः, तदनुबन्धरहितस्य विनापि वचनं [2]विशेषणवशादेव ग्रहणस्याप्राप्तत्वाद्वचनसामर्थ्यादवधारणगर्भः समास आश्रीयत इत्यर्थः। **आत्मन इच्छेति**। आत्मशब्दोऽत्र परव्यावृत्ति[3]वचनः स्वशब्दपर्यायः, न चेतनद्रव्यवचनः। तस्य हि ग्रहणे सुबन्तसंबन्धेऽपि 'देवदत्तस्य पुत्रमिच्छति यज्ञदत्तः' इत्यत्रापि स्यात्, परस्यापि चेतनद्रव्यत्वात्। **न तु साक्षादिति**। साक्षात्संबन्धे हि शेषषष्ठ्याश्रयणमनर्थकं स्यात्, कर्तृषष्ठीफलापातात्। चोदकस्याशयं दर्शयति — **क्रियाकारकेति**। क्रियाकारकसंबन्धपूर्वकत्वाच्छेषसंबन्धस्येति भावः। सामर्थ्यादन्तरङ्गन्यायस्यात्र बाध इत्युत्तरवादिन आशयं दर्शयति — **आत्मग्रहणेति**। एतदेवोपपादयति — **न ह्येषितारमिति**। इच्छायां ह्येषिता कर्तेति स एवात्मग्रहणेनात्र [4]गृह्येत। **तच्चात्मनो न कश्चिदिति**। सर्वस्य हि सुखं मे स्यात् दुःखं मा भूदितीच्छा। [5]'अश्वाघस्यात्' इत्यात्वविधानस्यान्यार्थत्वात् परेच्छायां क्यज्भावस्य ज्ञापकत्वमुक्तमनुपपन्नमित्याशङ्क्य परिहरति — **न चेति**। ननु महान्तं पुत्रमिच्छतीत्यत्र क्यचि कृते समासे च [6]'आन्महतः' इत्यात्वे 'महापुत्रीयति' इति भविष्यतीति किमुच्यते [7]'तदा मा भूत्' इति, तत्राह — **यद्यत्रेति**। **परस्परस्य समासाभावादिति**। द्वयोः परार्थत्वात् परस्परेण संबन्धाभावादसामर्थ्यात्। 'समानाधिकरणानाम्' इत्यस्य व्यवहितेनैकेनेत्यनेनान्वयः, निर्धारणे च षष्ठीत्याह — **समानाधिकरणानां पदानां मध्य इति**। एकेन पदेनायोगे हेतुः — **समुदायेनैवेति**। **वृत्तिर्न भवतीति**। अत्रापि समानाधिकरणानामिति संबध्यते। 'समुदायेनैव योगात्' इत्येतदुपपादयति — **सगुणस्य हीति**। ननु केवलस्य प्रातिपदिकार्थस्याकर्मत्वेऽपि समुदायार्थस्य कर्मत्वात् समुदायाद् द्वितीयोत्पत्तिरस्त्विति चेन्नेत्याह — **नापीति**। **तस्याप्रातिपदिकत्वादिति**। प्रातिपदिकसमुदायस्याप्रातिपदिकत्वात्। नन्वेवमपि [8]'ङ्याप्प्रातिपदिकात्' इत्यत्र समुदायग्रहणमस्त्विति [चेत्], नेत्याह — **गुणे चेति**। स्वादिविधिशेषत्वात् [9]'ङ्याप्प्रातिपदिकात्' इत्यत्रैकत्वस्य विवक्षितत्वादित्यर्थः। **तत्सामानाधिकरण्यनिबन्धनेति**। [10]'न केवला प्रकृतिः प्रयोक्तव्या' इति वचनात् कयाचिद्विभक्त्यावश्यभाव्यम्। सा च प्रधानानुरोधित्वाद् गुणानां विशेष्यानुरोधेन [11]विशेषणानां प्रवर्तत इत्यर्थः। 'सविशेषणानाम्' इति वचनस्य [12]न्यायसिद्धार्थानुवादत्वं दर्शयति — **एकस्येति**। एकार्थीभावे सत्युपसर्जनत्वात् पुत्रादेर्विशेषणान्तरसंबन्धे प्राधान्यप्रसङ्गादेकस्यैकदा गुणप्रधानभावविरोधाद् वृत्तिर्न भविष्यतीत्यर्थः। [13]'नासौ जातुचित्' इत्यस्यार्थमाह — **लौकिके प्रयोगेऽनुमानादपीति**। द्विविधा

---

[1] ततः प्रथम — ङ.
[2] विशेषणांशादेव — ङ.
[3] वचनस्वशब्द — ङ.
[4] गृह्यते — ङ.
[5] पा. सू. ७.४.३७.
[6] पा. सू. ६.३.४६.
[7] तथा — ङ.
[8] पा. सू. ४.१.१.
[9] पा. सू. ४.१.१.
[10] महाभाष्यम् १.२.६४.
[11] विशेषणान्तरं प्रवर्तत इत्यर्थः — ङ.
[12] सिद्धानुवादत्वं — घ.
[13] न जातुचित् — घ, ङ.

ह्यर्थप्रतीतिः — गवादिशब्देभ्यस्तदर्थप्रतीतिः[1] साक्षात्, गाव्यादिभ्यस्तु साधुशब्दानुमानद्वारेण परम्परया। अत्र तूभयाभाव इत्यर्थः। नन्वेवमपि शास्त्रप्रामाण्यात् 'महान्तं पुत्रीयति' इत्यादेः साधुत्वं स्यादिति चेत् तदपि नेत्याह — [2]**प्रयुक्तानामिति**। अनुमानादप्यर्थप्रतीतिर्नास्तीत्येतदेवोपपादयितुं 'न ब्रूमः' इत्याद्युक्तं भाष्य इति दर्शयति — **अपशब्दो हीति**। नन्वधिकरणाद्यपि क्यजन्तस्य साधनं संभवति, तत्किमुच्यते 'भावः कर्ता च' इति, तत्राह — **कर्माभावेति**। ननु भावस्य क्रियालक्षणस्य साध्यत्वात् साधनत्वायोगात् 'भावः साधनम्' इत्ययुक्तमित्यत आह — **भावस्य चेति**। साध्यतेऽनेन लकारादिरिति योगवशाद् भावोऽपि साधनशब्देन व्यपदिश्यते, न तु रूढचेत्यर्थः। **जीवतीत्यादिवदिति**। यथा जीवतेः प्राणधारणार्थत्वात् प्राणकर्मणोऽन्तर्भावादकर्मकत्वम्, एवं पुत्रीयादेः पुत्रादिविशेष्टेच्छार्थवृत्तित्वादकर्मकत्वमित्यर्थः। यथोक्तम् —

[3]'पुत्रीयतौ न पुत्रोऽस्ति विशेषेच्छा तु तादृशी।
विनैव पुत्रानुगमाद्या पुत्रे व्यवतिष्ठते॥
प्राणैर्विना यथा धारिर्जीवतौ प्राणकर्मकः।
न चात्र धारिर्न प्राणा जीवतिस्तु क्रियान्तरम्॥
तथा विनेषिपुत्राभ्यां पुत्रीयायां क्रियान्तरम्।
अन्वाख्यानाय भेदास्तु सदृशाः प्रतिपादकाः॥ इति।

तस्याश्चेति। पुत्रविषयाया इच्छाया वस्त्रादिविषयीकरणायोगादित्यर्थः। **मुण्डगुणेति**। मौण्डचगुणविशिष्टस्य माणवकस्यात्र णिजन्तार्थेऽन्तर्भावादित्यर्थः। [4]'शक्तः' इत्यनेन शब्दशक्तिसामान्यमत्र हेतुरिति दर्शयति। ननु 'मुण्डयति माणवकम्' इत्यत्र वृत्तिर्न प्राप्नोतीति चोदयित्वा गमकत्वात् समाससिद्धिरुक्तेति पुनश्चोद्यसमाधाने पुनरुक्ते इत्याशङ्कच परिहरति — **यद्यपीति**। ननूभयोः करोतियुक्तत्वाभावे मुण्डमिति द्वितीया न स्यादित्याशङ्कचात्र विवक्षितमर्थं दर्शयति — **मौण्डचमेवेति**। नन्वेवं सति 'मुण्डं करोति माणवकम्' इत्यत्र वाक्ये माणवकस्य करोतियुक्तत्वाभावात् कर्मणि द्वितीयाया अप्रसङ्ग इत्यत आह — **मुण्डं करोतीति**। ननु यथा 'कटं करोति भीष्मम्' इत्यादौ द्रव्यस्यैवेप्सिततमत्वात् कर्मत्वम्, न तु गुणानामित्युक्तम्, एवमिहापि माणवकस्यैव करोतियुक्तत्वात् कर्मत्वं न्याय्यम्, न तु मौण्डचस्य गुणस्येत्याशङ्कच भाष्यतात्पर्यं दर्शयति — **गुणप्रधानेति**। ननु माणवकस्य कर्मत्वाभावे 'मुण्डयति माणवकम्' इत्यत्र कथं द्वितीया स्यादित्यत्राह — **मुण्डयतेश्चेति**। 'मुण्डं करोति, मुण्डयति' इत्यन्वाख्यानाय प्रकृतिप्रत्ययार्थौ परिकल्पितावेव, तत्त्वतस्तु निरस्तविभागः केशच्छेदवचनो मुण्डयतिरिति तस्य साक्षान्माणवकः कर्मेत्यर्थः। उक्तं च —

[5]'मुण्डिसूत्र्यादयोऽसद्भिर्भागैरनुगता इव।
विभक्ताः कल्पितात्मनो धातवः कुट्टिर्चिवत्॥' इति।

आत्मसंबन्धित्वेनेति। [6]स्वीयत्वेन करोतीत्यर्थः। माणवकस्येषिकर्मत्वमुपपादयति — **माणवकस्येति**। ननु यथा सापेक्षत्वात् 'माणवकं मुण्डमिच्छति' इत्यत्र क्यज् न भवति, एवं णिजपि न स्यादिति

---

[1] तदर्थे प्रतीतिः — ङ.
[2] प्रदीपे 'सिद्धानां च शब्दानाम्' इत्यत्र 'प्रयुक्तानां च शब्दानाम्' इति पाठोऽभिमत इति भाति।
[3] वाक्यपदीयम् ३.१४.६९—७१.
[4] प्रदीपे 'अन्तर्भावयितुं शक्नोति' इत्यत्र 'अन्तर्भावयितुं शक्तः' इति पाठोऽभिमत इति ज्ञायते।
[5] वाक्यपदीयम् ३.१४.६८.
[6] स्वार्थत्वेन करोतीत्यर्थः — ङ.

किंभूतोऽयं परिहार इत्यत्राह — **वचनसामर्थ्यादिति**। [1]'मुण्डमिश्र' इति वचनसामर्थ्यादित्यर्थः। 'न चैव ह्यर्थाः' इत्यत्र 'यद्यपि' इति, 'क्रियावचनता च गम्यते' इत्यत्र 'तथापि' इति चाध्याहृत्य भाष्यं योजयति — **यद्यपीति**। 'नेदमुभयम्' इत्यादिनोक्तात् परिहारात् 'मुण्डविशिष्टेन च' इति परिहारस्य भेदं विशदयितुमाह — **पूर्वस्मिन्निति**। अस्मिन् परिहारेऽनाश्वासात् पक्षान्तरोक्तिरिति दर्शयितुमाह — **अनेनैवेति**। अगमकत्वमुपपादयितुमाह — **तदुक्तमिति**। **सदपीति**। इच्छाक्यजन्तार्थस्य पुत्रैषणाया माणवकादि कर्म विद्यमानमपि तदाचारक्यचापहृतत्वाद्वाक्येनैव प्रतिपाद्यम्। 'पुत्रीयति माणवकम्' इति ह्युक्ते पुत्रमिवाचरतीत्याचारार्थः प्रतीयते। अतः क्यजन्तादर्थान्तरप्रतीतेरिच्छाप्रतिपादनाय वाक्यमेव प्रयोक्तव्यम् — पुत्रमिच्छति माणवकमिति। कुतः **अतः** वाक्यादेव [2]तस्यार्थस्य **व्यक्तेः** प्रतीतेः, न तु प्रत्ययान्तादित्यर्थः। दृष्टान्तच्छलेनान्यदप्येतत् सदृशं [3]प्रसङ्गाद्व्युत्पादयति — **यथाभ्यासः क्रमादिष्विति**। यथा क्रमादिषु धातुषु यङि कृते 'चङ्क्रम्यते, [4]'जङ्गम्यते, लोलुप्यते' इत्यादौ गतिकौटिल्यस्य भावगर्हायाश्च प्रतीतेः, **अभ्यासः** पौनःपुन्यम्, क्रियासमभिहार इति यावत्। स वाक्यवाच्य एव — पुनःपुनः क्रामति, भृशं क्रामतीति, न यङन्तवाच्यः, अतस्तदप्रतीतेरित्यर्थः। एतच्च —

> [5]"आक्षेपाच्च प्रयोगेण विषयान्तरवर्तिना।
> सदपीच्छाक्यचः कर्म वाक्य एव प्रयुज्यते॥
> प्रसिद्धेन [6]हृतः शब्दो भावगर्हाभिधायिना।
> अभ्यासे तुल्यरूपत्वान्न यङन्तः प्रयुज्यते॥'

इति हरिणा श्लोकद्वयेनोक्तमेकेन श्लोकेन टीकाकृता दर्शितमिति द्रष्टव्यम्। **इच्छाक्यजन्तादिति**। जीवत्यादिवदिच्छाक्यजन्तस्याकर्मकत्वात् कर्मणि लाद्यनुत्पत्तिः समर्थिता। इदानीं प्रकारान्तरेण तदुत्पत्तिमाशङ्कत इत्यर्थः। प्रकारान्तरमुपपादयितुमाह — **तथा हीति**। **निर्भुक्तेति**। इषिक्रियापेक्षः कर्मभावः निर्भुक्तः कबलीकृतो येन तस्येत्यर्थः। उक्तमेवार्थं विशदयति — **अयमर्थ इति**। ननु यदा कर्मप्रत्ययेन विग्रहस्तदा कर्मणि लादयः स्युरिति चेत्, नेत्याह — **प्रत्यये त्विति**। **अकारादयो दशेति**। मातृकापाठापेक्षयैतदुक्तम्। **सप्तानामिति**। अ आ इ ई उ ऊ ऋ इत्येतेषाम्। **मतभेदप्रदर्शनायेति**। न त्वसौ सिद्धान्तः, अत एव 'एके' इत्युक्तम् — केषांचिदेवायं पक्षः, न तु सर्वेषामिति प्रदर्शनायेति [7]भावः॥

---

[1] पा. सू. ३.१.२१.

[2] तस्य तस्यार्थस्य — ङ.

[3] प्रसङ्गेन व्युत्पादयति — ङ.

[4] 'जङ्गम्यते' इति नास्ति — घ.

[5] वाक्यपदीयम् ३. १४. ७२, ७३.

[6] 'कृतः शब्दः' इति वाक्यपदीये पूनामुद्रिते पाठो दृश्यते। 'वृतः शब्दः, हृतः शब्दः' इति च पाठान्तरमधः प्रादर्शि। 'हृतः शब्दः' इत्युद्द्योते समुपलभ्यते।

[7] 'भावः' इत्यस्यानन्तरं 'यत्तु कैयटे समानपदेन दश समाना अकारादयो गृह्यन्त इत्युक्तम्, तन्न, अक्षरपदस्य वैयर्थ्यापत्तेः। तस्मात् समानपदं तुल्यार्थकं बोध्यम्। अतुल्याक्षरव्यावृत्तिमात्रपरत्वे तु वाच्यतीत्यस्यापि सिद्धत्वेन चिन्त्योऽयं कैयटः' इत्यधिकम् — ङ.

काम्यच्च ३.१.९.

[३,५६–५७]

(उद्द्योतनम्) अन्त्यश्चकार [1]'आदौ पठनीय इति नोच्यते, सूत्रविपर्यासप्रसङ्गात् । किं तु ककारस्येत्संज्ञानिरासायान्त एव चकारः कर्तव्य इत्युच्यत इत्याह — **अन्त इति**। फलत आदित्वमुक्तम्, न पाठत इत्यर्थः। फलसिद्धिमेवाह — **तथा हीति**। **चित्कार्य इति**। धातुस्वरेण। उपपूर्वाद्यजेरेवायं विहितः, अत आह — **अयं त्विति**। उपयडिति सुबन्तं शब्दान्तरम्, न तु[2] धातुरित्यर्थः। **कार्यित्वेन** संप्रसारणरूप[3]कार्ययोगित्वेन। उपयट्छब्दस्य छान्दसत्वमाह — **विजिति**। उपशब्द उपपदे यजेर्विच् प्रत्ययश्छन्दसि। **वाक्काम्यतीति**। एतस्य लौकिकत्वेन दृष्टानुविधित्वाभावात् [4]'वचिस्वपि' इति संप्रसारणप्रसङ्ग इत्यर्थः। **पूर्वः** द्विचकारनिर्देशः। **अथवेति**। [5]'वचिस्वपि' इति धातुस्वरूपग्रहणाद् धातोरिति विहितो यः [6]कित् तस्मिन् संप्रसारणम्। [7]अयं तु सुबन्ताद्विहित इति संप्रसारणप्रसङ्गाभावान्न ककारस्येत्त्वमित्यर्थः॥

[३, ५६–५७]

(रत्नप्रकाशः) काम्यचश्चित्त्वं स्वरार्थं तावन्न भवत्येव, धातुस्वरेणेष्टसिद्धेः। ककारस्येत्संज्ञापरित्राणार्थमादितोऽपि चकारो न कर्तव्यः, ककारस्येत्संज्ञायाः प्रयोजनाभावादेव [8]निवृत्तिसंभवादित्याशयेन प्रवृत्तं वार्तिकमवतारयति — **किमर्थश्चकार इत्यादिना**। एतेन '**आदित इति**। अन्तेऽपि कृत आदिकृतफलसंपादनादादितः संपद्यते। तथाहि — [9]यदादौ क्रियते तदा ककारस्यानादित्वादित्संज्ञा न भवति, एवमन्तेऽपि कृतश्चित्कार्येऽन्तोदात्तत्वे सिद्धे नियमार्थः संपद्यते — चिदेवायं व्यपदेष्टव्यः, न त्वनुबन्धान्तरेण किदिति' इति निरस्तम्। काम्यच्चेति प्रकृतसूत्रस्य चिद्व्यपदेशविधायकत्वाभावेन तदभिमतनियमपरत्वासंभवात्। अन्यथा 'चिदेवेति नियमार्थस्तर्हि चकारः कर्तव्यः' इत्येव वक्तव्ये यथाश्रुतभाष्यासंगत्यापत्तेश्च। **उपयट्काम्यतीति**। उपाद्यजेः [10]'विजुपे छन्दसि' इति विच्। अस्माद् भाष्याज्ज्ञायते वप्रत्ययान्तस्य यजेः कुत्वं नेति। 'ऋत्विक्' इत्यत्र तु [11]'ऋत्विग्दधृक्' इत्यत्र निपातनाद् भवति कुत्वम्। **यजादिभ्यो यो विहित इति**। यद्यपि प्रत्यये परे [12]'धातोरेव निर्देशेनोच्यमानं कार्यं तत्प्रत्यये एव भवति' इति परिभाषयात्रापि वारणं संभवति, तथाप्युपायस्योपायान्तरादूषकत्वादेवमुक्तम्। काम्यच्प्रत्ययस्तूपयट्प्रकृतिकसुबन्ताद्विहित इति न संप्रसारणप्राप्तिः। कथंचिदित्संज्ञाकार्यसंभवेऽपि न दोष इत्यभ्युपगमवादेनाह — **अथापीति**। एतेन 'यदा यजादिभिः किन्न विशेष्यते, कार्यित्वेनैव यजादयो निर्दिश्यन्त इति भावः' इति निरस्तम्। तैस्तदविशेषणेऽप्युक्तपरिभाषया कित्कार्यवारणात्।

---

[1] आदौ कर्तव्य इति — अ.
[2] तुशब्दो नास्ति — अ.
[3] कार्ययोगत्वेन — ऋ.
[4] पा. सू. ६.१.१५.
[5] पा. सू. ६.१.१५.
[6] क्विप् — अ.
[7] काम्यजित्यर्थः।
[8] इत्संज्ञाया निवृत्तिसंभवादित्यन्वयः।
[9] यदा, आदाविति छेदः।
[10] पा. सू. ३.२.७३.
[11] पा. सू. ३.२.५९.
[12] परिभाषा ८९.

क्रियते न्यास एवेति। संहितापाठे चकारादिरेव काम्यज् निर्दिश्यते। तेन ककारस्योपदेशे आदित्वाभावादित्संज्ञा नेति भावः। प्रकृतोदाहरणमन्यथापि सिध्यतीत्याह — **छान्दसोऽयमिति**। [1]"विजुपे छन्दसि' इति विचश्छन्दस्येव विधानादिति भावः। 'वाक्काम्यति' इत्यादौ तु [2]प्रागुक्तमेव समाधानम्॥

[३, ५६–५७]

(**नारायणीयम्**) नन्वादौ चकारकरणे सूत्रभेदः कृतः स्यादित्याशङ्कां परिहरन् व्याचष्टे — **अन्तेऽपि कृत इति**। ननु सर्वेष्वित्कार्येषु निराकृतेषु किमुच्यते 'अथापि कथंचित्' इति, तत्राह — **यदा यजादिभिरिति**। **अथवा धातोरिति**। तस्मात् 'इत्कार्याभावात्' इति वार्त्तिकोक्तोऽपि परिहारः स्थितः॥

उपमानादाचारे ३.१.१०.

[३, ५७]

(**उद्द्योतनम्**) ननु कर्मविवक्षायां सूत्रादेवात्र क्यच् सिद्ध इति वार्तिकारम्भो व्यर्थः, अत आह — **उपमेय इति**॥

[३, ५७]

(**रत्नप्रकाशः**) **अधिकरणाच्चेति**। द्वितीयान्तादुपमानात् क्यच्युपमेयाद् द्वितीयैव स्यात्, न तु सप्तमीति [3]ततः सप्तमीलाभायेदं वचनम्॥

[३, ५७]

(**नारायणीयम्**) 'प्रासादीयति' इत्यादौ सूत्रेणासिद्धिमुपपादयति — [4]**कुटचामित्युपमेय इति**। उपमानोपमेययोरेकविभक्त्यन्तत्वनियमात्, यथा 'मधुरायामिव पाटलिपुत्रे प्राकाराः' इति॥

कर्तुः क्यङ् सलोपश्च ३.१.११.

[३, ५८–५९]

(**उद्द्योतनम्**) 'हंसायते' इत्यादौ सलोपप्रसङ्गनिरासायाह — **सलोपेति**। प्रत्ययविधौ पञ्चमी;

---

[1] पा. सू. ३.२.७३.

[2] धातोः कार्यमुच्यमानमिति परिभाषया वारणमिति भावः।

[3] उपमेयादित्यर्थः।

[4] प्रदीपे 'कुटचामिति' इति प्रतीकतया मुद्रणं दृश्यते। 'कुटचामित्युपमेये' इति विशिष्टः कैयटग्रन्थत्वेनाभिमतोऽत्र।

लोपविधौ षष्ठी, तन्त्राद्याश्रयणात्। यद्वा [1]'गापोः' इतिवत् प्रत्ययविधावपि[2] षष्ठी। **सकारेणेति**। 'स' इति लुप्तषष्ठीकं पृथक्पदम्। तेन तदन्तविधिसिद्धिः। [3]'अलोऽन्त्यस्य' इति सकारस्यान्त्यस्य लोपः। शङ्काशयमाह — **एकेति**। **संनियोगेति**। यत्र सलोपसंभवस्तत्रैव क्यङिति संनियोगः। एकवाक्यत्वेनैव संनियोगे सिद्धे तद्द्योतकत्वेन चकारस्योपयोगकथनमात्रमेतत्। एवं समाधानेऽपि भिन्नवाक्यत्वेनैवेष्टसिद्धौ चकारस्यान्वाचयः [4]प्रयोजनमिति ज्ञेयम्। **न त्विति**। लोकेऽपि 'पयायते, ओजायते' इति प्रयोगस्येष्टत्वादिति भावः। **आचारेति**। आचार इति प्रकृतत्वादित्यर्थः। व्याख्याने बीजमाह — **धातुपाठ इति**। गल्भ धाष्टर्ये, क्लीबृ अधाष्टर्ये, होडृ अनादरे, भ्वादयः। तथा चात्र क्रियाशब्देनाचारविवक्षेति भावः। भाष्ये **क्रियावचनता** आचारवचनता। सा वचनं विनापि गम्यत इत्युक्तम्। तत्र [5]हेतुमाह — **अनेकार्थत्वादिति**। सुबन्तात् क्विपि शपि [6]शबकारस्य पररूपासंभवात् 'अश्वति' इत्याद्यसिद्धिमाशङ्क्याह — [7]**प्रातिपदिकादिति**। तल्लाभे हेतुमाह — **एतच्चेति**। प्रातिपदिकादेवेत्येतदित्यर्थः। एवं च 'राजानति' इत्यत्र नलोपाभावः 'अञ्चति' इत्यत्र कुत्वाभाव इत्यादि ज्ञेयम्। ननु गल्भादेः पचाद्यजन्तानां वार्तिके पाठात् कथमनुदात्तत्वम्, अत आह — **वाक्य इति**। 'आचारेऽवगल्भक्लीब[8]होडेभ्यः' इति वार्तिक इत्यर्थः। इत्संज्ञासिद्ध्यर्थमाह — [9]**अनुनासिकत्वेति**। अनुदात्तत्वानुनासिकत्वे क्विप्संनियोगेन[10] निपात्येते। तेन गल्भायत इति क्यङि [11]दीर्घसिद्धिः॥

[३, ५८–५९]

(रत्नप्रकाशः) कर्तुरिति सलोपापेक्षया स्थानषष्ठीति सलोपः प्रधानम्, तत्संनियोगेन तु क्यङ विधीयत इति मन्यमान आह — **सलोपसंनियोगेनेति**। कर्तुरिति क्यङपेक्षया पञ्चमी। तथा च क्यङेव प्रधानशिष्ट इति समाधत्ते — **प्रधानशिष्ट इति**। **यत्र [च] सकारं पश्यसीति**। तत्र तस्य लोपं च कुर्विति शेषः। मतभेदमपाणिनीयमुपेक्षार्हं निदर्शयति — **अपर आहेति**। प्रासङ्गिकं मतान्तरनिरूपणं समाप्य सिद्धान्तवार्तिकं पठति — **आचारेऽवगल्भेति**। **अवगल्भत इति**। गल्भ अ इत्यकारान्तरं प्रश्लिष्य तस्यानुदात्तत्वानुनासिकत्वे प्रतिज्ञायेते इत्यात्मनेपदलाभः। एवं 'क्लीबते, होडते' इत्यत्रापि ज्ञेयम्। **किंप्रयोजनमिति**। 'आचारे' इत्यादिवार्तिकमिति शेषः। 'नैतदस्ति' इति वक्ष्यमाणोऽभिप्रायः। **क्रियावचनता यथा** [12]**स्यादिति**। सत्यां हि तस्यां [13]'क्रिया-

---

[1] पा. सू. ३.२.८.

[2] अपिशब्दो नास्ति — ऋ.

[3] पा. सू. १.१.५२.

[4] द्योत्यतयेति भावः।

[5] एतेन प्रदीपे 'आचारक्रियावृत्तित्वस्य सिद्धत्वादित्यर्थः' इति पाठोऽन्नंभट्टाभिसंहित इति प्रतीयते। कोशेषु तु 'आचारक्रियावृत्तित्वस्यासिद्धत्वादित्यर्थः' इत्युपलभ्यते।

[6] शकारस्य — अ, ऋ, लृ.

[7] 'प्रातिपदिकादिति' इत्यादि 'हेतुमाह' इत्यन्तं नास्ति — अ.

[8] होडृभ्य इति — अ, ऋ, लृ.

[9] 'अनुदात्तत्वानुनासिकत्वे' इत्यत्र पृथक्कृत्य प्रतीकग्रहणं बोध्यम्।

[10] अकारान्तरं पररूपेण प्रश्लिष्येति भावः। उद्द्योते चेदं स्पष्टम्।

[11] हलन्तत्वे दीर्घत्वं न स्यादित्यतः पचाद्यजन्तात् क्यङिति भावः।

[12] भाष्ये 'यथा गम्येत' इत्यत्र 'यथा स्यात्' इति पाठान्तरं हरयाणामुद्रितेऽधो निर्दिष्टम्।

[13] इदं मतं भूवादयो धातव इति सूत्रे भाष्ये प्रतिपादितम्।

वचनो धातुः' इति मते धातुसंज्ञायां ततो लादयो यथा स्युरित्येवमर्थमिति भावः। वस्तुतस्तु धातुसंज्ञा यथा स्यादिति तस्यार्थो ज्ञेयः। [1]भ्वादयो धातवः, [2]सनाद्यन्ता धातवः, इत्येव हि पाणिनिसंमतम्। **धातव एवेति**। गल्भ धाष्टर्च्ये, क्लीबृ अधाष्टर्च्ये, होडृ अनादरे, इत्यनुदात्तेतो भ्वादौ पठ्यन्ते। धातवश्चानेकार्था इत्याचारेऽपि तेषां वृत्तिः। [3]उपमानोपमेयभावेनाप्यनादरादय एवार्था भासन्त इत्याचारे वृत्त्यभावेऽपि न दोष इति भावः। **न चैव हीति**। क्विप्प्रत्ययविधानमात्रेण तेषामविद्यमानं सामर्थ्यं न संपाद्यत इति भावः। **क्रियावचनतेति**। स्वाभाविकीति शेषः। **अवगलभाञ्चक्र इति**। अनुबन्धानामनेकान्तत्वादनेकाच्त्वस्य विशेषणत्वाच्च गल्भादिभ्य आम् न प्राप्नोति। सत्यस्मिन् वचनेऽकारान्तरस्यानुबन्धस्य प्रश्लेषादनेकाच्त्वेनाम् सिध्यतीति भावः। **सर्वप्रातिपदिकेभ्य इति**। अविरोधादिदं मतं संगृहीतमेव। प्रातिपदिकग्रहणात् प्रातिपदिकादेव क्विप्। तेन 'अश्वति' इत्यादौ शबकारे परे [4]'अतो गुणे' इति पररूपं सिध्यति। 'राजानति' इत्यादौ नलोपाद्यभावश्च। **आत्मनेपदार्थानिति**। अन्यथा 'अवगल्भति, अवगल्भाञ्चकार' इत्याद्यनिष्टं स्यादिति भावः॥

[३, ५८–५९]

(नारायणीयम्) ननु कर्तृवाचिन उपमानात् सुबन्तादाचारे क्यङ भवति, प्रकृतिगतस्य सकारस्य च लोप इति सूत्रार्थः स्यात्। ततश्च 'हंसायते' इत्यादावपि सलोपः स्यादित्याशङ्क्य समीचीनं सूत्रार्थं दर्शयति — **सलोपविधाविति**। इह वाक्यभेदेन क्यङसलोपौ विधीयेते इति वक्ष्यते। तत्र द्वितीये वाक्ये पूर्वत्र पञ्चम्यन्तमपि 'कर्तुः' इत्येतद् अर्थात् षष्ठयन्ततया विपरिणम्यते। 'स' इति पृथक् पदं लुप्तषष्ठीकमिति तेन कर्तुविशेषणात् तदन्तविधौ सत्यतिप्रसङ्गाभाव इत्यर्थः। **एकवाक्यतामिति**। कर्तुः क्यङसलोपौ भवत इत्येको भवतिरध्याह्रियते। अत एव समुच्चयार्थश्चशब्द इत्याह — **संनियोगार्थं चेति**। लक्ष्यानुसारित्वाल्लक्षणस्य वाक्यभेदोऽत्राश्रीयत इति परिहारवादिन आशयं दर्शयति — **वाक्यभेदमिति**। **न त्वयं स्थित इति**। 'पयायते' इत्यादेरपीष्टत्वात्। अत्राभियुक्तवचनं प्रमाणमाह — **इत्याहुरिति**। **आचारलक्षणेति**। धातुपाठे पाठाद् धाष्टर्च्याद्यर्थतैवावगल्भादीनां स्यात्। आचारार्थताप्रतिपत्त्यर्थं तु वार्तिकमित्यर्थः। ननु सुप इत्यधिकारे विधानादश्वादिभ्यः सुबन्तेभ्यः क्विपा भाव्यम्। ततश्च सुब्लुकि प्रत्ययलक्षणेन पदत्वात् 'अश्वति' इत्यादौ शबकारेण पररूपं न स्यादित्यत आह — **प्रातिपदिकादेवेति**। **एतच्चेति**। प्रातिपदिकग्रहणसामर्थ्यात् प्रातिपदिकादेव क्विप्, न तु सुबन्तादित्यर्थो लभ्यते॥

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ३.१.१२.

[३, ६०–६४]

(उद्द्योतनम्) एकवाक्यतया शङ्केत्याह — [5]**हलेति**। हल इति पञ्चमीबहुवचनान्तत्वेन विप-

---

[1] पा. सू. १.३.१. भूवादय इत्यत्र वकारं विहायानुवादः।

[2] पा. सू. ३.१.३२.

[3] 'उपमानोपमेय' इत्यतः 'न चैव हीति' इत्यन्तं नास्ति — ब.

[4] पा. सू. ६.१.९७.

[5] इहेति — अ; हलि चेति — ऋ.

रिणतस्य भृशादिविशेषणत्वम्, एकवचनस्यैव वा 'अच्वेः' इतिवत् प्रत्येकं संबन्धः। वाक्यभेदेन सर्वेभ्यः [1]क्यङनङ्गीकारे भृशादिषु भृशचपलपण्डितादिपाठोऽनर्थकः स्यादित्याह — **अन्यथेति**। [2]शुचिसंग्रहाय 'अदन्तानाम्' इति त्यक्त्वा 'अहलन्तानाम्' इत्युक्तम्। अत्राभूततद्भावाभावमाह — **ये [रात्रौ] भृशा[3] इति**। रात्रौ हिंसका लोका इत्यर्थः। [4]केवलच्व्यन्तस्य प्रयोगाभावात् 'च्विना' इति सहार्थे तृतीयेत्याह — **च्विसहचरितेनेति**। ननु वचनादप्युक्तार्थानामप्रयोग[5] इति न्यायात् कथं प्रत्यय इति शङ्कां निराह — **अप्रयुक्त एवेति**। यद्यपि पटपटाभवतीत्यत्र [6]भवतिप्रयोगे डाच्, तथापि क्यष्स्थले [7]भवतिप्रयोगं विनापि तदर्थविवक्षायां डाचं विधाय तस्माद् भवत्यर्थे क्यष् विधेय इति न न्यायविरोध इत्यर्थः। भाष्ये **अक्रियमाणम्** अभूततद्भावग्रहणम्। **क्रियमाणम्** अच्वेरिति। **दोषद्वयस्येति**। पर्युदासलाभाय 'अच्वेः' इति वक्तव्यम्। तेनाभूततद्भावलाभ इत्यर्थः। अभ्यादीनां मनसा समस्तत्वात् प्रकृतिविशेषणत्वमेवेति कोटचन्तराभावात् कथं विचारः, अत आह — **यदेति**। वक्ष्यमाणार्थसिद्धचर्थमाह — **मनश्शब्दश्चेति**। फलितमर्थमाह — [8]**मनस्वीति**। वृत्तिविषय एव मनश्शब्दस्य तद्वति वृत्तिं विनापि प्रत्ययार्थविशेषणत्वमाह — **अन्ये त्विति**। अत्र विषये 'सुमनायते' इत्यादौ शोभनं यथा तथा [9]प्राप्नोति, अन्यथा प्रत्ययार्थविशेषणत्वानुपपत्तेः। [10]एवमुदादीनामपि ज्ञेयम्। **बहुव्रीहिरिति**। सुमना भवतीत्याद्यर्थे क्यङित्यर्थः। **ते** स्वादयः। प्रत्ययार्थविशेषणत्वेऽपि [11]प्राक्पाठाङ्गीकारादाह — **प्रकृतेरवयवा इति**। प्रकृतेरित्यवयवसंबन्धे [12]षष्ठी, प्राक्त्वं चावयवान्तरापेक्षयेति भावः। निघातमुपपादयति — **मनश्शब्दादिति**। पक्षान्तरे [13]नायं दोष इत्याह — **प्रकृत्यर्थेति**। प्रकृत्यर्थविशेषणत्वे दोषान् [14]भाष्योक्तानुपपादयति — **उपसर्गस्य त्विति**। ननु 'सङ्ग्राम युद्धे' इति [15]चुरादावखण्डः सङ्ग्रामशब्दो युद्धार्थो धातुः पठितः। तत्रोपसर्गाभावात् कथं नियमार्थत्वम्, अत आह — **ग्रामशब्द एवेति**। **सामान्यत इति**। यथा 'प्रतिष्ठते' इत्यत्र प्रस्य तिष्ठतेर्गतिद्योतकत्वम्, एवं ग्रामशब्दस्यार्थान्तरनिवृत्तिं कुर्वन् संशब्दो युद्धरूपक्रियाविशेषद्योतक इत्यर्थः। [16]उपसर्गत्वे लाभमाह—

---

[1] क्यङनङ्गीकारेण भृशादिषु — लृ.

[2] यद्यपि कौमुद्यां गणपाठे भृशादौ 'शुचिस्, शुचिवर्चस्' इति दृश्यते। अजन्तेष्वकारान्ता एव भृशचपलादयः समुपलभ्यन्ते। तथापि गणरत्नमहोदधौ शुचिशब्दः श्लोके पठितः, शुचीयत इत्युदाहृतश्च। तदत्राभिसंहितः स्यादिति भाति। अत्र कोशेषु न शुद्धः पाठ उपलभ्यते — ञग्रहग्रहाय — अ; ग्रुसंग्रहाय — ऋ; ञिग्रुसंग्रहाय — लृ. इत्येवं दृश्यते। अर्थानुगुण्येन 'शुचिसंग्रहाय' इत्यूह्यते।

[3] प्रदीपे 'भृशालोकाः' इति समस्ततया पाठो दृश्यते। अधिकालोका इत्यर्थोऽप्युच्यते नागेशेन। 'भृशा आलोकाः' इति निर्णयसागरमुद्रिते पाठान्तरतयाधो निर्दिष्टम्। 'भृशा लोकाः' इत्यन्नंभट्टपाठः स्यादिति भाति। 'भृशु अधःपतने' इति धातोरन्तर्भावितण्यर्थात् इगुपधेति कप्रत्यये भृशशब्दो निष्पन्नो अधःपातनार्थकतया हिंसकार्थको व्याख्यात इति प्रतीयते।

[4] केवलस्य च्व्यन्तस्य — ऋ.

[5] महाभाष्ये १.१.४४.

[6] भवतिक्रियायोगे — अ.

[7] भवतिक्रियायोगं — अ.

[8] सुष्ठिवति — लृ.

[9] प्राप्नोतीत्यनन्तरम् 'इत्यर्थः' इति शेषो बोध्यः।

[10] एवमदादीनामपि — अ, ऋ, लृ.

[11] प्राक्पाठाङ्गीकारमाह — अ.

[12] 'षष्ठी' इति नास्ति — ऋ.

[13] सोऽयं — अ, ऋ, लृ.

[14] भाष्यानुक्तान् — ऋ.

[15] चुरादिष्वखण्डः — ऋ, लृ.

[16] उपसर्गत्वलाभमाह — अ; उपसर्गत्वलाभार्थमाह — ऋ, लृ.

तथा चेति। अनुपसर्गत्वे तु विकल्पो न स्यादित्याह — **उपसर्गेति**। 'शब्दान्तरावयवे' इति बहुव्रीहिः। विकल्पे च 'सङ्ग्रामयतेः सोपसर्गात्' इति भाष्यकारवचनमेव मानम्। तस्यैव प्रयोजनकथनमेतत्। तर्हि 'सङ्ग्रामयते' इति संपूर्वस्यैव प्रयोगार्थं [1]संग्रहणोपपत्तेः [2]कथमुक्तनियमलाभः, अत आह — **तत्रेति**। **नियमार्थः** भाष्योक्तनियमार्थः। नियमेन फलितमाह — **नियमार्थत्व इति**। **प्रत्ययोत्पत्तौ** क्यङुत्पत्तौ। [3]**उपसर्गाः** [4]अभ्यादयः। **धातौ** क्यङन्तधातौ। ननु भाष्ये प्रत्ययार्थविशेषणत्वमपि स्थापितम्। तत्राभूततद्भावस्य कथमन्वयः, अत आह — **प्रत्ययार्थेति**। **विरोधादिति**। मनस्वी सुष्ठु भवति, मनः शोभनं प्राप्नोतीति वा तस्मिन् पक्षे 'सुमनायते' इत्यस्यार्थः। तत्राभूततद्भावस्यान्वययोग्यता नास्तीत्यर्थः। तथा च भृशादावेव तस्यान्वय इति भावः। आत्मनेपदं साधयति — **अनुदात्तेदिति**॥

[३, ६०–६४]

(रत्नप्रकाशः) [5]'कर्तुः क्यङ सलोपश्च' इत्यत्र सलोपस्य प्राधान्यं क्यङोऽन्वाचयशिष्टत्वं चाशङ्कितं यथा तथात्रापि हल्लोपस्य प्राधान्यं क्यङोऽन्वाचयशिष्टत्वमाशङ्कनीयमिति मन्यमानः कश्चिदाह — **हलो लोपसंनियोगेनेति**। लोपशब्दस्य संबन्धिशब्दत्वात् सापेक्षत्वेऽपि समासः। एतेन 'हला भृशादयो विशेष्यन्ते। तेन हलन्तानामेव क्यङलोपाभ्यां भवितव्यमित्यर्थः' इति निरस्तम्। प्रायेण भृशादीनां साक्षात् सूत्रे निर्दिष्टस्य भृशशब्दस्य [6]चादन्तत्वेनातिमूर्खेणापि 'हला भृशादयो विशेष्यन्ते' इति वक्तुमशक्यत्वेन तद्भाष्यस्य तदर्थकत्वायोगात्। मदुक्तरीत्या तद्भाष्यस्योपपन्नत्वाच्च। **प्रधानशिष्ट इति**। भृशादिभ्य इति पञ्चमीनिर्देशबलात् क्यङेव प्रधानशिष्ट इति सर्वैरवगन्तुं शक्यत इति हलो लोपस्य प्रधानशिष्टताशङ्कातिमन्दा। कर्तुरित्यस्य तु षष्ठचन्ततापि संभवतीति सलोपस्य प्रधानशिष्टताशङ्का युज्यत इति भावः। **हलं पश्यसीति**। हलन्तं पश्यसीत्यर्थः। तस्य लोपः [7]कर्तव्य इति शेषः। **क्व दिवा भृशा भवन्तीति**। ये रात्रौ भृशाः प्रकटा भवन्ति, ते दिवसे क्व भृशा भवन्ति, न क्वचिदित्यर्थः। **च्विनोक्तत्वादिति**। च्विसहचरितेन भवतिनोक्तत्वादित्यर्थः। **डाचि वचनप्रामाण्यादिति**। डाजन्तात् [8]क्यषविधानसामर्थ्येन भवनयोगे विषये सति डाज् विधीयते। ततः पक्षे [9]क्यष् भविष्यति, [10]क्यषभावपक्षे भवतेः प्रयोगो भविष्यतीति भावः। **स इति**। अक्रियमाणस्य चोदनं [11]क्रियमाणस्य प्रत्याख्यानं चेत्यर्थः। प्रतिनिर्देशानुसारेण पुँल्लिङ्गता। **सूत्रभेद इति**। भिद्यतेऽनेनेति भेदो दोषः। बाहुलकात् करणे घञ्। **कृतो भवतीति**। उक्तो भवतीत्यर्थः। **च्विप्रतिषेधादिति**। च्व्यन्तपर्युदासादित्यर्थः। **अन्यस्मिन्निति**। च्व्यन्तादिति शेषः। **च्विसदृश इति**। च्व्यन्तसदृश इत्यर्थः। **अभूततद्भाव इति**। अभूततद्भावविषयक इत्यर्थः। ननु नञिवयुक्तन्यायं ज्ञात्वैव

---

[1] समित्यस्य ग्रहणेत्यर्थः।

[2] कथं नियमलाभः — अ.

[3] प्रदीपे 'उपसर्गः पृथक् क्रियते' इत्यत्र 'उपसर्गाः पृथक् क्रियन्ते' इत्यन्नंभट्टपाठ इति भाति।

[4] अन्वादयः — अ, ऋ, लृ.

[5] पा. सू. ३.१.११.

[6] चकारो नास्ति — प.

[7] कर्तव्य इतीति शेषः — प, ब.

[8] क्यङविधान — प, ब.

[9] क्यङ — प. ब.

[10] क्यङभावपक्षे — प, ब.

[11] क्रियमाणप्रत्याख्यानं — ब.

तस्यात्राप्रसक्तिः, 'अच्वेः' इति पदेन [1]च्व्यन्तवारणासंभवादिति दूषण आपादिते तेनैव न्यायेन कथं समाधानं युज्यत इति चेन्न, च्व्यन्तात् क्यङः प्रसक्त्यभावेऽपि च्व्यन्तभिन्नानां च्व्यर्थानां ग्रहणार्थमेव 'अच्वेः' इति पर्युदासाश्रयणात्। यद्युच्येत — तथापि 'अच्वेः' इति नञ्निर्देशो व्यर्थ एव, च्वावित्येव च्व्यर्थपरतया निर्देशसंभवादिति। तर्हि डाजिव च्विरपि कृभ्वस्तियोगे विषये सति विधीयत इति च्व्यन्तादपि डाजन्तादिव क्यष् स्यात्। तन्मा भूदिति 'अच्वेः' इत्युक्तमिति संतोष्टव्यम्। विचारान्तरमारभते — **इहेति**। अत्र [2]धातुसंज्ञानिमित्तप्रत्ययप्रकरण इत्यर्थः। **भृशादिष्विति**। उपलक्षणमिदमस्य प्रकरणस्य। तेन [3]'आचारेऽवगल्भ' इति वार्तिकस्थावगल्भशब्दस्यापि संग्रहो भवति। **अभिभवताविति**। सुबन्तान्मनःशब्दप्रकृतिकाद् अभिभवादिष्वर्थेषु क्यङ स्यादित्यर्थलाभस्तस्मिन् पक्ष इति भावः। तत्र द्वितीयान्तादभिभवे, अन्येषु तु सप्तम्यन्तात् क्यङ। एतेन 'मनश्शब्दो वृत्तिविषये तद्वति वर्तते। मनस्वी सुष्ठु भवति, उद्भवति, दुष्ठु भवति, आभिमुख्येन भवतीत्यत्रार्थे क्यङ्विधिः' इति निरस्तम्। स्वार्थपरमेव मनश्शब्दमाश्रित्योपपादने बाधकाभावात्। **प्रकृत्यर्थविशेषणमिति**। अभ्यादीनां मनश्शब्देन बहुव्रीह्याश्रयणात् तदुपपत्तिः। मध्यस्थः कश्चिदुक्तविचारमनुमोदते — **युक्तं पुनरिति**। युक्तमेवेत्यर्थः। अन्यस्तदयुक्तमिति शङ्कते — **नन्विति**। **प्रागभवतेः पठ्येरन्निति**। अभिभवतावित्याद्युक्तप्रकारेणेति शेषः। **भृशादिमात्रादिति**। विनिगमनाविरहादिति भावः। **कश्चात्र विशेष इति**। कस्मिन् पक्षे को विशेष इत्यर्थः। **निघात इति**। अभ्यादेः पदात् परस्य 'मनायते' इत्यस्येति शेषः। **स्वमनायतेति**। 'असुमनायत' इत्यनिष्टं स्यादिति भावः। **सुमनाय्येति**। 'सुमनायित्वा' इत्यनिष्टं स्यादिति भावः। **अभिमिमनायिषत इति**। 'अबिभिमनायिषते' इत्यनिष्टं स्यादिति भावः। **अवश्यमिति**। 'ग्राम युद्धे' इत्युक्तेऽपि केवलस्य ग्रामशब्दस्य युद्धेऽवर्तमानत्वेन संग्रामशब्दाण्णिचः सिद्धत्वात् 'संग्राम युद्धे' इति गुरुनिर्देशो विशिष्टाण्णिज्विधानार्थः सन् नियमार्थः संपद्यत इति भावः। **असंग्रामयतेति**। 'सङग्राम अ' इत्यकारान्तरं प्रश्लिष्यानुदात्तेत्त्वाश्रयणात् तङ। **सोपसर्गादिति**। उपसर्गसाम्येनोपलभ्यमानपूर्वपदयुक्तादित्यर्थः। धातुसंज्ञानिमित्तप्रत्यय इति शेषः। **उपसर्गस्य** उपसर्गसरूपस्य। **पराङ्गवद्भावमिति**। परस्य क्यङाद्यन्तप्रकृतिकस्याङ्गत्वमित्यर्थः। परशब्देन क्यङादिप्रकृतिरेव गृह्यत इति मन्यमानः शङ्कते — **यदीति**। [4]यक्षानुरूपबलिन्यायेनाह — **स्वरविधाविति वक्ष्यामीति**। **एवं च कृत्वेति**। स्वरविधावित्युक्तमिति कृत्वेत्यर्थः। अनुपसर्गात् क्यङादिविधिः समान एवेति पक्षद्वयमपि युक्तमेवेति भावः। **प्रत्ययार्थविशेषणमपीति**। न कोऽपि दोष इति शेषः। यद्यपि प्रत्ययार्थविशेषणपक्षे 'स्वरे' इति न वक्तव्यमिति भवति लाघवम्, तथापि तत्पक्षे क्लिष्टकल्पना भूयसी, प्रकरणविरोधश्च भवतीति प्रकृत्यर्थविशेषणपक्ष एव युक्तः। आश्रितश्च स एव वृत्तिकारादिभिः। अस्मिन् पक्षे पराङ्गवद्भाव इत्यत्र परशब्देन क्यङादिप्रकृतिरेव गृह्यते, औचित्यात्॥

[३, ६०–६४[

(नारायणीयम्) नन्वेकविषयत्वे संनियोगशासनमुपपद्यते। क्यङ्लोपयोस्तु नैकविषयत्वम्,

---

[1] च्विनोक्तत्वादेव तत्र क्यङः प्रसक्त्यभाव इत्युक्तत्वादिति भावः।

[2] धातुसंज्ञाया निमित्तभूताः प्रत्ययाः सनादयः,

तत्प्रकरण इत्यर्थः।

[3] का. वा. ३.१.११–३.

[4] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

हल्विषयत्वाल्लोपस्य, सुबन्तविषयत्वाच्च क्यङ इत्यत आह — [1]**हलेति**। एकवाक्यतयान्वयं मन्यते। हल इति च पञ्चमी, प्रत्येकं संबन्धादेकवचनम्, यथा 'अच्वेः' इति। तेन हलन्तेभ्यो भृशादिभ्यः क्यङ, लोपश्च तेषामेव विज्ञायते। **हलन्तानां लोप इति**। लोपविधौ भृशादिभ्य इत्येतत् षष्ठ्यन्ततया विपरिणम्यते। हला च भृशादयो विशेष्यन्ते। तत्र तदन्तविधौ सति हलन्तानां भृशादीनां लोप इत्यर्थोऽवतिष्ठत इत्याशयः। ननु संभवत्येकवाक्यत्वे वाक्यभेदस्यानिष्टत्वात् तदाश्रयणमयुक्तमित्याशङ्क्य तत्र प्रमाणमाह — **अन्यथेति**। अहलन्तपाठान्यथानुपपत्त्या वाक्यभेदोऽत्र विज्ञायत इत्यर्थः। अभूततद्भावाभावं प्रदर्शयितुं प्रत्युदाहरणार्थमाह — **ये [रात्रौ] भृशालोका इति**। भृशप्रकाशा ग्रहनक्षत्रादयो ये रात्रौ दृश्यन्ते त इत्यर्थः। ननु भवत्यर्थे च्वेरविधानात् कथं च्विना भवत्यर्थस्योक्तत्वमुच्यत इत्यत आह — **च्विसहचरितेनेति**। च्विशब्देन साहचर्याद् भवतिर्लक्ष्यत इत्यर्थः। यदि वचनप्रामाण्यात् [2]क्यष्प्रवृत्तिरङ्गीक्रियते तदा भवतिना भवत्यर्थ उक्तेऽपि ङ्याजन्तात् [3]क्यष् भवतीति [4]कथितं स्यात्। ततश्च भवतेः प्रयोगः स्यादेवेत्यत आह — **अप्रयुक्त एवेति**। **दोषद्वयस्यापीति**। अभूततद्भावग्रहणं न कर्तव्यम्, च्विप्रतिषेधानर्थक्यं च न भवतीत्यर्थः। पक्षद्वयस्योत्थानं दर्शयन् विचारमुपपादयति — **यदा मनःशब्देनेति**। **अन्ये त्विति**। ^अस्मिन् पक्षे मनश्शब्दः स्वार्थ एव वर्तते, न तद्वति, तदाह — **मनः कर्मेति**। द्वितीयं पक्षं दर्शयति — **यदा त्विति**। शोभनं मनो यस्य स सुमनाः, सुमना भवति सुमनायते। एवमन्यत्रापि द्रष्टव्यम्। ननु प्रकृतेः प्राक् पाठो न प्रकृत्यर्थविशेषणत्वे हेतुः। प्रकृतेः प्राक् पठितानां [5]प्रकृत्यनन्तर्गतत्वेन प्रत्ययार्थविशेषणत्वस्यापि संभवादित्यत आह — **प्रकृतेरेवेति**। प्रकृतेरित्यवयवावयविसंबन्धे षष्ठी। प्राकृत्वं चावयवान्तरापेक्षयेति भावः। स्वरदोषमुपपादयति — **मनश्शब्दादिति**। द्वितीयं वार्तिकं व्याचष्टे — **उपसर्गस्य त्विति**। ल्यब्द्विर्वचनयोर्दोषं स्फोरयति — **क्यङन्ते चेति**। ननु सोपसर्गस्यैव ग्रामेर्युद्धार्थत्वं, न केवलस्येति सोपसर्गपाठस्य संभवात् कथं नियमार्थत्वमित्यत आह — **ग्रामशब्द एवेति**। ननूपसर्गसदृशावयवान्तरवत्त्वसंभवेन सोपसर्गत्वे प्रमाणाभावात् तथा पाठः स्यादित्यत्राह — **तथा चेति**। नन्वेवमप्युपसर्गप्रयोगस्याव्यभिचारप्रदर्शनाय 'संग्राम' इति पाठः स्यादिति, नेत्याह — **संशब्दस्त्विति**। नियमे सति प्रकृते कथं दोषाभाव इत्यत्राह — **नियमार्थत्वे चेति**। **विरोधादिति**। अत्र पक्षे मनस्वी सुष्ठु भवतीत्यादिरर्थः। तत्राभूततद्भावस्य विरोध इत्यर्थः॥

लोहितादिडाज्भ्यः क्यष् ३.१.१३.

[३, ६४–६७]

(उद्द्योतनम्) चुरणतुरणशब्दौ कण्ड्वादी, [6]आभ्यां [7]यगन्ताभ्यामुप्रत्ययसिद्धये 'याच्छन्दसि' इत्येव वक्तव्यमिति भाष्यार्थः। 'उरुया, धृष्णुया' इत्यत्र यकारस्याकित्त्वमाह — **सुपामिति**। **यत्प्रत्यय इति**। तस्मिन् परतो रीङादेशे [8]'यस्य' इति लोपे पित्र्यमिति सिध्यति। ननु रीङ-

---

[1] इह हलेति — घ.

[2] क्यज्निवृत्तिरङ्गीक्रियते — ङ.

[3] क्यज् भवतीति — ङ.

[4] क्रथितः स्यात् — ङ.

[5] प्रकृत्यनवयवत्वेन — ङ.

[6] ताभ्यां — ऋ, लृ.

[7] 'यगन्ताभ्याम्' इति नास्ति–ऋ, लृ; यञन्ताभ्याम् — अ.

[8] पा. सू. ६.४.१४८.

विधौ क्ङिद्ग्रहणं निवर्तत इत्युक्ते 'असूया' इत्यत्र किमनिष्टमापाद्यते, अत आह — **यदीति**। दीर्घविधौ क्ङिद्ग्रहणानुवृत्त्यङ्गीकारेऽत्र दीर्घो न स्यादित्यापाद्यत इत्यर्थः। **पूर्ववदिति**। [1]'सुपां सुलुक्' इति तृतीयास्थाने यादेश इत्यर्थः। उत्तरतात्पर्यमाह — **असूयतेरिति**। 'असूञ्' इति कण्ड्वादौ पठ्यते। तस्य स्वाभाविक एव दीर्घः। वसूयतेश्च पाठाभावादाह — **इच्छेति**। अत्र [2]'अकृत्सार्वधातुकयोः' इति दीर्घः। न चैवं तृतीयान्तत्वं न स्यादिति वाच्यम्, प्रथमान्तत्वेऽप्यविरोधात्। [3]'सुपां सुलुक्' इति तृतीयास्थाने आकारादेशसंभवाच्चेति भावः। **वर्णेति**। [4]'व्यत्ययो बहुलम्' इति ह्रस्वस्यापि दीर्घो भवतीत्यर्थः। तर्हि ककारस्य किं प्रयोजनम्, अत आह — **अनेनेति**। भाष्ये 'पत्नयः, गर्भिणयः' इत्यत्र दीर्घस्य ह्रस्वत्वं छान्दसम्। [5]'अनुदात्तङित आत्मनेपदम्' इत्यादेः सर्वस्य नियमार्थत्वात् कथं 'वा यात्' इत्युक्तेऽपि पाश्यादिभ्यो वा परस्मैपदप्रसङ्गः, अत आह — **वा यादिति सूत्रमिति**। ननु [6]'पाश्या'[7]शब्दस्य टाबन्तस्य यप्रत्ययान्तत्वाभावात् कथं यान्तादुच्यमानं परस्मैपदं स्यात्, अत आह — **टापीति**। विधिपक्षेऽतिप्रसङ्गस्तदवस्थः, अत आह — **सामान्येति**। [8]'लः कर्मणि च' लस्य तिबादय इति सामान्यविहितानां नियमार्थं [9]पदप्रकरणम्। धात्वधिकारविहितलकारस्य [10]पाश्याशब्दान्न प्रसङ्ग इति भावः। [11]'लोहितडाज्भ्यः' इत्यत्र विवक्षितमाह — **आदीति**। लोहितादिषु पठितानामितरेषां भृशादिषु पाठाङ्गीकारेऽपि लोहितादिष्वपठितानां चर्मादीनां संग्रहायादिशब्दः, तेन लोहितादिराकृतिगण इति निश्चीयत इति वृत्तावुक्तम्। तन्निराकरोति — **अपठितेति**। **दूषितत्वात्** आदिशब्दस्येत्यादिः। आदिशब्द एव नास्ति, कस्यापठितसंग्रहार्थत्वम्। तथा चाकृतिगणत्वं चर्मादीनां [12]क्यषन्तत्वं चायुक्तमिति भावः॥

[३, ६४–६७]

(रत्नप्रकाशः) तुरण्युरिति। कण्ड्वादियगन्तादुप्रत्ययः। **उरुयेति**। [13]'सुपां सुलुक्' इति तृतीयास्थाने यादेशः। [14]'अकृत्सार्वधातुकयोः' इत्यत्र चेत् क्ङितीत्यनुवर्तते तर्हि ततोऽपि परत्र तदनुवर्ततेति मन्यमानः शङ्कते — **यदि क्ङिद्ग्रहणमिति**। **पित्र्यमिति**। [15]'तत आगतः' [16]इति [17]'पितुर्यच्च' इति यत्। **निवर्तिष्यत इति**। च्वेः क्ङितोऽसंभवात् [18]तत्रैव तन्निवृत्तमिति भावः। **यदि निवर्तत इति**। [19]'अकृत्सार्वधातुकयोः' इति सूत्रादुपर्यवेति शेषः। **असूया वसूयेति**। [20]'सुपां

---

[1] पा. सू. ७.१.३९.
[2] पा. सू. ७.४.२५.
[3] पा. सू. ७.१.३९.
[4] पा. सू. ३.१.८५.
[5] पा. सू. १.३.१२.
[6] वाच्या — अ; वाश्या — ऋ.
[7] 'शब्दस्य' इत्यस्यानन्तरं 'देहे' इति वर्ततेऽधिकम् — अ; 'दोहे' — ऋ; 'गोहे' — लृ
[8] पा. सू. ३.४.६९.
[9] आत्मनेपदपरस्मैपदप्रकरणमित्यर्थः।
[10] वाश्या — ऋ.
[11] लोहितादिडाज्भ्यः — अ, ऋ, लृ.
[12] क्यजन्तत्वं — अ, ऋ, लृ.
[13] पा. सू. ७.१.३९.
[14] पा. सू. ७.४.२५.
[15] पा. सू. ४.३.७४.
[16] इत्यर्थे इत्यर्थः।
[17] पा. सू. ४.३.७९.
[18] च्वौ चेति सूत्र एवेत्यर्थः।
[19] पा. सू. ७.४.२५. 'अकृत्' इत्यादि 'यादेशे' इत्यन्तं नास्ति — ब.
[20] पा. सू. ७.१.३९.

सुलुक्' इति यादेशे [1]"अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः। **असूयतेरिति**। कण्ड्वादियगन्तादिति शेषः। **वसूयतेरिति**। क्यजन्तादप्रत्ययः। उभयत्र [2]"सुपां सुलुक्' इति टाया लुक्। उपतापेन, वस्विच्छया चेत्यर्थः। पूर्वकल्पे असुभिर्वसुभिश्चेत्यर्थः। युक्तस्तु स एव, उपवासैरसुव्ययस्य दक्षिणादिभिर्वसुव्ययस्य च जायमानस्य सर्वानुभवसिद्धत्वात्। **ह्रस्वत्वं भविष्यतीति**। अज्व्यत्ययेनेति शेषः। **वा क्यष इति**। यथाश्रुतसूत्रनिर्देशोऽयम्। ककारप्रत्याख्याने तु 'वा यषः' इति कर्तव्यमिति भावः। **पाश्येति**। [3]"पाशादिभ्यो यः'। तत आचारक्विपि तदन्तस्य धातुत्वात् लडादिषु [4]पदद्वयं मा भूदित्येवमर्थमिति भावः। एतेन 'वा यादिति सूत्रं विध्यर्थं मन्यते' इति निरस्तम्। तस्य नियमार्थत्वेऽपि तत्र पदद्वयस्यापादयितुं शक्यताया उक्तत्वात्। पाश्याशब्दादेवाप्राप्तं परस्मैपदमापादितमिति मन्यमानस्तस्य नियमार्थत्वान्नोक्तदोष इति परिहरति — **नैतदस्तीति**। **परस्मैपदमित्युच्यत इति**। परस्मैपदमेव वा स्यादित्युच्यत इत्यन्वयं मन्यते। **न चात्र परस्मैपदमिति**। तथा च नियमः स न युज्यत इति भावः। [5]"तुष्यतु दुर्जनः' इति न्यायेनाह — **सामान्येति**। **भुरण्युरिति**। [6]"उणादयो बहुलम्' इत्यनेनापि सिद्धोऽत्र उप्रत्यय इति सामान्यविघातार्थतापि युक्तैव। सूत्रगतमादिग्रहणं प्रत्याचष्टे — **लोहितडाज्भ्य इति**। लोहितादिगणे पठितानि यानि तानि कुत्र घटनीयानीत्याशयेन पृच्छति — **अथान्यानीति**॥

[३, ६४–६७]

(नारायणीयम्) कण्ड्वादियगन्तादिति। 'भुरण धारणपोषणयोः' 'चुरण चौर्ये' इति तत्र पाठात्। **यत्प्रत्यय इति**। तस्मिंश्च सति रीङादेशे [7]"यस्य' इति लोपे च 'पित्र्यम्' इति भवति। ननु रीङभावे क्ङिद्ग्रहणस्य निवृत्तौ कथमसूयादेरसिद्धिरित्यत्राह — **यदीति**। **असूयतेः कण्ड्वादियगन्तस्येति**। [8]'असूञ् मानस उपताप इति हि [9]तत्र पाठः। [10]"अ प्रत्ययात्' इत्यकारप्रत्यये 'असूया, वसूया' इति रूपम्। ननु 'वा यात्' इत्युच्यमानेऽपि कथं पाश्येत्यत्र परस्मैपदप्राप्तिरित्यत आह — **वा यादिति सूत्रमिति**। अप्राप्तं परस्मैपदमनेन विधीयते, न तु विहितानां नियमः क्रियत इत्यर्थः। ननु टापि कृते न यप्रत्ययान्तमेतदिति चेत्, नेत्याह — **टापि कृत इति**। केचिद् भृशादेराकृतिगणत्वादपठितानां निद्रादीनां संग्रहार्थमादिशब्दं वर्णयन्ति। तद्वार्तिककारस्यादिशब्दं प्रत्याख्यातवतो नाभिमतमित्याह — **अपठितेति**॥

कष्टाय क्रमणे ३.१.१४.

[३, ६७–६८]

(उद्द्योतनम्) नन्वत्र कष्टशब्दात् क्यङ विधीयते, नात्र किंचिन्निपात्यते। अतः 'किं नि-

---

[1] पा. सू. ७.४.२५.
[2] पा. सू. ७.१.३९.
[3] पा. सू. ४.२.४९.
[4] आत्मनेपदपरस्मैपदद्वयमित्यर्थः।
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[6] पा. सू. ३.३.१.
[7] पा. सू. ६.४.१४८.
[8] असु मानस उपताप इति — घ.
[9] तत्र भावः — घ, ङ.
[10] पा. सू. ३.३.१०२.

पात्यते' इत्ययुक्तम्, अत आह — **विधाविति**। क्यङ इत्यादिः। अर्थविशेषो [1]निपातनाधीन इति भावः। ननु 'सत्रायते' इत्यादौ पापं चिकीर्षतीत्यर्थः कथं प्रतीयते, अत आह — **सत्रादय इति**। चिकीर्षा च प्रत्ययार्थ इत्यर्थः। 'कुटिलाय' इत्यत्रानार्जवाभावादेव न क्यङ, अत आह — **दुरध्येयत्वादिति**। अत्राप्यनार्जवमाह — **अनार्जवयुक्तमिति**। यत्र कुत्राप्यनार्जवं [2]तत्संबन्धिनि विवक्षितम्, न तु क्रमणनिष्ठमेवेति भावः। यद्वा, पथोऽनार्जवे तत्संबन्धिगमनस्याप्यनार्जवमेवेति भावः। प्रातिपदिकस्य [3]कष्टार्थत्वं कीदृशं विवक्षितम्, अत आह — **कष्टलक्षणेति**। तर्ह्यनार्जवस्य कथं लाभः, अत आह — **क्रमणेति**। तर्हि 'पापाय क्रामति' इत्यादावपि क्यङ स्यात्, अत आह — **व्यवस्थितेति**॥

[३, ६७–६८]

(**रत्नप्रकाशः**) 'कष्टाय' इति क्यङ निपात्यते [4]क्यष् वेति संदिहानः पृच्छति — **कष्टायेति किमिति**। **क्रमण इति**। प्रवर्तन इत्यर्थः। कथंभूते तस्मिन्, अनार्जवे। न विद्यते आर्जवं यस्मिन् तदित्यर्थः। निपातनबलादयमर्थो लभ्यत इति भावः। 'कष्टायते' इति प्रयोगस्य 'कष्टाय क्रमणे' इति यथाश्रुतक्रमणशब्देनार्थनिदर्शनं न संभवतीति तत्स्थाने पदान्तरं प्रक्षिपति — **क्रामतीति**। प्रष्टाह — **अत्यल्पमिति**। **सत्रकक्षेति**। सत्रादयो वृत्तिविषये पापपर्यायाः। **कण्वचिकीर्षायामिति**। पापचिकीर्षायामित्यर्थः। अस्मिन् मते कष्टं पापं [5]चिकीर्षति कष्टायत इति द्वितीयान्तादेव कष्टशब्दात् क्यङ ज्ञेयः। यथाश्रुतसूत्रानुसारिवचनमाह — **अपर आहेति**। **कुटिलायानुवाकायेति**। तस्य हि दुरवधारेऽध्ययने यत् प्रवर्तनं तदनृजु भवतीति तत्रापि स्यादिति भावः। 'पापचिकीर्षायाम्' इत्युक्तौ तु न तत्रातिप्रसक्तिः। **कष्टं क्रामतीति**। कष्टहेतुत्वाद् विषमो मार्गः कष्टशब्देनोच्यते। तस्य क्रमणेऽनार्जवमस्ति। **कष्टाय यदिति**। कष्टलक्षणार्थप्रतिपादनाय यत् प्रातिपदिकं तस्मात् क्रमणेऽनार्जवे क्यङ भवतीत्यर्थः। अस्मिन् पक्षेऽनार्जवं शब्दशक्तिस्वभावादेव गम्यत इति ज्ञेयम्। व्यवस्थितविभाषाश्रयणाच्च पापादिभ्यः क्यङ न भवति॥

[३, ६७–६८]

(**नारायणीयम्**) ननु कष्टशब्दाच्चतुर्थ्यन्तात् क्रमणेऽर्थे क्यङिति विध्यर्थत्वे संभवति कस्माद् भाष्ये निपातनमाश्रितमित्यत आह — **विधाविति**। **अनार्जवं** कौटिल्यम्। **विशेषो न लभ्यत इति**। क्रमणशब्दस्य पादविहरणे प्रसिद्धत्वात्। **क्रमणविशेषलाभायेति**। निपातने तु सति **कष्टं** कृच्छ्रं दुःखम्, इह तु तत्कारणं पापकर्म [6]कष्टमित्युच्यते। पापं कर्म कर्तुकामः कुटिलमाचरतीत्ययमर्थो लभ्यत इत्याशयः। **कण्वं पापमिति**। चिकीर्षा प्रत्ययार्थः। पापं चिकीकीर्षति सत्रायत इति। ननु निपातनाभावे क्रमणविशेषः कथं लभ्येतेत्यत्राह — **क्रमणविशेषश्चेति**। ननु कष्टार्थवृत्तेः प्रातिपदिकात् क्यङः सामान्येन विधाने पापादिभ्योऽतिप्रसङ्गः स्यादित्यत आह — **व्यवस्थितेति**॥

---

[1] निपाताधीन इति — अ.
[2] क्रमणसंबन्धिनीत्यर्थः।
[3] कष्टत्वं कीदृशं — ऋ, ॡ.
[4] क्यज् वेति — ब.
[5] चिकीर्षते — ब.
[6] कृच्छ्रमित्युच्यते — घ; कण्वमित्युच्यते — ङ.

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ३.१.१५.

[३, ६८]

(उद्द्योतनम्) उद्गीर्णविगीर्णशब्दयोरर्थमाह — **मुखेति**। [1]चर्वणाभावेऽपि हनुचलने प्रत्यय-[2]प्रसङ्गं कीटानामपि रोमन्थभक्षणे हनुचलनमस्तीत्यतिप्रसङ्गं [3]च निराह — **हनुचलनेति**। **अर्थान्तरस्य** कीटरोमन्थवर्तनस्य ॥

[३, ६८]

(रत्नप्रकाशः) उद्गीर्णस्येति। मुखप्रदेश आकृष्टस्येत्यर्थः। **अवगीर्णस्येति**। अपानप्रदेशान्निस्सृतस्येत्यर्थः। **मन्थः** गिलन्नम्। **हनुचलन इति**। तथा च 'कीटो रोमन्थं वर्तयति' इत्यत्र न भवति, 'गौः रोमन्थायते' इत्यादावेव भवतीति सिद्धम्। **अनभिधानादिति**। 'रोमन्थायते' इत्युक्ते कीटकर्तृकरोमन्थवर्तनस्याप्रतीतेरिति भावः। **तपसः परस्मैपदं चेति**। क्यङो ङित्त्वात् तदन्तान्नित्यमात्मनेपदे प्राप्ते तद्बाधनाय वचनम् ॥

[३, ६८]

(नारायणीयम्) मुखप्रदेश इति। गवादयो हि पूर्वं चरितस्य [4]तृणादेरुदरं प्रविष्टस्य पुनश्चर्वणाय मुखप्रदेश आकर्षणं कुर्वन्ति। ननु हनुचलनमात्रे प्रत्ययो नेष्यत इत्यत आह — **हनुचलनेति**। **अपानप्रदेशादिति**। ततश्चात्र न हनुचलनमस्तीति भावः। अनभिधानमुपपादयति — **रोमन्थायत इति** ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३.१.१७.

[३, ६९]

(रत्नप्रकाशः) अटाट्टेत्यादि। अटतीत्यटा, पचाद्यच्, टाप्। अट्ट अतिक्रमहिंसयोः, शीकृ सेचने, ताभ्यां [5]'गुरोश्च हलः' इत्यकारः, टाप्। कुट कौटिल्ये, पुट संश्लेषणे, [6]मुट मर्दने, तेभ्यः पचाद्यचि टाप्। प्रुष प्लुष दाहे, ताभ्यां कर्मणि क्तष्टाप्। तत्र क्रियाशब्दसाहचर्येण पोटाशब्दोऽपि क्रियाशब्द एव गृह्यते, न तु स्त्रीपुंसलक्षणवाचकः। तेन तद्विपरीतं वदन्तो निरस्ताः ॥

---

[1] चर्वणाभावे हि — ऋ.
[2] प्रसङ्गः — अ.
[3] चकारो नास्ति — अ.
[4] तृणादेरुदरप्रविष्टस्य — ङ.
[5] पा. सू. ३.३.१०३.
[6] एतेन 'मोटा' इति भाष्यपाठोऽत्राभिमत इति ज्ञायते। 'सोटा' इति भाष्ये उपलभ्यते। 'षुट' इति वा, 'सुट' इति वा धातुर्नोपलभ्यते।

सुखादिभ्यः कर्तृवेदनायाम् ३.१.१८.

[३, ६९]

(**उद्द्योतनम्**) वेदनायाः [1]कर्त्रव्यभिचारात् कर्तृग्रहणं न ज्ञानरूप[2]वेदनायां विशेषणम्, किं तु सुखादिविशेषणमित्याह — **वेदनाया इति**। ननु समासावयवस्य कर्तृग्रहणस्य कथं सुखादिविशेषणत्वम्, तद्विशेषणस्य वा कथं समासः, अत आह — **कर्तृग्रहणमिति**। अतिप्रसङ्गनिरासाय विवक्षितमर्थमाह — **ततश्चेति**॥

[३, ६९]

(**रत्नप्रकाशः**) कर्तुर्वेदना कर्तृवेदनेति समस्तं पदमिति मन्यमानः कर्तृग्रहणं व्यर्थम्, व्यभिचाराभावादित्याशयेन शङ्कते — **कर्तृवेदनायामिति**। 'कर्तृ' इति लुप्तषष्ठीकं पृथक् पदं सुखादिविशेषणमित्याशयेन समाधत्ते — **न कर्तृग्रहणेनेति**। तत्र कर्तृत्वं वेदनानिरूपितमेव प्रत्यासत्त्या ज्ञेयम्॥

[३, ६९]

(**नारायणीयम्**) [3]नन्वेकपदोपात्तां वेदनां परित्यज्य पदान्तरोपात्तानां सुखादीनां कर्तृग्रहणेन विशेषणं प्रमाणाभावादनुपपन्नमित्यत आह — **वेदनाया इति**। **वेदना** अनुभवः, [4]प्रत्यक्षतो ज्ञानम्। सा वेदयितारमन्तरेण न संभवतीति तस्याः कर्तृग्रहणेन विशेषणमव्यभिचारादयुक्तमिति सुखादीनि तेन विशेष्यन्ते। नन्वेवमपि कर्तृवेदनायामिति समासे गुणभूतेन कथं तानि विशेष्यन्त इत्यत आह — **कर्तृग्रहणं चेति**। **आत्मसंबन्धीनीति**। आश्रयाश्रयिभावोऽत्र संबन्धः, न जन्यजनकभावः, आत्माश्रयाणि सुखादीनीत्यर्थः। ततश्च 'सुखं वेदयते प्रसाधको देवदत्तस्य' इत्यादावतिप्रसङ्गाभाव इत्याह — **नान्यदीयेति**। प्रसाधको ह्यभ्यङ्गादिकं कुर्वन् प्रसाध्यस्य सुखमक्षिनिमीलनादिना जानातीति वेदयितृगतं सुखं न भवति॥

नमोवरिवश्चित्रङः क्यच् ३.१.१९.

[३,७०–७२]

(**उद्द्योतनम्**) ननु नमस्यशब्दस्य प्रकृत्यन्तरत्वेन नमश्शब्दात् क्यज्विधानमयुक्तम्, अत आह — **नमस्येति**। **धातुमिति**। क्यजन्तत्वकल्पनां विना धातुत्वासंभवादित्यर्थः। अविद्यमानोऽवयवार्थः [5]नमश्शब्दार्थो यस्येति विग्रहः। निपातत्वभ्रमादिह शङ्केत्याह — **स एवेति**। निपातो न भवतीत्याह — **नमस्येति**। ननु नमश्शब्दस्यानिपातत्वात् कथमुपपदत्वम्, तथात्वे वा

---

[1] कर्तृव्यभिचारात् — ऋ.
[2] वेदनाविशेषणम् — ऋ, लृ.
[3] नन्वेकपदोपात्तवेदनां — ङ.
[4] प्रत्यक्षताज्ञाने — ङ.
[5] नमश्शब्दो यस्येति — अ.

नमस्यतीत्यस्य [1]'नमःपदं करोतीत्यर्थः। तथा च कथं [2]देवानां कर्मत्वम्, अत आह — **अर्थवत्तेति**। 'नमसः पूजायाम्' इति पूजा क्यच एवार्थ इत्याशयः। ननु [3]'आनर्थक्यप्रतिहतानाम्' इति न्यायेनानवकाशा चतुर्थी द्वितीयां बाधेत, अत आह — **चतुर्थ्या इति**। **कारकविभक्तिरेवेति**। तत्र नमश्शब्दस्य पूजाद्योतकत्वमिति न वैयर्थ्यमिति भावः। ननु [4]'शब्दवैर' इत्यतः करण इत्यनुवृत्तौ [5]क्यचः क्रियासामान्यवचनस्य विशेषपरत्वेनैव [6]पूजादिपरत्वलाभाद्वचनानर्थक्यम्, अत आह — **करणग्रहणस्येति**। **स्वार्थ इति**। [7]'अनिर्दिष्टार्थाः' इति न्यायादिति भावः। स्वापेक्षया नीचं प्रत्यपि सेवा भवति, परिचर्या तूत्कृष्टं प्रति सेवेति भेदः। [8]क्यचः स्वार्थिकत्वात् [9]क्यजन्तानां द्रव्यवाचित्वेऽपि शब्दान्तरवाच्यायां क्रियायां यत् कर्मादिकारकं तत्र तव्यादीनामुत्पत्तिः स्यादित्यन्वयः। **वृक्षमिति**। यथा वृक्षशब्दात् कर्मणि द्वितीया विधीयमाना न प्रातिपदिकार्थस्य साधने भवति, तस्याक्रियात्वेन साधनाभावात्, किं तु पश्यतिशब्दान्तरोपात्तक्रियाकर्मणि, तथा क्यजन्ताद् द्रव्यवाचिनः शब्दान्तरोपात्तक्रियाकर्मणि तव्यदादय इत्यर्थः। [10]दृष्टान्तवैषम्यमाह — **द्वितीयादीनामिति**। भ्वादीनामप्यर्थानुक्रमणमाधुनिकम्, न पाणिनीयमित्याशयेनाह — **अभिधानशक्तीति**। भाष्ये **क्वचित्** 'इच्छायाम्, आचारे' इत्यादौ। **क्वचिन्न** [11]क्यज्णिङादौ। 'करणे' इति क्रियासामान्येन विशेषलाभः कथम्, अत आह — **सामान्येनेति**। न च सर्वत्र सर्वविशेषप्रसङ्गः, अभिधानवशाद्व्यवस्थोप[12]पत्तेरित्याशयेनाह — **कश्चिदिति**। वेदनया व्यवधानं निराह — **न चेति**। [13]ज्ञानस्यापि क्रियाविशेषत्वादसंबद्धव्यवायो[14] नास्तीत्यर्थः॥

[३, ७०–७२]

(रत्नप्रकाशः) **चतुर्थी विधीयत इति**। [15]'नमःस्वस्ति' इत्यादिनेति शेषः। तद्बुद्धिपरीक्षार्थमवैयाकरणाभि[16]मतजहत्स्वार्थावृत्तिमाश्रित्य समाधत्ते — **प्रकृत्यन्तरत्वादिति**। इतरो वैयाकरणमतमवलम्ब्याह — **ननु चेति**। **नमश्शब्दोऽस्तीति**। सर्वानुभवः प्रकृतसूत्रं च तत्र मानमिति भावः। नमश्शब्दसद्भावमात्रं तेनोक्तम्, न तु तस्यार्थवत्त्वम्, अतस्तं प्रत्यर्थवत्परिभाषयापि समाधानं संभवतीति मन्यमान आह — **नैष दोष इति**। **अर्थवत इति**। [17]जहत्स्वार्थायां वर्तिपदानामर्थाभाव इति भावः। ननु वैयाकरणमते समुदाये पृथक्शक्त्यभ्युपगमेऽपि वर्तिपदानामर्थवत्त्वमस्त्येवेत्यत आह — **अथवेति**। **क्यजादिष्विति**। आदिशब्देन णिङ्णिचोर्ग्रहणम्। **परिचर्या** सेवा। [18]सपर्येति पाठान्तरम्। सापि सेवैव। **समाचयनं** राशीकरणम्। **उदसनम्**

---

[1] नमस्पदं — अ.
[2] देवादीनां — अ.
[3] लौ. न्या. साहस्री. पृष्ठम् २५०.
[4] पा. सू. ३.१.१७.
[5] क्यङः — अ, ऋ, लृ.
[6] पूजादिलाभात् — अ; पूजादिफलत्वलाभात् — ऋ, लृ.
[7] परिभाषा १२२.
[8] णिङादीनामप्युपलक्षणमिदम्।
[9] क्यजाद्यन्तानामित्यर्थः।
[10] दृष्टान्ते वैषम्यमाह — अ.
[11] क्यङित्यादौ — अ; क्यङलुङादौ—ऋ; क्यज्लुङादौ — लृ.
[12] पत्तिरित्याह — अ; पत्तेरित्याह — लृ.
[13] वेदनाया ज्ञानरूपत्वादित्याशयः॥ ज्ञापनस्यापि — अ, ऋ, लृ.
[14] असंबन्धव्यवायः — अ.
[15] पा. सू. २.३.१६.
[16] मताजहत्स्वार्था — ब.
[17] अजहत्स्वार्थायां — ब.
[18] सपर्यायामित्यत्र तात्पर्यम्।

ऊर्ध्वं क्षेपः। विविधं क्षेपः **व्यसनम्**। परितः क्षेपः **पर्यसनम्**। दिक्प्रदर्शनमिदम्। एवं [१]मुण्डादिसूत्रगतेभ्यः [२]सत्यापादिसूत्रगतेभ्यश्च [३]णिचोऽर्थविशेषः संप्रदायाज्ज्ञेयः। यद्यप्यर्थनिर्देशस्यार्थज्ञानमेव प्रयोजनमिति सुज्ञानम्, तथापि मन्दबुद्धिः कश्चित् पृच्छति — **किं प्रयोजनमिति**। [४]यक्षानुरूपबलिन्यायेनोत्तरमाह — **क्रियावचनतेति**। प्रष्टा किंचित् पाण्डित्यं दर्शयति — **नैतदस्तीत्यादिना**। **सत्यामपीति**। हीति शेषः। **साधन इति**। कर्मकर्त्रादौ। **परसाधन इति**। स्वप्रकृत्यन्यशब्दवाच्यक्रियासाधन इत्यर्थः। द्वितीयादयो हि विभक्तयः परसाधने भवन्ति। **न परसाधन इति**। द्वितीयादीनां प्रातिपदिकाद्विहितत्वेन प्रातिपदिकार्थस्य च द्रव्यत्वेन स्वप्रकृत्यर्थं प्रति साधनस्याप्रसिद्ध्या परसाधन एव विधानमुचितम्। तव्यदादीनां तु स्वप्रकृत्यर्थसाधने चरितार्थानां परसाधने विधानं न युज्यत इति भावः। ननु यत्र स्वसाधनं संभवति तत्र स्वसाधन एव प्रत्ययो भवतु, यथा कर्तव्यमित्यादौ तव्यदादिः। यत्र तु स्वसाधनं न संभवति तत्र परसाधन एव प्रत्ययो भविष्यति, यथा घटमित्यादौ [५]द्वितीयादिः। तथा च संबन्धि[६]शब्दत्वेन हेतुना न व्यवस्थेत्यत आह — **अथवेति**। **धातव एवेति**। क्रियावचना एवेत्यर्थः। **क्यजादय इति**। क्यजाद्यन्ता इत्यर्थः। कुत इत्यत आह — **न चैव हीति**। तथा च क्रियावचनता स्वाभाविक्येवेत्यर्थनिर्देशो न कर्तव्य इति भावः। [७]**एवमर्थं खल्वपीति**। अत एव खल्वित्यर्थः। **चित्रयतीति**। 'चित्र चित्रकरणे' इति चौरादिकस्यादन्तस्य रूपम्। किं तत्र चित्रकरणमित्यत आह — **क्वचिदिति**। युक्तियुक्तमाह — **एवमपीति**। **बध्येरन्निति**। तानर्थविशेषानिति शेषः। क्रियावचनतासिद्ध्यर्थमर्थविशेषनिदर्शनमित्ययुक्तम्, 'करणे' इत्यस्यानुवृत्त्यैव तत्सिद्धेरित्याशयेनाह — **अथवेति**। **करण इति वर्तत इति**। पूर्वसूत्रे वेदनारूपे करण इत्यन्वयसंभवात् मण्डूकप्लुत्याश्रयणं न भवति। **करणं च करोतेरिति**। [८]अर्थ इति शेषः। **क्रियासामान्ये वर्तत इति**। तथा चार्थविशेषनिदर्शनस्य तत्फलं नेति भावः। एतेन 'सामान्येन च विशेषाणामाक्षेपात् कश्चित् प्रत्ययः क्वचिद्विशेषे भवतीत्यर्थः' इति निरस्तम्। तस्य भाष्यस्य तदर्थकत्वाभावात्। अन्यथा 'यस्य कस्य तरोर्मूलं येन केनापि [९]पेषितम्। यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति' इति श्लोकेन वैद्यकशास्त्रस्य गतार्थतापत्तेश्च॥

[७०–७२]

(नारायणीयम्) निपातनमश्शब्देति। निपातो यो नमश्शब्दस्तेन सदृशं यच्छब्दान्तरं तदेवावयवः, तस्य कल्पनेति विग्रहः। [१०]सदृशग्रहणेन सादृश्यात् प्रत्यभिज्ञा [११]भ्रान्तिरेवेति दर्शयति।

---

[१] पा. सू. ३.१.२१.
[२] पा. सू. ३.१.२५.
[३] सिचः — ब.
[४] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[५] द्वितीयादि — प, ब.
[६] शब्दत्वहेतुना — ब.
[७] भाष्ये 'एवमर्थं खल्वाचार्यः' इत्यत्र 'एवमर्थं खल्वप्याचार्यः' इति निर्णयसागरमुद्रिते पाठः।
[८] भाष्ये 'करणं च करोतेरर्थः' इत्यत्र 'अर्थः' इतिपदरहित एव पाठः पूनामुद्रिते। स पाठोऽत्राभिमतः।
[९] वेष्टितम् — ब.
[१०] सदृशाग्रहणेन — ङ.
[११] मतिरेवेति — ङ.

उक्तमेवार्थं विशदयितुं भाष्ये चोद्यसमाधाने इति दर्शयति — **स एवायमिति**। [1]**अर्थवत्ताभ्युपगमेनेति**। अन्यथोपपदविभक्तेः प्राप्त्यभावादस्य न्यायस्यानवतरप्रसङ्गात्। **नमस्करोति नारायणमिति**। यथात्र कारकविभक्तिर्भवति तथा 'नमस्यति देवान्' इत्यत्रापीत्यर्थः। ननु 'करणे' इत्यनुवृत्त्या [2]प्रत्ययार्थस्य निर्दिष्टत्वात् किं वचनेनेत्यत्राह — **करणग्रहणस्येति**। **परिचर्यायामिति**। [3]**परिचर्या** शुश्रूषा। **परस्य** शब्दान्तरवाच्यस्य क्रियालक्षणस्यार्थस्य **साधनं** यत् साधनमिति व्याचष्टे — **शब्दान्तरेति**। स्वार्थिकत्वात् प्रत्ययस्य [4]क्यजन्तानां द्रव्यवाचित्वेऽपि शब्दान्तरवाच्यायाः[5] क्रियायाः कारके तव्यादीनामुत्पत्तिः स्यादेवेत्यन्वयः। तत्र दृष्टान्तः — **वृक्षं पश्येत्यादौ द्वितीयादीनामिवेति**। द्वितीयादिभ्यो वैधर्म्यं [6]सिद्धान्तिनाभिसंहितं विशदयति — **द्वितीयादीनामिति**। 'चित्रयति' इत्ययुक्तम्, अनेन [7]क्यचि 'चित्रीयते' इति प्राप्तेरित्यत आह — **चित्र वैचित्र्येति**। ननु 'करणे' इत्यनुवृत्तौ पूजादावर्थे [8]कथं प्रत्ययः स्यादित्यत्राह — **सामान्येन त्वेति**। **कश्चित् प्रत्यय इति**। अभिधानस्वाभाव्यमत्र हेतुः। **तयोर्विरोधाभावादिति**। करणविशेषत्वाद्वेदनायाः सामानाधिकरण्येन संबन्धोपपत्तेरित्यर्थः॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ३.१.२१.

[३, ७२–७४]

(उद्द्योतनम्) नन्वकारनिर्देशे सति कथं संदेहः, अत आह — **किमिति**। **कृतात्वयोः** कृतात्वनिपातनयोः। अत्वनिपातनप्रश्नोऽयमित्याह — **हलीति**। भाष्ये **इकारलोपे कृत इति**। [9]'णाविष्ठवत्' इतीष्ठवद्भावात्। भाष्ये **वृद्धौ कृतायामिति**। [10]'अचो ञ्णिति' इत्यनेन। **यद्यपीति**। शास्त्रप्रवृत्तिर्नित्येत्यर्थः। **वाचनिकमिति**। 'शब्दान्तरस्य च' इत्येतद्वचनेन कृतम्। शास्त्रप्रवृत्तेरेवानित्यत्वमाह — **अथवेति**। वृद्धौ सत्यामैकारस्य लोपप्राप्तावपि **अन्यस्य** इकारस्याप्राप्त्या लोपो वानित्यः। 'आद्यस्य स्थानिनः' इति पाठेऽप्याद्यस्थानी इकार एव। स्थानिद्वयस्य यौगपद्यासंभवेन [11]युगपदुभयत्र प्राप्त्यभावादनित्यत्वम्। सर्वत्रैवमेव शब्दान्तरप्राप्तिस्थलेऽनित्यत्वं ज्ञेयम्। अकारस्य वृद्धचप्राप्तिं शङ्कते — **नन्विति**। **नैष इति**। पूर्वविधौ प्राप्ते स्थानिवद्भावेन तन्निरासः कार्यः, अप्राप्तौ [12]स्थानिवद्भावस्यैवासंभवात्, अतः स्थानिवद्भावपक्षेऽपि[13] पूर्वस्य प्राप्तिर्वक्तव्येत्यर्थः। लक्षणभेदात् स्वरूपभेदाच्च शब्दान्तरप्राप्त्यभावं शङ्कते — **यद्यपीति**। [14]'अचो ञ्णिति' इतीकारस्यैकारो वृद्धिः, [15]'अत उपधायाः' इत्यकारस्याकार इति लक्षणस्वभावयोर्भेदः। [16]स्वयमनित्यत्वं वृद्धेः स्वभावसिद्धमित्याह — [17]**वस्तुत इति**। वृद्धिशब्दाभिधेयत्वे-

---

[1] अर्थवत्त्वाभ्युपगमेनेति — ङ.
[2] प्रत्ययार्थस्यानिर्दिष्टत्वात् — ङ.
[3] वरिवस्या शुश्रूषा — ङ.
[4] क्यजाद्यन्तानामिति विवक्षितम्।
[5] अर्थसिद्धानुवादोऽयम्।
[6] सिद्धान्तिनोऽभिसंहितं — ङ.
[7] क्यङि — घ.
[8] क्यच्प्रत्ययः — ङ.
[9] का. वा. ६.४.१५५–१.
[10] पा. सू. ७.२.११५.
[11] युगपदुभयप्राप्त्यभावात् — ऋ.
[12] स्थानिवद्भावस्य वासंभवात् — ऋ.
[13] अपिशब्दो नास्ति — अ.
[14] पा. सू. ७.२.११५.
[15] पा. सू. ७.२.११६.
[16] स्वयमपि नित्यत्वं — अ.
[17] प्रदीपे 'तत्त्वतस्तु लोपे कृते' इत्यत्र 'वस्तुतस्तु लोपे कृते' इत्यन्नंभट्टपाठ इति भाति।

नाप्यैक्यं [1]**न्यायः**। **अन्यथा** शब्दान्तरप्राप्त्यानित्यत्वम्[2]। [3]ननु [4]"प्रातिपदिकाद्धात्वर्थे" इति चुरादिषु पाठादेवात्रापि णिच्सिद्धेः सूत्रं व्यर्थम्, अत आह — **सूत्रमिति**। ननु धात्वर्थमात्रे णिचि प्रसक्ते तत्रैव [5]"तत्करोति तदाचष्टे" इति धात्वर्थस्य नियमः क्रियते। तथा च 'हलिं गृह्णाति, व्रताद् भोजनतन्निवृत्त्योः' इत्यादिधात्वर्थविशेषे णिजर्थमिदं सूत्रं स्यात्, अत आह — **न चेति**। **णिचो दर्शनादिति**। न चैवं [6]"तत् करोति" इति व्यर्थम्, [7]"प्रातिपदिकाद्धात्वर्थे" इत्येतत्प्रपञ्चार्थत्वात्। न चैतत्सूत्रवैयर्थ्यम्, मन्दबुद्ध्यनुग्रहाय [8]"प्रातिपदिकात्" इत्यस्यैव प्रपञ्चार्थत्वादित्याहुः। [9]"सुप आत्मनः" इति सूत्रे स्वोक्तं प्रयोजनान्तरमाह — **मुण्डमिति**। **णिजर्थं वा** सूत्रमित्यन्वयः॥

[३, ७२–७४]

(रत्नप्रकाशः) कयोरिति। यद्यपि हलकलेत्यदन्तयोरेव निर्देश इति स्पष्टं प्रतीयत इति संदेहो नोपपद्यते, तथापीकारान्तयोरत्वनिपातनेनापि स निर्देश उपपन्न इति भवत्येव संदेहः। **याविकारान्ताविति**। अकारान्ताभ्यां तु [10]"प्रातिपदिकाद्धात्वर्थे" इत्येव णिच् सिद्ध इति भावः। **किं प्रयोजनमिति**। इकारलोपोऽप्यग्लोप एवेति व्यर्थमत्वनिपातनमिति मन्यते। **सन्वद्भावप्रतिषेधार्थमिति**। इकारस्य वृद्धौ कृतायां लोपस्य कर्तव्यत्वेन तल्लोपस्याग्लोपत्वाभावेन सन्वद्भावः स्यात्, तन्मा भूदित्यत्वनिपातनमिति भावः। **अन्यस्य कृते लोप इति**। इकारस्य लोपे कृते [11]"अत उपधायाः" इत्यकारस्य प्राप्नोतीत्यर्थः। विधायकसूत्रयोर्भेदेऽपि वृद्धित्वेनैक्यमभिप्रेत्यैवमुक्तम्। इदं [12]सूत्रकृन्मतरीत्या। कृताकृतप्रसङ्गित्वमात्रेण नित्यत्वमिति भाष्यकृन्मते तूभयोर्नित्यत्वात् परत्वाद्वृद्धिः प्राप्तेति मन्तव्यम्। [13]नन्विकारलोपस्य स्थानिवत्त्वादुपधावृद्धिर्न प्राप्नोतीति सर्वथा वृद्धेरनित्यत्वमेवेति चेन्न, [14]"यस्य तु निमित्तं लक्षणान्तरेण विहन्यते नासावनित्यः" इति भगवतान्यत्रोक्तत्वात्। वृद्धेः प्राप्तौ सत्यामेव स्थानिवद्भावस्य प्रसक्तत्वेन तावतैव नित्यत्वोपपत्तेश्च। एतेन 'तत्त्वतस्तु लोपे कृते [15]वृद्धेरप्राप्त्यानित्यत्वं[16] वक्तव्यम्। न्यायव्युत्पादनाय त्वन्यथाभिहितम्' इति निरस्तम्। न्यायव्युत्पादनायेति वदता तेनैव स्वोक्तेरन्याय्यत्वोक्तेः। इदं सूत्रं सापेक्षेभ्योऽपि मुण्डादिभ्यो णिजर्थम्, हलिकल्योरदन्तत्वनिपातनार्थं च॥

[३, ७२–७४]

(नारायणीयम्) ननु हलकलेति निर्देशादेवाकारान्तयोरेव ग्रहणमिति निश्चयात् संदेहाभावात्

---

[1] न्याय्यम् — अ.

[2] अनित्यत्वमिति छेदः।

[3] 'ननु' इत्यस्यानन्तरम् 'अत्र' इत्यधिकं दृश्यते — अ, ऋ, लृ. उपर्यपि 'अत्रापि' इति दृश्यमानत्वादिदं त्यक्तम्।

[4] चुरादिगणसूत्रम्।

[5] चुरादिगणसूत्रम्।

[6] चुरादिगणसूत्रम्।

[7] चुरादिगणसूत्रम्।

[8] चुरादिगणसूत्रम्।

[9] पा. सू. ३.१.८.

[10] चुरादिगणसूत्रम्।

[11] पा. सू. ७.२.११६.

[12] सूत्रकृतान्तरीत्या — ब.

[13] ननु विकारलोपस्य — ब.

[14] महाभाष्यम् ३.२.३.

[15] वृद्धेरव्याप्तेरनित्यत्वं — ब.

[16] अनित्यत्वमिति छेदः।

प्रश्नानुपपत्तिरित्यत आह — **किमिकारान्तयोरिति** । **हलिकलीत्येवेति** । इकारान्तयोर्ग्रहणे[1] 'हलयति, कलयति' इत्यादिरूपस्य सिद्धत्वात् किमत्वनिपातनप्रयासेनेति प्रश्नः । 'शब्दान्तरस्य च' इत्यस्य वाचनिकत्वमुक्त्वा न्यायसिद्धत्वं वक्तुमाह — [2]**अथवेति** । **लोपस्य स्थानिवद्भावादिति** । [3]'अचः परस्मिन्' इत्यनेन । **कथमकारस्येति** । उपधात्वाभावात् । 'प्राप्तौ सत्याम्' इत्येतदेवोपपादयति — **पूर्व[स्य] विधाविति** । तस्मादन्यस्य प्राप्नोतीति युक्तमेव । **भिन्नलक्षणा भिन्नस्वभावा चेति** । एकस्याः [4]'अचो ञ्णिति' इति लक्षणम् । अपरस्याः [5]'अत उपधायाः' इति । तथा स्वरूपभेदः — एकेकारस्यैकारः, अपरा त्वकारस्याकारः । **अभेदमाश्रित्येति** । अभेदं बुद्ध्या परिकल्प्येत्यर्थः । ननु तात्त्विकमनित्यत्वमनादृत्य काल्पनिकाश्रयणं किमर्थमित्यत्राह — **न्यायेति** । ननु [6]'प्रातिपदिकाद्धात्वर्थे' इति यदुक्तं तत् [7]'तत्करोति तदाचष्टे' इति नियमितमिति ग्रहणाद्यर्थे णिजर्थमिदं वक्तव्यमिति कथं प्रपञ्चार्थमित्युक्तमित्यत आह — **न चेति । सापेक्षेभ्योऽपि णिजर्थं वेति** । यदा गमकत्वात् सापेक्षेभ्योऽपि वृत्तिर्भवतीत्युच्यते तदा प्रपञ्चार्थः, तदनाश्रयणे तु सापेक्षेभ्योऽपि णिजर्थमिति विकल्पोपपत्तिः ॥

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३.१.२२.

[३, ७४-७८ [

(उद्द्योतनम्) 'कोऽयं शब्दः' इत्यत्र [8]'किमर्थक इति विवक्षितं कृत्वा प्रश्नाशयमाह — **इहेति** । मूर्तस्य कुसुमादेः समभिहारो मेलनम्, तच्च मूर्तस्यैव संभवतीत्यर्थः । धातुवाच्यक्रियाया भेदस्तावन्नास्तीत्याह — **धात्विति** । पचिक्रियादेरपि व्यक्तिभेदोऽस्ति, अत आह — **युगपदिति** । वस्तुतः सजातीयक्रियायाः क्षणभेदसत्त्वेऽपि स न धातुना प्रतीयत इत्याह — **साध्येति** । साध्येत्यनेनामूर्तत्वमुक्तम् । तथाप्यवयवक्रियाणामनेकत्वात् समभिहारः स्यात्, अत आह — **अधिश्रयणादीनामिति** । समभिहाराभावे यौगपद्याभावो हेतुः, तत्र च क्रियात्वे सति क्रमोत्पन्नत्वम् । 'यद्यपि' इत्यादिना गौणः समभिहारः प्रोक्त इत्याह — **मुख्यस्येति** । तमेवाह — **बुद्धीति** । [9]**क्रियावयवाः** अधिश्रयणादयः । 'पुनःपुनर्वा' इत्येतद्व्याचष्टे — **पौनःपुन्येनेति** । ननु [10]'धातुवाच्या सामान्यक्रिया [11]नास्त्यस्ति, अत आह — **साधारणीति** । समूहस्य क्रियात्वे हरिसंमतिमाह — **यथोक्तमिति** । कारकसमूहावयवैः परार्थत्वात् गुणभूतैः कर्त्रादिभिः क्रमेण जायमानानामधिश्रयणादीनां बुद्ध्या प्रकल्पिताभेदः समूहः क्रियेत्युच्यत इत्यर्थः । यद्वा, गुणभूतैरवयवैरधिश्रयणादिभिः कृतो यः

---

[1] ग्रहणेऽपीत्यर्थः ।

[2] 'अथवेति' इत्यस्यानन्तरं 'कैयटग्रन्थस्यायमर्थः । अन्यस्य कार्यस्य प्रवृत्तावपि कृताविव्यर्थः अपिशब्दस्त्वर्थे । अन्यस्य स्थानिनोऽप्रवृत्ताविति । तस्यैव स्थानेऽप्रवृत्तावित्यर्थः । तथा च शब्दान्तरत्वमित्यर्थः' इत्यधिकम् — ङ.

[3] पा. सू. १.१.५७.

[4] पा. सू. ७.२.११५.

[5] पा. सू. ७.२.११६.

[6] चुरादिगणसूत्रम् ।

[7] चुरादिगणसूत्रम् ।

[8] किमर्थकं विवक्षितं कृत्वा — ऋ, लृ.

[9] प्रदीपे 'अवयवक्रियासंगतः' इत्यत्र 'क्रियावयवसंगतः' इति पाठोऽन्नंभट्टस्य स्यादिति भाति । 'अवयवक्रियागतः' इति निर्णयसागरमुद्रिते चौखाम्बामुद्रिते च पाठः ।

[10] हेतुवाच्या — ऋ.

[11] नानास्तु — अ.

समूहः स क्रिया। कीदृशः समूहः, क्रमेण जायमानानां बुद्धचा प्रकल्पितो योऽभेदस्तदात्मकः समूहो गुणभूतावयवैः सह क्रियेत्यभिधीयत इत्यर्थः। ननु समूहश्चेत् क्रिया, [1]'पचत्येव देवदत्ते 'अपाक्षीत्, [2]'पक्ष्यति' इति प्रयोगो न स्यात्, अत आह — **समूह इति**। अवयवे [3]समूहारोपात् तथा प्रयोग इत्यर्थः। भाष्येऽवयवशब्दस्य मुख्यार्थसिद्धये सामान्यक्रिया निरूपिता। इदानीं [4]गौणावयवत्वमङ्गीकृत्य विक्लेदनफलिका प्रधानक्रियैव सामान्यक्रियाभिमतेत्याह — **अथवेति**। **तादर्थ्येन** प्रधानक्रियार्थत्वेन। गुणत्वमेवात्रावयवत्वं विवक्षितमित्यर्थः। **तस्याः** प्रधानक्रियायाः। अधिश्रयणादिसाध्यत्वात् सामान्यक्रियेत्युच्यत इत्यर्थः। तर्ह्यधिश्रयणादीनां पचिवाच्यत्वं कथम्, अत आह — [5]**तादर्थ्यादिति**। तादर्थ्यात् ताच्छब्द्यमित्यर्थः। एकस्यामपि क्रियायां कार्त्स्न्यं संभवतीत्यतः — **साकल्येनेति**। भाष्यस्थस्य 'ताः' इत्यस्य व्याख्यानम् — **विजातीयाव्यवहिता इति**। सोपसर्गाद्यङुत्पत्तौ बाधकमाह — **तत इति**। **प्राटाटयत इति**। प्रपूर्वादटतेरौपसंख्यानिको यङ। [6]'अजादेर्द्वितीयस्य' इति टयशब्दस्य द्विर्वचनम्, हलादिशेषः, [7]'दीर्घोऽकितः' इत्यभ्यासदीर्घः। **प्रपापच्यत इति**। सोपसर्गस्यैव क्रियासमभिहारत्वात् केवलाद्धातोर्यङ न स्यात्, 'प्रपापच्यते' इत्यादादेव स्यादिति भावः। नन्वेकाज्झलादिग्रहणस्य प्रत्याख्याततत्वाद्वचनं व्यर्थम्, अत आह — **यथान्यास इति**। ननु णुवद्भावो वाच्यो यङ वा, को विशेषः, अत आह — **कार्यान्तरेति**। तत्रातिदेशविभागमाह — **तत्रेति**। णुवदित्युक्तौ कथं तदभावलाभः, अत आह — **तयोरिति**। आमिटोः। फलस्याहेतुत्वात् कथं पञ्चमी, अत आह — **फलस्येति**। त्रयमुदाहरति — **उदाहरणानीति**। **प्रोर्णोनूयत इति**। 'प्रोर्णोतिरजादित्वात् [8]'न न्द्राः' इति वचनात् णत्वस्यासिद्धत्वाच्च नुशब्दस्य द्वित्वम्, अभ्यासगुणः, [10]'अकृत्सार्वधातुकयोः' इति दीर्घः। 'प्रोर्णुतः' इत्यादावेकाच्त्वाभावेऽपि णुवद्भावात् [11]'श्र्युकः किति' इतीट्प्रतिषेधः। यङन्तस्य द्विर्वचनप्रसङ्गं निराह — **यङैवेति**। अर्थविशेषविवक्षायां भवतीत्याह — **यदेति**। नन्वत्र धात्वर्थभेदाभावात् कथं धातुसंबन्धः, अत आह — **सामान्येति**। 'जागर्ति' इति सामान्यम्, [12]'जागृहि जागृहि' इति क्रियासमभिहारो विशेषः। ननु [13]'लोलूयस्व लोलूयस्व' इत्यत्र यङैव क्रियासमभिहारस्योक्तत्वात् [14]कथं लोडन्तस्य द्विर्वचनम्, अत आह — **भृशार्थेति**। पौनःपुन्यं भृशार्थो वा क्रियासमभिहार इत्यर्थः। लोटो बहिरङ्गत्वमाह — **लोडिति**। सूत्रे वाकाराभावादाह — **धातोरिति**॥

[३, ७४–७८]

(रत्नप्रकाशः) भावे, अकर्तरि च कारके घञो विधानात् किंसाधनोऽत्र घञित्याशयेन पृच्छति — **समभिहार इति**। उत्तरमाह — **समभिपूर्वादिति**। **मालाभिहार इति**। मालासमुदाय इत्यर्थः। तथा च समभिहाराभिहारसमाहारशब्दाः पर्याया इत्युक्तं भवति। **एका**

---

[1] भवत्येव — अ.

[2] पचतीति — ऋ, लृ.

[3] समुदायारोपात् — ऋ.

[4] गौणमङ्गीकृत्य — ऋ, लृ.

[5] 'तादर्थ्यादिति' इत्यादि 'वचनं व्यर्थमत आह' इत्यन्तं नास्ति — अ.

[6] पा. सू. ६.१.२.

[7] पा. सू. ७.४.८३.

[8] प्रोर्णुतेः — ऋ, लृ.

[9] पा. सू. ६.१.३.

[10] पा. सू. ७.४.२५.

[11] पा. सू. ७.२.११.

[12] जागृहीति — अ.

[13] लोलूयस्वेत्यत्र — लृ.

[14] कथं वा तदन्तस्य — अ.

क्रियेति। विक्लित्त्याद्यनुकूलव्यापारत्वेन पच्यादयः क्रिया एकैकात्मिकाः। तथा च केनापि धातुना क्रियासमाहारो नाभिधीयत इत्ययुक्तमिदं सूत्रं स्यादिति भावः। 'एकापूपी' इत्यत्र समाहारद्विगोर्ङीबिति [1]भाष्यं तु प्रौढिप्रवृत्तं [2]न तु युक्तियुक्तमिति तद्विरोधोऽत्राकिंचित्करः। **सामान्यक्रियेति**। विक्लित्त्यनुकूलव्यापारत्वेन सामान्येनैकेत्यर्थः। **अवयवक्रियास्तु बह्व्य इति**। तथा च धातुवाच्यः क्रियासमभिहारो भवतीति भावः। तदुक्तं हरिणा — [3]"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥' इति। यत्तु तेनैव मतान्तरमुक्तम् [4]"अनन्तरं फलं यस्याः [5]कल्पते तां क्रियां विदुः। प्रधानभूतां ताद-र्थ्यादन्यासां तु तदाख्यता॥' इति। तदयुक्तम्, तादृशकल्पनायां मानप्रयोजनयोरभावात्। **कात्स्न्र्येन करोतीति**। तथा च क्रियायाः कात्स्न्र्येन करणमेव क्रियासमभिहारः, क्रियातिशय इत्युक्त-प्रायम्। **कात्स्न्र्येन करोतीति**। कात्स्न्र्येन पचतीत्यर्थः। **स उच्यते पापच्यत इतीति**। तिङर्थस्य धात्वर्थं प्रति विशेष्यत्वमित्युपपन्नमिदम्। तिङर्थं प्रति धात्वर्थो विशेष्य इति मते त्विदमनुपपन्नं भवति। **पुनःपुनर्वेति**। तथा च क्रियायाः पौनःपुन्यं वातिशयो वा क्रियासम-भिहार इति फलितम्। 'यङ्विधौ धातुग्रहणे उक्तम्' इति वार्तिकमवतारयति — **अथेति**। **प्राटति भृशमिति**। अस्मिन्नर्थे प्रोपसृष्टादटतेर्यङ् मा भूदित्येवमर्थमित्यर्थः। हलादेरिति प्रत्या-ख्यास्यत इति कृत्वाजादिरुदाहृतः। **तत्रेति**। [6]"धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्र इत्यर्थः। दृष्टान्त उक्तमर्थं दार्ष्टान्तिके योजयति — **एवमिहापीति**। तदेवं धातु-ग्रहणप्रत्याख्यानवार्तिकं व्याख्यायैकाज्झलादिग्रहणप्रत्याख्यानवार्तिकमवतारयति — **अथेत्यादिना**। उक्तप्रत्याख्यानवार्तिकद्वयं प्रौढ्या कृतम्। लक्षणैकचक्षुष्काणां तु यथाश्रुतमेव सूत्रं युक्तमित्या-शयेनाह — **ऊर्णोतिश्चेति**। भगवानाह — **अत्यल्पमिति**। स एवोर्णोतिग्रहणं प्रत्याचष्टे — [7]"**ऊर्णोतेर्न वक्तव्य इति**। यङिति शेषः। कुत इत्यत आह — **वाच्य ऊर्णोर्णुवद्भाव इति**। तथा चोर्णोतेर्नुधातुवदेकाज्झलादिव्यपदेशाद्यथाश्रुतसूत्रेणैव यङ् सिध्यतीति फलितम्। ननु तस्य वचनस्य यङ्प्रसिद्धिमात्रप्रयोजनकत्वे तदपेक्षयोक्तवार्तिके सूच्यादिभिः सहोर्णुग्रहणमेव युक्तम्, लाघ-वादित्यत आह — **आमश्च प्रतिषेधार्थमिति**। यद्यपि स्वाश्रयमूर्णोतेरनेकाच्त्वं वर्तते, तथाप्यने-काच्त्वाभावोऽपि नुधातोरस्तीत्यनेनैकाच्त्वातिदेशेन स्वाश्रयमनेकाच्त्वं बाध्यत इत्याम् न भवति। **एकाचश्चेड्उपग्रहादिति**। एकाच उगितः परस्य कित इडागमनिषेधादूर्णोतेरपि परस्य तस्येडा-गमनिषेधार्थं [8]नुवद्भावो वक्तव्य इति भावः। उक्तश्लोकस्योदाहरणानि — प्रोर्णोनूयते, प्रो-र्णुनाव, प्रोर्णुतः, प्रोर्णुतवान्। यत्तु "**इडुपग्रहः** इट्प्रतिषेधः, [9]"विभाषा गुणे' इति पञ्चमी। फलस्य चात्र हेतुत्वम् — यथा, अध्ययनेन वसतीति" इति। तन्न, एकाच इत्यस्यानन्वयापत्तेः। न ह्येकाच्संबन्धी इडुपग्रह ऊर्णोर्णुवद्भावस्य फलम्, [10]तस्य नुवद्भावमन्तरेणैव [11]तत्र तस्य सिद्ध-त्वात्। विप्रतिषेधनिदर्शनपरं वार्तिकं पठति — **क्रियासमभिहार इति**। मध्यस्थः कश्चित् पृच्छति — **न तर्हीदानीमिति**। भगवानाह — **भवति चेति**। तथा च परत्वाल्लोटि सति तन्न

---

[1] इदं २.१.५२. सूत्रे।
[2] न तु युक्तमिति — ब.
[3] वाक्यपदीयम् ३.८.४.
[4] वाक्यपदीयम् ३.८.१५.
[5] कल्प्यते — प.
[6] पा. सू. ३.१.७.
[7] भाष्ये 'ऊर्णोतेर्न वक्तव्यम्' इत्यत्र 'ऊर्णोतेर्न वक्तव्यः' इति निर्णयसागरमुद्रिते पाठः।
[8] 'नुवद्भावः' इत्यस्यानन्तरं 'न' इत्यधिकम् — प.
[9] पा. सू. २.३.२५.
[10] ऊर्णोतेरित्यर्थः।
[11] एकाचि, इण्निषेधस्येत्यर्थः।

सिध्यतीति दोष इति भावः। तं दोषं परिहरति — **न वा नानार्थत्वादिति**। **न वार्थो विप्रतिषेधेनेति**। विप्रतिषेधेन साधितो योऽर्थः स न युज्यत एवेत्यर्थः। 'लोलूयस्व लोलूयस्व' इति क्रियासमभिहारस्य धात्वर्थत्वेन तद्द्योतकतया यङ्लोड्द्विर्वचनानि कृतानि। [1]"उक्तार्थानामप्रयोगः' इति तु द्योतकविषये न प्रवर्तत इत्येतद्भाष्यादवगम्यते। एतेन "यङैव क्रियासमभिहारस्य द्योतितत्वात् [2]"नित्यवीप्सयोः' इति [3]"क्रियासमभिहारे' इति वा द्विर्वचनं न भवति" इति निरस्तम्। उक्तभाष्यविरोधात्। **नानार्थत्वादिति**। नाना अर्था आश्रया यस्य स नानार्थः, तत्त्वादित्यर्थः, बह्वाश्रयत्वादिति यावत्। तथा च लोटो बहिरङ्गतयासिद्धत्वादन्तरङ्गेण [4]यङा तस्य विरोधो न युज्यत इति भावः। **का नानार्थतेति**। कथं नानार्थतेति भावः। **कर्तृकर्मणोर्हीति**। कर्तृकर्मप्रतिपादकधातुसंबन्धाश्रयेण लोड् विधीयत इति भावः। एतेन 'लोड् बहिरङ्गः, कर्त्राद्यपेक्षणात्, धातुसंबन्धापेक्षणाच्च' इति निरस्तम्। धातुसंबन्धातिरेकेण लोड्विधौ कर्तृकर्माश्रयणे [5]मानाभावात्। [6]"लः कर्मणि च' इति सूत्रेण कर्त्रादीनां लकारार्थत्वे बोधितेऽपि लोड्विधौ तेषामनाश्रयणाच्च। **विभाषा यङिति**। [7]"धातोः कर्मणः' इत्यतो वेत्यनुवर्तत इति भावः॥

[३, ७४–७८]

(नारायणीयम्) नेह शब्दव्युत्पत्तिविषयः प्रश्नः, तत्रानुपपत्त्यभावात्। नाप्यर्थापरिज्ञानात्, तस्य लोकव्यवहारसिद्धत्वात्। किं तर्हि, लौकिकस्य समभिहारार्थस्येहासंभवादिति दर्शयितुं समभिहारस्वरूपं तावदाह — **इहेति**। **मूर्तस्येति**। यथा पञ्चानां पूलानां समाहार इति। धातुवाच्यस्य त्वर्थस्य मूर्तत्वमनेकत्वमेककालत्वं च न संभवतीत्याह — **धातुवाच्या त्विति**। क्रियेत्यनेनामूर्तत्वमुक्तम्। **एकैवेति**। न हि [अनेका,] पचनपठनादीनां विजातीयानां क्रियाणामेकधातुवाच्यत्वाभावात् तत्समभिहारे धातोर्वृत्तिर्न संभवतीत्यर्थः। एतदेवाह — **युगपदिति**। [8]पर्यायैस्त्वेकेनानेकस्याः क्रियाया अभिधानं संभवति, [9]दिवादेः क्रीडाद्यनेकार्थत्वात्। तर्हि सजातीयानां क्रियाणां समभिहारः स्यादिति, नेत्याह — **सा चेति**। पचनादेः साधनभेदाद्वस्तुतो भेदेऽपि धातुना साध्यैकस्वभावा निवृत्तभेदैव शब्दशक्तिस्वाभाव्यात् प्रत्याय्यत इत्यर्थः। तर्ह्यवयवक्रियाणामधिश्रयणादीनां समभिहारे धातोर्वृत्तिरस्त्विति चेत्, तदपि नेत्याह — **अधिश्रयणादीनां चेति**। क्रमजन्यत्वेऽपि यदि परोत्पत्तिकाले पूर्वस्यावस्थानं स्यात् तदा समभिहारः संभाव्येत। तदपि नेत्याह — **युगपदिति**। 'यद्यप्येका' इत्यादिभाष्यस्य तात्पर्यार्थं तावदाह — [10]**मुख्यसमभिहारस्येति**। तत्र प्रथमं पक्षं विशदयति — **बुद्धिगोचरेति**। यथा हि द्रव्याणां द्रव्यान्तरैरव्यवहितानां [11]मुख्यः समभिहारस्तथावयवक्रियाणामेकफलावच्छिन्नत्वादेकस्यां बुद्धौ युगपदवस्थितानां क्रियान्तरैरव्यवहितानां गौणः स इत्यर्थः। एतद्दर्शितं भाष्ये — 'यः कार्त्स्न्येन

---

[1] महाभाष्यम् १.१.४४.
[2] पा. सू. ८.१.४.
[3] का. वा. ८.१.१२–६.
[4] यणा — प, ब.
[5] मानप्रयोजनयोरभावात् — प.
[6] पा. सू. ३.४.६९.
[7] पा. सू. ३.१.७.
[8] पर्यायेणेत्यर्थः।
[9] क्रियादेः — घ.
[10] प्रदीपे 'मुख्यस्य समभिहारस्य' इत्यत्र 'मुख्यसमभिहारस्य' इति पाठोऽभिमत इति भाति।
[11] मुख्यसमभिहारः — ङ.

करोति स उच्यते पापच्यते' इति। [1]एतद्दर्शनमाश्रित्य भृशार्थः समभिहार इत्युच्यते। द्वितीयं पक्षमाह — **पौनःपुन्येनेति**। प्रधानक्रियाया एव पुनःपुनर्विजातीयक्रियाभिरव्यवधानेनानुष्ठीयमानाया गौणसमभिहारोपपत्तिरित्यर्थः। सामान्यशब्दार्थमाह — **साधारणीति**। सर्वेषां क्षणानां साधारणीभूतेत्यर्थः। अत्र वृद्धसंमतिमाह — [2]**तदुक्तमिति**। **गुणभूतैरिति**। यद्यपि क्रमजन्मत्वात् क्षणानां मुख्यसमूहो न संभवति, तथाप्येकफलोद्देशेन प्रवृत्तानां तेषां संकलनाबुद्धया समापादितभेदत्वादध्यारोपितो यः समूहः स क्रियेति व्यवह्रियते। स च गुणभूतैरवयवैर्युक्त इत्यवयवानां समुदाये गुणभावान्न शब्दभेदप्रयोजकत्वमित्येकधातूपात्तैकैव क्रियोपपद्यते। तस्याश्चावयवभेदाश्रयेण क्रमपौर्वापर्यादिव्यवहारोपपत्तिरित्याशयः। यद्येवमधिश्रयणादीनामवयवानां पचिक्रियात्वाभावात् तदवस्थासु 'पचति' इति प्रयोगो न स्यात्, तथा केषांचित् क्षणेष्वतीतेषु केषुचिदनागतेषु भूतभविष्यद्व्यवहारोऽपि न स्यादित्याशङ्क्याह — [3]**समूहः स इति**। [4]तादृशः क्षणसमूहः प्रत्येकं समूहिषु समारोपवशात् समाप्तः प्रतीयते। समारोपश्च सर्वत्र 'पचति' इति प्रत्ययस्यानुवृत्तेरेवावगम्यत इत्यधिश्रयणारम्भ एव फलाभिसंधानात् समस्तस्य क्षणसमूहस्य तत्रैवाध्यासात् समूहसमूहिनोरभेदे 'पचति' इति प्रयोगोपपत्तिः। तावन्मात्रस्यातीतत्वे 'अपाक्षीत्' इति भूतप्रयोगः। क्षणान्तरभाविनोऽभिसंधाने 'पक्ष्यति' इति प्रयुज्यत इत्यर्थः। समाश्रितपौर्वापर्यस्यैव समूहस्यारोपादेकस्यापि क्षणस्य क्रमिकत्वावगमात् साध्यत्वाविरोधः। **तस्याश्चेति**। [5]प्रधानभूताया विचटनादिकायाः क्रियायाः सर्वावयवसाध्यत्वात् साधारणत्वमित्यर्थः। [6]**अनन्तरमिति**। यस्या अनन्तरमोदनादिफलं निष्पद्यते सा प्रधानभूता क्रियेति केचिदाचार्या मन्यन्ते। [7]ततश्च तण्डुलानां **विचटनम्** अवयवानामवयवान्तरेभ्यो विभागः, यदनन्तरं मार्दवादिनिष्पत्तिः सा पचिक्रिया। ततस्तु पूर्वे ये व्यापारास्ते तदुपकारिण एव, न कार्यनिष्पत्तौ साक्षादुपयुज्यन्ते। न हि साक्षादजनयत् कारकं भवति। तेषां तदर्थत्वात् तदध्यासात् 'पचति' इत्याद्याख्यातशब्दाभिधेयत्वमित्यर्थः। यद्यपि [8]'विचटनस्य नियतकालत्वान्न[9] पौर्वापर्यम्, तथापि गुणक्रियासु तद्रूपारोपात् तासां पौर्वापर्यात् तद्व्यवहारोपपत्तिः। ननु सोपसर्गादुत्पत्तिर्मा भूदिति धातुग्रहणं क्रियत इत्यत आह — **धातुरेवेति**। समभिहारविशिष्टक्रियावचनाद्यङित्येतावत्युक्ते सामर्थ्याद्धातोरिति लभ्यत इत्यर्थः। उत्तरवादिन आशयमाह — **धातूपसर्गेति**। **प्राटाटचत इति**। प्रपूर्वादटतेरौपसंख्यानिको यङ, द्वितीयैकाचष्टचशब्दस्य द्विर्वचनम्, हलादिशेषः, [10]'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः। ननु वचनान्तरमाश्रित्य वचनान्तरस्य प्रत्याख्याने को गुण इत्यत आह — **कार्यान्तरसिद्धय इति**। **आमिटोऽस्त्वभावातिदेश इति**। [11]'काममतिदिश्यतां वा सच्चासच्च' इत्यादिना भाष्यकारेणाभावातिदेशस्यापि स्थापितत्वात्। **फलस्य चेति**। इट्प्रतिषेधोऽपि प्रयोजनमित्यर्थः। **प्रोर्णोनूयत**

---

[1] एतद्वचनमाश्रित्य — ङ.

[2] प्रदीपे 'यथोक्तं हरिणा' इत्यत्र 'तदुक्तं हरिणा' इति पाठोऽभिमत इति भाति।

[3] 'समूहश्च तथाभूतः' इति प्रदीपे वाक्यपदीयश्लोकः परिदृश्यते। वाक्यपदीये तु 'समूहः स तथाभूतः' इति समुपलभ्यते। निर्णयसागरमुद्रिते च प्रदीपेऽधो निर्दिष्टोऽयं पाठः।

[4] कीदृशः — ङ.

[5] प्रधानरूपायाः — ङ.

[6] वाक्यपदीयश्लोकः हरयाणामुद्रिते प्रदीपे 'अनन्तरफलम्' इति समस्ततयोपलभ्यते। 'अनन्तरं फलम्' इति व्यस्ततया वाक्यपदीये, निर्णयसागरमुद्रिते प्रदीपे च दृश्यते।

[7] यतश्च — ङ.

[8] विचलनस्य — ङ.

[9] 'न' इति नास्ति — ङ.

[10] पा. सू. ७.४.८३.

[11] महाभाष्यम् १.१.५७.

इति। प्रपूर्वादूर्णोतेर्यङि द्वितीयैकाचः [1]'न न्द्राः संयोगादयः' इति वचनाद्रेफवर्जितस्य [2]'पूर्वत्रा-सिद्धम्' इति णत्वस्यासिद्धत्वान्नुशब्दस्य द्विर्वचनम्। **प्रोर्णुनावेति**। अत्र णुवद्भावात् [3]'इजादेः' इत्याम् न भवति। **प्रोर्णुत इति**। अत्रैकाच्त्वाभावेऽपि [4]'श्र्युकः किति' इतीण्निषेधः। **क्रिया-समभिहारस्येति**। पौनःपुन्यस्येत्यर्थः। [5]तर्ह्यत्र विषये कदाचिदपि द्विर्वचनं न प्रयोक्तव्यमिति, नेत्याह — **यदा त्विति**। यदा भृशार्थे यङ तदा पौनःपुन्यविवक्षायां [6]द्विर्वचनं भवतीत्यर्थः। 'स भवानीहस्वेहस्व' इत्यत्र कथं धातुसंबन्धः, भेदपूर्वकत्वात् [7]तस्य, अत्र च धात्वर्थयोर्भेदाभावा-दित्याशङ्क्याह — **सामान्येति**। लोडन्तवाच्योऽर्थः सामान्यम्, अनुप्रयुज्यमानवाच्यो विशेष इति तयोः संबन्धो धातुसंबन्ध इत्यर्थः। **लोटश्च केवलस्येति**। यथा केवलस्य यङः क्रियासमभि-हाराभिव्यञ्जने सामर्थ्यम्, न तथा लोटः, शब्दशक्तिस्वाभाव्यादिति भावः। **लोड् बहिरङ्ग इति**। यङ त्वन्तरङ्गः, क्रियासमभिहारमात्रापेक्षणात्॥

नित्यं कौटिल्ये गतौ ३.१.२३.

लुपसदचरजपजभदहदशगृभ्यो भावगर्ह्यायाम् ३.१.२४.

[३, ७८–७९]

(उद्द्योतनम्) वार्तिके **विग्रहेण** वाक्येन, प्रत्ययवाच्यविशेषासंप्रत्ययाद्वाक्यनिवृत्त्यर्थं नित्यग्रहणं व्यर्थमित्युक्तम्। तदुपपादयति — **चङ्क्रम्यत इति**। **योऽर्थः** गमनकौटिल्यरूपः। **नासाविति**। कुटिलं पन्थानं [8]गच्छतीत्यर्थः प्रतीयते, न तु गतिगतं [9]कौटिल्यमित्यर्थः। **तदर्थः** यङर्थः। **अर्थान्तरे** कुटिलं पन्थानं गच्छतीत्यादिरूपे। न्यायसिद्धमेतत्, न तु वाचनिकमित्याह — **तत्रेति**॥

[३, ७८–७९]

(रत्नप्रकाशः) नित्यग्रहणं यङो वैकल्पिकत्ववारणार्थमिति मत्वाह — **उत्तरयोरिति**। **न हीति**। यस्य मते नित्यग्रहणं यङो वैकल्पिकत्ववारकं तस्य मते 'कुटिलं क्रामति' इत्युक्ते 'चङ्-क्रम्यते' इत्यस्यार्थो गम्यत एव। किं तु तस्यासाधुत्वादप्रयोगः। वार्तिककारमते तु [10]तदर्था-बोधकत्वादप्रयोगः। सूत्रकाराशयमबुद्ध्वा यत्किंचिदेव वार्तिककारेणोक्तमिति सूत्रकाराशयं प्रकट-यितुमाह — **अथैतेभ्य इति**। गत्यर्थादिभ्य इति शेषः। उत्तरमाह — **क्रियासमभिहारे चेति**। तथा च नित्यग्रहणं कौटिल्याद्यर्थ [11]एवैतेभ्यो यङित्यवधारणार्थं सत् [12]समभिहारे यङं व्यावर्तय-

---

[1] पा. सू. ६.१.३.
[2] पा. सू. ८.२.१.
[3] पा. सू. ३.१.३६.
[4] पा. सू. ७.२.११.
[5] तर्ह्यत्रविषये — ङ.
[6] 'द्विर्वचनम्' इत्यस्यानन्तरम् एवकारोऽधिकः — ङ.
[7] संबन्धस्येत्यर्थः।
[8] गच्छतीत्यत्र प्रतीयते — अ.
[9] कुटिलमित्यर्थः — अ.
[10] तदर्थबोधकत्वात् — प, ब.
[11] एव तेभ्यः — प.
[12] क्रियासमभिहार इत्यर्थः॥ समभिव्याहारे — प, ब.

तीत्युक्तप्रायम्। एवं च कौटिल्यादौ यङ् वैकल्पिक एव भवतीति 'कुटिलं क्रामति' इत्यादि-वाक्यमपि तत्र भवतीति सिद्धम्॥

[३, ७८–७९]

(नारायणीयम्) 'विग्रहेण विशेषासंप्रत्ययात्' इति हेत्वर्थस्फुटीकरणाय 'न हि' इत्यादिभाष्यम्। तद्व्याचष्टे — **चङ्क्रम्यत इति**। गतिकौटिल्यं हि वृत्तितो नियतमवगम्यते। वाक्ये तु कुटिलं पन्थानं गच्छति, कुटिलं वा कर्म करोतीत्याद्यर्थान्तरमपि प्रतीयत इत्यर्थः। **अर्थान्तरे चेति**। समानार्थस्यैव वाक्यस्य वृत्त्या बाधः संभाव्यत इत्यर्थान्तरे वर्तमानस्य तया निवारणमशक्यमिति तदर्थं नित्यग्रहणं न कर्तव्यमित्यर्थः। एतेभ्यः क्रियासमभिहारे कथं यङ् न भवतीत्याशङ्क्य वार्तिककारस्याशयं दर्शयति — **तक्रकौण्डिन्यन्यायेनेति**। धातुमात्रात् क्रियासमभिहारे यङ् विहितः। गतिवचनात्तु कौटिल्ये लुपादिभ्यो भावगर्हायामिति॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३.१.२५.

[३, ७९–८०]

(उद्द्योतनम्) [1]नन्वापुग्विधानसामर्थ्यात् टिलोपाभावे इष्टसिद्धेरनेकमतोपन्यासो व्यर्थः, अत आह — [2]**आचार्याणामिति**। न त्वापुक्यनुपपत्त्येत्याशयः। **तत्र पररूप इति**। [3]तत्राकारान्तस्यागागमविधानं टिलोपबाधनार्थं संपद्यत इत्यर्थः। **तस्याः वृद्धेः**। [4]**तद्बाधनार्थम्** वृद्धि-[5]बाधनार्थम्। न च टिलोप[6]बाधनार्थत्वम्, विनिगमकाभावात्, तस्यापुगादिसाधारणत्वाच्चेति भावः। [7]आपुटि विशेषमाह — **तस्येति**॥

[३, ७९–८०]

(रत्नप्रकाशः) पाशादीनां [8]'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धो णिजिति प्रपञ्चार्थमेव तेषां ग्रहणम्। सत्यशब्दस्य तु कार्यविशेषनिपातनार्थं ग्रहणमिति मनसि निधाय पृच्छति — **सत्यापेतीति**। **टिलोप इति**। [9]'णाविष्ठवत्' इत्यतिदेशादिति भावः। **पुगिति**। [10]'अचो ञ्णिति' इति वृद्ध्युत्तरम् [11]'अर्तिह्रीव्ली' इत्यादिनेति शेषः। **आक् करिष्यत इति**। अत्राग्निपात्यते,

---

[1] नन्वपुग्विधान — अ; ननु पुग्विधान — ऋ, लृ.

[2] प्रदीपे 'आचार्यमतभेद' इत्यत्र 'आचार्याणां मतभेद' इत्यन्नंभट्टपाठ इति प्रतीयते।

[3] तत्राकारान्तस्य पुगागम — अ, ऋ, लृ.

[4] तत्साधनार्थम् — अ; तत्साधनार्थः — ऋ, लृ.

[5] साधनार्थः — अ, ऋ, लृ.

[6] साधनार्थत्वम् — अ, ऋ, लृ.

[7] आपुटो विशेषमाह — लृ.

[8] चुरादिगणसूत्रम्.

[9] का. वा. ६.४.१५५-१.

[10] पा. सू. ७.२.११५.

[11] पा. सू. ७.३.३६.

अर्त्यादिना पुग् भविष्यतीति भावः। **अगिति**। ततः पररूपे वृद्धौ [1]पुग् भविष्यतीति भावः। **अनाकारान्तत्वादिति**। [2]"अतो गुणे' इति पररूपोत्तरं वृद्धिर्न भविष्यति, अग्विधानानर्थक्यापत्तेरिति भावः। **आडिति**। णिच इति शेषः। [3]**अनङ्गत्वादिति**। आडन्तस्येति शेषः। **पुङ्न प्राप्नोतीति**। तथा च टिलोपे णेर्गुणे 'सत्यायति' इति स्यादिति भावः। **आपुडिति**। णेरिति शेषः। ततष्टिलोपे सिद्धं सत्यापयतीति [इति] भावः। ननु णिचो विधेयत्वेन प्रकृतिसंगतस्यापो णित्वं प्रत्यागमत्वकल्पनं युक्तिमन्न भवतीत्यत आह — **अथवेति**। ननु परत्वाट्टिलोपं बाधित्वा वृद्धिर्जायत एवेति पुङ्मात्रमेव निपातनीयमिति चेत् ओमित्याशयेनाह — **अथवेति**। आगागम एव टिलोपबाधकत्वेन विधेयः, पुगागम एव [4]"अर्ति' इत्यादिना भविष्यतीत्यपि कल्पयितुं शक्यते, उपायस्योपायान्तरादूषकत्वादित्याशयेनाह — **अथवेति**। तथा च पुगागमो वा आगागमो वैको निपातनीय इति फलितम्। आपुगागमस्तु न निपात्यते, लक्षणान्तरेणासिध्यत एव सिद्धवदुच्चारणस्य निपातनपदार्थत्वेन वदतो व्याघातापत्तेः। एतदभिप्रायेणैव हि [5]"यस्य' इति सूत्रे इकारस्येति परे लोपो भवतीत्यस्य 'अतिसखेरागच्छति, अतिसखेः स्वम्' इत्युदाहरणमित्युक्तं भगवता। अन्यथा [6]"सख्यशिश्वीति भाषायाम्' इत्यत्र [7]ङीषिवेकारलोपोऽपि निपातित इति वक्तुं शक्यत्वेनायुक्तमेव ॥

[३, ७९–८०]

(नारायणीयम्) नन्वेकेनैवागमेन रूपस्य सिद्धत्वात् किमागमान्तरोपन्यासप्रयासेनेत्यत आह — **आचार्येति**। नन्वकि सति कथं सत्यापयतीति रूपं सिध्येदित्यत आह — **तत्र पररूप इति**। टित्करणे कथमिष्टसिद्धिरित्यत आह — **तस्य चेति**॥

हेतुमति च ३.१.२६.

[३, ८०–८६]

(उद्द्योतनम्) हेतुशब्दार्थमाह — **कृत्रिमस्येति**। **इह** सूत्रे। पारिभाषिकस्य [8]हेतोर्ग्रहणमित्यन्वयः। कः पारिभाषिक इत्यत उक्तम् — **प्रयोजकस्येति**। तस्य ग्रहणे हेतुः — **कृत्रिमस्येति**। मत्वर्थमाह — **तदीय इति**। आर्यस्य निकृष्टं प्रति स्वेष्टकर्तव्य[9]ज्ञापनं **प्रेषणम्**। एतदेव निकृष्टस्योत्कृष्टं प्रति **अध्येषणम्**। **तत्समर्थ** प्रेषणाध्येषणानुकूलाचरणेत्यर्थः। [10]प्रेषणादेर्मत्वर्थत्वाभावं शङ्कते — **नन्विति**। 'तत्प्रयोजकः' इत्यत्र प्रधानक्रियाकर्तुस्तच्छब्देनोपादानादित्यर्थः। **नैष इति**। प्रधानव्यापारस्य धातुनैवोक्तत्वात् तत्र णिचः प्रयोजनाभावात् हेतुम-

---

[1] पुग्न भविष्यतीति — ब.
[2] पा. सू. ६.१.९७.
[3] भाष्ये 'अनाङ्गत्वात्' इति दृश्यते। उपरि शेषपूरणाज्ज्ञायते 'अनङ्गत्वात्' इति पाठोऽभिमत इति।
[4] पा. सू. ७.३.३६.
[5] पा. सू. ६.४.१४८.
[6] पा. सू. ४.१.६२.
[7] ङीषिवेकारे लोपोऽपि — प, ब.
[8] धातोर्ग्रहणमित्यन्वयः — अ.
[9] ज्ञपनम् — अ; ज्ञानम् — ऋ, लृ.
[10] प्रेषणादेर्मत्वर्थाभावं — अ.

तीत्यनुक्तावपि णिचः स्वार्थिकत्वोपपत्तेः 'प्रयुक्तः पचति' [१]इत्यस्मिन्नर्थे पाचयतीति प्रयोगदर्शनाच्च नात्र पाकादेर्हेतुमच्छब्देन ग्रहणमित्यर्थः। तर्हि प्रयोज्यो [२]हेतुमानस्तु, अत आह — **प्रयोज्योऽपीति**। **स्वभावतः** शब्दशक्तिस्वाभाव्यात्। **करणेति**। [३]'शब्दवैर' इत्यतः। कथं तर्हि स्वव्यापारं प्रति हेतुव्यपदेशाभावे हेतुमच्छब्देन तस्य ग्रहणम्, अत आह — **तस्मादिति**। लब्धः पाकाद्यपेक्षो हेतुव्यपदेशो येन, स चासौ हेतुत्वोपलक्षितो यः प्रयोजकः तस्य साध्यो व्यापार इति विग्रहः। हेतुत्वस्य [४]प्रेषणादि[५]निमित्तकत्वाभावेऽपि पाकादिनिमित्तहेतुत्वाश्रयसंबन्धित्वं [६]प्रेषणादेरस्तीति तस्यैवेह ग्रहणमिति भावः। प्रत्ययार्थत्वं तावदुपपादयति — **यदेति**। **संपद्यत इति**। [७]तथा च प्रकृत्यनभिहिते प्रेषणस्वरूपे करणे णिजित्यर्थः। प्रकृत्यर्थत्वमुपपादयति — — **यदा त्विति**। यथा अधिश्रयणादीनां पाकार्थतया [८]स्ववाच्यत्वं तद्वत् प्रयोजकव्यापारस्यापि। 'अनेकार्थत्वात्' [९]इति हेतुमन्मात्रमिति ज्ञेयम्। **यथेति**। तत्र [१०]कृषतिः प्रयोजक एव प्रयुज्यते। [११]तदा स्वार्थिको णिजित्याह — **तदा त्विति**। अर्थस्य णिच्प्रकृतित्वासंभवादाह — [१२]**हेतुमदिति**। सूत्रे कारकोपादानाभावादाह — **कारकशब्देनेति**। तत्र कारकशब्दं वर्तयति — **स हीति**। प्रत्ययार्थोपादानं प्रत्ययार्थपरिग्रहार्थमिति पौनरुक्त्यं हेतुहेतुमद्भावानुपपत्तिं वा परिहरति — **प्रत्ययस्येति**। प्रत्ययस्य प्रयोजनं प्रकृत्यतिरिक्तार्थज्ञानम्, तत्सिद्धये प्रत्ययार्थत्वमुपात्तमित्यर्थः। अर्थशब्दस्याभिधेयपरत्वेऽप्याह — **अथवेति**। अन्वयव्यतिरेकावाश्रयौ यस्या व्यवस्थायाः सा व्यवस्था यस्यार्थस्य तत्त्वादिति विग्रहः। प्रकृतिप्रत्ययसमुदायादर्थप्रतीतावपि [१३]तदागमन्यायेन व्यवस्था। प्रकृते णिच्युत्पन्ने प्रेरणादिप्रतीतेरन्यथाप्रतीतेस्तदर्थत्वमेव युक्तम्। तथा च प्रत्ययार्थत्वे [१४]न्यायोऽनुसृतो भवतीति भावः। अत्र 'शो तनूकरणे' इति पाठात् प्रकृत्यर्थत्वमेव, न तु प्रत्ययार्थत्वमिति कथमयं दृष्टान्तः, अत आह — **यदेति**। **कर्तेति**। बाहुलकात् कर्तरि ल्युडिति भावः। सार्वधातुकशब्देन तिङुच्यते, [१५]तेन विकरणव्यावृत्तिः। **इति** [१६]**व्याख्यानम्** इत्युक्तरीत्या द्वेधा दृष्टान्तव्याख्यानम्। वैधर्म्यदृष्टान्ते प्रकृतोपयुक्तमर्थमाह — **यथेति**। वैधर्म्यदृष्टान्तपक्षे शङ्कानुत्थानादाह — **परस्त्विति**। तनूकरणस्य प्रकृत्यर्थत्वपक्ष एव साधर्म्यदृष्टान्त उक्त इति भ्रान्तः सन्नित्यर्थः। [१७]**सार्वधातुकार्थत्वं चेति**। तनूकरण[१८]शब्देन कर्त्रभिधाने विकरणस्य तदर्थ-

---

[१] इत्युक्ते — ऋ.

[२] 'हेतुमान्' इत्यस्यानन्तरम् 'अस्मिन्नर्थे' इत्यधिकम्।

[३] पा. सू. ३.१.१७.

[४] प्रेरणादि — ऋ, लृ.

[५] निमित्तत्वाभावेऽपि — अ.

[६] प्रेषणादेरस्त्विति तस्यैव वा ग्रहणमिति — अ.

[७] तदा च — ऋ.

[८] स्वशब्देन पाकवाचकपचिधातुर्विवक्षितः॥ पाकार्थतयास्य वाच्यत्वम् — अ.

[९] इति तुमुन्मात्रमिति — अ, ऋ, लृ.

[१०] कृषतिप्रयोजक एव — अ, ऋ, लृ.

[११] तथा — अ.

[१२] हेतुमतीति — अ, ऋ, लृ.

[१३] मीमांसाचतुर्थाध्यायप्रथमपादे 'शब्दवत्तूपलभ्यते, तदागमे हि तद् दृश्यते तस्य ज्ञानं हि यथान्येषाम्' इति सूत्रेण बोधितस्तदागमन्यायः।

[१४] न्यायोऽनुगृहीतो भवतीति — लृ.

[१५] नैकेन विकरण — अ; नैतेन — ऋ, लृ.

[१६] व्याख्यातम् — अ.

[१७] प्रदीपे 'सार्वधातुकत्वं च मन्यमानः' इत्यत्र 'सार्वधातुकार्थत्वं च मन्यमानः' इत्यन्नंभट्टपाठ इति भाति॥ सार्वधातुकार्थत्वं वेति — ऋ.

[१८] शब्दे कर्त्रभिधाने — ऋ.

त्वमुक्तम्, तस्य प्रकृत्यर्थत्वे विकरणस्य नैरर्थक्यात् तिङामेव कर्त्राद्यर्थ इत्यर्थः। ननु [1]तदागमन्यायेन प्रेषणादेर्णिजर्थत्वात् 'अस्तु' इत्ययुक्तम्, अत आह— **विनेति**। तथा च तदागमन्यायोऽत्र नास्तीति भावः। तर्हि 'पचति' इत्युक्तेऽपि पाचयत्यर्थः प्रतीयते, अत आह— **पचतीत्यादाविति**। 'हलैः कृषति' इत्यत्र पञ्चानां युगपदेकेन व्यापारयितुमशक्यत्वात् [2]प्रत्येकमेकैकस्यैकैकः प्रयोज्यकर्तास्तीति कृषतीत्येकवचनबलात् प्रयोजककर्तर्येव स प्रयोग इति निश्चयाण्णिजभावेऽपि तद्व्यापार एवावगम्यते। अन्यत्र तु द्योतकणिजपेक्षेति भावः। ननूक्तादिभिः प्रेषणादेरुक्तत्वाण्णिज् न भविष्यति, अत आह— [3]**प्रकृत्यर्थेति**। ननु [4]"शब्दवैर' इत्यतः करण इति वर्तते। तस्मिन् प्रकृत्यनभिहिते णिच्। तथा च प्रकृत्यभिहित एवेति कथमुच्यते, अत आह— [5]**हेतुमदिति**। 'हेतुमति' इति करणविशेषणम्। तथा च विशिष्ट एव प्रकृत्यर्थ इति भावः। **यस्येति**। [6]प्रकृत्यर्थपक्षे णिज् द्योतकोऽङ्गीक्रियते। तस्यान्यथासिद्धौ णिज् न प्रयुज्यत इत्यर्थः। प्रकृत्यर्थपक्षे दोषाभिधानाय 'इह तर्हि' इति भाष्यम्। तत्र कर्तृद्वयस्याभिधानप्रसङ्गमुपपादयति— **धातुवाच्यस्येति**। ननु पाचयतिना कथं प्रयोज्यव्यापाराभिधानम्, अत आह— **णिजिति**। **द्योतकः** न तु प्रयोज्यव्यापारस्य निवर्तकः। ननु प्रयोज्यप्रयोजककर्त्रोर्भिन्नकक्ष्यतया कथमेकेन [7]लेनाभिधानम्, अत आह— **धातुवाच्येति**। [8]धातुवाच्यत्वेन व्यापारसाम्ये कर्तृत्वस्यापि साम्यमित्यर्थः। उभयोरभिधाने को दोषः, अत आह— **तत इति**। न केवलं तृतीयानुपपत्तिः, पाचयतीत्येकवचनमपि न स्यादित्यर्थः। स्वार्थप्राधान्यात् तत्कर्तुः प्राधान्यमित्याह— **प्रकृत्यर्थेति**। बहुव्रीहिः। ननु प्रयोज्यव्यापारस्यापि गमिवाच्यत्वात् तत्कर्तरि प्रयोज्ये क्त इष्ट एव, अत आह— **प्रयोज्यस्य त्विति**। प्रयोज्ये कर्मप्रत्यय एवेष्यते, न तु कर्तृप्रत्ययः। ततश्च प्रयोजककर्तरि क्तः स्यादित्यर्थः। ननु ग्रामस्यापि कर्मत्वात् तत्र क्तः किं न स्यात्, अत आह— **तदुक्तमिति**। अण्यन्तावस्थायां यः कर्ता स ण्यन्तस्य कर्म, तत्रैव लादयः स्युरित्यर्थः। ननु प्रयोज्यव्यापारस्य हिंसात्वात् तद्व्यतीहारे सिद्धान्तेऽपि निषेध इष्ट एव, अत आह— **प्रयोजकव्यापारस्येति**। **तद्व्यापारेण** ण्यर्थप्रयोजकव्यापारेण। नन्वेवं प्रयोज्यस्य कर्मत्वे पूर्वं कर्तरि प्रत्ययः कथमापादितः, अत आह— **प्रकृत्यर्थेति**। ननु प्रयोज्यव्यापारस्य गमनस्य ग्रामः कर्मेति द्वितीयाचतुर्थ्यौ स्याताम्, अत आह— **ण्यर्थस्यैवेति**। करोतिकर्मत्वे षष्ठीसिद्धिमाशङ्क्याह— [9]**ण्यर्थेति**। करोत्यर्थकर्मत्वाभावादिति यावत्। ननूपस्कारयतीत्यत्र [10]"उपात् प्रतियत्न' इति सुड् न स्यादिति कुतो नापादितम्, अत आह— **सुट् त्विति**। तत्र कृधातुमात्रं[11] विवक्षितम्, न तदर्थप्राधान्यमिति भावः। **नाचूचुदत्** न चोदितवान्। अप्राप्तौ हेतुः— **तस्येति**। नन्वमेः [12]स्वर्थविशेषकत्वे षत्वं स्यादेव, अत आह— **ण्यर्थस्येति**। 'सिद्धे सत्यारम्भो नियमार्थः'

---

[1] मीमांसाचतुर्थाध्यायप्रथमपादे 'शब्दवत्तूपलभ्यते, तदागमे हि तद् दृश्यते तस्य ज्ञानं हि यथान्येषाम्' इति पञ्चदशेन सूत्रेण प्रतिपादितोऽयं न्यायः।

[2] प्रत्येकमित्यस्यैव विवरणम्— एकैकस्येति।

[3] प्रदीपे 'प्रकृतिविशेषणपक्षे' इत्यत्र 'प्रकृत्यर्थविशेषणपक्षे' इति पाठोऽन्नंभट्टस्येति प्रतीयते।

[4] पा. सू. ३.१.१७.

[5] हेतुमतीति — अ, ऋ, लृ.

[6] 'प्रकृत्यर्थपक्षे' इत्यादि 'णिज् न प्रयुज्यत इत्यर्थः' इत्यन्तं नास्ति — अ.

[7] लकारेणेत्यर्थः॥ तेनाभिधानम् — अ.

[8] धातुव्यापारसाम्ये — ऋ.

[9] प्रदीपे 'ण्यर्थस्य कर्मत्वादिति भावः' इत्यत्र 'ण्यर्थकर्मत्वादिति भावः' इत्यन्नंभट्टपाठ इति भाति।

[10] पा. सू. ६.१.१३९.

[11] मात्रमविवक्षितम् — ऋ, लृ.

[12] सुधात्वर्थेत्यर्थः।

इति सिद्धिमाह — **ण्यर्थस्येति**। 'प्राधान्यात्' इति कर्तृसंज्ञया कर्मसंज्ञाया अबाधार्थमुक्तम्। तदेव शङ्कापूर्वकं विशदयति — **न चेति**। नन्वेवं प्रयोज्यकर्तरि तृतीयापि न स्यात्, अत आह — **नियमेन त्विति**। गुणक्रियायां स्वव्यापारे स्वातन्त्र्यात् कर्तापि सन् प्रेषणे प्रयोजकव्यापारे प्रधाने कर्मतां गतः नियमात् कर्मसंज्ञाया निवृत्तौ स्वधर्मेण [1]कर्तृत्वेनाभिधीयत इति योजना। तात्पर्यार्थमाह — **ग्राम इति**। [2]**साधनविशिष्टां** [ग्राममित्यादिसाधनविशिष्टाम्] **असौ** प्रयोज्यः। 'क्रियां प्रेष्यते' इत्यत्र क्रियामिति [3]द्वितीयां प्रपूर्वस्येषेः प्राप्त्यर्थत्वमङ्गीकृत्य प्रयोज्यप्रयोजकव्यापार[4]द्वयप्रदर्शनेनोपपादयति — **ग्रामकर्मिकामिति**। **प्रेष्यतीति**। [5]'इषु गतौ' इति दैवादिकस्य रूपम्। एवं प्रयोज्यव्यापारं प्राप्तिरूपमुक्त्वा प्रापणरूपं प्रयोजकव्यापारमाह — [6]**स एवेति**। प्रयोज्य इत्यर्थः। प्रेष्यत इत्यस्य प्राप्यत इत्यर्थकथनम्। उभयत्रापि ण्यन्तात् कर्मणि लकारः। प्रयोज्यस्य स्वव्यापारे कर्तृत्वस्य सांप्रतिकत्वात् 'कर्तृभूतपूर्वः' इत्ययुक्तम्, अत आह — [7]**प्रधानचरेऽपीति**। भाष्ये **कृद्ग्रहणस्य** [8]'कर्तृकर्मणोः कृति' इति सूत्रस्थस्य। 'ण्यर्थस्योपसर्गो विशेषकः' इत्युक्तं निराह — **न प्रयोजकेति**। 'युक्तं पुनः' इत्यनेन किमाक्षिप्यते, अत आह — **संदेह एवेति**। विक्लित्तेः प्राधान्ये हेतुमाह — **तदर्थत्वादिति**। णिचो वैयर्थ्यं निराह — **द्योतक इति**। अतिप्रसङ्गं निराह — **न चेति**। **धातोश्चेति**। यद्यपि 'गडि वदनैकदेशे' 'चिती संज्ञाने' 'णश अदर्शने' इत्यादेर्द्रव्यगुणाभावाभिधायकत्वम्, तथापि यत् सिद्धमसिद्धं वा पूर्वापरीभूतावयवत्वेन साध्यतया शब्देनाभिधीयते सा क्रियेहाभिमता। तदुक्तं हरिणा —

[9]यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥ इति॥

धातुना च शब्दशक्तिस्वाभाव्यात् साध्यरूपक्रियैवाभिधीयते, न सिद्धरूपम्, सिद्धरूपस्य कारकत्वात् न कारकाणां धातुवाच्यत्वमिति भावः। फलमनन्तरं यस्य व्यापारस्य तदुपलक्षणमित्यर्थः। [10]**तस्याः** विक्लित्तेः। आहुरित्यस्वरसबीजं तु 'ओदनं पचति' इत्यत्र विक्लित्तिः पचेरर्थः, अन्यत्र त्वर्थान्तरम्, धातूनामनेकार्थत्वादिति। अत्र विध्यर्थत्वासंभवादाह — **संभावन इति**। अनेन विचारहेतुसंशय उपपादित इति वदन् सिद्धान्तमाह — **अत एवेति**। तत्र हेतुः — **तद्द्योषाणामिति**। द्वितीयपक्षमपि स्थापयति — **अथवेति**। प्रयोज्यव्यापारः उपसर्जनं यस्येति बहुव्रीहिः। [11]प्रत्ययद्योत्यतयापि तस्य प्राधान्यमाह — **तस्यैवेति**। **नाप्रधान इति**। [12]प्रधानाप्रधानसंनिधिन्यायात्। 'गमितो ग्रामं देवदत्तो यज्ञदत्तेन' इत्यत्र प्रयोजककर्तरि क्तप्रसङ्गं निराह — **णिचेति**। **निर्वर्तितमिति**। न हि गमना गतिशब्दवाच्या भवतीति भावः। **न त्विति**। [13]यत्र हिंसा प्रधानतया धात्वर्थस्तत्रैव निषेध इति भावः॥

---

[1] कर्तृत्वेनावतिष्ठत इति — अ.
[2] साधनविशिष्टं — अ, ऋ, लृ.
[3] 'द्वितीयाम्' इति नास्ति — अ.
[4] द्वयदर्शनेनोप — ऋ.
[5] 'इष गतौ' इति माधवीयधातुवृत्तौ कौमुद्यां च दृश्यते॥ इषु सर्पण इति — अ.
[6] प्रदीपे 'स च प्रेष्यते' इत्यत्र 'स एव प्रेष्यते' इत्यन्नंभट्टपाठ इति भाति।
[7] प्रधानव्यापार इति — अ, ऋ, लृ.
[8] पा. सू. २.३.६५.
[9] वाक्यपदीयम् ३.८.१.
[10] प्रदीपे 'तस्यासंभवात्' इत्यत्र 'तस्या असंभवात्' इत्यन्नंभट्टपाठ इति भाति।
[11] प्रत्ययद्योत्यस्य प्राधान्यमाह — ऋ, लृ.
[12] परिभाषा १०६.
[13] यत्र हि प्रधानतया — ऋ, लृ.

[३, ८०–८६]

(**रत्नप्रकाशः**) [1]'तत्प्रयोजको हेतुश्च' इति यस्य हेतुसंज्ञा विहिता सोऽस्यास्तीति हेतुमान् हेतुव्यापारः प्रेषणाध्येषणादिः। **कथमिदमिति**। उभयथा संभवात् प्रश्नः। अयं विचारो न युक्त इत्याक्षिपति — **युक्तं पुनरिति**। युक्तं किमित्यर्थः। न युक्तमिति भावः। कुत इत्यत आह — **नन्वनेनेति**। अनेन हीत्यर्थः। **हेतुमतीत्युच्यत इति**। हेतुमतीति सप्तमीनिर्देशः क्रियत इत्यर्थः। **हेतुमत इत्येव ब्रूयादिति**। हेतुमतो वाचकाद् धातोर्णिजिति सूत्रार्थसंभवादिति भावः। समाधत्ते — **नैतदिति**। **कारकोपादानमिति**। हेतुमतीति सप्तम्यन्तोपादानमित्यर्थः। **प्रत्ययार्थपरिग्रहार्थमिति**। प्रत्ययार्थनिदर्शनार्थमित्यर्थः। एतेन 'प्रत्ययस्यार्थः प्रयोजनं स सुष्ठु परिगृहीतः परिपूर्णो भवति, वाचकत्वात् प्रत्ययस्य। [2]प्रकृतिविशेषणत्वे तु प्रत्ययस्यानुवादकत्वाद् द्योतकत्वात् प्रयोजनमपरिपूर्णं स्यादित्यर्थः' इति निरस्तम्। तस्य भाष्यस्य तदर्थकत्वासंभवात्। **एवं सतीति**। एवं सत्येवेत्यर्थः। प्रकृत्यर्थस्तु हेतुमत इत्युक्तेऽपि निर्दिशितो भवतीति भावः। **तनूकरणमुपादीयत इति**। तनूकरणशब्दप्रकृतिकं सप्तम्यन्तमुपादीयत इत्यर्थः। यत्तु 'यदा विकरणार्थाः कर्त्रादय इति पक्षस्तदा तनूकरणशब्देन कर्ताभिधीयते, तदा साधर्म्येण दृष्टान्तः। यदा तु सार्वधातुकार्थाः कर्त्रादय इति पक्षस्तदा वैधर्म्येण दृष्टान्त इति व्याख्यानम् — यथा तनूकरणं प्रकृत्यर्थो न तथा हेतुमद्व्यापार इत्यर्थः' इति। तत्तुच्छम्, कर्त्रादीनां सार्वधातुकार्थत्वपक्ष एव तनूकरणं विकरणवाच्यं वा विकरणद्योत्यं वेति संदेहसंभवेन विकरणवाच्यमित्याश्रयेण तस्य समानाधिकरणदृष्टान्ततास्वीकारात् 'तनूकरणशब्देन कर्तोच्यते' इत्यत्र मानाभावात्। तनूकरणस्य प्रकृत्यर्थताश्रयेण तद्दृष्टान्तेन हेतुव्यापारस्य धात्वर्थताया वक्ष्यमाणत्वेनात्र व्यधिकरणदृष्टान्ताश्रयणानौचित्याच्च। **यदि तर्हीति**। यदि तनूकरणं दृष्टान्ततयाश्रीयते तर्हि हेतुमतीति प्रकृत्यर्थविशेषणमेव भवति। प्रकृत्यर्थविशेषणतयैव हि तनूकरणं [3]तत्र व्यवस्थापितमित्यर्थः। एतेन 'परस्तु साधर्म्येण दृष्टान्तं [4]सार्वधातुकार्थत्वं च कर्त्रादीनां मन्यमानः प्राह' इति निरस्तम्। पूर्वग्रन्थेऽपि कर्त्रादीनां सार्वधातुकार्थत्वाश्रयेण [5]समानाधिकरणस्यैव दृष्टान्तस्योक्तत्वात्। [6]तत्र स्वस्यैव प्रमादाच्च। मध्यस्थः कश्चिदाह — **अस्त्विति**। वार्तिककार आह — **इह हीति**। दोष इत्यनुषज्यते। **णिच् प्राप्नोतीति**। यथा पाचयतीत्यादौ प्रकृत्याभिहिते हेतुमति णिच् जायते तथा उक्त[7]प्रेषितादिशब्दैरभिहितेऽपि तस्मिन् सति 'उक्तः कार्यते' इति स्यादिति मन्यते। स्वपक्षे स दोषो नेत्याह — **प्रत्ययार्थविशेषण इति**। परिहरति भगवान् — **यत्र हीति**। 'कार्यते' इत्यत्र णिजभावे हेतुमान् न गम्यत इति भवति तत्र णिच्। 'उक्तः करोति' इत्यादौ तूक्त[8]प्रेषितादिशब्दैर्हेतुव्यापारस्योक्तत्वेन प्रयोजनाभावात् तत्र णिज् न भवतीत्यर्थः। **उभयोः कर्त्रोरिति**। प्रयोज्यप्रयोजकयोरिति शेषः। **अभिधानं प्राप्नोतीति**। धातूपात्तव्यापाराश्रयत्वाविशेषेण तयोर्गुणप्रधानभावाभावादिति शेषः। तथा च 'पाचयत्योदनं देवदत्तो यज्ञदत्तः' इत्युभयत्र प्रथमा स्यादिति भावः। **प्रधानकर्ता लेनेति**। प्रत्ययार्थस्य प्रकृत्यर्थं प्रति विशेष्यत्वात्

---

[1] पा. सू. १.४.५५.

[2] प्रदीपे 'प्रकृतिविशेषणे तु' इत्यत्र 'प्रकृतिविशेषणत्वे तु' इति निर्णयसागरमुद्रितेऽधो निर्दिष्टः पाठः।

[3] 'तत्र' इति नास्ति — प.

[4] प्रदीपे 'सार्वधातुकत्वं च' इत्यत्र 'सार्वधातुकार्थत्वं च' इति पाठोऽभिमतः।

[5] साधर्म्यदृष्टान्तस्येत्यर्थः।

[6] तत्तस्यैव प्रमादात् — प.

[7] प्रेरितादि — प, ब.

[8] प्रेरितादि — प, ब.

तदाश्रयस्य कर्तुः प्राधान्यमिति स एव लेनाभिधीयते, [1]'प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययादिति भावः। **अव्यतिरिक्तो गत्यर्थ इति कृत्वेति।** गमेर्हेतुमद्वाचकत्वेऽपि गत्यर्थत्वानपगमेन तत्प्रकृतिकस्वार्थण्यन्तात् [2]हेतुकर्तरि च क्तः स्यादिति भावः। एवं भिदिच्छिद्योर्हेतुमद्वाचकत्वेऽपि हिंसार्थत्वसत्त्वेन तत्प्रकृतिकस्वार्थण्यन्तादात्मनेपदस्य निषेधः स्यादिति ज्ञेयम्। वस्तुतस्तु वार्तिककारोक्तोऽकिंचित्करोऽयं दोषः। प्रकृत्यर्थत्वेऽपि प्रयोजकव्यापारस्य प्रयोज्यव्यापारापेक्षया प्राधान्यस्य भगवत एवाभिमततया वक्ष्यमाणत्वेन प्रत्ययार्थपक्षादविशेषात्। तदेवं वार्तिककारेण प्रकृत्यर्थविशेषणत्वे निराकृते प्रत्ययार्थनिदर्शनपक्षं स्वीकरोत्यन्यः— **अस्तु तर्हीति।** तदपि दूषयत्यन्यः— **यदि प्रत्ययार्थविशेषणमिति। कर्मसंज्ञा प्राप्नोतीति।** णिजर्थेन हेतुमतेप्स्यमानत्वादिति मन्यते। **ग्रामं गमयतीति।** देवदत्तो यज्ञदत्तमिति शेषः। तत्र ग्रामस्य यज्ञदत्तस्य च ण्यर्थं प्रत्येव कर्मत्वमिति मन्यते। एवं "[3]'कृञाः प्रतियत्ने' इति षष्ठी न प्राप्नोति" इत्यत्रापि ण्यर्थकर्मत्वमुभयोर्मन्यते। प्रयोज्ये कर्तरि षष्ठी न स्यात्, तस्याप्राधान्यादिति भावः। **षत्वं न प्राप्नोतीति।** प्रधानभूतण्यर्थं प्रत्येवाभ्यादेरुपसर्गत्वादिति भावः। एतान् दोषान् क्रमेण परिहर्तुं सामान्येन प्रतिजानीते— **नैष दोष इति।** [4]**एतन्नियमार्थमिति।** [5]'तुष्यतु दुर्जनः' इति न्यायेनेदं समाधानम्। वस्तुतस्तु परया कर्तृसंज्ञया तत्र कर्मसंज्ञा बाध्यत इत्येव समाधानं ज्ञेयम्। अत्रेदमवधेयम्— प्रकृत्यर्थत्वपक्षेऽपि हेतुमतः प्राधान्यमेवोचितम्, यथा पचतीत्यादौ फलांशविक्लित्यपेक्षया व्यापारांशस्य फूत्कारादेः। तथा चोक्तशङ्कासमाधाने तत्रापि समीचीने इति। यत्तु 'प्रयोज्यव्यापारस्य प्रयोजकव्यापारापेक्षयाप्राधान्यात्[6] तत्प्रयुक्तकर्तृसंज्ञां प्रयोजकव्यापारप्रयुक्तकर्मसंज्ञा बाधते' इति। तत् तुच्छम्, अस्य प्रधानाप्रधानन्यायाविषयत्वात्। कथंचित् तन्न्यायविषयत्वेऽपि तस्य लौकिकन्यायस्य [7]'विप्रतिषेधे परं कार्यम्' इति वचनेन बाधौचित्याच्च। एतेन [8]'गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः। नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते' इति हरिकारिकापि निरस्ता। [9]'तुष्यतु दुर्जनः' इति न्यायप्रवृत्तभाष्यस्य सिद्धान्तत्वेन व्यवस्थापनानौचित्यात्। **नासावेवं प्रेष्यत इति।** तथा प्रेष्यते चेत् प्रयोज्यस्येव ग्रामस्यापि प्रयोजकव्यापारापेक्षया कर्मसंज्ञासंभवः स्यादिति भावः। **साधनविशिष्टामिति।** तथा च ग्रामो गमनस्यैव प्रयोज्यव्यापारस्य कर्मेति युज्येते द्वितीयाचतुर्थ्याविति भावः। **क्रियां प्रेष्यत इति।** क्रियां प्रति प्रेष्यत इत्यर्थः। [10]'वृद्धो यूना' इत्यत्र सहार्थकप्रयोगमन्तरेण तृतीयेवात्र कर्मप्रवचनीयप्रयोगमन्तरेण द्वितीया। एतेन 'ग्रामकर्मिकां गमनक्रियां प्रयोज्यः [11]प्रेष्यते प्राप्नोतीत्यर्थः' इति निरस्तम्। तस्य भाष्यस्य 'नासावेवं प्रेष्यते' इति पूर्वभाष्यानुसारेण 'प्रेष्यते' इति पदस्य कर्मलडन्तताश्रयेणैव व्याख्यानस्योचितत्वात्। ननु हेतुमतः प्रकृत्यर्थत्वपक्षे गत्यर्थकर्मत्वाविशेषात् 'ग्रामं गमयति देवदत्तम्, ग्रामाय गमयति देवदत्ताय' इति [12]प्रयोज्यकर्मण्यपि द्वितीयाचतुर्थ्यौ स्यातामिति चेन्न, गति-

---

[1] परिभाषा १०६.
[2] प्रयोजककर्तरि चेत्यर्थः।
[3] पा. सू. २.३.५३.
[4] तन्नियमार्थमिति — प, ब.
[5] लौ. न्या. द्वितीयभागे पृष्टम् ३५.
[6] अप्राधान्यादिति छेदः।
[7] पा. सू. १.४.२.
[8] वाक्यपदीयम् ३.७.१२७.
[9] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[10] पा. सू. १.२.६५.
[11] प्रदीपे 'प्रयोज्यः प्रेष्यति प्राप्नोतीत्यर्थः। स च प्रेष्यते प्राप्यते' इत्यत्र रत्नप्रकाशकृदभिमतः 'प्रयोज्यः प्रेष्यते प्राप्नोतीत्यर्थः' इत्येव। 'स च प्रेष्यते' इति नास्तीति प्रतीयते।
[12] प्रयोज्यकर्तृरूपे कर्मण्यपीत्यर्थः।

श्चासावर्थश्च गत्यर्थः, तस्य कर्मणीति [1]व्याख्यानेन प्रेषणकर्मणि तदभावात्। गतिरर्थो यस्य स गत्यर्थः, तस्य कर्मणीति व्याख्यानेऽप्युपस्थितपरित्यागे मानाभावेन गमनद्वारके च कर्मणि तद्विधानाच्च। **कर्तृभूतपूर्वमात्रेऽपीति।** प्रधानकर्तृभूतपूर्वेऽपीत्यर्थः। प्रयोज्यकर्ता ह्यण्यन्तावस्थायां प्रधानकर्ता भवति। एते शङ्कासमाधाने प्रकृत्यर्थत्वपक्षे [ऽपि] समाने। प्रयोज्यव्यापारापेक्षया प्रयोजकव्यापारस्य प्राधान्याविशेषात्। **नासावेवं प्रेष्यत इति।** तथा प्रेषणेऽभेर्ण्यर्थविशेषकत्वेन सुनोतिं प्रत्यनुपसर्गत्वात् षत्वं न स्यात्। **अभिषुण्वति।** तथा च सुनोत्यर्थविशेषकत्वात् तस्य तं प्रत्युपसर्गत्वात् षत्वं स्यादिति भावः। प्रकारान्तरेणोक्तविचारमाक्षिपति — **युक्तं पुनरिति।** समाधत्ते — **बाढं युक्तमिति।** युक्तत्वमुपपादयितुं पृच्छति — **इहेति। कः प्रधानार्थ इति।** फलरूपोऽर्थः क इत्यर्थः। तस्य ह्यर्थप्राधान्यं सर्वसंमतम्, युक्तियुक्तं च। **तण्डुलानां विक्लित्तिरिति।** सा हि फूत्कारादिपच्यर्थव्यापारनिर्वर्त्यत्वात् तदपेक्षया प्रधानभूता भवति। समाधाता पुनः पृच्छति — **अथेति। इदानीमिति।** विक्लित्तेः प्राधान्याभ्युपगमकाल इत्यर्थः। **तदभिसंधिपूर्वकमिति।** विक्लित्त्यभिसंधिपूर्वकमित्यर्थः। विक्लित्तिं प्रतीति यावत्। **युक्तमिति।** किमिति शेषः। [2]**य इति।** प्रतिविधेयपच्यर्थापेक्षया पुँल्लिङ्गनिर्देशः। **सर्व इति।** फूत्कारादिः प्रेषणादिश्चेत्यर्थः। **पच्यर्थ इति।** विक्लित्त्यनुकूलव्यापाररूप इत्यर्थः। अत्राक्षेप्ता निरुत्तरः। तथा च फलं प्रति प्रेषणादिकं न प्रवर्तते। किं तु फलानुकूलव्यापारं प्रति तत् प्रवर्तते। एवं च पचतीत्यत्र विक्लित्त्यनुकूलव्यापारमात्रं गम्यते, प्रेषणांशद्योतकाभावात्। पाचयतीत्यत्र तु तद्द्योतकस्य णिचः सत्त्वेन प्रेषणांशोऽपि गम्यत इत्यर्थभेदेऽपि प्रकृत्यर्थता हेतुमतो युज्यत इति सिद्धम्। यत्तु तत्र गत्यर्थकर्तरि क्तस्यापादनं तदकिंचित्करम्। गतिद्वारक एव कर्तरि तत्र प्रत्यासत्त्या क्तस्य विधेयत्वेन प्रेषणद्वारके तस्मिन् तदप्रसक्तेः। अन्यथा गत्याद्यनेकार्थकाद् दिवुधातुप्रभृतेः क्रीडादिद्वारकेऽपि कर्तरि क्तस्य प्रसङ्गाच्च। यदप्युक्तम् "व्यतिभेदयन्त इत्यादौ [3]'न गतिहिंसार्थेभ्यः' इति निषेधः प्राप्नोति" इति। तदपि 'अथेदानीम्' इत्यादिभाष्येण निराकृतप्रायमेवेति पक्षद्वयं निर्दुष्टमेवेति सिद्धम्॥

[३, ८०–८६]

(नारायणीयम्) हेतुशब्दस्य शास्त्रीयलौकिकभेदेनानेकार्थवृत्तित्वात् किमर्थस्येह ग्रहणमिति विशये तन्निर्णयार्थमाह — **कृत्रिमस्येति।** इह सूत्रे पारिभाषिकस्य हेतोर्ग्रहणम्, न तु लौकिकस्य फलसाधनयोग्यस्य पदार्थस्य। कोऽसौ पारिभाषिको हेतुरित्यत उक्तम् — [4]**प्रयोजकस्य हेतोरिति।** स्वतन्त्रस्य कर्तुः प्रयोजकस्येत्यर्थः। तस्य ग्रहणे हेतुः — **कृत्रिमस्येति।** असति बाधके कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणस्य युक्तत्वादित्यर्थः। एवं प्रकृत्यर्थमुक्त्वा [5]प्रत्ययार्थमाह — **तदीय इति।** प्रवर्तनालक्षणो व्यापार इत्यर्थः। तस्यावान्तरभेदमाह — **प्रेषणेति।** भृत्यादेर्निकृष्टस्य प्रवर्तना **प्रेषणम्**, गुर्वादेरुत्कृष्टस्य प्रवर्तना **अध्येषणम्।** प्रवर्तनेति यावत्। प्रयोज्यव्यापारे

---

[1] 'व्याख्यानेन' इत्यादि 'तस्य कर्मणीति' इत्यन्तं नास्ति — ब.

[2] भाष्ये 'युक्तं यत् सर्वं पच्यर्थः स्यात्' इति निर्णयसागरमुद्रिते पाठः। हरयाणामुद्रिते तु 'युक्तं यत् सर्वः पच्यर्थः स्यात्' इति। 'युक्तं यः सर्वः पच्यर्थः स्यात्' इति रत्नप्रकाशकृदभिमत इति ज्ञायते।

[3] पा. सू. १.३.१५.

[4] प्रयोजकहेतोरिति — घ, ङ.

[5] मतुबर्थमित्यर्थः।

यत् समर्थमनुकूलं तदाचरणं तत्समर्थाचरणम्। तच्चानुमतिरुपदेशोऽनुग्रह इति भिद्यते। यस्यानुमतिमन्तरेणार्थो न लभ्यते तस्य राजादेरनुमत्या प्रयोजकत्वम्। वैद्यादेस्तु 'मुस्तापर्पटकं पिबेज्ज्वरितः' इत्याद्युपदेशेन प्रवर्तकत्वम्। यस्तु केनचिज्जिघांसितं पलायमानं [1]निरुणद्धि, निरुद्धश्च हन्यते, तत्र निरोद्धा हन्तुरनुग्रहं करोतीत्यनुग्रहेण तस्य प्रयोजकत्वम्। **ननु सकलकारकेति**। यथा पितृमानित्युक्ते यं प्रति पितृत्वं स एव मत्वर्थः प्रतीयते, तथात्रापि यं प्रति हेतुत्वं स एव हेतुमच्छब्दवाच्यो युक्तः। तत्र कारकाधिकारात् क्रियापेक्षत्वाच्च कारकत्वस्य यस्मिन् व्यापारे प्रयोजकरूपेणोपयुज्यते तमेव प्रति प्रयोजकस्य हेतुत्वम्। स च व्यापारः सकलसाधनसाध्यः क्षणसमूहो विक्लित्त्यादिर्वेति स एव हेतुमच्छब्दवाच्यो युक्तः। प्रेषणाद्यपेक्षं तु तस्य कर्तृत्वमेव न हेतुत्वमिति प्रेषणादेर्हेतुमच्छब्दवाच्यत्वोक्तिरयुक्तेत्यर्थः। **णिच्प्रकृत्या धातुनैवेति**। णिचो या प्रकृतिर्धातुस्तेनैव पाकादेरर्थस्य प्रत्यायितत्वादित्यर्थः। नन्वेवमपि [2]प्रयोज्यापेक्षं प्रयोजकत्वम्, प्रयोजकश्च हेतुरिति प्रयोज्य एव मत्वर्थो युक्त इत्यत आह — **प्रयोज्योऽपीति**। **स्वभावत इति**। शब्दशक्तिस्वाभाव्यादित्यर्थः। **तस्मादिति**। प्रसक्तपक्षान्तरप्रतिक्षेपे यः पक्षः परिशिष्यते स परिशेषः, तस्य भावः पारिशेष्यम्, तस्मात् पाकादिप्रयोजनो यः प्रेषणादिव्यापारः स एवात्र मत्वर्थो गृह्यते। कथं पुनः स्वव्यापारं प्रति हेतुव्यपदेशाभावे हेतुमच्छब्देन तस्य ग्रहणं स्यादित्यत उक्तम् — **लब्धपाकादीति**। लब्धः पाकाद्यपेक्षो हेतुव्यपदेशो येन स प्रयोजकस्तत एव हेतुत्वेनोपलक्षितः स्वव्यापारं प्रति हेतुत्वाभावेऽपि हेतुत्वेनोपलक्षितत्वात् हेतुशब्दवाच्यः स यस्यास्तीति तत्साध्यो व्यापारो हेतुमानित्यर्थः। अनेन साध्यसाधनभावे संबन्धे षष्ठ्यर्थे मतुपः प्रवृत्तिरुक्ता। [3]भाष्योपक्षिप्तं पक्षद्वयं विविच्य दर्शयति — **यदा पचतीति**। **तादर्थ्याद्वेति**। इह पचेरर्थस्तण्डुलानां विक्लित्तिः, यदनन्तरं फलनिष्पत्तिः। तत्र यथा तादर्थ्यादधिश्रयणादीनां पच्यर्थत्वम्, एवं प्रयोजकव्यापारोऽपि पच्यर्थः स्यात्। यदि प्रकृतिरेव प्रयोजकव्यापारमप्याचष्टे तदा णिचः किं कृत्यमित्यत्राह — **तदा त्विति**। पञ्चमीनिर्देशेऽपि कथमन्वय इत्यत आह — **हेतुमदिति**। वार्तिके कारकशब्दः साधने रूढो न गृह्यते, अनन्वयात्। कस्तर्हि, यौगिक इत्याह — **कारकशब्देनेति**। **अन्वयव्यतिरेकेति**। णिचि सति प्रेषणादेरवगमादसति त्वनवगमात् प्रेषणादेः प्रत्ययार्थत्वमेव युक्तमित्यर्थः। **तनूकरणशब्देन कर्तेति**। तनूकरोतीति तनूकरणशब्देन कर्तोच्यते। [4]'कृत्यल्युटः' इति कर्तरि ल्युट्। **तदा साधर्म्येणेति**। यथा तनूकरणस्य प्रत्ययार्थत्वं तथा प्रेषणादेरपीति। नन्वन्वयव्यतिरेकाभ्यां प्रत्ययार्थपक्ष एव युक्त इत्युक्तम्। तत् कथं प्रकृत्यर्थपक्षोऽङ्गीकृत इत्यत्राह — **विनापीति**। ननु प्रकृतिविशेषणपक्षेऽप्युक्तार्थत्वात् 'उक्तः करोति' इत्यादौ णिज् न भविष्यतीत्यत्राह — **प्रकृतिविशेषणेति**। **यस्यार्थस्येति**। [5]प्रकृत्यभिहितेऽपि प्रेषणादौ यत्र द्योतकत्वेन णिचोऽपेक्षा तत्रैव तदुत्पत्तिः, नान्यत्रेत्यर्थः। द्वयोः कर्त्रोर्लेनाभिधाने को दोष इत्यत्राह — [6]**तदा पाचयत इति**। यथा पचतो देवदत्तयज्ञदत्ताविति भवति तथात्रापि स्यादित्यर्थः। **ण्यन्ते कर्तुश्च कर्मण इति**। ण्यन्ते धातौ कर्तुः सतः कर्मणो वाचका लादयो भवन्तीत्यर्थः। **प्रयोजकव्यापारस्य व्यतीहार इति**। ततश्च प्रत्ययार्थविशेषणपक्षे आत्मनेपदं सिध्यतीति भावः। ननु प्रकृत्यर्थविशेषणपक्षेऽपि प्रयोजकव्यापारेणाप्यमानत्वात् प्रयोज्यस्य कर्मसंज्ञा स्यादेवेत्यत आह — **प्रकृत्यर्थेति**। **लेनाभिधानमिति**। द्वयोरपि कर्त्रोर्लेनाभिधानं स्यादित्ययमेवास्मिन् पक्षे दोषः।

---

[1] निरुणद्धि स हन्तुरनुग्रहं — घ.

[2] प्रयोज्यापेक्षप्रयोजकत्वम् — ङ.

[3] भाष्योपक्षिप्तपक्षद्वयं — ङ.

[4] पा. सू. ३.३.११३.

[5] प्रकृत्याभिहितेऽपि — ङ.

[6] प्रदीपे 'ततः पाचयतः' इत्यत्र 'तदा पाचयतः' इति पाठोऽभिमत इति भाति।

ण्यर्थस्यैवेति। न तु प्रकृत्यर्थस्य। ततश्च [1]ग्रामस्य गत्यर्थकर्मत्वाभावात् ततश्चतुर्थी न स्यात्। **ण्यर्थस्य कर्मत्वादिति**। ततश्च करोतिकर्मत्वाभावात् षष्ठी न स्यात्। **करोतिधात्वाश्रयत्वादिति**। [2]'उपात् प्रतियत्ने' इति सुट् करोतिधातुमात्राश्रयः, न त्वर्थाश्रय इति तत्सिद्धिर्न चोदिता भाष्य इत्यर्थः। **तस्याप्राधान्यादिति**। प्रकृत्यर्थस्याप्राधान्यात् तत्कर्तुरप्यप्राधान्यमिति [3]प्रधाने कार्यसंप्रत्यय इति न्यायात् प्रयोजक एव कर्तरि षष्ठी स्यात्, न तु प्रयोज्य इत्यर्थः। **ण्यर्थस्येति**। ततश्च सुनोति प्रत्युपसर्गत्वाभावात् षत्वं न स्यादित्यर्थः। ननु प्रयोज्यस्य कर्मत्वासिद्धौ विध्यर्थत्वमेव गत्यादिसूत्रस्य युक्तम्, न तु नियमार्थत्वमित्यत आह — **ण्यर्थस्येति**। **गुणक्रियायामिति**। यद्यपि प्रयोजकव्यापारेणाप्यमानत्वात् प्रयोज्यः प्रेषणे कर्मतां प्राप्तः, तथापि [4]'गतिबुद्धि' इत्यादिना कर्मसंज्ञाया नियमात् 'पाचयत्योदनं देवदत्तो यज्ञदत्तेन' इत्यादौ कर्मत्वाभावात् स्वव्यापारे स्वातन्त्र्यस्याविहतत्वात् तदाश्रित्य स्वधर्मेण कर्तृत्वेन युक्तः प्रयोज्यः शब्देनाभिधीयत इत्यर्थः। 'नासावेवम्' इत्यादिभाष्यस्य तात्पर्यार्थं तावदाह — **ग्रामः प्रकृत्यर्थस्येति**। 'प्रेष्यते' इति 'इष गतौ' इत्यस्य कर्मणि रूपम्। तस्य चेह प्रापणमर्थ इति नयतिवद् द्विकर्मकत्वमिति व्याचष्टे — **स च प्रेष्यते प्राप्यत इति**। [5]'तं प्रेषयतीत्यर्थः'। ननु प्रयोजकसंनिधौ प्रयोज्यस्य कर्तृत्वं नापैति, [6]'गतिबुद्धि' इति नियमात् कर्तृत्वस्यैवावस्थानादिति किमुच्यते कर्तृभूतपूर्वमात्रेऽपीतीत्याशङ्क्य कर्तृशब्देन प्राधान्यं लक्ष्यत इत्याह — **प्रधानचरेऽपीति**। 'सुनु अभि' इत्यनेनालौकिकेन वाक्येनायमर्थोऽभिसंहित इत्याह — **[न] प्रयोजकव्यापारस्येति**। **युक्तं पुनरिति**। काक्वा निमित्ताभावाद्विचारस्यायुक्ततोक्तेत्याह — **संदेह एवेति**। ननु सर्वेषामधिश्रयणादीनां पच्यवयवादीनां क्रियाक्षणानामविशेषात् किंकृतं विक्लित्तेः प्राधान्यमित्यत्राह — [7]**तदर्थत्वादिति**। **ग्रामस्येति**। समूहस्येत्यर्थः। **अनन्तरं फलमिति**। व्याख्यातचरः श्लोकः। 'अथेदानीम्' इत्यादिभाष्यं व्याचष्टे — **तत्र यथेति**। ननु प्रेषणादेरप्यधिश्रयणादिवत् पच्यर्थत्वे णिजनर्थक इत्यत आह — **द्योतकस्त्विति**। शब्दशक्तिस्वाभाव्यमत्र हेतुः। **संभावने लिङिति**। **न** तु संप्रधारणायाम्, तथा सति पक्षान्तराभावाद्विचारस्यायुक्तता स्यात्। संभावने तु लिङि विचारोपपत्तिरिति। तदाह — **अत एवेति**। **प्रकृत्या प्रयोज्येति**। प्रयोज्यव्यापार उपसर्जनं यस्येति बहुव्रीहिः। यथैवाभिधीयते तथैव द्योत्यते। न ह्यनभिधीयमानस्य द्योतनमुपपद्यत इति। तदाह — **तस्यैव चेति**। यत् पुनरपरं चोद्यम् — गमितो ग्रामं देवदत्तो यज्ञदत्तेनेत्यत्राव्यतिरिक्तत्वाद् गत्यर्थस्य प्रयोजककर्तरि क्तः प्राप्नोतीति, तत् परिहरति — **णिचा चेति**। **इति ण्यन्तादिति**। गमनाकर्तुर्गत्यर्थकर्तृत्वाभावात्। अनेनैव न्यायेनात्मनेपदाप्राप्तिदोषोऽपि परिहृत इत्याह — **व्यतिभेदयन्त इत्यत्रापीति**॥

[३, ८७–९१]

(उद्द्योतनम्) [8]मत्वर्थे निश्चयसंभवात् तद्द्वारा हेतुविषयकः प्रश्न [9]इत्याह — **यद्यपीति**।

---

[1] ग्रामशब्दस्य गत्यर्थ — ङ.

[2] पा. सू. ६.१.१३९.

[3] परिभाषा १०६.

[4] पा. सू. १.४.५२.

[5] 'तं प्रेषयतीत्यर्थः' इति नास्ति — घ.

[6] पा. सू. १.४.५२.

[7] 'तदर्थत्वादिति' इत्यस्यानन्तरम् 'अनन्तरम्' इत्यादि 'व्याख्यातचरः श्लोकः' इत्यन्तम्, तदुपरि 'ग्रामस्येति। समूहस्येत्यर्थः' इति दृश्यते — घ, ङ.

[8] मत्वर्थनिश्चय — ऋ.

[9] इत्याशयः — अ.

हेतुविषयकत्वमभिनयति — **को हेतुरिति**। तद्व्याचष्टे — **किमिति**। उत्तरे हेतुशब्दार्थमाह — **प्रयोजक इति**। **तत्समर्थाचरणम्** प्रयोज्यक्रियानुकूलाचरणम्। अत्र णिच्प्रसङ्गमाह — **प्रष्टेति**। ननु लोटोक्तत्वात् प्रैषस्य णिज् न भविष्यति, अत आह — **एकेति**। [1]'तत्प्रयोजकः' इत्यत्र तच्छब्देन स्वतन्त्रकर्तुः परामर्शादाह — **स्वतन्त्रस्येति**। 'तूष्णीम्' इत्यस्य [2]वैयर्थ्यं निराह — **निर्व्यापारत्वादिति**। 'पृच्छतु' इति वाक्य[3]स्वारस्यादप्यकर्तृत्वनिश्चय इत्याह — **कर्तृत्वमेवेति**। विधानसामर्थ्यादत्र णिच् स्यात्, अत आह — **यस्त्विति**। नन्वपचत्यपि देवदत्ते 'देवदत्तेन पाचयति यज्ञदत्तः' इति प्रयोगो दृश्यते, अत आह — **संभावितेति**। [4]**अत्र** पृच्छत्वित्यत्र। उक्तेऽर्थे[5] प्रश्नायोगादाह — **इतर इति**। **तस्यैव** कर्तृत्वस्यैव। तथा च भूतं भावि वर्तमानं वा कर्तृत्वं लोटा नाभिधीयते, किं त्वन्यत्र प्रसिद्धं प्रश्नकर्तृत्वं प्रष्टरि [6]लोटापाद्यत इति न प्रष्टुः कर्तृत्वमत्रेति भावः। पृच्छत्वित्यत्र प्रयोज्यस्याकर्तृत्वे हरिसंमतिमाह — **तदुक्तमिति**। **द्रव्यमात्रस्य** अकर्तुः। **सक्रियस्येति**। प्रयोज्यस्य कर्तुः [7]सत इत्यर्थः। अनेन पारिभाषिकहेतुग्रहणस्य [8]'प्रयोजनमुक्तमिति मन्तव्यम्। नन्वत्र कर्तृत्वमिदानीमाधीयते, न तस्य कर्तृत्वमित्युक्ते 'अथापि' इति कथमुक्तम्, अत आह — **दुर्बलेति**। **एकविषयत्वादिति**। [9]'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्रैषादिष्वेव लोडादयो विधीयन्ते, [10]प्रैषादिरूपे प्रयोजकव्यापारे णिजित्येकविषयत्वम्। अस्मिन् कल्पे 'पृच्छतु' इत्यत्र णिजभावेऽनभिधानमाश्रयणीयम्। अन्ये तु प्रैषत्वेन प्रैषाभिधाने [11]लोडेव विशेषविधानाद् भवति, प्रयोजकव्यापारत्वेन तदभिधाने णिजेवेति व्यवस्थायां तात्पर्यमाहुः। पदद्वयस्याप्यपुनरुक्तमर्थमाह — **कृषाविति**। पदद्वयस्य प्रयोजनमाह — **कश्चिदिति**। मन्त्रविशेषादिसहकारिलाभे सतीत्यर्थः। असामर्थ्याद्यौगपद्येन न करोति, अक्रियत्वात् पर्यायेणापि नेति विभागः। वचनस्यावश्यकतामाह — **तत्रेति**। [12]भक्तादिसाधारण्यायाह — **तत्समर्थेति**। ननु [13]हेतुमतः प्रकृत्यर्थत्वमिति पक्षे णिचो द्योतकत्वादत्रापि द्योतकेन णिचा भाव्यम्, अत आह — **धातुनैवेति**। 'पञ्चभिर्हलैः' इत्युपपदम्। **तस्य** णिजर्थप्रयोजकव्यापारस्य। ननु [14]कृषेः स्वरितेत्त्वात् कर्तृगे फले [15]'विभाषोपपदेन' इति पाक्षिकमात्मनेपदमत्र स्यात्, अत आह — **विभाषेति**। अत्र हलैरित्युपपदस्य धातोः प्रयोजक[16]व्यापारपरत्वद्योतकत्वेन फलस्य कर्तृगामित्वद्योतकत्वाभावात् कर्तृगे क्रियाफले 'पञ्चभिर्हलैः [17]कृषते' इति नित्यमेवात्मनेपदं भवति, न विकल्प इत्यर्थः। **यदा त्विति**। विवक्षावशादित्यर्थः। वचनस्य प्रयोजनमाह — **यजेरिति**। देवतोद्देशेन द्रव्यत्यागपूर्वक आहवनीये हविःप्रक्षेपो यज्यर्थः। **णिजिति**। 'यजमानो याजकान् याज-

---

[1] पा. सू. १.४.५५.

[2] वैयर्थ्यमाशङ्क्य निराह — अ.

[3] स्वारस्यादकर्तृत्व — अ; स्वारस्यादप्यकर्मत्व — ऋ, लृ.

[4] तत्र — ऋ, लृ.

[5] 'अर्थे' इति नास्ति — अ.

[6] लोटा, आपाद्यत इति छेदः॥ लोटासाद्यत इति — अ.

[7] स्वत इत्यर्थः — अ.

[8] प्रयोजकमुक्तमिति — अ.

[9] पा. सू. ३.३.१६३.

[10] प्रैषादिरूपप्रयोजक — अ.

[11] लोड् भवति — ऋ, लृ.

[12] अन्नादीत्यर्थः।

[13] हेतुमति प्रकृत्यर्थत्वपक्षे — अ.

[14] तौदादिकस्येति भावः। भ्वादेस्तु परस्मैपदित्वमेव।

[15] पा. सू. १.३.७७.

[16] व्यापारद्योतकत्वेन — ऋ, लृ.

[17] एतेनात्र 'कृषते' इति भाष्यपाठमभिमन्यत इव। भाष्यपुस्तकेषु दृश्यमानेषु 'कृषति' इति परस्मैपदमेवोपलभ्यते।

यति' इत्येवं प्रसङ्गनिरासायेत्यर्थः। **तद्विपरीत इति**। 'याजका यजन्ति, तान् याजयति यजमानः' इति प्रयोगो भवत्येवेत्यर्थः। सूत्रस्यैव व्याकरणत्वेन भेदाभावात् 'व्याकरणस्य सूत्रम्' इति षष्ठ्यनुपपत्तिं परिहरति—[1]**लक्ष्येति**। लक्ष्यलक्षणसमुदायो व्याकरणशब्दस्यार्थः, सूत्रमेव [2]वेति पक्षद्वयं पस्पशायामुक्तम्। तत्राद्ये समुदाय[3]समुदायिनोर्भेदात् षष्ठी [4]युक्तेत्यर्थः। द्वितीयकल्पेऽपि युक्तेत्याह—**यदेति**। **व्यपदेशिवदिति**। यथाभेदेऽपि[5] 'राहोः शिरः' इत्यादावर्थभेदविवक्षया षष्ठी तथात्रापीत्यर्थः। एते ग्रन्थाः पस्पशोद्द्योतने व्याख्यातास्तत एव ज्ञेयाः। वाक्येऽपि न षष्ठीनियम इत्याह—**यदेति**। ननु वाक्ये वृत्तौ च द्वयोः संबन्धाविशेषात् 'योऽसौ' इत्ययुक्तम्, अत आह—**वाक्य इति**। वाक्येऽवयवावयविभावादिः संबन्धः प्रत्ययोत्पत्तौ निवर्तते, क्रियाकारकसंबन्धश्चोपजायत [6]इत्यभिप्राय इत्यर्थः। स्वार्थत्यागेनार्थान्तरवृत्तौ संमतिमाह—**तदुक्तमिति**। [7]एवं सति शब्दार्थसंबन्धस्यानित्यत्वं स्यात्, अत आह—**एतच्चेति**। '[8]अवृत्तौ द्रव्यवाचित्वं वृत्तौ तु[9] क्रियावाचित्वमिति यदुक्तं तद्व्याकरणेन शब्दोत्पत्तिमङ्गीकृत्योक्तमित्यर्थः। **विशिष्टेति**। [10]सूत्रणक्रियाविशेषवचन इत्यर्थः॥

[३, ८७–९१]

(**रत्नप्रकाशः**) **अथ हेतुमतीति को मत्वर्थ इति**। यद्यपि [11]'तदस्यास्त्यस्मिन्' इति संबन्धिन्यधिकरणे च मतुपो विधानात् स्पष्टो मत्वर्थः, तथापि [12]हेतुशब्दस्यानेकार्थत्वात् हेतुमतीत्यत्र को हेत्वर्थ इत्येवंतात्पर्यकः प्रश्न उपपद्यते। उत्तरमाह—**हेतुः कर्तेति**। प्रयोजकरूप इति शेषः। चेतनावत एव प्रयोजकत्वं संभवति नाचेतनस्येति मन्यमानः प्रयोजकनिमित्तोभयात्मकोऽत्र हेतुर्ग्राह्य इति शङ्कते—**हेतुनिर्देशश्चेति**। परिहरति—**नैष दोष इति**। **यस्तत्समर्थान्याचरतीति**। तथा च प्रेषणाध्येषणे इव तत्समर्थाचरणमपि प्रयोजकव्यापार इति तत्रापि कृत्रिमहेतुतास्तीति भावः। **पृच्छतु मा भवानिति**। अत्र प्रष्टा प्रयोज्यः, तत्प्रेरकः प्रयोजक इति णिजापाद्यते। समाधत्ते—**अकर्तृत्वादिति**। प्रष्टुरिति शेषः। तथा च तत्प्रयोजकस्य हेतुत्वाभावान्न तत्र णिजिति भावः। तस्याकर्तृत्वं कुत इत्यत आह—**न ह्यसाविति**। वर्तमानक्रियां प्रति तत्र कर्तृत्वाभावेऽपि भाविक्रियां प्रति तद् भवतीत्याशयेनाह—**किं च भो इति**। उत्तरमाह—**भूतभविष्यत्कालाया अपीति**। कथमित्यत आह—**अभिसंबन्ध इति**। क्रिययेति शेषः। पुनः शङ्कते—**यदीति**। प्रतिबन्द्योत्तरं दातुं समाधाता पृच्छति—**अथ कथमस्मिन्निति**। आक्षेप्तोत्तरमाह—**अभिसंबन्ध इति**। पृच्छतिक्रिययेति शेषः। समाधाताह—**कर्त्रापि तर्हीति**। क्रियाया इति शेषः। तथा च कर्तृत्वाभिसंबन्धः क्रियत इति तत्र लोटा तस्याभिधानं युज्यत इति भावः। अकर्तृत्वादिति हेतुमुपपादितमुपसंहरति—**एवं न च कर्तेति**। अभिसंबन्धात् पूर्वमिति शेषः। तथा लोटाभि-

---

[1] प्रदीपे 'लक्ष्ये लक्षणसमुदाये वा व्याकरणशब्दः' इत्यत्र 'लक्ष्यलक्षणसमुदाये व्याकरणशब्दः' इत्यन्नंभट्टपाठ इति भाति।
[2] चेति — अ.
[3] समुदायिनोर्भेदाभावात् — ऋ, लृ.
[4] युक्तेति तदर्थः — अ.
[5] अभेदेऽपीति छेदः।
[6] 'इत्यभिप्रायः' इति नास्ति — लृ.
[7] एवमपि शब्दार्थ — अ.
[8] आवृत्तौ — ऋ.
[9] तुशब्दो नास्ति — अ.
[10] सूत्रेण क्रियाविशेष — अ, ऋ, लृ.
[11] पा. सू. ५.२.९४.
[12] हेतुशब्दस्यानेकत्वात् — प, ब.

धानमप्युपपद्यत इत्युपसंहरति — **कर्तृप्रत्ययेनेति**। तदुक्तं हरिणा—[1]'द्रव्यमात्रस्य तु प्रैषे पृच्छचादेर्लोड् विधीयते। सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः॥' इति। तदिदं समाधानं प्रौढचा कृतम्। लोड्विधौ द्रव्यमात्रस्य प्रैषो भवति, णिज्विधौ तु सक्रियस्य प्रैष इत्यत्र धर्मशास्त्रस्येश्वराज्ञाया वाभावादित्यस्वरसादाह — **अथापि कथंचिदिति**। **कर्ता स्यादिति**। प्रयोज्य इति शेषः। **लोटोक्तत्वादिति**। लोटैवोक्तत्वादित्यर्थः। अयमभिप्रायः — यदा प्रयोज्यस्य लकारवाच्यतया प्राधान्यमभिधित्सितं तदा लोड् भवति। प्रयोजकस्य तथा तदभिधित्सायां तु णिज् भवतीति व्यवस्थेति। एतेन 'दुर्बलपक्षाभ्युपगमेनापि परिहारोऽभिधीयत इति भावः' इति निरस्तम्। अस्यैव पक्षस्य प्रबलत्वात्। यदप्युक्तम् 'एकविषयत्वाण्णिचो लोडादीनां च पाक्षिकत्वाद्यदा लोडुत्पद्यते तदा तेनैवाभिहितत्वात् प्रैषस्य णिज् न भवति' इति। तदपि तुच्छम्, भिन्नविषयताया एव तयोरुक्तत्वात्। **भवति तत्र णिजिति**। प्रथमप्रयोजकव्यापार इति शेषः। प्रथमप्रयोजको हि तत्र लेनाभिधीयते। तत्र द्वितीयप्रयोजकव्यापारे तु लोडेव भवति, तदाश्रयस्य लेनानभिधानात्। अतिप्रसङ्गपरिहारायाह — **कृष्यादिषु चानुत्पत्तिरिति**। णिच इति शेषः। तत्र प्रेषणादिसद्भावमुपपादयति — **तूष्णीमित्यादिना**। एकान्ते आसीनस्य पञ्चहल[2]साधने कर्षणे कर्तृत्वासंभवात् प्रयोजकत्वमेव युक्तम्। तत्र च [3]कर्षतीत्येव प्रयोगो दृश्यते। कर्षयतीति तु प्राप्नोति। अतस्तत्र णिच् प्राप्नोति, तस्य प्रतिषेधो वक्तव्य इति भावः। **भवितव्यमिति**। प्रतिषेधानारम्भ इति शेषः। विनैव निषेधवचनं कृषतीति प्रयोगः सिध्यति। सति च प्रतिषेधे कर्षयतीतीष्टं रूपं न सिध्यति। अतः प्रतिषेधवचनं नाश्रयणीयमेवेत्याशयेन परिहरति — **कृष्यादिषु चेति**। **प्रतिविधानेऽपीति**। यद्यपि प्रतिविधानं प्रयोजकव्यापारः, तथापि प्रयोज्य[4]व्यापारस्याविवक्षितत्वाद् धातोस्तत्र प्रतिविधानमात्रवृत्तित्वेन स्वतन्त्रस्य कर्तृत्वेन तस्य प्रयोजकत्वाभावेन णिजभावे [5]कर्षतीति प्रयोग उपपद्यते। तत्र प्रयोज्यप्रयोजकव्यापारविवक्षायां तु भवत्येव णिच् 'पञ्चभिर्हलैः कर्षयति' इतीति भावः। **यज्यादिषु चाविपर्यास इति**। यजेः प्रक्षेपविशेषवाचित्वात् प्रक्षेपे च ऋत्विजां कर्तृत्वाद् यजमानस्य तत्र प्रयोजकत्वात् णिच् प्राप्नोतीति वचनम्। **नानाक्रिया इति**। तथा च मुख्यत्यागवचनाश्रयणे यजमानस्य कर्तृत्वम्, ऋत्विजां प्रयोजकत्वमिति न विपर्यासप्रसक्तिरिति भावः। **व्याकरणस्य सूत्रमिति**। व्याकरणस्याष्टाध्याय्यात्मकस्यावयवं सूत्रं करोतीत्यर्थः। **व्याकरणं सूत्रयतीति**। व्याकरणं करोतीत्यर्थः। **योऽसाविति**। अवयवावयविभावः। **निवर्तत इति**। [6]सूत्रयतीत्यत्र सूत्रशब्दार्थपरित्यागेन णिजर्थमात्रविवक्षणादिति भावः। तत्र सूत्रशब्दार्थविवक्षायां सापेक्षात् ततो णिज् न स्यादेव। एतेन 'वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते। णिचि तूत्पन्ने सत्त्वभावातिवर्तनात् करोत्यर्थाभिधायी सूत्रशब्दः संपद्यते' इति निरस्तम्। आरोह्यते हस्ती स्वयमेवेत्यत्र हेतुमति कृतस्य णिचो हेतुमतोऽविवक्षायां प्रयोगवद् व्याकरणं सूत्रयतीत्यत्र [7]सूत्रशब्दार्थाविवक्षायां प्रयोगसंभवेन यत्किंचित्क्लिष्टकल्पनानौचित्यात्॥

[३, ८७–९१]

(नारायणीयम्) हेत्वर्थपरिज्ञानादिति। [8]प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति सहाभिधान-

---

[1] वाक्यपदीयम् ३.७.१२६.

[2] साधनकर्षणकर्तृत्वासंभवात् — ब.

[3] 'कृषति' इति भाष्ये दृश्यमानत्वात् अण्यन्तोपलक्षणमिदम्।

[4] व्यापारस्य विवक्षितत्वात् — ब.

[5] कृषतीत्यस्याप्युपलक्षणम्।

[6] सूत्रं करोतीत्यत्र — प.

[7] सूत्रशब्दार्थविवक्षायां — ब.

[8] महाभाष्यम् ३.१.६७.

नियमात् प्रकृत्यर्थस्य [1]विशेषणस्यापरिज्ञाने प्रत्ययार्थोऽपि विशेष्यो न ज्ञायेतेति प्रत्ययार्थप्रश्नद्वारेण प्रकृत्यर्थ एव पृच्छ्यत इत्यर्थः। एतदेव स्फोरयति — **स चार्थादिति। किं प्रयोजक इति।** किं कृत्रिमस्य हेतोर्ग्रहणमुताकृत्रिमस्येति संदेहात् प्रश्नः। भाष्ये कर्तृशब्देन विशिष्टः कर्तोच्यते, न कर्तृमात्रम्, हेतुशब्दस्यातदर्थत्वादित्याह — **प्रयोजक इति। तत्समर्थाचरणमपीति।** न केवलं प्रेषणाध्येषणे एव प्रयोजकव्यापारः, किं तर्हि, तत्समर्थाचरणमपीत्यर्थः। **प्रष्टा प्रयोज्य इति।** योऽत्र प्रष्टा भवच्छब्दवाच्यः स प्रयोज्यः। तस्यास्मच्छब्द[2]वाच्यार्थः प्रश्ने प्रेरकत्वात् प्रयोजको भवति। तद्व्यापारश्चात्र प्रतीयत इति णिच् प्राप्नोतीत्यर्थः। नन्वत्र [3]'प्रैषातिसर्ग' इत्यादिसूत्रे चकारेण समुच्चितो लोड् विधीयते। तेनोक्तत्वाण्णिज् न भविष्यतीत्यत्राह — **एकविषयत्वाच्चेति।** ननु प्रयोजकस्यात्र प्रश्नप्रेरणे कर्तृत्वमस्त्येवेति कथम् 'अकर्तृत्वात्' इत्युच्यत इत्यत्राह — **स्वतन्त्रस्येति।** प्रयोज्यस्य कर्तृत्वाभावमेव दर्शयति — **कर्तृत्वमेवेति।** उक्तमभिप्रायमजानतः 'किं च भोः' इति प्रश्न इत्याह — **इतर इति।** 'अभिसंबन्धस्तत्र क्रियते' इति भाष्यं सोपस्कारं योजयति — **भूताया इति। बुद्धिपरिवर्तिनीति।** बुद्धिप्रतिभास एव शब्दार्थः, न वस्त्वर्थ इति वैयाकरणानां सिद्धान्तस्थितेः। **द्रव्यमात्रस्य त्विति।** द्रव्यमात्रस्याप्रवृत्तक्रियस्याप्रतिपन्नकर्तृत्वस्य कर्तृत्वार्थ एव यः प्रैषस्तस्मिन् द्योत्ये पृच्छ्यनुयुज्यादेर्धातोः परो लोट्प्रत्ययः कर्त्रादिकारके वाच्ये विधीयते। प्रवृत्तक्रियस्य तु विरामाशङ्कायां मा विरंसीदित्यभिसंधाय कर्तुरेव सतो [4]यः प्रयोजकव्यापारः प्रैषादिस्तस्मिन् वाच्ये णिज्विधीयते। तुशब्दद्वयेनात्यन्तभेदं प्रैषद्वयस्य दर्शयति। णिज्विषयस्याभिधेयधर्मत्वेन णिज्वाच्यत्वेन च, लोड्विषयस्य तु द्योत्यत्वेन वीप्साबाधादिवत् प्रयोक्तृधर्मत्वेन च वैलक्षण्यस्य [5]स्फुटत्वात्। 'पृच्छतु मा भवान्' इत्यादौ हि केवलमुच्चारयितैव सामर्थ्यात् प्रैषकर्तृत्वेन प्रतीयत इत्यभिधेयधर्मत्वं प्रैषस्य नास्ति, नापि लोटाभिधीयते प्रैषः, लोडन्तशब्दप्रयोगे प्रयोक्तृधर्मत्वेन प्रतीयत एव केवलमिति भावः। ननु प्रयोज्यस्यात्र कर्तृत्वाभावे न्यायेन स्थापिते तस्य कर्तृत्वमभ्युपगम्य परिहाराभिधानं न संगच्छत इत्याशङ्क्याह — **दुर्बलपक्षेति।** पूर्व एव परिहारः समीचीनः। अयं [6]त्वभ्युपगम्यापि कर्तृत्वं प्रौढोक्त्या भाष्यकृता दर्शित इत्यर्थः। **एकविषयत्वादिति।** यद्यपि णिचो लोटश्च विषयभेद उक्तः, तथाप्येकविषयत्वमप्यभ्युपगम्य परिहार उच्यत इत्याशयः। 'एकान्ते' इत्यादिविशेषणाभिधानस्य वैयर्थ्याशङ्कां परिहरति — **कृषाविति।** ननु पञ्चभिर्हलैरित्युपपदप्रयोगादेव संविधानार्थावगमात् 'एकान्ते तूष्णीमासीनः' इति न वक्तव्यमित्यत्राह — **कश्चिदिति।** ननु धातोः संविधानवृत्तित्वेऽपि द्योतको णिजुत्पाद्य इत्यत्राह — **धातुनैवेति। आत्मनेपदाभावश्चेति।** उपपदेन संविधानस्य प्रतीयमानत्वात्। तर्हि कृषेर्णिज् नास्त्येवेति चेन्नेत्याह — **यदा त्विति। यजेः प्रक्षेपविशेषवाचित्वादिति।** हविःप्रक्षेपे हि यजिर्वर्तते। **तद्विपरीत इति।** प्रक्षेपार्थत्वे 'पुष्यमित्रो याजयते, याजका यजन्ति' इति भवितव्यमेवेत्यर्थः। वाक्ये षष्ठीप्रयोगमुपपादयति — [7]**लक्ष्यलक्षणेति।** लक्ष्यं लक्षणं च समुदितं व्याकरणशब्दवाच्यम्, सूत्रशब्देन लक्षणमात्रमुच्यत इति भेदपूर्वके संबन्धे षष्ठी सिद्धा। **यदा त्विति।** 'अथवा पुनरस्तु सूत्रम्' इति [8]भाष्ये पक्षान्तरस्याप्यभ्युपगमात्। **तदा व्यपदेशिवद्भावेति।** यथा

---

[1] विशेषणस्य परिज्ञाने — घ, ङ.
[2] वाच्योऽर्थः — ङ.
[3] पा. सू. ३.३.१६३.
[4] यत् प्रयोगः प्रयोजक — घ; यत् प्रयोगाप्रयोजक — ङ.
[5] सत्त्वात् — ङ.
[6] तुशब्दो नास्ति — ङ.
[7] प्रदीपे 'लक्ष्ये लक्षणसमुदाये वा व्याकरणशब्दः' इत्यत्र 'लक्ष्यलक्षणसमुदाये व्याकरणशब्दः' इति पाठोऽभिमत इति प्रतीयते।
[8] पस्पशाह्निक इत्यर्थः।

'राहोः शिरः' इत्येकस्मिन्नपि वस्तुनि काल्पनिको भेदव्यवहारः, एवमिहापीत्यर्थः। **यदा व्याकरणमिति।** एवं सति वृत्तौ न यत्नसाध्या द्वितीयेति भावः। यदा तु वाक्ये षष्ठी तदा चोद्यपरिहारौ। **वाक्ये द्रव्यरूपमिति।** इदंतदादिसर्वनामपरामर्शयोग्यस्य वस्तुनः सूत्रशब्देनाभिधानाद् वाक्ये व्याकरणसूत्रयोरभिसंबन्धे षष्ठी युक्ता। वृत्तौ तु सत्त्वभावातिवर्तनेन करोत्यर्थाभिधानात् तयोः [1]संबन्धस्य निवृत्तिः। करोत्यर्थापेक्षया तु व्याकरणस्य कर्मत्वाद् द्वितीयोपपत्तिरित्यर्थः। **परमार्थतस्त्विति।** तथा चोक्तम् —

> [2]'मुण्डिसूत्र्यादयोऽसद्भिर्भागैरनुगता इव।
> विभक्ताः कल्पितात्मानो धातवः कुट्टिचर्चिवत्॥' इति॥

[३, ९१-९७]

(उद्द्योतनम्) 'कंसं घातयति' इत्यादावाख्यानस्य णिच्प्रकृतित्वाभावादाह — **आख्यायत इति।** [3]'कृत्यल्युटः' इति कर्मणि ल्युट्। वृत्तवाचिनः कंसवधादिशब्दादित्यर्थः। अत्र कृतो या प्रकृतिरिति केचिद्व्याचक्षते। तत्र राजस्थानमाचष्टे 'राजानं स्थापयति' इत्यत्र द्वितीया न स्यात्, [4]कृत्प्रकृतेरकर्मकत्वेन कर्मत्वातिदेशासंभवात्। न च प्रकृतेर्हेतुमण्ण्यन्तस्य यत् कारकमिति कल्पना प्रमाणवतीति दोषं मनसि निधाय व्याचष्टे — [5]**णिचो या प्रकृतिरिति।** [6]**तयेति।** [7]'तेन तुल्यम्' इत्यनेन वतिरित्यर्थः। **कंसादीति।** उपस्थितत्वात् तस्यैव कारकत्वमतिदिश्यत इत्यर्थः। ननु कंसवधादेः किमपेक्षया कर्मत्वम्, यस्य कंसादावतिदेशः, अत आह — **यथेति।** नन्वाख्यानकर्मत्वं कंसादेरपीति किमतिदेशेन, अत आह — **अप्रतिपन्नेति।** तत्र [8]प्रतियोगित्वेनाख्यानकर्मत्वेऽपि केवलस्य ण्यन्तं प्रति कर्मत्वमतिदिश्यत इत्यर्थः। [9]कंसवधादेरेवाख्यानकर्मत्वं न तु कंसादेरित्यपि केचित्। नन्वेवं कंस[10]वधशब्दाण्णिच्यङ्द्विर्वचने कंसादेः स्याताम्, अत आह — **प्रकृतिवद्भावेति।** **पृथक्कृतत्वात्** णिजन्तधातोः सकाशात्। धात्वर्थव्यतिरिक्तस्यैव तत्र [11]कारकत्वनियमेन कारकत्वातिदेशेन ततः पृथग्भावः सिद्ध इत्यर्थः। नन्वेवं 'पुष्ययोगं जानाति पुष्येण योजयति' इत्यत्रापि कर्मत्वातिदेशः स्यात्, अत आह — **वत्करणाच्चेति।** यथा 'ब्राह्मणवत् क्षत्रिये' इत्यत्र [12]क्षत्रियाश्रितं कार्यं न निवर्तते तथेत्यर्थः। नन्वेवमतिदेशवशात् पुष्यं योजयतीत्यपि प्रयोगः साधुः स्यात्, अत आह — **अथवेति।** [13]'तेन तुल्यम्' [14]'तत्र तस्येव' इत्यर्थद्वयेऽपि वतिस्तन्त्रेणोपात्त इत्यर्थः। तथा च ण्यन्तप्रकृतेर्योगशब्दस्यार्थद्वारा यत् कारकं पुष्येणेति, तदेव ण्यन्तस्यापि। तेन [न] द्वितीयाप्रसङ्ग इति भावः। **क्वचिदिति।** कंसादौ प्रकृत्या तुल्यमिति, पुष्यादौ प्रकृतेरिवेति चातिदेशोऽङ्गीक्रियते, न तु विपर्ययः, लक्ष्यानुरोधादिति भावः। **कश्चित्** अतिदेशः।

---

[1] संबन्धस्यातिवृत्तिः — घ.
[2] वाक्यपदीयम् ३.१४.६८.
[3] पा. सू. ३.३.११३.
[4] कृत्प्रकृतेरकर्मत्वेन — ऋ.
[5] 'णिचो या प्रकृतिरिति' इत्यस्यानन्तरं 'तेन तुल्यमित्यनेनात्र वतिरित्याह' इत्यधिकम् — ऋ, ऌ.
[6] 'तयेति' इति नास्ति — अ.
[7] पा. सू. ५.१.११५.
[8] वधप्रतियोगित्वेनेत्यर्थः।
[9] 'कंस' इति नास्ति — अ.
[10] वधाण्णिचि — अ.
[11] कारकत्वे नियमेन — ऌ.
[12] क्षत्रियाश्रितकार्यं — अ.
[13] पा. सू. ५.१.११५.
[14] पा. सू. ५.१.११६.

ननु 'राजागमनमाचष्टे राजानमागमयति' इत्यत्रान्तर्वर्तिविभक्त्या पदत्वान्नलोपः स्यात्, अत आह — **प्रकृतीति**। णिच्प्रकृतेर्विकारत्यागेन स्वरूपेणावस्थानं **प्रत्यापत्तिः**। ततश्च राजागमनमिति णिच्प्रकृतेर्नलोपरूपविकारनिवृत्तिरपि तया लभ्यत इति 'राजानमागमयति' इति प्रयोगोपपत्तिरित्यर्थः। **यद्यपीति**। [1]'हनश्च वधः' इत्यप्संनियोगेन [2]वधादेशविधानादपो लुकि वधादेशस्यापि निवृत्तौ घातयतीति सिद्धेः प्रकृतिप्रत्यापत्तेर्नेदं प्रयोजनमित्यर्थः। **तथापीति**। [3]'चजोः कुघिण्ण्यतोः' इति कुत्वं न घञ्संनियोगशिष्टमिति तन्निवृत्तावपि कुत्वं [4]न निवर्तेतेति तन्निवृत्त्यर्थं प्रकृतिप्रत्यापत्तिर्वाच्येत्यर्थः। यद्यपि [5]'निमित्ताभावे नैमित्तिकस्याप्यभावः' इति न्यायेनापि कुत्वाभावः सिध्यति, तथापि तस्याप्यनित्यत्वम्। अत एव भवेत्यादौ हेर्लुकि शपो [6]न निवृत्तिः। न्यायस्यानित्यत्वज्ञापनमेव प्रकृतिप्रत्यापत्तिवचनस्य प्रयोजनमित्याहुः। ननु 'कंसं घातयति' इत्यत्र कुत्वतत्वे न सिध्यतः, [7]धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। न चायं णिच् धातुप्रत्ययः, सुबन्ताद्विधानादिति चेत्, अत्र न्यासः — 'प्रकृतिवच्च' इत्यत्र चकारो भिन्नक्रमः कारकमित्यस्यानन्तरं द्रष्टव्यः, [8]कार्यशब्दश्चाध्याहर्तव्यः। तेनायमर्थः — कृतो या प्रकृतिस्तस्या हेतुमण्णिचि यादृशं कार्यं भवति [9]तादृशमेव ण्यन्ताया अपि भवति, किं च कारकमपि प्रकृतिवद् भवतीति [10]कुत्वतत्वादिसिद्धिरिति। तत्तु 'प्रकृतिवच्च' इत्यत्र [कृत्]प्रकृतिविवक्षाया [11]अमानकत्वादुपेक्ष्यम्। णिच्प्रकृतिरिति प्रदीपकृद्वयाख्याने तु चकारस्यानुक्तसमुच्चयार्थत्वात् सर्वेष्टकार्यसिद्धिरिति मन्तव्यम्। 'संज्ञाभूतानि' इत्यस्यार्थमाह — **कंसेति**। यदा स्वयं मृगरमणं दृष्ट्वा वनस्थ एव पुरुषान्तरस्य तद्दर्शनार्थं वाक्यं प्रयुङ्क्ते तत्रायं विधिरिति 'दृश्यर्थायाम्' इत्यस्यार्थः। तं दर्शयति — **यदेति**। **प्रतिपाद्यं** [12]दर्शनीयं वस्तु। [13]**तस्य** प्रयोक्तुर्वाक्यस्य वा। अरण्ये मृगरमणं दृष्ट्वा ग्रामस्थः सन्नन्यस्मै यदाचष्टे तत्र [14]वाक्यमेव भवति। दृश्यर्थत्वाभावात् प्रत्ययो न भवतीत्युक्तम् — **भाष्ये यदा हीति**। दृश्यर्थत्वाभावे हेतुमाह — **ग्राम इति**। अतिप्रसङ्गशङ्कां निराह — **दृशीति**। 'आरात्रिविवासम्' इत्यस्य रात्र्यवसानपर्यन्तमित्यर्थमाह —**यावदिति**। वार्तिके 'प्रापि' इति सप्तम्यन्तेन धातुना तदर्थनिर्देश इत्याह — **तत्प्राप्नोतीति**। उज्जयिन्या माहिष्मती दूरे वर्तते। सूर्योदयसमये [15]तावद् दूरगमनमाश्चर्यद्योतकमित्यर्थः। प्राप्त्यर्थे [16]णिजित्युक्ते 'संभावयते' इत्ययुक्तम्, अत आह — **भू प्राप्ताविति**। सूर्योदयं **संभावयते** प्राप्नोतीत्यर्थः। ननु [17]'कर्तृकर्मणोः' इति पुष्यस्येति षष्ठ्या भाव्यम्, न तु तृतीयया। तथा च वाक्य एव तृतीयाया अभावाद् वृत्तौ कथं तृतीया, अत आह — **पुष्य इति**। कर्तृत्वे हेतुः — **स हीति**। उभयोः [18]कर्तृत्वकर्मत्वोपपादनस्य फलमाह — **तत्रेति**। षष्ठ्यभावे कर्तरीत्यादिः। एवं वाक्ये तृतीयां

---

[1] पा. सू. ३.३.७६.

[2] 'वधादेश' इति नास्ति — ऋ.

[3] पा. सू. ७.३.५२.

[4] न निवर्तते। तन्निवृत्त्यर्थं — अ.

[5] लौ. न्या. साहस्री. १८८.

[6] न लुक् — अ.

[7] परिभाषा ८९. धातोः कार्यमुच्यमानमित्यत्र 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति प्राचीनानां पाठः।

[8] कार्यशब्दश्चाध्याहार्यः — ऋ.

[9] तादृशमेतत् ण्यन्ताया अपि — ऋ.

[10] कुत्वघत्वादि — अ, ऋ, लृ.

[11] उपमानकत्वात् — ऋ, लृ.

[12] दर्शनीयवस्तु — अ.

[13] प्रदीपे 'प्रतिपाद्यस्य दर्शनार्था प्रवृत्तिर्भवति' इत्यत्र 'प्रतिपाद्यस्य दर्शनार्था तस्य प्रवृत्तिर्भवति' इत्यन्नंभट्टाभिमतः पाठ इति भाति।

[14] वाक्यमेवं भवति — अ.

[15] 'तावत्' इति नास्ति — अ.

[16] णिजित्युक्तेः — ऋ.

[17] पा. सू. २.३.६५.

[18] कर्तृकर्मत्वोपपादनस्य — ऋ.

प्रसाध्य वृत्तौ तत्सिद्धिं प्रागुक्तां स्मारयति — **तत्रेति**। प्रकृतिवदित्यातिदेशिकं कर्तृत्वं पुष्यस्यास्तीति योजयतीति लकारस्य तस्मिन्नुत्पादात् कथं पुष्येणेति तृतीया, अत आह — **लकारस्त्विति**। णिजर्थस्य प्रधानस्य [1]ज्ञानस्य कर्ता [2]प्रधानकर्ता। पुष्येणेति करणे सहार्थे वा तृतीयेति केचित्। तच्चिन्त्यम्, योगे कर्तृत्वस्यैव संभवेन करणत्वाभावात्, उपपदविभक्तेः कारकविभक्तेर्बलीयस्त्वान्न सहार्थेऽपीति। **सामान्यलक्षणेन** 'हेतुमति च' इत्यनेनैव। 'देवदत्ते, आदित्ये' इति च विषयसप्तमी, नाधिकरण इत्याह — **देवदत्तविषयेति**। [3]यज्ञदत्तो देवदत्तेन पाचयतीत्यादावित्यर्थः। एवमुज्जयिन्याः प्रस्थितस्यादित्यविषया हेतुता। 'देवदत्ते चादित्ये च' इति पूर्वोत्तरभाष्यानुरोधात् 'पाचयत्योदनं यज्ञदत्तो देवदत्तेन' इत्युदाहरणेन भाव्यम्। भाष्ये 'पाचयत्योदनं देवदत्तो यज्ञदत्तेन' [4]इत्युदाहरणाभिप्रायम्। देवदत्तादित्ययोः [5]प्रयोज्यत्वसाम्यं वक्तुमुभयोः प्रवृत्तिसाम्यमाह — भाष्ये **नेह कश्चिदिति**। भाष्ये **सज्जन्ते** वर्तन्ते। यदभिप्रायानुवर्तिन इति यावत्। सर्वस्यापि स्वार्था प्रवृत्तिः, प्रयोज्यस्यापि तथैवेति भाष्योक्तं हरिणा संगृहीतमित्याह — **तदुक्तमिति**। [6]**निमित्ते** हेतौ, फलसाधनव्यापार, इति यावत्। भाष्ये [7]**आदित्यश्चापीति**। माहिष्मत्यां सूर्य उद्गच्छतीत्यभिप्रायानुरोधित्वमादित्यस्यापि प्रस्थितस्य तत्समीप उदय एवेति भावः। प्रश्नाशयमाह — **चिरेति**। उपसंख्याने तु नायं दोष इत्याह — **उपसंख्यानेति**। इदानीं कंसाभावात् 'शौभिकाः कंसं घातयन्ति' इत्ययुक्तम्, अत आह — **कंसानुकारीति**। शब्दप्रतिपाद्यानामप्यर्थानां वर्तमानबुद्धिविषयतया वर्तमानत्वे संमतिमाह — **तदुक्तमिति**। **शब्दोपहितरूपान्** शब्दप्रतिपादिताकारान्, **साधनत्वेन** कर्मादिकारकत्वेन। **मन्यते** श्रोता। **शिष्टमिति**। तद्भक्तेषु क्वचित् कथां कथयत्सु कश्चित् कंचिद्वासुदेवभक्तमाह — तत्र कंसवधो जायते, भविष्यति वा। श्रोतुं गच्छेति। सोऽन्यतस्तत्कथामतिक्रान्तां श्रुत्वा किं गतेन, हतः कंस इत्याहेत्यर्थः॥

इति महाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य
प्रथमपादे द्वितीयमाह्निकम्॥

[३, ९१–९७]

(रत्नप्रकाशः) आख्यानादिति। आख्यायतेऽनेनेति **आख्यानः** ग्रन्थविशेषः, तत्परो यस्तत्प्रतिपाद्यवाचकः कारकपूर्वः कृदन्तः तस्मादाचष्ट इत्यस्मिन्नर्थे णिज् वक्तव्यः, तत्प्रकृत्यवयवस्य कृतो लुग् वक्तव्यः, तस्य कृतो या प्रकृतिस्तस्याः प्रत्यापत्तिर्वक्तव्या। तस्याः प्रत्यापन्नाया यत् कारकं कारकवाचकं तत् ततो हेतुमण्णिच इव धातावनन्तर्भूतं द्वितीयाद्यन्तं भवतीति वक्तव्यमित्यर्थः। [8]"प्रातिपदिकाद्धात्वर्थे" इत्येव सिद्धे नियमार्थमिदम्। नियमशरीरं चाख्यानात् कृतो णिच् चेत्

---

[1] 'ज्ञानस्य' इति नास्ति — अ.
[2] 'प्रधानकर्ता' इति नास्ति — अ.
[3] देवदत्तो यज्ञदत्तेन — ऋ, लृ.
[4] तदुपलक्षणाभिप्रायकमित्यर्थो विवक्षितः स्यादिति भाति।
[5] प्रयोज्यत्वसामान्यं — अ; प्रयोज्यसाम्यं — ऋ, लृ.
[6] वाक्यपदीयश्लोके 'निमित्तेभ्यः प्रवर्तन्ते' इत्यत्र 'निमित्ते ये प्रवर्तन्ते' इत्यन्नंभट्टाभिमतः पाठ इति भाति।
[7] भाष्ये 'आदित्यश्चास्याभिप्राये' इत्यत्र 'आदित्यश्चाप्यस्याभिप्राये' इति पाठोऽभिमत इति ज्ञायते।
[8] चुरादिगणसूत्रम्।

कृल्लुक्प्रकृतिप्रत्यापत्ती प्रकृतिवच्च कारकं विधाय धातुमात्रात् स कर्तव्य इति। तेन 'कंसवधमाचष्टे कंसं घातयति, कंसमजीघतत्' इत्यादौ कुत्वतत्वादिकमडादिव्यवस्था च सिध्यति। एतेन '**प्रकृतिवदिति**। णिचो या प्रकृतिः कंसवधादिस्तत्तुल्यं कंसादिकारकं भवति। यथाख्यानक्रियापेक्षं कंसवधादेः कर्मत्वं तथा [1]कंसादेरप्यप्रतिपन्नाख्यानकर्मभावस्येत्यर्थः' इति निरस्तम्। 'नलपाकमाचष्टे नलेन पाचयति' इत्यादौ कारकस्य तृतीयान्तत्वाद्यनापत्तेः। यदप्युक्तम् 'वत्करणाच्च स्वाश्रयमपि भवति। पुष्येण योजयतीति पुष्यस्य कर्मत्वाभावः' इति। तदपि न, कंसं घातयतीत्यत्रापि कर्मत्वस्य स्वाश्रयत्वेनैव सिद्धेऽतिदेशानर्थक्यापत्तेः। यदप्युक्तम् 'प्रकृत्या तुल्यं वर्तत इति प्रकृतिवत्, प्रकृतेरिव प्रकृतिवत् ण्यन्तस्य कारकमित्युभयथातिदेशाश्रयणात् क्वचित् कश्चित् परिगृह्यते' इति। तदपि तुच्छम्, कुत्र किमाश्रीयत इति विनिगन्तुमशक्यत्वात्। सति विनिगमके तेनैव सिद्धेऽतिदेशानर्थक्यापत्तेश्च। यदप्युक्तम् 'प्रकृतिप्रत्यापत्त्या राजागमनादौ नलोपाद्यपि निवर्तत इति राजानमागमयतीत्याद्युपपन्नम्' इति। तदपि तुच्छम्, तत्र प्रकृतिशब्देन कृत्प्रकृतेरेव प्रत्यासत्त्या ग्रहीतुमुचितत्वात्। कारकस्य प्रकृतिवद्भावेन राजानमित्यादिरूपसिद्ध्या नलोपादिनिवृत्तिसंपादनक्लेशानर्थक्याच्च। **कंसवधमिति**। यद्यपि प्रकृतिप्रत्यापत्तिं विनापि, [2]'संनियोगशिष्टानामन्यतराभावे उभयोरप्यभावः' इति कृल्लुकि कृत्संनियोगशिष्टो वधादेशो निवर्तते, तथापि 'नलपाकमाचष्टे नलेन पाचयति' 'राजयोगमाचष्टे राज्ञा योजयति' इत्यादौ कुत्वादिनिवृत्तिस्तत्फलं बोध्यम्। कारकप्रत्यापत्तिरन्वाचयशिष्टेति मन्यमान आह — **आख्यानाच्च प्रतिषेध इति**। आख्यानशब्दस्यापि ग्रन्थविशेषवाचकत्वात् कृदन्तत्वाच्च प्रसक्तिः। वस्तुतस्तूक्तवचनं नियमार्थमिति तत्र कारकपूर्वकत्वाभावात् प्रसक्तिरेव तस्य नियमस्य नास्ति। **संज्ञाभूतानीति**। कंसवधनलोपाख्यानादीनीत्यर्थः। **क्रिया[न्वा]ख्यानमात्रादिति**। [3]संज्ञाभूतासंज्ञाभूतरूपं यत् क्रियाख्यानं क्रियाप्रतिपादकं ग्रन्थरूपं तत्प्रतिपादकमात्रादित्यर्थः। **राजानमागमयतीति**। [4]गतिबुद्ध्यादिसूत्रेण राज्ञो हेतुमण्णौ [5]कर्मत्वबोधनादत्र तस्य कर्मत्वं बोध्यम्। **दृश्यर्थायां [च] प्रवृत्ताविति**। **दृशिः** दर्शनम् **अर्थः** प्रयोजनं यस्यास्तस्यां **प्रवृत्तौ** व्यापार इत्यर्थः। स त्वारण्यकस्य पुरुषस्य रममाणान् मृगानरण्ये दृष्टवतो भवति 'महाराज, अमुष्मिन्नवकाशे एवंविधा मृगा रमन्ते' इति कथनरूपः। तत्रायं प्रयोगो भवति — मृगान् रमयतीति। पूर्ववार्तिकेनैव सिद्धे किमर्थमिति पृच्छति — **दृश्यर्थायामिति किमर्थमिति**। नियमार्थमित्याशयेनोत्तरमाह — **यदा हीति**। यत्तु 'ग्रामे मृगाणामसंभवान्न तद्दर्शनार्था प्रवृत्तिः' इति। तन्न, राजादिपालितानां मृगाणां ग्रामेऽपि संभवात् तत्प्रवृत्तेर्दृश्यर्थत्वाभावमात्रेण प्रत्युदाहरणसंभवाच्च। [6]दृश्यर्थायामित्यत्र दृशिर्मृगयोपयोगी गृह्यत इति राजागमनादिषु दृश्यर्थत्वाभावेऽपि [7]प्रवृत्त्याः णिज् भवत्येव। **आङ्लोपश्चेति**। एतदर्थमेवेदं वचनम्, अन्यस्य पूर्वेणैव सिद्धेः। **आरात्रिविवासमिति**। रात्रिसमाप्तिपर्यन्तं कथाः कथयतीत्यर्थः। **चित्रीकरण इति**। आश्चर्ये गम्ये प्राप्नोतीत्यर्थे णिज्वक्तव्य इत्यर्थः। **संभावयत इति**। प्राप्नोतीत्यर्थः। 'भू प्राप्तावात्मनेपदी' इत्यस्य चुरादेरिदं रूपम्। **पुष्ययोगमिति**। पुष्यकर्तृकं संबन्धमित्यर्थः। पुष्यो हि चन्द्रमसा **युङ्क्ते** संबध्नाति। एतेन

---

[1] कंसवधादेरपि — प, ब.

[2] परिभाषा ८७.

[3] संज्ञाभूतरूपं यत् — ब.

[4] पा. सू. १.४.५२.

[5] कर्तृत्वबोधनात् — प, ब.

[6] 'दृश्यर्थायाम्' इत्यादि 'राजागमनादिषु' इत्यन्तं नास्ति — ब.

[7] प्रवृत्त्या दृश्यर्थत्वाभावेऽपीत्यन्वयः।

"पुष्यो योग[1]क्रियायां कर्ता। स हि तं चन्द्रमसं संबध्नाति। तत्र [2]'उभयप्राप्तौ कर्मणि' इति नियमात् षष्ठचभावे तृतीयासमासः" इति निरस्तम्। युजेर्बन्धेश्च प्रसिद्धेऽर्थेऽकर्मकत्वेन 'चन्द्रमसं संबध्नाति' इत्युक्तेः [3]'उभयप्राप्तौ कर्मणि' इति नियमोक्तेश्चासंबद्धप्रलापत्वात्। सकर्मकस्थलेऽपि कर्मणि कर्तरि च यस्मिन् प्रयोगे षष्ठी प्राप्ता तत्रैव तन्नियमप्रवृत्तेश्च। यदप्युक्तम् 'लकारस्तु प्रधान एव कर्तरि भवति, नातिदेशिके' इति। तदपि न, आख्यानार्थकणिजन्तार्थे [4]प्रत्यातिदेशिकस्य कर्तृत्वाप्रसक्त्या तत्र लकार[5]प्रसङ्गस्य दूरापास्तत्वात्। णिच्प्रकृत्यर्थं प्रति तस्य कर्तृत्वे संभवत्यपि ततो लकाराप्रसक्तेश्च। न हि विशेषवचनमन्तरेणैकप्रत्ययावरुद्धादपरः प्रत्ययो भवति। **इदं बह्विति**। 'आख्यानात् कृतः' इत्यारभ्यैतावता यदुक्तं तदित्यर्थः। **सामान्यकृतत्वादिति**। सामान्यलक्षणेन 'हेतुमति च' इत्यनेन सिद्धत्वादित्यर्थः। **देवदत्ते चादित्ये चेति**। विषय इति शेषः। यथा देवदत्ते प्रयोजकव्यापारो भवति तथादित्येऽपीत्यर्थः। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं मनसि निधायाह — **न सिध्यतीति**। **न चासावादित्यं प्रयोजयतीति**। यदि प्रयोजयेत् तर्हि पश्चिमायामुदयः पूर्वस्यामस्तंगतिश्च स्यादिति भावः। **तेनैतत् तुल्यमिति**। यज्ञदत्तादिप्रयोजकदेवदत्तादिना सूर्यप्रयोजकविष्णुमित्रादिस्तुल्य इत्यर्थः। 'एतत् तुल्यम्' इति सामान्ये नपुंसकनिर्देशः। **प्रवृत्तिरिति**। हेतोरिति शेषः। [6]**न हि कश्चिदिति**। प्रयोज्य इति शेषः। **परः** प्रयोजकः। किं तर्हीत्यत आह — **इमे स्वभूत्यर्थमिति**। उदाहरणमाह — **ये तावदेते गुरुशुश्रूषवो नामेति**। **परिभाषा इति**। निन्दादिकाः। **यदभिप्रायेषु सज्जन्त इति**। प्रयोजकाभिप्रायेषु सज्जन्त इति यत् तदेव प्रयोज्यार्थं इत्यर्थः। [7]भाष्यप्रयोगात् षस्जधातुरनुदात्तेदपि द्रष्टव्यः। तदुक्तं हरिणा —

[8]'निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये।
अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये॥' इति।

चिरहत इति। वर्तमानप्रयोजकव्यापारस्य वर्तमानप्रयोज्यव्यापारविषयताया औत्सर्गिकत्वादिति भावः। **शौभिका इति**। कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्याया इत्यर्थः। कंसानुकारी नटः सामाजिकैर्यः कंसत्वेन गृहीतः सोऽत्र कंसशब्देन विवक्षित इति युक्ता वर्तमानकालतेति भावः। **ग्रन्थिकेष्विति**। कथकेष्वित्यर्थः। **तेऽपीति**। तदुक्तं हरिणा —

[9]'शब्दोपहितरूपांस्तु बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥' इति॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥

[३, ९१–९७]

(नारायणीयम्) आख्यायत इत्याख्यानमिति। [10]'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट्। यौगिकोऽत्राख्यानशब्दो गृह्यते, न रूढिशब्दः। तेन राजागमनादिकमप्याख्यानकर्मत्वादिहाभिप्रेतम्,

---

[1] क्रियायाः कर्ता — प.
[2] पा. सू. २.३.६६.
[3] पा. सू. २.३.६६.
[4] प्रत्यातिदेशिकस्याकर्तृत्वाप्रसक्त्या — ब.
[5] प्रसङ्गस्य दूषणत्वात् — ब.
[6] भाष्ये 'नेह कश्चित्' इत्यत्र 'न हि कश्चित्' इति रत्नप्रकाशकृत्पाठ इति प्रतीयते।
[7] भाष्ये प्रयोगात् — ब.
[8] वाक्यपदीयम् ३.७.१२४.
[9] वाक्यपदीयम् ३.७.५.
[10] पा. सू. ३.३.११३.

न तु कंसवधनलोपाख्यानादिकमेवेति भावः। **णिचो या प्रकृतिः कंसवधादिरिति**। [1]'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति कारकपूर्वस्यात्र ग्रहणात्। तुल्यत्वमेवोपपादयति — **यथेति**। 'अप्रतिपन्नाख्यानकर्मभावस्य' इत्यनेनातिदेशस्य प्रयोजनमुक्तम्। ननु कंसवधराजागमनादिशब्देभ्यो णिचि कृते धातुत्वमङ्गसंज्ञा च तेषामेव स्यातामिति 'कंसमघातयत्, राजानमजीगमत्' इत्यादावडादिकार्यं कंसादिसहितस्य स्यादित्याशङ्क्य प्रकृतिवद्भावातिदेशादेवायमपि दोषो नावतरतीत्याह — **प्रकृतिवद्भावेति**। यथाख्यानक्रियायाः कर्मत्वात् कंसवधादेः पृथक्करणं तथा कंसादिरपि [2]क्रियायाः पृथक्कृतत्वाद् धातुत्वं न प्रतिपद्यत इत्यङ्गसंज्ञाया अभावादडागमः कंसादेर्न भवति द्विर्वचनं चेत्यर्थः। यद्वा, यदा प्रकृतेरिव प्रकृतिवदित्याश्रीयते तदा कृतो या प्रकृतिर्धातुस्तस्य [3]शुद्धे णिचि यादृशं कंसादिकारकं भवति धातावनन्तर्भूतम्, तादृशमस्मिन्नपि णिचीत्यर्थाङ्गीकारात् कंसादेरडादिकं न भवतीति भावः। ननु 'प्रकृतिवच्च कारकम्' इत्यतिदेशात् 'पुष्येण योजयति' इत्यत्र ज्ञानक्रियापेक्षं यथा योगस्य कर्मत्वं तथा पुष्यस्यापि कर्मत्वाद् द्वितीया स्यात्, न तृतीयेत्यत आह — **वत्करणाच्चेति**। नन्वातिदेशिकविरुद्धं स्वाश्रयं कार्यं [4]न प्रवर्तत इत्याशङ्क्यातिदेशादेवात्र तृतीयासिद्धिं प्रतिपादयितुमाह — **अथवेति**। **प्रकृत्या तुल्यमिति**। [5]'तेन तुल्यम्' इत्यादिना वतिः। **प्रकृतेरिवेति**। [6]'तत्र तस्येव' इति। **क्वचित् कश्चिदिति**। 'कंसं घातयति' इत्यादौ पूर्वस्तद्धितार्थ आश्रीयते। 'पुष्येण योजयति' इत्यादौ द्वितीयः, यथा कृत्प्रकृतेर्युजेर्णिचि पुष्यस्य कर्तृत्वं तथास्य ण्यन्तस्यापि पुष्यः कर्तेति तृतीयासिद्धिः। 'प्रकृतिप्रत्यापत्तिः' इत्यस्यायमर्थः — कृतो या प्रकृतिर्हन्त्यादिः सा विकारपरित्यागेन स्वेनैव रूपेणावतिष्ठत इति। तेन किं सिद्धं भवतीत्यत्राह — **प्रकृतिप्रत्यापत्त्येति**। 'नलोपाद्यपि निवर्तते' इत्यनेनैतद्दर्शयति। प्रकृतेः स्वात्मनः स्वसंबन्धिनश्च प्रत्यापत्तिः प्रकृतिप्रत्यापत्तिरुच्यते। ततश्च यथा पुष्येण योजयतीत्यादौ कृत्प्रकृतेर्युजेः कुत्वं निवर्तते, एवम् [7]आगमः संबन्धिनो राजन्शब्दस्य नलोपोऽपि निवर्तते। अन्यथा प्रकृतिवद्भावाद् द्वितीयाया एव प्रापणं स्यात्, नकारस्य तु लोपः स्यादेवेति। अन्ये तु — प्रकृतिवद्भावादेव नलोपादिनिवृत्तिं मन्यन्ते। कंसं घातयतीत्यत्र प्रकृतिप्रत्यापत्तिवचनस्योपयोगाभावेऽप्यन्यार्थं तस्य कर्तव्यत्वं दर्शयति — **यद्यपीति**। **संनियोगशिष्टत्वादिति**। [8]'हनश्च वधः' इत्यप्संनियोगेन वधादेशविधानात्। 'संज्ञाभूतानि' इत्यनेन प्रसिद्धान्युच्यन्त इत्याह — **कंसवधेति**। उदाहरणे दृश्यर्थौ प्रवृत्तिमुपपादयति — **यदारण्यस्थ इति**। प्रत्युदाहरणे दृश्यर्थत्वासंभवं दर्शयति — **ग्राम इति**। रात्रेर्विवासो रात्रिविवासः, [9]कर्तृषष्ठ्याः समासः। तत [10]'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः। अत्राङो लोप इत्येतद् दर्शयति — **यावद्रात्रेरिति**। 'चित्रीकरणे प्रापि' इति व्यधिकरणसप्तम्यावित्याह — **आश्चर्यकरण इति**। ननु प्राप्नोतीत्यत्रार्थे णिचो वक्तव्यत्वमुक्त्वा 'संभावयते' इत्यर्थान्तरकथनमनुपपन्नमित्यत्राह — **भू प्राप्ताविति**। उज्जयिन्या माहिष्मती दूरदेशस्थेति प्रभाते प्रस्थितेन प्रागुदयात् तावतो देशस्यातिक्रमणमाश्चर्यं करोति। पुष्येण योगः पुष्ययोगः, [11]'कर्तृकरणे कृता बहुलम्' इति तृतीयासमास इति दर्शयितुमाह — **पुष्यो योगक्रियाया इति**। एतदेवोपपादयति — **स हीति**। **उभयप्राप्ताविति**। चन्द्रमसः कर्मणो नियमेन गम्यमानत्वा-

---

[1] परिभाषा २८.
[2] क्रिययोः पृथक्कृतत्वात् — ङ.
[3] हेतुमण्णिचीत्यर्थः।
[4] न प्रवर्ततेति — ङ.
[5] पा. सू. ५.१.११५.
[6] पा. सू. ५.१.११६.
[7] आङ्पूर्वकगम्धातोः संबन्धिन इत्यर्थः।
[8] पा. सू. ३.३.७६.
[9] 'कर्तृषष्ठ्याः समासः' इति नास्ति — ङ.
[10] पा. सू. २.१.१३.
[11] पा. सू. २.१.३२.

दुभयप्राप्तिः। **तत्र प्रकृतेरिवेति**। युजेर्गत्यर्थादिष्वन्तर्भावाभावादणौ कर्तुः पुष्यस्य [1]'शुद्धे णिचि कर्तृत्वमेवेत्यस्मिन्नपि णिचि कर्तृत्वात् तृतीया भवतीत्यर्थः। नन्वेवं योजयतीति लकारोऽप्यातिदेशिके पुष्ये कर्तरि स्यादिति, नेत्याह — **लकार इति**। **प्रधान इति**। ज्ञानकर्तरीत्यर्थः। **सामान्यकृतत्वादिति**। सामान्यशब्देन सामान्यलक्षणमुच्यते। करणं च सिद्धिरेव, न तूत्पादनमिति व्याचष्टे — **सामान्यलक्षणेनेति**। ननु देवदत्तस्य प्रयोज्यत्वमत्र प्रतिपित्सितम्, न तु प्रयोजकत्वमिति [2]'तुल्या हि हेतुता भवति देवदत्ते च' इत्ययुक्तमित्याशङ्क्य व्याचष्टे — **देवदत्तविषयेति**। **दण्डनादिका इति**। तथा चाहुः — [3]'यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम्' इति। **निमित्तेभ्य इति**। [4]निर्वेशादिनिमित्ता भृत्यादीनां प्रवृत्तिः स्वार्थसंपादनायैव। वीतरागाणामपि कारुण्याद्या प्रवृत्तिः, तत्रापि स्वार्थतैव। परार्थसंपादनमेव हि स्वार्थः। यच्च स्वाम्याद्याशयानुवर्तनं भृत्यादीनां तदपि स्वार्थस्यैव प्रसिद्धये। स्वफलाभिसंधानेन प्रवर्तमानः प्रयोज्यः प्रयोजकाभिप्रायमपि संपादयतीत्यर्थः। तत्र यद्यपि स्वरसतः सूर्यस्य प्रवृत्तिः, तथापि पथिकस्याभिप्रेतं माहिष्मत्यामुद्गमनं [5]'यदृच्छया संपन्नमित्यभिप्रायानुवर्तनात् सूर्यस्य प्रयोज्यत्वमारोप्यते। एवमन्यत्रापि योज्यम्। 'सज्जन्ते' इत्यात्मनेपदप्रयोगानुपपत्तिमाशङ्क्य परिहरति — **भाष्यकारेति**। **व्याख्यानोपाध्याया इति**। ते हि कंसानुकारिणं [6]'नटं सामाजिकैः कंसबुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयन्तीति णिच्प्रयोगोपपत्तिः। तदेतद्दर्शयति — **कंसानुकारीति**। **कथकेष्विति**। ये हि भारतादिकं ग्रन्थं वाचयन्तः कंसवधाद्याचक्षते ते कथकाः। तत्र प्रतिकृतिरूपस्याप्यभावात् कथं प्रयोज्यप्रयोजकभाव इति चोद्यम्। 'तेऽपि हि तेषाम्' इत्यादि परिहारभाष्यम्। तत्राशयो हरिणा दर्शित इत्याह — **तदुक्तमिति**। **शब्दोपहितेति**। श्रोता हि कथकोदीरितशब्दसामर्थ्यसंजातरूपविशेषान् अत एव स्वबुद्धिगोचरतामापन्नान् सव्यापारान् कंसादीन् कर्मादिसाधनतया मन्यते। प्रत्यक्षमिति मानम्, न क्रियाविशेषणम्। यथेन्द्रियनिमित्तेन ज्ञानेन स्फुटावभासस्तथा [7]'शाब्देनापीत्यर्थः। ततश्चायं भाष्यार्थः — **ते हि** कथकाः **तेषां** कंसादीनाम् **ऋद्धीः** चरितविशेषान् व्याचक्षाणाश्चिरकालातीतत्वाद् बहिरसत्त्वाद् बुद्धिगोचरतया **सतो** विद्यमानांस्तान् **प्रकाशयन्ति** [8]'शब्देनावभासयन्ति। ततश्च कथकः श्रोतृबुद्धौ कंसाद्याकारमुत्पादयन् बुद्धिवासुदेवेन बुद्धिकंसं घातयतीति प्रयोज्यप्रयोजकत्वसमारोपात् प्रयोगोपपत्तिः। एवमन्यत्राप्यूह्यम्। यो हि राजागमनमाचष्टे स राजानमागमयत्येव। यश्च रात्रिविवासं कथाः कथयति स रात्रिं विवासयति यापयति। यश्च मृगरमणमाचष्टे स मृगान् रमयति। द्रष्टृबुद्धौ तथा प्रतिभासादित्याद्यूह्यम्। परिशिष्टस्य भाष्यस्य व्याख्यानाभावे प्रक्षेपशङ्का स्यात्, तदपनयनायाह — **शिष्टं स्पष्टमिति**। शिष्टं भाष्यमस्ति, स्पष्टत्वात्तु न व्याख्यायत इत्यर्थः। यद्वा, शिष्टस्य भाष्यस्य [9]'व्याख्यानादर्शने प्रतिपत्तॄणां तदर्थप्रतिपत्तावप्रयत्नः स्यादिति तत्प्रवृत्त्यर्थमाह — **शिष्टं स्पष्टमिति**। शिष्यैः स्वयमेव विमृश्य ज्ञातुं शक्यत इत्यस्माभिर्न व्याख्यातमिति तत्र प्रयत्नः कार्य इति शिष्य[10]शिक्षार्थमिदमुक्तम्॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य
प्रथमे पादे द्वितीयमाह्निकम्॥

---

[1] हेतुमण्णिचीत्यर्थः।

[2] तुल्यो हि हेतुर्भवति — घ, ङ.

[3] अमरकोशे प्रथमकाण्डे शब्दादिवर्गे श्लो. – १४.

[4] निर्वेशो भृतिः, निर्वेशो भृतिभोगयोरित्यमरकोशः।

[5] यदिच्छया — ङ.

[6] नरं — ङ.

[7] शब्देनापीत्यर्थः — ङ.

[8] शब्देनाभासयन्ति — घ, ङ.

[9] व्याख्यानदर्शने — ङ.

[10] शिक्षार्थमिदमयुक्तम् — घ, ङ.

तृतीयाध्यायस्य प्रथमपादे तृतीयमाह्निकम्

कण्ड्वादिभ्यो यक् ३.१.२७.

[३, ९७–१०१]

(उद्द्योतनम्) कण्ड्वादीनां धातुत्वस्यापि सत्त्वात् प्रश्नायोगः, अत आह — **द्वैविध्यमिति**। प्रातिपदिकान्येवेति मत्वा प्रश्न इत्यर्थः। प्रश्नमसमाधायार्थान्तरकथनमसंगतम्, अत आह — **ककारेति**। वावचनस्य यत् प्रयोजनं तद् द्वैविध्येन सिध्यतीति कित्त्वप्रयोजन एवास्य पर्यवसानमित्यर्थः। [1]**यदीति**। यदि कण्ड्वादीनि प्रातिपदिकान्येवेत्यर्थः। **क्विपेति**। संपदादेराकृतिगणत्वाद् भावे क्विप्यतो लोपे वलि लोपे च कण्डूरिति सिध्यतीत्यर्थः। **यथेष्टं** कण्ड्वौ कण्ड्व इत्यादिः। नन्वेकवचनेऽपि [2]यकोऽकारलोपस्य स्थानिवद्भावात् [3]'अचि' इत्युवङादेशः प्राप्नोति। तत्किमेकवचनं विहाय द्विवचनबहुवचने एवोदाहृते, अत आह — **कण्डूयशब्दादिति**। ननु क्वौ विधिं प्रति स निषेधः, न चोवङ क्वौ विधिः। यद्वा, सूत्रकारमते स्थानित्त्वनिषेधः, अत आह — [4]**अथापीति**। **तथापीति**। तथा चोठि सवर्णदीर्घे कण्डूरिति रूपमुवङ्यपि सिध्यतीत्यर्थः। ननु क्विपि परतो वकारस्योठि कर्तव्येऽल्लोपस्य स्थानिवत्त्वादूठ् न प्राप्नोति, अत आह — **आदिष्टादिति**। अनादिष्टादचः पूर्वस्य विधौ स्थानिवद्भावः, अतो लोपानन्तरं यलोपे सत्युवङित्यादिष्टादचः पूर्वो वकार इत्यर्थः। यद्यपि पुनरूठ् पुनरुवङित्यनवस्थायामिष्टतो [5]व्यवस्था नास्ति, तथाप्युवङः प्रसङ्ग एव नास्तीत्याह — **अत एवेति**। ऊठोऽप्यादिष्टादचः पूर्वत्वेन तस्योवङि कर्तव्येऽल्लोपस्य स्थानिवत्त्वाभावादेवेत्यर्थः। द्विवचनबहुवचनयोस्तत्प्रसङ्गमाह — **तत्रेति**। ननु [6]'ओः सुपि' इति यणुवङपवादः, अत आह — **ओः सुपीति**। [7]**नोङ्धात्वोः** एतयोर्यो यण् तस्मात् पराजादिरसर्वनामस्थानविभक्तिरुदात्ता न भवति। वावचने यगभावपक्षे धातुत्वाभावात् [8]प्रतिषेधाप्रसङ्गः। वल्गुमन्तुभ्यां यकि क्विप्यल्लोपयलोपयोः कृतयोस्तुक्प्रसङ्गः। [9]'अपृक्तलोपाद्वलि लोपः पूर्वविप्रतिषेधेन' इत्युक्तत्वात् कथमत्र पूर्वमपृक्तलोप उक्तः, अत आह — **अपृक्तेति**। ननु क्विप् प्रत्यय एव, अत आह — [10]**वल्रूपेति**। [11]यको नित्यत्वे चैते दोषाः, वावचने तु नेत्याह — **वावचने त्विति**। यगुत्पत्तौ कण्डूयतीत्यादि, तदनुत्पत्तौ प्रातिपदिकत्वात् 'कण्डूः, कण्ड्वौ' इत्यादि यत्नं विनैव सिध्य-

---

[1] प्रदीपे 'यदा कण्ड्वादीनि' इत्यत्र 'यदि कण्ड्वादीनि' इत्यन्नंभट्टपाठ इति भाति।

[2] यकारलोपस्य — अ.

[3] पा. सू. ६.४.७७.

[4] अथापीति। तथा च सवर्णदीर्घे — अ.

[5] व्यवस्थास्ति — अ.

[6] पा. सू. ६.४.८३.

[7] पा. सू. ६.१.१७५.

[8] पूर्वोक्तविभक्त्युदात्तत्वप्रतिषेधस्याप्रसङ्ग इत्यर्थः।

[9] उद्देश्यस्य व्योरित्यस्य पूर्वनिर्देशे विधेयस्य लोप इत्यस्य परनिर्देशे चौचित्याल्लाघवाच्च 'व्योर्वलि लोपः' इति कर्तव्ये विपरीतनिर्देशात् 'वेरपृक्तलोपाद्वलि लोपः पूर्वविप्रतिषेधेन' इति काशिकापदमञ्जर्यादौ वर्तते। तदनुरोधेनेदम्। नागेशस्तु 'इदं क्वास्तीति चिन्त्यम्' इत्युक्त्वा लोपो व्योरिति सूत्रे क्वावुपसंख्यानमिति वार्तिकमित्याह।

[10] वर्णत्वेति — अ, ऋ, लृ.

[11] यदा नित्यत्वे चेति दोषः — अ, ऋ, लृ.

तीत्यर्थः। **संपदादित्वादिति**। तस्याकृतिगणत्वादिति भावः। 'अस्ति मे कण्डूः' इत्यादिकं प्रातिपदिकत्वावेदनपरमित्याह — **वेदना चेति**। कण्ड्वादेर्धातुत्वप्रातिपदिकत्वोभयरूपत्वाङ्गीकारेऽपि यको नित्यत्वे प्रसक्तदोषानुद्धाराशङ्कानिरासाय 'अपर आह' इति भाष्यम्। तत्र 'धातुप्रकरणात्' इत्येतद्व्याचष्टे — **धात्वधिकारादिति**। [1]'धातोरेकाचः' इत्यतो धातोरित्यनुवृत्तेरित्यर्थः। **स्वार्थ इति**। [2]अनिर्दिष्टार्थत्वात्। [3]'हेतुमति च' इत्यनेन व्यवधानात् प्रयोजनाभावाच्च 'करणे' इत्येतन्नानुवर्तत इति भावः। 'धातुः' इत्येतदध्याहारेण पाक्षिकधातुत्वपरतया व्याचष्टे — **धातुरिति**। 'कण्डूञ्' इत्यादिषु पाठसामर्थ्यात् [4]पाक्षिकं धातुत्वमिति ज्ञायत इत्येवंपरतया [5]द्वितीयार्धं व्याचष्टे — **दीर्घान्तेति**। तदेव विशदयति — [6]**नित्ये चेति**। धातुत्वस्य नित्यत्वेऽपि यगभावपक्षे दीर्घार्थं दीर्घोच्चारणमिति शङ्कानिरासाय 'नित्ये च यकि' इत्युक्तम्। तत्र वाग्रहणाननुवृत्तेर्यग् नित्यः॥

[३, ९७–१०१]

(रत्नप्रकाशः) किमर्थः ककार इति। श्रवणार्थताया अनिष्टत्वादित्संज्ञाप्रयोजनाभावाच्चेति भावः। तस्य तं भावं तन्मुखादवगन्तुमाह — **गुण [वृद्धि] प्रतिषेधार्थ इति**। **कण्ड्वादिभ्यो वावचनमिति**। यक इति शेषः। **तत्र को दोष इति**। नित्येऽपि यकि क्विपा कण्डूरित्यादि सिध्यतीति भावः। उत्तरमाह — **तत्रेति**। क्विपा कण्डूरित्यादिसाधन इत्यर्थः। [7]**उवङादेशः प्रसज्येतेति**। अल्लोपस्य स्थानिवत्त्वं न भवति, [8]'क्विलुगुपधात्व' इत्यादिना तन्निषेधात्। उवङादेशस्यासिद्धत्वेन[9] वकारस्योठ् न भवति। **प्रतिषेधः प्रसज्येतेति**। विभक्त्युदात्तत्वस्येति शेषः। **अन्तरङ्गत्वादिति**। यलोपापेक्षयेति शेषः। **यलोपश्च वक्तव्य इति**। इदं [10]'वेरपृक्तस्य' इत्यत्र 'वेः' इति योगविभागमजानतो वचनम्। स्पष्टमिदं [11]'लोपो व्योः' इति सूत्रे भाष्य एव। एतेन "'वेरपृक्तलोपाद्वलि लोपः पूर्वविप्रतिषेधेन' इत्येतदनाश्रित्येदमुच्यते" इति निरस्तम्। तस्य वचनस्याप्रसिद्धेः। न च परशब्दस्येष्टवाचकताया भगवता व्यवस्थापितत्वात् तदपि वचनं भगवतोक्तप्रायमेवेति वाच्यम्, अल्लोपादप्यन्तरङ्गत्वेन पूर्वं वेरपृक्तलोपस्य जायमानत्वेन तेन सहाल्लोपोत्तरभाविनो यलोपस्य विप्रतिषेधासंभवात्। **नित्यत्वात् परत्वाच्चेति**। अभ्युपगमवादेनैवमुक्तम्। वस्तुतस्त्वन्तरङ्गत्वाद् वेर्लोप इति युक्तम्। **नैतेभ्य इति**। अनभिधानादिति भावः। कर्तरि हि क्विप् [12]'अन्येभ्योऽपि दृश्यते' इत्यनेन विहितः। कण्डूरित्युक्ते च क्रियामात्रं प्रतीयते, न तु कर्ता। क्रियामात्रप्रतीतिस्तु यगभावपक्षे स्वत एव क्विपं विना तेन भवति। **अवश्यमिति**। संपदादित्वाश्रयेण भावे [13]स कर्तव्य इति भावः। **एतानीति**। कण्डूरित्यादीनीत्यर्थः। **उभयमिति**। द्विविधानीत्यर्थः। **धातवश्चेति**। तथा च कण्ड्वादि-

---

[1] पा. सू. ३.१.२२.
[2] 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे' इति परिभाषयेति भावः।
[3] पा. सू. ३.१.२६.
[4] पाक्षिकधातुत्वमिति — अ.
[5] द्वितीयान्तं — अ; द्वितीयार्थं — ऋ.
[6] प्रदीपे 'नित्ये हि धातुत्वे' इत्यत्र 'नित्ये च धातुत्वे' इत्यत्रंभट्टपाठ इति प्रतीयते।
[7] उपधालोपः प्रसज्येतेति — ब.
[8] का. वा. १.१.५८–२.
[9] अन्तर्भूतक्विब्निमित्तकोठपेक्षया बहिर्भूतौकारादिविभक्तिनिमित्तकत्वेनोवङो बहिरङ्गत्वादिति भावः।
[10] पा. सू. ६.१.६७.
[11] पा. सू. ६.१.६६.
[12] पा. सू. ३.२.१७८.
[13] क्विबित्यर्थः।

भ्यो धातुभ्यो यगिति सूत्रार्थाश्रयणात् सर्वसिद्धिरिति भावः। **क्रियां कुर्वाणे प्रयुज्यत इति।** इतोऽपि भाष्याज्ज्ञायते धात्वर्थं प्रति तिङर्थः प्रधानमिति। **वेदनामात्रस्य सांनिध्य इति।** कण्डूज्ञानमात्रसांनिध्य इत्यर्थः। तेन गात्रविघर्षणकर्तृत्वाभावात् सत्त्वरूपता कण्डूशब्दार्थस्य दर्शिता भवति। कण्ड्वादीनां यदुक्तं द्वैविध्यं तत् सूत्रकारेणैव ज्ञापितमित्याशयेनाह — **अपर इति। धातुप्रकरणादिति।** [१]'हेतुमति च' इति पूर्वसूत्रे [२]'धातोरेकाचः' इत्यतो धातुग्रहणमनुवृत्तं सदत्रापि संबध्यत इति भावः। ननु कण्ड्वादीनां धातुत्वे सति धातुपदसंबन्धोऽत्र भवति, सति च धातुपदसंबन्धे कण्ड्वादीनां धातुत्वसिद्धिरित्यन्योन्याश्रय इत्यत आह — **कस्य चासञ्जनादिति।** यगिति ककारानुबन्धकरणादित्यर्थः। कण्डूयतीति प्रयोगदर्शनात् [३]'क्ङिति च' इति गुणनिषेधार्थं कित्करणमिति ज्ञायते। तच्च तदैव युज्यते यकः सार्वधातुकार्धधातुकान्यतरत्वे। तच्च तदा घटते, यदि कण्ड्वादीनां धातुत्वमिति भावः। ननु भवतु यकः कित्करणात् तेषां धातुत्वम्, प्रातिपदिकत्वं कुत इत्यत आह — **आह चायमिमं दीर्घमिति।** कण्डूञ्प्रभृति दीर्घान्तं पठितवानित्यर्थः। यदि धातव एव ते स्युस्तर्हि 'कण्डुञ्' इत्यादिरूपेण ह्रस्वान्तमेव तं पठेत्, [४]'अकृत्सार्वधातुकयोः' इति दीर्घसंभवात्। अतः प्रातिपदिकान्यपीति भावः॥

[३, ९७–१०१]

(नारायणीयम्) ननु कित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वं सुप्रसिद्धमिति विचारोऽयं निष्प्रयोजन इत्याशङ्क्य ककारप्रयोजनप्रश्नद्वारा कण्ड्वादीनां द्वैविध्यप्रतिपादनमेव विचारफलमित्याह — **द्वैविध्यमिति।** प्रातिपदिकत्वं धातुत्वं चेत्यर्थः। ननु ककारप्रयोजनमाक्षिप्यार्थान्तरकथनमसंगतमित्याशङ्क्य संगतिमाह — **ककारप्रयोजनमेवेति।** [५]**यदीति।** यदि कण्ड्वादीनां प्रातिपदिकत्वमेव, न धातुत्वं तदा 'वा' इति वक्तव्यमित्यर्थः। **नित्येऽपि प्रत्यये क्विपेति।** संपदादित्वाद् भावे क्विप्यल्लोपयलोपयोः 'कण्डूः' इत्यादिरूपस्य सिद्धत्वाद्वावचनमनर्थकमिति [६]चोदकाशय इत्यर्थः। ननु यगकारलोपस्य [७]'अचः परस्मिन् पूर्वविधौ' इति स्थानिवद्भावादकारान्तत्वाद्धातोरुवर्णान्तत्वाभावात् कथमुवङ स्यादित्याशङ्क्याह — **कण्डूप्रशब्दादिति।** ननु क्वौ विधिं प्रति स निषेधः, न चोवङ [८]क्विविधिरित्यत्राह — **अथापीति। वकारस्योठ् करिष्यत इति।** प्रत्ययलक्षणेन क्विबाश्रयः [९]'च्छ्वोः शूठ्' इत्यनेन। ननूठि कर्तव्येऽल्लोपस्य स्थानिवत्त्वात् क्विपः परत्वाभावात् कथमूठ्प्राप्तिरित्यत्राह — [१०]**आदिष्टाच्चेति।** नन्वेवमूठः पुनरुवङ पुनरूठ् इति चक्रकमव्यवस्था स्यादित्यत्राह — **अत एवेति।** आदिष्टादचः पूर्वत्वादेवेत्यर्थः। तस्मात् 'कण्डूः' इत्यत्र दोषाभावाद् द्विवचनबहुवचनयोरुवङप्रसङ्ग एव दोष इत्याशयेन भाष्ये द्विवचनबहुवचने उदाहृते इत्याह — **तत्रेति।** ननूवङो बाधको यणादेशः स्यादिति, नेत्याह — **ओः सुपीति। वेरपृक्तलोपादिति।** एतदाश्रयणे तु वलीत्येव लोपस्य सिद्धत्वान्न वक्तव्यो लोपः। वर्णाश्रयत्वमुपपादयति —

---

[१] पा. सू. ३.१.२६.
[२] पा. सू. ३.१.२२.
[३] पा. सू. १.१.५.
[४] पा. सू. ७.४.२५.
[५] प्रदीपे 'यदा कण्ड्वादीनि' इत्यत्र 'यदि कण्ड्वादीनि' इति पाठोऽभिमत इति प्रतीयते।
[६] चोदकाशङ्केत्यर्थः — ङ.
[७] पा. सू. १.१.५७.
[८] क्विविधिरित्याह — ङ.
[९] पा. सू. ६.४.१९.
[१०] प्रदीपे 'आदिष्टादचः पूर्वः' इत्यत्र 'आदिष्टाच्चाचः पूर्वः' इति पाठोऽभिमत इति भाति।

वल्रूपेति। वकारस्य वस्तुतः प्रत्ययत्वेऽपि विधौ वर्णस्य प्राधान्येनाश्रयणान्न प्रत्ययलक्षणत्वमित्यर्थः। सति वावचने इष्टसिद्धिप्रकारं दर्शयति — **वावचन इति**। क्विपोऽदर्शने हेतुमाह — **कर्तरीति**। नन्विच्छामात्रेण क्विप् दुर्लभ इत्याशङ्क्याह — **संपदादित्वादिति**। वेदनायां प्रयोगात् कथं प्रातिपदिकत्वमवसीयत इत्यत्राह — **वेदना चेति**। कण्ड्वादीनां द्वैविध्ये कस्मात् परोऽयं प्रत्ययो विधीयत इत्यत्राह — **तत्रेति**। **स्वार्थ इति**। अर्थान्तरस्यानिर्देशात्। ककारासञ्जनस्य धातुत्वावसाये लिङ्गत्वमुपपादयति — **धातुविधानेति**। 'आह चायम्' इति [1]श्लोकार्धं व्याचष्टे — **दीर्घान्तपाठादिति**। 'कण्डूञ्, हृणीङ, महीङ' इति केचिद्दीर्घान्ताः पठचन्ते। धातुशब्दो भावप्रधान इत्याह — **धातुत्वमिति**। दीर्घान्तपाठस्योक्तेऽर्थे ज्ञापकत्वं समर्थयते — [2]**नित्ये चेति**॥

कमर्णिङ ३.१.३०.

[३, १०१–१०४]

(उद्द्योतनम्) ननु परत्वाद् वृद्धेर्बलीयस्त्वम्, न प्रतिषेधस्य, अत आह — **प्रतिषेधस्येति**। भाष्ये **एवं तर्हीति**। मित्संज्ञानिषेधः [3]'मितां ह्रस्वः' इति ह्रस्वत्वनिवृत्तये। यदि णिङि वृद्धिर्न स्यात् स्वत एव [4]ह्रस्वत्वमिति तन्निवृत्तेरसंभवात् मित्त्वनिषेधस्तत्र वृद्धिं ज्ञापयतीत्यर्थः। कथं [5]'णिङन्ताण्णिच्[6]', अत आह — **कामयमानमिति**। अज्ञापकत्वमुपपादयति — **णिज्निमित्तेति**। **णिङवृद्धेः** णिङनिमित्तवृद्धेः। भाष्ये [7]'क्ङिति च' इति परसप्तमीमादाय 'ननु' इति शङ्का, निमित्तसप्तम्योत्तरम्। भाष्ये **णिङ्चेवेति**। 'णिच्[8]कृतवृद्धेर्णिङनिमित्तह्रस्वत्वनिवृत्तये मित्त्वं भविष्यतीत्यर्थः। तस्योत्तरम् — **णिङि चेति**। तस्य शेषमाह — **ह्रस्वत्वमिति**। [9]**ह्रस्वत्व इति**। [10]णिङपेक्षं ह्रस्वत्वमन्तरङ्गम्, [11]णिजपेक्षा वृद्धिर्बहिरङ्गा। ननु [12]'अत उपधायाः' इति वृद्धेरुपधात्वाश्रयत्वात् तत्र च स्थानिवत्त्वनिषेधात् [13]स्थानिवत्त्वाभावात् 'व्यवधानम्' इत्ययुक्तम्, अत आह — **क्विलुगिति**। **प्रत्ययेति**। प्रत्ययविधावेव स प्रतिषेधः, न वृद्धिविधावपीत्यर्थः। **तत्र** [14]'न पदान्त' सूत्रे। वृद्धिविधौ तन्निषेधाभावे तत्रत्यं भाष्यमुदाहरति — **तथा चेति**। **न भवति** उपधाश्रितवृद्धिविधौ स्थानिवत्त्वनिषेधो न भवति। 'पटयति' इत्यत्र [15]'तत्करोति' इति णिचीष्ठवद्भावाट्टिलोपे[16] तस्य स्थानिवद्भावात् [17]'अत उपधायाः' इति वृद्धिर्न भवति। प्रत्ययविधौ तु

---

[1] श्लोकार्थं — घ.

[2] प्रदीपे 'नित्ये हि धातुत्वे' इत्यत्र 'नित्ये च धातुत्वे' इति पाठोऽभिमतः प्रतीयते।

[3] पा. सू. ६.४.९२.

[4] ह्रस्वत्वमेव तन्निवृत्तेः—अ; ह्रस्वत्वमिव तन्निवृत्तेः — ऋ, लृ.

[5] णिजन्तात् — ऋ.

[6] णिङ — अ.

[7] पा. सू. १.१.५.

[8] णिङ्कृत — अ.

[9] प्रदीपे 'ह्रस्वे कर्तव्ये' इत्यत्र 'ह्रस्वत्वे कर्तव्ये' इत्यन्नंभट्टपाठ इति भाति।

[10] णिजपेक्षं — ऋ.

[11] णिङपेक्षा — अ.

[12] पा. सू. ७.२.११६.

[13] "'स्थानिवद्भावाद्व्यवधानम्' इत्ययुक्तम्" इति पाठोऽत्र युक्त इति भाति।

[14] पा. सू. १.१.५८.

[15] चुरादिगणसूत्रम्।

[16] टिलोपस्य स्थानिवद्भावात् — ऋ.

[17] पा. सू. ७.२.११६.

परिखाशब्दाच्चातुरर्थिकेऽणि [1]'यस्येति च' [2]इत्याकारलोपस्य स्थानिवद्भावनिषेधात् पारिखे भव इति [3]'वृद्धादकेकान्तखोपधात्' इति खोपधलक्षणे छे सति पारिखीय इति सिध्यति। तथा च प्रत्ययविधावेव स निषेध इत्यर्थः। भाष्ये [4]**इदं तर्हीति**। मित्त्वनिषेधस्य पाक्षिकदीर्घाभावः प्रयोजनमिति न णिङि वृद्धिज्ञापकत्वमित्यर्थः। 'किं पुनः' इत्यादेर्ज्ञापकत्वसमर्थनपरत्वमाह — **कर्मेर्णिङीति**। कस्योपसंख्यानम्, अत आह — **पाक्षिकेति**। [5]'णिजन्ताण्णिचि पूर्वणिलोपस्य स्थानिवद्भावाद् वृद्ध्यभावः। यङन्ताण्णिच्यतो लोपः, [6]'यस्य हलः' इति लोपेऽल्लोपस्य स्थानिवद्भावाद् वृद्ध्यभावः। ततश्च [7]तत्र दीर्घसिद्ध्यर्थं वृद्धिर्वक्तव्या स्यात्। दीर्घग्रहणे तु तत्र वृद्धिं विनापि दीर्घः सिध्यतीति भाष्यार्थः। दीर्घग्रहणावश्यकत्वे फलितमाह — **ततश्चेति**। [8]'णिङन्तात् कमेश्चिण्णमुलोः परतः पाक्षिकदीर्घत्वनिवृत्त्यर्थो मित्प्रतिषेधो न वृद्धिज्ञापक इति [9]णिङ्यपि वृद्धिप्रतिषेधः स्यादेवेत्यर्थः। कमेर्णिङभावपक्षे णिचि वृद्धौ सत्यां मितां ह्रस्वाभावार्थो मित्प्रतिषेधो न [10]णिङि वृद्धिज्ञापक इति 'यदा खलु' इति भाष्येणोक्तम्। तद्व्याचष्टे — [11]**अणिङन्तादिति**॥

[३, १०१–१०४]

(रत्नप्रकाशः) णित्करणानर्थक्यापादकं वार्तिकमवतारयति — **किमर्थ इत्यादिना**। **क्ङिति चेति प्रतिषेधादिति**। इग्लक्षणयोः स निषेध इत्यजानत उक्तिरियम्। **णित्करणस्येति**। णकारानुबन्धकरणस्येत्यर्थः। **अत्रैवेति**। [12]'णेरनिटि' इत्यत्रैवेत्यर्थः। ङकारस्थानेऽन्योऽनुबन्ध आसङ्क्तुं न शक्यत इत्याह — **अवश्यमिति**। **प्रतिषेधबलीयस्त्वादिति**। प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधो भवतीति णकारेण प्रसक्ताया वृद्धेर्ङकारेण निषेध उचित इति भावः। वस्तुतस्तु प्रतिषेधत्वेन रूपेण प्रतिषेधस्य विधिमात्रापेक्षया बलीयस्त्वं वक्तुं न शक्यते, मानाभावात्। किं तु विधिविशेषापेक्षया प्रतिषेधविशेषस्य निरवकाशस्य बलीयस्त्वं वक्तव्यम्। तथा च प्रकृते णकारप्रयुक्ताया वृद्धेर्निरवकाशत्वेन तत्र ङकारप्रयुक्तनिषेधो न प्रवर्तत इति युक्तम्। तमेवार्थं मनसि निधाय 'न्यायसिद्धेऽर्थे लिङ्गदर्शनम्' इति न्यायेनाह — **एवं तर्हीति**। **मित्संज्ञायाः प्रतिषेधमिति**। [13]'मितां ह्रस्वः' इत्युपधाह्रस्वव्यावृत्त्यर्थं क्रियमाणो मित्प्रतिषेधः कमेरुपधावृद्धिमन्तरेणानुपपन्नस्तां ज्ञापयतीति भावः। मन्दबुद्धिस्तस्य तज्ज्ञापकतां विघटयति — **मित्प्रतिषेधस्य चेति**। **णिङन्तस्य णिचीति**। कामयमानं प्रयुङ्क्त इत्यर्थविवक्षायां णिङन्ताण्णिच् भवति। यद्यपि णिङ्लोपस्य स्थानिवत्त्वात् णिज्निमित्ता वृद्धिर्न प्राप्नोत्येव, तथापि [14]'तुष्यतु दुर्जनः' इति न्यायेन तत्प्राप्तिमभ्युपगम्याह — [15]**ननु च तस्या अपीति**। परिहरति — **न भवितव्यमिति**। **न णि-**

---

[1] पा. सू. ६.४.१४८.
[2] इत्यकारलोपस्य — अ.
[3] पा. सू. ४.२.१४१.
[4] एवं तर्हीति — अ, ऋ, ऌ.
[5] णिङन्ताण्णिचि — अ.
[6] पा. सू. ६.४.४९.
[7] 'तत्र' इति नास्ति — अ.
[8] णिजन्तात् — ऋ.
[9] क्ङिति वृद्धिप्रतिषेधः — ऋ, ऌ.
[10] 'णिङि' इति नास्ति — ऋ.
[11] अणिजन्तादिति — ऋ.
[12] पा सू. ६.४.५१.
[13] पा. सू. ६.४.९२.
[14] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[15] भाष्ये 'नन्वेतस्या अपि' इत्यत्र 'ननु तस्या अपि' इति निर्णयसागरमुद्रिते पाठः। 'ननु च तस्या अपि' इति रत्नप्रकाशकृत्पाठ इति भाति।

ङन्तस्येति। वृद्धिमभ्युपगम्य ह्रस्वाप्राप्तिरिदानीमुच्यते। वक्ष्यति च [१]"वृद्धिरेव णिङन्ताण्णिचि न भविष्यति' इति। **स्थानिवद्भावाद्व्यवधानमेवेति**। [२]"अचः परस्मिन्' इत्यनेन रूपातिदेशादुपपन्नमेतत्। **इदं तर्हि प्रयोजनमिति**। [३]मित्त्वप्रतिषेधस्येति शेषः। **किं पुनरिति**। कर्मणिङि वृद्धिप्रतिषेधान्नित्यं ह्रस्वत्वमेव स्थितमिति मित्प्रतिषेधो व्यर्थः सन् वृद्धिप्रवृत्तेर्ज्ञापक एवेति भावः। **वृद्ध्या सिद्धमिति**। उपधावृद्धिर्दीर्घरूपैवेतीष्टं सिद्धमिति भावः। **चिण्कृतोरिति**। [४]"आतो युक् चिण्कृतोः' इत्यतोऽनुवृत्तयोरिति शेषः। **उपसंख्यानं कर्तव्यं स्यादिति**। पाक्षिकवृद्धिप्राप्त्यर्थमिति शेषः। **एतदिदानीमिति**। तथा च [५]"न पदान्त' इति सूत्रे दीर्घग्रहणं स्थितमेव। तस्मिन् स्थिते पाक्षिकदीर्घव्यावृत्त्यर्थं मित्प्रतिषेधः कर्तव्य एवेति न तस्य ज्ञापकतेति भावः। अन्यत्रापि मित्त्वप्रतिषेधस्य प्रयोजनमस्तीत्याह— **यदा खल्विति**। महता यत्नेन साधितं वृद्धिप्रतिषेधमुपसंहरति— **तस्मादिति**। **उक्तं वेति**। [६]"क्ङिति च' इति सूत्र इति शेषः॥

[३, १०१–१०४]

(नारायणीयम्) ननु विधिप्रतिषेधयोर्विधानाविशेषात्[७] कुतः प्रतिषेधस्य बलीयस्त्वमित्यत आह— **प्रतिषेधस्येति**। 'एवं तर्हि' इत्यादिना भाष्ये "मितां ह्रस्वः' इति णौ ह्रस्वनिवृत्तये कर्मेमित्संज्ञाप्रतिषेधः कृतो वृद्धिप्रतिषेधाभावं ज्ञापयतीत्युक्ते तद्विघटनायोक्तम्— **णिङन्तस्य णिचीति**। तत्र कथं णिङन्ताण्णिच् स्यादित्यत्राह— **कामयमानमिति**। पुनरपि प्रकारान्तरेण ज्ञापकत्वे समर्थिते तन्निराकरणायोक्तम् 'णिङ्चेव तर्हि मा भूत्' इति। तदयुक्तमिव भाति, [८]तत्र प्रतिषेधप्रवृत्तौ वृद्धेरेवाभावान्मित्संज्ञाप्रतिषेधस्यार्थवत्त्वाभावादित्यत आह— [१०]**णिज्निमित्तेति**। **ह्रस्वत्वमिति शेष इति**। न तु वृद्धिरिति नापि प्रतिषेध इति णिज्निमित्ताया वृद्धेर्णिङ्निमित्तं ह्रस्वत्वं नैव प्राप्नोतीति तत्प्रतिषेधार्थो मित्प्रतिषेधोऽनर्थक इति ज्ञापक एवेति भाष्यार्थः। ननु वृद्धेरुपधाविधित्वात् कथं स्थानिवद्भाव उक्त इत्यत आह— **क्विलुगुपधात्वेति**। **तथा च पटयतीति**। पटुमाचष्ट इति णिचि टिलोपे तस्य स्थानिवत्त्वाद्वृद्धिर्न भवति। ह्रस्वविधानेन प्रकृते किमायातमित्यत्राह— **कर्मेणिङीति**। **पाक्षिक [वृद्धि] प्राप्त्यर्थमिति**। विकल्पेन दीर्घो यथा स्यादित्येवमर्थमित्यर्थः। दीर्घविकल्पे विधातव्ये ज्ञापकत्वमयुक्तमिति फलितं भवतीत्याह— **ततश्चेति**। 'यदा खलु' इत्यादिना मित्प्रतिषेधस्य प्रयोजनान्तरमुक्तम्। तद्व्याचष्टे— **अणिङन्तादिति**। तस्मात् 'मित्प्रतिषेधस्य चार्थवत्त्वात्' इत्येतदेव स्थितम्॥

आयादय आर्धधातुके वा ३.१.३१.

[३, १०४–१०७]

(उद्द्योतनम्) विषयसप्तमीपक्षे दोषाभावादाह— **आर्धधातुक इति**। भूयः सूत्रं कथं कर्तव्यम्,

---

[१] अर्थानुवादोऽयं बोध्यः, 'नैव वा पुनर्णिङन्तस्य णिचि वृद्धिः प्राप्नोति' इति भाष्यात्।

[२] पा. सू. १.१.५७.

[३] मित्त्वस्येति शेषः— प, ब.

[४] पा. सू. ७.३.३३.

[५] पा. सू. १.१.५८.

[६] पा. सू. १.१.५.

[७] विधाने विशेषात्— ङ.

[८] पा. सू. ६.४.९२.

[९] यत्र— ङ.

[१०] णिङ्निमित्तेति— घ, ङ.

अत आह — **निवृत्तीति**। आद्यकल्पे 'निवर्तन्ते' [1]द्वितीयकल्पे 'उत्पद्यन्ते' इत्यध्याहर्तव्यमित्यर्थः। [2]भिन्नवाक्यत्वाश्रयणे तन्निवृत्तिपक्षेऽध्याहारं विनापि [3]संभवतीत्याह — **एतद्वाक्येति**। [4]नित्ये शब्दे विद्यमानस्य कथं निवृत्तिः, अत आह — **यद्यपीति**। नित्यस्यापि शब्दस्योत्पत्तिनिवृत्तिकल्पनया-न्वाख्यानमविरुद्धमिति भावः। **क्वचित्** उत्सर्गापवादस्थले। [5]भाष्योक्तमेकवाक्यत्वमुपपादयति — **यदेति**। एकवाक्यत्वे सार्वधातुके आयाद्यभावं शङ्कते — **यदीति**। **नैष इति**। पृथग्योग-करणात् सूत्रत्रयमनेन सहैकवाक्यं सदार्धधातुके विकल्पेन प्रत्ययत्रयं विधत्ते, भिन्नवाक्यं सत् सार्व-धातुके नित्यं विधत्त इति न कश्चिद्दोष इत्यर्थः। **अकारेणेति**। [6]'अ प्रत्ययात्' इति विहिते-नाकारप्रत्ययेनेत्यर्थः। **आमीति**। [7]'कास्प्रत्ययात्' इति। ननु [8]लोपशब्देनायस्य निवृत्तेरभा-वात् कथं प्रत्ययलक्षणम्, अत आह — **न चेति**। लोपशब्देन विहितादर्शनस्यैव लोपसंज्ञा, लोप-शब्दविहितप्रत्ययलोप एव प्रत्ययलक्षणमिति सूत्रद्वयेऽप्यनाश्रयणाद्वाशब्देन निवृत्तिस्थलेऽपि लोपसंज्ञा-प्रत्ययलक्षणे भवत एवेत्यर्थः। भाष्ये [9]**इदमनिष्टमिति**। आमि गोपाम्, क्तिन्विषये 'गोपा' इति प्राप्नोतीत्यर्थः। लकारमाश्रित्य 'गोपायांचकार' इत्येतत् सिध्यतीत्याह — भाष्ये [10]**इदं त्विष्ट-मिति**। 'गोपाया' इत्येतत्तु न सिध्यतीत्याह — भाष्ये **इदं तर्हीति**। न्यासान्तरेण समाधाय तत्र विचारान्तरं भाष्ये क्रियते — **स्यादिबलीयस्त्वमिति**। ननु गोपायतीत्यत्रापि विकरणस्य [11]शपः सत्त्वात् कथमायादीनामवकाशः, अत आह — **विशेषेति**। शपो विशेषहेतुत्वमप्यस्तीत्याह — **काम-यत इति**। आयेयङोरकारान्तत्वेन शपं विनापि [12]रूपसिद्धावप्यत्र तेन विना न सिध्यतीत्यर्थः। 'सिद्धं तु' इति वार्तिके सार्वधातुक इति त्यक्त्वा [13]शपीत्युक्त्वा स्यादीनामायादिभिर्बाधनं [14]न भवि-ष्यतीति 'यदि पुनः' इति भाष्येणोक्तम्। तद्विशदयति — **वार्तिकेति**। नन्वेवमपि 'विच्छायति' इत्यत्र नित्यमायो न सिध्यति, विच्छेः शविकरणत्वेन शपोऽसंभवादिति शङ्कते — **नन्विति**। **एवं तर्हीति**। तत्संग्रहाय 'शपि' इति त्यक्त्वा 'शिति' इति वक्तव्यमित्यर्थः॥

[३, १०४–१०७]

(रत्नप्रकाशः) आर्धधातुक इति सत्सप्तमीमाश्रित्य विकल्पयति — **कथमिदमिति**। **आया-दिभ्य इति**। आयाद्यन्ताद्विहिते आर्धधातुके परे आयादीनां वा निवृत्तिः स्यादित्यर्थः। **आया-दिप्रकृतेरिति**। गुपादिभ्यो विहिते आर्धधातुके परे आयादयो वा प्रवर्तन्त इत्यर्थः। **गतमित्या-हेति**। निवर्तन्त इति वा स्युरिति वाध्याहारः कर्तव्यः। यथाश्रुतं तु सूत्रमविशिष्टमिति भावः। **तदेकं वाक्यमिति**। इतरबुद्धिपरीक्षार्थमेवमुक्तम्। वस्तुतस्तु यथाश्रुत[15]सूत्रानुपूर्व्यैव वाक्यभेद-आश्रयणीयः। अन्यथा 'गतमित्याह' इति प्रतिज्ञाभङ्गः, आयादय इत्यस्यानर्थक्यम्, सार्वधातुके

---

[1] द्वितीये उत्पद्यन्ते — अ.
[2] भिन्नवाक्याश्रयणे — अ.
[3] निवृत्तिरिति शेषः।
[4] नित्यशब्दे — अ.
[5] भाष्योक्तमुपपादयति — अ.
[6] पा. सू. ३.३.१०२.
[7] पा. सू. ३.१.३५.
[8] लोपशब्देन यस्य — अ, ऋ, लृ.
[9] भाष्ये 'इदं चानिष्टम्' इत्यत्र चकारं विना प्रतीकग्रहणम्।
[10] भाष्ये 'इदं तावदिष्टम्' इत्यत्र 'इदं त्विष्टम्' इत्यत्रंभट्टपाठ इति भाति।
[11] शपः सार्वधातुकत्वात् — अ.
[12] रूपसिद्धावत्र — अ, ऋ.
[13] 'शपीत्युक्त्वा' इति नास्ति — अ; शपी-त्युक्तौ — ऋ.
[14] न भविष्यतीति पुनरपि भाष्येणोक्तम् — अ.
[15] 'सूत्र' इति नास्ति — प.

आयाद्यभावश्च स्यात्। एतेन "[१]'गुपूधूप' इत्यत्रैव 'आर्धधातुके वा' इति वक्तव्ये पृथक्पाठात् सार्वधातुकेऽप्यायादयो भवन्तीति ज्ञायते। आर्धधातुक एव त्वेकवाक्यतया विकल्पेन विधीयन्ते" इति निरस्तम्। अत्यन्तासंबद्धप्रलापत्वात्। सार्वधातुकार्धधातुकसाधारण्येनायादिषु विहितेषु प्रकृतसूत्रेणार्धधातुके परत आयादीनां विकल्पविधानपरतैव ह्युचिता। **गुप्तिरिति**। गोपायशब्दात् प्रत्ययान्तादकारे क्तिनपवादे कृते त्वायस्य निवृत्तौ 'गोपा' इत्येवानिष्टं स्यात्, गुप्तिरिति न स्यादिति भावः। एवमामि परत आयस्य निवृत्तौ 'गोपाञ्चकार' इत्यनिष्टमेव स्यात्, न तु जुगोपेति रूपमिति भावः। लिटचायो लोपे तस्य स्थानिवद्भावेन प्रत्ययत्वेन प्रत्ययान्तादित्याम् स्यादिति भावः। **इदं तावदिति**। आयस्य निवृत्त्यभावपक्ष इति भावः। [२]**आम् मध्ये भविष्यतीति**। आयस्य प्रत्ययत्वेन प्रत्ययान्तादित्याम् भविष्यतीति भावः। 'कास्यनेकाज्ग्रहणम्' इति वार्तिकपक्षे त्विदमपि न सिध्यति[३]। तदेवं पक्षद्वये दोषेऽभिहिते न्यासान्तरमाश्रयति — **सिद्धं त्विति**। **वाविधिमुक्त्वेति**। [४]'गुपूधूप' इति सूत्रे वाग्रहणं कृत्वा तदनन्तरं 'सार्वधातुके नित्यम्' इति सूत्रं कर्तव्यम्। [५]'ऋतेरीयङ' [६]'कमेर्णिङ' इत्युत्तरसूत्रयोरपि वाग्रहणं सार्वधातुके नित्यमिति चानुवर्त्य यथोचितं व्याख्यानादिष्टसिद्धिरिति भावः। अस्मिन्नपि पक्षे दोषमाह — **स्यादिबलीयस्त्वमिति**। **गोपायतीति**। विशेषाभावेनात्र शपोऽप्रवृत्तिरित्यायादीनामवकाशं मन्यते। **अनवकाशत्वादिति**। पर्जन्यवल्लक्षणप्रवृत्त्या विशेषाभावेऽपि शपः प्रवर्तनादिति भावः। एतदाशयेनैव वक्ष्यति — **अन्यदिदानीमेतदिति**। **स नास्त्यवकाश इति**। इति स्थितमेवेति शेषः। शप्कृतविशेषोऽपि क्वचिदस्तीत्याह — **अवश्यमिति**। ननु भवन्त्वायादयोऽनवकाशाः। तैः स्यादीनां [७]बाधनमप्यनिष्टमेवेति दुष्ट एवायमपि न्यास इत्याशयेनाह — **यदि तर्हीति**। न्यासान्तरमभ्युपगम्यापाद्यमानो दोषः सुपरिहरो न्यासान्तरेणैवेत्याशयेनाह — **यथा पुनरिति**। यथेत्यर्थः। **यदि पुनरिति**। तथेत्यर्थः। **परसप्तमीति**। सत्सप्तमीत्यर्थः। **विषयसप्तमीति**। अधिकरणसप्तमीत्यर्थः॥

[३, १०४–१०७]

(नारायणीयम्) परसप्तम्याश्रयेणात्र पूर्वपक्ष इति दर्शयति — **आर्धधातुक इति**। **परसप्तमीमिति**। आयादिविधीनामस्य च भिन्नवाक्यतायां प्रथमपक्षोत्थितिरिति दर्शयति — **एतद्वाक्येति**। **पक्षे निवृत्तिरिति**। प्राप्तविकल्पस्य निवृत्तिफलत्वात्। नित्यशब्दपक्षे निवृत्तिपक्षस्यानुपपत्तिमाशङ्क्य परिहरति — **यद्यपीति**। **शास्त्रप्रक्रियायामिति** नित्यशब्दव्युत्पत्तेरुपायभूतायामित्यर्थः। एकवाक्यतायां द्वितीयपक्षोत्थितिं दर्शयति — **यदेति**। **आर्धधातुके वेति वक्तव्य इति**। एवं [८]ह्यायादय इति न वक्तव्यमिति लाघवं भवति। तत्र पृथक्पाठसामर्थ्यादियमर्थ आश्रीयते — गुपादिभ्यो नित्यमायादयो भवन्ति, आर्धधातुके तु वेति। तदेतदाह — **आर्धधातुक एव त्विति**। **अकारेणेति**। [९]'अ प्रत्ययात्' [१०]इत्यकारप्रत्ययोऽपवादत्वात् क्तिनं बाधते। ननु लोपो भवती-

---

[१] पा. सू. ३.१.२८.

[२] भाष्ये 'आम् मध्ये पतिष्यति' इत्यत्र 'आम् मध्ये भविष्यति' इति पाठो रत्नप्रकाशकृदभिमत इति भाति।

[३] आर्धधातुकस्य गुप्धातोरेकोचो विहितत्वेनानेकाचो विहितत्वाभावादित्याशय इति भाति।

[४] पा. सू. ३.१.२८.

[५] पा. सू. ३.१.२९.

[६] पा. सू. ३.१.३०.

[७] बाधनमनिष्टमेवेति — प.

[८] हिशब्दो नास्ति — ङ.

[९] पा. सू. ३.३.१०२.

[१०] इत्यकारप्रत्ययान्तत्वात् — ङ.

त्येवमायस्य निवृत्त्यभावात् कथं प्रत्ययलक्षणेन गुणः स्यादित्यत आह — **न चेति**। विशेषाभावोऽप्यसिद्ध इत्याह — **कामयत इत्यत्र त्विति**। 'यथा पुनरयम्' इत्यादिभाष्यस्य गूढमर्थं प्रकाशयति — **वाक्यकारेणेति**। ननु 'शपि नित्यम्' इत्युच्यमानेऽप्यव्याप्तिः स्यादिति परिचोद्य परिहरति — **ननु तौदादिकत्वादिति**॥

सनाद्यन्ता धातवः ३.१.३२.

[३, १०७–१०९]

(उद्द्योतनम्) भाष्ये **इदं चापीति**। तथा चान्तग्रहणं विना तदन्तानां संज्ञा न सिध्यतीत्यर्थः। तेषामेव धातुसंज्ञायामडादीनि सनादीनामेव स्युरिति भावः। [1]नन्वेषां भ्वादिषु पाठाभावात् कथं तेन सिद्धिः, अत आह — **भुव इति**। वदेरौणादिक इञ्, वदन्तीति वादयः। भूशब्देन क्रियोच्यते, कर्मणि [2]षष्ठ्या समास इति भावः। तेन प्रकृते किमायातम्, अत आह — **ततश्चेति**। **प्रत्येकमिति**। भूशब्देन वाशब्देन च। तत्र भ्वादय इत्यत्रादिशब्दो व्यवस्थावाची, वादय इत्यत्र प्रकारवाची। वाप्रकारत्वं [3]क्रियावाचित्वम्। तेन क्रियावाचिनो भ्वादयो धातुसंज्ञा इति लभ्यत इत्यर्थः। पदद्वयस्य कृत्यमाह — **तेनेति**। **सर्वनामेति**। 'या' इति सर्वनाम, 'वा' इति निपातः। अधिकमत्र तस्मिन्नेव सूत्रेऽनुसंधेयम्। नन्वन्येषां संज्ञाप्रश्नः [4]प्रकृतेऽनुपयुक्तः, अत आह — **स्थानिवद्भावेनेति**। [5]**तेषामेव** सनाद्यन्तानामेव। स्थानिवद्भावेनैव संज्ञासिद्धिं वक्तुं प्रश्न इत्यर्थः। [6]भ्वादीनां भ्वादौ पाठात् 'अपठ्यमानानाम्' इत्ययुक्तमिति शङ्कते — **नन्विति**। **नैतदिति**। त एवेत्यत्र मानाभावादिति भावः। प्रत्यभिज्ञैव मानमिति चेत्, तत्राह — **जग्ध्यादीनामिति**। **इष्यादीनामिति**। इच्छा[द्य]र्थेषु सनादयो विधीयन्ते, ते च पठिता एवेत्यर्थः। **तत्र** स्थानिवत्सूत्रे। रूढ्यर्थमाह — **येषामेवेति**। [7]'अस्तेर्भूः' इत्यादावित्यर्थः। **क्रियेति**। आदिश्यते उपदिश्यत इत्यादेश इत्यर्थः। **तदेति**। आदेशे तदन्तविध्यङ्गीकारे [8]'एरुः' इतीकारस्य स्थाने उकारान्तस्य यस्य कस्यचिदादेशत्वप्रसङ्गादिति भावः। सन्प्रत्ययस्येषिनिवृत्त्यादेशत्वसंभवेऽपि यङादीनामादेशत्वं न संभवति, यस्यार्थे ते विधीयन्ते तस्य निवृत्त्यभावादित्याह — **यङिति**। **तेषां** यङादीनाम्। **सर्व इति**। [9]'सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। [10]एकदेशविकारे हि नित्यत्वं नोपपद्यते'। तथा च [11]'एरुः' इत्यस्यापि तेस्तुरित्यर्थः। [12]'इको यणचि' इत्यत्रापीगन्तस्य यणन्त आदेश इत्यर्थ इति भावः। भाष्ये [13]**षष्ठीग्रहणं निवर्तत इति**। तथा

---

[1] नन्वेवं भ्वादिषु — अ.

[2] षष्ठ्याः समास इति — ऋ.

[3] क्रियावाचित्वरूपमित्यर्थः।

[4] प्रकृतायुक्तः — अ.

[5] प्रदीपपुस्तकेषु 'तेषामेव' इति न दृश्यते। 'स्थानिवद्भावेन तेषामेव धातुसंज्ञा' इति पाठोऽभिसंहितः स्यादिति भाति।

[6] 'अस्तेर्भूः, ब्रुवो वचिः, चक्षिङः ख्याञ्' इति विहितानामादेशभूतानां भूवचिख्याञामित्यर्थः।

[7] पा. सू. २.४.५२.

[8] पा. सू. ३.४.८६.

[9] महाभाष्यम् १.१.२०.

[10] एकदेशविकारे तु — अ.

[11] पा. सू. ३.४.८६.

[12] पा. सू. ६.१.७७.

[13] भाष्ये 'षष्ठीग्रहणं निवर्तिष्यते' इत्यत्र 'षष्ठीग्रहणं निवर्तते' इत्यन्नंभट्टपाठ इति भाति।

च षष्ठीनिर्दिष्टस्य [1]तथानिर्दिष्टस्य वा यस्य प्रसङ्गे [2]यो विधीयते स तस्यादेश [3]इत्याशयः ॥

[३, १०७–१०९]

(रत्नप्रकाशः) [4]**भूवादय इत्येवेति**। भुवो वादय इति तत्सूत्रार्थ इति मन्यमानस्य प्रश्नः। सनाद्यन्ता अपि हि भुवोऽर्थं वदन्ति। **पाठेनेति**। 'भू सत्तायाम्' इत्यादिरूपेण पठिता भ्वादयो धातुसंज्ञा इति धातुसंज्ञाविधानात् सनाद्यन्तानां तत्रापाठात् सा संज्ञा न भविष्यतीति भावः। **अपठ्यमानानामिति**। जग्ध्यादयो धातुपाठे न दृश्यन्त इति तत्सामान्येन भ्वादयोऽपि तत्रापठिता एवादेशत्वेन विहिता इति मन्यते। [5]'तुष्यतु दुर्जनः' इति न्यायेनोत्तरमाह — **यद्यप्येत इति**। वस्तुतस्तु धातुपाठसिद्धा एव भ्वादय आदेशत्वेन विधीयन्त इति तेषामुपदेशेनापि धातुसंज्ञा सिध्यत्येव। जग्ध्यादयोऽपि धातुपाठपठितघस्लादय एव [6]कार्यविशेषनिपातनविशिष्टा आदेशत्वेन विधीयन्त इति तेऽप्युपदेशेनापि धातुसंज्ञां लभन्त एव। यद्यपि भ्वादेराकृतिगणत्वात् सनाद्यन्तानां धातुत्वं सिध्यति, तथापि स्पष्टप्रतिपत्तये सूत्रमिति तात्पर्यमाचार्यस्य। प्रकारान्तरेण सूत्रं विनैव धातुसंज्ञा तेषां सिध्यतीति शङ्कते — **यद्यपीति**। **येषामिति**। इष्यादीनामित्यर्थः। **न चेम आदेशा इति**। यस्य शब्दस्य प्रसङ्गे यो विहितः स तस्यादेश इति रूढस्यैव तत्रादेशशब्दस्य परिग्रहेणैषां ग्रहणं न भवतीति भावः। तमाशयमविद्वानाह — **इमेऽपीति**। सनाद्यन्ता अपीत्यर्थः। क्रियाशब्द एव तत्रादेशशब्द इति मन्यते। इतरः स्वाशयं प्रकटयति — **षष्ठीनिर्दिष्टस्येति**। प्रतीयमानाक्षरार्थं निराकरोत्यन्यः — [7]**षष्ठीनिर्दिष्टग्रहणमिति**। इतरस्तन्निवृत्तिर्न युक्तेत्याशयेनाह — [8]**यदि निवर्तिष्यत इति**। परिहरति — **नैष इति**। **नापवादे उत्सर्गकृतं भवतीति**। तथा च षष्ठीनिर्दिष्टग्रहणं निवर्तत एव। तन्निवृत्तौ च स्थानिवत्त्वेनैव धातुसंज्ञा भविष्यतीति व्यर्थमिदं सूत्रमिति मन्यते। वस्तुतस्तु तत्रादेशस्य रूढस्य ग्रहणात् स्थितमेव सूत्रम्। यौगिकस्य परिग्रहेऽपि प्रकृते स्थान्यादेशभावोऽत्यन्तक्लिष्टकल्पनया भवतीति स्थितमेव सूत्रमित्युक्तप्रायं भगवता ॥

[३, १०७–१०९]

(नारायणीयम्) कथं भूवादिसूत्रेण सनादीनां धातुसंज्ञासिद्धिरित्यत्राह — **भुवो वादय इति**। **आदिशब्दस्य प्रत्येकमिति**। 'भू' इत्येवमादयो 'वा' इत्येवंप्रकारा इत्याश्रयणात् पाठोऽर्थश्च धातुसंज्ञाया निमित्तमित्यर्थः। किमर्थं पुनरेवमाश्रीयत इत्यत्राह — **तेनेति**। **समानशब्दाश्च सर्वनामादय इति**। यावाप्रभृतय इत्यर्थः। 'कथं तर्हि' इत्यादिचोद्यस्य प्रकृते संगतिं दर्शयति — **स्थानिवद्भावेनेति**। **ननु भूवचीति**। ये भाष्य उदाहृतास्तेषां धातुपाठे पाठात् 'अपठ्यमाना-

---

[1] तथा, अनिर्दिष्टस्येति छेदः ॥ तदनिर्दिष्टस्य वा — अ.

[2] यो विधिः सः — ऋ.

[3] इत्यादि — अ; इत्यादिः — ऋ, लृ.

[4] भाष्ये 'भूवादयो धातव इत्येव' इति पाठ उपलभ्यते। 'भूवादय इत्येव' इति पाठोऽभिमत इति प्रतीयते। कैयटेऽप्येवमेव प्रतीको दृश्यते।

[5] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[6] कार्यविशेषविशिष्टाः — प.

[7] भाष्ये 'षष्ठीग्रहणं निवर्तिष्यते' इत्यत्र 'षष्ठीनिर्दिष्टग्रहणं निवर्तिष्यते' इति रत्नप्रकाशकृत्पाठ इति भाति।

[8] भाष्ये 'यदि निवर्तते' इत्यत्र 'यदि निवर्तिष्यते' इति पाठोऽभिमत इति भाति।

नाम्' इत्ययुक्तमित्यर्थः। **न हि य इति**। ये धातुपाठे पठितास्तेषामेवादेशत्वमित्यत्र प्रमाणाभाव इत्यर्थः। यदि प्रत्यभिज्ञया त एवेति कश्चिद् ब्रूयात् तत्राप्याह — **जग्ध्यादीनामिति**। **इष्यादीनामिति**। 'इषु इच्छायाम्' इति पठ्यते। तदर्थे विधीयमानाः सनादयः स्थानिवद्भावेन धातुसंज्ञां भजन्त इत्यर्थः। **रूढिशब्दस्येति**। [1]'रूढिर्योगमपहरति' इति न्यायात्। **क्रियानिमित्तकस्येति**। लक्ष्यानुसारित्वाल्लक्षणस्य रूढिपरित्यागेन योग आश्रीयत इत्यर्थः। **करणाङ्ग इष्यर्थ इति**। यथा 'वलाहकाद्विद्योतते' इत्यत्र निस्सरणाङ्गे विद्योतने विद्युतिर्वर्तते, एवं करणाङ्गे इच्छार्थे वर्तमानस्येषेः प्रयोगे प्राप्ते सन्नन्त आदेशः क्रियते, बुद्धिविपरिणाममात्रस्य स्थान्यादेशत्वाभ्युपगमादित्यर्थः। अनेनैव न्यायेन यङादिष्वपि स्थानिवद्भावाद्धातुसंज्ञासिद्धिरित्याह — **एवमिति**। 'भगवतः' इत्यनेनाति[2]निगूढाभिसंधिकत्वलक्षणगाम्भीर्यातिशयदर्शनात् प्रशंसा क्रियते॥

स्यतासी लृलुटोः ३.१.३३.

[३, १०९–१११]

(उद्द्योतनम्) उत्सर्गेति। कः सामान्यविधिः को विशेषविधिरिति ज्ञानायेत्यर्थः। **धर्मज्ञानाय** स्वरूपज्ञानाय। कर्तरि विहितानां शबादीनां भावकर्मविहितयगपवादत्वं कथम्, अत आह — **भावेति**। अपवादस्योत्सर्गेण सह विप्रतिषेधशङ्कानिरासायाह — **यगपवादानामिति**। भाष्ये [3]**पक्ष्यत इति**। कर्मणि लृट्। प्रथमाद्वयस्य सामानाधिकरण्येनान्वयासंभवादाह — **यत्रेति**। **तदपवादत्वं** शबादीनामिति शेषः। भाष्ये **यक्शपाविति**। भावकर्मणोर्यगुत्सर्गः, कर्तरि शबुत्सर्गः। श्यन्नादयः शपोऽपवादाः। स्यादयस्तु द्वयोः। [4]आदेशप्रवृत्तेः प्रागेव स्यादयो भवन्तीति भाष्य उक्तमिति [5]मत्वा चोदयति — **नन्विति**। **न चेति**। प्राग्लादेशाद्धात्वधिकारपक्षे कृतेष्वपि स्यादिष्वादेशसंभवेऽप्यातृतीयाध्यायसमाप्तेरधिकारपक्षे[6] स्यादिषु कृतेषु लस्य धातोः परत्वासंभवेनादेशाप्रसङ्गादनित्यत्वमित्यर्थः। विहितविशेषणत्वाङ्गीकारेण नित्यत्वमाह — **कृतेष्वपीति**। भाष्योक्तमन्तरङ्गत्वमाह — **एवं तर्हीति**। **शब्देनेति**। वस्तुतः सत्त्वेऽपीत्यर्थः। **तदाश्रयत्वात्** कर्तरि सार्वधातुक इत्यपेक्षणात्। ननु लावस्थायामेवान्तरङ्गत्वात् स्यादयो भवन्तु, किमादेशप्रतीक्षणेन, अत आह — **अवश्यमिति**। एतच्छब्दार्थमेवाह — **कृतेष्विति**। [7]**अनुदात्तविधानम्** [8]'तास्यनुदात्तेत्' इत्यनेन। 'सतिशिष्टोऽपि[9] विकरणस्वरो लसार्वधातुकस्वरं न बाधते' इत्यस्यार्थस्य ज्ञापकं न स्यादित्यर्थः। कथं न स्यादित्यत आह — **यदि हीति**। **उदात्तत्वे** [10]'आद्युदात्तश्च' इत्यनेन। [11]ज्ञापनप्रयोजनं 'चिनुते' इत्यादौ लसर्वधातुकस्वरः प्रत्ययाद्युदात्तत्वम्। अन्यथा

---

[1] लौ. न्या. साहस्री — पृष्ठम् ९६.
[2] निरूढाभिसंधिकत्व — घ.
[3] वक्ष्यत इति — अ, ऋ.
[4] आदेशप्रतिपत्तेः — ऋ.
[5] मत्वोपपादयति — अ.
[6] 'अधिकारपक्षे' इति नास्ति — ऋ.
[7] प्रदीपे 'अनुदात्तत्वविधानम्' इत्यत्र 'अनुदात्तविधानम्' इत्यन्नंभट्टपाठ इति भाति॥ अत्र हरयाणामुद्रितप्रदीपे 'अनुदात्तत्वविधानं न विकरणस्य स्वरो लसार्वधातुकस्वरं बाधत इत्यस्यार्थस्य कथं ज्ञापकं स्यात्' इति वाक्ये 'अनुदात्तत्वविधानेन विकरणस्य' इति मुद्रितं दृश्यते। निर्णयसागरचौखाम्बामुद्रितयोस्तु 'अनुदात्तत्वविधानं न' इत्युपलभ्यत एव॥
[8] पा. सू. ६.१.१८६.
[9] अपिशब्दो नास्ति — ऋ.
[10] पा. सू. ३.१.३.
[11] आदेशप्रयोजनं — ऋ, लृ.

विकरणस्वरेण सतिशिष्टेन बाधः स्यात्। आदेशानामपि श्यन्नादिवद् बहिरङ्गत्वादादेशात् पूर्वमेव स्यादयो भवन्तीति कैश्चिद्व्याख्यातम्, तदाह — **ये त्विति**। [1]'द्व्येकयोः' इत्यादेः [2]'अनुदात्तङितः' इत्यादेः [3]'तिप्तस्झि' इत्यादेश्चैकवाक्यतायां तिबादिकं बहुसापेक्षत्वाद् बहिरङ्गमित्यर्थः। तन्मतं दूषयति — **तैरिति**। तथा च भिन्नावाक्यतामङ्गीकृत्य लमात्रापेक्षयान्तरङ्गत्वसाम्येऽपि [4]परत्वात् पूर्वं लादेशः, पश्चात् स्यादय [5]इत्येवाभ्युपगन्तव्यमिति भावः॥

[३, १०९–१११]

(रत्नप्रकाशः) [6]'सार्वधातुके यक्' इत्यत्र भावकर्मणोरिति नानुवर्तते चेद् यगेवोत्सर्गः स्यात्, तथा च वक्ष्यमाणो दोष इत्याशयेन पृच्छति — **इम इति**। इतरस्तदाशयाविष्करणायोत्तरमाह — **इमे ब्रूम इति**। वयमित्यस्याप्रयुज्यमानत्वादुत्तमपुरुषः। इमे वयं ब्रूम इत्यर्थः। प्रष्टा स्वाशयमाह — **अपवादेति**। शबाद्यपेक्षया यक उत्सर्गत्वमयुक्तम्, तद्विधौ भावकर्मणोरित्यनुवृत्तेरित्याशयेनाहान्यः — **अपवादो नामेति**। अपवादविषय इत्यर्थः। **अनेकलक्षणप्रसङ्ग इति**। अनेकस्य सामान्यविशेषरूपस्य लक्षणस्य प्रसङ्गः प्राप्तिर्यत्र स इत्यर्थः। **श्यनादयः स्यादयश्चेति**। श्यनादयः शबपवादाः, स्यादयस्तु यक्शपोरपवादा इति भावः। **शबादेशा इति**। यद्यपि परशब्दस्येष्टवाचकत्वाश्रयणात् स्यादिभिरेव श्यनादिबाधनमिति वक्तुं शक्यते, तथाप्ययमपि परिहारो युज्यत इत्याशयः। उपायान्तरमपि संभवतीत्याह — **अथवेति**। अन्तरङ्गं च [7]परमिति व्यवस्थापितं विप्रतिषेधसूत्रे। तथा चान्तरङ्गत्वेन स्यादय एव भवितुमर्हन्ति तत्रेत्याशयेनाह — **अथवेति**। लावस्थायां स्यादय इति प्रसक्तिमात्रेणैवमुक्तम्। वस्तुतस्त्वन्तरङ्गत्वाल्लादेशेषु कृतेषु कर्त्रर्थपेक्षतया बहिरङ्गान् श्यनादीन् बाधित्वान्तरङ्गाः स्यादयो भवन्तीति तात्पर्यं ज्ञेयम्। यदि तृतीयाध्यायसमाप्तिपर्यन्तं धात्वधिकार इति पक्ष आश्रीयते तर्हि परत्वाल्लादेशेषु कृतेषु पूर्ववत् स्यादयो ज्ञेयाः। वस्तुतस्तु तस्मिन् पक्षे स्यादिषु कृतेषु तैर्व्यवहितत्वाल्लादेशानामप्राप्तत्वादनित्यता स्यादिति तद्वारणाय धातोर्विहितस्य लस्येति व्याख्येयम्। तथा च लादेशा बहिरङ्गा इति यथाश्रुतमेव भाष्यं साधु॥

[३, १०९–१११]

(नारायणीयम्) उत्सर्गापवादधर्मज्ञानायेति। उत्सर्गापवादयोरसाधारणधर्मज्ञाने सति परस्परवैलक्षण्येन स्वरूपप्रतीतिः सिध्येदिति तदर्थमिह प्रश्नः क्रियते सर्वत्र तत्स्वरूपनिर्धारणायेत्यर्थः। ''सार्वधातुके यक्' इत्यत्र भावकर्मणोरित्यस्यानुवृत्तिमनाश्रित्य यक उत्सर्गत्वकथनमित्याह — **भावकर्मेति**। **यगपवादानामिति**। यगपवादत्वात् तुल्यबलत्वात् तेषां विप्रतिषेधे सतीत्यर्थः। [9]अनेकलक्षणप्रसङ्गमुपपादयति — **यत्रेति**। यथाकारान्ताद्धातोरणः कस्य च लक्षणं प्रसक्तम्, तत्र

---

[1] पा. सू. १.४.२२.
[2] पा. सू. १.३.१२.
[3] पा. सू. ३.४.७८.
[4] परत्वादादेशात् पूर्वं — अ.
[5] इत्येतावदभ्युपगन्तव्यमिति — अं.
[6] पा. सू. ३.१.६७.
[7] परम् उत्कृष्टम्, बलीय इति यावत्।
[8] पा. सू. ३.१.६७.
[9] अनेकलक्षणं प्रसक्तं तत्र विशेषविधित्वात् — ङ.

विशेषविधित्वात् कस्यापवादत्वमित्येवं शास्त्रे व्यवहार इत्यर्थः। 'अत्र च भावकर्मणोः' इति भाष्यं व्याचष्टे — **यग्विधौ त्विति**। अन्यथा लुग्विकरणेषु श्लुविकरणेषु च शपः श्रवणाभावात् संभवाश्रयेण यक् स्यादिति भावः। लादेशप्रवृत्तेः पूर्वमेव स्यादयो भवन्तीति भाष्य उक्तमित्यभ्युपगम्य चोदयति — **ननु [च] परत्वादिति**। नन्वाध्यायपरिसमाप्तेर्धात्वधिकाराद् धातोः परस्य लस्यादेशविधानात् स्यादिषु कृतेष्वादेशानामप्राप्तेरनित्यत्वात् स्यादीनां तु कृताकृतप्रसङ्गित्वेन नित्यत्वात् स्यादय एव प्रथमं प्रवर्तेरन्नित्यत आह — **न चेति**। **श्यनादयस्त्विति**। कर्तृवाचिनि सार्वधातुके परतस्तेषां विधानाद् बहिरङ्गत्वमित्यर्थः। विपक्षे बाधप्रदर्शनेनोक्तमर्थं स्थिरीकरोति — **अवश्यमिति**। लावस्थायां स्यादिविधाने कथं ज्ञापकत्वं न भवेदित्यत्राह — **यदि हीति**। **ज्ञापकत्वं नोपपद्येतेति**। यदा तु लादेशेषु कृतेषु स्यादयस्तदा सतिशिष्टत्वात् तासेरुदात्तत्वे वर्ज्यमानस्वरेण लसार्वधातुकस्यानुदात्तत्वसिद्धेस्तद्वचनं न कर्तव्यं स्यात्। कृतं तूक्तेऽर्थे ज्ञापकं संपद्यत इत्यर्थः। **तैस्तासेरिति**। तस्माद् भिन्नवाक्यताश्रयेण लादेशानां बहिरङ्गत्वाभावात् परत्वाल्लादेशेषु कृतेषु स्यादय इत्ययमेव पक्ष आश्रयणीयः। प्रतिपदविधानं च निरवकाशत्वाभावादकिंचित्करम्॥

सिब्बहुलं लेटि. ३.१.३४.

[३, १११–११४]

(उद्द्योतनम्) छन्दसि लोटचपि सिब्दर्शनात् 'लेटि' इति त्यक्त्वा सामान्येन धातोः सिप्प्रत्ययो विधेयः, [1]तदन्तस्य धातुसंज्ञासिद्धये [2]'सनाद्यन्ताः' इति सूत्रात् पूर्वमिदं सूत्रं कर्तव्यमिति वार्तिकार्थः। तत्रोत्सर्गशब्दार्थमाह — **परेति**। अनुपादीयमानपरनिमित्तकत्वमुत्सर्गत्वमत्र विवक्षितमित्यर्थः। [3]'सनाद्यन्ते' इत्येतद्व्याचष्टे — **सनादिवर्ग इति**। सनादिसूत्रात् प्रागिति यावत्। सनादिमध्य[4]पाठस्य प्रयोजनमाह — **तेनेति**। तदन्तस्य धातुत्वेन शब्भवति। सिपः स्वतन्त्रविकरणत्वे शपा [5]समावेशाभावात् 'नेषतु' इति [6]न सिध्येदिति भावः। **नीशब्दात्** 'णीञ् प्रापणे' इति धातोः। **कर्तव्य एवेति**। लेटीत्युक्ते लिङ्यप्राप्तेः। याधातोः सिपं विना तद्रूपासिद्धिरिति भावः। [7]सप् कस्मिन् प्रदेशे कर्तव्यः, अत आह — **सनादीति**। **अत्रैव** स्यातासीसूत्रानन्तरमेव। **लिङ** आशीर्लिङ। अल्लोपेडागमषत्वष्टुत्वानि स्पष्टानि। सिपः साच्कत्वेऽपीट्सिद्धिः स्यात्, अत आह — **यदीति**। **अन्यथेति**। सपोऽकारस्यातो लोपः, न त्विकारस्य। सिप्यपीट्प्रतिषेधाभावं शङ्कते — **नन्विति**। **नासाविति**। सिबन्तस्य [8]गणे पाठाभावादित्यर्थः। 'सनाद्यवयवाः' इति बहुव्रीहिः, सनादयो धातोरवयवा आगमवद्धातुग्रहणेन गृह्यन्त इति यावत्। सूत्रप्रत्याख्यानपक्षेऽपीट्प्रतिषेधमाह — **यदेति**। ननु 'उपदेशे' इत्येकाचोऽपि विशेषणम्, तेन यास् इत्यस्योपदेशे एकाच्त्वाभावादिण्णिषेधो न भविष्यति, अत आह — **अथवेति**। यद्वा, सनादिमध्ये करणपक्षे भाष्यं व्याख्याय 'अत्रैव वा' इति पक्षे व्याचष्टे — **अथवेति**। स्वस्थाने सति [9]सनादित्वाभावेन सिबन्तस्य धातुत्वाभावे याग्रहणेनाग्रहणात् सिपा व्यवधानेनोपदेशे एकाजनुदात्तात् परः

---

[1] तथा तस्य — अ.
[2] पा. सू. ३.१.३२.
[3] सनाद्यन्ता इत्येतत् — अ, ॠ, लृ.
[4] पातस्य — अ.
[5] समावेशस्याभावात् — अ.
[6] न सिध्यतीति भावः — ॠ.
[7] सिबेकस्मिन् — अ.
[8] भ्वादिगण इत्यर्थः।
[9] सनादित्वाभावेऽपि न सिबन्तस्य — ॠ.

सीयुडादिप्रत्ययो न भवतीति प्रतिषेधो न प्रवर्तत इति भाष्यार्थः। यद्यप्युक्तरीत्या सिपा व्यवधानात् प्रतिषेधो न भविष्यतीति [1]सपो वैयर्थ्यम्, तथाप्यस्मिन् व्याख्याने सकारस्थापनार्थमिकारं विहायाकारग्रहणमिति ज्ञेयम्। सकारस्येत्संज्ञा[2]त्राणायेकारः कर्तव्यः, पकारो न कर्तव्यः, नाप्यकार इति स्वस्थानपक्षस्यायुक्तत्वात् सनादिमध्यपक्ष एव युक्त इत्याहुः। ननु [3]सप्प्रत्ययस्य परनिमित्तकत्वाभावेन [4]पूर्वप्रवृत्तेः पश्चाल्लिङादेशे [5]प्रत्ययाद्युदात्तत्वे सत्युदात्तत्वात् शेषनिघातेन सकाराकारस्यानुदात्तत्वादुदात्ते परतोऽनुदात्तस्य लोपः, न तु वैपरीत्यम्। [6]न चात्र लसार्वधातुकानुदात्तत्वं [7]प्राप्नोति, [8]''लिङाशिषि' इति तदादेशस्यार्धधातुकत्वात्, अत आह — **छन्दसीति**। स्वस्थानपाठपक्षे प्रत्ययस्वरेण, सनादिमध्यपक्षे स्वरद्वयेनाप्युदात्तत्वम्। **अनुदात्त एवेति**। तस्मिन् परत उदात्तलोपाभावादित्यर्थः। ननु पकारेण प्रत्ययाद्युदात्तत्वं मा भूत्, धातुस्वरस्तु स्यादेव, अत आह — **पित्करणेति**। स्वस्थानपक्षे धातुस्वरप्रसक्तिर्नास्तीत्याह — **एतत्प्रदेशेति**। ननु [9]'तिङ्ङतिङः' इत्याष्टमिकनिघातेनानुदात्तत्वात् किं [10]लसार्वधातुकानुदात्तत्वादिवादेन, अत आह — **तिङिति**। 'यदवयासिसीष्ठाः' इति यच्छब्दयोगादत्र निघातो नास्तीति लसार्वधातुकानुदात्तत्वमुक्तमिति भावः। ननु [11]'उदात्तवता तिङा' इत्यवशब्दस्य तिङन्तेन समासेऽव्ययपूर्वपदप्रकृतिस्वरेणावशब्दस्याद्युदात्तत्वे शेषनिघातेन तिङन्तानुदात्तत्वं सेत्स्यति, किं [12]लसार्वधातुकानुदात्तत्वेन, अत आह — **अवशब्दस्येति**। उदात्तवति तिङि परे गतिः सर्वानुदात्तः। [13]अतः शेषनिघाताभावाल्ल-[14]सार्वधातुकानुदात्त एव वाच्यः। साविषत्, सूतेर्लेट्, [15]'इतश्च लोपः' इतीकारलोपः, सिप्, तस्येट्, वृद्ध्यावादेशौ। एवं तारिषत्॥

[३, १११–११४]

(रत्नप्रकाशः) सिबुत्सर्ग इति। परनिमित्तनैरपेक्ष्येण सनादिष्वेव धातोश्छन्दसि सिब्विधेय इति भावः। [16]'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति कृत्वा, आगमशासनस्यानित्यत्वाद्वेडभावे नेषत्वादिसिद्धिः। **प्रकृत्यन्तरत्वादिति**। जेषृ णेषृ एषृ प्रेषृ गताविति पाठादेव नेषत्वादिसिद्धेः सिबुत्सर्गो न कर्तव्य इति भावः। यत्तु 'अवयासिसीष्ठा इत्याद्यर्थस्तु ... ... **अवयासिसीष्ठा इति**। यातेरवपूर्वाल्लिङ् थास् सुट् सीयुट् सप्। तदन्तस्याङ्गस्यानेकाच्त्वात् [17]'एकाच उपदेशे' इतीडभावो नेति भावः। इदं [18]'सनाद्यन्ता धातवः' इति सूत्रे धातवः सनाद्यवयवका भवन्तीति व्याख्यायमाने सिपि च सनादिस्थे सत्युपपद्यते। वस्तुतस्तु [19]'सनाद्यन्ता धातवः' इति

---

[1] सिपो वैयर्थ्यम् — अ, ऋ, लृ.
[2] त्राणायाकारः — अ.
[3] सन्प्रत्ययस्य — अ, ऋ, लृ.
[4] पूर्वप्रवृत्तिः — अ.
[5] प्रत्ययाद्युदात्तत्वेनेत्युदात्तत्वात् — अ.
[6] न चात्र सार्वधातुकानुदात्तत्वं — अ.
[7] 'प्राप्नोति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — अ, ऋ, लृ.
[8] पा. सू. ३.४.११६.
[9] पा. सू. ८.१.२८.
[10] लसार्वधातुकानुदात्तत्वापवादेन — अ; लसार्वधातुकत्वादवादेन — लृ.
[11] महाभाष्यम् २.२.१८.
[12] लसार्वधातुकानुदात्तत्वविधानेन — ऋ.
[13] ततः — अ.
[14] सार्वधातुकस्वर एव वाच्यः — अ.
[15] पा. सू. ३.४.९७.
[16] परिभाषा ३५.
[17] पा. सू. ७.२.१०.
[18] पा. सू. ३.१.३२.
[19] पा. सू. ३.१.३२.

सूत्रं धातुसंज्ञाविधायकत्वेनैव व्याख्यातमिति व्यर्थमेव सब्विधानम्। **उदात्तस्य मा भूदिति**। [1]"छन्दस्युभयथा' इति थासः सार्वधातुकत्वात् [2]"अदुपदेशात्' इति लसार्वधातुकानुदात्तत्वे सति धातुस्वरेण प्रत्ययस्वरेण वा सबकारस्योदात्तत्वादुदात्तनिवृत्तिस्वर इटः प्रसज्येत। पकारे सति त्वनुदात्त एवेड् भवति, पित्करणसामर्थ्याद्वा सपः सनादिबहिर्भावादेव वा सशब्दाकारस्य धातुस्वरेणाप्युदात्तत्वाभावात्। [3]"तिङ्ङतिङः' इति निघातस्तु [4]"निपातैर्यद्यदि' इति निषिद्धः। अवशब्दस्य तु [5]"तिङि चोदात्तवति' इति निघातः। **साविषदिति**। 'षू प्रेरणे' इत्यस्य लेटि रूपम्। **तारिषदिति**। तरतेः॥

[३, १११–११४]

(नारायणीयम्) 'सिबुत्सर्गः' इत्युत्सर्गशब्दः सामान्यवचनः, परनिमित्तानुपादानं च सामान्यरूपत्वमिति व्याचष्टे — **परनिमित्तमिति**। सनादिविधानस्य **अन्ते** समाप्तौ, [6]"आयादय आर्धधातुके वा' इत्यस्यानन्तरं कर्तव्यमिति भाष्यार्थं दर्शयति — **सनादिवर्ग इति**। सनाद्यन्ते सनादिमध्य इति भाष्यार्थोऽनेन दर्शितः। **तेन तदन्तस्येति**। सिबन्तस्य [7]"सनाद्यन्ता धातवः' इति धातुसंज्ञायां तस्माल्लकारे शपि च नेषत्वादीनि सिध्यन्ति। सिपस्तु विकरणत्वे सिप्शपोः समावेशो न स्यादिति भावः। प्रकृत्यन्तरत्वमुपपादयति — **जेषू इति**। **सनादिमध्य इति**। परनिमित्तमनुपादाय [8]"सब् बहुलम्' इति सनादिमध्ये कर्तव्यम्, अत्रैव वा। [9]उभयथेष्टस्य सिद्धत्वादित्यर्थः। सनादिमध्ये करण इष्टसिद्धिप्रकारं दर्शयितुं प्रक्रियामाह — **यातेरवपूर्वादिति**। पूर्वत्र न्यासे त्विटोऽसिद्धिरित्याह — **यदि पुनरिति**। ननु सिप्यपि सतीट्प्रतिषेधो न प्राप्नोतीति चोदयति — **ननु योऽत्रेति**। [10]"सनाद्यन्ता धातवः' इत्यस्यारम्भपक्ष इट्प्रतिषेधप्रसङ्गं दर्शयति — **सनाद्यन्ता इति**। प्रत्याख्यानपक्षेऽप्याह — **यदापीति**। **अथवैतत्प्रदेशेति**। अस्मिन् प्रदेशे सपि सति तेन व्यवधानादुपदेशेऽनुदात्तादेकाचः परः सीयुडादिर्न भवतीतीट्प्रतिषेधाप्रसङ्ग इत्यर्थः। **लसार्वधातुकानुदात्तत्वे सतीति**। अन्यथा धातुस्वरं विकरणस्वरं वा बाधित्वा प्रत्ययस्वरे सति शेषनिघातेन सशब्दाकारोऽनुदात्तः स्यात्। **प्रत्ययस्वरेणेति**। अत्र प्रदेशे सपि सतीति भावः। **धातुस्वरेणेति**। सनादिमध्ये सपि सति तदन्तस्य धातुत्वात्। **अनुदात्त एवेडिति**। उदात्तनिवृत्तिस्वराभावे आगमानुदात्तत्वेन। नन्वेवमपि सनादिमध्ये सपि सति परत्वाद्धातुस्वरः स्यादित्यत आह — **पित्करणसामर्थ्यादिति**। यच्छब्दसहितोदाहरणे प्रयोजनमाह — **तिङ्ङतिङ इति**। **षू प्रेरण इत्यस्येति**। अस्माद्धातोर्लेट्, तिप्, [11]"इतश्च लोपः परस्मैपदेषु' इतीकारलोपः, [12]"लेटोऽडाटौ' इत्यडागमः सिप्, इट्, णित्त्वाद्वृद्धिः, आवादेशः। एवं तारिषदित्यत्रापि द्रष्टव्यम्॥

---

[1] पा. सू. ३.४.११७.
[2] पा. सू. ६.१.१८६.
[3] पा. सू. ८.१.२८.
[4] पा. सू. ८.१.३०.
[5] पा. सू. ८.१.७१.
[6] पा. सू. ३.१.३१.
[7] पा. सू. ३.१.३२.
[8] सिब् बहुलमिति — घ, ङ.
[9] उभयथेष्टस्यासिद्धत्वादित्यर्थः — ङ.
[10] पा. सू. ३.१.३२.
[11] पा. सू. ३.४.९७.
[12] पा. सू. ३.४.९४.

कास्प्रत्ययादाममन्त्रे लिटि ३.१.३५.

[३, ११४–११५]

(रत्नप्रकाशः) वार्तिकमत्यल्पविषयमित्याशयेनाहान्यः — **एवं तर्हीति** ।।

इजादेश्च गुरुमतोऽनृच्छः ३.१.३६.

[३, ११५–१२०]

(उद्द्योतनम्) नन्विति। अनेन प्राप्तावपि तेन विकल्पस्याङ्गीकारात् [1]प्राप्तविभाषा भविष्यति। तेन [2]तत्र प्रतिषेधोऽवाच्य इत्यर्थः। **नित्यमेवेति।** तथा च तत्प्रतिषेधे विकल्पः सिध्यतीति भावः। प्रतिषेधं विनापि विकल्पसिद्धिमाह — [3]**एतच्चेति।** 'उवोष' [4]इत्युदाहरणमित्यर्थः। बलवत्त्वं चेति चकारान्वयः। **इह** प्रतिषेधोदाहरणप्रस्तावे। गुरुमद्ग्रहणसामर्थ्यादित्राम् न भविष्यतीति प्रतिषेधानर्थक्यमिति प्रश्नाशय इत्याह — **ईषतुरिति। इयष्ठेति।** [5]'ऋतो भारद्वाजस्य' इति नियमाद्वैकल्पिक इट्। ननु यजादेः कथमिजादित्वम्, अत आह — **लिटीति।** [6]'लिट्यभ्यासस्योभयेषाम्' इत्यनेन। व्याख्यानपरत्वे बीजमाह — **अन्यथेति।** प्रतिषेधवचनं वा क्रियतामुपदेशवचनं वेति न कश्चिद्विशेष [7]इत्यर्थः। यद्यपि भावाभावयोर्गुरुलाघवकृतो विशेषोऽस्ति, [8]तथापि व्याख्यानसंभवात् किमपि न वक्तव्यमित्यत्र तात्पर्यम्। **उपदेशग्रहणशब्देनेति।** 'यद्युपदेशग्रहणं क्रियते' इति भाष्यस्थेनेत्यर्थः। ननु चकारछकारसंयोगान्तस्यैवोच्छेर्धातुषु पाठादुपदेशो गुरुमत्त्वात् सूत्रेणैवाम् सिद्धः, अत आह — **उछीति।** [9]अपाठे संप्रदाय एव शरणम्। उपलक्षणस्य प्रयोजनमाह — **तेनेति।** 'इखि गतौ' इत्यस्य नुमागमः। ऋच्छतावामनिष्ट इति 'प्राप्त्यर्थोऽपि' इत्ययुक्तम्, अत आह — **प्रतिषेधेति।** ज्ञापकत्वाभावं शङ्कते — **आमेति।** ननु ऋच्छतिग्रहणे कथमृधातुग्रहणम्, अत आह — **ऋ गतीति। ऋच्छादेशः** [10]'पाघ्रा' इत्यादिना। ऋधातोरेवेदं ग्रहणं, न तौदादिकस्येत्यर्थः। लिटि ऋच्छादेशः कुतो नास्ति, अत आह — **शितीति।** स्थाधातुनिर्देशोऽपि तिष्ठादेशमुपपादयति — **अत्रापीति।** श्तिपः शित्करणस्य सार्वधातुकत्वार्थत्वादिति भावः। [11]**तत्र** सूत्रे। **अनेन** तिष्ठतित्वेन रूपेण। तथात्रापि ऋच्छतित्वेन रूपेण ऋधातुरेव प्रतीयते इत्यर्थः। ननु 'ऋ अतुस्' इति स्थिते द्विर्वचनात् पूर्वं [12]परत्वाद्यणा भाव्यम्, अत आह — **यणादेशादिति।** [13]'द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः' इति [14]'द्विर्वचनेऽचि' इति सूत्रे पठितोऽयं विप्रतिषेधः। ननु द्विर्वचनमनित्यम्,

---

[1] प्राप्ताप्राप्तविभाषा — ऋ.
[2] तत्रानिषेधो वाच्यः — अ.
[3] ततश्चेति — ऋ.
[4] इत्येतदुदाहरणं — अ.
[5] पा. सू. ७.२.६३.
[6] पा. सू. ६.१.१७.
[7] 'इत्यर्थः' इति नास्ति — ऋ, लृ.
[8] तथा च — अ, ऋ, लृ.
[9] गुरोरपाठ इत्यर्थः।
[10] पा. सू. ७.३.७८.
[11] अत्र — अ, ऋ, लृ.
[12] 'परत्वात्' इति नास्ति — ऋ.
[13] महाभाष्यम् १.१.५९.
[14] पा. सू. १.१.५९.

यण् नित्यः, तयोर्न विप्रतिषेधः, अत आह — **तथा हीति**। **सतीति**। [1]'द्विर्वचनेऽचि' इत्येतस्मिन्। तदभावे द्विर्वचनमनित्यं स्यात्, तत्सत्त्वे तदपि नित्यमेवेत्यर्थः। ननु [2]'द्विर्वचनेऽचि' इति सूत्रमेव कर्तव्यम्, विप्रतिषेधो न पठनीय इति तत्रोक्तम्। तथा च सति स्थानिवद्भावशास्त्रे विप्रतिषेधाभावात् पूर्वविप्रतिषेधेन द्विर्वचनस्य पूर्वभावित्वं नोपपद्यते, अत आह — **अथवेति**। यद्वा विप्रतिषेधपक्षे [3]'द्विर्वचनेऽचि' इति सूत्राभावात् कथं द्विर्वचनस्य नित्यत्वम्, अत आह — **अथवेति**। यथा नी उस् इति स्थिते परत्वादियङि द्विर्वचने निन्युरिति [4]न सिध्यति। न चात्रापि पूर्वविप्रतिषेधेन द्विर्वचनम्, यणादिमध्ये इयङः पाठाभावात्। तथा च द्विर्वचने सतीयङपवादेन यणा भाव्यमिति पूर्वमपीयङ न प्रवर्तते, अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः। तथात्रापि द्विर्वचने सति यणपवादेन दीर्घेण भाव्यमिति पूर्वं यण् न प्रवर्तत इत्यर्थः। सिद्धान्ते सूत्रमेवाङ्गीक्रियते, न विप्रतिषेधः। पूर्वं परत्वादियङ, पश्चाद् द्विर्वचने यणभावात् कथं तस्यापवादविषयत्वम्, अत आह — [5]**सति वेति**। **अन्तेति**। अन्तादिशब्दवति कार्ये उभयतो व्यपदेशदर्शनादत्र तच्छब्दाभावेऽपि तथा व्यपदेश इत्यर्थः। तच्छब्दवत्येव तथा व्यपदेश इति नियमेऽप्याह — **स्थानिवदिति**। ननु [6]'वार्णादाङ्गं बलीयः' इति सवर्णदीर्घं बाधित्वा उरदत्वमेव स्यात्, अत आह — **वार्णादिति**। तदुदाहरति — **यथेति**। अन्तरङ्गमपि यणादेशं बाधित्वेत्यर्थः। अत्र भिन्नाश्रयत्वमाह — **इहेति**। **वव्रश्चेति**। आसप्तमपरिसमाप्तेरङ्गाधिकारे [7]सत्यङ्गत्वस्य प्रत्ययपरत्वाधीनत्वेनात्वस्य परप्रत्ययनिमित्तकत्वाद् वस्य संप्रसारणे कार्ये [8]'अचः परस्मिन्' इत्यत्वस्य स्थानिवद्भावात् [9]'न संप्रसारणे' इति वस्योत्वाभावात् 'वव्रश्च' इति सिध्यतीत्यर्थः। ऋकारान्तर्भावे लिङ्गमाह — **बहुवचनेति**। अन्यथा ऋच्छत्यॄतोरिति स्यादिति भावः। ऋधातुग्रहणे ऋदन्तस्य ग्रहणं कथम्, अत आह — [10]**ऋ इति**। धात्वधातु[11]साधारणवर्णग्रहणमेतदित्यर्थः। [12]'अकेवलस्य' इत्यस्य व्याख्यानम् — **वर्णान्तरेति**। तथा च [13]'कृ' इत्यत्र ककाररूपवर्णान्तरसहितस्य ऋकारस्य संयोगादित्वाभावान्न गुण इत्यर्थः। नियमेन फलितमाह — **ततश्चेति**। **धातोः** ऋधातोः। इङ्खांचकारेत्यादिसंग्रहार्थमाह — **आगमेति**। अनृच्छ इत्यनेन कथमागमनिमित्तगुरुमद्धातोराम् लभ्यते, अत आह — **अनृच्छ इति**। **पर्युदासेति**। सादृश्यं चागमवत्त्वेन। पर्युदासे ऋच्छसदृशस्येजादेराम्विधिरिति 'एध वृद्धौ' इत्यादेर्न स्यात्, आगमनिमित्तगुरुमत्त्वाभावात्, अतो भाष्योक्तप्रतिषेधस्यैव ज्ञापकत्वमुपपादयति — **अथवेति**। ननु ऋच्छेराम्प्रसक्तेरभावात् प्रतिषेध [14]एवायुक्तः, कथं [15]ज्ञापकत्वम्, अत आह — **यद्यपीति**। [16]'ऋच्छत्यॄताम्' इति गुण आमा व्यवधाने सति न स्यादित्यामभावः, तेन ज्ञापक [17]इत्ययुक्तम्। **तथापीति**। अत एव वैयर्थ्याज्ज्ञापकत्वम्, तच्च[18] संभावनामात्रेणेत्यर्थः। **यथोक्तस्य** आगमनिमित्त-

---

[1] पा. सू. १.१.५९.
[2] पा. सू. १.१.५९.
[3] पा. सू. १.१.५९.
[4] न सिध्येदिति — ऋ.
[5] सति चेति — अ, ऋ, लृ.
[6] परिभाषा ५५.
[7] सत्यङ्गस्य — अ.
[8] पा. सू. १.१.५७.
[9] पा. सू. ६.१.३७.
[10] ऋ ऋ इति — अ, ऋ, लृ.
[11] साधारणमेतदित्यर्थः — अ; साधारणग्रहणमेतदित्यर्थः — लृ.
[12] यदि केवलमित्यस्य — अ, ऋ, लृ.
[13] कृञित्यत्र — अ.
[14] एव युक्तः — अ.
[15] ज्ञापकम् — ऋ.
[16] पा. सू. ७.४.११.
[17] इत्युक्तम् — अ.
[18] चकारो नास्ति — अ.

गुरुमतोऽप्याम् भवतीत्यस्य। ननु नित्ययोगे [1]मतुप्युपदेशवचनं न कर्तव्यमित्युक्तम्, अत आह — **गुरुमत इति**। पितृमानिति कदाचित् [2]पितृयोगमात्रेण [3]यदा प्रयोगस्तदा दृष्टान्तः। यद्वा, जन्यजनकभावस्य कादाचित्कस्य मत्वर्थत्वमिति नित्ययोगाभावः। व्याख्यानमेवात्र मानमित्याह — **व्याख्यास्यत इति**। इजादित्वाद् गुरुमत्त्वाच्चाम् सिद्ध इति नोपसंख्यानापेक्षा, अत आह — **प्रतिषेध इति**। उकारनिर्देशे कथमस्य प्रतिषेधसिद्धिः, अत आह — **तेनेति**। इजादिर्गुरुमानुकारान्तोऽन्यो [4]धातुर्नास्तीति नातिप्रसङ्ग इति भावः। उत्तरसूत्रपाठस्य प्रयोजनमाह — **संहितयेति**। अस्मिन् पक्षे ओकारान्तमेव विभागे पठनीयम्॥

[३, ११५–१२०]

(रत्नप्रकाशः) लिण्निमित्तादिति। लिण्निमित्तगुरुत्वकादित्यर्थः। धर्मधर्मिणोरभेदोपचारात्तदुपपन्नम्। **उवोषेति**। अत्र यद्वक्तव्यं तत् [5]'क्न्मेजन्तः' इति सूत्रे संनिपातपरिभाषोदाहरणव्याख्यावसरे उक्तम्, तत एवावधार्यम्। अत एवात्रत्यकैयटोऽपि तत्र दूषित एवेति न तद्दूषणेऽत्र यत्न आदृतः। गुरुमद्वचनसामर्थ्यादुपदेशे यो गुरुमान् तत एवाम् भविष्यति, नान्यस्मादित्याशयेन पृच्छति — **गुरुमद्वचनमिति**। उत्तरमाह — **णल्युत्तम इति**। तथा च तद्व्यावृत्त्या गुरुमद्वचनं चरितार्थमिति न तद्बलेनोपदेशे गुरुमत इति लभ्यत इति भावः। [6]**उपदेशवचनादिति**। [7]'नित्यं कौटिल्ये गतौ' इत्यतो मण्डूकप्लुत्या नित्यग्रहणमनुवर्त्य नित्यं यो गुरुमानिति व्याख्यास्यत इति भावः। एतेन 'वचनं व्याख्यानम्। अन्यथा वचनेन वचनान्तरस्य निरासे को गुणः स्यात्। तस्मान्नित्ययोगे मतुप आश्रयणादुपदेशावस्थायां गुरुमत इत्याश्रयिष्यत इत्यर्थः' इति निरस्तम्। वचनेनापि लघुभूतेन वचनान्तरस्य निराकरणे लाघवस्यैव गुणत्वात्। नित्ययोगे मतुप आश्रयणं त्वस्तु, उपायस्योपायान्तरादूषकत्वात्। उपदेशे गुरुमत इत्याश्रीयमाणेऽव्याप्तिः स्यादित्याह — **यद्युपदेशेति**। **उछेरिति**। 'उछी विवासे' इत्युकारछकाररूपवर्णद्वयात्मकोऽगुरुमान् धातुः। ईकारस्त्वारोपितावयवत्वकोऽनुबन्ध इति न तत्प्रयुक्ता तस्योपदेशे गुरुमत्ता युज्यत इति भावः। **ऋच्छिप्रतिषेध इति**। ऋच्छिपर्युदास इत्यर्थः। 'ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु' इत्यृकारछकारात्मक एवागुरुमानुपदेश इति वाक्यभेदेन ऋच्छिभिन्नादागमप्रयुक्तगुरुमत्त्वकादाम्विधानान्नोक्ताव्याप्तिरिति भावः। **तुङ्निमित्तेति**। तुग्ग्रहणमागममात्रोपलक्षणम्। तेन 'इङ्खांचकार' इत्यादावप्याम्सिद्धिः[8]। अनन्यप्रयोजनवाक्यभेदाश्रयणमेव तर्हि दोष इत्याशयेनाह — **स तर्हीति**। **प्राप्त्यर्थः** प्रतिषेधप्राप्त्यर्थ इत्यर्थः। तथा चोपदेशे गुरुमत इत्याश्रयणमयुक्तम्, अनृच्छ इति प्रतिषेधासंगतेरिति भावः। **ऋच्छेर्लिटि गुणवचनमिति**। [9]'तस्मिन्' इति परिभाषया लिटचव्यवहिते सति पूर्वस्यर्च्छेर्विधीयमानो गुणस्तत आमि सत्यनुपपद्यमानस्तत्र तदभावं ज्ञापयतीति भावः। ननु [10]'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' इत्यामा व्यवहितेऽपि गुणः स्यादिति कथं तस्य तदभावज्ञापकतेति चेन्न, आम्प्रवृत्तेस्तत्रानिश्चितत्वेन तदप्रवृत्तेरेव

[1] मतुप्, उपदेशवचनं तु न — ऋ.

[2] प्रत्ययागममात्रेण — अ.

[3] यथा प्रयोगस्तथा — अ, ऋ, लृ.

[4] धातुर्नास्तीति प्रसङ्ग इति — अ.

[5] पा. सू. १.१.३९.

[6] 'उपदेशवचनादिति' इत्यतः 'व्याख्यास्यत इति भावः' इत्यन्तं नास्ति — ब.

[7] पा. सू. ३.१.२३.

[8] सिद्धः — ब.

[9] पा. सू. १.१.६६.

[10] महाभाष्यम् ७.२.३.

तत्र ज्ञापयितुमुचितत्वात्। एतेन "येन नाव्यवधानन्याय आश्रीयमाणे [1]"तस्मिन्निति निर्दिष्टे' इत्येतद् बाध्येत" इति निरस्तम्। येन नाव्यवधानन्यायस्य [2]'तस्मिन्' [3]'तस्मात्' इति परिभाषाद्वयबाधकत्वेन तस्मिन्नित्येतद्बाधापादनस्याकिंचित्करत्वात्। आमं बाधित्वा परत्वाद् गुणस्यैव जायमानत्वेन प्राप्त्यर्थम् 'अनृच्छः' इति न भवतीति त्वन्यदेतत्। **ऋच्छिर्लिटि नास्तीति कृत्वेति।** आदेशतामापन्न इति शेषः। [4]**प्रकृत्यर्थ इति।** स्थान्यर्थ इत्यर्थः। ऋच्छधातोरनुकरणात् श्तिपि शपि [5]"पाघ्राध्मा' इति ऋच्छादेशे सति [6]"ऋच्छत्यॄताम्' इति गुणविधौ ऋच्छतीति निर्देश इति न तस्योक्तज्ञापकतेति भावः। **द्विर्वचने कृत इति।** [7]"द्विर्वचनेऽचि' इति सूत्रस्यादेशनिषेधकत्वपक्ष इदम्। वस्तुतस्तु तस्य स्थानिवद्रूपातिदेशकताया एव व्यवस्थापितत्वेन विनापि गुणम् 'आरतुः' इत्यादि सिध्यत्येव। न च [8]'परिहृत्यापवादन्यायेन सवर्णदीर्घविषये यण् न प्रवर्तत इति द्वित्वे सति सवर्णदीर्घ इष्टं न सिध्यतीति वाच्यम्, तत्र यण्सवर्णदीर्घयोः समानविषयत्वाभावेनापवाद्यापवादकभावाभावात्। एतेन 'यणादेशात् पूर्वविप्रतिषेधेन द्विर्वचनं क्रियते। तथा हि—सति स्थानिवद्भावशास्त्रे द्वयोरपि यण्द्विर्वचनयोर्नित्यत्वमिति विप्रतिषेध उपपद्यते' इति निरस्तम्। तत्र पूर्वविप्रतिषेधकल्पनायां मानाभावात्। यणोऽन्तरङ्गत्वेन तस्यैव तत्रादौ [9]प्रवृत्त्युपपत्तेश्च। यदप्युक्तम् 'अथवा यथा निन्यतुरित्यत्र यणादेशेन भाव्यमिति द्विर्वचनात्पूर्वमपीयङ न प्रवर्तते तथेहापि द्विर्वचने कृते सवर्णदीर्घेण भाव्यमिति यण् न प्रवर्तते' इति। तदपि न, [10]'तत्र यण्सवर्णदीर्घयोरपवाद्यापवादकभावस्याभावात्। यदप्युक्तम् 'सति वा यणि तस्य स्थानिवद्भावाद् द्विर्वचनम्। तत्र कृते यणादेशात् परत्वात् सवर्णदीर्घत्वम्' इति। तदपि न, द्वित्वे कर्तव्य एव स्थानिवद्भावस्योक्तत्वेन सवर्णदीर्घे कर्तव्ये तदभावात्। **गुणे कृते रपरत्वे च द्विर्वचनमिति।** यथा स्थानिवद्रूपातिदेशपक्षे गुणे सति तस्य स्थानिवद्रूपतायां सत्यामृकारस्य द्वित्वे सत्युत्तरदलस्य पुनरादेशस्वरूपेणावस्थितौ सवर्णदीर्घाप्रसङ्गेनोरदत्वे हलादिशेषे [11]'अत आदेः' इति दीर्घत्वे सवर्णदीर्घे चेष्टं सिध्यति, एवमादेशनिषेधकत्वपक्षे तस्यैव निषेधस्य गुणोऽपवादो भवतीति तस्मिन् सति तस्य द्वित्वे हलादिशेषे [12]'अत आदेः' इति दीर्घत्वे सवर्णदीर्घे चेष्टं सिध्यतीति भावः। **अन्तरङ्गत्वादिति।** [13]'वार्णादाङ्गम्' इति तु न प्रवर्तते, समानाश्रयत्वाभावात्। ननु [14]'प्रागभ्यासविकारेभ्योऽङ्गाधिकारः' इति मतं दूषयित्वा [15]'आसप्तमसमाप्तेरङ्गाधिकारः' इति मतस्यैव व्यवस्थापयिष्यमाणत्वादुरदत्वस्यान्तरङ्गत्वं न युज्यत इत्यत आह—**अथापि कथंचिदिति। ऋकारोऽप्यत्रेति।** एवं सति बहुवचनस्यार्जवेनोपपत्तिरिति भावः। स्थानिवद्भावपक्षे त्वर्तेर्गुणविधानं व्यर्थमिति ऋदन्तानां बहुत्वाद् बहुवचनोपपत्तिर्ज्ञेया। **इहापीति।** [16]"पदाङ्गाधिकारे च, [17]"वर्णग्रहणं च सर्वत्र'

---

[1] पा. सू. १.१.६६.
[2] पा. सू. १.१.६६.
[3] पा. सू. १.१.६७.
[4] भाष्ये 'प्रकृत्यर्थं विज्ञायते' इत्यत्र 'प्रकृत्यर्थो विज्ञायते' इति निर्णयसागरमुद्रिते पाठः।
[5] पा. सू. ७.३.७८.
[6] पा. सू. ७.४.११.
[7] पा. सू. १.१.५९.
[8] प्रकल्प्य चापवादविषयमिति न्यायोऽर्थतोऽनूदितः। परिभाषा ६४.
[9] प्रवृत्त्यापत्तेश्च — ब.
[10] 'तत्र यण्' इत्यादि 'सवर्णदीर्घत्वमिति। तदपि न' इत्यन्तं नास्ति — ब.
[11] पा. सू. ७.४.७०.
[12] पा. सू. ७.४.७०.
[13] परिभाषा ५५.
[14] इदं मतं महाभाष्ये ६.४.१.
[15] इदं मतं महाभाष्ये ६.४.१.
[16] का. वा. १.१.७२–२१.
[17] का. वा. १.१.७२–२७.

इति तदन्तविध्याश्रयणादिति भावः। **अकेवलस्येति**। अनेकवर्णात्मकस्येत्यर्थः। तदेवं महता यत्नेनोपदेशे गुरुमत्त्वाश्रयणपक्षस्यायुक्तत्वमुपपादितमुपसंहरति — **स एषोऽनन्यार्थ इति**। **उपदेशग्रहणं न करिष्यत इति**। उपदेशे गुरुमत इति न [1]व्याख्यास्यत इत्यर्थः। ननु तथाप्यनृच्छ इति प्रतिषेधो व्यर्थ एव, [2]'ऋच्छत्यॄताम्' इति गुणविधानेनैवामभावस्य सिद्धत्वादिति चेन्न, [3]'क्ङिति च' इति निषेधविषये आमो दुर्वारत्वात्। न च [4]'क्ङिति च' इति निषेधबाधनायैव स गुणः प्रवृत्त इति वाच्यम्, अक्ङित्याम्बाधनेन [5]तस्योपक्षीणत्वेन [6]निषेधबाधकत्वासंभवात्। ऋच्छतेर्लिटि गुणवचनं ज्ञापकमिति पूर्वभाष्यं तु [7]'क्ङिति च' इति निषेधापर्यालोचनप्रयुक्तम्। **संनिपातलक्षण इति**। लिट्संनिपातलक्षणो गुणस्तद्विघातकस्यामो निमित्तं नेति भावः। **ऊर्णोतेश्चोपसंख्यानमिति**। 'उच्छेराम् वक्तव्यः' इति वचनसमुच्चायकश्चकारः। अत्र त्वाम्प्रतिषेध उपसंख्येयः, आमः सूत्रेणैव सिद्धत्वात्। **वाच्य ऊर्णोरिति**। [8]'धातोरेकाचः' इति यङ्विधिसूत्रे व्याख्यातमिदम्। यथाश्रुतसूत्राक्षराश्रयेणाप्यूर्णोतेराम्निषेधः साधयितुं शक्यत इत्याह — **अथवेति** ॥

[३, ११५–१२०]

(नारायणीयम्) द्विवचनबहुवचनयोरिति। 'ऊषतुः, ऊषुः' इत्यादौ कित्त्वाद् गुणाभावः। ननु द्विवचनबहुवचनयोर्गुणाभावाद् गुरुमद्वचनं सावकाशमिति कथं तत्सामर्थ्याद्विशेषाश्रयणं स्यादित्यत आह — **ईषतुरीषुरिति**। **इयष्ठेति**। यजेस्थलि [9]'ऋतो भारद्वाजस्य' इति नियमाद् विकल्पेनेट्। [10]व्याख्यानमेव दर्शयति — **तस्मान्नित्ययोग इति**। नित्यं येषां गुरुणाभिसंबन्धस्त एवेह गृह्यन्ते ईहादयः, न तु कादाचित्कगुरुमन्त इत्यर्थ इत्युपदेशे गुरुमत इत्यर्थसिद्धिरित्यर्थः। 'यद्युपदेशग्रहणं क्रियते' इति भाष्यमप्यस्मिन्नर्थे योजयति — **उपदेशग्रहणशब्देनेति**। **तुग्ग्रहणमागममात्रेति**। आगमनिमित्ता यस्य गुरुमत्ता तस्मादामिति सामान्येन ज्ञाप्यत इत्यर्थः। तेन नुमा यस्य गुरुमत्ता तस्मादपि सिध्यतीत्याह — **तेनेति**। ननु ऋच्छेरामः प्राप्तिरनिष्टेति 'प्राप्त्यर्थोऽपि' इत्ययुक्तमित्यत्राह — **प्रतिषेधेति**। **तस्मादाम एवेति**। गुणविधानेन कस्यचिच्छास्त्रस्य बाधेऽवश्यकर्तव्ये यथेष्टसिद्धिस्तथैवाश्रयितुमुचितमिति भावः। ननु ऋच्छतेर्गुणविधाने कथं सामर्थ्यादित्यर्थत्वं स्यादिति, [11]तत्राह — **ऋ गतीति**। **शित्यृच्छादेशेति**। [12]पाघ्राध्मादिसूत्रेण। **तत्रानेन रूपेणेति**। धातुनिर्देशे श्तिपो विधानाद् धातुरेव तस्यार्थ इत्यर्थः। ननु ऋ उस् इति स्थिते परत्वाद् द्विर्वचनं बाधित्वा यण् स्यादित्यत आह — **यणादेशात् पूर्वविप्रतिषेधेनेति**। [13]'द्विर्वचनं यणयवायावादेश' इत्यादिना। ननु यणि सत्यनच्कत्वाद् द्विर्वचनस्याप्राप्तेरनित्यत्वात् कथं विप्रतिषेधोपपत्तिरित्यत आह — **तथा हि सति स्थानिवद्भावशास्त्र इति**। [14]'द्विर्वचनेऽचि' इति स्थानिवद्-

---

[1] पूर्वं व्याख्यानपक्षं दूषयित्वा वचनाश्रयणपक्ष एवादरः प्रदर्शितः। अत्र तु व्याख्यानाभिप्राय उपदेशग्रहणस्य कथमवलम्ब्य निषिध्यत इति चिन्तनीयम्।

[2] पा. सू. ७.४.११.

[3] पा. सू. १.१.५.

[4] पा. सू. १.१.५.

[5] तस्योपक्षीणत्वेन — ब.

[6] नित्यबाधकत्वासंभवात् — प.

[7] पा. सू. १.१.५.

[8] पा. सू. ३.१.२२.

[9] पा. सू. ७.२.६३.

[10] व्याख्यानमेवं दर्शयति — ङ.

[11] तदाह — घ.

[12] पा. सू. ७.३.७८.

[13] महाभाष्यम् १.१.५९.

[14] पा. सू. १.१.५९.

भावाद्यण्यपि सति द्विर्वचनं प्रवर्तेत इति द्वयोरपि नित्यत्वाद्विप्रतिषेध उपपद्यत इत्यर्थः। पूर्वविप्रतिषेधात् स्थानिवद्भावस्य ज्यायस्त्वं स्थापितं भाष्ये 'तस्मात् स्थानिवद्भाव एव ज्यायान्' इति। तदाश्रयेण पक्षान्तरमाह — **अथवा निन्यतुरिति**। **इयङ न प्रवर्तेत इति**। अपवादविषयपरिहारेणोत्सर्गस्य प्रवर्तनात् पूर्वमप्रवृत्तिः। यदि तु पूर्वं प्रवर्तेत तदा कृतेऽपि द्विर्वचने तस्य श्रवणं स्यात्, प्रवृत्तबाधाया अयोगादिति भावः। यद्वा, निन्यतुरित्यादौ पूर्वमियङ प्रवर्तते, ततो [1]'द्विर्वचनेऽचि' इति रूपातिदेशात् 'नी नी' इति द्विरुच्यते, ततोऽनेकाच्त्वाद्यणादेशः, एवमिहापीति पक्षान्तरमाह — **सति वा यणीति**। कथं पुनर्धातुग्रहणेन वाभ्यासग्रहणेन वा दीर्घस्य ग्रहणं स्यादित्यत्राह — **अन्तादिवदिति**। **उभयादेशस्येति**। [2]'यो ह्युभयोरादेशः सोऽन्यतरतो व्यपदेशं लभते' इति [3]न्यायादित्यर्थः। **स्थानिवद्भावाद्वेति**। [4]'स्थानिवदादेशः' इत्यनेन। ननु बहिरङ्गत्वेऽपि [5]'वार्णादाङ्गं बलीयः' इति वचनादुरदत्वेन भाव्यमित्यत्राह — **वार्णादिति**। **समानाश्रयेति**। इह तु भिन्नाश्रयत्वम् — उरदत्वस्य प्रत्ययो निमित्तम्, अङ्गस्य विधानात्। सवर्णदीर्घस्य वर्णद्वयम्, तदेतदाह — **इह त्विति**। अर्तेर्लिटि गुणविधानस्य 'कथंचित्' इत्यनेन सूचितं हेतुं स्फोरयति — **आसप्तमेति**। **वव्रश्चेति**। व्रश्चेर्लिटि द्विर्वचने रेफस्य [6]संप्रसारणम्, उरदत्वम्, तस्यासप्तमाध्यायपरिसमाप्तेरङ्गाधिकारे सत्यङ्गस्य विधानादङ्गेन प्रत्ययस्याक्षेपात् परनिमित्तकत्वात् [7]'अचः परस्मिन्' इति स्थानिवद्भावात् [8]'न संप्रसारणे संप्रसारणम्' इति वकारस्य संप्रसारणप्रतिषेधाद् 'वव्रश्च' इति सिध्यति, नान्यथा। अतोऽन्तरङ्गत्वादुरदत्वात् पूर्वं सवर्णदीर्घत्वे सत्यनिष्टं रूपं स्यादसति गुणविधान इत्यर्थः। प्रश्लिष्टनिर्देशे प्रमाणमाह — **बहुवचनेति**। 'ॠ' इति धातुग्रहणे कथं चक्रतुरित्यादावतिप्रसङ्गः स्यादित्यत आह — **ॠ इति वर्णग्रहणादिति**। [9]'वर्णग्रहणे सर्वत्र तदन्तविधिः' इति वचनात्। 'अकेवलस्य' इत्यस्य व्याख्यानम् —— **वर्णान्तरेति**। नियमेन फलितमर्थमाह — **ततश्चेति**। 'अनन्यार्थः' इत्येतद्व्याचष्टे — **आगमनिमित्तेति**। कथं पुनः 'अनृच्छः' इति निषेधेनागमनिमित्तगुरुमत्त्वयुक्ताद्धातोराम् लभ्येतेत्यत आह — **अनृच्छ इति पर्युदासेति**। **प्राप्तिसंभावनयेति**। एवंजातीयकेभ्य आम् प्राप्नोतीति प्राप्त्यापादनार्थं क्रियमाण ऋच्छिप्रतिषेध आगमनिमित्तगुरुमत्त्वधातोराम् भवतीत्यस्यार्थस्य ज्ञापक एवेत्यर्थः। अत्रापि 'उपदेशग्रहणम्' इति व्याख्यानमेवोच्यत इत्याह — **गुरुमत इति**। मात्रशब्दव्यवच्छेद्यमाह — **न त्विति**। इयेषेत्यादौ संनिपातपरिभाषाप्रवृत्तिप्रकारमाह — **लिट्संनिपातेति**। **प्रतिषेध इति**। न तु विधौ। **तेनोकारान्तस्येति**। वर्णग्रहणे तदन्तविधि[10]सद्भावात्। संहितया सूत्रपाठ इति पक्षमाश्रित्योकारप्रश्लेष उक्त इत्याह — **संहितयेति**॥

उषविदजागृभ्योऽन्यतरस्याम् ३.१.३८.

[३, १२०]

(उद्द्योतनम्) [11]धातुपाठेऽदन्तत्वभ्रमं निराह — **सूत्र इति**। अस्मिन्नित्यर्थः। **अकारेति**। [12]'अतो

---

[1] पा. सू. १.१.५९.
[2] महाभाष्यम् १.१.५७.
[3] न्यायाद्वेत्यर्थः — ङ.
[4] पा. सू. १.१.५६.
[5] परिभाषा ५५.
[6] संप्रसारणे उरदत्वम् — ङ.
[7] पा. सू. १.१.५७.
[8] पा. सू. ६.१.३७.
[9] का. वा. १.१.७२–२७. अर्थानुवादोऽत्र।
[10] संभवात् — ङ.
[11] धातुपाठेऽदन्तभ्रमं — अ.
[12] पा. सू. ६.४.४८.

लोपः' इत्यनेनेत्यादिः। यद्यपि तस्य स्थानिवत्त्वाल्लोपेऽपि गुणो न प्राप्नोति, तथाप्युपधात्वविधौ स्थानिवत्त्वप्रतिषेधाद् गुणो भविष्यतीति लोपाभाव उक्तः। अल्लोपाभावेऽ[1]निष्टरूपमाह — **विदतीति**। [2]तदभावे हेतुमाह — **आम इति**॥

[३, १२०]

(रत्नप्रकाशः) विदिरकारान्त इति। अकारान्तोऽत्र सूत्रे निपात्यत इति भावः। इतरो धातुपाठ एव विदिरदन्त आश्रित इति मन्यमान आह — **यद्यकारान्त इति**। **गुणो न सिध्यतीति**। विद इत्यस्य लघूपधत्वाभावादिति भावः। [3]तथा चाल्लोपस्याप्यभावेन विदतीत्यनिष्टं रूपं स्यात्। **अगुणत्वमिति**। न विद्यते गुणो यस्मात् तत्त्वमदन्तत्वमित्यर्थः। आम्परत्वेन विदेर्निर्देशाभावेन गुणाभावो निपातित इति [4]यथाश्रुतं त्वनुपपन्नम्॥

[३, १२०]

(नारायणीयम्) ज्ञानार्थस्य विदेः परस्मैपदिन इह ग्रहणम्। तस्य धातुपाठेऽकारान्तत्वमनिष्टमित्याशङ्क्याह — **सूत्र इति**। तर्हि वेत्तीत्यादौ गुणस्यासिद्धिः कथमुद्भावितेत्यत आह — **इतर इति**। **अकारलोपाभावाच्चेति**। [5]"अतो लोपः' इत्यार्धधातुके विधानात्। **आमः प्राधान्येनेति**। तेनामभावेऽदन्तत्वाभावाद् विवेदेत्यादिसिद्धिः॥

भीह्रीभृहुवां श्लुवच्च ३.१.३९.

[३, १२०–१२१]

(उद्द्योतनम्) द्विर्वचनमिति। 'श्लुवच्च' इत्यतः 'द्वे च' इति लभ्यत्वित्यर्थः। आमः श्लुवद्भावे गुणनिषेधभ्रमं निराह — **न लुमतेति**। लुमदाश्रयो गुणो निषिध्यत इति भ्रान्तस्य शङ्का॥

[३, १२०–१२१]

(रत्नप्रकाशः) द्वित्वेत्वे इति। प्रयोजनपरिगणनमेतत्। तेन [6]"न लुमताङ्गस्य' इति निषेधो न भवति। एतेन "[7]"न लुमताङ्गस्य' इति निषेधो न भवति। "प्रत्ययलोपे' इत्यस्याः प्राप्तेरयं निषेधः। न चात्रासौ प्राप्तिरस्ति" इति निरस्तम्। श्लौ परतः पूर्वस्य यत् कार्यं दृष्टं तस्यात्रातिदेश्यत्वेन 'जुहुतः' इत्यादौ दृष्टस्य गुणप्रतिषेधस्याप्यतिदेशे बाधकाभावात्। प्रत्ययलोप-

---

[1] अनिष्टमाह — अ.

[2] 'तदभावे' इत्येव 'अ, ऋ, लृ' कोशेषु दृश्यते। 'तद्भावे' इति युक्तं भाति। आम्संनियोग इत्यर्थात्॥ यद्वा 'तदभावे' इत्यस्य आमभावेऽदन्तत्वाभाव इत्यर्थः।

[3] तथा चाल्लोपस्याप्यभावे विदतीति — ब.

[4] यथाश्रुतं ह्यनुपपन्नम् — ब.

[5] पा. सू. ६.४.४८.

[6] पा. सू. १.१.६३.

[7] पा. सू. १.१.६३.

[8] पा. सू. १.१.६२.

सूत्रस्य नियमार्थतया [1]व्यवस्थापयिष्यमाणत्वेन [2]'सार्वधातुकार्धधातुकयोः' इत्यादिप्राप्तेरेव तत्प्रतिषेध्यतौचित्यात्। गुणनिषेधमात्रस्यातिदेश्यतया गुणप्राप्तिविशेषस्यानपेक्षणाच्च॥

[३, १२०–१२१]

(नारायणीयम्) ननु श्लुवद्भावाद् द्विर्वचनं भवतीति प्रयोजनस्य सुज्ञानत्वात् प्रश्नोऽयमसमञ्जस इत्यत आह—**द्विर्वचनमेवेति**। 'भीह्रीभृहुवां श्लुवच्च' इति [3]लाघवाद् वक्तव्यमित्यर्थः। ननु श्लुवद्भावादेव[4] बिभृत इत्यादाविव गुणो न स्यादित्यत आह—**न लुमतेति**। **न चात्रेति**। [5]अत्रामः श्रूयमाणत्वात् [6]'प्रत्ययलोपे' [7]इत्यस्याः प्राप्तेरभावात् प्रतिषेधाभाव इत्यर्थः॥

कृञ् चानुप्रयुज्यते लिटि ३.१.४०.

[३, १२१–१२४]

(उद्द्योतनम्) लिट्परस्य कृञोऽनुप्रयोगः सिद्ध इत्यन्वयः। तत्र हेतुः—**कालेति**। **प्रत्ययादिः** [8]पुरुषः। नन्वामन्तादेव सर्वं प्रतीयताम्, अत आह—**आमन्तादिति**। यद्यपि केवलस्यामन्तस्य प्रयोगाभावात् कालविशेषोऽपि तस्मान्न प्रतीयते, किं तु [9]धात्वर्थविशेषमात्रम्, [10]तथाप्यभ्युपेत्योक्तम्—**कालविशेष इति**। साधनादिकं तिङामेवार्थः, कालस्तु लेर्लुक्यामन्तेनापि प्रतिपादयितुं [11]शक्यत इति भावः। परिशेषात् कृञ्प्रयोग इति वक्तुं सजातीयविजातीययोः प्रयोगं निराह—**तत्रेति**। साधनादिप्रतिपादनाय धात्वन्तरप्रयोगावश्यकत्वे सतीत्यर्थः। साधनादिप्रतिपादनाय [12]कृञ्प्रयोगे धात्वर्थविशेषलाभायामन्तप्रयोग इति नोक्तदोष इत्याह—[13]**कृञ् त्विति**। **तस्मादिति**। अनुप्रयोगसहितस्यैवामन्तस्य प्रयोगः, न तु केवलस्येति नियमार्थमित्यर्थः। **अर्थानां** साधनादीनाम्। [14]**तदर्थाभिधानाय**...। [15]नन्वनेन कथमात्मनेपदं प्राप्यते, जागराञ्चकारेत्यत्रैव कथं नात्मनेपदम्, अत आह—**सिद्ध इति**। पूर्वोक्तपरिशेषेणेत्यर्थः। विवक्षितमतिशयमाह—**तेनेति**। 'उच्यमानेऽपि' इत्यनेन भाष्येण [16]'आम्प्रत्ययवत्' इति सूत्रं [17]विनात्मनेपदं न सिध्यतीत्युक्तम्। तत्र हेतुमाह—**परस्मैपदेनेति**। प्रत्याहारग्रहणे ज्ञापकमाह—**एतच्चेति**। प्रत्याहारग्रहणमित्यर्थः। **अत्र** धातुग्रहणे। [18]तत्र कृञ्ग्रहणं विनापि कृञ एवात्मनेपदसिद्धेस्तत्र तद्-

---

[1] व्यवस्थापितत्वेनेति युक्तम्।
[2] पा. सू. ७.३.८४.
[3] लाघवाय वक्तव्यमित्यर्थः — घ.
[4] एवकारो नास्ति — ङ.
[5] अत्राश्रूयमाणत्वात् — घ.
[6] पा. सू. १.१.६२.
[7] इत्यस्य प्राप्तेः — ङ.
[8] 'पुरुषः' इति नास्ति — अ.
[9] धात्वर्थविशेषणमात्रम् — अ.
[10] तथाप्यभ्युपेत्योक्तिः — अ.
[11] शक्य इति भावः — ऋ, लृ.
[12] कृत्प्रयोगे — अ, ऋ.
[13] कृञ्चेति — अ, ऋ, लृ.
[14] 'तदर्थाभिधानाय' इत्यस्यानन्तरम् 'ननु' इत्येव 'अ, ऋ, लृ' कोशेषु दृश्यते। तत्र 'साधनाद्यर्थाभिधानाय' इति स्यादिति भाति।
[15] नन्वेवं कथम् — अ.
[16] पा. सू. १.३.६३.
[17] 'विना' इत्यस्यानन्तरम् अपिशब्दोऽधिकः—अ.
[18] 'तत्र' इति नास्ति — ऋ.

ग्रहणमत्र प्रत्याहारग्रहणज्ञापकमित्यर्थः। ननु संपद्यकर्तरि संपदोऽपि प्रत्याहारेण संग्रहात् तस्याप्यनुप्रयोगः स्यात्, अत आह — **संपद इति**। भिन्नार्थत्वेनामन्तसंबन्धिसाधनाद्यप्रत्यायक[1]शब्दत्वादित्यर्थः। ननु विद्यतेरस्तिसमानार्थत्वात् तन्निवृत्त्यर्थं सूत्रं स्यात्, अत आह — **विद्यतीति**। **न्यायेति**। एकार्थयोः प्रयोगाभावो [2]**न्यायः**। अनुप्रयोगासंभवादपि सामान्यवाचिनो नामित्याह — **सामान्येति**। न केवलमानुगुण्याभावः, विरोधोऽपीत्याह — **प्रत्युतेति**। **तदर्थं** सामान्यार्थं। एकविशेषपरत्वेन [3]सामान्यार्थत्वबाधादित्यर्थः। ननु वर्तमाने [4]लटि कथं भूतकालप्रतीतिः, भूतकाले च कथं लट्प्रसङ्गः, अत आह — **भूतेति**। **विशेषः** परोक्षानद्यतनत्वरूपः। आमन्तात् कालविशेषः प्रतीयत इत्युक्तमधस्तात्। नन्वामैव भूतकालप्रतीतिरित्युक्तम्, अत आह — **आमन्तेति**। भूतपूर्ववर्तमानतया न विरोधः, अत आह — **न चेति**। पचतीत्यादौ सांप्रतिकवर्तमानत्वसंभवे भूतपूर्वाश्रयणं न युक्तमित्यर्थः। भाष्ये 'एकस्या आकृतेः' इत्यनेनामन्तप्रयोगस्य लिटोपक्रमात् तत्समाप्तिर्लिटैव कार्या, न लडित्युक्तम्। तन्न्यायसिद्धमित्याह — **[वेद] लोकेति**। **खादिरे** खदिरविकारे यूपे। एवं पालाशे। वैकल्पिकाङ्गस्थले येनोपक्रान्तं कर्म तदेव तत्राङ्गम्, नान्यत्। तथा च तस्य नाशे तत्सदृशमेवोपादेयम्, तत्रोपक्रान्ताङ्गावयवानां बहूनां सत्त्वात्, न तु मुख्यान्तरम्, तत्प्रयोग तस्यानङ्गत्वात्, उपक्रान्ताङ्गसदृशत्वाभावाच्चेति [5]'निर्देशात्तु विकल्पे यत् प्रवृत्तम्' इति षष्ठाधिकरणे निर्णीतम्। **खदिरबुद्ध्येति**। तत्र खदिरावयवानां बहूनां सत्त्वेन मुख्यावयवानु[6]ग्रहसंभवादिति भावः। **न त्विति**। तस्मिन् प्रयोगेऽनङ्गत्वात् खदिरासदृशत्वाच्चेत्यर्थः। **साधनभेदेनेति**। खदिरसाधनक्रियायाः पलाश[7]साधनकत्वाभावेनोपक्रान्तक्रिया न निर्व्यूढा स्यादित्यर्थः। **सैव** षष्ठ्येव। **निर्वाह्यते** उत्पाद्यते। सप्तम्युच्चारणे न झटिति स्वामित्वप्रत्यय इत्याह — **अन्यथेति**। तामेवाभिनयति — **अश्वेषु चेति**। प्रत्येकमित्यर्थः। उक्तेऽर्थे भाष्यं योजयति — **तस्मादिति**। तत्र हेतुः — **एवं हीति**। नन्वामन्तेन [8]साध्याप्रतिपादनात् कथमर्थसमाप्तिः, अत आह — [9]**आमन्तेति**। **यावन्तं** कालमाह। वार्तिकोक्तमेव भाष्यकृता योजितमित्याह — **अशिष्यमिति**। **सिद्ध इति**। पूर्वोक्तपरिशेषेणेत्यर्थः। विवक्षित[10]नियमलाभे हेतुमाह — [11]**अनुशब्दस्येति**। पश्चात्त्वं परत्वम्, तच्च साक्षात् संभवे व्यवहितं न गृह्यत इति भावः। आम्प्रत्ययस्यैव पश्चादित्यवधारणमाश्रीयते, व्याख्यानात्। अतो व्यवहितनिवृत्तिः। व्यवधाने शब्दान्तरस्यापि पश्चात् सत्त्वादाम्प्रत्ययस्यैवेत्याहुः॥

इति महाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य
प्रथमपादे तृतीयमाह्निकम्॥

[३, १२१–१२४]

(रत्नप्रकाशः) अनुप्रयोगो वचनमन्तरेणैव भविष्यतीति मत्वा पृच्छति — **किमर्थमिति**। तदा-

---

[1] शब्दादित्यर्थः — अ, ऋ, ल.
[2] न्याय्यः — ऋ, लृ.
[3] सामान्यार्थत्वाभावादित्यर्थः — अ.
[4] लटा कथं — ऋ.
[5] मीमांसासूत्रम् ६.३.२८.
[6] ग्रहासंभवादिति — अ, ऋ; ग्रहात् संभवादिति — लृ.
[7] साधनकल्पाभावेनोप — अ.
[8] साध्यप्रतिपादनात् — अ, ऋ, लृ.
[9] प्रदीपे 'आमन्तं पदम्' इत्यत्र 'आमन्तपदम्' इति पाठोऽन्नंभट्टाभिमतः स्यादिति भाति।
[10] नियमालाभे — अ.
[11] 'अनुशब्दस्येति' इत्यनन्तरं 'नेति' इति प्रतीकोऽधिकः — ऋ.

शयं तन्मुखादवगन्तुमाहान्यः — **अनुप्रयोग इति**। **अव्यक्तपदार्थकमिति**। कर्तृकर्मभावान्यतमस्यैकत्वद्वित्वबहुत्वान्यतमस्य प्रत्यक्त्वपराक्त्वयोरन्यतरस्य चाप्रतीयमानत्वेन। पपाचेत्यादावव्यक्तपदार्थकत्वं न भवतीति [1]भावः। **उत्तरं पठतीति**। वार्तिककार इति शेषः। तथा च 'किमर्थम्' इत्यादि वार्तिकस्यावतारिकेति फलितम्। **अस्तिभूप्रतिषेधार्थमिति**। कृञेवानुप्रयुज्यते न त्वन्य इति नियमात् तयोरनुप्रयोगो वार्यत इति भावः। **आत्मनेपदविध्यर्थं चेति**। अनुप्रयुज्यत इत्यनेनानुगत एव प्रयुज्यते नाननुगत इति नियमान्तराश्रयणात् 'एधाञ्चक्रे' इत्यादावात्मनेपदविशिष्ट एव, 'इन्दाञ्चकार' इत्यादौ परस्मैपदविशिष्ट एव, 'पाचयाञ्चक्रे, पाचयाञ्चकार' इत्यादौ तदन्यतरविशिष्टः प्रयुज्यत इति [2]'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य' इति वचनं न कर्तव्यमिति मन्यते। **उच्यमानेऽप्यस्मिन्निति**। क्रियमाणेऽप्यस्मिन् सूत्र इत्यर्थः। अपिशब्दादक्रियमाणेऽपीत्यर्थः। **अवश्यमिति**। अनुप्रयुज्यत इत्यनेन नियमान्तरस्याप्रतीतेरिति भावः। **प्रत्याहारग्रहणमिति**। एतच्च [3]'आम्प्रत्ययवत्' इति सूत्रेऽन्यव्यावृत्त्यर्थात् कृञ्ग्रहणाज्ज्ञायते। संपदस्तु प्रत्याहारान्तर्गतस्यापि प्रकृत्यर्थानन्वितार्थकत्वेनानुप्रयोगो न भवति। **अर्थाभावादिति**। प्रयोजनाभावादित्यर्थः। **एतदपि नास्ति प्रयोजनमिति**। विद्यतिनिवृत्तिरपि प्रयोजनं न भवति, प्रयुक्तानामेवान्वाख्यानाद् विद्यतेरनुप्रयोगस्यादर्शनादिति मन्यते। **विशेषवाचिन उत्पत्तिरिति**। आम इति शेषः। **लिट्परार्थं वेति**। लिट्पर एवार्थोऽनुप्रयोज्यत्वेन प्रयोजनमस्य तदित्यर्थः। **किंपरस्येति**। लिडन्यपरस्यानुप्रयोगो न प्राप्नोत्येवेति भावः। तत्र युक्तिं ज्ञातुमन्यपरानुप्रयोगमापादयति — **लट्परस्येति**। परिहरति — **न लट्परस्येति**। [4]**भूतानद्यतनपरोक्षकालो विशेषित इति**। यद्यप्यामन्तार्थोऽनुप्रयुज्यमानार्थस्य विशेषणं भवति, तथापि [5]विशेष्येणापि विशेषणं [6]विशेषेऽवस्थाप्यत इत्येतदभिप्रायेणैवमुक्तम्। एतेन 'भूतविशेषस्यामन्तेन प्रतिपादनाद् भूतस्यापि भूतपूर्वां वर्तमानतामाश्रित्य लट्प्रयोगः स्यात्' इति युक्त्याभासो निराकृतः, तादृशकल्पनायां मानाभावात्। **एकस्या आकृतेश्चरितः प्रयोग इति**। एकाकृतिसंबन्धित्वेन कृतः प्रयोग इत्यर्थः। तथा चामन्तं लिट्परं प्रयुक्तमिति तदन्तादनुप्रयुज्यमानमपि लिट्परमेव प्रयोक्तुमुचितमिति भावः। तत्र दृष्टान्तमाह — **तद्यथेति**। आचार्यदेशीय आह — **अर्थसमाप्तेर्वेति**। तन्निराकरोत्यन्यः — **एतदपीति**। भगवानाह — **विपर्यासनिवृत्त्यर्थमिति**। पूर्वं लिडन्तकृञादिप्रयोगः पश्चादामन्तप्रयोगो मा भूदित्येवमर्थमित्यर्थः। **व्यवहितनिवृत्त्यर्थं चेति**। एतेन [7]'तं पातयां प्रथममास पपात पश्चात्' इत्यादिव्यवहितप्रयोगोऽसाधुरिति स्पष्टमेव॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥

[३, १२१–१२४]

(नारायणीयम्) पूर्वपक्षं संगृह्य दर्शयन्न तावत् 'अनुप्रयुज्यते' इत्यंशो विधातव्य इत्याह — **अन्तरेणापीति**। 'लिट्परः' इत्ययमपि न विधेय इत्याह — **कालसाधनेति**। एतदेवोपपादयति

---

[1] पूर्वोक्तार्थस्य प्रतीयमानत्वादिति भावः।
[2] पा. सू. १.३.६३.
[3] पा. सू. १.३.६३.
[4] विशिष्टार्थानुकरणमिदम्।
[5] 'विशेष्येणापि' इति नास्ति — ब.
[6] विशेष्ये — प, ब.
[7] रघुवंशे. सर्ग. ९.६१.

—**आमन्ताद्धीति**। भूतानद्यतनपरोक्षविशिष्टः क्रियारूपोऽर्थ आमन्तात् प्रतीयते, न तु कर्त्रादिसाधनं संख्याविशेषः पुरुषविशेषो वा [१]प्रत्यक्तापराग्भावादिस्तस्मादवगम्यते। अतस्तदवगमाच्च लिट्परो धातुरनुप्रयोक्तव्य इत्यर्थः। इदं तर्हि प्रयोजनं कृञ एवानुप्रयोगो यथा स्यात्, धात्वन्तरस्य मा भूदित्याशङ्क्य समानार्थस्य वानुप्रयोगो भिन्नार्थस्य वेति विकल्प्य क्रमेण दूषयति—**तत्र समानार्थस्येति**। ततश्च [२]पारिशेष्यात् कृभ्वस्तीनामेवानुप्रयोगः सिद्ध इत्याह—**कृञ् तु सामान्यवचन इति**। कृभ्वस्तय एव सामान्यवचनाः, तत्र विशेषवचनेभ्य आम्विधाने 'वृक्षः शिंशपा' इत्यादिवत् सामान्यवचनस्यानुप्रयोगे सत्यामन्तस्यानर्थक्यं न भवति। आमन्तार्थगतविशेषाभिधानादर्थाभिधान आनुगुण्यमिति कृञ एवानुप्रयोगः सामर्थ्यात् सिद्ध इति कृत्स्नं सूत्रमनर्थकमिति पूर्वः पक्षः। **पूर्वोक्तानामिति**। कस्यचिदर्थविशेषस्य प्रकरणादिवशादवगतिः स्यात्, न तु बहूनामर्थानामित्यर्थः। कथं पुनः कृञोऽनुप्रयोगविधानेन भ्वस्त्योः प्रतिषेधः शक्यो विज्ञातुमित्यत्राह—**करोतेरेवेति**। 'सिद्धे सत्यारम्भो नियमार्थः' इति [३]न्यायान्नियमार्थमिदमित्यर्थः। आत्मनेपदार्थत्वमुपपादयति—**सिद्धे कृञ इति**। नन्वात्मनेपदार्थे लक्षणान्तरे विद्यमाने किमर्थमनेन तत्सिद्धिराश्रीयत इत्याशङ्क्य तदकरणलक्षणं लाघवं भवतीत्याह—**आम्प्रत्ययवदिति**। आत्मनेपदविधानस्यावश्यकर्तव्यत्वमुपपादयति—**परस्मैपदेनापीति**। प्रत्याहारग्रहणे प्रमाणमाह—**एतच्चाम्प्रत्ययवदिति**। यद्यत्र सूत्रे स्वरूपग्रहणं स्यात् तदान्यस्यानुप्रयुज्यमानस्याभावात् [४]'आम्प्रत्ययवत्' इत्यत्र भ्वस्तिनिवृत्त्यर्थं कृञ्ग्रहणमनर्थकं स्यात्। कृतं तु प्रत्याहारग्रहणं ज्ञापयतीत्यर्थः। यदि प्रत्याहारग्रहणं संपदोऽपि तत्रान्तर्भावादनुप्रयोगः स्यादित्यत आह—**संपदश्चार्थविरोधादिति**। संपद्यतेरभूतप्रादुर्भावे विशेषे वर्तनात् सामान्यवचनत्वाभावादनुप्रयोगाभाव इत्यर्थः। नन्वसति सूत्रे सत्तार्थस्य विदेः सामान्यवचनत्वादनुप्रयोगः स्यादित्यत आह—**विद्यतिनिवृत्त्यर्थमपीति**। यद्यपि कृभ्वस्तिभ्यः केवलेभ्य आम् न विहितः, तथापि [५]ण्यन्तेभ्यस्तेभ्यस्तद्विधानमस्तीति चेत् तत्राह—**सामान्यवाचिनश्चेति**। कारयांपपाचेत्युक्ते न केवलमामन्तार्थगतसंख्यादिरेव प्रतीयते, किं तर्हि, पाकादिविशेषोऽपीति विशेषवाचिनोऽनुप्रयोगो न भविष्यतीत्यर्थः। नन्वर्थविराधाद्वर्तमानविहितस्य लटोऽनुप्रयोगप्राप्तिः कथमुपपद्यत इत्यत आह—**भूतविशेषस्येति**। चोदकाशयं निराकरोति—**न चेति**। [६]वेदप्रसिद्धमुदाहरति—**खादिरे बध्नातीति**। खादिरादिविकारो यूपः खादिरादिशब्देनोच्यते। [७]**तत्र यदि [कदाचित्] खदिरस्येति**। यदा खादिरेण पशुबन्धनसाधनेनोपक्रान्ता क्रिया तदपहरणादिना खदिरस्य विनाशे मुख्ये पलाशे लभ्यमानेऽपि तत्परित्यागेनालभ्यमानस्य प्रतिनिधिभूतेन तत्सदृशेन कदरादिना क्रिया निर्वाह्यते। कुत इत्याह—**सादृश्यादिति**। खदिरसंबन्धिनां भूयसामवयवानां कदरे संभवात् सादृश्यात् तत्र खदिरबुद्ध्युत्पादात् खदिरेणैव प्रयोगः परिसमापितो भवति। मुख्ये तु पलाश उपादीयमाने तत्र खदिरबुद्ध्यनुत्पादादुपक्रान्तः प्रयोगो न निर्वर्तितः स्यादित्याह—**न तु पलाश इति**। लौकिको न्यायो भाष्य एवोदाहृतः, तं व्युत्पादयति—**लोकेऽपीति**। **षष्ठ्युपक्रम्यत इति**। [८]'स्वामीश्वराधिपति' इति षष्ठीसप्तम्योर्विधानात्। एवमुक्तार्थोपपादकन्यायं प्रदर्श्य भाष्यं व्याचष्टे—**तस्माद्योऽर्थ इति**। अत्र युक्तिमाह—**एवं हीति**। **तत्रैव परिसमाप्त इति**। प्रकरणादिवशाद्विशेषावसायस्य सिद्धत्वा-

---

[१] प्रत्यक्तापरभावादिः — घ; प्रत्यक्षापरभावादिः — ङ.

[२] परिशेषात् — ङ.

[३] न्यायान्नियमार्थमित्यर्थः — घ.

[४] पा. सू. १.३.६३.

[५] ण्यन्तेभ्यस्तद्विधानमस्तीति — ङ.

[६] वेदप्रसिद्धिमुदाहरति — घ.

[७] तत्र यदा खदिरस्येति — घ, ङ.

[८] पा. सू. २.३.३९.

दिति भावः। **भाष्यकार इति**। वार्तिककारेण स्थापितमपि प्रयोजनं भाष्यकारो दूषयतीत्यर्थः। 'इदानीमेव ह्युक्तम्' इत्यनेन वार्तिककारस्याप्यस्मिन् प्रयोजनेऽनाश्वास इति दर्शितमित्याह— **अशिष्यमिति**। व्यवहितविपर्यासनिवृत्तिः कथं सूत्रेण संगृहीता भवेदित्यत्राह— [1]**सिद्धे कृञ्ञ इति। पश्चादेवेति**। एतच्च भाष्ये दर्शितम्— [2]**अन्वेव च कृञ्ञ इत्यादिना**। [3]'तान् ह राजा मदयामेव चकार' इति ब्राह्मणे प्रयोगश्छान्दसत्वात् साधुः, छन्दसि सर्वविधीनां विकल्पाभ्युपगमात्। कथं पुनर्भट्टिकाव्ये प्रयोगः [4]''उक्षां प्रचक्रुर्नगरस्य मार्गान्' [5]''बिभयां प्रचकारासौ' इति। तथा रघुवंशादौ [6]''तं पातयां प्रथममास पपात पश्चात्' इति [7]''प्रभ्रंशयां यो नहुषं चकार' इति। अत्र परिहारो भाष्यकृतान्यत्रोक्तः— [8]''छन्दोवत् कवयः कुर्वन्ति, न ह्येषेष्टिः' इति॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे
तृतीयस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥

---

[1] प्रदीपे 'सिद्धे कृञ्प्रयोगे' इत्यत्र 'सिद्धे कृञः प्रयोगे' इति पाठोऽभिमत इति भाति।

[2] भाष्ये 'अन्वेव चानुप्रयोगः' इत्यत्र 'अन्वेव च कृञोऽनुप्रयोगः' इति पाठो निर्णयसागर-मुद्रिते।

[3] ऐतरेयब्राह्मणम् ६.१.

[4] भट्टिकाव्यम् सर्ग. ३. श्लो. ५. 'उक्षान्' इति निर्णयसागरमुद्रिते दृश्यते।

[5] भट्टिकाव्यम् सर्ग. ६. श्लो. २. 'प्रबिभयां-चकारासौ' इति निर्णयसागरमुद्रिते दृश्यते।

[6] रघुवंशे सर्ग. ९. श्लो: ६१.

[7] रघुवंशे सर्ग. १३. श्लो. ३६.

[8] महाभाष्यम् १.४.३.

तृतीयाध्यायस्य प्रथमपादे चतुर्थमाह्निकम्

चिल लुङि ३.१.४३.

[३, १२५–१३०]

(उद्द्योतनम्) अश्रूयमाणस्यापि क्विबादिवद्विधानं स्यात्, अत आह — **नेति**। तुक्कुत्वादीनि क्विबादिकार्याणि। च्लेरिति षष्ठीनिर्देशेनादेशाः सिजादय इति [1]'चिलरुत्सर्गः' इत्यनुक्तम्, अत आह — **स्थानीति**। तत्रोत्सर्गशब्दो गौण इत्याह — **स हीति**। 'सिजुत्सर्गः' इत्यत्र तु मुख्य उत्सर्ग इत्याह — **सिजिति**। 'च्ल्युत्सर्गः' इति वार्तिके उत्सृज्यत इति कर्मणि घञन्तोत्सर्गशब्दस्य च्लिविशेषणत्वात् पूर्वनिपातः स्यात्, अत आह — **च्लेरिति**। 'अवरतः' इत्यस्यावश्यमित्यर्थमादाय तस्य तात्पर्यमाह — **त्रयाणामिति**। चङ्ङसिचां त्रयाणां धातुभेदेनावश्यकत्वं दर्शयति — **तत्रेति**। घसादिषु मध्य इत्यर्थः। 'आकारान्तत्वात्' इति घसादिमध्यपाठार्थमुक्तम्। [2]'विभाषा धेट्श्व्योः' इति चङ, पक्षे सिच्। 'घसॢ गम्ॢ' अनयोर्ऌदित्त्वादङ, नशेः [3]पुषादित्वात्। **धात्वन्तरेति**। ह्वरवृदहाद्यर्थम्। **अनिट इति**। [4]'शल इगुपधादनिटः क्सः' इत्यत्रेत्यर्थः। [5]धातुविशेषणत्वेऽतिप्रसङ्गात् च्लिविशेषणत्वमेव वाच्यमित्याह — **तथा हीति**। **अन्यत्र** तास्यादौ। तथा सति को दोषः, अत आह — **ततश्चेति**। च्लिविशेषणत्वे नायं दोष इत्याह — **च्लौ त्विति**। ननु लुङि घस्लादेशः, तथा चाङ सिद्धः, किं च्लौ तद्विधानेन, अत आह — [6]**लुङि यदिति**। संबन्धे षष्ठी, आर्धधातुक इत्यधिकारादित्यर्थः। ननु सिचोऽङा बाधः स्यात्, अत आह — [7]**न हीति**। अन्यथा शब्दानित्यत्वप्रसङ्गादिति भावः। शब्दानित्यत्वाङ्गीकारेऽपि दोषमाह — **तथेति**। **आदिरिति**। सिजन्तस्यादिर्वोदात्तः। ननु [8]'लुमति प्रतिषेधे' इत्यनेन स्वरे प्रत्ययलक्षणप्रतिषेधात् कथमयं स्वरः स्यात्, अत आह — **लुमतेति**। [9]'लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम्' इति प्रत्ययलक्षणप्रतिषेधस्य [10]'सर्वामन्त्रितसिज्लुक्स्वरवर्जम्' इति पर्युदस्तत्वादिति भावः। सूत्रे लुङीत्यभावादाह — **लुङीति**। 'च्लि लुङि' इत्यत इत्यर्थः। ननु तदनुबन्धकपरिभाषया तन्मात्रानुबन्धकस्यैव ग्रहणम्, नाधिकानुबन्धकस्येति व्याख्यानाल्लिङलिटोर्ग्रहणं न भविष्यति, अत आह — **तदनुबन्धकेति**। ननु पूर्वसूत्रे च्लेरेव, उत्तरसूत्रे [11]'लिट एवेति व्यवस्था सामान्यग्रहणे कथं सिध्येत्, अत आह — **तत्रेति**। पूर्वसूत्र इत्यर्थः। सिच इत्यनुवृत्त्या तत्प्रकृतेर्लेर्ग्रहणं [12]पूर्वत्र। आमस्तु लकारान्तराभाव इति व्यवस्थासिद्धिरिति भावः।

---

[1] च्ल्युत्सर्गः — ऋ.
[2] पा. सू. ३.१.४९.
[3] अङित्यनुषङ्गः।
[4] पा. सू. ३.१.४५.
[5] धातुविशेषणत्वेनातिप्रसङ्गात् — ऋ.
[6] लुङो यदिति — ऋ.
[7] 'न हीति' इत्यादि 'कथमयं स्वरः स्यादत आह' इत्यन्तं नास्ति — अ.
[8] का. वा. १.१.६३–१. न लुमतेति प्रतिषेध इत्यनेन — ऋ, लृ.
[9] का. वा. १.१.६३–१.
[10] का. वा. १.१.६३–२.
[11] लिटीति व्यवस्था — अ.
[12] 'पूर्वत्र' इति नास्ति — अ, लृ.

भाष्ये **अत्रैव** [1]'गमिजनिभ्यो लेः' इत्यत्रैव। तस्य तात्पर्यमाह — **अन्यथेति**। नन्वितरस्य चत्वारि, 'सिज्लुङि' इति वक्तव्यत्वात्। तथा च 'तान्येव त्रीणि' इत्ययुक्तम्, अत आह — **सिज्लुङीति**। [2]'मन्त्रे' इति सूत्रस्थानि त्रीणीत्युक्तमित्यर्थः। 'यदेतत्' इत्यादिना लाघवान्तरमुच्यत इत्याह — **च्लयुत्सर्गेति**। भाष्ये [3]'यद्येतत्' इत्यादिनेदं[4] लाघवं दूष्यते। तत्र धेटश्चातुश्शब्द्यमुपपादयति — **विभाषेति**। **आदेशेष्विति**। परत्वात् पूर्वमादेशाः, [5]पश्चाल्लुगिति भावः। चङि द्वित्वे आकारलोपे 'अदधत्', सिचो लुकि 'अधात्', अलुकि 'अधासीत्', चङो लुकि प्रत्ययलक्षणेन [6]द्विर्वचने 'अदधात्' इत्यपि स्यादित्युक्तम्। तत्राकारलोपं शङ्कते — **नन्विति**। [7]**अधदिति**। आकारलोपे हल्ङ्यादिलोपे [8]जश्त्वचर्त्वयोः [9]'अधत्' इति रूपम्। चङि 'अदधन्'। सिचो लुकि [10]'आतः' इति जुस्यातो लोपे 'अधुः'। अलुकि 'अधासिषुः' [11]'यमरम' इतीट्सकौ। भाष्ये **अधानित्यपीति**। चङो लुकि प्रत्ययलक्षणाभावे द्विर्वचनातोलोपयोरभावादित्यर्थः। ननु [12]'आतः' इत्यस्य सिज्लुक्यादन्तादेव झेर्जुसिति [13]नियमार्थत्वाच्चङो लुकि कथं तेन जुस्भावः, अत आह — **विध्यर्थमिति**। भाष्ये **सिज्ग्रहणं तत्रानुवर्तत इति**। [14]'आतः' इत्यत्र [15]'सिजभ्यस्त' इत्यतः सिज्ग्रहणमनुवर्तते। तत्रातः परत्वं सिचः परत्वं च युगपन्न संभवतीति सिचो लुकि प्रत्ययलक्षणेन तत्परत्वमिति चङो लुकि जुस्भावो न प्राप्नोतीत्यर्थः। भाष्ये **यदि निवर्तेत इति**। अनुवृत्तौ सिज्लुक्यादन्तादेव झेर्जुसिति नियमात् 'अभूवन्' इति सिध्यति। निवृत्तौ विध्यर्थत्वादत्र [16]'सिजभ्यस्त' इति प्रत्ययलक्षणेन जुस् स्यादित्यर्थः। सिजादेशानन्तरं तस्य लुक्युक्तदोषानतिवृत्तिः, अत आह — **अकृतेष्विति**। **न भविष्यतीति**। सिचो लुकि प्रत्ययलक्षणेन जुस् स्यात्, लेर्लुकि न तत् संभवतीत्यर्थः। [17]**विध्यर्थमिति**। [18]सिचोऽभावे नियमार्थत्वासंभवादित्यर्थः। भाष्ये **मा हि दातामिति**। अडभावाय माङ्प्रयोगः। तस्मिन् सति सिज्लुक्स्वरं विनाप्याद्युदात्तत्वसिद्धेः। [19]'हि च' इति निघातप्रतिषेधाय हिशब्दः। तथा च लेर्लुकि [20]सिज्लुग्भावाद् दकाराकारस्य विकल्पेनोदात्तत्वं न स्यादित्यर्थः। **स्वरसिद्धये** 'मा हि दाताम्' इत्यत्र [21]'आदिः सिचः' इति स्वरसिद्धये। **अनिट इति वचनेति**। च्ल्यभावे धातोरेव तद्विशेषणम्, तत्र परत्वमेव निषेध्यमिति पञ्चम्यर्थे बहुव्रीहिरित्यर्थः। [22]**अस्मिन्विषय इति**। लुङादेशानां सार्वधातुकत्वेनेटः प्राप्त्यभावात् प्रसक्तिपूर्वकत्वान्निषेधस्य विषयप्रश्नो युक्त इत्यर्थः। विशेषोपादानस्य प्रयोजनमाह —

---

[1] पा. सू. २.४.८०.

[2] पा. सू. २.४.८०.

[3] भाष्ये 'यदि लेरित्युच्यते' इत्यत्र 'यद्येतल्लेरित्युच्यते' इति पाठोऽभिमत इति भाति।

[4] 'इदम्' इति नास्ति — अ.

[5] पश्चाल्लुङिति — अ.

[6] द्विर्वचनेन — ऋ.

[7] अदधदिति — ऋ; अददिति — लृ.

[8] भष्भावस्याप्युपलक्षणं बोध्यम्।

[9] अददिति — ऋ, लृ.

[10] पा. सू. ३.४.११०.

[11] पा. सू. ७.२.७३.

[12] पा. सू. ३.४.११०.

[13] 'नियमार्थत्वात्' इत्यादि 'आदन्तादेव झेर्जुसिति' इत्यन्तं नास्ति — अ.

[14] पा. सू. ३.४.११०.

[15] पा. सू. ३.४.१०९.

[16] पा. सू. ३.४.१०९.

[17] 'विध्यर्थमिति' इत्यादि 'नियमार्थत्वासंभवादित्यर्थः' इत्यन्तं नास्ति — अ.

[18] सिचोऽभावेन नियमा — ऋ.

[19] पा. सू. ८.१.३४.

[20] सिज्लुगभावादाकारस्य — लृ.

[21] पा. सू. ६.१.१८७.

[22] तस्मिन्विषय इति — अ.

यदीति। **ऊदिद्भ्यश्च इति**। तेषामपि [1]पाक्षिकत्वेनानिट्त्वाभावात् क्सोऽपि न स्यादित्यर्थः। निष्ठाया [2]आश्रयणे को दोषः, अत आह — [3]**तदाश्रयणे चेति**। **गुहादिभ्य इति**। [4]'ग्रस्य विभाषा' इति निष्ठाया नित्यानिट्त्वात् तेषामित्यर्थः। 'भूयिष्ठाः' इत्युक्तमतिशयमाह — **इष्विति**। 'इषु इच्छायाम्, रुष रिष हिंसायाम्, शिष्लृ विशेषणे, पुष पुष्टौ'। आद्यत्रयस्य [5]'तीषसह' इति वेट्त्वान्निष्ठायां नित्यानिट्त्वम्। चतुर्थस्य लृदित्वात् पुषेः पुषादित्वाच्चाङे- वेष्यते। निष्ठायामनिट्त्वेन [6]पर्यायेण क्सोऽपि स्यादित्यापाद्यते। भाष्ये [7]**सर्वेऽपि शलन्ता इति**। क्रादिनियमादिति भावः। नन्वेवमार्धधातुकसामान्येऽनिटो नित्यः क्स इष्यत एव। ऊदिद्भ्योऽपि नित्यः क्सः स्यात्, पाक्षिकानिट्त्वेन न स्याद्वा, अत आह — **गुहादय इति**। सिज्व्यावृत्त्यर्थमाह — **अङ्गप्रत्ययगतमिति**। च्लिप्रत्याख्यानेऽङः स्वतन्त्रप्रत्ययत्वद्योतनाय प्रत्ययग्रहणम्। [8]'षिद्भिदा- द्यङ्प्रत्ययग्रहणशङ्कां वारयति — **लुङ्विशेषितमिति**। [9]'लुङ्सनोर्घस्लृ' [10]इत्युक्तेरित्यर्थः। च्लि- प्रत्याख्यानेऽनिष्टमाशङ्कते — **यदीति**। **क्वचित्** यदादियोगस्थले, तत्र निघातप्रतिषेधात्। **क्व- चित्** यदाद्यभावस्थले। **यत्र त्विति**। माङ्चटा वियोगस्थले। **प्रत्ययस्वरश्चेति**। [11]'आदिः सिचः' इति स्वरेष्टौ नानुपपत्तिरित्यर्थः। ननु च्लेः सिजादेशे इट्सहितस्य सिचः स्थानिवत्त्वेन चित्त्वादिट आगमानुदात्तत्वं बाधित्वा चित्स्वर उदात्तः सिध्यतीति तदर्थं चकारानुबन्धकच्लिः कर्तव्यः, अत आह — **मा हि लावीदित्यादाविति**। **तदर्थः** आगमानुदात्तत्वबाधार्थः। [12]**अनुबन्ध** चकाररूपेत्यादिः। न चैवं [13]'मन्त्रे घस' इत्यत्र सिजादीनां ग्रहणेऽपि [14]'आमः' इत्यत्र लेरिति वक्त- व्यं स्यादिति वाच्यम्, आमः परस्य प्रत्ययमात्रस्य लुक्संभवादिति भावः॥

[३, १२५–१३०]

(**रत्नप्रकाशः**) वार्तिकमवतारयति — **क्वायमित्यादिना**। **च्लेरुत्सर्ग इति**। सिजादिस्थानि- तया धातुमात्राद्विधानं च्लेरुत्सर्गः। **सामान्यग्रहणार्थं इति**। च्लेरादेशानां सिच्चङङाम्। स्थानिधर्मेण लित्वेन सामान्येन ग्रहणम् अर्थः प्रयोजनं यस्य स इत्यर्थः। च्लेरुत्सर्गाभावे किं स्यादित्यत आह — **तत्रेति**। [15]'मन्त्रे घस' इत्यादिसूत्र इत्यर्थः। **अवरत इति**। सिच्चङङां तावदवश्यं ग्रहणं कर्तव्यम्, जनेस्तु [16]'दीपजन' इति तशब्दे परे विहितस्य चिणो मन्त्रे यदि लुग् दृश्यते तदा चतुर्थस्य चिणोऽपि ग्रहणं कर्तव्यं स्यादिति भावः। **चङङोः सिचश्चेति**। धयतेराकारान्तत्वात् ततः परयोश्चङ्सिचोः, घस्नश्गमिभ्यः परस्याङः, अन्येभ्यः परस्य सिचो लुगर्थमिति शेषः। **क्स- विधान इति**। अनिट इत्येतत् च्लेर्विशेषणं यथा स्यादित्येवमर्थमित्यर्थः। यदि तेन धातुर्वि-

---

[1] इटः पाक्षिकत्वेनेत्यर्थः।
[2] अनाश्रयणे — अ, ऋ, लृ.
[3] प्रदीपे 'तदाश्रये च' इत्यत्र 'तदाश्रयणे च' इत्यन्नंभट्टाभिमतः पाठ इति भाति।
[4] पा. सू. ७.२.१५.
[5] पा. सू. ७.२.४८.
[6] पर्यायेणोक्तोऽपि — अ.
[7] भाष्ये 'सर्वे हि शलन्ताः' इत्यत्र 'सर्वेऽपि शलन्ताः' इत्यन्नंभट्टाभिमतः पाठ इति भाति।
[8] षिद्भिदादिभ्योऽङ्प्रत्यय — अ.
[9] पा. सू. २.४.३७.
[10] इत्युक्तेऽपीत्यर्थः — अ.
[11] पा. सू. ६.१.१८७.
[12] अनुबन्धः — अ, लृ; अनुबन्धकः — लृ.
[13] पा. सू. २.४.८०.
[14] पा. सू. २.४.८१.
[15] पा. सू. २.४.८०
[16] पा. सू. ३.१.६१.

शेष्यते तदा 'गुहू संवरणे' इत्यस्योदितो वैकल्पिकेट्त्वेन पाक्षिकमनिट्त्वं निमित्तीकृत्य नित्यं क्से सति 'अघुक्षत्' इत्येकमेव रूपं स्यात्, 'अगूहीत्' इति रूपान्तरं न स्यात्। **घस्लृभावे चेति**। [1]'लुङ्सनोर्घस्लृ' इत्यत्रार्धधातुक इत्यनुवर्तनात् लुङि यदार्धधातुकं तस्मिन् परतोऽदेर्घस्लादेश इत्यर्थापत्त्या सिचि घस्लादेशे सति प्रवृत्तस्योत्सर्गस्यापवादेन निवृत्त्यसंभवात् सिचः श्रवणं स्यात्। च्लेरुत्सर्गत्वे तु तस्मिन् परतो घस्लादेशे सति तस्याङि सिध्यतीष्टमिति भावः। **लुङीत्युच्यत इति**। अत्रेति शेषः। तथा चोत्तरसूत्रे तस्यानुवर्तनान्नोक्तातिव्याप्तिरिति भावः। **आम इति चेति**। तत्र लेरित्यनुवृत्त्या लिटो लुक् सिध्यतीति भावः। **अत्रैवेति**। आम इत्यत्रैवेत्यर्थः। तथा चामः परस्येकारमात्रानुबन्धकस्य लेरसंभवेनायुक्तार्थकं तत् सूत्रं स्यादिति मन्यते। वस्तुतस्तु लेरिति तत्र नानुवर्तनीयमेव। लिटोऽन्यस्य ततोऽसंभवात्। न च 'पचतितरामियती' इत्यादावन्यस्य संभव इति वाच्यम्, [2]अननुबन्धकग्रहणपरिभाषयोकारानुबन्धकस्यामस्तत्राग्रहणात्। तदेवं च्लेरुत्सर्गमाश्रयतः सूत्रकृत आशयं वर्णयित्वेदानीं च्लेरुत्सर्गानाश्रयणे यद् गौरवमापादितं तन्निराकरोति — **यत्तावदुच्यत इति**। **तान्येवेति**। येभ्योऽन्यानि तानि, तेभ्य एतान्यप्यन्यानीति [3]सामान्येन 'तानि' इति निर्देशः। अन्यथा [4]'मन्त्रे घस' इति सूत्रे कर्तव्यानां सिच्चङङां च्लिच्लेर्लेरित्येषां चाभेदाभावेनायुक्तो निर्देशः स्यात्। च्ल्युत्सर्गवाद्याह — **यदेतल्लेरिति**। **परार्थं भविष्यतीति**। परार्थं कृतं [5]'मन्त्रे घस' इति सूत्रेऽनुवर्तिष्यत इति लाघवमिति भावः। इतर आह — [6]**यद्येतदिति**। **धेटश्चातुश्शब्दमिति**। [7]'गातिस्था' इति सूत्रे सिज्ग्रहणे सति [8]'विभाषा धेट्श्व्योः' इति च्लेश्चङि 'अदधत्' इति रूपम् [9]'विभाषा घ्राधेट्शाच्छासः' इति सिज्लुकि 'अधात्' इति, तदभावे सगिटोः सतोः 'अधासीत्' इति त्रीणि रूपाणि भवन्ति। तत्र लिग्रहणे तु तदादेशस्य चङोऽपि सिच इव लुकि [10]'सन्यङोः' इति सन्यङन्तस्येव चङन्तस्य [11]'चङि' इति द्वित्वे 'अदधात्' इति चतुर्थमनिष्टं रूपं स्यादिति भावः। तत्र [12]'न लुमताङ्गस्य' इति निषेधादालोपाभावः। [13]'लुका लुप्तं न स्थानिवत्' इति तु [14]'अचः परस्मिन्' इत्यस्य निषेध इति तस्यात्रोपन्यसनमयुक्तमेव। परिहरति — **न चङो लुकि द्विर्वचनमिति**। [15]'सन्यङोः' इत्यस्य षष्ठ्यन्तत्वेन तदन्तस्य द्वित्वेऽपि चङीति सत्सप्तमीनिर्देशेन तस्मिन् परत एव पूर्वस्य द्वित्वमिति तत्सूत्रार्थ आश्रयणीयः। तथा च तत्र चङो लुकि [16]'न लुमताङ्गस्य' इति निषेधाद् द्विर्वचनं न भवतीति भावः। **आत इतीति**। विध्यर्थं तत्सूत्रं भविष्यतीति मन्यते। तन्नियमार्थमेवाश्रयितुं युक्तमित्याशयेनाह — **न सिध्यतीति**। **सिजपवाद इति**। तथा च 'अभूवन्' इत्यत्र जुसः प्रसक्त्यभावात् [17]'आतः' इति सूत्रं विध्यर्थमेवाश्रयणीयमिति भावः। **एष स्वर इति**। आद्युदात्त-

---

[1] पा. सू. २.४.३७.
[2] परिभाषा ८२.
[3] साम्येन — प.
[4] पा. सू. २.४.८०.
[5] पा. सू. २.४.८०.
[6] भाष्ये 'यदि लेरित्युच्यते' इत्यत्र 'यद्येतल्लेरित्युच्यते' इति पाठोऽभिमत इति भाति॥ यदेतदिति — प.
[7] पा. सू. २.४.७७.
[8] पा. सू. ३.१.४९.
[9] पा. सू. २.४.७८.
[10] पा. सू. ६.१.९.
[11] पा. सू. ६.१.११.
[12] पा. सू. १.१.६३.
[13] महाभाष्यम् १.१.५८.
[14] पा. सू. १.१.५७.
[15] पा. सू. ६.१.९.
[16] पा. सू. १.१.६३.
[17] पा. सू. ३.४.११०.

त्वमित्यर्थः। **तस्मादिति**। [1]'असति संभवे' इति न्यायेनापवादत्वाभावात् सिचि सत्येव तस्य लुगवश्याश्रयणीयः स्वरार्थ इति भावः। तदेवं च्ल्युत्सर्गाभावपक्षे गौरवं परिहृत्य दोषान्तरं परिहर्तुमाह — **यदपीति**। **अनिमित्तं वेति**। निमित्तनिमित्तिभावलक्षणं संबन्धमाश्रित्य 'न विद्यते इट् यस्य' इति बहुव्रीहिर्धातावपि युज्यत इति भावः। तस्य संबन्धस्य षष्ठ्यर्थत्वाभावेऽपि तत्र बहुव्रीहिर्युज्यत इत्याह — **न वेति**। **क्व योऽनिडिति**। लुङ आर्धधातुकत्वाभावेनेडसंभवादन्यत्र दृष्टमनिट्त्वमुपलक्षणतयावश्याश्रयणीयमिति कुत्र दृष्टं तत् [2]तथाश्रयणीयमिति भावः। **किं चात इति**। कुत्र दृष्टे तस्मिंस्तथाश्रीयमाणे किं स्यादिति भावः। इतर आह — **निष्ठायामिति**। तथापि 'अगूहीत्' इति रूपान्तरं न सिध्यतीति दूषणमस्त्येवेति मनसि निधायातिप्रसङ्गोऽप्यत्र दोष इत्याह — **भूयिष्ठेभ्य इति**। इषुरिषुरुषुश्रिषुप्रुषुप्रभृतिभ्य इति भावः। प्रकृतसूत्रप्रत्याख्यानवाद्याह — **किं पुनः कारणमिति**। **विशेषयोरिति**। निष्ठाल्लिङ्पयोरित्यर्थः। दृष्टेनानिट्त्वेनेति शेषः। [3]**विशेषयिष्यसीति**। धातुमुपलक्षयसीत्यर्थः। **विधिप्रतिषेधाविति**। तत्र दृष्टेनेति शेषः। तेनैवोपलक्षयितुमुचितमिति भावः। अस्मिन् पक्षे 'अगूहीत्' इत्यादि रूपान्तरं न सिध्यत्येवेति कर्तव्यमेव प्रकृतसूत्रमिति स्पष्टमेव सुधियाम्। यत्तु 'गुहादयो विकल्पितेट इटो भावाभावाभ्यां भिद्यन्ते' इति। तत् तुच्छम्, ताभ्यां तद्भेदे मानाभावात्। **आर्धधातुकसामान्य इति**। आर्धधातुकविषय इति भावः। एतेन 'अङ्गप्रत्ययगतमार्धधातुकसामान्यं लुङ्विशेषितमाश्रयिष्यत इत्यर्थः' इति निरस्तम्। सामान्येन सह पौर्वापर्यस्यासंभवेन तत्पक्षस्य प्रागेव दूषितत्वात्। यदप्युक्तम् "यदि तर्हि च्लिः प्रत्याख्यायते तदा [4]'मन्त्रे घस' इति सिचो लुकि [5]'आदिः सिचोऽन्यतरस्याम्' इति स्वरः प्राप्नोति। नैष दोषः, तत्र हि छन्दसि क्वचिदडाटोरुदात्तत्वेन भाव्यम्, क्वचित् तिङ्निघातेन। यत्र त्वडाटोस्तिङ्निघातस्य च प्रतिषेधः प्रत्ययस्वरश्चेष्यते स विषयश्छन्दसि नास्ति। एतच्च भाष्यकारेण च्लेः प्रत्याख्यानाद्विज्ञायते" इति। तदपि न, च्लेरित्युक्तेऽपि सिजादीनामेव लुगिति प्रागेव व्यवस्थापितत्वेन शङ्काया मन्दत्वात्। अत एव विषयाभावकल्पनेन समाधानस्याप्ययुक्तत्वात्। भाष्यकारैश्च्लिग्रहणं प्रत्याख्यातमेवेत्यत्र मानाभावाच्च॥

[३, १२५–१३०]

(नारायणीयम्) द्विविधं [6]हृयुपदेशे प्रयोजनम् — [7]प्रयोगे श्रूयमाणत्वं तावत्, क्वचित्त्वश्रवणेऽपि कार्यान्तरप्रापणम्। अस्य तूभयं न संभवतीति प्रश्नाभिप्रायमाह — **आदेशैरिति**। ननु च्लेरिति षष्ठीनिर्दिष्टस्य विधानात् सिजादयश्च्लेरादेशा एव नापवादा इति 'च्लिरुत्सर्गः' इत्ययुक्तमित्यत आह — **स्थानीति**। उत्सृज्यते आदेशेन त्यज्यत इति कर्मव्युत्पत्त्या यौगिक उत्सर्गशब्दः स्थानिवचन इह गृह्यते, न तु सामान्यविधौ रूढ इत्यर्थः। सिजुत्सर्ग इत्यत्र तु रूढिर्न परित्यज्यते, कारणाभावादित्याह — **सिजुत्सर्ग इत्यत्र त्विति**। 'च्लयुत्सर्गः' इत्यत्र स्थानिवचनेनोत्सर्गशब्देन विशेषणसमासे उत्सर्गशब्दस्य विशेषणत्वात् पूर्वनिपातः स्यादित्यत आह — **च्लेरुत्सर्ग इति**। अत्र

---

[1] महाभाष्यम् ६.१.२.
[2] तत् तत्राश्रयणीयमिति — प.
[3] भाष्ये 'विशेषयिष्यते' इत्यस्य स्थाने 'विशेषयिष्यसि' इति चौखाम्बामुद्रिते पाठः।
[4] पा. सू. २.४.८०.
[5] पा. सू. ६.१.१८७.
[6] हृयुपदेशप्रयोजनम् — ङ.
[7] प्रयोगश्रूयमाणत्वं — ङ.

भावे घञ्, न कर्मणि, अतः षष्ठीसमास इत्यर्थः। उत्सर्जनं च सामान्येन विधानमित्याह — **धातुमात्राद्विधानमिति**। 'अवरतः' इत्यनेन यद्यपि चतुर्थस्यापि यथाकथंचिद् ग्रहणं संभवति, तथापि त्रयाणां ग्रहणस्य निस्संदिग्धत्वादवश्यकर्तव्यतेति सूचितम्। तद्दर्शयति — **त्रयाणां तावदिति**। **तत्र धयतेरिति**। आकारान्तेषु धेटोऽन्तर्भावात् तस्य च [१]"विभाषा धेट्श्व्योः' इति चङ्विधानात् तदर्थं चङ्ग्रहणमित्यर्थः। **घस्लृनशगम्यर्थमिति**। घसेर्गमेश्च लृदित्त्वान्नशेश्च पुषादित्वादङ्। अनिड्वचनेऽनिटं प्रति च्लेर्विशेष्यत्वेन संप्रत्ययो यथा स्यादिति वार्तिकयोजनां दर्शयति — **अनिट इत्येतदिति**। असति च्लिविधाने कस्यानिड्ग्रहणं विशेषणं [२]स्यादित्यत आह — **यद्यनिड्ग्रहणेनेति**। कुतः पुनर्विषयान्तरगतमनिट्त्वमाश्रीयत इत्यत्राह — **लुङादेशानामिति**। ततश्चाव्यभिचारादविशेषणमित्यर्थः। **विकल्पितेनेति**। ऊदित्त्वात् [३]स्वरत्यादिसूत्रेणेड् विकल्पितः। **अगूहीदिति**। अत्र [४]'ह्यचन्तक्षण' इति वृद्धिप्रतिषेधाद् गुणे कृते [५]'ऊदुपधायाः' इत्यूत्वम्। नन्वसत्यपि च्लौ लुङ्येव घस्लृभावोऽस्तु, ततः सिजपवादोऽङ सिध्यतीत्यत आह — **लुङि यदार्धधातुकमिति**। ननु सत्येव सिचि घस्लृभावेऽपवादस्य निमित्तसद्भावादङा सिज् बाधिष्यत इत्यत्राह — **न हि प्रवृत्तस्येति**। [६]'अप्राप्त्यनुमानं बाधा' इति हि सिद्धान्तः स्थितः। एतत् प्रयोजनान्तरस्याप्युपलक्षणमित्याह — **तथा मन्त्रे घसेति**। **प्रत्ययलक्षणेनेति**। तथा च [७]'लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम्' इति प्रत्ययलक्षणप्रतिषेधस्य [८]'सर्वामन्त्रितसिज्लुक्स्वरवर्जम्' इति पर्युदासः कृतो वार्तिककृतेत्याशयः। ननु [९]'च्लेः सिच्' इत्यत्र लुङीत्यश्रवणात् 'लुङीत्युच्यते' इत्ययुक्तमित्याशङ्क्य [१०]वचेरत्रानुवृत्तिरर्थ इत्याह — **लुङीत्यनुवर्तत इति**। **तदनुबन्धकग्रहण इति**। स एवानुबन्धो यस्य स तदनुबन्धकः, स चान्यश्च यस्य सोऽतदनुबन्धकः। **प्रकारान्तरेण परिहृतत्वादिति**। न त्वस्य परिहारस्यायुक्तत्वात्। **तत्र सामान्यग्रहण इति**। [११]मन्त्रे घसादिसूत्रे लेरिति सामान्यग्रहणे सति [१२]'आमः' इत्यत्र लिटः संभवात् तस्यैव लुग्विज्ञायत इत्यर्थः। ननु [१३]मन्त्रे घसादिसूत्रेऽस्यैव ग्रहणमिष्यते न लिट इति सामान्यग्रहणाविघातार्थश्चकारस्तत्रानर्थक इत्यत आह — **ततश्चेति**। ननु 'च्लि लुङि' 'च्लेः सिच्' 'लेः' इति पञ्च ग्रहणानि, न तु त्रीणीत्यत आह — **च्लिच्लेरिति**। अस्माभिर्यानि त्रीणि ग्रहणानि कर्तव्यानि तान्येव त्वयापीति 'तान्येव' इत्यस्यार्थमाह — **मन्त्रे घसेत्यत्रेति**। **च्ल्युत्सर्गवादीति**। एवं परेण साम्ये प्रतिपादिते च्ल्युत्सर्गवादी स्वपक्षे लाघवं दर्शयतीत्यर्थः। तदेव लाघवं स्फोरयति — **तदेवेति**। किमादेशेषु कृतेषु लेर्लुक् क्रियते आहोस्वित् [१४]व्यवस्थायामेवेति विकल्प्याद्ये पक्षे दूषणमिदानीमुच्यत इत्याशयेनाह — **लेरादेशेष्विति**। **चङ्निमित्तमिति**। धेटो हि [१५]'विभाषा धेट्श्व्योः' इति चङ विकल्पेन विहितः। तत्र यदा चङ तदा तस्य लुकि कृते प्रत्ययलक्षणेन तन्निमित्तद्विर्वचनं स्यादित्यर्थः। **चङ्लोपस्य स्थानिवद्भावादिति**। [१६]'अचः परस्मिन्' इत्यनेन। **आकारलोपे सतीति**। [१७]'आतो लोप इटि च' इत्यजा-

---

[१] पा. सू. ३.१.४९.
[२] स्यादित्यत्राह — घ.
[३] पा. सू. ७.२.४४.
[४] पा. सू. ७.२.५.
[५] पा. सू. ६.४.८९.
[६] प्रदीपे १.१.३. सूत्रव्याख्यायामुक्तमिदम्।
[७] का. वा. १.१.६३–१.
[८] का. वा. १.१.६३–२.
[९] पा. सू. ३.१.४४.
[१०] उच्यत इति निर्दिष्टवच्धातोरित्यर्थः।
[११] पा. सू. २.४.८०.
[१२] पा. सू. २.४.८१.
[१३] पा. सू. २.४.८०.
[१४] च्ल्यवस्थायामेवेति — ङ.
[१५] पा. सू. ३.१.४९.
[१६] पा. सू. १.१.५७.
[१७] पा. सू. ६.४.६४.

दावार्धधातुके ङिति विधीयमाने लोपे हल्ङ्यादिलोपे च [1]'अधत्' इति प्राप्नोतीत्यर्थः। ननु स्थानिवद्भावाभावेऽपि प्रत्ययलक्षणेनातो लोपः स्यादित्यत्राह — **न लुमतेति**। **विध्यर्थमिति**। सिज्ग्रहणानुवृत्तिमनाश्रित्याकारान्ताज्झेर्जुस् विधीयत इत्यर्थः। [2]द्वितीये पक्षे दोषप्रदर्शनाय 'एवं तर्हि' इत्यादिभाष्यमित्याह — **अकृतेष्विति**। **जुस् न भविष्यतीति**। [3]लेर्लुकि सति प्रत्ययलक्षणेन सिच उत्तरत्वाभावात्। [4]'तस्मात्' इति स्वरसिद्धिर्हेतुत्वेन परामृश्यत इत्याह — **स्वरसिद्धय इति**। धातोरनिट्त्वानुपपत्तिमुपपादयति — **आर्धधातुकस्य हीति**। **तदेवेति**। न धातुः, तस्येट्संबन्धाभावादनिट्त्वेन विशेषणायोगात्। एतदेवोपपादयति — **मत्वर्थ इति**। **धातोरिटश्चेति**। धातोः परस्यार्धधातुकस्येड्विधानाद् धातोरपीण्निमित्तत्वान्निमित्तनिमित्तिभावे षष्ठ्यर्थे बहुव्रीहिरुपपन्न इत्यर्थः। ननु मत्वर्थे बहुव्रीहिविज्ञानात् कथं पञ्चम्यर्थे बहुव्रीहिः स्यादित्यत्राह — [5]**अनिट इति वचनादिति**। ननु लुङि क्सविधानात् तत्र धातोरनिट्त्वमिति सिध्यति, किं प्रश्नेनेत्यत्राह — **तत्रास्मिन्विषय इति**। लुङादेशानां सार्वधातुकत्वात्। प्रत्ययविशेषगतस्यानिट्त्वस्याश्रयणे हेतुमाह — **यद्यार्धधातुकेति**। **गुहादिभ्य ऊदिद्भ्यो न स्यादिति**। एभ्यः परस्यार्धधातुकस्य गूहितेत्यादौ [6]स्वरत्यादिसूत्रेण विकल्पितस्येटो विद्यमानत्वाद्धातोरनिट्त्वाभावात्। 'भूयिष्ठेभ्यः प्राप्नोति' इत्यादिभाष्यं व्याचष्टे — **तदाश्रये चेति**। **नित्यं क्सः प्रसज्येतेति**। [7]'यस्य विभाषा' इति निष्ठायामनिट्त्वात्। **इषुरिष्विति**। [8]'उदितो वा' इति क्त्वाप्रत्यये विकल्पविधानान्निष्ठायामनिट्त्वात्। नन्वार्धधातुकसामान्यपरिग्रहे दोष उक्त इत्यत्राह — **गुहादय इति**। **लुङ्विशेषितमिति**। लुङि यदार्धधातुकं तस्मिन्विवक्षिते प्रागेव घस्लृभावः, ततोऽङ सिद्धो भवति। **तत्र [हि] च्छन्दसि क्वचिदिति**। [9]यत्राडाटौ भवतस्तत्र [10]'आदिः सिचोऽन्यतरस्याम्' [11]इत्येतं स्वरं बाधित्वा तयोरेवोदात्तत्वं भवति। **क्वचित्तिङ्निघातेनेति**। यत्र तिङ्निघातस्य निमित्तं भवति तत्र स एव भवति। **यत्र त्विति**। माङ्योगेऽडाटोः प्रतिषेधः, यदादियोगे तिङ्निघातश्च प्रतिषिद्धः। ननु बहुशाखे छन्दसि स विषयो नास्तीति कथमवगम्यत इत्यत्राह — **एतच्चेति**। ननु 'मा हि लावीत्' इत्यादाविटोऽनुदात्तत्वं बाधित्वा चित्स्वरो यथा [12]स्यादित्येवमर्थश्च्लिः कर्तव्य इत्यत्राह — **मा हि लावीदित्यादाविति**॥

च्लेः सिच् ३.१.४४.

[३, १३०–१३५]

(उद्द्योतनम्) ननु परस्मैपदेष्विति वर्तमाने कथमग्निरित्यादौ प्रसङ्गः, अत आह — **सौ**

---

[1] प्रदीपे 'अधत्' इत्येवोपलभ्यते। उद्द्योते च 'भष्भावे चेत्यपि बोध्यम्' इत्युक्त्वा 'अधदिति भाव्यमिति पाठः' इत्युक्तम्। अतः 'अधत्' इत्येव युक्तं भाति॥ अददिति — घ, ङ.

[2] द्वितीयपक्षे — ङ.

[3] च्लेर्लुकि — ङ.

[4] 'तस्मात्' इत्यतः प्राक् 'न' इत्यधिकम् — ङ.

[5] प्रदीपे 'अनिट इति वचनसामर्थ्यात्' इत्यत्र 'अनिट इति वचनात्' इति पाठोऽभिमत इति भाति।

[6] पा. सू. ७.२.४४.

[7] पा. सू. ७.२.१५.

[8] पा. सू. ७.२.५६.

[9] तत्राडाटौ — घ.

[10] पा. सू. ६.१.१८७.

[11] इत्येतत्स्वरं — घ.

[12] स्यादित्येवमर्थं च्लिः — ङ.

चेति। **अत्रापि स्यादिति।** तथा केवलपरस्मैपदेऽनिडादावपि स्यादिति ज्ञेयम्। ननु सिस्वौ-विरूपयोः कथमेकेन शब्देन ग्रहणम्, अत आह — **साविति चेति।** सप्तम्येकवचने द्वयोरपि रूपसाम्यात् तन्त्रादिनोभयग्रहणमित्यर्थः। वैरूप्यं परिहरन्नाह —[1]**आगन्तुनेति।** उभयत्र सकार-मात्रं प्रत्ययः, इकारोकारयोरित्त्वादुच्चारणार्थत्वाद्वा। तथा च सकारद्वयस्याप्यागन्तुकेनेकारेण 'सौ' इति निर्देशोपपत्तिरित्यर्थः। **पृथगिति।** समुच्चये 'सिपरस्मैपदयोः' इति निर्देष्टव्यम्, तदभावात्तु परस्मैपदेषु [2]'परेषु यः सः'[3], तस्मिन् वृद्धिरिति फलतीत्यर्थः। शङ्काशयं निराह — **मा हि कार्ष्टामिति।** **भाव्यमिति।** परत्वादिति भावः। 'अर्थवत्' इत्ययुक्तम्, च्लेश्चित्करणसामर्थ्या-देवेटचुदात्तत्वसिद्धेरिति शङ्कां निराकुर्वन् व्याचष्टे — **च्लेरिति।** **सामान्येति।** [4]'गमिजनिभ्यो लेः' इत्यत्र। तथा च सामर्थ्यं नास्तीति भावः। **स्वरं** चित्स्वरम्। अर्थवदित्येतन्निराकरण-शङ्कां वारयति — **सिच इति।** प्रत्ययाद्युदात्तत्वेनैव [5]सिद्धे यासुट उदात्तत्ववचनमागमानुदात्त-त्वस्य ज्ञापकम्। ज्ञापकदेशस्थं ज्ञाप्यमिति [6]चित्स्वरादागमानुदात्तत्वं पूर्वम्। **तत्र** द्वयोरपवादत्वे सति। **एतौ** आगमानुदात्तत्वचित्स्वरौ। आगमानुदात्तत्वस्यापवादत्वाभावे हेतुः — **प्रकृतीति।** इन्द्राणीत्यादौ प्रकृतेरानुगागमः। तत्र प्रत्ययस्वराभावेऽप्यनुदात्तत्वमस्तीति न [7]तस्य तदपवाद-त्वम्। कुण्डिनचः प्रकृत्यादेशस्य चित्स्वरोऽस्ति, न प्रत्ययस्वर इति न [8]सोऽपि तदपवाद इत्यर्थः। नन्वपवादविप्रतिषेधाभावेऽपीटयनुदात्तत्वचित्स्वरयोः प्राप्तौ परत्वाच्चित्स्वरः स्यात्, अत आह — **स्थानिवदिति।** सिचश्चित्त्वाभावे स्थानिवद्भावेन चित्स्वरो वाच्यः। तत्र शास्त्रा-तिदेशे शास्त्रपरत्वं संभवति, कार्यातिदेशे तु तस्य परत्वासंभवाद्विप्रतिषेधोऽपि न संभवतीत्यर्थः। चित्स्वरस्य परत्वाभावे फलितमाह — **आगमेति।** **सर्वः** प्रत्ययस्वरश्चित्स्वरश्च। च्लेश्च-कारस्य सामान्यग्रहणाविघातार्थत्वेनान्यथासिद्धत्वादिति भावः। एवं च्लिप्रत्याख्यानपक्षे सुतरां चित्त्वमावश्यकमिति मन्तव्यम्। भाष्ये **अमंस्त** 'मन ज्ञाने' दिवादिरात्मनेपदी। [9]तथासोर्ङि-त्वान्नलोपप्रसङ्गः। भाष्ये **न वा हन्तेरिति।** सिचः कित्त्वम् [10]'अनुदात्तोपदेश' इत्यनुनासिक-लोपार्थम्। [11]'अनिदिताम्' इत्येव तल्लोपे सिचः कित्त्वं व्यर्थं सत् तदभावं ज्ञापयतीत्यर्थः। कस्मात् परस्मिन्, अत आह — **सिच इति।** भाष्ये **असिद्धत्वादिति।** [12]'असिद्धवदत्राभात्' इत्यनेन। **बाह्येति।** सिचः परसार्वधातुकाश्रयनलोपापेक्षया सिजपेक्षाल्लोपोऽन्तरङ्ग इत्यर्थः। अतो लोपाभावे हेत्वन्तरमाह — **आर्धधातुकेति।** **तथा च** [13]'अतो लोपः' इत्यस्योक्तार्थत्वादेव। हत इत्यादौ [14]'असिद्धवदत्राभात्' इत्यसिद्धत्वम्, आहतेत्यादौ [15]'असिद्धं बहिरङ्गम्' इत्यसिद्धत्वम्, अतो लोपाभावे निमित्तम्। उक्तार्थस्तु लोपाभावे व्यवहारे चानुगतं निमित्तमिति भावः। 'चित्करणम्' इत्यनेन न चकारस्य वैयर्थ्यमुच्यते, किं तु [16]चकारस्येत्त्वं निराक्रियत इत्याह —

---

[1] आगन्तुकेति — अ, ऋ, ल.
[2] 'परेषु' इति नास्ति — अ.
[3] सकार इत्यर्थः।
[4] पा. सू. ३.४.८०.
[5] 'सिद्धे' इति नास्ति — अ.
[6] चित्स्वरानुदात्तत्वं पूर्वमिति। तत्र — अ.
[7] तस्य आगमानुदात्तत्वस्य, तदपवादत्वं-प्रत्यय-स्वरापवादत्वमित्यर्थः।
[8] चित्स्वरोऽपि प्रत्ययस्वरापवाद इत्यर्थः।
[9] तप्रत्ययथासप्रत्यययोरित्यर्थः।
[10] पा. सू. ६.४.३७.
[11] पा. सू. ६.४.२४.
[12] पा. सू. ६.४.२२.
[13] पा. सू. ६.४.४८.
[14] पा. सू. ६.४.२२.
[15] परिभाषा ५०.
[16] चाकारस्येत्त्वं — ऋ.

ततश्चेति। **प्रयोजनेति।** सिचश्चित्त्वेनैव[1] स्वरसिद्धेरुक्तत्वात् प्रयोजनाभावः। [2]'चुटू' [3]इत्यस्यानित्यत्वान्न [4]चस्येत्संज्ञानियम इति भावः। भाष्ये **अन्त्यस्येति।** [5]च्लेश्चकारस्येकारस्य चानित्त्वे च्लेरन्त्यस्येकारस्य सिजादेशः प्राप्नोति, चङङौ च चकारस्य प्राप्नुत इत्यर्थः। उपलक्षणत्वे हेतुः — [6]**चङादय इति।** [7]'आदेः परस्य' इत्यस्यालोन्त्यापवादत्वादित्यर्थः। भाष्ये **लुप्तेति।** निर्दिष्टः सन् [8]'लोपो व्योर्वलि' इति लुप्त इत्यर्थः। ननु 'अन्त्यस्यायं स्थाने भवन्' इत्याद्ययुक्तम्, [9]'आदेः परस्य' इति तदपवादत्वेन सर्वादेशत्वासंभवात्, अत आह — **चिण् भावेति।** भावकर्मवाचिप्रत्ययस्य धात्वव्यभिचारात् तत्र धातोरिति नापेक्ष्यते। भावकर्मवाचिनि तशब्दे परे च्लेश्चिणित्येवातिप्रसङ्गाभावात् [10]'अलोऽन्त्यस्य' इत्येव तत्रोपतिष्ठत इत्यर्थः। ननु [11]'चिण् ते पदः' [12]'दीपादिभ्यो वा' इत्यत्र पञ्चमीनिर्देशे च [13]'आदेः परस्य' इति स्यात्, अत आह — **पदेरिति।** **तस्माद्विहितेति।** पदादिभ्यो विहितो यश्च्लिस्तस्य चिणादेश [14]इत्यर्थे [15]'तस्मात्' इत्यस्यानुपस्थानमित्यर्थः। [16]'यादित्वेन वा' इति सिजपेक्षयोक्तम्। दीपादिभ्यश्च्लेः सिच् आदेः परस्य मा भूत्। यकारोच्चारणसामर्थ्यात् [17]'आदेः परस्य' इति बाध्यते। चिणि यादित्वेन न परिहारः, [18]चकारस्य श्रवणप्रसङ्गात्। **सामान्येति।** [19]'गमिजनिभ्यो लेः' इत्यत्र। स्पृशादेरङभावादाह — **पुषादीति॥**

[३, १३०–१३५]

(रत्नप्रकाशः) अग्निरिति। सौ च परस्मैपदेषु चेति समुच्चयः स्यादिति मन्यते। **न चात्रेति।** लक्ष्यानुसारेण विशेषणविशेष्यभाव एव तयोराश्रीयते, न तु समुच्चय इति भावः। **अनच्कोऽयमिति।** तथा च मा हि कार्ष्टामित्यादौ [20]'आदिः सिचोऽन्यतरस्याम्' इत्याद्युदात्तत्वाभावपक्षे प्रत्ययस्वरेणैव भाव्यमिति भावः। **इटि कृते साच्क इति।** मा हि लावीदित्यादौ। तेन [21]'चितः' इत्यन्तोदात्तत्वं सिध्यतीति भावः। **प्रत्ययाद्युदात्तत्वेनेति।** [22]'ञ्नित्यादिर्नित्यम्' इत्यत्र 'प्रत्ययश्च' इति सूत्रं कर्तव्यमिति मते प्रत्ययसंज्ञासंनियोगं विनापीटि कृते आद्युदात्तत्वं

---

[1] एवकारो नास्ति — अ.

[2] पा. सू. १.३.७.

[3] अस्यानित्यत्वं काशिकायां पृथग्योगकरणात् प्रतिपादितम्।

[4] तस्येत्संज्ञा — अ.

[5] च्लेश्चकारस्यानित्यत्वे — अ, ऋ, लृ.

[6] अङादय इति — अ, ऋ; अजादय इति — लृ.

[7] पा. सू. १.१.५४.

[8] पा. सू. ६.१.६६.

[9] पा. सू. १.१.५४.

[10] पा. सू. १.१.५२.

[11] पा. सू. ३.१.६०.

[12] पा. सू. ३.१.६१. दीपजनेति सूत्रस्यार्थानुवादोऽयम्।

[13] पा. सू. १.१.५४.

[14] इत्यर्थः — अ.

[15] पा. सू. १.१.६७.

[16] प्रदीपे 'तस्माद्विहितविशेषणाश्रयेण परिहर्तव्यम्' इत्यत्र 'तस्माद्विहितविशेषणाश्रयेण यादित्वेन वा परिहर्तव्यम्' इत्यन्नंभट्टाभिमतः पाठ इति भाति।

[17] पा. सू. १.१.५४.

[18] यकारस्य — अ, लृ.

[19] पा. सू. २.४.८०.

[20] पा. सू. ६.१.१८७.

[21] पा. सू. ६.१.१६३.

[22] पा. सू. ६.१.१९७.

भविष्यतीति मन्यते। तथापि न सिध्यतीत्याह — **न सिध्यतीति**। तदेतत् सर्वं चित्करणनिराकरणवार्तिकावतारिका संपन्नेत्याह — **अत उत्तरं पठतीति**। चित्करणं स्थापयति भगवान् — **अर्थवत्त्विति**। **तामपि बाधेतेति**। 'आगमा अविद्यमानवद् भवन्ति प्रत्ययस्वरे कर्तव्ये' इत्येव यासुट उदात्तत्वविधानेन ज्ञाप्यते। फलितार्थकथनं तु 'आगमा अनुदात्ताः' इति। चित्स्वरेऽपि कर्तव्ये इटोऽसिद्धत्वादनुदात्तत्वमेव स्यात्, च्लेश्चकारस्तु सामान्यग्रहणाविघातेन चरितार्थ इति भावः। प्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वविधाने त्वागमानुदात्तत्वम् [1]"अनुदात्तं पदमेकवर्जम्' इत्यनेन सिद्धमिति तद्बाधनाय यासुट उदात्तत्वविधानं सार्थकमेवेति तेन न किंचिज्ज्ञापनीयम्। तथा च स्थानिवद्भावादेव तत्र चित्स्वरः स्यादिति सिचश्चित्त्वं व्यर्थमेव। यत्तु 'प्रत्ययस्वरस्य द्वावपवादौ — आगमानुदात्तत्वं यासुडित्यत्र ज्ञापितं तद्देशम्, चित्स्वरश्च षाष्ठिकः, तत्रापवादविप्रतिषेधात् चित्स्वर एव भविष्यतीति नार्थः सिचश्चित्त्वेन' इति। तन्न, प्रकृत्यागमानामप्यनुदात्तताया इष्टत्वेनागमानुदात्तस्य [2]कुण्डिनजादीनामपि चित्स्वरस्येष्टत्वेन तस्य च प्रत्ययस्वरापवादत्वाभावात्। कुण्डिनजनुदात्त इति वचनाभावाच्च। यत्तु 'स्थानिवद्वित्ययं कार्यातिदेश इति परत्वमपि चित्स्वरश्च नास्ति' इति। तन्न, तेन संज्ञाया एव शास्त्रीयाया अतिदेशात्। यदप्युक्तम् 'आगमानुदात्तत्वेन चाविशेषात् सर्वः स्वरो बाध्यः। तस्मात् तद्बाधनार्थं सिचश्चित्त्वं कर्तव्यमिति स्थितम्' इति। तदपि न, आगमानुदात्तत्वस्य सर्वस्वरबाधकत्वे मानाभावात्। **अमंस्तेति**। अवयवावयवः समुदायावयवोऽपीति न्यायेन सिच इदित्त्वेन तद्घटिताङ्गस्यापीदित्त्वमिति नलोपाभावः। प्रौढिमाश्रित्य ज्ञापकबलेनेदित्त्वं निराकरोति — **न वेति**। **सिच्येव नलोप इति**। [3]"अनुदात्तोपदेश' इत्यादिनेति शेषः। **परस्मिन्निति**। सिचः परं यत् सार्वधातुकं तस्मिन्नित्यर्थः। **असिद्धत्वादिति**। [4]"असिद्धवदत्राभात्' इत्यनेनेति शेषः। **व्याश्रयं चेदमिति**। सिज्निमित्तोऽतो लोपः, सार्वधातुकनिमित्तो नलोप इति तयोर्व्याश्रयत्वम्। यद्यप्यार्धधातुकोपदेशे यदकारान्तं तस्यैवातो लोप इति प्रकृतेऽतो लोपस्य प्रसक्तिरेव नास्ति, तथापि समाधानान्तरमपि संभवतीत्याशयेनाह — **ननु चेति**। ज्ञापकाश्रयेणेदित्त्वप्रत्याख्यानं न चमत्कारकारीत्यस्वरसादाह — **इदिद्वेति**। **स्पृशमृशेति**। आद्येभ्यस्त्रिभ्यः क्से प्राप्ते, अन्याभ्यां पुषाद्यङि प्राप्ते पाक्षिकः सिज्विधीयते। **चित्करणं प्रत्याख्यायत इति**। चकारस्यानुबन्धत्वं प्रत्याख्यायत इत्यर्थः। तथा च चकारः प्रत्ययावयव एवेति नित्येऽन्तरङ्गेऽमागमे सति विहतनिमित्तः क्सो न भवतीति सति सिचीष्टं सिध्यतीत्याद्यानां त्रयाणां ग्रहणं न कर्तव्यमिति भावः। **यद्येवमिति**। च्लेश्चकारस्य प्रत्ययावयवत्वं चेदाश्रीयत इत्यर्थः। **अन्त्यस्येति**। अन्त्यग्रहणमुपलक्षणम्, सिच् अन्त्यस्य स्यात्, चङङौ तु [5]"आदेः परस्य' इत्यादेः स्यातामिति भावः। **चङङोरपीति**। यद्यपि चङश्चकारोऽनेकाल्त्वसंपादक एवेति सर्वादेशत्वं सिध्यति, तथाप्युपायान्तरसंभवात् तस्यापि ग्रहणम्। **चिणः कथमिति**। भावकर्मणोश्चिण् अन्त्यस्य स्यात्, दीपादिभ्यः परस्य त्वादेः स्यादिति मन्यते। **चिणोऽनित्त्वादिति**। चकारस्येति शेषः। तथा चानेकाल्त्वात् सर्वादेशो भविष्यतीति भावः। तदेवं स्पृशादिभ्यस्त्रिभ्यो विना वचनं सिचं साधयित्वा वार्तिककाराशयमाह — **एवं च तत्रेति**। **सप्रयोजनमिति**। सिच एव चित्करणं व्यर्थमिति स्थापितम्, स्थानिवत्त्वेनैव सिच्स्वरसिद्धेः। सामान्यग्रहणाविघातार्थत्वेनापि चकारोऽनुबन्ध एव तत्राश्रयणीय इति भावः। भवतु वा कथंचित् तत्र चकारः

---

[1] पा. सू. ६.१.१५८.
[2] 'कुण्डिनजादीनामपि' इत्यादि 'स्वरापवादत्वाभावात्' इत्यन्तं नास्ति — ब.
[3] पा. सू. ६. ४. ३७.
[4] पा. सू. ६.४.२२.
[5] पा. सू. १.१.५४.

प्रत्ययावयवः, तथापि तेषां ग्रहणं वार्तिके कर्तव्यमेव त्रैशब्द्यसिद्धय इत्याह — **अपि चेति**। तृपिदृप्योर्ग्रहणं सर्वथा कर्तव्यमेवेत्याह — **यस्य खल्विति**॥

[३, १३०–१३५]

(नारायणीयम्) ननु 'सौ परस्मैपदेषु' इति वचनात् कथमग्निरित्यादावतिव्याप्तिः स्यादित्यत्राह — **सौ चेति**। ननु 'सौ' इति सिशब्दस्य ग्रहणे कथमत्र प्राप्तिरित्यत आह — **साविति चेति**। **पृथग्विभक्तीति**। यदि समुच्चयोऽभिमतः स्यादेकयैव विभक्त्या निर्दिश्येत 'सिपरस्मैपदेषु' [1]इति। अन्यथानिर्देशात्तु परस्मैपदेषु परतो यः सकारस्तस्मिन् परतोऽङ्गस्य वृद्धिरिति विज्ञायमाने नातिप्रसङ्ग इत्यर्थः। ननु सिचोऽनच्कत्वादन्तोदात्तत्वेन न भाव्यमिति [2]स्वरार्थत्वमनुपपन्नमित्यत्राह — **चितोऽनच्कत्वेऽपीति**। 'अनच्कोऽयम्' इत्यत्राशयमाविष्करोति — **मा हीति**। ननु स्थानिवद्भावाच्चित्त्वादागमानुदात्तत्वं बाधित्वान्तोदात्तत्वं भविष्यतीत्यत आह — **च्लेश्चित्करणस्येति**। पूर्ववार्तिकोक्तो दोष एतच्छब्देन परामृश्यत इत्याह — **सिच इति**। आगमानुदात्तत्वं प्रत्ययस्वरस्य नापवाद इत्यत्र हेतुमाह — **प्रकृत्यागमानामिति**। चित्स्वरोऽपि तस्य नापवाद इत्यत्र हेतुमाह — **कुण्डिनजादीनामिति**। परत्वाच्चित्स्वर एव भविष्यतीत्येतदप्ययुक्तमित्याह — **स्थानिवदित्ययं चेति**। **अविशेषात् सर्वः स्वर इति**। यथा तेन प्रत्ययस्वरो बाध्यते एवं चित्स्वरोऽपि बाध्येत। **तस्मात्** [3]**तद्बाधनार्थमिति**। आगमानुदात्तत्वबाधनार्थमित्यर्थः। परशब्दार्थमाह — **सिचः परमिति**। **बाह्यसार्वधातुकेति**। अतो लोपस्तु सिजपेक्षत्वादन्तरङ्गः। भाष्योक्तो हेतुर्हल्वन्तरस्याप्युपलक्षणार्थं इत्याह — **आर्धधातुकेति**। **त्रिभ्यः क्से प्राप्त इति**। स्पृश संस्पर्शने, मृश आमर्शने, कृष विलेखने, एभ्यः [4]'शल इगुपधात्' इति क्सः प्राप्तः। **द्वाभ्यामिति**। तृप प्रीणने, दृप हर्षविमोहनयोः, आभ्यामङ प्राप्तः। ननु चित्करणस्य प्रत्याख्याने लकारादित्वाद्विकरणस्य कथमागमः स्यादित्यत आह — **ततश्चेति**। इत्कारस्य प्रत्याख्यानादित्संज्ञाया अभावाच्चकारादित्वाज्झलादित्वादमागमे सतीगुपधत्वाभावात् [5]क्सस्यापवादस्याभावे सिजित्यर्थः। **चङादयो हीति**। चङादिविधौ पञ्चमीनिर्देशात्। ननु च्णिविधौ धातोरित्यनुवर्तनात् [6]'आदेः परस्य' इत्यादेर्भाव्यमिति 'अन्त्यस्यायम्' इत्यनुपपन्नमित्यत्राह — **चिण्भावेति**। [7]'चिण् ते पदः' इत्यादौ पञ्चम्याः श्रुतत्वादस्य परिहारस्यानवतारात् तत्र परिहारान्तरं द्रष्टव्यमिति भाष्यकाराशयं दर्शयति — **पदेर्दीपादिभ्यश्चेति**। [8]'एवं च' इत्याद्युपसंख्यानवादिनो वचनमिति तदाशयं दर्शयति — **सामान्येति**। यच्छब्दार्थमाह — **पुषाद्यङ इति**॥

शल इगुपधादनिटः क्सः ३.१.४५.

[३, १३५–१३६]

(उद्द्योतनम्) नन्विगुपधत्वाभावेन लक्षणस्य किं दूषणमुक्तम्, अत आह — **विशेषणेति**।

---

[1] इत्यनिर्देशात् परस्मैपदेषु — ङ.
[2] परार्थत्वं — घ, ङ.
[3] तद्वर्जनार्थमिति — घ.
[4] पा. सू. ३.१.४५.
[5] कस्यापवादस्याभावे — घ, ङ.
[6] पा. सू. १.१.५४.
[7] पा. सू. ३.१.६०.
[8] एष एव चेत्युपसंख्यान — घ.

दोषम् असंभवलक्षणम्। **विहितेति**। [1]इगुपधाद्विहितो यश्च्लिस्तस्य क्स इत्यर्थः। **लक्ष्येति**। अधुक्षदिति न सिध्येत्, अधोक्षदिति स्यादित्यर्थः। ननु क्सस्य कित्त्वसामर्थ्यात् पूर्वं गुणो न भविष्यतीत्यत आह — **कित्करणमिति**। ननु 'सस्याचि' इत्येवास्तु, किं सककारनिर्देशेन, अत आह — **वत्सा इति**। [2]'वृतॄवदिहनिकमिकषिभ्यः सः' इति सप्रत्ययान्तो वत्सशब्दः। [3]'तितुत्र' इतीडभावः। अजादिप्रत्ययपरत्वार्थं बहुवचनोक्तिः। ननु गुणानन्तरमपि भूतपूर्वगत्या क्सो भविष्यतीति कथमनवकाशत्वम्, अत आह — **भूतेति**। विशेषणार्थत्वं निराह — **न चेति**। **प्रत्ययत्वादिति**। अङ्गाधिकारात् तन्निमित्तप्रत्ययस्यैव ग्रहणौचित्यादित्यर्थः। ननु वत्सा इत्यत्रापि सकारस्य [4]प्रत्ययत्वार्थवत्त्वे स्तः, अत आह — **उणादीनामिति**। क्सस्य विकरणत्वेऽपि लुङर्थद्योतकत्वेनार्थवत्त्वमस्तीति प्रत्ययत्वमनपवादमिति भावः। नन्वनिट इति धातोर्विशेषणमित्युक्तेः 'अनिड्वचनम्' इत्ययुक्तम्, अत आह — **अनिट इति**। च्ल्युत्सर्गपक्षेऽयं [5]विचार इत्यर्थः। **आदिष्टम्** आदेशः, नित्य आदेशः सिज्रूपो यस्येति वार्तिकखण्डार्थः। 'क्सस्य सिजपवादत्वात्' इत्येतद्व्याचष्टे — **लिहिति**। 'तस्य [6]चानिडाश्रयत्वात्' इत्येतद्व्याचष्टे — **क्सेनापीति**। **लकारस्यैवेति**। 'च्लि' इत्यत्र चकारेकारयोरित्त्वाल्लकारमात्रं स्थानि। तस्य [7]'आर्धधातुकस्य' इति प्राप्तस्येटः [8]'एकाचः' इति निषेधादनिट्त्वमस्तीत्यर्थः। वार्तिके 'अनिडाश्रयत्वात्' इत्यत्रानिडिति भावप्रधानमित्याह — **अनिट्त्वमिति**। 'शेषे सिज्विधानम्' इत्येतद्व्याचष्टे — **यत्रेति**॥

[३, १३५–१३६]

(रत्नप्रकाशः) सूत्रस्यासंभवदुक्तिकतामाह — **क्सविधान इति**। समाधत्ते — **न वेति**। **अनिड्वचनमविशेषणमिति**। च्लेरनिट्त्वं विशेषणं न युज्यते, इटं बाधित्वा सिच एव प्रवृत्तेरिति मन्यते। **न वा क्सस्येति**। तथा च च्लेर्यत्रेडागमः प्रसक्तो निषिध्यते तत्र क्सो भवति, यथा 'अलिक्षत्' इत्यादि। यत्र तु तस्य निषेधो नास्ति तत्र स न भवति, यथा 'अकोषीत्' इत्यादीति न कोऽपि दोष इति भावः॥

[३, १३५–१३६]

(नारायणीयम्) पूर्वपक्षसारमाह — **विशेषणेति**। ननु गुणे कृतेऽपि भूतपूर्वगत्याश्रयणान्न[9] लक्षणदोष इति चेन्नेत्याह — **भूतपूर्वेति**। **लक्ष्यासिद्धिरिति**। गुणस्य श्रवणप्रसङ्गात्। नन्वेवं क्सस्य कित्करणमनर्थकं स्यादिति तत्सामर्थ्यादत्र विषये गुणो न भविष्यतीत्यत आह — **कित्करणं त्विति**। ननु भूतपूर्वगत्याश्रयणादनवकाशत्वमसिद्धमित्यत आह — **भूतपूर्वेति**। **प्रत्ययत्वादिति**। [10]'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' इति वचनात्। **अर्थवत्त्वाच्चेति**। [11]'अर्थवद्ग्रहणे नानर्थकस्य' इति। विकरणा हि धातुसार्वधातुकयोरर्थाभिधाने साहायकं गच्छन्तोऽर्थवन्तः। ननु

---

[1] इगुपधाद्यो विहितश्च्लिः — अ.
[2] उणादिसूत्रम् — ३४९.
[3] पा. सू. ७.२.९.
[4] प्रत्ययार्थवत्त्वे — अ.
[5] विकार इत्यर्थः — अ, ऋ, ॡ.
[6] वानिडाश्रयत्वात् — अ.
[7] पा. सू. ७.२.३५.
[8] पा. सू. ७.२.१०.
[9] 'न' इति नास्ति — ङ.
[10] परिभाषा १११.
[11] परिभाषा १४.

[1]"वृतृवदिहनिकमिकषिभ्यः सः' इति वदेरौणादिकः सो विहितः। स च प्रत्ययः, कर्तरि विधानादर्थवांश्चेत्यत आह — **उणादीनामिति**। ननु च्लेः श्रवणाभावादनिट्त्वं सेट्त्वं वा नास्तीति चोदिते किंभूतोऽयं परिहार इत्यत्राह — **अयं भाव इति**। **तन्निषेधादिति**। यत्र लकारस्येट् प्रतिषिद्धस्तत्रानिट्त्वाश्रयः क्सः प्रवर्तते, अन्यत्र त्वप्रवृत्तिरिति विशेषणोपपत्तिरित्यर्थः॥

श्लिष आलिङ्गने ३.१.४६.

[३, १३६–१३८]

(उद्द्योतनम्) नियमेति। आलिङ्गन एव नान्यत्रेति नियमार्थमित्यर्थः। विधिनियमसंभवे विधिरेव युक्तः, अत आह — **इतर इति**। ननु पर्यायेणोभयं भवतु, कथमपवादः, अत आह — **श्लिषेरिति**। नियमानङ्गीकारे दोषान्तरमिति शङ्कां वारयति — **विधीति**। 'सिद्धं तु' इत्यनेन सूत्रस्य नियमार्थत्वमुच्यते, न तु न्यासान्तरमित्याह — **पूर्वेणेति**। तर्हि 'अचिण्विषये' इति किमर्थम्, अत आह — [2]**अचिणिति**। कथमनेन नियमार्थत्वसमर्थनम्, अत आह — **अन्यथेति**। विध्यर्थत्वेऽङ इव चिणोऽपि बाधितत्वेन [3]"अचिण्विषये' इति न वक्तव्यम्, नियमपक्षे चिण्विषयेऽव्यापारात् 'अचिण्विषये' इत्यनेन नियमार्थत्वं समर्थ्यत इत्यर्थः। 'श्लिषोऽनालिङ्गने' इति प्रतिषेधादपि पूर्ववार्तिके नियमोऽभिप्रेत इत्याह — **ततश्चेति**। यद्यपि पूर्ववार्तिके विधिपक्षेऽपि चिणोऽबाधार्थम् 'अचिण्विषये' इति [4]तद्व्यतिरिक्ताङ्विषयप्रदर्शनार्थं युक्तम्, तथाप्युत्तरवार्तिके 'श्लिषोऽनालिङ्गने' इति प्रतिषेधात् पूर्वत्र नियमो निश्चीयते। विधिपक्षे आलिङ्गने क्सेनाङो बाधात् प्रतिषेधवैयर्थ्यात्। नियमपक्षे तु क्सेनाङो बाधाभावात् पक्षेऽङपि स्यादिति प्रतिषेधसार्थक्यमिति भावः। **अन्यथा** उत्तरवाक्ये 'अनालिङ्गने' इति प्रतिषेधाभावे। **विध्यर्थं** विध्यर्थमपि। **एतत्** पूर्ववार्तिकम्। श्लिषः सामान्येन क्सविधौ 'श्लिषु दाहे' इति सेटोऽपि श्लिषः क्सः स्यात्, अत आह — **श्लिष इति**। [5]"निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया 'श्लिष आलिङ्गने' [6]इत्यस्यैव ग्रहणम्, न दाहार्थस्योदित इत्याह — **सानुबन्धकेति**। [7]पदाहवनीयन्यायेन बाधसंभवेऽपि हेत्वन्तरमाह — **तत्रेति**। पूर्वास्वरसात् 'अथवा' इति भाष्यमित्याह — **समुदायेति**। बाध्यविशेषापेक्षायां [8]सा, न तत्सामान्यापेक्षायामित्यर्थः॥

[३, १३६–१३८]

(रत्नप्रकाशः) नियमानुपपत्तिरिति वार्तिकमवतारयति — **किमर्थमित्यादिना**। **कैमर्थक्यादिति**। कोऽर्थो यस्य स किमर्थकः, तस्य भावः कैमर्थक्यम्। यस्यार्थो वचनान्तरेण सिद्ध इति कृत्वा-

---

[1] उणादिसूत्रम् ३४९.

[2] अनेन 'अचिण्विषय इत्यनेन' इति विशिष्टः प्रदीपग्रन्थ इति सूच्यते। पुस्तकेषु तु 'अचिण्विषय इति।' इति प्रतीकतया मुद्रणं दृश्यते।

[3] चिण्विषय इति वक्तव्यम् — अ, ऋ, लृ.

[4] चिण्व्यतिरिक्तेत्यर्थः।

[5] परिभाषा ८२.

[6] इति धातोरेवेत्यर्थः।

[7] 'यदाहवनीये जुहोति' इति सामान्यतो होमाधारत्वेनाहवनीयस्य विधानेऽपि 'पदे जुहोति' इति विशेषविहितेन पदेनाहवनीयस्य यथा बाधः, तथेत्यर्थः।

[8] पुरस्तादपवादपरिभाषेत्यर्थः।

नर्थक्यं प्रसक्तं स नियमार्थो भवति नान्य इति भावः। विध्यर्थत्वे दोषान्तरमाह — **यथैवेति**। वचनान्तराश्रयेणोक्तदोषपरिहारः संभवतीत्याह — **सिद्धं त्विति**। **अचिण्विषय इति**। तथा च चिण्बाधकत्वं न प्रसक्तमिति भावः। **अङ्विधाने चेति**। तथा च क्सविधिः स नियमार्थः संपन्न इति भावः। **श्लिषः क्स इति**। अनिट इत्यनुवर्तनात् [1]तदनुबन्धकपरिभाषया वा [2]श्लिषेर्दाहार्थस्य सेटोऽत्र न ग्रहणम्। परिहारान्तरमपि संभवतीत्याह — **अथवेति**॥

[३, १३६–१३८]

(नारायणीयम्) प्रयोजनविषयसंदेहात् प्रश्न इत्याह — **किं पुषादीति**। ननु विधिनियमसंभवे विधेरेव[3] ज्यायस्त्वात् कथं नियमार्थत्वं स्यादित्यत आह — **इतर इति**। **विध्यर्थत्व इति**। यद्यत् प्राप्नोति तस्य तस्य बाधकः क्सः स्यादित्ययमपि दोषो विध्यर्थत्वे स्यादित्यर्थः। 'अचिण्विषये, श्लिषोऽनालिङ्गने' इत्यधिककरणेन नियमार्थत्वमुपपाद्यत इत्याह — **अचिण्विषय इत्यनेनेति**। ननु 'श्लिषः' इत्येतावति सूत्रे 'श्लिषु प्रुषु प्लुषु दाहे' इति दाहार्थस्यापि श्लिषोऽत्र ग्रहणात् तस्मादपि क्सः स्यादित्यत आह — **श्लिष इत्यत्रेति**। ननु श्लिषोऽङ्क्सयोर्विधानादविशेषाद् द्वावपि पर्यायेण स्यातामिति कथमङ्गो बाधकः क्सः स्यादित्यत आह — **तत्र पुषादित्वादिति**। आदिग्रहणेन संग्रहादङ्गोऽनुमितत्वम्, 'श्लिषः' इति साक्षादुच्चारणात् क्सस्य प्रत्यक्षशिष्टत्वम्। पूर्वस्य परिहारस्य पाक्षिकत्वात् पक्षान्तरोपादानमित्याह — **समुदायेति**॥

णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३.१.४८.

[३, १३८–१३९]

(उद्द्योतनम्) ननु कमेर्ण्यन्तत्वादेव सिद्धे वचनं व्यर्थम्, अत आह — **आर्धधातुक इति**। **अचकमतेति**। [4]णिङभावान्न दीर्घसन्वद्भावौ। ननु सन्वद्भावसूत्रे णिग्रहणाभावाण्णिङभावेऽपि[5] सन्वद्भावः किं न स्यात्, अत आह — **सन्वदिति**। [6]**णिराश्रीयत इति**। णेश्चङ्विधानात् चङ् परो यस्मादिति बहुव्रीहिणा णिरेव गृह्यत इत्यर्थः। णिग्रहणे फलितमाह — **तेनेति**। कर्तारं प्रकृतोपयोगिनमध्याहरति — **यैरिति**। **अचीकमतेति**। [7]उक्तमित्यनुषङ्गः। **पत्काषिणः** पादचारिणः। [8]लक्षणद्वयस्यापि विशेषेत्यादिः। **निन्देति**। [9]'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे [10]लोके कामधुग् भवति' इति श्रुत्यन्तरात् 'अचीकमत' इति भाषणस्यापि स्वर्ग-

---

[1] परिभाषा ८३.

[2] 'श्लिषु दाहे' इति भौवादिकस्योकारानुबन्धकत्वात् अन्यस्याकारानुबन्धकत्वात् श्लिष इत्यत्राकारस्य विवक्षितत्वमित्याशयः। अस्य मते तदनुबन्धकपरिभाषायां तन्मात्रानुबन्धकग्रहण इति नार्थः।

[3] एवकारो नास्ति — घ.

[4] णिजभावात् — ऋ.

[5] णिग्रहणाभावेऽपि — ऋ, ऌ.

[6] णिराश्रय इति — अ, ऋ, ऌ.

[7] एतेन प्रदीपे 'यैस्त्वचीकमतेति ते पत्काषिणः' इत्यत्रंभट्टपाठ इति ज्ञायते। मुद्रितपुस्तकेषुतु 'यैस्त्वचीकमतेत्युक्तं ते' इत्येव दृश्यते।

[8] लक्षणशब्दद्वयस्यापीत्यर्थः।

[9] 'एकः पूर्वपरयोः' इति सूत्रभाष्ये उदाहृतेयं श्रुतिः।

[10] 'लोके' इत्यस्यानन्तरं चकारोऽधिकः — अ.

साधनत्वादिति भावः। अध्याहारं विना योजनान्तरमाह — **अन्ये त्विति**। नन्वेवम् 'अकमिष्टाः' इति भाव्यम्, अत आह — **अनुकार्येति**। अनुकरणमनुकार्येणार्थवदिति प्रातिपदिकसंज्ञायां विभक्त्युत्पत्तिः। [1]अभेदविवक्षायां त्वर्थवत्त्वाभावान्न विभक्त्युत्पत्तिरित्यर्थः। ननु कर्मकर्तर्यपि कर्तरीत्येव चङ भविष्यति, किं वचनेन, अत आह — **कर्तरीति**। कर्मवद्भावेन कर्तृत्वबाधं मन्वानस्य वचनमित्यर्थः। ननु 'उत्पुच्छयते गौः' इत्यत्र गोः कर्तृत्वेन कर्मत्वाभावात् कथम् 'उदपुपुच्छत गौः स्वयमेव' इति कर्मकर्तरि प्रयोगः साधुः। यदि [2]णिङन्ताद्धेतुमण्णिचि रूपं तदा [3]'यस्तर्हि न हेतुमण्णिच्' इत्ययुक्तम्, अत आह — **पुच्छमुदस्यतीति**। अन्तर्भावितण्यर्थकर्मत्वं हेतुमण्णिचं विना [4]णिङं प्रत्येवास्ति, तदभिनयति — **तदेति**। लुङुपपादनायाह — **भूतेति**॥

[३, १३८–१३९]

(**रत्नप्रकाशः**) **कमेरुपसंख्यानमिति**। णिङभावपक्षे चङर्थमिदम्। तेन 'अचकमत' इति रूपं भवति। णिङि तु सन्वद्भावात् 'अचीकमत' इति। सूत्रकाराभिमतसाधुशब्दप्रयोगापेक्षया वार्तिककाराभिमतसाधुशब्दप्रयोगे फलविशेषमाह — **नाकमिष्टसुखमिति**। इष्टं सुखं यस्मिन् स इष्टसुखः [5]स्वर्गः, तं यान्ति सुयुक्तैर्बडबारथैः साधनैरित्यर्थः। के त इत्यपेक्षायां योग्यताबलात् 'येऽचकमतभाषिणः' इति संबध्यते। **पत्काषिण इति**। पादौ कषन्ति ये ते सन्त इत्यर्थः। **कर्मकर्तरि चेति**। कर्मणि चिणि प्राप्ते वचनम्। एतेन 'कर्तर्युच्यमानश्चङ कर्मकर्तरि न प्राप्नोतीति वचनम्' इति निरस्तम्। कर्मकर्तुरपि कर्तृत्वाविशेषेण तत्रापि चङः संभवात्। **उदपुपुच्छतेति**। पुच्छमुदस्यति उत्पुच्छयते गौः, तत्रान्तर्भावितण्यर्थविवक्षायाम् 'उत्पुच्छयते गां देवदत्तः' इति भवति। पुनर्गोरेव स्वातन्त्र्यविवक्षायां कर्मकर्तृतेति भावः॥

[३, १३८–१३९]

(**नारायणीयम्**) ननु कमेर्ण्यन्तत्वात् सूत्रेणैव चङि सिद्धे किमुपसंख्यानेनेत्यत आह — **आर्धधातुक इति**। णिङणिङन्तयोश्चङि रूपभेदं स्फोरयति — **तत्रेति**। ननु णिङभावपक्षेऽपि चङ्परत्वात् सन्वद्भावेन भाव्यमित्यत्राह — **सन्वल्लघुनि चङीति**। **इष्टसुखमिति**। इष्टानि सुखानि सुखकराणि वस्तूनि यस्मिन् तं स्वर्गमित्यर्थः। के पुनरेवं यान्तीति चिन्तायाम् 'अथ पत्काषिणः' इति समभिव्याहारादर्थाद् यैरचकमतेति [6]प्रत्युक्तं त इति लभ्यत इत्याह — **यैः कमेरिति**। **पत्काषिण इति**। पादाभ्यां कषन्तो गच्छन्ति, न तु रथादिभिर्यानैः। किमत्र प्रमाणमित्यत्राह — **लक्षणास्मरणादिति**। विशेषलक्षणं स्मर्तव्यमिति प्रदर्शनाय तस्यास्मारकान् निन्दितुमयमर्थवादः, यथा बर्हिषि रजतदानं निन्दितुं [7]'सोऽरोदीत्' इत्यादिः, भूतार्थत्वं भवतु वा मा वा भूदित्यर्थः। अन्ये त्वन्यथा पदच्छेदं कृत्वार्थान्तरं वर्णयन्तीत्याह — **अन्ये त्विति**। नन्वनुकरणस्यानुकार्येणार्थेनार्थवत्त्वात् प्रातिपदिकत्वाद्विभक्त्युत्पत्तिः स्यादित्यत्राह — **अनुकार्येति**। **पत्काषिणोऽपि सुखमिति**।

---

[1] अनुकार्यानुकरणयोरित्यादिः।

[2] णिजन्तात् — अ.

[3] भाष्ये 'यस्तर्ह्यहेतुमण्णिच्' इत्यत्र 'यस्तर्हि न हेतुमण्णिच्' इति निर्णयसागरमुद्रिते पाठः।

[4] णिचं प्रत्येवास्ति — अ.

[5] नाकशब्दार्थोऽयं बोध्यः।

[6] प्रयुक्तं — घ.

[7] तै. सं. १.५.१.

साधुशब्दोच्चारणाद्धर्मवृद्ध्या निरतिशयसुखप्राप्तिस्तेषां भवतीत्यर्थः। तस्मादणिङ्पक्षे सिजभावायोपसंख्यानं कर्तव्यमित्युक्तं भवति। **कर्मकर्तरि न प्राप्नोतीति**। कर्मणः कर्तृत्वान्मुख्यकर्तृत्वाभावादिति मन्यते। ननूपुच्छयतौ पुच्छकर्मणो धात्वर्थेऽन्तर्भावात् कर्मान्तराभावाच्च कथं कर्मकर्तृत्वमुपपद्यत इत्यत आह — **पुच्छमुदस्यतीति**॥

अस्यतिवक्तिख्यातिभ्योऽङ् ३.१.५२.

[३, १४०]

(उद्द्योतनम्) ननु पुषादित्वेनैव परस्मैपदेऽङि सिद्धेऽर्थादात्मनेपदार्थत्वस्य सुज्ञानत्वाद्वार्तिकं व्यर्थम्, अत आह — **पुषादय इति**। 'ष्णिह प्रीतौ' इत्यनन्तरं वृत्करणमस्ति, तदनन्तरम् 'असु क्षेपणे' इति पठ्यते। तस्य पुषादित्वाभावशङ्कानिरासाय 'पुषादित्वात्' इत्युक्तम्। अनेन वृत्करणं रधादिसमाप्त्यर्थं, न पुषादिसमाप्त्यर्थमिति प्रतिपादितं भवतीति भावः। **आतिदेशिकस्येति**। [१]"कर्मवत्' इति कर्मकार्यमतिदिश्यते, न तु कर्तृत्वं निवार्यते। कर्मकार्यं च कर्तृकार्यस्य बाधकम्, [२]तदभावे तत् प्रवर्तत एवेत्यर्थः। भाष्ये **पर्यास्थेतामिति**। आताम्यङि [३]"अस्यतेस्थुक्'। देवदत्तः कुण्डले पर्यस्यति, [४]सौकर्यात्ते स्वयमेव पर्यास्थेतामित्यर्थः। भाष्ये **अत्रापीति**। अस्मिन् सूत्रे कर्तरीत्यनुवर्तत इति भावः॥

[३, १४०]

(रत्नप्रकाशः) पुषादित्वादिति। वृत्करणं रधादिसमाप्त्यर्थमेव, पुषादयस्त्वागणान्तादिति भावः। **अत्रापीति**। [५]"उपसर्गादस्यत्यूह्योर्वा' इत्यात्मनेपदाकर्मकत्वात् कर्मकर्तरि यक्चिणोः प्रतिषेधादस्यतीति प्रकृतसूत्रेणैवाङ् भविष्यतीति भावः। एतेन 'आतिदेशिकस्य कर्मकार्यस्य कस्यचिदत्राविधानात् स्वाश्रयं कार्यं प्रतिबन्धकाभावात् प्रवर्तत एवेति भावः' इति निरस्तम्। 'कस्यचिदविधानात्' इति [६]हेतोस्तन्मते निर्मूलत्वात्। [७]"उपसर्गादस्यत्यूह्योर्वा' इत्यत्र ह्यकर्मकादिति न संबध्यत इत्युक्तं तेन॥

[३, १४०]

(नारायणीयम्) नन्वस्यतेः पुषादित्वस्य निर्ज्ञातत्वात् प्रश्नोत्तरयोः प्रयोजनं न पश्याम इत्याशङ्क्य वृत्करणस्य पुषादि[८]निवृत्त्यर्थत्वशङ्कां निराकृत्य शिष्यहितार्थी वार्तिककारोऽस्यतिग्रहणस्यात्मनेपदार्थत्वं कथितवानित्याह — **पुषादय इति**। ननु [९]"कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मकर्तरि कर्मकार्यस्य विधानात् कथं कर्त्राश्रयं कार्यं स्यादित्यत आह — **आतिदेशिकस्येति**॥

---

[१] पा. सू. ३.१.८७.
[२] कर्मकार्याभावे कर्तृकार्यमित्यर्थः।
[३] पा. सू. ७.४.१७.
[४] सौकर्यात्तु स्वयमेव — अ.
[५] का. वा. १.३.२९–३.
[६] हेतोरस्मन्मते — प, ब.
[७] का. वा. १.३.२९–३.
[८] निवृत्त्यर्थत्वाशङ्कां — घ.
[९] पा. सू. ३.१.८७.

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ३.१.५८.

[३, १४०]

(उद्द्योतनम्) यद्यपि रूपत्रयमन्यतरोपादानेऽपि सिध्यति, तथापि 'ग्लुचु स्तेये, ग्लुञ्चु गतौ' इत्यर्थभेदाद् द्वयोरुपादानमिति वृत्तावुक्तम्। तन्निराह — **अनेकार्थत्वादिति**। तत्रैव 'केचित्' इत्यादिना मतान्तरमुक्तम्। तदपि दूषयति — **यस्त्विति**। भाष्यकृता [1]धातुद्वयस्यापि रूपत्रयाङ्गीकारादन्यतरवैयर्थ्याङ्गीकाराच्चेति भावः॥

[३, १४०]

(रत्नप्रकाशः) 'ग्लुचु स्तेयकरणे' 'ग्लुञ्चु गतौ' इत्यर्थभेदादुभयोरुपादानम्। धातूनामनेकार्थत्वसंभवात् तयोरन्यतरग्रहणं न कर्तव्यमित्याशयेनाह — **इदमिति**। यत्तु "उभयोपादानसामर्थ्याद् ग्लुचेरङि नलोपाभावे 'अग्लुञ्चत्' इति रूपम्" इति। तद् भाष्यविरोधादुपेक्ष्यम्॥

[३, १४०]

(नारायणीयम्) ननु 'ग्रुचु ग्लुचु स्तेयकरणे' 'ग्लुञ्चु गतौ' इत्यर्थविशेषाश्रयेण पाठादुभयोरुपादानमर्थवदेवेत्यत आह — **अनेकार्थत्वादिति**। **भाष्यविरोधादिति**। भाष्यकारेणान्यतरस्य प्रत्याख्यानान्नलोपस्याभ्युपगमात्॥

चिण् ते पदः ३.१.६०.

[३, १४१]

(उद्द्योतनम्) आत्मनेपदप्रथमपुरुषैकवचनं तशब्दः [उत] परस्मैपदे ङित्सु मध्यमपुरुषबहुवचनं तशब्द इति प्रश्नः — [भाष्ये] **अयमिति**॥

चिण् भावकर्मणोः ३.१.६६.

[३, १४१]

(उद्द्योतनम्) इतिशब्दस्य स्वरूप[2]परामर्शकत्वाच्चिणित्यस्य नकाररूपत्वं कथम्, अत आह — **प्रतिषेधेति**। एवंशब्देन संबन्ध उच्यत इत्यर्थः। अत्रारुचिमाह — **नन्विति**। प्रसक्तिपूर्वकत्वान्निषेधस्याप्रसक्तस्य निषेधायोगादित्यर्थः। **इत्याह** इत्यत आह। अत्राप्यरुचिमाह —

[1] 'धातु' इति नास्ति — अ.

[2] परामर्शकत्वे चिणित्यस्य — अ.

विकल्पोऽपीति। **इत्याहेति**। पूर्ववत्। 'यदन्यत्' इत्युदाहरति — **उपेति**। उपाश्लेषि कन्या देवदत्तेनेति [1]"श्लिष आलिङ्गने' इत्यत्रैवोदाहृतम्॥

[३, १४१]

(रत्नप्रकाशः) नेत्येवं तदिति। प्रतिषेधसंबद्धं तदित्यर्थः। नन्वत्र प्राप्त्यभावान्नेति न संभन्त्स्यत इत्यत आह — **अथवेति**। विकल्पोऽपि निषेधेन सह निवर्तिष्यत इत्यत आह — **अथवेति**। वस्तुतस्तु [2]पुरस्तादपवादन्यायेनैव क्सेन चिणबाधे सिद्धे व्यर्थमेव चिण्ग्रहणम्॥

[३, १४१]

(नारायणीयम्) प्रतिषेधसंबद्धं तदिति। ततस्तस्मिन्ननुवर्तमाने प्रतिषेधोऽप्यनुवर्ततेति तन्निवृत्त्यर्थं पुनश्चिण्ग्रहणमित्यर्थः। पूर्वत्रापरितोषात् पक्षान्तरोक्तिरिति दर्शयितुमाह — **नन्विति**। एवमुत्तरत्रापीत्याह — **विकल्पोऽपीति**। **क्सो न भवतीति**। अन्यथा प्राप्तस्य सर्वस्य बाधकत्वाच्चिणं बाधित्वा [3]"श्लिष आलिङ्गने' इति क्सः स्यात्। चिण्ग्रहणात् पुनर्विधानात् क्सं बाधित्वा चिणेव भवतीत्यर्थः॥

सार्वधातुके यक् ३.१.६७.

[३, १४१–१४६]

(उद्द्योतनम्) दृशेः सकर्मकत्वात् किमत्र कर्म, अत आह — **वक्ष्यमाणस्येति**। 'कर्मणि' इत्यादि 'भवद्भिः' इत्यन्तभाष्येणेत्यर्थः। ननु तद्वाक्यार्थे [4]उदाहृतिक्रिया, साधनं कर्म, अत आह — **यथेति**। सरणक्रियाया दृशिक्रियाकर्मत्वमित्यन्वयः। ननु भावे लकारस्य क्रियाप्रधानत्वात् तस्याश्च संख्यायोगाभावाद् द्विवचनबहुवचने न भवतः, कर्मणि लकारे शक्तिशक्तिमतोरभेदात् शक्तिमतः संख्यायोगाद् द्विवचनबहुवचने भविष्यत इति वैषम्यात् 'केन' इत्ययुक्तम्, अत आह — **इहेति**। आख्याते सर्वत्र क्रियैव प्रधानम्, कारकाणां तत्र गुणत्वात्, तस्याश्च स्वरूपतोऽभिधानं प्रतीयते। अनेकलक्षणात्मकत्वेऽप्याख्यातेन शब्दशक्तिस्वाभाव्यादभिन्नरूपैव प्रतीयत इत्यर्थः। ततः किम्, तत्राह — **श्रुतेरिति**। आख्यात[5]श्रवणात् क्रियाभेदो न प्रतीयत इत्यर्थः। सर्वत्र क्रियायाः प्राधान्ये पच्येते इत्यादौ द्विवचनादिकं कथम्, अत आह — **तत्रेति**। **तथेति**। कर्तृरूपसाधनभेदाद् भवद्भ्यामास्येते भवद्भिरास्यन्त इति द्विवचनबहुवचने प्रसज्येते इत्यर्थः। वैषम्यान्तरं शङ्कते — **अथेति**। कर्मकर्तृलकारे आख्यातेनैव साधनमुच्यत इति तद्गतद्वित्वाद्यभिधानाय द्विवचनादिकं युक्तम्, [6]भावलकारेण साधनं नोच्यते, किं तु भवद्भ्यामित्यादिपदान्तरेण। तथा च तत्र द्विवचनादिकं न भविष्यतीत्यर्थः। एकेन पदेन वाच्यं यत् साधनं तस्य या संख्या [7]तदा-

---

[1] पा. सू. ३.१.४६.
[2] परिभाषा ६०.
[3] पा. सू. ३.१.४६.
[4] उदाहृतक्रिया — ऋ.
[5] श्रवणक्रियाया भेदः — अ.
[6] भावे लकारेण — ऋ.
[7] तदाश्रयः — अ.

श्रये तद्विषय इति विग्रहः। **प्रश्नः** केनैतदिति प्रतीकेनान्वयः। ननु कर्मशब्देन शक्तिरभिधीयते, [१]तस्या अनेकत्वेऽपि संख्यारहितत्वात् कथं वचनभेदोपपत्तिः, अत आह — **कर्मशक्तीति**। तथापि शक्त्यभिधायिन्याख्याते कथं द्विवचनबहुवचने, अत आह — **शक्तिशक्तिमतोरिति**। ननु 'एको भावः' इत्ययुक्तम्, क्रियायाः संख्यानाश्रयत्वात्, अत आह — **भेदेति**। आश्रयभेदेऽप्याश्रिते भावे किमायातम्, [२]अत आह — **गुडेति**। ननु पाके भेदेऽपि क्रियायाः संख्यानाश्रयत्वात् कथं वचनभेदोपपत्तिः, अत आह — **घञादिभिरिति**। भाष्ये **इहापि** आस्यते भवद्भ्यामित्यादावपि। नन्वाख्यातवाच्यभावस्य भेदाभावात् कथं द्विवचनबहुवचने आपाद्येते, अत आह — **आख्यातेति**। यद्यपि लकारवाच्यक्रियाया भेदेऽपि संख्यानाश्रयत्वाद्वचनभेदो न प्राप्नोति, तथापि भेदमात्रं वचनभेदप्रयोजकमनेनोक्तमिति मन्वानस्य चोद्यमित्याशयेनाह — **ततश्चेति**। पाकशब्दस्य कर्मणि घञन्तस्य व्याख्यानमुपन्यस्य दूषयति — **केचिदिति**। **दुर्लभत्वादिति**। [३]'अकर्तरि' इति सूत्रे संज्ञायामित्युक्तेरित्यर्थः। भावसाधनपक्षे पाके को विशेषः, अत आह — **आश्रयेति**। आश्रयैक्येऽप्याह — **प्रकारेति**। 'यज्ञौदनस्य पाकः' इत्यादिना पक्तव्यविशेषानभिसमीक्ष्येति प्रतीतेः पूर्वव्याख्यानमेव सम्यगित्याह — **अथवेति**। 'को भवता दायो लब्धः' इत्यादावसंज्ञायामपि कर्मणि घञ्दर्शनात् संज्ञाग्रहणं प्रत्याख्यातमित्यर्थः। **उष्ट्रासिका इति**। [४]'पर्यायार्ह' इति [५]ण्वुच्। उष्ट्रासनक्रियाया एकत्वात् कथं बहुवचनम्, अत आह — **अत्रेति**। **तत्सामानाधिकरण्याच्चेति**। उपमानोपमेययोः [६]समानविभक्तिकत्वसमानवचनकत्वयोरौचित्यादिति भावः। 'उष्ट्रासिकाः, आस्यन्ते' इत्यनयोः कथं सामानाधिकरण्यम्, भिन्नकर्तृकतया व्यधिकरणत्वात्, अत आह — **इवशब्देति**। 'एष ब्रह्मदत्तः' इत्यादावित्यर्थः। फलितमाह — **तदयमिति**। नन्वेवं 'भवद्भिरास्यते' इत्यत्राप्यासनभेदाद् बहुवचनं स्यात्, अत आह — **भवद्भिरिति**। आस्यन्त इत्याश्रयभेदादाश्रितभावभेदावगमेऽपि प्रकारभेदावगमाय बहुवचनम्। अत्र प्रकारभेदस्याविवक्षितत्वान्न बहुवचनमित्यर्थः। आश्रयभेदादाश्रितभेदप्रतीतावेकवचनमन्यत्राप्युदाहरति — **यथेति**। आश्रयभेदादाश्रितभेदप्रतीतिरपि न सार्वत्रिकीति 'आस्यते भवद्भिः' इत्येकवचनोपपत्तिः। आस्यन्त इत्यत्र क्वचिदेव तथा प्रतीतिरित्याशयेनाह — **न चेति**। **भावस्येति**। [७]'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति भावस्य कर्मत्वमित्यर्थः। **यथेति**। 'यावन्तं कालं गोदोहस्तावन्तं कालं स्वपिति' इत्यर्थे गोदोहस्य भावतया कर्मत्वात् तस्मिन् लकारे 'गोदोहः सुप्यते' इति भवति। तथा यावन्तं कालमुष्ट्रा आसते तावन्तं कालं देवदत्तादय आसत इत्यर्थे 'उष्ट्रासिका आस्यन्ते' [८]इति भवतीत्यर्थः। एवं विवक्षायामेतन्मतं सम्यगित्याह — [९]**एतदिति**। तर्हि भाष्यस्य [१०]का संगतिः, अत आह — **भाष्यकारेणेति**। यथा आख्यातवाच्यस्य भावस्यासत्त्वरूपस्य संख्यानाश्रयत्वेऽपि भेदाभावमात्रेणैकवचनं भवति, तथा [११]भेदमात्रेण द्विवचनबहुवचने अपि भवत इति भाष्याशयोऽनेनोक्तः। अन्ये तु प्रयोगसाधुत्वार्थमेकवचनं भावलकारे प्रवर्तते, तस्य संख्यानाश्रयेण

---

[१] तस्यानेकत्वेऽपि — ऋ.
[२] अत आह — शङ्केति — अ; अत आह — शुकेति — ऋ; अतः शङ्केति — लृ.
[३] पा. सू. ३.३.१९.
[४] पा. सू. ३.३.१११.
[५] ण्वुल् — अ.
[६] समानविभक्तित्वसमानवचनत्वयोः — अ.
[७] महाभाष्यम् १.४.५१.
[८] इति न संभवतीत्यर्थः — अ.
[९] प्रदीपे 'एवं तु विवक्षान्तरे' इत्यत्र 'एतत्तु विवक्षान्तरे' इत्यन्नंभट्टपाठ इति भाति।
[१०] कथं संगतिः — अ.
[११] भेदमात्रे द्विवचन — अ.

विधानात्। [1]'एकवचनमुत्सर्गः' इति वचनात्, न तु [2]वचनान्तरम्। तेन भाष्यं प्रौढिवादेनेत्याहुः। ननु कालभेदे कथं शब्दभेदः, अत आह — **भिन्नेति**। भिन्नार्थप्रतिपादनाय शब्दभेद इत्यर्थः। एकशेषे एकस्यानेकार्थत्वं कथम्, अत आह — **शास्त्रेणेति**। [3]एकशेषानारम्भपक्षेऽप्याह — **अन्तरेणेति**। [4]नन्वेकशेषानारम्भेऽप्येकस्य पाकशब्दस्य भिन्नकालनानापाकाभिधायित्ववत् तिङोऽप्यस्तु, अत आह — **न हीति**। **किंचिदिति**। सुबन्ते तु [5]वृक्षा इत्यादिकमस्तीत्यर्थः। ननु संख्यादियोगित्वेन भावस्यापि द्रव्यत्वात् 'द्रव्यवत्' इत्ययुक्तम्, अत आह — **द्रव्यत्वेनेति**। वत्यर्थमाह — **लिङ्गेति**। **साधनं** कारकम्। ननु मतान्तरे पाकादिक्रियाया अरूपत्वेनाद्रव्यत्वेऽपि सिद्धान्ते [6]'वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः॥' इति लक्षणस्य भावेऽपि सत्त्वेन द्रव्यत्वात् 'द्रव्यवत्' इत्ययुक्तम्, अत आह — [7]**तत्रेति**। 'न गच्छति' इत्यस्यासंभवं शङ्कते — **नन्विति**। [8]'पचिक्रिया भवति'[9]क्रियायाः कर्त्री। **एवं तर्हीति**। कर्तृकर्मव्यतिरिक्तकारकेण संबन्धो नास्तीति विवक्षितत्वान्नासंभव इत्यर्थः। ननु साध्यरूपा क्रिया, सिद्धरूपं कारकम्, तथा चैकस्या एकदा सिद्धत्वसाध्यत्वयोर्विरोधात् कथं कर्तृत्वकर्मत्वे अपीति शङ्कते — **नन्विति**। **विषयेति**। पचिक्रियाया देवदत्तादिकं प्रति साध्यत्वं भवति, क्रियां प्रति साधनत्वं च न विरुद्धमित्यर्थः। एकस्मिन् विषये सिद्धत्वसाध्यत्वयोर्विरोध इत्याद्यश्लोकार्थः। यं मृगं प्रति साध्यत्वं सरणक्रियायास्तं प्रत्यसिद्धा सा, यस्मिन् मृगविषये सरणक्रियायाः साध्यत्वं तमेव मृगं प्रति पुनः सिद्धा न भवतीत्यन्वयः। विषयभेदे तु न विरोध इत्याह — **मृग इति**। **तथा** तथा सति। नन्वेवं विषयभेदेन करणादिरूपेणाप्यन्वयोऽस्त्वित्याशङ्क्य कर्तृत्वकर्मत्वयोः साध्यत्वाविरोधात् संभवः, करणत्वादेस्तु तद्विरोधान्न संभव इत्याह — **तत्रेति**। ननु 'पठति पचति' इत्यत्र कर्तृत्वाद्यभावात् कथमविरोधः, अत आह — **तथा हीति**। सामान्यकर्तृत्वमात्रमुक्तम्, तत्तु भवतिक्रियां प्रति संभवत्येवेत्यर्थः। **तस्य** आख्यातार्थस्य। तदपि कथम्, अत आह — **सर्वश्चेति**। सिद्धः साध्यश्चेत्यर्थः। **कर्मापीति**। दृशिक्रियां प्रत्यपि सरणक्रियाया विषयतया साध्यत्वात् प्राधान्यमित्यर्थः। **तस्य** आख्यातार्थस्य। पुरुषशब्देन तिङां त्रिकं त्रिकमुच्यते, तच्च तिङा नाभिव्यज्यते, अत आह — **पुरुषेति**। **अनेकेति**। फलस्य कर्तृगामित्व[10]परगामित्वोभय[11]गामित्वरूपः। **ब्राह्मणानामिति**। [12]'कर्तृकर्मणोः कृति' इति कर्तरि षष्ठीविधानात् कृदभिहितस्यापि कर्तृयोगोऽस्तीत्यर्थः। पाचक इत्यादावेकपदवाच्येनापि कर्त्रा [13]योगोऽस्ति, अत आह — **अथवेति**। घञादिविषयमेतद् भाष्यमित्यर्थः। एकपदवाच्येनेत्येतदेव[14] स्थापयितुमाह — **अथवेति**। पाचक इत्यत्र क्रिया कर्तृविशेषणम्, पचतीत्यत्र कर्ता क्रियाया इति वैलक्षण्यमित्यर्थः। उपलक्षणत्वेनापि कर्तृयोगे सति कथं तन्निषेधः, अत आह — **तत्रेति**। वैलक्षण्ये सतीत्यर्थः॥

---

[1] महाभाष्यम् १.१.३८.
[2] द्विवचनादीत्यर्थः।
[3] एकशेषारम्भपक्षेऽप्याह — अ.
[4] नन्वेकशेषारम्भेऽपि — अ.
[5] वृक्षादिकं — अ.
[6] वाक्यपदीयम् ३.४.३.
[7] अत्रेति — अ.
[8] 'पचिक्रिया' इत्यादि 'शङ्कते — नन्विति' इत्यन्तं नास्ति — अ.
[9] क्रियायां — ऋ.
[10] 'परगामित्व' इति नास्ति — अ.
[11] 'गामित्व' इति नास्ति — ऋ, लृ.
[12] पा. सू. २.३.६५.
[13] योगोऽस्तु — अ.
[14] एतदवस्थापयितुमाह — अ.

[३, १४१–१४६]

(रत्नप्रकाशः) पश्याम इति। आलोचयाम इत्यर्थः, विचारयाम इति यावत्। विचारस्वरूपमाह — **कर्मणीत्यादिना केनैतदेवं भवतीत्यन्तेन।** एतेन 'वक्ष्यमाणस्य वाक्यार्थस्य दृशिक्रियायां कर्मत्वम्, यथा पश्य मृगो धावतीति मृगकर्तृकायाः सरणक्रियायाः' इति निरस्तम्, दृष्टान्ते साध्याप्रसिद्धेः। पस्पशाह्निके तिङन्तस्य तिङर्थप्राधान्यस्य व्यवस्थापितत्वाच्च। उत्तरमाह — **कर्मानेकमिति। भावः पुनरेक इति।** धात्वर्थः स्वरूपतोऽनेकात्मको न भवति, मूर्तिमत्तया घटादिवत्तदप्रतीतेः। तथा चौत्सर्गिकमेकवचनमेव तत्र भवतीति भावः। पुनः शङ्कते — **कथमिति।** उत्तरमाह — **आश्रयभेदादिति।** फलाश्रयकर्मभेदाद्वचापाराश्रयकर्तृभेदात्[1] कर्तृकर्मद्वारा तदुभयाश्रयाधिकारणभेदाद्वेत्यर्थः। पुनः शङ्कते — **इहापीति।** तिङन्तेऽपीत्यर्थः। भावे कृदन्ततिङन्तयोरेकवचनद्विवचनबहुवचनान्तत्वोपपादनं तुल्यमेव। परं तु प्रायेण तिङन्ते एकवचनान्ततैवाद्रियते, परम्परया द्विवचनबहुवचनान्तप्रयोगोऽपि साधुरेवेत्याशयेनाह — **एवं तर्हीति। पाकविशेषानिति।** पच्यन्त इति पाकाः, कर्मणि घञ्। 'संज्ञायाम्' इति हि [1]तत्र प्रत्याख्यातम्। तच्च कर्तुरुपलक्षणम्, अत एव दार्ष्टान्तिके कर्तृभेदेन क्रियाभेदो निर्दशितः। **बहवस्त इति।** उपाधिभेदभिन्नाः पाका इति शेषः। **बहुवचनं श्रूयत इति।** युक्तं चेत्यनुषज्यते। **उष्ट्रासिका आस्यन्त इति।** यवनैरिति शेषः। उष्ट्रकर्तृकासनसदृशानि यवनकर्तृकाण्यासनानीत्यर्थः। केचित्तु गोदोहः सुप्यत इतिवत् 'उष्ट्रासिका आस्यन्ते' इति कर्मणि लकार इत्याहुः। तत्तु प्रकृतभाष्याननुगुणम्, कर्मणि तत्र लकारसंभवेऽपि भावे लकारमादायैव प्रकृतभाष्यस्योपपादनीयत्वात्। **तेऽपीति।** कालभेदभिन्ना अपि पाका इत्यर्थः। **युक्तं बहुवचनमिति।** कालभेदस्याविवक्षितत्वेऽपि तत्प्रयुक्तक्रियाभेदमात्रविवक्षायामिति शेषः। कालविशेषविवक्षायां तु 'पाकाः' इति प्रयोगोऽपि 'आस्यन्ते' इति प्रयोगवदसाधुरेव। **तिङभिहिते चापीति।** तिङभिहिते त्वित्यर्थः। **एकशेषो न भवतीति।** एकशेषफलं बहुवचनं न भवतीत्यर्थः। न हि तिङन्ते क्वचिदेकशेषो भवति। ननु कालविशेषाविवक्षायां 'पाकाः' इतिवत् 'आस्यन्ते' इति बहुवचनं स्यादिति चेन्न, 'आस्यन्ते' इत्युक्ते कालविशेषस्य गम्यमानत्वेन पाका इत्यत्र तस्यागम्यमानत्वेन वैषम्यात्। वर्तमानासनानामनेकत्वे 'उष्ट्रासिका आस्यन्ते' इति भवतीत्युक्तमेव। एवं [2]भूतानाम् 'आसिषत' इति, भाविनीनाम् 'आसिष्यन्ते' इति भवत्येव। एवम् 'आस्येते' 'आसिषाताम्' 'आसिष्येते' इति द्विवचनमपि द्वित्वविवक्षायां साध्वेव भवति। तदेवं भूतभविष्यद्वर्तमानक्रियाणां कृदन्तेन सामान्यतो निर्देशः संभवति, न तिङन्तेनेति तयोर्वैषम्यं प्रतिपाद्य वैषम्यान्तरमप्यस्तीत्याह — **अस्ति खल्वपीति। द्रव्यवदिति।** द्रव्यत्वेनाभिमतं यद् घटादि तद्वदित्यर्थः। **क्रियावन्न भवतीति।** कृदभिहितो भाव इत्यनुषज्यते। क्रियाशब्देनात्र तिङर्थो गृह्यते। **क्रिययेति।** धात्वर्थेनेत्यर्थः। यथेति शेषः। **क्रिया** तिङर्थः। **समवायं** संबन्धम्, [3]**न गच्छति** न प्राप्नोति। **पचति पठतीति।** 'पाचकः पठति' इतिवत् 'पचति पठति' इति प्रयोगो न भवतीत्यर्थः। **न भवतीति।** क्रियासमवायाभाव इति शेषः। **पाको वर्तत इति।** एवं 'पचति वर्तते' इत्यपि प्रयोगो न भवतीति भावः। एतेन "ननु 'भवति पचति' 'पश्य मृगो धावति' इति कर्तृकर्मभावेन क्रिया क्रियया संबध्यत एव। एवं तर्हि करणादिरूपेण समवायं न गच्छतीति विवक्षितम्" इति

---

[1] 'अकर्तरि च कारके' इति सूत्र इत्यर्थः।

[2] आसनक्रियाणामिति विशेष्यमध्याहर्तव्यम्। अत एव 'भाविनीनाम्' इत्यस्योपपत्तिः।

[3] 'न गच्छति' इत्यादि 'न भवतीत्यर्थः' इत्यन्तं नास्ति — ब.

निरस्तम्। 'भवति पचति' इत्यत्र पचतीत्यनेनोक्तस्यैव भवनकर्तुर्भवतीत्यनेन 'द्वावपूपावानय' इत्यादावपूपावित्यनेनोक्तस्य द्वावित्यनेनेवानूदितत्वेन तिङर्थस्य धात्वर्थे कर्तृत्वेनान्वयाभावात्। तिङन्ते धात्वर्थप्राधान्यस्य पस्पशाह्निक एव निराकृतत्वात्। 'पश्य मृगो धावति' इत्यत्र 'घटोऽस्ति, आनय' इत्यादाविव तमित्यध्याहारेण वाक्यभेदस्यैवाश्रयितुमुचितत्वात्। तथा 'क्रिया क्रियया समवायं न गच्छति' इति भाष्यस्य करणादिरूपेण समवायं न गच्छतीति संकोचाश्रये मानाभावाच्च। यदप्युक्तम् 'ननु साध्यत्वात् क्रियायाः कथं क्रियान्तरं प्रति कर्तृकर्मभावः। विषयभेदादेकस्याप्यर्थस्य साध्यसाधनभावसंबन्धसंभवाददोषः। तदुक्तं हरिणा —

> '[1]तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया।
> सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति॥
> मृगो धावति पश्येति साध्यसाधनरूपता।
> तथा विषयभेदेन सरणस्योपपद्यते॥ इति' इति।

तदपि न, साध्यस्य साधनत्वं नास्तीत्यस्य निर्मूलत्वेन शङ्कायास्तुच्छत्वात्। अत एव तदभ्युपगमेन विषयभेदेन समाधानस्यापि तुच्छत्वात्। 'बाधेऽदृढेऽन्यसाम्यात् किं दृढेऽन्यदपि बाध्यताम्' इत्यभियुक्तोक्तेः। 'पश्य मृगो धावति' इत्यत्र दृशिक्रियायां धावनस्य कर्मत्वे मानाभावाच्च। यदप्युक्तम् 'तत्र कर्तृकर्मत्वमाख्यातवाच्यस्य भावस्य न विरुद्धम्। तथा हि — भवतिक्रियापेक्षमेव तस्य कर्तृत्वम्। सर्वश्चार्थः स्वेन रूपेण भवतीति भवने कर्तृत्वमुपपन्नम्। एवं कर्मापि क्रियाफलत्वात् प्रधानमिति कर्मत्वमपि तस्योपपद्यते। करणत्वादीनि तु सर्वात्मना गुणभावमन्तरेण नोपपद्यन्त इति प्राधान्येनात्यन्तविरोधात् तस्य नोपपद्यन्ते' इति। तदपि न, प्रकृतभाष्यविरोधेनाख्यातवाच्यभावस्य युक्त्या धात्वर्थान्तरं प्रति कर्तृत्वकर्मत्वसाधनेन स्वमौर्ख्यस्यैव दाढर्यात्। कर्तृत्वकर्मत्वोपपत्तौ करणत्वाद्यनुपपत्तौ च दृढयुक्त्यदर्शनाच्च। तृतीयमपि वैषम्यमस्तीत्याह — **अस्ति खल्वपीति**। **कालपुरुषोपग्रहा इति**। **कालः** भूतभविष्यद्वर्तमानरूपः। **पुरुषः** प्रथममध्यमोत्तमाः। **उपग्रहः** आत्मनेपदपरस्मैपदार्थः। '[2]**कृदभिहितेन पुनरिति**। कृदभिहितेन त्वित्यर्थः। चतुर्थमपि वैषम्यं तयोरस्तीत्याह — **अस्ति खल्वपीति**। **कर्त्रा** परमप्राधान्येन, विशेष्यनैराकाङ्क्ष्येणेति यावत्। **न संप्रयुज्यत इति**। 'पाको वर्तते' इत्यादौ विशेष्यान्वयदर्शनादिति शेषः। एतेन 'ननु कृदभिहितस्यापि भावस्य भवति कर्त्रा योगः, यथा ब्राह्मणानां प्रादुर्भाव इति। तत्राहुः —एकपदवाच्येन कर्त्रा न युज्यते, यथा पचतीति कर्ता वाच्यः, नैवं पाक इति, शुद्धस्यैव तस्य प्रत्यायनात्' इति निरस्तम्। तस्य प्रकृतभाष्यगतकर्तृपदार्थानवबोधमूलत्वात्। 'पाचकः' इत्यादौ समानपदवाच्यकर्त्रा योगाच्च। न च पाचक इत्यत्र कृदर्थः कर्ता भवति, न तु भाव इति वाच्यम्, 'पचति पठति' इत्यत्रापि तिङर्थः कर्ता, न तु भाव इत्यस्यापि तुल्यत्वात्। यदप्युक्तम् 'अथवा घञादिभिः सिद्धरूपता भावस्याभिधीयत इति तेन रूपेण कर्त्रा योगाभावः। धातुरूपप्रतिपाद्यया तु साध्यतया कर्त्रा योगो भवति' इति। तदपि न, तिङपदेन धातुर्गृह्यते, न कृत्पदेनेत्यत्र मानाभावात्। यदप्युक्तम् 'अथवोपसर्जनभावेन भावः कर्त्रा युज्यते कृत्सु पाचक इति। तिङक्षु तु पचतीति साध्यमानतया प्राधान्येन। तत्र कृत्सु प्राधान्येन कर्त्रा योगो नास्तीत्ययमर्थः' इति। तदपि न, उभयत्र कर्तुः प्राधान्येनैवान्वयस्य भाष्यकाराभिमतत्वात्। अन्यथा 'पचति पठति' इत्यत्र पचनकर्तुः पठनकर्तृत्वेनान्वयाभावकथनस्यासंगतत्वापत्तेश्च॥

---

[1] वाक्यपदीयम् ३.८.५०.

[2] कृदभिहितेन च पुनरिति — प, ब.

[३, १४१–१४६]

(**नारायणीयम्**) ननु [1]वक्ष्यमाणस्य वाक्यार्थस्य क्रियालक्षणस्यासत्त्वभूतत्वात् कथं [2]दृशिक्रियायां कर्मत्वमुपपद्यत इत्याशङ्क्य दृष्टान्तेनोपपादयति — **यथा पश्येति**। **मृगकर्तृकायाः सरणक्रियाया इति**। दृशिक्रियायां कर्मत्वमित्यनुषङ्गः। न हि दर्शने मृगस्य कर्मत्वम्, द्वितीयाप्रसङ्गादिति धावनक्रियैव दर्शने कर्म। एवमिहापीत्यर्थः। एतच्चोत्तरत्र विशदीभविष्यति। ननु भावे विधीयमानस्य लकारस्य क्रियार्थत्वात् क्रियायाश्चासत्त्वभूतत्वात् संख्यायोगाभावाद् द्विवचनबहुवचने न भवतः। कर्मणि तु लकारे शक्तिशक्तिमतोरभेदोपचाराच्छक्तिमतो द्रव्यस्य संख्यायोगाद् द्विवचनबहुवचने भविष्यत [3]इति वैषम्यमुपपन्नमेवेत्याशङ्क्याह — **इहेति**। **श्रुतेरशक्येति**। यद्यपि साधनभेदाद्वास्तवो भेदः क्रियाया विद्यत एव, तथापि शब्दशक्तिस्वाभाव्यादाख्यातेभ्यस्तद्भेदो नावधार्यत इत्यर्थः। कथं तर्हि कर्मणि लकारे द्विवचनबहुवचने स्यातामित्यत्राह — **तत्र यथेति**। तत्रैतत् स्यात् — अन्तरङ्गत्वाद्यत्र कर्मणि लकारस्तत्रैकपदवाच्यत्वात् साधनस्य तद्गतसंख्याश्रये द्विवचनबहुवचने भविष्यतः, न तु भावाभिधायिनि लकारे, भिन्नपदवाच्यत्वादिति वैषम्यमाशङ्क्यातिप्रसङ्गभयान्नैवमाश्रयितुमुचितमिति परिहरति — **अथैकपदेति**। ननु 'कर्मानेकम्' इत्ययुक्तम्। कर्मादिशब्दा हि शक्त्यभिधायिनः, शक्तेश्चासत्त्वभूतत्वात् संख्यायोगो न भवतीत्याशङ्क्याह — **कर्मशक्तीति**। नन्वेवमपि शक्त्यभिधायिनि लकारे कथं द्विवचनबहुवचने[4] स्यातामित्यत आह — **शक्तिशक्तिमतोश्चेति**। **सामानाधिकरण्यं भवतीति**। अन्यथा समानाभिधेयत्वलक्षणं सामानाधिकरण्यं न स्यात्। ननु भावस्यासत्त्वभूतत्वात् संख्यायोगाभावे द्वित्वादिवदेकत्वमपि न स्यादिति 'भावः पुनरेक एव' इत्ययुक्तमित्याशङ्क्याह — **भेदाभावलक्षणमिति**। यथा वृत्तावुपसर्जनार्थस्याभेदैकत्वसंख्याश्रीयते, एवं भावस्यापीत्यर्थः। आश्रयभेदाद् भावस्य भेदं स्फोरयति — **गुडतिलेति**। नन्वाश्रयभेदादाश्रितस्य पाकस्य भेदेऽप्यसत्त्वभूतत्वात् [5]क्रियायाः संख्यायोगाभावात् कथं द्विवचनबहुवचने स्यातामित्यत आह — **घञादिभिश्चेति**। शब्दशक्तिस्वाभाव्यमत्र हेतुः। ननु घञादिभिराश्रयभेदभिन्नस्य पाकादेरभिधानाद् द्विवचनबहुवचने युज्येते, भावाभिधायिनि तु लकारे तद्भेदाभावात् कथं ते स्यातामित्याशङ्क्यापि[6]शब्दसूचितं साम्यं स्फोरयति — **आख्यातवाच्यस्यापीति**। नन्वेवमप्यसत्त्वभूतायाः क्रियायाः संख्यायोगायोगात् कथं द्विवचनबहुवचने इत्यत आह — **ततश्चेति**। यथा पाकौ पाका इत्यादौ भेदमात्राश्रये द्विवचनबहुवचने त्वयोक्ते एवमाख्यातवाच्येऽपि [7]भावे भेदस्य सुसाधत्वात् तदाश्रयवचनप्रसङ्गो दुर्वार इति चोदकाशय इत्यर्थः। उष्ट्रासिका इत्यत्र [8]'धात्वर्थनिर्देशे [9]'बहुलम्' इति भावे ण्वुल्, तस्योष्ट्रशब्देन विशेषणाद् भेदोऽवगम्यत इत्याह — **अत्राश्रयाणामिति**। **तत्सामानाधिकरण्याच्चेति**। यद्यप्याख्यातवाच्यस्य भावस्य स्वतो भेदो नास्ति, तथाप्युष्ट्रासिका इत्यनेन सामानाधिकरण्यात् प्रकारभेदस्यान्यतोऽनवगमात् तदवगमाय बहुवचनोत्पत्तिरुपपद्यत इत्यर्थः। ननु 'उष्ट्रासिका आस्यन्ते' इति कथमन्वय इत्याशङ्क्य सामर्थ्यादिवार्थगतेरन्वयोपपत्तिरित्याह — **इवशब्देति**। नन्वेवं 'भवद्भिरास्यते' इत्यादावपि

---

[1] वर्ण्यमानस्य — ङ.
[2] दृशिक्रियायाः — ङ.
[3] 'इति' इत्यस्यानन्तरं 'न' इत्यधिकम् — ङ.
[4] 'बहुवचने' इत्यस्यानन्तरं 'न' इत्यधिकम् — घ.
[5] क्रियायां — ङ.
[6] शब्दस्तूचितं — घ.
[7] भावभेदस्य — ङ.
[8] का. वा. ३.३.१०८–१.
[9] बहुलमित्येतत् सूत्रादनुषक्तम्।

बहुवचनं स्यादित्यत्राह — **भवद्भिरिति। यथा ताम्र इति।** यद्यप्याश्रयभेदाद्रागा बहवः, तथापि पलाशेष्वित्यनेन तद्भेदस्य प्रतिपन्नत्वाद् राग इत्येकवचनमेव भवतीत्यर्थः। यद्याख्यातवाच्यस्यापि भावस्याश्रयादिभेदाद् भेदोऽभ्युपगम्यते तर्हि [1]"निवृत्तभेदा सर्वैव क्रियाख्यातेऽभिधीयते' इति कथमुक्तमित्याशङ्क्याह — **न च सर्वत्रेति।** शब्दशक्तिस्वाभाव्यात् 'उष्ट्रासिका आस्यन्ते' इत्यादौ क्वचिदेव भेदप्रतीतिर्न सर्वत्रेत्यर्थः। **भावस्य कर्मत्वादिति।** [2]"कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति वचनात्। **एवं तु विवक्षान्तर इति।** न त्वत्रैतद्विवक्षितम्, आश्रयप्रकारादिभेदाद् भावस्य भेदमाश्रित्य बहुवचनप्रयोगस्योपपादितत्वादिति। तदाह — **इति भाष्यकारेणेति। भिन्नकालत्वादेवेति।** कालभेदात् पाकस्य भेदात्। एकशेषशास्त्रस्य प्रत्याख्यानपक्षेऽप्याह — **अन्तरेणेति।** तिङभिहिते भावे सारूप्याभावादेकशेषाभावमुपपादयति — **न हीति।** ननु कृदभिहितस्य भावस्येदंतदादिपरामर्शयोग्यत्वेन द्रव्यत्वात् कथं 'द्रव्यत्वात्' इति भेदापेक्ष उपमानोपमेयभाव उपपद्यत इत्यत आह — **द्रव्यत्वेन प्रसिद्ध इति।** 'ननु भवति' इत्यादिः स्पष्टार्थः। विषयभेदादेकस्याप्यर्थस्य साध्यसाधनभावमुपपादयितुं हरिवचनं संवादत्वेन दर्शयति — **तदुक्तमिति। तत्र यं प्रतीति।** साधनापेक्षया साध्यत्वादनिर्वृत्ता धातूपात्ता क्रिया प्रतीयते। पाकादिषु कृत्प्रत्ययवाच्या तु सिद्धेति तदपेक्षया न साध्यत्वम्। तथा च तत्र साधनयोगो न भवतीत्यर्थः। अत्र सदृशतरं दृष्टान्तमाह — **मृगो धावतीति।** तिङुपात्तकर्त्रपेक्षा धावनक्रिया साध्या। दर्शनक्रियापेक्षया तु [3]साधनत्वात् कर्मतां प्रतिपद्यते। तथा सति विषयभेदेन सरणस्य साध्यसाधनरूपतोपपद्यते। न हि साध्यावस्थायामेव साधनत्वम्, अनिष्पन्नस्य परोपकारकत्वायोगात् साधनत्वाभावात्। [4]उत्तरकाले तु निर्वृत्तायाः क्रियायाः क्रियान्तरं प्रति साधनत्वमुपपद्यते। एवं घञादिविषयेऽपि द्रष्टव्यमित्यर्थः। ननु कर्तृकर्मभावेन क्रिया क्रियान्तरेण संबध्यते, करणादिरूपेण तु समवायं न गच्छतीति विशेषः कुतो लभ्यत इत्याशङ्क्याह — [**तत्रेति**]। आख्यातवाच्या हि क्रिया साध्यत्वात् प्रधानमिति करणादिरूपेण क्रियया समन्वये स्वप्राधान्यभङ्गप्रसङ्गादेव समवायं न गच्छति। कर्त्रादिरूपेण तु तदन्वये न प्राधान्यभङ्ग इति तद्रूपेण क्रिया क्रियया संबध्यत एवेति परिहरति — **तत्र कर्तृकर्मत्वमिति।** [5]**प्रत्यक्परग्भावश्चेति।** प्रतिपुरुषमञ्चति चेष्टत इति प्रत्यङ अन्तर्यामी जीवात्मा। स हि [6]प्रतिदेहं नियतो वर्तते, तद्भावः प्रत्यक्ता, उत्तमपुरुषवाच्योऽर्थः। [7]पराग्भावो मध्यमवाच्यः। [8]**स्वार्थपरार्थतादिक इति।** यजते यजमान इत्यादौ प्रधानस्य क्रियाफलस्य स्वर्गादेः कर्तृगामित्वप्रतीतेः स्वार्थतात्मनेपदात् प्रतीयते। पचन्ति भक्तकराः, यजन्ति याजका इत्यादौ भृतिमात्रफलत्वात् भक्तकरादीनां प्रधानस्य फलस्य न कर्तृगामित्वमिति परार्थता परस्मैपदेनाभिव्यज्यते। आदिशब्देन साधनं तद्विशेषणं धात्वर्थस्तद्विशेषणमित्येते विशेषाः संगृह्यन्ते। साधनं कर्मादि, 'पच्यते, गम्यते' इति कर्मात्मनेपदव्यङ्ग्यम्। कर्ता लादेशद्वयव्यङ्ग्यः — एधते यातीति। भाव आत्मनेपदाभिव्यङ्ग्यः — आस्यते शय्यत इति। व्यक्तवाक्त्वं कर्तृविशेषणं सदात्मनेपदव्यङ्ग्यम् — संप्रवदन्ते ब्राह्मणा इति। गन्धनादयः क्रियाविशेषा धातुवाच्या अप्यात्मनेपदमन्तरेणानभिव्यक्ता इत्युपग्रहशब्दवाच्या भवन्ति — 'उत्कुरुते,

---

[1] वाक्यपदीयम्. २.४५१.
[2] महाभाष्यम्. १.४.५१.
[3] साधनत्वम् — घ.
[4] उत्तरकालं तु — घ.
[5] प्रत्यक्तापरभावश्चेति — घ.
[6] प्रतिदेहनियतः — ङ.
[7] परभावः — घ.
[8] प्रदीपे 'स्वार्थपरार्थत्वादिकः' इत्यत्र 'स्वार्थपरार्थतादिकः' इति पाठः स्वीकृतः।

अवकुरुते' इति। व्यतीहारस्तु क्रियाविशेषणमात्मनेपदाभिव्यङ्ग्यं — 'व्यतिलुनते, व्यतिपुनते' इति। अत एवोक्तम् 'अनेकप्रकारः' इति। उक्तं च —

[1]'य आत्मनेपदाद् भेदः क्वचिदर्थस्य गम्यते।
अन्यतश्चापि लादेशान्मन्यते तमुपग्रहम्॥
क्वचित् साधनमेवासौ क्वचित् तस्य विशेषणम्।
साधनं तत्र कर्मादि [2]व्यक्तवाचो विशेषणम्॥
[3]धात्वर्थस्तद्विशेषश्चाप्युक्तः क्वचिदुपग्रहः।
धात्वर्थो गन्धनादिः स्याद्व्यतीहारो विशेषणम्॥' इति।

यथा ब्राह्मणानामिति। [4]'कर्तृकर्मणोः कृति' इति कर्तरि षष्ठीविधानात् कृदन्तेनाभिहितस्यापि भावस्य कर्त्रा योगोऽस्त्येवेत्यर्थः। **एकपदवाच्येनेति**। प्राधान्येन युक्त इति शेषः। अप्रधानं सदेकपदवाच्येनापि कर्त्रा युज्यत एव — यथा पाचक इति। अत एवात्र पक्षेऽनाश्वासात् पक्षान्तरमाह — **अथवा घञादिभिरिति**। [5]'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति घञादिवाच्यस्य सिद्धरूपस्यार्थस्य प्राधान्यात् **तेन** [6]प्राधान्येन रूपेण, कर्त्रा योगो नास्तीत्यत्र विवक्षितम्। **उपलक्षणभावेनेति**। कृत्सु प्रत्ययार्थस्य प्राधान्यात् तदुपलक्षणाय धातुवाच्या क्रियोपादीयते। तिङ्क्षु तु धातुवाच्यायाः क्रियायाः साध्यरूपतयाभिधानात् [7]'भूतं भव्यायोपदिश्यते' इति न्यायेन तस्याः प्राधान्यावगमात् प्रकृत्यर्थ एव प्रधानमिति वैयाकरणानां दर्शनस्थितिः। [8]'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति तु प्रायिकम्। अत एव सूत्रकृता तत् प्रत्याख्यातम् — [9]'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' इति। मीमांसकास्तु तिङां भावनावचनत्वमूरीकृत्य प्रत्ययार्थप्राधान्यमाख्यातेषु वर्णयन्ति, तदसदित्यस्मदाचार्याः। अन्वयव्यतिरेकाभ्यां धातुरेव करोत्यर्थलक्षणभावनावचनः, प्रत्ययस्तु कर्त्रादिसाधनमेवाभिधत्ते। धात्वर्थव्यतिरिक्तस्यापरस्य [10]कर्तृव्यापारस्याप्रतीतेर्धात्वर्थादन्या न भावना नाम काचिद्विद्यते। सिद्धासिद्धयोश्च साध्यसाधनभावेन समन्वयोपपत्तेः प्रकृतिप्रत्ययार्थयोरन्वयो युक्तः। तस्माद् यजेतेति यागः कर्तव्य इत्येवार्थः, न तु यागेन स्वर्गं भावयेदिति। अत एव भगवता सूत्रकारेण लकाराणां भावकर्मकर्तारोऽर्था उक्ताः [11]'लः कर्मणि च भावे चाकर्मकेभ्यः' इति। ननु क्रियापेक्षयापि फलं प्रधानम्, [12]तदर्थं प्रवृत्तेरिति चेन्न, वस्तुतः फलं प्रधानं भवतु, आख्यातशब्दात्तु क्रियैव प्राधान्येनावसीयते। पचतीति पाकं करोतीत्यर्थः प्रतीयते। स पाकः फलसाधनायेति सामर्थ्यादवगम्यते, शब्दान्तराद्वा। नाख्यातात् तदवगतिः। क्रियैव वाक्यार्थ इति वैयाकरणानां सिद्धान्तः। तथा चोक्तं हरिणा —

[13]'साध्यत्वात् तत्र चाख्यातैर्व्यापाराः सिद्धसाधनाः।
प्राधान्येनाभिधीयन्ते फलेनापि प्रवर्तिताः॥'

इत्यलम्। **इत्ययमत्रार्थ इति**। अयमेवार्थः साधीयानित्यर्थः॥

---

[1] वाक्यपदीयम् ३. १२.१,२.
[2] 'व्यक्तिवाचाम्' इति पूनामुद्रिते।
[3] वाक्यपदीयम् ३. १२. ४.
[4] पा. सू. २.३.६५.
[5] महाभाष्यम् ३.१.६७. प्रकृतिप्रत्ययार्थौ — घ, ङ.
[6] प्रधानेन — घ, ङ.
[7] लौ. न्या. साहस्री. पृष्ठम् २६०.
[8] महाभाष्यम् ३.१.६७.
[9] पा. सू. १.२.५६.
[10] कर्तृव्यापारस्य प्रतीतेः — घ.
[11] पा. सू. ३.४.६९.
[12] तदर्थप्रवृत्तेरिति — ङ.
[13] वाक्यपदीयम् ३.८.४१.

[३, १४६–१५३]

(उद्द्योतनम्) 'विचार्यते' इत्यत्र णिजर्थं विविनक्ति — **विचरतीति**। ननु प्रयुक्तानामन्वाख्यानम्, प्रयोगश्चार्थविशेषे नियत इति तदनुसारेण सूत्रार्थो वाच्य इति भाष्योक्तसंशयो न युक्तः, अत आह — **इहेति**। शब्दविषय इत्यर्थः। पदानां तदवयवानां चेति विग्रहः। यद्वा पदस्य येऽवयवाः प्रकृत्यादिरूपास्तेषामित्यर्थः। **आवापः** पदस्यावयवस्य वा प्रक्षेपः, तदपनय उद्धारः। अव्यवस्थामेवाह — **सार्वधातुकमिति**। तिङ्रूपमित्यर्थः। अन्यथा 'गच्छ' इत्युदाहरणासंगतिः, तत्र शपः सार्वधातुकस्य विद्यमानत्वात्। [1]'अतो हेः' [2]'चिणो लुक्' इत्युभयत्र सार्वधातुकस्य लुक्। **तथा** यथा [3]तिङभावे तथा विकरणाभावेऽपीत्यर्थः। **लविषीष्टेति**। लूञ्, आशीर्लिङ्, [4]तस्य तादेशः, सीयुट्, [5]'सुट् तिथोः' यलोपः, षत्वष्टुत्वे, इट्, गुणावादेशौ। तत्र श्नादिविकरणः कोऽपि नास्तीत्यर्थः[6]। **अजागरिति**। जागृ लङ्, अट्, तिप इकारलोपः, गुणः, रपरत्वम्, हल्ङ्यादिलोपः, शपो [7]लुक्। अत्र विकरणसार्वधातुकयोरभावः। नन्वर्थान्तरसत्त्वेऽप्येकत्वादिकमादाय वचनानि स्युः, अत आह — [8]**एकत्व एवेति**। 'अतदर्थत्वात्' इत्ययुक्तम्, अर्थान्तरसत्त्वेऽपि तदर्थत्वानपायात्, अत आह — **सामर्थ्यादिति**। विद्यमानस्याप्यभाववचनसामर्थ्यादित्यर्थः। ननु [9]'कर्तरि शप्' इत्यत्रेव [10]'कर्तरि कृत्' इत्यत्रापि कर्तरि विकरणः स्वार्थे कृदिति व्याख्यानसंभवात् कथं कर्ता कृदर्थः, अत आह — **क्वचिदेवेति**। कृताभिहिते मास्तु विकरणः, पाचक इत्यादेस्तेन विनापि सिद्धेः, अत आह — **ततश्चेति**। धारिपारिभ्यां [11]ण्यन्ताभ्यां [12]'लिम्पविन्द' इति कर्तरि शः। तस्मिन् परतः शबभावे गुणो न स्यात्, शस्यापित्त्वेन ङित्त्वात्। तथा चेयङि 'धारियः' इत्यनिष्टरूपं स्यादित्यर्थः। 'न लेनापि' इत्यनेन किमुच्यते, अत आह — **लः कर्मणीति**। 'कथमशक्यम्' इति भाष्यतात्पर्यमाह — [13]**तत इति**। 'लः कर्मणः' इत्युक्तौ सूत्रभेदः स्यात्, अत आह — **कर्मणीति**। कर्मण इत्यनेन कथं विकरणलाभः, अत आह — [**कर्माभिधायीति**]। 'लः कर्मणो भावात्' इत्ययुक्तम्, अर्थशब्दयोः पौर्वापर्यासंभवादिति शङ्कां [14]वा निराह — **कर्माभिधायीति**। लक्षणयेत्यर्थः। 'भावाच्च' इति भाष्ये भावाभिधायिविकरणादित्यर्थः। **नन्विति**। [15]'सार्वधातुके यक्' इति तस्मिन् परतो विकरणविधानादित्यर्थः। **एवं** कर्मणि वर्तमानाद्विकरणाल्ला भवन्तीत्येवम्। **एवं तर्हि कृत इति**। यस्मिन् विषये लकारे कृते तदादेशस्य सार्वधातुकस्य [16]विवक्षा तत्राकृत एव लकारे तदादेशे च पूर्वं कर्मादौ विकरणाः क्रियन्ते, पश्चात् ततः परो लकारस्तदादेशश्च क्रियत इत्येवं व्याख्यानान्नोक्तदोष इत्यर्थः। नन्वभिधायकस्य लुकि तदभिधानं [17]लेन कर्तव्यम्, अन्यथा तत्प्रतीतिर्न स्यात्, अत आह — **विकरणेति**। यथा स्वमोर्लुकि दधीत्यादौ प्रकृतेरेव कर्माभिधायित्वं तथा शपो लुक्यपि प्रकृतेरेव तदर्था-

---

[1] पा. सू. ६.४.१०५.
[2] पा. सू. ६.४.१०४.
[3] लिङभावे — ऋ.
[4] लिङ्लकारस्येत्यर्थः।
[5] पा. सू. ३.४.१०७.
[6] 'इत्यर्थः' इति नास्ति — ऋ.
[7] अदिप्रभृतिभ्य इत्यनेनेत्यर्थः।
[8] एकत्वे चेति — अ.
[9] पा. सू. ३.१.६८.
[10] पा. सू. ३.४.६७.
[11] 'ण्यन्ताभ्याम्' इति नास्ति — अ.
[12] पा. सू. ३.१.१३८.
[13] तत्रेति — अ, ऋ, लृ.
[14] 'वा' इति नास्ति — ऋ, लृ.
[15] पा. सू. ३.१.६७.
[16] विवक्षा कृत एव लकारे — अ.
[17] तेन — अ, ऋ, लृ.

भिधायित्वम्, न लकारस्येत्यर्थः। **प्रतिज्ञातम्** [1]'अदिप्रभृतिभ्यः' इत्यनेन। **लिङ्** आशीर्लिङ्। अनेन किं दूषणमुक्तम्, अत आह — **ततश्चेति**। विकरणात्परो लः साधुरिति तेन व्याख्यानादित्यर्थः। **विधानेति**। विकरणाभावेऽपि लिङ्लिटोर्विधानसामर्थ्यादित्यर्थः। आदिना कर्मग्रहः। कर्तृप्रतीतिमङ्गीकरोति — **कर्तरीति**। लकारस्य कृत्त्वादित्यर्थः। **प्रकारान्तरेणेति**। पूर्वं [2]त्रयं विकरणार्थं इति पक्षो निरस्तः, इदानीं कश्चिद्विकरणार्थः, कश्चित् सार्वधातुकार्थ इति पक्षं निरसितुमुपन्यस्यतीत्यर्थः। [3]प्रत्ययद्वयस्यार्थभेदं दृष्टान्तेनाह — **यथेति**। भाष्ये **इदमस्येति**। इदंशब्देन 'प्रकृतिप्रत्ययौ' इत्यस्य परामर्शः। 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इत्येतत् स्वाभाविकं वाचनिकं वास्तु, विकरणसार्वधातुकयोरुक्तविधया भिन्नार्थत्वे सहवचनभङ्गप्रसङ्गादयमपि प्रकारो न युक्त इत्यर्थः। एतमेवार्थं दृष्टान्तवैषम्येणोपपादयति — **अग्रमर्थ इति**। **यत्र** ग्रामं गच्छतीत्यादौ। **विरोधाभावात्** विशिष्टवाक्यार्थप्रतीतेरित्यादिः। **कार्यभेदः** द्वितीयालकाररूपः। **एकस्मिन्** पचतीत्यादौ। **साहायकं** सहायत्वम्, [4]'योपधात्' इति वुञ्, तदभावादिदित्यर्थः। विरुद्धार्थत्वमुपपादयति — **तथा हीति**। **पच्यत इति**। यथा पच्यत इति लकारेण क्रियाविशिष्टं कर्म प्राधान्येन प्रतिपाद्यते तथा विकरणेनापि प्रतिपाद्यम्। न च पचतीत्युक्ते कर्तृकर्मणोः प्राधान्येन प्रतीतिरस्ति, व्युत्पत्तिविरहात्। किं तु कर्तुरेव। स चाख्यातार्थ एवेत्यर्थः। **पूर्वभेदेति**। पूर्वं विकरणार्थः कश्चित्, कश्चिच्च सार्वधातुकार्थ इति पक्षभेद उक्तः। अनेकपक्षः एकपक्षः संपन्न इति च्विनिर्देश इत्यर्थः। [5]शास्त्रे नियमद्वयस्यापि प्रसिद्धत्वादत्र को नियमो विवक्षितः, अत आह — **अर्थेति**। विनिगमकमाह — [6]**कर्मादीति**। अर्थनियममभिनयन् [7]कर्मार्थत्वमुपपादयति — **तत्रेति**। **न त्विति**। एकत्वं [8]एवैकवचनमित्येवंरूपेणेत्यर्थः। प्रत्ययनियमपक्षेऽपि कर्माद्यर्थोपपादनाय 'अथवा' इति भाष्यम्। तत्र सामान्येन नियमासंभवे विशेषनियमे किं नियामकम्, अत आह — **कर्मादीति**। एकत्वादीनां संख्यात्वेन तुल्यजातीयत्वम्। ननु कर्मवद्भावेन कर्तृत्वबाधाद्यगेव भविष्यतीति किं वचनेन, अत आह — **कर्मवदिति**। वचनस्य पाक्षिकत्वं सूचयन्नाह — **यदेति**। [9]'कर्मवत्' इति सूत्रे [10]कर्मसंबद्धस्य यगादिशास्त्रस्यातिदेशे तदपेक्षया शपः परत्वात् तन्निवृत्तये कर्मकर्तर्युपसंख्यानं कार्यम्, कर्मकार्यस्य यगादेरतिदेशे तु [11]'कर्मवत्' इत्यनेन यग्विधानात् तस्य शबपेक्षया परत्वादुपसंख्यानं [12]न कर्तव्यमित्यर्थः। **सर्वा** अनन्तरा शपः, तद्व्यवहिता श्यनः। **योगविभागेन** कर्तरि कर्मणि यगित्यनेन। 'परा' इति हेतुगर्भविशेषणमित्याह — **परत्वादिति**। शब्बाधेन चरितार्थं योगविभागं परत्वात् श्यन् बाधत इत्यर्थः। 'ननु चेयम्' इत्ययुक्तम्, श्यनः शबपवादत्वेन तस्य श्यन्बाधकत्वायोगात्। अतो योगविभागप्राप्तिपरत्वेन व्याचष्टे — **योगेति**। सा कथं [13]परां बाधेत, अत आह — **पूर्वेति**। **बाधिका** श्यन्-

---

[1] पा. सू. २.४.७२.

[2] भावकर्मकर्तृरूपम्।

[3] सार्वधातुकविकरणरूपप्रत्ययद्वयस्येत्यर्थः॥ प्रत्ययस्यार्थभेदं — ऋ.

[4] पा. सू. ५.१.१३२.

[5] शास्त्रीयनियमद्वयस्यापि — अ.

[6] 'तदयमिति' इत्येव प्रतीकः 'अ, ऋ, लृ' कोशेषु दृश्यते। प्रदीपे विद्यमानपदानुरोधेन 'कर्मादीति' इति निवेशितः प्रतीकः।

[7] कार्यार्थत्वमुपपादयति — अ.

[8] एवकारो नास्ति — अ.

[9] पा. सू. ३.१.८७.

[10] कर्मसंबन्धस्य — अ, ऋ, लृ.

[11] पा. सू. ३.१.८७.

[12] 'न' इति नास्ति — अ.

[13] परं — अ.

प्राप्तेः। **न्याय्येति।** [1]'विप्रतिषेधे परम्' इति सूत्रोक्तः [2]परविप्रतिषेधो न्याय्यः। क्वचि-ल्लक्ष्यानुरोधेन पूर्वप्राबल्यमङ्गीक्रियते, अत्र तु तदङ्गीकारं विनापि समाधिसंभवान्न तत् संभवतीत्यर्थः। [3]**दुर्बलेति।** अनेन भाष्यस्थ[4]प्रतिषिद्धाशब्दस्य दुर्बलेत्यर्थ उक्तः। अनुवृत्तिं विनापि तयोरेव यक्सिद्धौ हेतुमाह — **सार्वधातुक इति। अनुवृत्तिरिति।** सूत्रकारेणानुवृत्त्यङ्गीकारात्। तत्र च संप्रदाय एव मानम्। **अत्रापीति।** भावकर्मणोरित्यनुवृत्त्या कर्मकर्तरि शब्बाध्यत इति व्याख्यानेऽपि। **अन्यथा** योगविभागाभावे। भाष्ये **पूर्वविप्रतिषेधावचनाय** योगविभागाभावे यका श्यनो बाधनाय पूर्वविप्रतिषेध आश्रयणीयः स्यात्, स [5]च जघन्य इति भावः। **तत्र चेति।** [6]'भावकर्मणोः' इत्यतः। ननु तत्र कर्तरीति योगविभागो वचनशब्दार्थः, इह किं वचनम्, अत आह — **चिण्ग्रहणं इति।** [7]'चिण् ते पदः' इत्यतः। **भाष्ये चिण्वद्भाव इति।** [8]'स्य-सिच्सीयुट्' इति कर्मकर्तर्यपि चिण्वद्भावार्थमित्यर्थः। ननु तत्रोदाहरणानां बहुत्वात् 'नैकं प्रयोजनम्' इत्ययुक्तम्, अत आह — [**अन्यथेति**]। **अन्यथा** चिण्वद्भावमात्रप्रयोजनत्वे ॥

[३, १४६–१५३]

(**रत्नप्रकाशः**) विचारान्तरमारभते — **इदमिति। एकद्विबहुष्विति।** 'द्व्येकयोरेव द्विवचनैकवचने, बहुष्वेव बहुवचनम्' इति नियमो न स्यात्, कर्त्रादीनामपि तदर्थत्वादिति भावः। **अतदर्थत्वादिति।** तन्मात्रार्थकत्वाभावादित्यर्थः। **कृताभिहित इति।** [9]'कर्तरि कृत्' इत्युक्तत्वात् कृता कर्तुरभिधानं भवति। कृद्ग्रहणं लकारसाधारणं वा लकारभिन्नपरमेव वाभिमतं तस्येति संदेहात् पृच्छति कश्चित् — **किमुच्यत इति।** लकारभिन्न[10]परमेव कृद्ग्रहणमित्याशयेनोत्तरमाह — **न शक्यमिति।** [11]**न चेदं पक्षान्तरं स्यादिति।** लकारस्य कर्त्राद्यर्थकत्वे आश्रीयमाणे कर्त्रादीनां सार्वधातुकार्थत्वमेव स्यादिति विकरणार्था इति पक्षान्तरं न स्यादिति भावः। ननु मास्तु तत् पक्षान्तरम्, लेनाभिधानमाश्रयितुं कुतो न शक्यते [12]'लः कर्मणि च भावे चाकर्मकेभ्यः' इति प्रत्यक्षसूत्रस्य विद्यमानत्वादित्याशयेनाह — **कथमशक्यमिति।** 'कर्मणि, भावे' इति पञ्चम्यर्थे [13]सप्तमीत्यन्यार्थकत्वेन तत् सूत्रमुपपन्नमित्याशयेनाह — **एवं वक्ष्यामीति। लः कर्मण इति।** कर्मणि भावे कर्तरीति पदानां तद्वाचकविकरणलक्षकत्वेन लकाराः सकर्मकेभ्यः कर्मकर्तृवाचकाद् विकरणात् परे स्युः, अकर्मकेभ्यस्तु भावकर्तृवाचकादिति तत्सूत्रार्थसंभवाद् भावकर्मकर्तारो विकरणार्था इति

---

[1] पा. सू. १.४.२.

[2] 'परविप्रतिषेधः' इत्यस्यानन्तरं 'न' इत्यधिकम् — अ.

[3] प्रदीपे 'दुर्बलो योगविभागप्राप्तिक इत्यर्थः' इत्यत्र 'दुर्बला योगविभागप्राप्तिरित्यर्थः' इति पाठोऽन्नंभट्टाभिमतः। अयं पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टो वर्तते।

[4] विप्रतिषेधादिशब्दस्य — अ; प्रतिषेधादिशब्दस्य — ऋ, ऌ.

[5] चकारो नास्ति — ऋ.

[6] अस्य 'कर्मग्रहणानुवर्तनात्' इत्येतच्छेषत्वं बोध्यम्॥ भावकर्मणोरित्यर्थः — ऋ, ऌ.

[7] पा. सू. ३.१.६०.

[8] पा. सू. ६.४.६२.

[9] पा. सू. ३.४.६७.

[10] पदमेव — ब.

[11] 'नेदं पक्षान्तरं स्यात्' इति भाष्ये दृश्यते। 'न चेदं पक्षान्तरं स्यात्' इति रत्नप्रकाशकृत्पाठ इति भाति।

[12] पा. सू. ३.४.६९.

[13] षष्ठीत्यन्यार्थकत्वेन — ब.

पक्षसंभव इति भावः। अस्मिन् [1]"सार्वधातुके यक्' [2]"कर्तरि शप्' इत्यादौ सार्वधातुक इति विषयसप्तमी बोध्या। तथा च [3]"लः कर्मणि च' इति सूत्रप्रवृत्त्युत्तरमेव लादेशेऽपि न दोषः। ननु भावादयो विकरणार्था इति पक्षान्तरं न स्यादेव, [4]"लः कर्मणि च' इति सूत्रस्य लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि चेत्येतदर्थकताया एवावश्याश्रयणीयत्वादित्याशयेनाह — **यस्मिंस्तर्हीति**। **उक्ते कर्तृत्वे लुगिति**। विकरणानां भावकर्मकर्त्रर्थत्वे सिद्धे सति ततो विकरणस्य लोप इति यः शिष्यते स लुप्यमानार्थाभिधायीति धातुरेव तत्र कर्तृवाचको भविष्यतीति भावः। तथापि स पक्षो न स्यादेवेत्याह — **यस्मिंस्तर्हीति**। साधितमर्थमुपसंहरति — **तस्मादिति**। भवतु लेनाभिधानम्, किं तत इत्यत आह — **भवति चेदिति**। **अभिहिते विकरणाभाव इत्येवेति**। तथा च स पक्षो न संभवत्येवेति फलितम्। तत्पक्षवादी पलायमानोऽपि शङ्कते — **एवं तर्हीति**। अस्तु [5]"लः कर्मणि' इति सूत्रस्य त्वदभिमत एवार्थः, तथापि भावादयो विकरणार्था इति पक्षः संभवत्येवेति मन्यते। कथं तत्संभव इत्यत आह — **यदेत्यादि**। तादृशी कल्पना न युज्यत इत्याशयेनाहान्यः — **इदमस्येति**। इदंशब्देन विवक्षितमाह — **प्रकृतिप्रत्ययाविति**। किं तत इत्यत आह — [6]**न चास्ति संभव इति**। तथा च फलितमुपसंहरति — **एवं च कृत्वेति**। **सुपां कर्मादयोऽप्यर्था इति**। व्याख्यातमिदं [7]"बहुषु बहुवचनम्' इति सूत्रे। **कर्मकर्तरीति**। [8]"कर्मवत् कर्मणा' इति कर्मत्वव्यपदेशेऽपि कर्तृत्वानपायात् तदाश्रयः शप् परत्वात् प्राप्नोतीति तद्बाधनार्थं यग्विधेय इति भावः। [9]"कर्मवत् कर्मणा' इत्यनेन कार्यातिदेशे तु परत्वात् तेन यगेव स्यादिति नास्य वचनस्य प्रयोजनम्, नापि योगविभागस्य। समाधत्ते — **योगविभागादिति**। **ननु चैतदपीति**। योगविभागस्येष्टसिद्धयर्थत्वात् स्वविषये प्राप्तं सर्वं बाध्यत इति भावः। इतरस्तमाशयमबुद्ध्वाह — **न सिध्यतीति**। **अनन्तरस्येति**। पुरस्तादपवादोऽनेनोक्तो ज्ञेयः। [10]"अनन्तरस्य विधिः' इत्यत्र हि विधिग्रहणं नियमविधिपरम्। अथवा [11]"विप्रतिषेधे परं कार्यम्' इत्यस्यापवादिका परिभाषेयम्। तथा च नियमविधिरेवायं संपन्नो यकोऽन्यस्य च प्राप्तौ यगेवेतीति यथाश्रुतमेव भाष्यमुपपन्नम्। **परा प्राप्तिरिति**। [12]"दिवादिभ्यः श्यन्' इत्यादिः। **ननु चेयं प्राप्तिरिति**। योगविभागस्येष्टसिद्धयर्थत्वादनया प्राप्त्या परापि प्राप्तिर्बाध्यत इति भावः। **नोत्सहते प्रतिषिद्धा सतीति**। [13]"अनन्तरस्य विधिर्वा' इत्यनेनेति शेषः। [14]"तुष्यतु दुर्जनः' इति न्यायेन समाधानान्तरमाह — **एवं तर्हीति**। समाधानान्तरमाह — **अथवेति**। **अन्तरेणेति**। औत्सर्गिकस्य यकः कर्तरि शबादयो बाधका भवन्तीति भावकर्मणोरेव यग् भविष्यतीति भावः। तथापि शप एव बाधकः स्याद्यक्, न श्यनादीनाम्, अतः श्यनादिबाधनार्थं 'कर्तरि' इति योगविभागः कर्तव्य एवेत्याह — **कर्तरीति चेति**। समाधानान्तरमाह — **अथवेति**। **वचनादिति**। [15]"कर्तरि कर्मव्यतिहारे' इत्यत्र कर्तरीति योगविभागात् तत्र च कर्मग्रहणानुवर्तनादन्तरेणापि वचनमात्मनेपदं सिद्धमिति भावः। **चिणपीति**। चिणित्यनुवर्त-

---

[1] पा. सू. ३.१.६७.
[2] पा. सू. ३.१.६८.
[3] पा. सू. ३.४.६९.
[4] पा. सू. ३.४.६९.
[5] पा. सू. ३.४.६९.
[6] नास्ति संभव इति — ब.
[7] पा. सू. १.४.२१.
[8] पा. सू. ३.१.८७.
[9] पा. सू. ३.१.८७.
[10] परिभाषा ६२.
[11] पा. सू. १.४.२.
[12] पा. सू. ३.१.६९.
[13] परिभाषा ६२.
[14] लौ. न्या. द्वितीयभागे पुटम् ३५.
[15] पा. सू. १.३.१४.

माने पुनश्चिण्ग्रहणसामर्थ्यात् कर्मकर्तर्यपि स सिद्ध इति भावः। **नैकमिति**। अन्यथा [1]'स्यसिच्-सीयुट्' इति सूत्रानन्तरं 'कर्मकर्तरि च' इत्येव ब्रूयादिति भावः।।

[३, १४६–१५३]

(नारायणीयम्) नाना गच्छतीति। एकमेव वस्तु धर्मिरूपं [2]धर्मभेदावभासान्नाना गच्छति। यथा-किं नित्यः शब्द उतानित्य इति। नाना गच्छद् वस्तु परीक्षकेण नानात्वं नीयते, परीक्ष्यत इति यावदिति। परीक्षा विचारणेत्याह — **नानात्वं नीयत इति**। कथमस्य विचारस्योत्थान-मित्याशङ्क्य [3]तद्रुपदर्शनायाह — **इहान्वयेति**। पदावयवानां प्रकृतिप्रत्ययादीनां केवलं लोके प्रयोगभावाल्लौकिक्यर्थवत्ता नास्तीति शास्त्रीया सा गृह्यते। शास्त्रे चान्वयव्यतिरेकाभ्यां कल्पि-ताभ्यां परिकल्प्यते सेति यस्यावापे प्रक्षेपे यस्यार्थस्यावगतिः, उद्धारे ततोऽपनयने चानवगतिः स तस्यार्थ इत्येवं कल्पना बुद्ध्या व्यवस्थाप्यत इत्यर्थः। [4]तर्ह्यत्राप्यन्वयव्यतिरेकाभ्यामेव व्यवस्थास्तु, किं विचारेणेत्याशङ्क्याह — **तौ चेति**। तयोरव्यवस्थामेवोपपादयति — **सार्वधातुकमन्तरेणेति**। **कः पक्ष इति**। यस्मिन् पक्ष आश्रीयमाणे शास्त्रस्य न विरोधः स एवाश्रयणीयः, नान्य इत्या-शयेन विचारः क्रियत इत्यर्थः। प्रत्ययनियमपक्षमाश्रित्य नियमानुपपत्तिदोष उद्भावित इत्याह — **एकत्व एवेति**। ननु 'अतदर्थत्वात्' इत्यसिद्धो हेतुः, एकत्वादीनां विभक्त्यर्थत्वाभ्युपगमादित्यत आह — **सामर्थ्यादिति**। ननु विकरणस्य कर्त्रर्थत्वात् [5]'कर्तरि कृत्' इति कृतस्तदर्थनिर्देशो न कर्तव्य इति चेन्नेत्याह — **क्वचिदेवेति**। 'धारयः' इत्यादौ विकरणाभावे को दोष इत्यत्राह — **असति शपि गुणो न स्यादिति**। [6]'अनुपसर्गाल्लिम्पविन्द' इति शः। तस्य [7]'सार्वधातुकमपित्' इति ङित्त्वात् तन्निबन्धनो गुणो न प्राप्नोतीति शबेषितव्य इत्यर्थः। ननु 'लः कर्मणः' इत्युच्य-माने सूत्रभेदः स्यादित्यत आह — **व्याख्यास्यामीत्यर्थ इति**। व्याख्यानमेव दर्शयति — **कर्मणि वर्तमानादिति**। ततश्च भाष्ये कर्मभावशब्दौ लक्षणया विकरणवचनावित्याह — **तत्र कर्माभि-धायीति**। **ननु सार्वधातुकनिमित्त इति**। सार्वधातुके परतो यगादीनां विधानात्। **न तु विकरणनिमित्त इति**। कृते लकारे तस्य स्थाने सार्वधातुके च विकरणविधानात्। **लः साधु-र्भवतीति**। यथास्वं लक्षणेन विहितस्यापि लकारस्य विषयविशेषे साधुत्वं [8]'लः कर्मणि च' इत्यनेन नियम्यत इत्यर्थः। ननु श्रूयमाणः शब्दोऽर्थस्य वाचकः, न तु लुप्त इति किमुच्यते 'उक्ते कर्तृत्वे लुग् भविष्यति' इति, तत्राह — **विकरणलोपेति**। [9]विकरणानुत्पादात् फलितं दोषं स्फोरयति — **ततश्चेति**। [10]**विधानसामर्थ्याद्वेति**। [11]'आशिषि लिङ्लोटौ' [12]'परोक्षे लिट्' इत्यादिलकारविधानस्य सामर्थ्यादित्यर्थः। ननु लकारस्य भावाद्यर्थानभिधायित्वेऽनर्थकत्वात् प्रयोग एव न स्यादित्यत्राह — **कर्तरि कृदिति**। लेनाभिधानाभ्युपगमेन विकरणार्थपक्षानुपपत्तिरुक्ता भवतीत्याह — **तत-श्चेति**। कथं पुनर्विरुद्धयोर्द्वयोः साधनयोर्विकरणलकारोत्पत्तिरुपपत्तिमती स्यादित्यत्राह — **यथा**

---

[1] पा. सू. ६.४.६२.
[2] धर्मभेदावभासनात् — ङ.
[3] तद्रूपदर्शनायाह — ङ.
[4] तस्य चात्रान्वय — ङ.
[5] पा. सू. ३.४.६७.
[6] पा. सू. ३.१.१३८.
[7] पा. सू. १.२.४.
[8] पा. सू. ३.४.६९.
[9] विकरणानुत्पादनात् फलितदोषं — ङ.
[10] विधानसामर्थ्याच्चेति — ङ.
[11] पा. सू. ३.३.१७३.
[12] पा. सू. ३.२.११५.

ग्राममिति। ग्रामं गच्छतीत्यादौ भिन्नपदवाच्यत्वाद् द्वयोः साधनयोरेकत्र लकारः, अन्यत्र द्वितीयेति युक्तं वक्तुम्। एकेन तु पदेनैकार्थो विशिष्टोऽभिधातव्यः। तत्र विरुद्धयोरर्थयोः परस्परान्वया-योगाद्विशिष्टाभिधानाभावात् प्रयोगोऽनर्थक एव स्यादित्ययं पक्षो नाङ्गीकर्तव्य इति परिहारवादिन आशयं दर्शयति — **अयमर्थ इति**। **एक एवेति**। पक्षान्तरस्यायुक्तत्वात्। अभूततद्भावे च्विप्रत्ययमुपपादयति — **पूर्वभेदेति**। पूर्वं द्वौ पक्षौ भूत्वा विमर्शदशायामेक एव पक्षः संपन्न इति भाष्यार्थः। पक्षान्तराश्रयेण परिहारकथनस्य युक्तत्वमाह — **कर्मादीति**। [१]'कर्मणि द्वितीया' इत्यादिप्रकरणस्यानर्थक्यप्रसङ्गात् प्रत्ययनियमपक्ष आश्रयितुं न युक्त इत्यर्थः। अस्मिन् पक्षे दोष-परिहारप्रकारं दर्शयति — **तत्रैकत्व इति**। प्रत्ययनियमपक्षेऽपि दोषाभावं दर्शयितुं पक्षान्तर-कथनमित्याह — **कर्मादीति**। ननु [२]'कर्मवत् कर्मणा' इति कर्मकार्यातिदेशाद्यकैव भाव्यम्, न तु शपेति किमुपसंख्यानेनेत्यत आह — **कर्मवदित्यतिदेशेनेति**। ननु [३]'कर्मवत्' इति कार्यातिदेशे च परत्वाच्छपं बाधित्वा यगेव प्राप्नोतीति कथं शपो बलीयस्त्वमित्यत आह — **यदा शास्त्रेति**। **सर्वा प्राप्तिरिति**। बाध्यसामान्यचिन्तायां या या प्राप्नोति सा सर्वा योगविभागेन बाध्येति शपमिव श्यनमपि बाधित्वा कर्मकर्तरि यग् भविष्यतीत्यर्थः। 'परा' इति हेतुगर्भमभिधानमि-त्याह — **परत्वादिति**। कथं पुनः पूर्वा प्राप्तिः परां बाधितुमलमित्यत्राह — **पूर्वविप्रतिषेधेनेति**। ननु योगविभागप्राप्तेः प्रतिषेधेन संबन्धं न पश्याम इत्याशङ्क्य 'प्रतिषिद्धा' इत्यनेन दौर्बल्यं लक्ष्यत इत्याशयेन व्याचष्टे — **न्याय्येति**। ननु 'सार्वधातुके यक्' इत्यत्र भावकर्मणोरित्यननुवृत्तौ कर्त-र्यपि [४]यक् स्यादित्यत आह — **सार्वधातुक इति**। **कर्मकर्तर्यपीति**। यत्नाधिक्याद् भूतपूर्वमपि कर्मत्वमाश्रित्य कर्मकर्तरि यग् भविष्यतीत्यर्थः। ननु भावकर्मग्रहणानुवृत्ति[५]यत्नात् कर्मकर्तरि यकि सिद्धे 'कर्तरि' इति योगविभागाश्रयणमनर्थकमित्यत आह — **अन्यथेति**। ननु [६]'भावकर्मणोः' इति वचनात् प्राप्तमात्मनेपदं[७] कर्तरि [८]'शेषात् कर्तरि' इति [९]परस्मैपदं बाधेतेति किमुच्यते 'वचना-दात्मनेपदं भविष्यति' इति, तत्राह — **कर्तरि कर्मेति**। ननु भावकर्मणोर्विधीयमानश्चिण् वच-नात् कर्मकर्तरि कथं भवेदित्यत्राह — **चिण्ग्रहण इति**। पुनर्विधानसामर्थ्याद् भूतपूर्वं कर्मत्वमा-श्रित्य कर्मकर्तरि [१०]भविष्यतीत्यर्थः। **इति वाच्यं स्यादिति**। ततश्चैवं न्यासमकृत्वा [११]'कर्मवत् कर्मणा तुल्यक्रियः' इति सामान्येन कर्मकर्तरि कर्मकार्यातिदेशाद्यग्[१२] भविष्यतीत्यर्थः॥

रुधादिभ्यः श्नम् ३.१.७८.

[३, १५३–१५५]

(उद्द्योतनम्) ननु [१३]भिशब्दस्याङ्गत्वाभावाद् गुणप्रसक्तिरेव नास्ति, अत आह — **भिशब्दस्येति**। अवयवावयविनोरभेदादवयविसंज्ञावयवस्यापीत्यर्थः। **तस्यैवेति**। अवयवावयविनोर्भेदादवयविसंज्ञा

---

[१] पा. सू. २.३.२.
[२] पा. सू. ३.१.८७.
[३] पा. सू. ३.१.८७.
[४] यग् न स्यादित्यत आह — ङ.
[५] सत्त्वात् — ङ.
[६] पा. सू. १.३.१३.
[७] कर्म।
[८] पा. सू. १.३.७८.
[९] कर्तृ।
[१०] चिणित्यादिः।
[११] पा. सू. ३.१.८७.
[१२] यगेव भविष्यतीत्यर्थः — ङ.
[१३] भिद्शब्दस्याङ्गत्वाद् गुण — अ.

नावयवस्य। अन्यथा निपातसंज्ञाप्यवयवानां स्यात्। तथा च प्रतिवर्णमाद्युदात्तत्वप्रसङ्गः। भाष्ये **अङ्गस्येति**। संबन्धे षष्ठी, अङ्गसंबन्धिन आर्धधातुकस्येत्यर्थः। **क्र्यादिष्विति**। [1]'पॄ पूर्तौ', मॄ वर्तने। **तौदादिकाविति**। [2]पृण प्रीणने, मृण भक्षणे। यद्यपि [3]पृणिस्तनादिषु[4] पठ्यते, तथापि भाष्यप्रदीपस्वारस्यात् तुदादिष्वपि ज्ञेयः। भाष्ये **अदुपदेशादिति**। श्नम् अदुपदेशः, न तु श्ना। उपधायाः श्नाकारस्य लोप इत्युक्तौ 'अङ्क्तः' इति कथं न सिध्यति, अत आह — **श्नादिति**। अञ्जेः श्नमि कृते अनन्ज् इति स्थिते[5] नकारलोपस्यासिद्धत्वेन श्नमोऽकारस्योपधात्वाभावेन लोपो न स्यादित्यर्थः। **मीञः** मीञ् हिंसायाम्। **ईत्वम्** [7]'ई हल्यघोः' इत्यनेन। भाष्ये **श्रृणोतेति**। लोण्मध्यमपुरुषे 'थादेशस्य' पित्त्वाद् गुणः। भाष्ये **पत्नयो गर्भिणय इति**। अत्र [8]ह्रस्वे [10]'जसि च' इति गुणः। भाष्ये **यज्ञानामिति**। [11]'यजयाच' इत्यादिना नङ्प्रत्ययः। तस्मात् परस्य नामो नकारस्य [12]लोपप्रसङ्ग इत्यर्थः। [13]ननु नलोपादपि परत्वात् [14]'सुपि च' इति दीर्घोऽत्र भविष्यति, अत आह — **यस्त्विति**। **संनिपातेति**। ह्रस्वनिमित्तको नुट् तद्विघातकदीर्घत्वस्य न निमित्तमित्यर्थः। यदि नामि संनिपातपरिभाषया [15]'सुपि च' इति दीर्घो [16]न प्रवर्तते तदा भाष्यान्तरविरोधः, अत आह — **यस्त्विति**। **अनित्यत्वेति**। [17]'कष्टाय क्रमणे' इति निर्देशादिति भावः। लक्षणपरिभाषाया न्यायमूलत्वमाह — **लाक्षणिकस्येति**। शीघ्रोपस्थितिकस्यैव ग्रहणं युक्तमिति भावः॥

[३, १५३–१५५]

(रत्नप्रकाशः) शित्करणप्रयोजनवार्तिकमवतारयति — **किमर्थं इत्यादिना**। **भिनत्तीति**। भिशब्दस्याङ्गसंज्ञायां गुणः स्यादिति मन्यते। **यस्माच्च प्रत्ययविधिरिति**। भिद इति शेषः। स एव हि रुधादिः। **यच्चेति**। भि इति। **अङ्गस्येड्युच्यत इति**। अङ्गात् परस्यार्धधातु-

---

[1] 'पॄ पालनपूरणयोः' 'मॄ हिंसायाम्' इति धातू क्र्यादिषु पठितौ कौमुद्यां माधवीयधातुवृत्तौ चोपलभ्येते। भाष्यप्रदीपयोः पर्यालोचने तयोरेवात्र निर्देश उचित इति ज्ञायते। 'पॄ पूर्तौ' इति पूरणार्थानुवाद इति युक्तं ग्रहीतुम्। 'मॄ हिंसायाम्' इत्यस्य विषये 'गॄ वर्तने' इति 'ऋ, लृ' कोशयोर्दृश्यते। 'गॄ शब्दे' इति क्र्यादौ पठ्यते। तस्यानेकार्थत्वाद्धातूनां 'वर्तने' इति निर्देश इति वक्तव्यम्। एतत्स्वीकारे भाष्येऽपि 'मृणति' इत्यस्य स्थाने 'गृणति' इति पाठः स्वीकर्तव्यः। यद्वा 'मॄ मर्दने' इति पाठः स्याद्वेति परामर्शनीयम्।

[2] तुदादौ 'पृण प्रीणने' 'मृण हिंसायाम्' इति पठ्येते। तयोरत्र निर्देशो युक्तः। द्वितीये 'भक्षणे' इत्यर्थानुवादो ग्राह्यः। 'ऋ, लृ' कोशयोः 'गृण भक्षणे' इत्युपलभ्यते। 'गृण' इति धातुरेव तुदादौ नोपलभ्यते।

[3] गृणिः — ऋ, लृ.

[4] तनादिषु पृणिर्वा गृणिर्वा न दृश्यते माधवीयधातुवृत्तौ कौमुद्यां च।

[5] नकारलोपे 'अनज्' इति स्थिते, इति शेषः।

[6] नकारलोपस्यासिद्धत्वे श्नमः — ऋ, लृ.

[7] पा. सू. ६.४.११३.

[8] थस्य य आदेशस्तः, तस्येत्यर्थः।

[9] छान्दसत्वादित्यादिः।

[10] पा. सू. ७.३.१०९.

[11] पा. सू. ३.३.९०.

[12] लोप इत्यर्थः — अ.

[13] ननु लोपादपि — ऋ.

[14] पा. सू. ७.३.१०२.

[15] पा. सू. ७.३.१०२.

[16] न प्रवर्तेत — ऋ.

[17] पा. सू. ३.१.१४.

कस्येड्च्यत इत्यर्थः। **प्वादिह्रस्वार्थमिति**। क्र्याद्यन्तर्गणः प्वादिः। तत्र पठितेभ्यः पूप्रभृतिभ्यो व्यत्ययेन श्नमि [1]"प्वादीनां ह्रस्वः" इति ह्रस्वो यथा स्यादित्येवमर्थमित्यर्थः। **धात्वन्तरमिति**। सामान्ये नपुंसकमेकवचनं च। **पृणिमृणी इति**। 'पृण प्रीतौ, मृण हिंसायाम्' इति तुदादौ पठितावेतौ। **वृणस इति**। 'वृ वरणे' इति क्र्यादिः। व्यत्ययेन श्नम् [2]थासौ। 'वृण प्रीतौ' इति तुदादावनार्षः पाठः। **श्न एतद्ध्रस्वत्वमिति**। छान्दसमिति शेषः। **उपधाया इति वर्तत इति**। [3]"ऊदुपधायाः" इति सूत्रादिति शेषः। **अङ्क्त इति**। [4]"श्नान्नलोपः" इति नलोपस्यासिद्धत्वादकारस्यानुपधात्वमिति भावः। **प्रमिणीमीति**। मीनो [5]"मीनातेर्निगमे" इति ह्रस्वः। मिपोऽपित्त्वान्ङित्त्वे सतीत्वम्[6]। **ह्रस्वत्वं वक्तव्यमिति**। श्न इति शेषः। [7]**विशेषणार्थं तर्हीति**। श्नमः शकार इति शेषः। **दीर्घत्वे कृते न भविष्यतीति**। 'न' इति स्वरूपस्य निमित्ततयाश्रितस्याभावादिति मन्यते। वस्तुतस्त्वेकदेशविकृतस्यानन्यत्वात् तत्रापि स्यादेव नलोपः। तदेव मनसि निधाय [8]"तुष्यतु दुर्जनः" इति न्यायेनाह— **परत्वान्नलोप इति**। अन्यथा नित्यत्वाद्दीर्घत्वं स्यादित्ययुक्तं तत् स्यात्॥

[३, १५३–१५५]

(नारायणीयम्) भिनत्तीत्यादौ कथं गुणप्राप्तिरित्यत्राह— **भिशब्दस्येति**। **तौदादिकाविति**। ताभ्यां शे तस्य ङित्त्वाद् गुणाभावे पृणतीत्यादिरूपसिद्धिः। **छान्दसमिति**। छन्दसि [9]"व्यत्ययो बहुलम्" इति वर्णव्यत्ययविधानात्। नन्वञ्जेस्तसि श्नमि नलोपे अनज् तस् इति स्थितेऽकारस्योपधात्वमस्त्येवेत्यत आह— **श्नान्नलोप इत्यस्येति**। पितोऽपित्त्वे प्रयोजनमाह— **मिप इति**। **ईत्वमिति**। [10]"ई हल्यघोः" इत्यनेन। ननु नलोपादपि परत्वात् [11]"सुपि च" इति दीर्घत्वेन भवितव्यमित्यत्राह— **यस्त्विति**। **संनिपातपरिभाषेति**। ह्रस्वसंनिपातनिमित्तो नुट् [12]तद्विघातस्य दीर्घस्य निमित्ततां न भजते। अन्यत्रोक्तेन विरोधमाशङ्क्य परिहरति— **यत्त्वन्यत्रेति**। **अनित्यत्वाश्रयेणेति**। [13]'कष्टाय' इति निर्देशाज्ज्ञापकात्। लक्षणप्रतिपदोक्तपरिभाषाया न्यायसिद्धत्वं दर्शयति— **लाक्षणिकस्येति**॥

तनादिकृञ्भ्य उः ३.१.७९.

[३, १५५–१५६]

(उद्द्योतनम्) लुका लोपस्य बाधितत्वान्न प्रवृत्तिरिति शङ्कते— **नन्विति**। पक्षे प्रवृत्ति-

---

[1] पा. सू. ७.३.८०.

[2] 'वृ वरणे' इति धातोः परस्मैपदित्वादत्र व्यत्ययेन थासुक्तिः।

[3] पा. सू. ६.४.८९.

[4] पा. सू. ६.४.२३.

[5] पा. सू. ७.३.८१.

[6] ई हल्यघोरित्यनेनेति भावः।

[7] भाष्ये 'विशेषणार्थस्तर्हि' इत्यत्र 'विशेषणार्थं तर्हि' इति निर्णयसागरमुद्रिते पाठः।

[8] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[9] पा. सू. ३.१.८५.

[10] पा. सू. ६.४.११३.

[11] पा. सू. ७.३.१०२.

[12] तं विहन्तीति तद्विघातः, तस्येत्यर्थः। कर्मण्यणन्तः।

[13] पा. सू. ३.१.१४.

संभव इति समाधानम्। भाष्ये **चिण्वद्भाव इति**। अकारिषातां कटौ देवदत्तेनेत्यादौ॥

[३, १५५–१५६]

(रत्नप्रकाशः) तनादित्वात् कृञः सिद्धमिति। उप्रत्ययविधानमिति शेषः। **न दुष्यतीति**। अकृतेत्यादिरूपस्य सिद्धत्वादिति भावः। **सोऽपि प्रोक्तो विभाषयेति**। तथा च कृञ उविधानं व्यर्थमिति भावः। एतेन कृञ उविधानेन गणकार्यमनित्यमिति ज्ञाप्यत इति वदन्तो निरस्ताः। तत्प्रत्याख्यानपरप्रकृतवार्तिकतद्भाष्याभ्यां विरोधात्। यत्तु 'येन नाप्राप्तिन्यायेन लुक् सिज्लोपापवादः' इति, तन्न, कृञः प्रातिस्विकरूपेण लुकोऽविधानेन येन नाप्राप्तिन्यायानवतारात्। यदप्युक्तम् 'नैष दोषः, यत्र पक्षे लुक् प्रवर्तते तत्रासौ लोपस्य बाधकः, न त्वप्रवर्तमानः' इति। तदपि न; वैकल्पिकस्यापवादस्याप्रवर्तमानस्यापि बाधकताया अवश्याश्रयणीयत्वात्। अन्यथा [1]'नृ च' इत्यादेरप्रवृत्तिपक्षे [2]'नामि' इत्यादिप्रवृत्तिप्रसङ्गाच्च॥

[३, १५५–१५६]

(नारायणीयम्) न त्वप्रवर्तमान इति। अप्रवर्तमानस्य बाधकत्वेऽतिप्रसङ्गात्॥

धिन्विकृण्व्योर च ३.१.८०.

[३, १५६–१५७]

(उद्द्योतनम्) बहुव्रीहीति। धातोर्लोपो यस्मिन् आर्धधातुक इत्येवमित्यर्थः। उप्रत्ययस्यार्धधातुकत्वात् [3]'नैषः' इत्ययुक्तम्, अत आह — **संनियोगेति**। [4]'इदितो नुम् धातोः' इत्यत्र प्रत्ययनिमित्तत्वं न श्रूयत इत्याशङ्क्य 'अङ्गस्य' इति पदसूचितामुपपत्तिमाह — **नुम्विधाविति**॥

[३, १५६–१५७]

(रत्नप्रकाशः) न चैष इति। [5]अकारविध्यनन्तरं चकारानुकृष्टस्योप्रत्ययस्य विधानाल्लोपस्याकारस्थानापन्नस्य कथमपि नार्धधातुकनिमित्तकत्वमिति भावः। लोलुवादिवदिदमपि तस्योदाहरणं नेत्याशयेनाह — **अपि चेति**। [6]**प्रत्याख्यायतेऽपीति**। अपिशब्दान्न प्रत्याख्यायत इति लभ्यते। तथा च लोलुवाद्युदाहरणापेक्षया प्रत्याख्यायते, उदाहरणान्तरापेक्षया तु न प्रत्याख्यायत इति प्रत्याख्यानाप्रत्याख्यानयोर्व्यवस्था ज्ञेया। यथेदं तथा तत्रैव व्याख्यातमस्माभिः। **अनिष्टे देश इति**। अकारात् परत्रेत्यर्थः। **उत्पन्ने प्रत्यय इति**। अङ्गाधिकारे तद्विधानादिति भावः॥

---

[1] पा. सू. ६.४.६.

[2] पा. सू. ६.४.३.

[3] भाष्ये 'न चैषः' इत्यस्य चकारं विनानुवादो बोध्यः।

[4] पा. सू. ७.१.५८.

[5] यथान्यास इत्यादिः।

[6] भाष्ये 'प्रत्याख्यायते स योगः' इति हरयाणामुद्रिते पाठः। निर्णयसागरमुद्रिते 'प्रत्याख्यायते खल्वपि स योगः' इति पाठो दृश्यते। 'प्रत्याख्यायतेऽपि स योगः' इति रत्नप्रकाशकृत्पाठ इति भाति।

[३, १५६–१५७]

(नारायणीयम्) [1]वलोपस्यार्धधातुकनिमित्तत्वाभावमुपपादयति — **संनियोगेति**। अनिष्टं देशं दर्शयति — **अकारादिति**॥

हलः श्नः शानज्झौ ३.१.८३.

[३, १५७–१६०]

(उद्द्योतनम्) के तबादयः, अत आह — **तबिति**। [2]लोण्मध्यमपुरुषतस्यैते आदेशाः स्युश्छन्दसि। ननु तातङि पित्कृतं किं प्राप्नोति, अत आह — **पित्त्वेति**। ब्रूतादित्यत्र [3]'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वं [4]'ब्रुव ईट्' इतीडागमश्चापाद्यत इत्यर्थः। स्थानिवद्भाव[5]प्राप्तपित्त्वस्य प्रयोजनमुक्त्वौपदेशिकङित्त्वस्य तदाह — **ङित्त्वेति**। 'अपित्' इत्युक्ते पिन्नेति कथं लभ्यते, अत आह — **प्रसज्येति**। एवमपि ङिति पित्त्वस्य प्रतिषेधः, न तु पिति ङित्त्वस्य, अत आह — **पिद् भवन्निति**। नन्वेवमानन्तर्यात् [6]'सार्वधातुकम्' इति प्राप्तङित्त्वस्य पिति निषेधः, न तु तप्तनपोः स्थानिवद्भावप्राप्तङित्त्वस्यापि। तेन 'शृणोत' इति गुणः कथम्, अत आह — **योगेति**। **यावतीति**। [7]'सार्वधातुकम्' इत्यनेन स्थानिवद्भावेन वा प्राप्तिः। ननु 'असंयोगात्' इत्यत्र ङिदपिदित्यभावात् कथं ङितः पित्त्वनिषेधः, अत आह — [8]**अत्रेति**। निषेधस्य प्रयोजनमाह — **तातङ इति**। तथा च 'ब्रूतात्' इत्यत्रानुदात्तेटौ न भवत इत्यर्थः॥

[३, १५७–१६०]

(रत्नप्रकाशः) [9]**'सार्वधातुकार्थ इति**। सार्वधातुकसंज्ञार्थ इत्यर्थः। **सार्वधातुकादेश इति**। तेन संक्षुध्येत्यादावार्धधातुकादेशोऽल्विधौ वर्तमानाप्यनुबन्धाश्रिता किदादिसंज्ञा सिध्यति। **अनुबन्धा न स्थानिवदिति**। अनुबन्धप्रयुक्ताः संज्ञाः स्थानिवद्भावेन न भवन्तीत्यर्थः। **तबादिषु चेति**। [10]'तप्तनप्तनथनाश्च' इति सूत्रनिर्दिष्टेष्वित्यर्थः। तथा च तप्तनपोः पकारः स्वरार्थ एवेति सिद्धम्। **तस्यैतस्येति**। शानचः शित्करणेन ज्ञाप्यस्येति शेषः। **नायं शित् स्यादिति**। तथा च वेद्वानिति लघूपधगुणः स्यात्। तदर्थं क्वस्वादेशाश्रयणे गौरवमिति भावः। **अवश्यमिति**। तथा च न गौरवं दोष इति भावः। ननु वसोरुदित्करणसामर्थ्यादेव सामान्यग्रहणं भविष्यतीति चेन्न, उक्तज्ञाप्येन वसोरुगित्त्वस्याप्यसिद्धत्वेन तत्र तस्य चारितार्थ्यात्। **ज्ञापकस्येति**। ज्ञाप्य-

---

[1] नलोपस्यार्धधातुक — घ, ङ.

[2] लोण्मध्यमपुरुषबहुवचनस्य तप्रत्ययस्येत्यर्थः। लोण्मध्यमपुरुषस्यैते — अ.

[3] पा. सू. ३.१.४.

[4] पा. सू. ७.३.९३.

[5] 'प्राप्त' इति नास्ति — अ.

[6] पा. सू. १.२.४.

[7] पा. सू. १.२.४.

[8] तत्रेति — ऋ, लृ.

[9] भाष्ये 'किमर्थः शकारः' इत्यस्यानन्तरं 'सार्वधातुकार्थः' इति रत्नप्रकाशकृत्पाठ इति भाति। दृश्यमानेषु भाष्यपुस्तकेषु 'सार्वधातुकार्थः' इति न दृश्यते।

[10] पा. सू. ७.१.४५.

स्येत्यर्थः। **पित्कृतमिति**। करोतीत्यादौ [1]'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वम्, ब्रवीतीत्यादौ [2]'ब्रुव ईट्' इतीट्। **ङित्कृतमिति**। विश्न इत्यादौ गुणनिषेधादिकम्। **पिति ङित्कृतमिति**। 'अचिनवाव, अचिनवाम' इत्यादौ गुणनिषेधः। **ङिति च पित्कृतमिति**। ब्रूतादित्यादावनुदात्तत्वमीडागमश्च। **पिन्नेति**। [3]'अपित्' इति प्रसज्यप्रतिषेधाश्रयणादस्य लाभः। **ङिच्च पिन्न भवतीति**। 'अपित् ङित्' इत्यनुवर्त्यैवं व्याख्यास्यत इति भावः। तथा च तातङो विशेषरूपेण ङित्त्वेनातिदेशिकमौत्सर्गिकं पित्त्वं न भवति। तथा [4]'आडुत्तमस्य पिच्च' इति विशेषविहितेन पित्त्वेनातिदेशिकं ङित्त्वं न भवति॥

[३, १५७–१६०]

(नारायणीयम्) ब्रूताद् भवानित्यत्र तातङः स्थानिवद्भावेन यत् पित्त्वं तत्सामर्थ्यात् तत्कार्यमनुदात्तत्वमनिष्टं स्यात् [5]'ब्रुव ईट्' इतीडागमश्च, ङित्त्वनिमित्तं चेष्टमिति भाष्यं योजयन्नाह — **पित्त्वनिमित्तमिति**। [6]'अपित्' इत्यस्य पिन्नेत्यर्थः कथं स्यादित्यत्राह — **प्रसज्येति**। [7]नन्वेवमप्यतिदेशप्रकरणादातिदेशिकस्य [8]ङित्त्वस्य प्रतिषेधः स्यादिति 'अचिनवम्' इत्यत्र लङो ङित्त्वात् स्थानिवद्भावेन प्राप्तममो ङित्त्वं न निषिद्धं स्यादिति गुणो न स्यादित्यत आह — [9]**योगविभागाच्चेति**। [10]'असंयोगाल्लिट् कित्' इत्यत्र 'अपित् ङित्' इत्यश्रवणात् कथं ङिच्च पिन्नेत्यर्थलाभः स्यादित्यत्राह — **अत्रेति**॥

छन्दसि शायजपि ३.१.८४.

[३, १६०]

(उद्द्योतनम्) **सौत्र इति**। [11]'स्तन्भुस्तुन्भु' इति सूत्रस्थः। **उद्गृभायत** ग्रहेः संप्रसारणम्, [12]'हृग्रहोर्भश्छन्दसि', अडभावश्छान्दसः। अन्यत् पूर्ववत्। **उन्मथायत** मन्थेर्नलोपः। शेषं पूर्ववत्॥

[३, १६०]

(रत्नप्रकाशः) **अस्कभायदिति**। 'स्कन्भु' इति सौत्राल्लङि तिप्, श्नः शायच्, अडागमः॥

---

[1] पा. सू. ३.१.४.
[2] पा. सू. ७.३.९३.
[3] पा. सू. १.२.४.
[4] पा. सू. ३.४.९२.
[5] पा. सू. ७.३.९३.
[6] पा. सू. १.२.४.
[7] नन्वेवं सत्यतिदेश — ङ.
[8] सार्वधातुकमिति प्राप्तङित्त्वस्येत्यर्थः।
[9] योगविभागाद्वेति — ङ.
[10] पा. सू. १.२.५.
[11] पा. सू. ३.१.८२.
[12] का. वा. ८.२.३२–१.

[३, १६०]

(नारायणीयम्) श्नः शायजिति। तस्य ङित्त्वान्नलोपः॥

लिङ्याशिष्यङ् ३.१.८६.

[३, १६१–१६२]

(उद्द्योतनम्) अङि गुण इति। [1]'ऋदृशोऽङि गुणः' इत्यनेन। [2]अर्कः क्त्विं गुणाभावाय। स्था अङ यासुट् आट् मस् इति स्थिते [3]'नित्यं ङितः' इति मसः सकारलोपः। [4]'छन्दस्युभयथा' इत्याशीर्लिङः सार्वधातुकार्धधातुकत्वयोः सत्त्वात् सार्वधातुकाश्रयो यासुटः [5]सकारस्य लोपः। अत एव [6]'अतो येयः' इति 'य' इत्यस्येयि आद् गुणः। [7]'आतो लोप इटि च' इत्याकारलोपः। अतः 'स्थेयाम' इति रूपसिद्धिं मनसि निधायाह—**स्थेति। यलोप इति।** [8]'लोपो व्योर्वलि' इत्यनेन। भाष्ये आटं विनापि 'उपस्थेयाम' इति साध्यते। **सार्वधातुकत्वादिति।** स्था यास् मस् इति स्थिते सार्वधातुकत्वाद्यासुटः [9]सकारस्य लोपे आर्धधातुकत्वादियादेशाभावे [10]'एर्लिङि' इत्याकारस्यैत्वे 'उपस्थेयाम' इति सिध्यतीत्यङप्यत्र न वक्तव्य इत्यर्थः। **उभयलिङ्गात्** सार्वधातुकार्धधातुकोभयरूपत्वात्। स्था अङ यास् अम् इति स्थिते सकारलोपे इयादेशे गुणाकारलोपयोः **उपस्थेयम्।** 'गै शब्दे' गा अङ यास् अम् इति स्थिते या इत्यस्येयादेशे आर्धधातुकत्वाश्रयेण सकारलोपाभावे यलोपे षत्वे च [11]'उपगेषम्' इति। सकारस्यापि लोपे 'गमेयम्' इति। वच् अङ यास् मस् [12]'वच उम्'। अन्यत् पूर्ववत्। **वोचेम।** मिपोऽमादेशे **विदेयम्।** शकिरुह्योर्मसि **शकेम, आरुहेम।** अन्यत् सर्वं पूर्ववत्॥

इति महाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य
प्रथमपादे चतुर्थमाह्निकम्॥

[३, १६१–१६२]

(रत्नप्रकाशः) उपस्थेयमिति। स्था लिङ मिप्, अम्, यासुट्, अङ, [13]आतो लोपः, लिङस्तिङः सार्वधातुकत्वपक्षे [14]'अतो येयः' गुणः। एवम् **उपगेयम्। वोचेमेति।** वच् लिङ

[1] पा. सू. ७.४.१६.
[2] अतः किंत्वं — अ.
[3] पा. सू. ३.४.९९.
[4] पा. सू. ३.४.११७.
[5] सलोपः — अ.
[6] पा. सू. ७.२.८०.
[7] पा. सू. ६.४.६४.
[8] पा. सू. ६.१.६६.
[9] सकारलोपे — अ.
[10] पा. सू. ६.४.६७.
[11] 'अञ्जसा सत्यमुपगेयम्' इनि भाष्ये दृश्यते। उपगेयमित्यस्य स्थाने 'उपगेषम्' इत्यन्नंभट्टपाठः। तैत्तिरीयसंहितायां प्रथमकाण्डद्वितीयप्रश्ने तथैव श्रूयते च।
[12] पा. सू. ७.४.२०.
[13] आतो लोप इटि चेत्यनेनेति भावः।
[14] पा. सू. ७.२.८०.

मस् सलोपः, यासुट्, अङ, [1]'वच उम्' इय्, यलोपः। [2]**शकिरुह्योश्चेति**। शकिरुही अप्यङ्-प्रयोजकाविति भावः। **दृशेरगिति**। अङि तु [3]'ऋदृशोऽङि' इति गुणः स्यादिति भावः। **आङपि वक्तव्य इति**। मसो मकारस्येति शेषः। अन्यथा वोचेमेतिवत् 'उपस्थेम' इति स्यादिति भावः। [4]**उभयलिङ्गत्वादिति**। उभयधर्मकत्वादित्यर्थः। लिङ इति शेषः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्र-विरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥

[३, १६१–१६२]

(नारायणीयम्) दृशेरङि सति को दोष इत्यत्राह — **अङि गुण इति**। [5]'ऋदृशोऽङि गुणः' इत्यनेन। **सलोपश्चेति**। [6]'छन्दस्युभयथा' इति सार्वधातुकत्वात् [7]'लिङः सलोपः' इत्यनेन। **अन्यथा यलोप इति**। [8]'लोपो व्योर्वलि' इत्यनेन॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे
तृतीयस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥

---

[1] पा. सू. ७.४.२०.
[2] वार्तिके 'शकिरुहोश्च' इत्यत्र 'शकिरुह्योश्च' इति निर्णयसागरमुद्रिते पाठः।
[3] पा. सू. ७.४.१६.
[4] भाष्ये 'उभयलिङ्गात्' इत्यत्र 'उभयलिङ्गत्वात्' इति निर्णयसागरमुद्रिते पाठः।
[5] पा. सू. ७.४.१६.
[6] पा. सू. ३.४.११७.
[7] पा. सू. ७.२.७९.
[8] पा. सू. ६.१.६६.

तृतीयाध्यायस्य प्रथमपादे पञ्चममाह्निकम्

कर्मवत् कर्मणा तुल्यक्रियः ३.१.८७.

[३, १६२–१६८]

(उद्द्योतनम्) ननु वतिं विना वत्यर्थलाभे स्वाश्रयमपि स्यादेव, अत आह — **असतीति**। वत्यभावे [1]'अधिशीङ्स्थासां कर्म' इत्यधिकरणस्य [2]कर्मसंज्ञावत् कर्तुरपि कर्मसंज्ञा प्रसज्येतेत्यर्थः। ननु तथाप्येकसंज्ञाधिकाराभावात् संज्ञाद्वयनिमित्तं कार्यं स्यात्, अत आह — **ततश्चेति**। भावे लकारे तृतीयोपपत्तिरित्याह — **लादेशेनेति**। ननु लान्तस्य वाच्यः कर्ता कर्मसंज्ञो भवति। ततश्च यावत् कर्तरि लकारो नोत्पद्यते तावत् कर्मसंज्ञा नास्तीत्यकर्मकत्वाद् भावे लकारः [3]सिध्यति, अत आह — **न चासत्यपीति**। **यस्मादिति**। यदा [4]लान्तस्याकर्तृत्वेऽपि लान्तस्य कार्ये कर्तव्ये कर्मसंज्ञो भवतीत्यर्थः, तदा भावे लविधिर्लान्तस्य कार्यमिति भावे लकारे विधेये कर्तुः कर्मसंज्ञा स्यात्। ततश्चाकर्मकत्वाभावाद् भावे लो न स्यादिति भावः। **धातुवाच्येति**। कर्मस्था वा कर्तृस्था वा क्रिया धातुवाच्या, न करणादिस्था, 'गच्छति, पचति' इत्यादिषु तथा दर्शनादिति भावः। **न संभवतीति**। अभिन्नतया सादृश्यासंभवादिति भावः। **नन्विति**। तथा च 'असिश्छिनत्ति' इति कथं प्रयोग इत्यर्थः। ननु प्रधानक्रियायाः करणादिनिष्ठत्वाभावेऽपि तदनुकूलप्रातिस्विकव्यापारे यदा धातुर्वर्तते तदा 'असिश्छिनत्ति' इति भवत्येव, अत आह — **यदेति**। प्रातिस्विकव्यापारेऽसेः कर्तृत्वमेव, न तु करणत्वमिति करण[5]क्रियया तुल्यक्रियत्वाभावात् कर्मवद्भावो न भविष्यतीत्यर्थः। यदि प्रधानक्रिया करणनिष्ठा स्यात् तदा तया [6]करणक्रियया तुल्यत्वं प्रातिस्विकव्यापारस्य स्यात्, तन्नास्तीत्याह — **न चेति**। **क्रियायाः** धातुवाच्यक्रियायाः। करणादीनां प्रातिस्विकव्यापारस्तावद् धात्ववाच्योऽप्यस्तीत्याह — **यद्यपीति**। भवतु स्वव्यापारः, प्रकृते किमायातम्, अत आह — **तत्रावश्यमिति**। कर्मकर्तुरभेदेन [7]तत्क्रियाया भेदाभावात् सादृश्यानुपपत्तेः कर्तृत्वकर्मत्वरूपावस्थाभेदेन क्रियाभेदमाश्रित्य तुल्यत्वं वाच्यम्। एवं करणत्वकर्तृत्वावस्थाभेदेनापि स्यादित्यर्थः। ननु धातुवाच्या क्रिया कर्तृकर्मणोरेव, न करणादावित्युक्तम्, अत आह — **प्रधानेति**। स्वव्यापारे कर्तृत्वमेव, न करणत्वमिति कथं करणेन तुल्यक्रियत्वम्, अत आह — **यद्यपीति**। **तस्य** असेः। लब्धः करणादिव्यपदेशो येन तच्च तद्वस्तु च तद्व्यवस्थिता या क्रिया तत्तुल्यत्वग्रहणनिवारणायेति विग्रहः। ननु धातुवाच्यक्रियाकर्तुः कर्मवद्भावः। करणादिव्यापारश्च न धातुवाच्य इति कथं कर्मवद्भावः, अत आह — **यद्यपीति**। **वस्तुसद्भावेति**। प्रातिस्विकव्यापारस्तावदस्ति, तत्र यदा विवक्षावशाद्धातुर्वर्तते तदा कर्मवद्भावः स्यादेवेत्यर्थः। स्थाल्याः प्रातिस्विकव्यापारमाह — **यादृशीति**। **संभवनं** जलतण्डुलमिश्रणम्। ननु तुल्यशब्दाध्याहारे कर्मणा तुल्यः कर्तेत्यागतम्। तुल्यक्रियत्वं कथं लभ्यम्, अत आह — **तुल्यक्रियत्वादिति**।

---

[1] पा. सू. १.४.४६.
[2] कर्मसंज्ञा। तत्कर्तुरपि — ऋ.
[3] सिध्यतु — ऋ.
[4] लान्तस्य कर्तृत्वस्य लान्तस्य — ऋ, लृ.
[5] क्रियायास्तुल्यक्रियात्वाभावात् — अ.
[6] करणक्रियायाः — अ.
[7] तत्क्रियाभेदाभावात् — अ.

केनचिद्धर्मेण तुल्यत्वस्य विशेषणं विनापि संभवादध्याहारबलात् क्रियया तुल्यत्वलाभ इत्यर्थः। श्रुतपदत्यागेनाश्रुताध्याहारो न युक्तः, अत आह — **अथवेति**। ननु तुल्यशब्दाध्याहारेणातिप्रसङ्गो निरस्तः, अत आह — **सहार्थेऽपीति**। [1]'वृद्धो यूना' इति निर्देशेनाध्याहारं विनापि सहार्थे तृतीयादर्शनादिति भावः। **प्रतिपाद्यते** कर्मवदिति प्रतिपाद्यते। सहार्थपक्षे कर्मणेत्यस्य वैयर्थ्यं निराह — **अकर्मकेति**। ननु कर्मणः प्रातिस्विकव्यापारस्य तौल्ये कर्मवद्भावः। न च 'पचत्योदनम्' इत्यत्र तथा तौल्यम्। तेन 'अत्रापि' इत्ययुक्तम्, अत आह — **तुल्यशब्दस्येति**। **क्रियायाः** प्रधानक्रियायाः। **एतच्च** साधारणक्रियत्वम्। **अन्यथेति**। सदृशशब्दाध्याहारेण विवक्षितसिद्धिसंभवादित्यर्थः। **सादृश्यवाचीति**। व्याख्यानादित्यर्थः। नन्वकर्तृ कर्तृ संपन्नमिति च्विप्रत्यये [2]'च्वौ च' इति दीर्घे [3]'कर्तृभूतम्' इति वक्तव्यम्, अत आह — **च्वेरिति**। [4]'बह्वल्पार्थात्' इत्यतः [5]'रोगाच्चापनयने' इतिपर्यन्तमनुवृत्तस्यान्यतरस्यांग्रहणस्य च्विविधावप्यनुवृत्तिरिति भावः। वृत्तौ तदनुवृत्तिर्नोक्ता, अत आह — **अथवेति**। ननु सादृश्यस्य भेदनिबन्धनत्वात् कर्मस्थैव क्रिया कर्तृस्थेति कथं सादृश्यम्, अत आह — **कर्तृकर्मेति**। सूत्रे कर्मणेत्यनेन लक्षणया कर्मस्था क्रियाक्षिप्यत इत्याह — **कर्मस्थयेति**। लक्षणायां बीजमाह — **साध्येति**। **साध्या** क्रिया। साधनं कर्म। उपचारे दृष्टान्तः — **भवति हीति**। सादृश्यविवक्षायां नातिप्रसङ्गाप्रसङ्गावित्याह — **तत्रेति**। कर्मणा तुल्यक्रियत्वमाह — **पात्राणामिति**। एकार्थत्वेन धातुद्वयस्य समानत्वमस्ति, अत आह — **एकस्मिन्निति**। अत्रापि तुल्यक्रियत्वमाह — **ओदनस्येति**। ननु तुल्यार्थवाक्यद्वयस्य युगपत्प्रयोगासंभवात् कथं भिन्नधातुस्थलेऽतिप्रसङ्गः, अत आह — **न चेति**। [6]लोके प्रयोगाभावेऽपि तुल्यक्रियत्वप्रतिपादनाय प्रक्रियासमये प्रयोगः संभवतीत्यर्थः। **अन्यथा** प्रक्रियाकालेऽपि प्रयोगानङ्गीकारे। ओदनं पचति, पच्यते ओदनः स्वयमेवेति वाक्यद्वयेन तुल्यक्रियत्वप्रतिपादनं न स्यादित्यर्थः। **यद्येवं** समानधाताविर्त्युच्यमाने। **लुनातिरेवेति**। णिप्रकृतेरभेदादित्यर्थः। ननु ण्यन्ताण्यन्तयो रूपार्थयोर्भेदात् कथं समानधातुत्वम्, अत आह — **अन्ये त्विति**। **लावयतावेवेति**। लुनातिस्तावद् द्विधाभवनोपसर्जने द्विधाभावने वर्तते, लुनाति देवदत्तः, केदारं द्विधाभवन्तं द्विधाभावयतीत्यर्थप्रतीतेः। ततो [7]यदा द्विधाभवनवृत्तेर्लुनातेर्देवदत्तव्यापारे णिजुत्पद्यते तदा य एवार्थो 'लुनाति केदारं देवदत्तः' इति, स एव 'लावयति केदारं देवदत्तः' इति। तथा च 'लूयते केदारः स्वयमेव' इति योऽर्थः स एव 'लावयते केदारः स्वयमेव' इति [8]'णेरणौ' इत्यत्रोपपादितमिहानुसंधेयम्। भावक्रिययोर्भेदमाह — **अपरिस्पन्दनेति**। तयोः कर्मस्थत्वकर्तृस्थत्वे कथं ज्ञेये, अत आह — **यत्रेति**। कर्तृस्थभावक्रिययोः कर्मवद्भावाभावमुदाहरति — [9]**ततश्चेति**। ननु 'अन्योन्यम्' इत्यनेन प्रतिषेधस्य कर्मव्यतिहारविशिष्टक्रियायामेवेति प्रतिपादनात् 'भिद्यमानः कुसूलः पात्राणि भिनत्ति' इत्यस्य कथं व्यावृत्तिः, अत आह — **अन्योन्यमिति**। सामान्येन सकर्मकस्य प्रतिषेधः, तच्चोदाहरणं न प्रतिषेधसंकोचार्थमित्यर्थः। षष्ठ्योर्वैयधिकरण्यशङ्कां निराह — **कर्मणः सत इति**। इदंशब्दार्थमेवाह — **यस्येति**। ननु समर्थपरिभाषयैवात्र नातिप्रसङ्गः, अत आह — **समर्थेति**। तुल्यक्रियः' इत्युक्तेः क्रियैवोपमेया, न कर्ता, अत आह — **कर्तृस्थामिति**। ननु कर्तुरेव

---

[1] पा. सू. १.२.६५.

[2] पा. सू. ७.४.२६.

[3] यद्यप्यस्यापवादेन रीङृत इति रीङादेशेनात्रापाद्येन भाव्यम्, तथाप्यापाद्यरूपेऽपवादापरामर्शेनोत्सर्गोक्तिः।

[4] पा. सू. ५.४.४२.

[5] पा. सू. ५.४.४९.

[6] लोकप्रयोगाभावेऽपि — अ.

[7] यथा — अ, ऋ, लृ.

[8] पा. सू. १.३.६७.

[9] तत्रेति — अ, ऋ, लृ.

कर्मकार्यातिदेशाद् द्वयमपि भवतीति प्रश्नो न युक्तः, अत आह — **किमतिदेशेनेति**। ननु वत्करणस्य स्वाश्रयप्रवृत्तिः प्रयोजनमित्युक्तत्वादेवमपि प्रश्नोऽनुपपन्नः, अत आह — **यद्यपीति**। **दोषान्तरं** चङाद्यभावप्रसङ्गरूपम्। ननु 'नमते' इत्यत्र [1]'न दुहस्नुनमाम्' इत्यनेन, 'अचीकरत' इत्यत्र [2]'यक्चिणोः प्रतिषेधे हेतुमण्णिश्रि' इति वार्तिकेन च कर्मकार्ययोर्यक्चिणोः प्रतिषेधात् कर्तरि चङशपौ भविष्यतः, अत आह — **यक्चिणोरिति**। अतिदेशेन स्वाश्रयस्य निवर्तनादिति भावः। **कुरच्** [3]'विदिभिदिछिदेः कुरच्'। ननु लान्तस्येति वक्ष्यमाणत्वाद् भिदुरमित्यत्र कर्मवद्भावो न भवति, अत आह — **लान्तस्येति**। भाष्ये **उभयम्** आत्मनेपदविधिः शबादिप्रतिषेधश्च। वचनं विनापि तदुभयं सिद्धमित्याह — **कर्तैवेति**। एवकारेण कर्मकर्तृव्यावृत्तिः। **योगेति**। कर्मग्रहणानुवृत्त्या कर्मकर्तरि यग् भवतीति तदर्थः। प्रकारान्तरेण चङादिसिद्धिमाह — **कार्येति**। आत्मनेपदविधिः शबादिप्रतिषेधश्च न कर्तव्य इत्याह — **यच्चेति**॥

[३, १६२-१६८]

(**रत्नप्रकाशः**) **वत्करणं किमर्थमिति**। असत्यपि वत्करणे कर्मवद्व्यपदेशातिदेशे सति कर्मसंज्ञा सिध्यति विनापि वत्करणेनेति भावः। एतेन 'विनापि वतिना परार्थे शब्दप्रयोगात् तदर्थलाभ इति भावः' इति निरस्तम्। वत्करणाभावे कर्मसंज्ञाया एव प्रसङ्गात्। वत्करणं विना तदर्थपरतया क्वचित् कथंचिद्व्याख्यानेऽपि तदाश्रयेण तत्प्रत्याख्यानानौचित्याच्च। **स्वाश्रयमपीति**। **स्वम्** अकर्म, तदाश्रयमपीत्यर्थः। वत्करणसामर्थ्यादकर्मत्वमपि तस्य स्थितमिति भावः। **भिद्यते कुसूलेनेति**। भावे ले सति कर्तुरनभिधानात् तृतीया। यद्यपि लान्तस्य कर्ता कर्मवदिति वक्ष्यमाणत्वेन विनापि वत्करणेन सिध्यति भावे लकारोऽपि, कृत्यक्तखलर्थवत्, तथापि वत्करणं कर्तव्यमेव कर्मसंज्ञाप्रयुक्तकार्यस्यातिदेशार्थम्। ननु [4]तथापि तस्य कर्तुः कर्मसंज्ञा नास्त्येवेति धातोरकर्मकत्वाद् भावे लकृत्यक्तखलर्थाः सिध्यन्तीति लान्तवाच्यत्वं कर्तृविशेषणं न देयमेवेति चेन्न, 'भिद्यते कुसूलेन' इत्यादौ कर्तरि द्वितीयातिदेशवारणार्थं तस्यापि विशेषणस्यावश्यकत्वात्। एतेन 'वत्करणाभावे भावे लविधिर्लान्तकार्यमिति स्वाश्रयनिवारणं स्यादेव' इति निरस्तम्। वत्करणं विनापि भावे लकारस्य सिद्धत्वात्। कर्मणेति, कर्मस्थक्रियेत्यर्थः। तात्स्थ्यात् ताच्छब्द्यम्। तत्र कर्मत्वविशिष्टक्रियाव्यक्तिरुपमानम्, कर्तृत्वविशिष्टक्रियाव्यक्तिरुपमेया। **साध्वसिश्छिनत्तीति**। अस्यादीनां तीक्ष्णताद्यतिशयविवक्षायां कर्तृत्वं भवति। यदा यस्य कारकस्य यद्धातुवाच्यक्रियाजन्यफलांशे स्वातन्त्र्यं विवक्ष्यते [5]तद्व्यापार एव तदा स धातुर्वर्तते। धातुपाठे प्रसिद्धकर्तृव्यापारस्यैव तत्तद्धात्वर्थत्वेन दर्शितत्वेऽपि धातूनामनेकार्थत्वात् कर्मादिव्यापारवृत्तित्वं न विरुध्यते। ननु कर्मत्वादिविवक्षायां कर्मादिव्यापारस्य धातुनानुच्यमानस्य क्रियात्वाभावात् कर्मस्थक्रियया तुल्यक्रियत्वं दुर्निरूपमिति चेन्न, घटादीनां घटादिशब्दैर्यदा नोच्यमानता तदा घटत्वाद्यभावप्रसङ्गात्। धातुनाभिधातुं यस्य योग्यता तस्यैव क्रियात्वौचित्याच्च। **साधु स्थाली पचतीति**। यस्यां स्थाल्यां शीघ्रमोदनः संपद्यते तस्याः प्राशस्त्यविवक्षयायं प्रयोगः। **तुल्यक्रिय इति किमर्थमिति**। 'तुल्यक्रिय [6]इत्युच्यमानेऽप्यत्र प्राप्नोति' इति वक्ष्यमाणोऽभिप्रायः। एतेन 'कर्मणेति तृतीया तुल्य-

---

[1] पा. सू. ३.१.८९.
[2] का. वा. ३.१.८९-१.
[3] पा. सू. ३.२.१६२.
[4] तथा च तस्य — ब.
[5] तद्व्यापारपर एव — ब.
[6] भाष्ये 'इत्यप्युच्यमानेऽत्र' इत्यत्र 'इत्युच्यमानेऽप्यत्र' इति पाठो रत्नप्रकाशकृदभिमत इति भाति।

शब्दाध्याहारेण व्याख्यास्यते। तुल्यक्रियत्वाच्च कर्तुस्तुल्यत्वमिति प्रश्नः' इति निरस्तम्। अध्याहाराश्रयेण विद्यमानपरित्यागे 'स्वगृहे पायसं त्यक्त्वा भिक्षामटति दुर्मतिः' इति न्यायापातात्। **पचत्योदनं देवदत्त इति**। अत्र कर्मस्थया कर्तृस्था क्रिया तुल्या न भवतीति न कर्मवद्भाव इति भावः। तमाशयमविद्वान् [१]"तुल्यास्यप्रयत्नम्' इत्यत्रेवात्रापि तुल्यशब्द एकार्थक इति मन्यमानः कर्मणा सहैकक्रियत्वं कर्तुरस्तीति तुल्यक्रियग्रहणाभावेऽपि कर्मणा सहितः कर्ता कर्मवदिति योऽर्थः प्रतीयते स एव संपन्न इत्याशयेनाह — **तुल्यक्रिय [२]इत्युच्यमानेऽपीति**। सादृश्यवाची तुल्यशब्द आश्रीयते, न तु साधारणवाचीत्याशयेन परिहरति — **न तुल्यक्रियग्रहणेनेति**। **कर्तृभूतेऽपि** कर्तृत्वं प्राप्तेऽपि। **तद्वत् क्रिया लक्ष्यत इति**। तज्जातीया क्रिया लक्ष्यत इत्यर्थः। व्यक्तिभेदाश्रयेण तु सादृश्यं प्रागेवोपपादितम्। प्रकृते तु कर्मस्थव्यापारविजातीयः कर्तृस्थव्यापार इति न तयोरुक्तलक्षणं सादृश्यमिति तत्र नातिप्रसङ्गः। **भिद्यमान इति**। कर्मकर्तृत्वं कुसूलस्यास्तीति प्रतिपादितमनेन विशेषणेन। एवमेव हि [३]"णेरणौ' इति सूत्रे 'आरोहयमाणो हस्ती' इत्युक्तम्[४]। एतेन 'पात्राणामपि द्विधाभवनं कुसूलस्यापीति प्राप्नोति कर्मवद्भावः' इति निरस्तम्। कुसूलस्य कर्मतादशायां यो व्यापारः स एवात्र कर्तृतादशायामिति प्राप्नोति कर्मवद्भाव इत्येव तत्रातिप्रसङ्गोपपादनस्योचितत्वात्। अन्यथा 'यस्मिन् कर्मणि कर्तृभूतेऽपि' इत्यादिपूर्वभाष्यविरोधापत्तेश्च। **कर्म दृष्ट इति**। समाने एकस्मिन् धातौ कर्ता कर्मत्वेन यदि दृष्टस्तर्हि स कर्मवदिति वक्तव्यमित्यर्थः। **पचत्योदनमिति**। ओदनस्यात्र कर्मत्वं दृष्टमित्युपपादनायेदं वाक्यं प्रयुक्तम्, न तूत्तरवाक्येन सहास्य प्रयोग इति। **राध्यत्योदन इति**। ओदनस्य पूर्ववाक्ये कर्मत्वदशायां यादृशी क्रियाव्यक्तिस्तादृश्येवात्र कर्तृत्वदशायामिति कर्मवत्त्वप्रसक्तिः। **कर्मस्थभावकानामिति**। अपरिस्पन्दसाधनसाध्यो धात्वर्थो भावः, सपरिस्पन्दसाधनसाध्यस्तु क्रिया। यत्र च क्रियाकृतो विशेषो दृश्यते तत्स्था क्रियोच्यते। **मा भूदितीति**। तेन 'पश्यति राजा स्वयमेव, आरोहति हस्ती स्वयमेव' इत्यादौ नात्मनेपदादिकमिति भावः। **वक्ष्यत्येतदिति**। अन्यतरेण सिद्धमिति भावः। **कर्मणः कर्तुरिति**। कर्मत्वेन दृष्टस्य कर्तुरित्यर्थः। **आहर कुम्भमिति**। यद्यपि समर्थपरिभाषया सिद्धमिदम्, तथाप्यनेनापि प्रकारेण सिध्यतीत्युपायान्तरप्रदर्शनपरमेतत्। किमनेन कर्मव्यपदेशेऽतिदिश्यमाने कर्तृव्यपदेशो बाध्यते वा न वेत्याशयेन पृच्छति — **किं पुनरिति**। आद्यपक्षे दोषमाह — **यदीति**। **चङ-अचीकरतेति**। [५]"यक्चिणोः प्रतिषेधे णिश्रिग्रन्थिब्रूञाम्' इति वार्तिकेन चिणो निषेधे [६]"णिश्रिद्रुस्रुभ्यः कर्तरि' इति चङ। **नमते दण्ड इति**। [७]"न दुहस्नुनमाम्' इति यको निषेधे कर्तरि शप्। **भिदुरं काष्ठमिति**। [८]"विदिभिदिच्छिदेः कुरच्' इति कुरच् [९]"कर्तरि कृत्' इत्युत्सर्गेण कर्तरि भवति। द्वितीयपक्ष आह — **अथ कर्त्राश्रयमपीति**। **किं तर्हीति**। किं यदुक्तं तदेवाभिमतमुतान्यदपि किञ्चिद्विवक्षितमिति भावः। उत्तरमाह — **आत्मनेपदेति**। आत्मनेपदसहिताः शबादय आत्मनेपदशबादयः, विधिसहितः प्रतिषेधो विधिप्रतिषेधः। आत्मनेपदशबादीनां विधिप्रतिषेध आत्मनेपदशबादिविधिप्रतिषेधः। **उभयं क्रियते न्यास एवेति**। कर्तैव यः कर्ता तत्र परस्मैपदविधानात् कर्मकर्तरि परस्मैपदाभावे [१०]"भावकर्मणोः' इत्यात्मनेपदं भविष्यति।

---

[१] पा. सू. १.१.९.
[२] भाष्ये 'इत्यप्युच्यमाने' इत्यत्र 'इत्युच्यमानेऽपि' इति रत्नप्रकाशकृत्पाठ इति भाति।
[३] पा. सू. १.३.६७.
[४] भाष्य इति शेषः।
[५] का. वा. ३.१.८९–१.
[६] पा. सू. ३.१.४८.
[७] पा. सू. ३.१.८९.
[८] पा. सू. ३.२.१६२.
[९] पा. सू. ३.४.६७.
[१०] पा. सू. १.३.१३.

[1]'कर्तरि शप्' इत्यत्र कर्तरीति योगविभागात् शबादीनां यका बाधनं चेति भावः। कार्यातिदेशे तु न काप्यनुपपत्तिः॥

[३, १६२–१६८]

(नारायणीयम्) नन्वतिदेशार्थलाभाय वत्करणे कर्तव्ये 'किमर्थम्' इति प्रश्नोऽसमञ्जस इत्यत आह — **परार्थे शब्दप्रयोगादिति**। यथा 'सिंहो माणवकः' इति माणवके सिंहशब्दप्रयोगात् सिंहसदृश इति प्रतीतिः, शास्त्रे च [2]'ङित्, [3]'कित्' इत्यादौ, वेदे च कौण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इति। ननु वत्यर्थस्यान्यतो लाभेऽपि स्वाश्रयं कार्यं भविष्यतीत्याशङ्क्य वत्करणाभावे तल्लाभ एव दुर्लभ इत्याह — **असति वत्करण इति**। ननु 'लान्तस्य वाच्यः कर्ता कर्मवद् भवति' इति वक्ष्यते। ततश्च यदा कर्तरि लकारानुत्पत्तिस्तदा कर्मसंज्ञाया अभावादकर्मकत्वे भावे लकारः सेत्स्यतीत्याशङ्क्य परिहरति — **न चासत्यपीति**। यदा 'लान्तस्य कर्ता' इत्यस्य लान्तस्य कार्ये कर्तव्ये कर्ता कर्मसंज्ञो भवतीत्यर्थस्तदा भावेऽर्थे [ल] विधिर्लान्तकार्यमिति भावे लकारविधौ कर्तुः कर्मत्वं स्यादित्यकर्मकत्वाभावाद् भावे लो न स्यादिति भावः। **धातुवाच्या क्रियेति**। यदनन्तरं फलमुत्पद्यते सा धातुवाच्या क्रिया। सा च कर्तरि कर्मणि च समवेता। यथा गमेर्देशान्तरप्राप्तिः पचेर्विक्लित्तिः, न तु करणादौ तत्समवायोऽस्ति। **तत्र कर्तृस्थयेति**। तुल्यशब्दः सदृशवचन इति वक्ष्यते। तत्र सादृश्यस्य भेदाधिष्ठानत्वात् कर्तृस्थया क्रियया कर्तुस्तुल्यक्रियत्वासंभवात् पारिशेष्यात् कर्मस्थया क्रियया तुल्यक्रिय इति विज्ञायत इति प्रश्नाशय इत्यर्थः। किं करणादिव्यापारो धातुना नाभिधीयते, उताभिधीयते। आद्ये करणादिस्थया क्रियया तुल्यक्रियत्वाभावादतिप्रसङ्गाभावात् 'कर्मणा' इति न वक्तव्यम्। द्वितीये देवदत्तादिवत् काष्ठादीनामपि कर्तृत्वमेव स्यात्, न तु कदाचिदपि करणादिरूपत्वम्। किं च करणादिस्थत्वस्य क्रियाया अनुपपन्नत्वात् तत्स्थया क्रियया तुल्यक्रिय इत्ययुक्तमिति चोदयति — **ननु करणादीति**। **स्वव्यापारं कुर्वन्तीति**। अकिंचित्करस्य साधनत्वायोगात्। ननु करणादिस्थत्वस्य क्रियाया अनुपपन्नत्वात् कथं तदवस्थाश्रयणमित्यत्राह — **प्रधानव्यापारश्चेति**। **प्रधानक्रियेति**। प्रधानक्रियापेक्षया लब्धः करणादिव्यपदेशो येन तद्वस्तु यदस्यादि तत्र व्यवस्थिता या क्रियोद्यमन[4]निपतनादिरूपा तया यत् तुल्यत्वं तद्ग्रहणनिवारणाय, तया तुल्यक्रिय इति मा विज्ञायीत्येवमर्थमित्यर्थः। **वस्तुसद्भावाश्रयेणेति**। वस्तुतः करणादिव्यापारस्य सद्भावमाश्रित्येत्यर्थः। अधिकरणस्थया क्रियया कर्तुस्तुल्यक्रियत्वमुपपादयति — **स्थाल्या इति**। **तुल्यक्रियत्वाच्चेति**। न तु धर्मान्तराश्रयेण तुल्यत्वमित्यपि व्याख्यास्यत इत्यर्थः। नन्वेवं व्याख्याने 'पचत्योदनम्' इत्यत्र कथं प्राप्तिरित्यत्राह — **सहार्थ इति**। तस्याः प्रसिद्धतरत्वादध्याहारानपेक्षत्वाच्च। **तुल्यशब्दस्य साधारणेति**। यथा देवदत्तयज्ञदत्तौ तुल्यधनाविति, साधारणधनाविति गम्यते। **अन्यथेति**। सहार्थे तृतीयाविज्ञानात्। ननु पूर्वं कर्म भूत्वेदानीं कर्ता संपन्न इत्यर्थावगमाच्च्वौ सति [5]'कर्त्रीभूतः' इति वाच्यमित्यत्राह — **च्वेर्विकल्पेनेति**। ननु कर्मस्था या क्रिया द्विधाभवनादिका सैव कर्त्रवस्थायामपीति भेदाभावात् तुल्यत्वमनुपपन्नमित्यत्राह — **कर्तृकर्मावस्था-**

---

[1] पा. सू. ३.१.६८.
[2] पा. सू. १.२.१.
[3] पा. सू. १.२.५.
[4] निपातनादि — घ.
[5] रीङृत इति रीङादेश इत्यादिः।

भेदादिति। कथं पुनः कर्मणेत्यस्य कर्मस्थया क्रिययेत्यर्थो लभ्यत इत्यत्राह — [1]**कर्मस्था क्रियेति**। मुख्यार्थबाधे लक्षणाया आश्रयणीयत्वात्। तदुपपादनायाह — **साध्यसाधनयोरिति**। यत्र किंचित् सामान्यं कश्चिच्च विशेषः स विषयः सदृशतायाः, न त्वत्यन्तभेदे तत्संभव इत्यर्थः। मुख्यार्थसंबन्धं दर्शयति — **भवति हीति**। एवं च 'पचत्योदनम्' इत्यादावतिप्रसङ्गाभाव इत्याह — **तत्र पचत्योदनमिति**। 'लूयते केदारः' इत्यादौ चेष्टं सिध्यतीत्याह — **लूयते केदार इति**। 'भिद्यमानः कुसूलः' इत्यत्र कर्मस्थया क्रियया कर्तुस्तुल्यक्रियत्वात् कर्मवद्भावप्राप्तिं दर्शयति — **पात्राणामपीति**। **समानधाताविति**। समानशब्द एकपर्यायः, यथा [2]"समानकर्तृकयोः' इतीत्याह — **समान एकस्मिन्निति**। यदि वाक्यद्वयस्य लोके युगपत्प्रयोगो नास्ति तर्हि किमर्थं भाष्ये तदुपात्तमित्यत्राह — **कर्मस्थक्रियेति**। **अन्यथा समानधाताविति**। अत्रापि 'पचत्योदनं देवदत्तः, पच्यते ओदनः स्वयमेव' इति वाक्यद्वयमुदाहरणीयं कर्मस्थया क्रियया तुल्यक्रियत्वप्रतिपादनाय। लोके तु 'पच्यते ओदनः' इत्येव प्रयोगः। **लुनातिरेवेति**। [3]यत्रात्यन्तं धातुभेदस्तत्र कर्मवद्भावनिवृत्त्यर्थं समानधातुग्रहणम्, न तु कथंचिदभेद इति तेषामाशयः। **लावयतावेवेति**। निवृत्तप्रेषणपक्षाश्रयेणैतदुक्तम्। तथा च तत्र हरिः — [4]"न्यग्भावनान्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते' इति। क्रियाभावयोरभेदेन व्यवहारदर्शनात् कथमत्र भेदेनोपादानं कृतमित्यत्राह — **अपरिस्पन्दनेति**। यथा पचत्यादिधातुवाच्यो विक्लित्त्यादिः। **सपरिस्पन्दनेति**। यथा भिदादिधातुवाच्या द्विधाभवनादिका। **यत्र च क्रियाकृतेति**। तथा चोक्तम् — [5]"विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता' इति। **पश्यति राजेति**। 'पश्यन्ति भृत्या राजानम्' इति दर्शने कर्मणो राज्ञः सौकर्यातिशयात् कर्तृत्वविवक्षायामयं प्रयोगः। दर्शनफलं ज्ञानं कर्तृस्थमिति कर्मवद्भावाभावः। एतत् कर्तृस्थभावकस्योदाहरणम्। कर्तृस्थक्रियस्याप्याह — **आरोहति हस्तीति**। 'आरोहन्ति हस्तिनं हस्तिपकाः' इत्यत्र कर्मणो हस्तिनः कर्तृत्वविवक्षायां कर्तृस्थत्वाद्देशान्तरप्राप्तिलक्षणस्य फलस्य कर्मवद्भावाभावः। ननु वार्तिके 'अन्योन्यमाश्लिष्यतः' इत्युदाहरणप्रदर्शनं तस्मिन्नेव विषये प्रतिषेधार्थमिति चेन्नेत्याह — **उदाहरणमात्रमेतदिति**। तेन सर्वेषां सकर्मकाणां कर्मवद्भावाभावसिद्धिः। **कर्मणेति चेति**। धातोः कर्मणेति च द्वयोः पदयोः समभिव्याहारादेतदर्थलाभ इत्यर्थः। ननु 'आहर कुम्भम्, करोति घटम्' इत्यत्र समर्थपरिभाषयैवेष्टं सिद्धम्। सत्यम्, तदनाश्रयणाल्लाघवं भवतीत्याशयेनैतदुक्तमित्याह — **समर्थपरिभाषेति**। ननु कर्मस्थया क्रियया कर्तुः सादृश्यमयुक्तमित्यत्राह — **कर्तृस्थामिति**। **तथापीति**। पूर्वं संक्षिप्योक्तमर्थं विचार्य निर्णेतुमयमुपन्यास इत्यर्थः। **यक्चिणोः प्रतिषेध इति**। सूत्रेणोपसंख्यानेन च। **कर्तरि कुरजिति**। [6]"विदिभिदिच्छिदेः कुरच्' इत्यनेन। ननु कर्मवद्भावात् प्राप्तमात्मनेपदं परत्वात् [7]"शेषात् कर्तरि' इति परस्मैपदेन बाध्येतेत्यत्राह — **कर्तैव य इति**। [8]"कर्तरि कर्मव्यतिहारे' इत्यतः कर्तरीत्यनुवर्तनादयमर्थो लभ्यते। **कर्तरीति योगविभागेनेति**। अत्र कर्मग्रहणमनुवर्तते। तेन कर्मणि कर्तरि शबादिकं बाधित्वा यग् [9]भविष्यति। **कार्यातिदेश इति**। तेन परत्वाद्यगात्मनेपदे कर्मकर्तरि भविष्यतः। हेत्वन्तरमाह — **यच्चेति**। **इति शबादीति**। अतिदेशेन विरुद्धत्वात्॥

---

[1] कर्मणेत्यस्येति — घ, ङ.
[2] पा. सू. ३.४.२१.
[3] अत्रात्यन्तधातुभेदात् तत्र — ङ.
[4] वाक्यपदीयम् ३.७.५९.
[5] वाक्यपदीयम् ३.७.६६.
[6] पा. सू. ३.२.१६२.
[7] पा. सू. १.३.७८.
[8] पा. सू. १.३.१४.
[9] 'भविष्यति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ङ.

[३, १६८–१७६]

(उद्द्योतनम्) स्वातन्त्र्यशब्देन कर्मत्वाभावो विवक्षित इत्याशयेनाह — **पच्यत इति**। क्रिया-शब्दस्य कृतिवाचित्वशङ्कां निराह — **विशरणेति**। [1]वातादेः कारणत्वसिद्धौ विवक्षया कर्तृत्वं सिध्येत्, [2]तदेव कुतः, अत आह — **कारणेति**। कारणाभावे कथं कार्यम्, अत आह — **कुसूल-स्यैवेति**। प्रशिथिलावयवसंयोगादिसहकृतस्येत्यर्थः। **अदृश्येति**। 'निवातस्थकुसूलविशरणक्रिया कुसूलातिरिक्तकारणसाध्या कुसूलविशरणक्रियात्वात् [3]सवातस्थतत्क्रियावत्' इत्यनुमानमप्रयोजक-मिति भावः। सुकरता न क्रिया, अत आह — **द्विधेति**। **अन्यथा** द्विधाभवनलक्षणसुकरताया अभावे। लान्तस्येति षष्ठी वाच्यवाचक[4]भावसंबन्धे निमित्तनिमित्तिभावे चेत्यभिप्रेत्याह — **लान्तवाच्य इति**। लान्तवाच्यः कर्ता कर्मवदित्यस्य प्रयोजनमाह — **तेनेति**। भाव एवोत्पत्तौ फलमाह — **ततश्चेति**। **षष्ठीति**। [5]'कृत्यानां कर्तरि वा' इति वचनात्। लान्तकार्येष्वेवे-त्यस्य प्रयोजनमाह — **भिद्यते** [6]**कुसूल इति**। [7]द्वितीयाया लान्त[8]कार्यत्वाभावादित्यर्थः। **क्तग्रहणस्येति**। [9]'भिन्नः कुसूलः स्वयमेव' इति प्रयोगस्येष्टत्वात् क्तग्रहणं न कर्तव्यमित्यर्थः। **प्रयोजनमिति**। कर्मवद्भावपक्षे कर्मणि क्तप्रत्यये भिन्नः कुसूल इति भवति, कर्मवद्भावनिषेधे [10]'गत्यर्थाकर्मक' इति [11]कर्तरि क्ते 'भिन्नः कुसूलः' इत्येव भवति, विशेषो नास्ति। कृत्यादौ तु भेत्तव्यः कुसूलः स्वयमेवेति प्रयोगाभावः प्रयोजनमिति भावः। कर्मकर्तरि क्तप्रत्ययो भाष्यकृतोऽपि संमत इत्याह — **तथा चेति**। [12]'ल्वादिभ्यः' इति सूत्रे [13]'सिनः' इति निष्ठानत्वार्थमिदं वार्ति-कम्। 'गवा दुग्धं पयः' इत्यत्र गोः कर्मवद्भावे [14]'अप्रधाने दुहादीनाम्' इति गवि कर्मणि क्ते सति 'गौर्दुग्धा पयः' इति स्यात्। असति तु कर्मवद्भावेऽप्रधानकर्माभावात् पयस्येव कर्मणि क्ते 'गवा दुग्धम्' इति सिध्यतीति क्तग्रहणस्य प्रयोजनम्, न तु भाष्योक्तमिति प्रदीपाशय [15]इत्याहुः। **द्विलकारक इति** भाष्यम्। तथा चैको लकारो लुप्तषष्ठीकः सप्तम्यन्तो वा कर्मवदिति सूत्रेण संबध्यत इत्यर्थः। 'कर्मवत्' इति सूत्रप्रत्याख्यानार्थं 'सिद्धं तु' इत्यादिवार्तिकं व्याचष्टे — **प्राकृतमिति**। **आत्मा** वस्तुस्वरूपम्। **बुद्ध्यवस्थाभिः** बुद्धिविशेषैः **परिकल्पिते** परिकल्पने सति। [16]भावे निष्ठा। [17]कर्मकर्तुरक्रियात्वात् 'कर्म दृश्यते' इत्ययुक्तम्' अत आह — **कर्मत्वमिति**।

---

[1] पाकादेः — अ, ऋ, लृ.

[2] 'तदेव' इत्यस्यानन्तरं चकारोऽधिकः — ऋ.

[3] पाकस्थ — अ, ऋ, लृ.

[4] 'भाव' इति नास्ति — अ.

[5] पा. सू. २.३.७१.

[6] कुसूलः स्वयमेवेति — ऋ, लृ.

[7] 'द्वितीयायाः' इत्यतः प्राक् 'सर्वत्र' इत्यधिकम् — अ.

[8] कर्तृत्वाभावादित्यर्थः — अ.

[9] 'भिन्नः' इति नास्ति — अ.

[10] पा. सू. ३.४.७२.

[11] 'कर्तरि' इति नास्ति — अ.

[12] पा. सू. ८.२.४४.

[13] लून इति — अ, ऋ, लृ.

[14] महाभाष्यम् १.४.५१.

[15] इत्याह — अ, ऋ, लृ.

[16] अनेन वाक्यपदीयश्लोके 'भेदेन परिकल्पिते' इति पाठः स्वीकृतोऽन्नंभट्टेनेति ज्ञायते। मञ्जू-षायां 'भेदेन परिकल्पने' इति पाठो दृश्यते। प्रदीपपुस्तकेषु वाक्यपदीयपुस्तके च पूनामुद्रिते 'भेदे च परिकल्पिते' इति पाठ उपलभ्यते।

[17] भाष्ये 'आत्मसंयोगे कर्मकर्तुः' इत्यत्र नागेशेन 'अकर्मकर्तुः' इति छेदं कृत्वा 'कर्मभिन्नस्य कर्तुरात्मनः सत्त्वेऽपि कर्म दृश्यत इत्यर्थः' इति व्याख्यायते। अन्नंभट्टेन तु कर्मकर्तुरित्येवाङ्गी-क्रियते। कर्मकर्तुः कर्मणः कर्तृत्वविवक्षायां

'विषमः' [1]इत्यादिना भाष्ये कर्मकर्तुः कर्मत्वं न दृश्यत इत्याशङ्क्य पदलोपद्वारात्मभेदस्य शब्देन प्रतिपादितत्वात् कर्मत्वं [2]कर्तृत्वं च युज्यत इत्युक्तम्। तत्रात्मभेदस्य शब्देनोपादानप्रतिपादनाद् यत्रात्मभेदः [3]शब्देन नोपादीयते तत्र कर्मवद्भावार्थं सूत्रं कर्तव्यमेवेति [4]भाष्यकारस्याभिप्राय उन्नीयत इत्याह — **अयं भाव इति**। [5]'लूयते केदारः, पच्यते ओदनः' इति कर्मकर्तरि प्रयोगः। **न प्रयुज्यत इति**। [6]तत्प्रयोगे शब्देन कर्तृकर्मभेदस्योपादानात् प्राकृतमेव कर्म स्यादिति भावः। एवं भाष्याञ्जस्यात् सूत्रमावश्यकमित्युक्त्वा प्राकृतकर्माश्रयेण तत्प्रत्याख्याने बाधकमाह — **नमत इति**। आदिना अचीकरतेति गृह्यते। अतिदेशपक्षे वत्करणेन स्वाश्रयाणां प्रवर्तनात् तौ स्याताम्, नान्यथेत्यर्थः। ननु प्राकृतकर्मत्वेऽपि तत्कार्यप्रतिषेधे कर्तृत्वाश्रयौ [7]तौ स्याताम्, अत आह — **भिद्यत इति**। प्राकृतकर्मपक्षेऽकर्मकत्वाभावाद् भावे लो न स्यात्। ततश्च कर्मकर्तुः प्राकृतकर्मत्वासंभवात् कर्मकार्यातिदेशाय सूत्रमावश्यकमिति भावः। एवं समुदायतात्पर्यमुक्त्वा भाष्याक्षराणि व्याचष्टे — **कर्मेति**। तिङा कर्तृत्वप्रतीतेः 'कर्ता न दृश्यते' इत्ययुक्तम्, अत आह — **हन्तीति**। ननु 'आत्मना' इति [8]करणत्वस्यापि संभवात् कथं कर्तृत्वनिश्चयः, अत आह — **तमन्तरेणेति**। कर्ता अव्यभिचारी, करणादिकं तु व्यभिचारीति भावः। ननु कर्मकर्तरि स्वयंशब्दरहितमुदाहरणमयुक्तम्, वृत्तौ तद्युक्तस्यैवोदाहरणात्, अत आह — **यस्त्विति**। **प्रयुज्यते** [9]न तु कर्मकर्तृत्वप्रतिपादनायेति शेषः। तथा सति बाधकमाह — **न त्विति**। दृष्टान्तेऽपि कर्तृकर्मणोर्वास्तवभेद इत्येके, न तु काल्पनिक इति सूत्रावश्यकत्वमेव द्योतयितुं 'द्वावात्मानौ' इति भाष्यम्। [10]तस्य व्याख्यानमतिदिशति — [11]**एतच्चेति**। सांख्यमतेऽन्तःकरणमन्तरात्मा, तस्यैव कर्तृत्वम्, पुरुषस्याकर्तृत्वात्। नैयायिकमते पुरुषस्य कर्तृत्वात् स एवान्तरात्मा। **शरीरात्मा सुखदुःखे इति**। शरीरस्याचेतनत्वात् सुखदुःखहेतुभ्यां संबध्यत इत्यर्थः, इति तत्र व्याख्यातम्। नन्वत्र कर्मस्थक्रियत्वाभावात् कथं कर्मवद्भावप्रसङ्गः, अत आह — **क्रियाफलस्येति**। नन्वेकयोगेन नियमद्वयं कथं लभ्यते, अत आह — **तप इति**। 'तपः सकर्मकस्य' इत्येको योगः, तप एव सकर्मकस्येति। 'तपःकर्मकस्यैव' इति द्वितीयः, तत्र च तप इत्यनुवर्तत इति द्वितीयो नियम इत्यर्थः। [12]ननूपवासादिकं तपस्तापसं तपतीत्यत्र तपेर्दुःखमर्थः, [13]तपस्तापसं दुःखयतीत्यर्थप्रतीतेः। तत्र तापसस्य कर्मणो दुःखानुभवो व्यापारः। 'तपस्तप्यते तापसः' इत्यत्र तपेरर्जनार्थत्वम्[14], तापसस्तपोऽर्जयतीति प्रतीतेः। [15]ततश्च दुःखानुभवरूपतपोऽर्जनरूपक्रिययोरत्यन्तवैसादृश्येन कर्मणा [16]तुल्यक्रियत्वाभावात् पूर्वेणाप्राप्तः कर्मवद्भावो

तस्य कर्तुः क्रियात्वाभावात् क्रियां प्रत्येव कर्मणो दर्शनस्य प्रसिद्धत्वात् कर्मकर्तुः कर्म दृश्यत इत्ययुक्तमित्यर्थोऽभिसंहित इति प्रतीयते ॥ कर्मकर्तुरक्रियत्वात् — ऋ, लृ.

[1] इत्यादिभाष्ये कर्तुः कर्मत्वं दृश्यत इत्याशङ्क्य — अ.

[2] 'कर्तृत्वम्' इति नास्ति — ऋ, लृ.

[3] शब्देनोपादीयते — ऋ, लृ.

[4] भाष्यकारस्याभिप्रायस्तन्नीयत इत्याह — — अ, ऋ, लृ.

[5] 'लूयते केदारः' इत्यादि 'न प्रयुज्यत इति' इत्यन्तं नास्ति — अ.

[6] तत्प्रयोगशब्देन — अ, ऋ.

[7] 'तौ' इति नास्ति — अ.

[8] करणस्यापि — अ.

[9] न तु कर्तृत्वप्रतिपादनाय विशेषः — अ, ऋ.

[10] तच्च व्याख्यानम् — ऋ.

[11] प्रदीपे 'णेरणावित्यत्र' इत्यत्र 'एतच्च णेरणावित्यत्र' इत्यन्नंभट्टाभिमतपाठ इति भाति।

[12] ननूपवासान्तं तपस्तपतीत्यत्र — अ.

[13] ततस्तापसं — ऋ.

[14] अर्जनार्थत्वात् — ऋ.

[15] 'ततश्च' इति नास्ति — अ.

[16] तुल्यक्रियात्वाभावात् — अ.

विधीयत इति वृत्तिकारैर्व्याख्यातम्। [1]तथा च कथं नियमार्थत्वमिति शङ्कते — **नन्विति**। **दुःखार्थत्वादिति**। ततश्च तापसस्य कर्मणो [2]दुःखानुभवरूपो व्यापार इत्यर्थः। **नैष इति**। उभयत्र तपेः शरीरसंतापोऽर्थः। तपस्तपति तापसम्, तच्छरीरं संतापयति। तत्र कर्मणस्तापसस्य शरीरसंताप [3]एव स्वव्यापारः। 'तपस्तप्यते तापसः' इत्यत्रापि कर्तुस्तापसस्य शरीरसंताप एव व्यापार इति तुल्यक्रियत्वान्नियमोपपत्तिरित्यर्थः। [4]अर्जनं कर्तृव्यापार इति यदुच्यते पूर्वैः, तैरप्यर्जनशब्देन संताप एवोक्त इति सूचनाय [5]'अर्जनम्' इत्युक्तम्। ननु 'तपस्तप्यते तापसः' इत्यत्र कर्मकर्तरि प्रत्ययः, संतापः प्रकृत्यर्थ इति भेदे स्पष्टे प्रश्नो न युक्तः, अत आह — **तापसेनेति**। तपसः कर्मत्वे तत्र प्रत्ययोत्पत्तिविषयः प्रश्न इत्यर्थः। **कर्मणि** तपोरूपे। **साध्यसाधनेति**। कर्मणोऽपि कारकतया रूपान्तरेण क्रियासाधनत्वादिति भावः। [1]असङ्गतिप्रसङ्गमाशङ्क्य व्रतविषय एव प्रश्न इत्याह — **अथवेति**। मुख्यावयवत्वाभावादाह — **विशेषेति**। विशेषमेवाह — **ज्ञानलक्षणमिति**। 'तापसस्तप्यते स्वर्गाय' इत्यत्र स्वर्गावाप्तिहेतौ ज्ञानविशेषे तपश्शब्दो वर्तत इत्यर्थः। ननु दोहनस्य गोपालव्यापारत्वात् कथं तत्र गोः [6]कर्तृत्वम्, अत आह — **गौर्मुञ्चतीति**। ननु 'गां दोग्धि' इत्यत्र गोः पयस्सेचनमेव प्रातिस्विकव्यापारः, कर्तृत्वेऽपि स एवेति तुल्यक्रियत्वेनैव कर्मवद्भावसिद्धेर्वचनं व्यर्थम्, अत आह — **दुहेरिति**। **अत्यन्तमिति**। [7]तुल्यक्रियत्वाभावः। दुहितुल्यतैवात्रापीत्याह — **अन्ये त्विति**। तर्हि 'ओदनं पच्यते देवदत्तः' इत्यपि प्रयोगः स्यात्, अत आह — **एवंविध इति**। ननु [8]श्यना [9]यग्वच्चिणोऽपि बाधात् कथं चिणर्थत्वम्, अत आह **श्यनेति**। ननु [10]श्यन्यको रूपे को विशेषः, अत आह — **श्यनि तु प्रकृतेरिति**। [11]'ञ्नित्यादिः' इत्यनेन। **सार्वधातुकेति**। [12]'अदुपदेशाल्लसार्वधातुकम्' इत्यनेन। **यक एवेति**। प्रत्ययाद्युदात्तत्वेन। 'युज्यते' इत्यत्र कर्मणा तुल्यक्रियत्वमस्तीत्याह — **योग इति**। 'असिस्छिद्यते' इति प्रयोगप्रसङ्गं निराह — **बहुलेति**। [13]तुल्यक्रियत्वेन सूत्रात् प्राप्तस्य निषेध इत्याह — **निष्क्रामदिति**। [14]स्रवतेर्विसर्गार्थत्वे प्रयोगमाह — **तथा चेति**। तथापि विसर्ग[15]स्रवणयोरभेदात् तुल्यक्रियत्वं स्यात्, अत आह — **विसर्गश्चेति**। कर्मशब्दोऽत्र कृत्रिमकर्मपरो न भवति, व्याख्यानादित्याह — **कर्मशब्द इति**। [16]भूषाक्रियायाः कर्मस्थत्वाभावात् कथमत्र प्राप्तिः, अत आह — **भूषाफलमिति**। **वक्ष्यमाणेन** [17]'यक्चिणोः प्रतिषेधे' इति वार्तिकेन। अण्यन्ते प्रयोजनमाह — **तेनेति**। ननु चिकीर्षायाः कर्मस्थत्वाभावात् कथमत्र कर्मवद्भावप्राप्तिः, येन प्रतिषेधः स्यात्, अत आह — [18]**करोतिक्रियेति**। ननु शब्दादिच्छायाः प्राधान्यं गम्यते, सा च [19]न कर्मस्था, अत आह — **अर्थाच्चेति**। तत्र हेतुः — **तदर्थत्वादिति**॥

---

[1] तत्र च — अ.
[2] दुःखानुभवव्यापार इत्यर्थः — अ.
[3] एव व्यापारः — ऋ.
[4] आर्जनं — अ.
[5] आर्जनम् — अ.
[6] कर्मत्वम् — ऋ.
[7] 'तुल्यक्रियत्वाभावात्' इति युक्तं भाति॥ तुल्यक्रियात्वाभावः — अ.
[8] 'श्यना' इति नास्ति — ऋ.
[9] यक्चिणोर्बाधात् — अ.
[10] यक्श्यनो रूपे — अ.
[11] पा. सू. ६.१.१९७.
[12] पा. सू. ६.१.१८६.
[13] तुल्यक्रियत्वे सूत्रात् — ऋ.
[14] सृजतेः — अ, ऋ.
[15] श्रवणयोः — ऋ.
[16] भूषाक्रियायां — अ.
[17] का. वा. ३.१.८९–१.
[18] न क्रियेति — ऋ, लृ.
[19] 'न' इति नास्ति — ऋ.

[३, १६८–१७६]

(रत्नप्रकाशः) प्रकृतसूत्रं विनैव कुसूलादेः कर्मत्वादेवात्मनेपदादिकं सिद्धमिति मन्यमान आह — **किमर्थमिदमिति**। **कर्तृत्वमस्तीति**। कर्तृत्वमेवास्ति, न तु कर्मत्वमिति कृत्वास्यातिदेशस्यारम्भ इति भावः। **क्रियेति**। विशरणरूपेति शेषः। वाताद्यन्यतमस्य तत्र कर्तृत्वसंभवान्मास्तु कुसूलस्य कर्तृत्वमित्याशयेन शङ्कते — **किं च भो इति**। यत्र वाताद्यन्यतमस्य कर्तृत्वं संभवति तत्रास्तु कुसूलस्य कर्मत्वम्। यत्र तु तदन्यतमस्य तन्न संभवति तत्र कुसूलस्यैव कर्तृत्वमिति तदर्थमारम्भणीयमेव प्रकृतसूत्रमित्याशयेनाह — **भवेत्सिद्धमिति**। **सुकरतेति**। द्विधाभवनरूपेत्यर्थः। यो द्विधा न भवति पर्वतादिः तं हि न कोऽपि लुनीते। **लान्तस्येति**। प्रकृतिप्रत्यययोः सहप्रयोगनियमादेवमुक्तम्। लस्य वाच्यः कर्तेत्येव तु सारम्। **प्रतिषेधो वक्तव्यः स्यादिति**। कर्मवद्भावस्येति शेषः। तत्प्रतिषेधफलं तु भावे कृत्याद्युत्पत्तिः कर्तरि द्वितीयाभावश्च ज्ञेयः। **भावे यथा स्यादिति**। भाव एव यथा स्यात्, न तु कर्मकर्तरीति भावः। **भावे क्तो यथा स्यादिति**। अत्र भावे क्तः स्यादित्यत्रैव तात्पर्यम्, न तु कर्तरि मा भूदित्यत्रापि। तत्र [1]'गत्यर्थाकर्मक' इति सूत्रेणाकर्मकत्वप्रयुक्तस्य क्तस्यानिवार्यत्वात्। एवमपि प्रकृतसूत्रं व्यर्थमेवेत्याशयेनाह — **सिद्धं त्विति**। **आत्मसंयोग इति**। आत्मशब्दप्रयोग इत्यर्थः। **कर्मदर्शनादिति**। कर्मत्वदर्शनादित्यर्थः। **हन्त्यात्मानमिति**। तिङ्वाच्यकारकवाचिनि युष्मदस्मद्भ्यामन्यस्मिन्नप्रयुज्यमाने प्रथमपुरुष इति तिपा कर्तृसामान्यं गम्यते। प्रत्यासत्त्या त्वात्मेति तद्विशेषो गम्यते। एवम् 'आत्मना हन्यते' इत्यत्र तशब्देन कर्मसामान्यमुच्यते। प्रत्यासत्त्या त्वात्मेति विशेषः। एवं च 'भिद्यते कुसूलः' इत्यत्र कर्मण्येव मुख्ये लकारोऽस्तु। प्रत्यासत्त्या त्वात्मनेति कर्तृविशेषो गम्यतामित्याशयः फलितः। **विषम इति**। यद्येकस्य कर्मत्वं कर्तृत्वं च दृष्टान्ते निदर्शितं स्यात् तदा तेन दृष्टान्तेन प्रकृतेऽभिमतार्थसिद्धिः स्यात्, न तु तदेकस्य तत्र निदर्शितमिति न तेनात्राभिमतसिद्धिरिति भावः। **पदलोप इति**। प्रत्यासत्त्या गम्यमानार्थत्वादप्रयोगस्तत्र पदस्येति भावः। **कः पुनरिति**। यदि तत्रात्मान्यः कर्ता कर्म वा संभवेत् तदा तेन दृष्टान्तेनाभिमतं न सिध्येत्, स त्वन्यो न संभवतीति मन्यते। भगवानाह — **द्वावात्मानाविति**। **अन्तरात्मेति**। लिङ्गशरीरम्। **शरीरात्मेति**। स्थूलशरीरम्। यद्यपि 'राहोः शिरः' इत्यादाविवैकस्यापि वस्तुनो भेदविवक्षायां 'भिद्यते कुसूल आत्मना' इति प्रयोगः संभवति, तत्रापि गम्यमानार्थत्वादात्मनेत्यस्याप्रयोगे 'भिद्यते कुसूलः' इत्यपि प्रयोगः संभवति, तथापि यदा भिदिर्द्विधाभवनमात्रे वर्तते तदा कुसूलस्यैव तत्र कर्तृत्वं भवति नान्यस्येति प्रकृतसूत्रमारभ्यमेवेति तत्त्वम्। **अन्योन्यमाश्लिष्यत इति**। देवदत्तयज्ञदत्ताविति शेषः। यस्यां क्रियायां परस्परं कर्तृत्वं कर्मत्वं च संभवति सा कर्मस्था क्रिया भवतीत्येतस्मादेव भाष्यादवगम्यते। एतेन 'क्रियाफलस्य संयोगस्य कर्मणि दर्शनात् कर्मस्थक्रियत्वमत्र द्रष्टव्यम्' इति निरस्तम्। संयोगफलकानां गत्यर्थानां कर्तृस्थक्रियत्वाभ्युपगमपरेण [2]'णेरणौ' इति सूत्रगतेन स्वग्रन्थेन विरोधात्। सकर्मकाणां प्रतिषेधं विनैवेष्टं सिध्यतीत्याह — **तपेर्वेति**। तप इति योगं विभज्य सकर्मकस्येत्यध्याहृत्य नियमपरतया व्याख्यास्यत इति भावः। संपूर्णमेव सूत्रमेकनियमपरतया व्याख्यातमिति मन्यमानः शङ्कते — **तस्य तर्हीति**। तप इति पूर्वभागमनुवर्त्य तपः सकर्मकस्य कर्ता कर्म चेत् तपःकर्मकस्यैवेति नियमान्तरपरतयोत्तरभागस्य व्याख्यानान्नोक्तदोष इत्याशयेनाह — **तस्य चेति**।

---

[1] पा. सू. ३.४.७२. [2] पा. सू. १.३.६७.

किमिति। कथं व्युत्पन्न इति भावः। [1]**अस्कारप्रत्यय इति**। भाष्यकारप्रयोगादत्र कारप्रत्ययो ज्ञेयः। **प्रकृत्यर्थ इति**। कर्मवद्भावप्रयुक्तात्मनेपदप्रकृत्यर्थ इति भावः। **प्रत्ययार्थ इति**। तप इत्यत्रासुप्रत्ययार्थ इति भावः। **स एवेति**। य एव धातुपाठे निर्दिशितः स एवेत्यर्थः। **संताप इति**। प्रकृत्यर्थः प्रत्ययार्थश्चेति शेषः। [2]**प्रत्ययार्थः स्यादिति**। कर्म स्यादित्यर्थः। **प्रकृत्यर्थः स्यादिति**। क्रिया स्यादित्यर्थः। न ह्येकस्य वस्तुनो युगपत् क्रियाकर्मभावः संभवतीति शेषः। **सामान्यतपेरिति**। धातुत्वेन सकलधातुवाच्यस्य क्रियासामान्यस्यावयवतपिः कृच्छ्रचान्द्रायणादिरूपः तपित्वेन तपिवाच्यः कर्म भवतीत्यर्थः। तथा च 'तप्यते तापसस्तपः स्वयमेव' इत्यस्य वाक्यस्य तापसः कृच्छ्रचान्द्रायणादि[3]रूपं तपः कुर्वन् स्वयमेव दह्यते कृशो भवतीत्यर्थः फलति। कृच्छ्रचान्द्रायणादिरूपं तपस्तापसं तपतीति वाक्ये तापसस्य कर्मत्वे यो व्यापारः स एव कर्तृत्वदशायामपीति प्रकृतसूत्रेण कर्मवद्भावप्राप्तिः। **स एतान् पोषानिति**। स देवदत्तो गोपोषमश्वपोषं रैपोषमित्येतान् पोषान्, **अपुषत्** अकरोदित्यर्थः। **दुहिपच्योरिति**। उक्तनियमादप्राप्ते वचनमिदम्। **दुग्धे गौः पय इति**। गौः पयो मुञ्चतीत्यर्थः। **तस्मादिति**। तस्मात् कालात् स उदुम्बरो लोहितं फलं पच्यत इत्यन्वयः। 'काल उदुम्बरं लोहितं फलं पचति' इति वाक्ये [4]'अकथितं च' इत्युदुम्बरस्य कर्मत्वम्। **श्यंस्त्विति**। श्यंश्चेत्यर्थः। चात् कर्मवद्भावः। **श्रद्धोपपन्न इति**। तथा चाप्राप्त एव कर्मवद्भावोऽतिदिश्यत इति भावः। **सृज्यते मालामिति**। श्रद्धया मालां निर्वर्तयतीत्यर्थः। **न्याय्ये कर्मकर्तरीति**। योगी ब्रह्मचारिणं युङ्क्त इति वाक्ये योगकर्तृकप्राप्तिकर्मत्वं ब्रह्मचारिण इति कर्मवद्भावप्राप्तिः। **यकोऽभावायेति**। श्यन्विधिरिति शेषः। श्यन्याद्युदात्तत्वं प्रकृतेः, यकि तु स उदात्त इति विशेषः। **करणेनेति**। बहुलग्रहणात् 'साध्वसिश्छिनत्ति' इत्यादौ न भवति। **स्रवत्यादीनां प्रतिषेध इति**। अन्तर्भावितण्यर्थाः [5]स्रवत्यादय इति 'स्रवति कुण्डिकोदकम्' इत्यादौ स्रवदुदकं कुण्डिका स्रावयतीत्यर्थप्रतीत्या कर्मवद्भावप्रसक्तिरिति भावः। **विसृजतीति गम्यत इति**। ददातीति गम्यत इत्यर्थ इत्याहुः। वस्तुतस्त्वर्थविशेषापेक्षया युक्त एव प्रतिषेधः। **भूषाकर्मेति**। कर्मशब्दोऽत्र क्रियावाची। भूषाफलं च शोभाख्यं कर्मणि दृश्यत इति कर्मस्था भूषा। **भूषयते कन्या स्वयमेवेति**। [6]'णिश्रन्थिग्रन्थिब्रूञामात्मनेपदाकर्मकाणाम्' इत्युत्तरसूत्रगतवार्तिकसाधारणमिदमुदाहरणम्। प्रकृतवार्तिकासाधारणं तु 'अलंकुरुते कन्या स्वयमेव' इत्यादि ज्ञेयम्। **अवकिरत इति**। हस्तिनं कश्चित् पांस्वादिनावकिरति। तत्र सौकर्यातिशयेन हस्तिनः कर्तृत्वेऽयं प्रयोगः। अन्तर्भावितण्यर्थे कर्मणो वा हस्तिनः स्वातन्त्र्यविवक्षायामयम्। **चिकीर्षत इति**। करोत्यर्थमादायात्र कर्मस्थक्रियत्वं बोध्यम्॥

[३, १६८–१७६]

(नारायणीयम्) ननु विक्लेदनादौ कर्तृव्यापारे पारतन्त्र्यादोदनादेः कथं स्वातन्त्र्यमित्यत आह

---

[1] भाष्ये 'अस्कारो भावसाधनः' इत्यत्र 'अस्कारप्रत्ययो भावसाधनः' इति रत्नप्रकाशकृत्पाठ इति भाति।

[2] भाष्ये 'कथं पुनः स एव नाम प्रकृत्यर्थः स्यात् स एव च प्रत्ययार्थः' इत्यत्र 'कथं पुनः स एव नाम प्रत्ययार्थः स्यात् स एव प्रकृत्यर्थः' इति पाठान्तरं हरयाणामुद्रितेऽधः प्रादर्शि। तदत्राभिमतमिति प्रतीयते।

[3] रूपतपः कुर्वन् — प.

[4] पा. सू. १.४.५१.

[5] सृजत्यादय इति — ब.

[6] महाभाष्ये ३.१.८९. सूत्रे भारद्वाजीयवार्तिकम्।

—**पच्यते ओदन इति**। अनेकार्थत्वाद्धातूनां यदा विक्लित्त्यादिमात्रवाची पचादिः तदौदनादेः स्वातन्त्र्यविवक्षेत्यर्थः। उक्तं च—

[1]तानि धात्वन्तराण्येव पचिसिध्यतिवद् विदुः।
भेदेऽपि तुल्यरूपत्वादेकत्वपरिकल्पना ॥ इति।

कथं पुनर्वातादीनां विशरणादौ कर्तृत्वमाशङ्कितमित्यत्राह—**कारणाभाव इति**। **कुसूलस्यैवेति**। अदृढ[2]संनिवेशित्वात् स्वयमेव विशीर्यत इत्यर्थाविगमाद् दृष्टे संभवत्यदृष्टकल्पनाया अयुक्तत्वाद्वातादेः [3]कारणत्वाभावः। अत एवोक्तं भाष्ये [4]"निर्वाते निरभिवर्षेऽचिरकृतः कुसूलः स्वयमेव भिद्यते' इति। ननु सुकरताया गुणत्वात् कथं कर्त्रा योगः स्यात्, क्रियायाः साधनयोगनियमादित्याशङ्क्य 'सुकरता' इत्यनेन तद्युक्तः कर्मव्यापारो द्विधाभवनलक्षणो लक्ष्यत इत्याह—**द्विधाभवनेति**। **अन्ययेति**। सुकरताया अभाव इत्यर्थः। उक्तं च—[5]'निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्। निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ॥ इति। 'लान्तस्य' इति षष्ठी तन्त्रादिन्यायेन वाच्यवाचकभावे कर्त्रपेक्षया कार्यशब्दाध्याहारेण निमित्तनिमित्तिभावे चेत्याह—**लान्तवाच्य इति**। लान्तवाच्यः कर्ता कर्मवदित्याश्रयणे प्रयोजनमाह—**तेन कर्मणीति**। **षष्ठीतृतीये भवत इति**। [6]'कृत्यानां कर्तरि वा' इत्यत्रानभिहिताधिकारात्। अन्यथा 'भेत्तव्यः कुसूलः' इति प्रथमा स्यात्। लान्तकार्येष्वेवेति नियमे प्रयोजनमाह—[7]**भिद्यते कुसूलेनेत्यत्र चेति**। अत्र भावे लविधिः सिद्धो भवति, त्वत्करणात् स्वाश्रयकार्यलाभात्। कर्मणि तु द्वितीया न भवति, तेन स्वाश्रयकार्यं कर्तृतृतीया भवति। अन्यथातिदेशिकेन कार्येण विरुद्धत्वात् सा न स्यात्। **क्तग्रहणस्यात्रेति**। भिन्नं कुसूलेनेत्यत्र। कुत्र तर्हि दृश्यत इत्यत्राह—**गवा दुग्धमिति**। यद्यत्र कर्मकर्तुर्गोः कर्मवद्भावः स्यात् तदा [8]"अप्रधाने दुहादीनाम्' इति वचनाद् गवि कर्मणि क्ते सति 'गौर्दुग्धा पयः' इति स्यात्। कर्मवद्भावे त्वसत्यप्रधानकर्माभावात् पयस्येव कर्मणि कर्मवद्भावात् क्ते सति 'गवा दुग्धं पयः' इतीष्टं [9]सिध्यतीति भावः। अत्र प्रयोजनं [10]न दृश्यत इति यदुक्तं तदेव विशदयितुमाह—**तथा हीति**। अत्र हि कर्मवद्भावे सति कर्मणि क्ते 'भिन्नः कुसूलः' इति भवति। त्वत्करणाच्च[11] स्वाश्रयप्रतिपत्त्यर्थादकर्मकत्वाद् भावे क्ते सति 'भिन्नं कुसूलेन' इति। कर्मवद्भावाभावे त्वकर्मकत्वाद् भावे कर्तरि च क्तो भवति। तत्र यदेव कर्मणि रूपं तदेव कर्तरीति रूपे चार्थे च भेदाभावाद् भिदेः क्तविषये कर्तुः कर्मवद्भावे प्रयोजनं न भवति, दुह्यादिषु तु प्रयोजनमित्यर्थः। **कर्तर्युदाहरिष्यत इति**। [12]'ल्वादिभ्यः' इति नत्वविधौ। प्राकृतशब्दस्यानेकार्थत्वाद्व्याचष्टे—**प्राकृतं स्वाभाविकमिति**। ततश्च सूत्रं विनेष्टं सिद्धमिति वार्तिकार्थः। [13]आत्मनः संयोगे कर्मत्वेन कर्तृत्वेन च संबन्धे विवक्षिते कर्मकर्तृत्वेनाभिमतस्य कुसूलादेः कर्मत्वदर्शनात् स्वाभाविकमेतत् कर्मेति वार्तिकार्थं दर्शयति—**एकस्यैव वस्तुन इति**। **एकस्य बुद्ध्यवस्थाभिरिति**। बुद्धेरवस्थाविशेषाः, प्रतिभासनानात्वमिति यावत्। तदनु-

---

[1] वाक्यपदीयम्. ३.७.५७.
[2] संनिवेशितत्वात्—ङ.
[3] करणत्वाभावः—ङ.
[4] 'निवाते' इत्यस्यार्थानुवादः।
[5] वाक्यपदीयम् ३.७.५६.
[6] पा. सू. २.३.७१.
[7] प्रदीपे 'भिद्यते कुसूल इत्यत्र च' इत्यत्र 'भिद्यते कुसूलेनेत्यत्र च' इति पाठोऽभिमत इति प्रतीयते।
[8] महाभाष्यम्. १.४.५१.
[9] सिद्धमिति भावः—ङ.
[10] 'न' इति नास्ति—घ.
[11] चकारो नास्ति—ङ.
[12] पा. सू. ८.२.४४.
[13] आत्मना संयोगे—ङ.

सारेणैकस्यैव वस्तुनो भेदेन परिकल्पने वैवक्षिके सति कर्तृत्वादिरूपेणावस्थानमुपपद्यते। तथा हि — शस्त्राद्युद्यमननिपातनव्यापारवान् हन्तीति कर्ता। तद्विषयभावापत्तिस्तस्यैवेति स एव कर्म। सौकर्यातिशयविवक्षायां शस्त्रादि[1]व्यापारस्य निरासप्रतिपादनाय स एव करणम्। अन्यत्र कर्मकरणयोर्भेदेन दृष्टत्वादिह तन्निरासः क्रियते। 'विषम उपन्यासः' इत्यादिना दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमुक्तमुपपादयन् सूत्रं समर्थयमानस्य सिद्धान्तिन आशयं दर्शयति — **अयं भाव इति**। [2]**यदा स्वयंशब्दो नेति**। स्वयंशब्दप्रयोगे तु शब्देन भेदेनात्मनः कर्तृत्वप्रतिपादनात् केदारस्य कर्मत्वमेवेत्यतिदेशोऽनर्थकः स्यादिति भावः। कर्मवदतिदेशस्य कर्तव्यतां विपक्षे बाधदर्शनेनापि समर्थयते — **नमते दण्ड इत्यादौ चेति**। **शप्चङौ न स्यातामिति**। दण्डादेः कर्तृत्वाभावात्। 'कर्ता न दृश्यते' इत्ययुक्तम्, हन्तीति लकारेण कर्तुरभिधानादित्याशङ्क्याह — **हन्तीति कर्तरीति**। नन्वात्मनेति तृतीयया करणस्याभिधानात् कथं 'कर्ता दृश्यते' इत्युच्यत इत्यत आह — **तमन्तरेणेति**। ननु हन्यत इत्यनेन कर्मणोऽभिधानात् 'कर्म न दृश्यते' इत्ययुक्तमित्यत आह — [3]**कर्तृव्यतिरेकेणेति**। भाष्ये पदलोपद्वारेणात्मभेदस्य शब्देन प्रतिपादनात् कर्मत्वं कर्तृत्वं च युज्यत इति प्रतिपादितम्। तदेतद्दर्शयति — **गम्यमानेति**। नन्वेवं सति 'लूयते केदारः स्वयमेव' इत्युदाहरणप्रदर्शनमयुक्तमित्याशङ्क्य तदुपपादनायाह — **यत्त्विति**। **न त्वेतदिति**। लोकवेदयोः स्वयंशब्दो न प्रयुज्यत इत्यर्थः। 'अन्योन्यमाश्लिष्यतः' इत्यादौ [4]कर्मवद्भावप्राप्तिं दर्शयति — **क्रियाफलस्येति**। ननु 'तपः' इत्यत्र योगे विधेरेव संभव इति नियमो न युक्त इति चोदयति — **नन्विति**। **उपवासादेरिति**। उपवासादीनि तपांसि तापसं तपन्ति दुःखयन्तीत्यर्थः। 'तप्यते तपस्तापसः' इत्यत्रार्जयतीत्यर्थः। **अवस्थाद्वयेऽपि शरीरसंतापलक्षणमेवेति**। वस्तुस्थित्यात्रार्जनस्य शरीरसंतापलक्षणत्वात् कर्मस्थया क्रियया तुल्यक्रियत्वात् पूर्वेण सिद्धे नियमार्थमिदमित्यर्थः। 'तपस्तप्यते' इत्यत्र प्रकृतिप्रत्ययार्थयोर्भेदाभावं स्फोरयति — **तापसेनेति**। ननु प्रकृत्यर्थस्यैव प्रत्ययार्थत्वं भवतु, का हानिरित्यत्राह — **क्रियाकर्मणोश्चेति**। एवमुदाहरणेऽनुपपत्तिर्भाष्ये कथितेति दर्शितम्। यद्वा सूत्रे निर्देशानुपपत्तिरुक्तेति पक्षान्तरमाह — **अथवेति**। **विशेषतपिर्ज्ञानलक्षणमिति**। ज्ञानफलमुपवासादिकं 'तप्यते' इत्यत्र प्रकृत्यर्थः, [5]फलमात्रं तु प्रत्ययार्थः, उपवासादिना ज्ञानं प्राप्नोतीत्यर्थः। 'दुग्धे गौः पयः' इत्यत्र वचनोपयोगं दर्शयितुमाह — **मुञ्चति पय इति**। **फलं पच्यत इति**। अत्र न केवलं सकर्मकत्वमेव वचने हेतुः, किं तर्हि, कर्मस्थया क्रियया तुल्यत्वाभावोऽपीति, तदाह — **अत्यन्तमप्राप्त इति**। **अन्ये त्विति**। अस्मिन् पक्षे कालादेः कर्तृत्वम्। **वृक्षस्य पाकमिति**। उदुम्बरो हि स्वयं पाकमनुभवन् फलपाकमपि करोति। प्रसिद्धमुदाहरणं परित्यज्याप्रसिद्धोदाहरणप्रदर्शने भाष्यकृत [6]आशयं दर्शयति — **एवंविध एवेति**। एतच्च बहुलग्रहणाल्लभ्यते। **श्यना यगेवेति**। 'चिणर्थः' इत्यनुच्यमाने यथा श्यना यग् बाध्यते, एवं चिणपि बाध्येतेति तन्निवृत्त्यर्थं [7]'चिणर्थः' इत्युक्तमित्यर्थः। ननु यक्यपि 'सृज्यते' इत्यादिरूपं सिद्धम्, किं श्यन्विधानेनेत्यत्राह — **श्यनीति**। 'युज्यते ब्रह्मचारी योगम्' इत्यत्र कर्मकर्तृत्वमुपपादयति — **योगो ब्रह्मचारिणमिति**। **योगः** चित्तवृत्तिनिरोधः, **ब्रह्मचारिणं** यमनियमादियुक्तम्।

---

[1] व्यापारस्यानिरास — ङ.

[2] प्रदीपे 'यदा स्वयमिति शब्दो न प्रयुज्यते' इत्यत्र 'यदा स्वयंशब्दो न प्रयुज्यते' इति पाठः स्वीकृतः।

[3] प्रदीपे 'कर्तृविशेषव्यतिरेकेण' इत्यत्र 'कर्तृव्यतिरेकेण' इति पाठो निर्णयसागरमुद्रिते।

[4] कर्मवद्भावाप्राप्ति — ङ.

[5] फलमात्रमुक्तप्रत्ययार्थः — ङ.

[6] 'आशयम्' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — ङ.

[7] चिणर्थमित्युक्तम् — ङ.

ननु कर्मणेत्यस्य प्रयोजनमुक्तं करणादिस्थया क्रियया तुल्यक्रियः कर्ता कर्मवन्मा भूदिति। तत्कि-मुच्यते 'करणेन तुल्यक्रियः' इति, तत्राह — **बहुलग्रहणादिति**। **निष्कामदुदकमिति**। 'स्रवति कुण्डिकाया उदकम्' इत्यत्र [1]तु निष्क्रमणमात्रमर्थ इति कर्मस्थया क्रियया तुल्यक्रियत्वम्। **इति** [2]**तुल्यक्रियत्वाभाव इति**। कर्मावस्थायां दानं धात्वर्थः, [3]कर्त्रवस्थायां तु निष्क्रमणमिति तुल्य-क्रियत्वाभाव इत्यर्थः। भाष्ये 'भूषयते कन्या स्वयमेव' इत्याद्युदाहरणप्रदर्शनमुपलक्षणार्थमिति दर्शयति — **अण्यन्तार्थं चेति**। ननु प्राधान्यात् प्रत्ययार्थस्य कर्मस्थत्वे कर्मवद्भावेन भाव्यम्, न तु प्रकृत्यर्थस्येत्यत आह — **अर्थाच्चेति**॥

न दुहस्नुनमां यक्चिणौ ३.१.८९.

[३, १७६–१७७]

(उद्द्योतनम्) नन्वकर्मकत्वे कर्मणा [4]तुल्यक्रियत्वाभावादेवाप्राप्तेः प्रतिषेधोऽनर्थक इत्याशङ्क्य 'आत्मनेपदाकर्मकाणाम्' इत्येतद्व्याचष्टे — **आत्मनेपदेति**। **विकुर्वत इति**। [5]'वेः शब्दकर्मणः' [6]'अकर्मकाच्च' इत्यात्मनेपदविधौ विपूर्वस्य करोतेरकर्मकत्वम्। णिसामान्यग्रहणस्य प्रयोजनमाह **उत्पुच्छयत इति**। ननु वचनक्रियायाः कथानिष्ठत्वाभावात् कर्मवद्भावाप्राप्तेर्निषेधो व्यर्थः, अत आह — **वचनमिति**। **शब्दप्रकाशनं** शब्दाभिव्यक्तिः, सा शब्दनिष्ठा फलं यस्य तत्त्वादिति विग्रहः। फलद्वारा वचनक्रियायाः कथानिष्ठत्वमित्यर्थः॥

[३, १७६–१७७]

(रत्नप्रकाशः) ब्रूते कथेति। वचनं शब्दप्रकाशनफलमिति कर्मस्थम्। **आत्मनेपदाकर्मका-णामिति**। आत्मनेपदविधौ येऽकर्मका धातवो निर्दिष्टास्ते यदान्तर्भावितण्यर्थतया सकर्मका भवन्ति तदा यत् कर्म तस्य पुनः स्वातन्त्र्यविवक्षायां कर्मवद्भावाद्यक्चिणोः प्रसक्तिः॥

[३, १७६–१७७]

(नारायणीयम्) नन्वात्मनेपदविधावकर्मकाणां कर्माभावात् कर्मस्थया क्रियया तुल्यक्रियः कर्ता न संभवतीति कर्मवद्भावेन यक्चिणोः प्राप्त्यभावान्नार्थः प्रतिषेधेनेत्यत आह — **आत्मनेपदविधा-विति**। **यथा विकुर्वत इति**। [7]'वेः शब्दकर्मणः' [8]'अकर्मकाच्च' इत्यात्मनेपदम्। णिग्रहणेन णिङोऽपि ग्रहणमिति 'उत्पुच्छयते गौः स्वयमेव' इत्यादावपि यक्चिणौ न भवत इत्याह — **उत्पुच्छयते गौरिति**। [9]पुच्छमुदस्यन्तीं गां यदा कश्चिदुदासयतीति विवक्ष्यते तदा गोः कर्मत्वम्।

---

[1] तुशब्दो नास्ति — ङ.
[2] तुल्यक्रियात्वाभाव इति — घ.
[3] कर्तृत्वावस्थायां तु — ङ.
[4] तुल्यक्रियात्वाभावादेवाप्राप्तेः — अ.
[5] पा. सू. १.३.३४.
[6] पा. सू. १.३.३५.
[7] पा. सू. १.३.३४.
[8] पा. सू. १.३.३५.
[9] पुच्छमुदस्यन्ती गौर्यदा क्वचिदुदासयतीति वि-वक्ष्यते — ङ.

ततः सौकर्यातिशयात् कर्तृत्वविवक्षायां कर्मस्थया क्रियया तुल्यक्रियत्वम्। 'ब्रूते कथा स्वयमेव' इत्यत्र कर्मस्थक्रियत्वात् कर्मवद्भावप्राप्तिं दर्शयति — **वचनमिति**। कथकः कथां ब्रूते, ततः कथायाः कर्तृत्वविवक्षायामयं प्रयोगः॥

कुषिरजोः प्राचां श्यन् परस्मैपदं च ३. १. ९०.

[३, १७७–१७९]

(उद्द्योतनम्) सूत्रप्रयोजनमाह — **यकीति**। आत्मनेपदे प्राप्ते परस्मैपदमित्यपि ज्ञेयम्। श्यनः कार्यविशेषमाह — **तेनेति**। परस्मैपदस्य सार्वधातुके परतो विधानसंभवादाह — **सार्वधातुक इति**। परस्मैपदसंनियोगेन विधीयमानस्य श्यनस्तदभावे कथं प्राप्तिः, अत आह — [1]**'परस्मैपदं त्विति**। [2]चकारोऽन्वाचये, ततः [3]संनियोगशिष्टं न भवतीत्यर्थः। ननु स्यादेः शबाद्यपवादत्वात् कथं वैपरीत्यम्, अत आह — **विशेषेति**। धातुविशेषे [4]कर्मकर्तरि विशेषविधानम्। भाष्ये **पूर्वस्मिन् योगे** [5]'कर्मवत् कर्मणा' इति योगे। [6]'लिङ्याशिष्यङ्' इत्यत्र द्विलकारको निर्देशः, तत्रैकः [7]'कर्मवत्' इति सूत्रेऽन्वेतीत्युक्तम्। तत्र लसार्वधातुकयोः प्रत्येकं कर्मवद्भावप्रयोजकत्वम्, किं वा लस्थानिकसार्वधातुकस्येति विचारः — भाष्ये **किं समुच्चय इति**। भाष्ये **भिन्दाना इति**। [8]'ताच्छील्यवयोवचन' इति चानशि लादेशो न भवति। [9]शित्त्वात् सार्वधातुकमिति तत्रापि कर्मवद्भावाद्यक् प्राप्नोतीत्यर्थः। भाष्ये **लग्रहणमिति**। लस्थानिकं यत् सार्वधातुकं तस्मिन् कर्मवद्भाव इत्यर्थः। भाष्ये **लिङ्लिटोरिति**। तदादेशस्यार्धधातुकत्वादित्यर्थः। **यत्र यकः प्राप्तस्येति**। स्यादेर्यगपवादत्वेन तद्विषये यकः प्राप्तिर्नास्तीत्यर्थः। श्यना स्यादिबाधाभावे प्रकारान्तरमाह — भाष्ये **अथवानुवृत्तिः करिष्यत इति**। ननु परत्वाल्लादेशेषु [10]कृतेषु स्यादय इति [11]'लावस्थायाम्' इत्ययुक्तम्, अत आह — **अकृतेष्विति**। कृतेष्वपि लादेशेषु सार्वधातुकानपेक्षत्वात् तदपेक्षश्यनपेक्षयान्तरङ्गाः स्यादय इत्यपि ज्ञेयम्। कृतेष्वपि स्यादिषु श्यन्परस्मैपदे कथं न स्याताम्, अत आह — **तैश्चेति**। [12]तेषु कृतेषु सार्वधातुके परतो धातोः परः श्यन् विधीयमानः स्यादिभिर्व्यवधानान्न भवतीत्यर्थः॥

[३, १७७–१७९]

(रत्नप्रकाशः) कर्मवद्भावप्रयुक्तयगात्मनेपदापवादत्वेन श्यन् परस्मैपदं चानेन विधीयते।

---

[1] प्रदीपे 'परस्मैपदं चान्वाचयशिष्टम्' इत्यत्र 'परस्मैपदं त्वन्वाचयशिष्टम्' इत्यन्नंभट्टपाठ इति भाति।

[2] सूत्रे विद्यमान इत्यर्थः।

[3] संनियोगे शिष्टं — अ.

[4] 'कर्मकर्तरि' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ऋ.

[5] पा. सू. ३.१.८७.

[6] पा. सू. ३.१.८६.

[7] पा. सू. ३.१.८७.

[8] पा. सू. ३.२.१२९.

[9] ङित्त्वात् — अ, ऋ, लृ.

[10] 'कृतेषु' इति नास्ति — अ.

[11] भाष्ये 'लकारावस्थायाम्' इत्यत्र 'लावस्थायाम्' इति निर्णयसागरमुद्रिते पाठः।

[12] तेषु परेषु सार्वे — अ.

सार्वधातुकवचनमिति। सार्वधातुके विषये सति श्यन्परस्मैपदे भवत इति वक्तव्यमिति भावः। सार्वधातुकग्रहणेन क्वचिदतिव्याप्तिवारणेऽपि न सर्वत्र तदित्याशयेनाह — **क्रियमाणे चापीति**। **कुष्णाना इति**। [1]'ताच्छील्यवयोवचनशक्तिषु चानश्'। [2]**अत्रापि प्राप्नोतीति**। श्यनिति शेषः। परस्मैपदमन्वाचयशिष्टमिति तदभावेऽपि श्यन् स्यादिति मन्यते। **बाधनं प्राप्नोतीति**। विशेषविहितत्वादिति शेषः। **यक्प्रतिषेधसंबन्धेनेति**। तथा च यत्रैव यकः प्रतिषेधस्तत्रैव श्यन्परस्मैपदे भवत इति भावः। [3]**लावस्थायामिति**। कर्मवद्भावादन्तरङ्गेषु स्यादिषु ततः कर्मवद्भावसमये श्यनोऽप्रसक्त्या तत्संनियोगशिष्टं परस्मैपदमपि न भवतीति भावः॥

[३, १७७–१७९]

(नारायणीयम्) किमर्थमनेन श्यन्विधीयत इत्यत्राह — **यकि प्राप्त इति**। यक्श्यनोः स्वरे रूपे च विशेषं दर्शयति — **तेनेति**। अन्यथा लसार्वधातुकानुदात्तत्वे यक एवोदात्तत्वं स्यात्। [4]**नित्यश्च नुमागम इति**। अन्यथा [5]'आच्छीनद्योर्नुम्' इति विकल्पः स्यात्। सार्वधातुकग्रहणे सति यदि परसप्तम्याश्रीयेत तर्हि परस्मैपदविधानमनुपपन्नं स्यात्। अतो विषयसप्तम्याश्रयणीयेत्याह — **सार्वधातुके विषयभूत इति**। ननु परस्मैपदसंनियोगेन विधीयमानस्य श्यनः कथं प्राप्तिरित्यत आह — [6]**परस्मैपदं त्विति**। तेन परस्मैपदाभावेऽपि श्यन् स्यात्। किं परत्वात् स्यादीन् बाधित्वा श्यनः प्राप्तिः, नेत्याह — **विशेषविहितत्वादिति**। प्रतिषेधसंबन्धेन श्यनो विधाने कथं दोषपरिहार इत्यत्राह — **तेन यत्रेति**। **तैश्च श्यन इति**। सार्वधातुके परतो धातोः श्यन् विधीयमानः स्यादिषु कृतेषु तैर्व्यवधानान्न भवति। तेन तत्संनियोगशिष्टत्वात् परस्मैपदमपि न भवतीत्यर्थः॥

धातोः ३.१.९१.

[३, १७९–१८५]

(उद्द्योतनम्) नन्वधिकारत्वे मानाभावादवधिप्रश्नो न युक्तः, अत आह — **स्वरितत्वेति**। ननु स्वरिते सति नाधिकार इत्यवधिरपि ज्ञायत एव, अत आह — **अथापीति**। धात्वधिकारनिवृत्त्यर्थं प्रतिज्ञातं यत् स्वरितत्वं तत् क्वेति न ज्ञायत इत्यन्वयः। भावाद्यधिकारनिवृत्त्यर्थस्वरितत्वप्रतिज्ञानस्यापि संभवादिति भावः। बहूनां लकाराणामादेशविधिषु [7]'तिप्तस्' इति योग आद्य इत्यभिप्रेत्याह — **तिप्तस्झीत्यत्रेति**। भाष्योदाहृत'पचति, पठति' इत्येतत्समर्थनायाह — **यदा त्विति**। द्वितीये परत आद्यस्यायादेशे एकारद्वयश्रवणं कथमित्याशङ्क्याह — **यद्यपीति**। [8]स्थानि-

---

[1] पा. सू. ३.२.१२९.
[2] अत्र प्राप्नोतीति — प, ब.
[3] भाष्ये 'लकारावस्थायाम्' इत्यत्र 'लावस्थायाम्' इति निर्णयसागरमुद्रिते पाठः।
[4] नित्यं च — घ, ङ.
[5] पा. सू. ७.१.८०.
[6] प्रदीपे 'परस्मैपदं चान्वाचयशिष्टम्' इत्यत्र 'परस्मैपदं त्वन्वाचयशिष्टम्' इति पाठोऽभिमतः।
[7] पा. सू. ३.४.७८.
[8] स्थानिवत्त्वेन — अ.

त्वेन प्रतीतिः श्रवणशब्देन विवक्षिता। आदेश [1]एव वैकारशब्देन विवक्षित इति भावः। भाष्ये **एकारस्यैकारवचन इति**। यद्यपि विशेषविहितत्वात् पूर्वं [2]'लिटस्तझयोः' इत्येत्वेन भाव्यम्, तथापि [3]लिटि तत्प्रतिबन्धेनानेन तद्विधानं व्यर्थमिति भावः। अकारत्रयसंदेहादाह — **यस्थस्येति**। **इट् प्राप्नोतीति**। क्रादिनियमात्। तथा चेटोऽकारादेशे थकारेण व्यवधानात् पररूपासंभवादिष्टं न सिध्यतीत्यर्थः। शब्दान्तरप्राप्त्यानित्यत्वमिह नाश्रीयत इत्याह — **न चेति**। भाष्ये **विन्दतीति**। 'विद्लृ लाभे,' तुदादित्वाच्छः, [4]'शे मुचादीनाम्' इति नुम्। [5]'विदो लटो वा' इत्यत्र विदेर्धातोर्विहितस्य लस्य स्थाने [6]विहितानां परस्मैपदानां णलादय इति विहितविशेषणत्वपक्षे णलादयः प्राप्नुवन्तीत्यर्थः। भाष्ये 'धातुना' इति समाधानम्। 'विदः' इति न विहितविशेषणम्, किं तु परत्वनिरूपकम्। तथा च विन्दतीत्यत्र परस्मैपदानां विकरणेन व्यवधानाद्विदेः परत्वं नास्तीति न णलादिप्रसङ्ग इत्यर्थः। अत एव 'विद विचारणे' इति रुधादेः 'विद सत्तायाम्' इति दिवादेश्च न प्रसङ्गः, [7]आत्मनेपदित्वाच्च। अतः परिशेषात् 'विद ज्ञाने' इति लुग्विकरणस्यैव विदेर्ग्रहणमिति [8]वृत्तौ तदेवोदाहृतम्। प्रपञ्चार्थमुदाहरणान्तरम् — भाष्ये **अजक्षिष्यन्निति**। [9]'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा। पूर्ववदभ्यस्ताद्विहितस्य झेर्जुसिति शङ्का। अभ्यस्तात् परस्य झेर्जुसिति समाधानम्, स्येन व्यवधानेनाभ्यस्तात् परत्वाभावात्। भाष्ये **अलुनन्निति**। 'अलुना झि' इति स्थितेऽन्तिभावात् प्रागपवादत्वाज्जुस् प्राप्नोतीत्यर्थः। भाष्ये **अपिबन्निति**। [10]शबेकादेशस्य पूर्वं प्रत्यन्तवद्भावाद् धात्वानन्तर्यं झेः संभवति। उभयत्र [11]'लङः शाकटायनस्यैव' इति पाक्षिको जुसाद्यः। भाष्ये **लोपे कृत इति**। [12]'श्नाभ्यस्तयोरातः' इत्यनेन। भाष्ये **ईत्वेन बाध्यत इति**। [13]'ई हल्यघोः' इतीत्वस्य लोपापवादत्वादित्यर्थः। भाष्ये **अन्तिभावेन बाध्यत इति**। परत्वादित्यर्थः। 'तावति' इत्यस्य कालपरत्वमाह — **कृत एवेति**। जुस्भावस्यान्तिभावस्य च संप्रधारणासिद्ध्यर्थम् 'अकृत एव विकरणे' इत्युक्तम्। अन्तिभावस्य जुसः पूर्वत्वे हेतुमाह — **आयन्नादिष्विति**। तथा चान्तेरेव सर्वत्र जुसादेश इति भावः। भाष्ये **अन्तिभावे कृते लोप इति**। न चान्तिभावे कृतेऽपि लोपात् पूर्वमन्तरङ्गत्वाज्जुस् प्राप्नोतीति वाच्यम्, लादेशेष्वनुवर्तमाने धात्वधिकारे बह्वपेक्षत्वेन जुस्भावस्यान्तरङ्गत्वाभावात् परत्वाल्लोप एव भवतीति भावः। ननु [14]'तयोरेव' इत्यादिना साधने विधीयमानानां [15]तव्यदादीनां कथं प्रातिपदिकात् प्रसङ्गः, अत आह — **द्वितीयादिवदिति**। यथा कटं करोतीत्यत्र प्रकृतिव्यतिरिक्तधातुवाच्यक्रियाकर्मणि द्वितीया, तथा कटशब्दादपि तव्यप्रसङ्ग इति भावः। [16]शङ्काशयं दृष्टान्तवैषम्येण निराह — **प्रकृतीति**। ननु धातोरित्युक्तेऽपि कथं तद्व्यावृत्तिः, क्रियावाचित्वेन तेषामपि धातुत्वसंभवात्,

---

[1] एव वाकारशब्देन — अ; एव वा विकारशब्देन — ऋ.

[2] पा. सू. ३.४.८१.

[3] लिटि कित्त्वप्रतिबन्धेनानेन — ऋ, लृ.

[4] पा. सू. ७.१.५९.

[5] पा. सू. ३.४.८३.

[6] 'विहितानाम्' इति नास्ति — अ.

[7] 'आत्मनेपदित्वात्' इति हेतुरुभयत्र णलाद्यभावे, विदेः परत्वाभावे सत्तार्थकविदो णलाद्यभावे हेतुरिति बोध्यम्।

[8] 'वृत्तौ' इति नास्ति — ऋ.

[9] पा. सू. ६.१.६.

[10] 'शप्' इति नास्ति — अ.

[11] पा. सू. ३.४.१११.

[12] पा. सू. ६.४.११२.

[13] पा. सू. ६.४.११३. ई हल्यघोरित्यतः 'अन्तिभावेन बाध्यत इति' इत्यन्तं नास्ति — अ.

[14] पा. सू. ३.४.७०.

[15] तव्यादीनां — अ.

[16] शङ्कां दृष्टान्त — अ.

अत आह — **न हीति**। 'स्वपिति' इति भाष्यं व्याचष्टे — **तत इति**। ननु धातोरित्यनुक्तेऽपि धातोः प्रत्ययेऽङ्गसंज्ञा भविष्यतीत्यत आह — **असतीति**। **क्रियाविशेषेति**। तथा च क्रियाविशेषसाधने समुदायादेव प्रत्ययः स्यादिति भावः। **तस्यैव** समुदायस्यैव। भाष्ये **अधिकारादपीति**। प्रत्ययसंज्ञावदिति भावः। ननु चुरादिणिचोऽनिर्दिष्टार्थत्वेन स्वार्थिकत्वात् प्रयोजकव्यापारे णिजर्थं [1]'हेतुमति च' इति वक्तव्यमेवेति कथं धातुमात्राण्णिजभावस्य तज्ज्ञापकम्, अत आह — [2]**यदीति**। **करण इति**। [3]'शब्दवैर' इत्यतः करण इत्यनुवर्तनादिति भावः। **हेतुमत्यपीति**। **करणे** प्रयोजकव्यापाररूपे करोत्यर्थे। ननु चुरादिग्रहणमेव धातुमात्राण्णिजभावस्य ज्ञापकम्, [4]न [5]'हेतुमति च' इत्येतत्, अत आह — **चुरादीति**। [6]'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' [7]'तत्करोति तदाचष्टे' [8]'तेनातिक्रामति' इति चुरादौ पठ्यते। तत्र धातुत्वेनैव चुरादेर्णिचि सिद्धेऽपि[9] तदन्तर्भूतप्रातिपदिकाण्णिजर्थं चुरादिग्रहणमिति न ज्ञापकमित्यर्थः। कण्ड्वादिषु धातुत्वानुमानादित्येवंपरतया वार्तिकं व्याचष्टे — **धातुव्यपदेश इति**। 'यदयम्' इति भाष्यं वार्तिकतात्पर्यार्थकथनमित्याह — **तदयमिति**। **तेषामपि** कण्ड्वादीनामपि। पूर्वस्माद् विशेषमाह — **सामानाधिकरण्येनेति**। पूर्वं ज्ञापकात् समुच्चयनिरासः, इदानीं न्यायादिति भेद इति भावः। नन्वार्धधातुकसंज्ञार्थो धात्वधिकार इत्यस्य भाष्ये परिहारो नोक्तः, अत आह — **आर्धधातुकेति**। **विहितेति**। धातोरित्येवं विहितस्यार्धधातुकसंज्ञा, न तु धातोः परमात्रस्य। तस्य प्रयोजनमाह — **जुगुप्सत इति**। सन आर्धधातुकत्वाभावादिड्गुणौ न स्तः। भ्यामस्तदभावाद् गुणाभावः। आर्धधातुकसंज्ञाया द्वितीयधात्वधिकारापेक्षायामप्याह — **शमि धातोरिति**॥

[३, १७९–१८५]

(**रत्नप्रकाशः**) [10]अधिकारावधिसमर्पकं वार्तिकमवतारयति — **आकुत इति**। तद्वार्तिकं पठति — **धात्वधिकार इति**। ननु तृतीयाध्यायसमाप्तिपर्यन्तं सोऽधिकारश्चेत् किं स्यादित्यत आह — **लादेशे हीति**। **व्यवहितत्वादिति**। विकरणैरिति शेषः। **आद्ये योग इति**। [11]'तिप्तस्झि' इत्यादिसूत्र इत्यर्थः। **विकरणैरिति**। स्यादयोऽत्र विकरणाः। शबादयो हि सार्वधातुके परतो विधीयमाना न व्यवधायका भवन्ति। सार्वधातुके विषये शबादय इति पक्षे तु तेऽपि गृह्यन्ते। अत एवोक्तम् 'पचति, [12]पठति' इति। **द्वयोरेकारयोः श्रवणं प्रसज्येतेति**। एकस्यायादेशे सति तस्य श्रवणमेवैकारस्य द्वितीयस्य श्रवणमभिमतम्। प्राग् लादेशपक्षे दूषणमाह — **यदीति**। **अकार इति**। [13]'परस्मैपदानाम्' इत्यादिना यस्य प्रसङ्गे विधीयमान इति शेषः। **थकारस्यात्वे कृत इति**। अनित्यमिटं बाधित्वेति शेषः। **वक्ष्यत्येतदिति**। [14]'परस्मैपदानाम्' इत्यादिसूत्र इति शेषः। यद्यकारप्रश्लेषेण तत्र सर्वादेशत्वं साध्यते तर्ह्यार्धधातुकसंज्ञायां धातुग्रहणं कर्तव्य-

---

[1] पा. सू. ३.१.२६.
[2] 'यदीति' इत्यतः 'णिजभावस्य ज्ञापकम्' इत्यन्तं नास्ति — ऋ, लृ.
[3] पा. सू. ३.१.१७.
[4] 'न' इति नास्ति — ऋ.
[5] पा. सू. ३.१.२६.
[6] चुरादिगणसूत्रम्।
[7] चुरादिगणसूत्रम्।
[8] चुरादिगणसूत्रम्।
[9] अपिशब्दो नास्ति — अ.
[10] अधिकारावधिसमर्पकवार्तिकं — प.
[11] पा. सू. ३.४.७८.
[12] पचति पृच्छतीति — ब.
[13] पा. सू. ३.४.८२.
[14] पा. सू. ३.४.८२.

मित्येव [1]'दोषो ज्ञेय इत्याशयेनाह — **आर्धधातुकसंज्ञायामिति**। तृतीयाध्यायसमाप्तिपर्यन्तमयमधिकार इति पक्ष एव युक्त इत्याह — **तस्मादिति**। **सार्वधातुक इति**। पर इति शेषः। **धातोर्विहितस्य लस्येति**। तथा च स्यादिभिर्व्यवधानेऽपि लादेशा भविष्यन्त्येवेति भावः। **विन्दतीति**। 'विद्लृ लाभे' इति तुदादिः। तत्र शेन व्यवधानेऽपि [2]"विदो लटो वा' इति णलादयः स्युरिति भावः। **तावत्येवेति**। यदैव झिरादेशस्तदैवेत्यर्थः। आयन्नादिषूपदेशिवद्वचनादुपदेशकाल एव झस्यान्तादेशेन भाव्यमिति भावः। **प्रातिपदिकान्मा भूवन्निति**। अन्यथा द्वितीयादिरिव प्रातिपदिकात् तव्यदादयः स्युरिति मन्यते। **साधन इति**। साधने कर्मादावभिधेये तव्यदादयो विधीयमानाः प्रत्यासत्त्या प्रकृत्यर्थनिरूपित एव कर्मादौ भवन्ति, न त्वप्रकृत्यर्थनिरूपित इति भावः। [3]"कर्मणि द्वितीया' इत्येवमादयस्तु नियमा इति वैषम्यम्। एतेन 'प्रकृतिवाच्यान्तरङ्गक्रियासाधने संभवति शब्दान्तरवाच्यबहिरङ्गक्रियासाधने तव्यदादयो न भविष्यन्ति' इति निरस्तम्। स्वेच्छया ययोः कयोश्चिदन्तरङ्गबहिरङ्गभावकल्पनानौचित्यात्। **स्वपादिष्विति**। धातुसंज्ञकेभ्य [4]एव लडादयो भवन्तु, क्रियावचनेभ्य आणवयतिसुपितिप्रभृतिभ्यो भाषाविशेषप्रसिद्धेभ्यो मा भूवन्नित्येवमर्थं धातुग्रहणमिति भावः। **अङ्गसंज्ञा चेति**। यस्मात् पञ्चमीनिर्दिष्टात् परत्वेन प्रत्ययो विहितस्तदादेर्विधीयमानाङ्गसंज्ञा नियमेन धातोस्तदादेश्च न स्यात्, किं त्वन्यस्योपसर्गादेरपि स्यादिति तदर्थं धातोरित्यधिकार आश्रयणीय इति भावः। **कृत्संज्ञा चेति**। अस्मिन् धात्वधिकारे विहितस्तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यादिति सूत्रार्थाश्रयणादिति भावः। **उपपदसंज्ञा चेति**। अस्मिन् धात्वधिकारे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि तद्वाचकं पदमुपपदसंज्ञकं स्यादिति सूत्रार्थाश्रयणादिति भावः। **अधिकारादपीति**। [5]"तत्रोपपदं सप्तमीस्थम्' [6]"कृदतिङ्' इति सूत्रयोरधिकारत्वाश्रयणेनापीत्यर्थः। **अङ्गसंज्ञा चेति**। अङ्गसंज्ञा चैवेत्यर्थः। **अङ्गसंज्ञाया इति**। नियताया इति शेषः। **यदयमिति**। यदि धातुमात्राण्णिच् स्यात् तर्हि हेतुमति वर्तमानादपि तस्माण्णिच् स्यादेवेति ततः पृथग्विधानं व्यर्थं स्यादिति भावः। **कण्ड्वादिषु चेति**। धातुत्वमस्तीति शेषः। कुतो ज्ञायत इत्यत आह — **व्यपदेशिवद्वचनादिति**। [7]"क्ङिति च' इति गुणवृद्धिनिषेधे यो व्यपदेशः [8]'किदिति, तद्वतो यको विधानादित्यर्थः। यदि कण्ड्वादीनां धातुसंज्ञा न स्यात् तर्हि तेभ्यो विहितस्य [9]यस्यार्धधातुकसंज्ञा न स्यादिति तस्मिन् परतोऽङ्गस्य गुणवृद्धिप्रसक्त्यभावेन तन्निषेधार्थं तस्य कित्त्वं व्यर्थं स्यात्। ननु भवतु कण्ड्वादीनां धातुत्वम्, प्रकृते किमायातमित्यत आह — **यदयमिति**। ननु यकः कित्त्वे सति कण्ड्वादीनां धातुत्वम्, तेषां च धातुत्वे यकः कित्त्वमित्यन्योन्याश्रय इत्यत आह — **अथवेति**। [10]**संभन्त्स्याम इति**। व्याख्यानतो विशेषप्रतिपत्तिरिति भावः॥

[३, १७९–१८५]

(नारायणीयम्) स्वरितत्वेति। ननु [11]"स्वरितेन' इत्यस्यार्थान्तराश्रयेणाधिकारनिवृत्तिरपि

---

[1] शेषो ज्ञेयः — प.
[2] पा. सू. ३.४.८३.
[3] पा. सू. २.३.२.
[4] एव तव्यदादयो भवन्तु — प.
[5] पा. सू. ३.१.९२.
[6] पा. सू. ३.१.९३.
[7] पा. सू. १.१.५.
[8] किति — प, ब.
[9] 'य' इति प्रत्ययस्येत्यर्थः।
[10] भाष्ये 'अभिसंभन्त्स्यामः' इत्यत्र 'संभन्त्स्यामः' इति निर्णयसागरमुद्रिते पाठः।
[11] पा. सू. १.३.११.

कथ्यत इत्याशङ्क्याह — **अथापीति**। **क्व स्वरितत्वमिति**। यद्धात्वधिकारनिवृत्त्यर्थं प्रतिज्ञातं [1]स्वरितत्वं तत् क्वेति न ज्ञायते। तथा हि — अधिकारार्थं तावत् स्वरितत्वं प्रतिज्ञायते, भावाद्यधिकारान्तरनिवृत्त्यर्थमपि। अतो दुर्ज्ञानमेतत्। लादेशविधिषु प्रथम आद्यशब्देन विवक्ष्यत इत्याह — **तिप्तस्झीत्यत्रेति**। ननु शबादीनां विकरणशब्देनाग्रहेण भाष्ये 'पचति, पठति' इत्युदाहरणप्रदर्शनमसमञ्जसम्, उपलक्षणत्वेन व्याख्येयत्वादित्याशङ्क्य तत्समर्थनायाह — **यदा त्विति**। **एकस्यायादेश इति**। 'पेच् ए ए' इति स्थिते पूर्वस्यायादेशे द्वयोरेकारयोः श्रवणं नास्तीत्यर्थः। **तथापीति**। स्थान्यादेशयोरभेदारोपेणैतदुक्तमित्यर्थः। **इट् प्राप्नोतीति**। [2]'कृसृभृवृस्तु' इति नियमादिति भावः। [3]**शब्दान्तरप्राप्त्येति**। इटचकृते थकारस्य प्राप्नोति, कृते त्विकारस्य। **न चेति**। लक्ष्यानुसारेण [4]क्वचिदेव तस्याश्रयणात्। **अलुनन् अपुनन्नत्र प्राप्नोतीति** भाष्यम्। तत्रान्तिभावात् प्राश्नावपवादत्वादीत्वात् पूर्वमन्तरङ्गत्वाज्जुस् प्राप्नोतीत्यर्थः। अपिबन्नित्यादौ शबेकादेशस्य पूर्वं प्रत्यन्तवद्भावाद्धातोः परत्वाज्झेर्जुस्प्राप्तिः। उभयत्रापि [4]'लङः शाकटायनस्यैव' इति प्राप्तिः। तावच्छब्दार्थमाह — **कृत एवेति**। 'अन्तिभावे कृते लोपः' इति भाष्यम्। तत्रान्तरङ्गत्वाल्लोपात्पूर्वं जुस् प्राप्नोतीति न वाच्यम्, लादेशे धात्वधिकारे सति बह्वपेक्षत्वादन्तरङ्गत्वाभावात्। **द्वितीयादिवदिति**। यथा द्वितीयादयः शब्दान्तरवाच्यक्रियापेक्षे साधने भवन्ति, एवं तव्यादयः प्रातिपदिकात् प्राप्नुवन्तीत्यर्थः। द्वितीयादिभ्यस्तव्यादीनां वैधर्म्यं सिद्धान्तिनोऽभिसंहितं स्फोरयति — **प्रकृतिग्राह्येति**। ननु सुपतीत्यादीनां प्राप्त्यभावात् तन्निवृत्त्यर्थो धात्वधिकारो नोपयुज्यत इत्यत आह — **येऽपभ्रंशरूपा इति**। ननु धात्वधिकारे सति कथं तेषां निवृत्तिः स्यादित्यत आह — **न हीति**। ननु पूर्वोक्तेन न्यायेन प्रातिपदिकात् तव्याद्यनुत्पत्तौ सिद्धायां पारिशेष्याद् धातोरेव तव्यादयो भविष्यन्तीति तस्यैवाङ्गसंज्ञा सिद्धा विनापि धात्वधिकारमित्यत आह — **असतीति**। ननु [5]'हेतुमति च' इत्यस्य ज्ञापकत्वोक्तिरयुक्ता, [6]'चुरादिभ्यो णिच्' इत्यत्र धात्वधिकारेऽर्थादेशाभावात् स्वार्थे णिचि प्रयोजकव्यापारे णिज्विधानार्थं [7]'हेतुमति च' इत्यस्यारम्भोप[8]पत्तेरित्यत आह — **यद्यविशेषेणेति**। ननु चुरादिग्रहणस्योक्तेऽर्थे ज्ञापकत्वं भाष्ये किं नोक्तमित्यत्राह — **चुरादिग्रहणं त्विति**। **यकः कित्त्वेनेति**। धातुत्वनिबन्धनार्धधातुकसंज्ञाश्रयगुणनिषेधार्थेन यकः कित्त्वेन कण्ड्वादीनां धातुत्वमनुमीयत इति पचादिभिस्तुल्यत्वमित्यर्थः। **समुच्चयाश्रयणस्यायुक्तत्वादिति**। प्रतिपत्तिगौरवप्रसङ्गात्। नन्वसत्यस्मिन् धात्वधिकारे प्रकृत्यन्तराद्विहितस्यापि प्रत्ययस्यार्धधातुकसंज्ञा स्यात् 'वृक्षत्वं वृक्षता' इत्यादावित्यत आह — **आर्धधातुकसंज्ञार्थोऽपीति**। विहितविशेषणाश्रयणे प्रयोजनं दर्शयति — **जुगुप्सते लूभ्यामित्यादाविति**। लूभ्यामित्यत्र प्रातिपदिकत्वे सत्यपि धातुत्वमस्त्येव, पूर्वप्रवृत्ताया धातुसंज्ञाया अनिवर्तनात्। **द्वितीयधातुग्रहणेति**। तेन धातोरित्येवं यो धातोः [9]प्रत्ययः शेषः स आर्धधातुकसंज्ञ इत्यर्थलाभादतिप्रसङ्गाभाव इत्यर्थः॥

---

[1] स्वरितं तत् — ङ.
[2] पा. सू. ७.२.१३.
[3] प्रदीपे 'शब्दान्तरस्य प्राप्त्या' इत्यत्र 'शब्दान्तरप्राप्त्या' इति समस्ततया पाठोऽभिमतः।
[4] पा. सू. ३.४.१११.
[5] पा. सू. ३.१.२६.
[6] पा. सू. ३.१.२५.
[7] पा. सू. ३.१.२६.
[8] पत्तिरित्यत आह — ङ.
[9] प्रत्ययशेषः — घ, ङ.

तत्रोपपदं सप्तमीस्थम् ३.१.९२.

[३, १८५–१९०]

(उद्द्योतनम्) [१]ननु सप्तम्यन्तस्योपपदसंज्ञा, न सप्तमीमात्रस्य, विभक्तेरुपपदसमासासंभवात्। अतस्तदन्तलाभाय स्थग्रहणमावश्यकम्, अत आह — **सप्तमीति**। सप्तमीशब्देन लक्षणया तद्युक्तं पदं विवक्षितमित्यर्थः। ननु प्रत्ययग्रहणपरिभाषया तदन्तग्रहणं स्यात्, अत आह — **संज्ञेति**। तत् किम् [२]'उपपदमतिङ्' इति समासोऽपि सप्तमीमात्रस्य, नेत्याह — **समासस्त्विति**। स्तम्बेरम इत्यत्र सप्तमीमात्रस्य रमशब्देन सामर्थ्याभावात् समासस्तदन्तस्यैव वचनबलाद् भवतीत्यर्थः। ननु [३]'कर्मण्यण्' इत्यत्र कर्मवाचकपदग्रहणाद् विभक्तेरुपपदसंज्ञायामुक्त[४]विधयोपपदान्तस्य समाससिद्धेः 'इह न स्यात्' इत्ययुक्तम्, अत आह — **सप्तमीति**। स्वरूपग्रहणपक्षेऽयं दोषः, न विभक्तिग्रहणपक्ष इत्यर्थः। लक्ष्याभावान्न स्वरूपग्रहणमिति शङ्कां निराह — **उपसरजादीति**। ननु कुम्भकार इत्यत्र कुम्भशब्दस्य सप्तमीस्थत्वाभावात् कथमुपपदसंज्ञा, अत आह — **स्थग्रहण इति**। **सौत्रेति**। सूत्राभिप्रेतस्य सप्तम्यन्तस्य सर्वस्यापीत्यर्थः। **धातोरिति**। एतद्धात्वधिकारपरामर्शार्थं 'तत्र'ग्रहणम्, स चान्यथासिद्ध इत्यर्थः। [५]**अनेन वाक्येनेति**। एतदधिकारस्थसर्वसप्तमीस्थानां युगपदुपस्थित्यर्थं 'तत्र'ग्रहणमिति भावः। **परिपूर्णत्वात्** अधिकारं विनापि सर्वसंग्रहात्। ननु सप्तमीनिर्दिष्टस्योपपदसंज्ञा, तत्र सप्तम्यन्तस्य पदत्वेन समर्थपरिभाषोपस्थानाद् [६]वचनं व्यर्थम्, अत आह — **इह यदेति**। [७]**कर्मेति**। [८]'कर्मण्यण्' [९]'अधिकरणे शेतेः' इत्यादौ। **चतुष्कं** स्वार्थद्रव्यलिङ्ग[१०]संख्यारूपम्। एतदेव [११]कारकसहितं **पञ्चकम्**। नन्वत्रापि प्रत्यये सति समासेन भाव्यम्। तदभावात् [१२]प्रत्ययानुत्पत्तिः, अत आह — **कुम्भशब्द इति**। नन्वत्र प्रत्यये सति किमनिष्टम्, अत आह — **यदि चेति**। **न स्यादिति**। एवं महच्छब्दसापेक्षस्य कुम्भशब्दस्य कारशब्देनापि समासो न स्यादित्यपि ज्ञेयम्। ननु महान्तं कुम्भमिति पदसमुदायस्य कारशब्देन समासोऽस्तु, अत आह — **समुदायस्येति**। ननु [१३]'उपपदमतिङ्' इत्यत्र [१४]'सुप् सुपेत्य'ननुवृत्तौ समुदायस्यासुबन्तस्यापि समासः स्यात्, अत आह — **उपपदसमास इति**। समुदायस्य समासाभाव इत्यन्वयः। ननु [१५]कुम्भमित्युपोच्चारितपदमिति 'न तत् पदम्' इत्ययुक्तम्, अत

---

[१] 'ननु सप्तम्यन्तस्य' इत्यादि 'विवक्षितमित्यर्थः' इत्यन्तं नास्ति — अ.

[२] पा. सू. २.२.१९.

[३] पा. सू. ३.२.१.

[४] विभक्तिमात्रस्यातिङन्तेन सामर्थ्याभावादित्यर्थः।

[५] प्रदीपे 'अनेनैवैकवाक्येन' इति हरयाणामुद्रिते दृश्यते। निर्णयसागरमुद्रिते तु 'अनेनैव वाक्येन' इति पाठ उपलभ्यते। 'अनेन वाक्येन' इत्यत्रंभट्टपाठः स्यादिति भाति।

[६] 'वचनम्' इति नास्ति — ऋ.

[७] 'कर्मेति' इति प्रतीको नास्ति — ऋ.

[८] पा. सू. ३.२.१.

[९] पा. सू. ३.२.१५.

[१०] 'संख्यारूपम्' इत्यत्र 'कारकरूपम्' इत्युचितं भाति, अर्थौचित्यात्। निर्णयसागरमुद्रितोद्द्योतदर्शनाच्च।

[११] 'कारकसहितम्' इत्यत्र 'संख्यासहितम्' इत्युचितं भाति।

[१२] प्रत्ययानुवृत्तिः — अ.

[१३] पा. सू. २.२.१९.

[१४] सुप्सुपेत्यनुवृत्तौ — अ.

[१५] 'ननु कुम्भमित्युपोच्चारित' इत्यतः 'महान्तमित्येतदिति' इत्यन्तं नास्ति — अ.

आह — [1]**पदसमुदायत्वादिति**। कुम्भपदस्येहोपोच्चारितत्वात् [2]'न तदुपोच्चारितम्' इत्ययुक्तम्, अत आह — **महान्तमित्येतदिति**। ननु कुम्भमित्येतन्निमित्तप्रत्ययः किं [3]न स्यात्, अत आह — **कुम्भमित्येतच्चेति**। अनेन 'यावता च' इत्यादिभाष्यं शङ्कोत्तरत्वेन व्याख्यातम्। **सापेक्षत्वात्** महान्तमित्यनेनेत्यादिः। अन्वर्थसंज्ञायाः प्रयोजनान्तरमप्याह — **अन्वर्थेति**। [4]'त्यदादिषु' इति सूत्रे 'अनालोचने' इति प्रकृत्यर्थविशेषणम्। [5]'भावे' [6]'अकर्तरि कारके' इत्यादिः प्रत्ययार्थः। [7]'हरतेर्दृतिनाथयोः' इत्यत्र 'पशौ' इति [8]'प्रत्ययार्थकर्तृविशेषणम्। धातोः प्रत्ययविधिः कथं पदविधिः, अत आह — **पदेति**। बहुव्रीहिः। कर्मवाचिन्युपपदे प्रत्यय इति [9]पदनिमित्तकः प्रत्ययविधिः। अनेन 'पदगन्धोऽस्ति' इति भाष्यं व्याख्यातम्। नन्वत्र सापेक्षत्वात् प्रत्ययेन न भाव्यमिति प्रश्नायोगः, अत आह — **इहेति**। **माणवकमिति**। [10]'तत्करोति' इत्येव णिचि सिद्धे मुण्डादिभ्यः पुनर्णिज्विधानं सापेक्षेभ्योऽपि यथा स्यादित्येवमर्थमिति [11]'सुप आत्मनः क्यच्' इत्यत्रोक्तम्। ननु च्व्यन्तस्याकर्मत्वादेव[12] प्रत्ययो न स्यात्, अत आह — **च्व्यन्तस्येति**। [13]'च्व्यर्थाश्च' इति स्वरादिषु पाठात् [14]'तद्धितश्चासर्वविभक्तिः' इति वा च्व्यन्तस्याव्ययत्वम्। तत्र हेतुः — [15]**सत्वभूतस्येति**। भावप्रधानम्। ननु 'इष्टमेवैतद् गोनर्दीयस्य' इत्ययुक्तम्, सापेक्षत्वेन [16]प्रत्ययविधानासंभवात्, अत आह — **काशानिति**। काशकटीकारमिति षष्ठीसमास इत्याह — **तस्मिन्निति**। च्व्यन्तेन सह समास एव साधुः, न वाक्यमित्याह — [17]**समासस्यैवेति**। भाष्ये **अनुपपदेऽपीति**। उपपदस्य प्रत्ययोत्पत्तिनिमित्तत्वाभावे केवलादपि धातोरण् स्यात्, सोपपदादपीत्यर्थः। सप्तम्यैव तल्लाभ इति वचनं व्यर्थमिति शङ्काशयमाह — [18]**कर्मणीति**। सत्सप्तम्या निमित्तलाभ इत्युक्तं निरसितुमाह — **यथेति**। सौत्री सप्तमीत्यन्वयः। अर्थापेक्षायामुपपदत्वं न स्यादित्याह — **अर्थेति**। अस्त्वभिधेयम्, अत आह — **तथा चेति**। [19]उपोच्चारितत्वाभावादित्यर्थः। [20]अर्थानपेक्षायां केवलाद्धातोः कथं प्रत्ययप्रसङ्गः, अत आह — **अर्थेति**। **न प्रतीयेतेति**। अर्थानपेक्षायां [21]सप्तम्यसंभवादिति भावः। **कथमिति**। सूत्रे प्रत्ययग्रहणाभावादित्यर्थः।

---

[1] पदसमुदायस्येति — ऋ, लृ.

[2] भाष्ये 'उपोच्चारि पदमुपपदम्। यच्चात्रोपोच्चारि न तत् पदम्। यच्च पदं न तदुपोच्चारि' इत्यत्र 'उपोच्चारि' इत्यस्य स्थाने 'उपोच्चारितम्' इति निर्णयसागरचौखाम्बामुद्रितपाठः॥ न तदुपोच्चारीत्ययुक्तम् — ऋ.

[3] 'न' इति नास्ति — अ.

[4] पा. सू. ३.२.६०.

[5] पा. सू. ३.३.१८.

[6] पा. सू. ३.३.१९.

[7] पा. सू. ३.२.२५.

[8] 'प्रत्ययार्थ' इति नास्ति — ऋ.

[9] पदनिमित्तः — अ.

[10] चुरादिगणसूत्रम्।

[11] पा. सू. ३.१.८.

[12] अकर्मकत्वादेव — ऋ, लृ.

[13] स्वरादिगणसूत्रम्।

[14] पा. सू. १.१.३८.

[15] प्रदीपपुस्तकेषु 'सत्त्वभूतत्वस्यानिवर्तनात्' इति पाठो दृश्यते। 'सत्त्वभूतस्यानिवर्तनात्' इति पाठान्तरं प्रादर्शि नागेशेन। स पाठोऽन्नंभट्टाभिमत इति ज्ञायते विवरणात्॥ 'सर्वभूतस्येति' इति प्रतीकः — अ, ऋ, लृ, कोशेषु दृश्यते।

[16] प्रत्ययासंभवात् — अ.

[17] प्रदीपे 'समासरूपस्यैव' इत्यत्र 'समासस्यैव' इति पाठोऽन्नंभट्टस्येति भाति।

[18] 'कर्मणीति' इत्यादि 'उपपदत्वं न स्यादित्याह' इत्यन्तं नास्ति — अ.

[19] उपोच्चारितत्वादित्यर्थः — अ.

[20] अर्थापेक्षायां — अ.

[21] सत्सप्तम्यसंभवादिति भावः — ऋ.

अनुवर्तते [1]'प्रत्ययः' इति सूत्रात्। [2]तस्मिन्नुपपद इति। सौत्रतत्रपदमुप[3]पदपरमित्यर्थः। तथा च केवलाद्धातोः प्रत्ययाभावः। भाष्ये अधिकाराद्पीति। एतेन [4]'च्लि लुङि' इत्यत्र लुङन्तस्योपपदत्वनिरासाय तृतीयधात्वधिकारपरामर्शाय तत्रग्रहणमित्येतन्निरस्तम्, अधिकारस्योत्तरत्रैवानुवृत्तेः॥

[३, १८५–१९०]

(रत्नप्रकाशः) सप्तमीस्थशब्देन सप्तम्यन्तमेवाभिमतम्, यथा [5]'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ' इत्यत्र षष्ठ्याद्यन्तमेव। तथा च स्थग्रहणं व्यर्थमिति मन्यमानः पृच्छति — स्थग्रहणं किमर्थमिति। यत्रैवेति। तथा च कुम्भकार इत्यादावव्याप्तिः स्यादिति भावः। वस्तुतो विचार्यमाणे संज्ञाविधौ तदन्तविधिनिषेधेनात्र सप्तमीशब्दस्यैव ग्रहणं स्यादित्याशयेनाह — यत्र वेति। सप्तम्यामिति। समासस्तु सुबन्तस्य भविष्यति समर्थपरिभाषयेति भावः। [6]यत्र सप्तमी श्रूयत इति। [7]'स्तम्बकर्णयोः' इत्यादौ। [8]यत्र सप्तमी न श्रूयत इति। [9]'गापोष्टक्' इत्यादौ। [10]यत्र वेति। [11]'सप्तम्यां जनेः' इत्यत्र। [12]यत्र वान्येनेति। [13]'कर्मण्यण्' इत्यादौ। 'तत्र'ग्रहणं व्यर्थम्, अधिकारत्वादेव सिद्धेरिति मन्यमानः पृच्छति — अथ तत्रग्रहणमिति। विषयार्थमिति। तत्रशब्देनैतद्धात्वधिकारे समस्ते निर्दिष्टे सति प्रकृतसूत्रेणैकेनैव सर्वेषामभिमतानामुपपदसंज्ञा सिध्यति। अधिकारत्वे तु तत्र तत्र वाक्यभेदेनोपपदसंज्ञाविधाने महद् गौरवं स्यादिति भावः। समर्थवचनमिति। 'चतुष्कं पञ्चकं वा प्रातिपदिकार्थ' इति पक्षे प्रातिपदिकस्यैव कर्मादिवाचित्वेन तस्योपपदत्वाश्रयेण विधीयमानोऽणादिः पदविधिर्न भवतीति तत्र समर्थपरिभाषा न प्रवर्तत इति मन्यते। क्रियमाणे चापीति। [14]'सापेक्षमसमर्थम्' इति तु [15]'समर्थः पदविधिः' इति परिभाषाविषय एव प्रवर्तत इति भावः। महान्तं कुम्भमिति। कुम्भशब्दस्यात्रोपपदसंज्ञायां तदाश्रयेणाणि 'महान्तं कुम्भकारः' इति स्यादिति भावः। समाधत्ते — यत् तावदिति। उपोच्चारीति। उपोच्चारणमुपोच्चारः, स यस्यास्ति तदित्यर्थः। यच्चात्रोपोच्चारीति। महान्तं कुम्भमिति पदद्वयसमुदायरूपम्। यच्च पदमिति। महान्तमिति शेषः। ननु कुम्भमित्येतदुपोच्चारि च पदं च, तस्योपपदसंज्ञा स्यादित्यत आह — यावता चेति। पदगन्ध इति। यथाकथंचित् पदग्रहणमित्यर्थः। असामर्थ्यादिति। महच्छब्दसापेक्षत्वादसमर्थः कुम्भशब्द इति भावः।

---

[1] पा. सू. ३.१.१.

[2] प्रदीपे 'तत्र चोपपदे' इत्यत्र 'तस्मिन्नुपपदे' इत्यन्नंभट्टपाठ इति प्रतीयते॥ अस्मिन्नुपपद इति — अ.

[3] पदमित्यर्थः — अ.

[4] पा. सू. ३.१.४३.

[5] पा. सू. ८.१.२०.

[6] भाष्ये 'यत्र च सप्तमी श्रूयते' इत्यत्र 'यत्र सप्तमी श्रूयते' इति निर्णयसागरमुद्रिते पाठः।

[7] पा. सू. ३.२.१३.

[8] भाष्ये 'यत्र च सप्तमी न श्रूयते' इत्यत्र 'यत्र सप्तमी न श्रूयते' इति पाठोऽभिमत इति भाति।

[9] पा. सू. ३.२.८.

[10] भाष्ये 'यत्र चैतेन शब्देन' इत्यत्र 'यत्र वैतेन शब्देन' इति पाठो निर्णयसागरमुद्रिते।

[11] पा. सू. ३.२.९७.

[12] भाष्ये 'यत्र चान्येन' इत्यत्र 'यत्र वान्येन' इति निर्णयसागरमुद्रिते पाठः।

[13] पा. सू. ३.२.१.

[14] महाभाष्यम् २.१.१.

[15] पा. सू. २.१.१.

च्व्यन्त उपपदे क्वचिदण् भवति, क्वचिन्न भवतीत्यत्र बीजमपश्यन् पृच्छति — **अथ च्व्यन्त इति**। **प्रकृतिविवक्षितत्वादिति**। प्रकृतेर्विवक्षितत्वादित्यर्थः। गुणेन षष्ठीसमासनिषेधोऽनित्य इत्युक्तं प्राक्। **विधीयत इति**। अत इति शेषः, उत्तरान्वयी। **काशकटीकारमिति**। काशान् कटीकरोतीत्यर्थेऽण् जात इति मन्यते। **इष्टमेवैतदिति**। काशशब्दनैरपेक्ष्येण कटशब्दे च्व्यन्त उपपदे करोतेरणि कृते ततोऽणन्तेन काशानां संबन्धे कृद्योगलक्षणषष्ठ्यां [1]"षष्ठी' इति समास इत्यनेन प्रकारेण तस्य साधुतेष्टेति भावः। एतेन "काशान् कटीकरोतीत्यत्र त्विष्टचाण्प्रत्ययो भवति। तस्मिन्नुत्पन्ने काशशब्दात् कृद्योगे षष्ठी। तस्याः [2]'षष्ठी' इति समासः। समासरूपस्यैवेष्टत्वेनोपात्तत्वात् काशानां कटीकार इति न भवतीत्याहुः" इति निरस्तम्। प्रकृतभाष्यस्य तथा व्याख्याने क्रियमाणे 'न भवितव्यम्' इत्यादिपूर्वभाष्येण विरोधापत्तेः। काशान् कटीकरोतीति काशशब्दे द्वितीयान्ते सत्यणि विहिते काशशब्दाद् द्वितीयाया निवृत्तौ मानाभावेन ततः षष्ठ्या दुर्लभत्वात्। समासरूपस्यैवेष्टत्वमित्यत्र मानाभावेन काशानां कटीकार इति वाक्याभ्युपगमे बाधकाभावाच्च। **निर्देश इदानीमिति**। कर्मणीति सप्तम्यन्तनिर्देशसामर्थ्यात् सत्येवोपपदे प्रत्ययो भविष्यतीति भावः। **संज्ञाकरणार्थ इति**। यथेत्संज्ञार्थमनुनासिकत्वमाश्रीयते तथार्थनैरपेक्ष्येण 'कर्मणि' इत्यादिसप्तम्यन्तमुपपदसंज्ञार्थं निर्दिश्यत इति मन्यते। वस्तुतस्तु कर्मणि सति धातोरण् भवतीत्यादेस्तत्तत्सूत्रार्थस्याश्रयणीयत्वेन कर्मादेः प्रत्ययनिमित्तत्वं सिद्धमिति न काप्यनुपपत्तिः। एतेन "अर्थापेक्षायां तु सप्तम्यामण्प्रत्ययस्याभिधेयं कर्म स्यात्, यथा [3]'धः कर्मणि ष्ट्रन्' इति। तथा चोपपदत्वं न प्रतीयेत। अर्थनिपेक्षत्वे सप्तम्या धातोरण् भवति कर्म चोपपदसंज्ञमित्यर्थः स्यादिति कर्मणः प्रत्ययोत्पत्तौ निमित्तत्वं न प्रतीयेत" इति निरस्तम्। विषयसप्तमीवत् सत्सप्तम्या अपि शास्त्रे तत्र तत्राश्रितत्वेन व्याख्यानतो विशेषप्रतिपत्त्या च मदुक्तरीत्या [4]"कर्मण्यण्' इत्यादिसूत्राणामर्थस्याश्रयणे उपपदस्य प्रत्ययं प्रति निमित्ततायाः अत्यन्तं स्फुटत्वात्। [5]"कर्मण्यण्' इत्यादौ निर्दिष्टानां सर्वेषां प्रकृतसूत्रेणानधिकाररूपेणोपपदसंज्ञायाः सिद्धत्वेनास्याधिकारतामाश्रित्य प्रतिसूत्रं वाक्यभेदेनोपपदसंज्ञाया अत्यन्तगौरवावहायास्तत्रशब्दानर्थक्यस्य चाश्रयणे मानप्रयोजनयोरभावाच्च। [6]'तुष्यतु दुर्जनः' इति न्यायेन शङ्कित्रभिमतं प्रकृतसूत्रस्याधिकारत्वमभ्युपगम्य समाधत्ते — **तत्रवचनमिति**। **उपपदसंनियोगार्थमिति**। कर्मणि वर्तमानं पदमुपपदसंज्ञं स्यात्, तत्र सति धातोरण् स्यादित्यादिसूत्रार्थाश्रयणात् सिद्धमुपपदस्य प्रत्ययनिमित्तत्वमिति भावः। **कर्मण्यण् विधीयत इति**। कर्मणि कर्मवाचके सत्यण् विधीयत इति न कोऽपि दोष इति 'वस्तुतस्तु' इत्यादिना मदुक्तसूत्रार्थसूचकमिदम्। 'तत्र प्रत्ययो भवति' इति तु द्वितीयमतसूचकम्॥

[३, १८५–१९०]

(नारायणीयम्) सप्तमीशब्देन साहचर्यादिति। [7]"कर्मण्यण्' इत्यादौ कर्मणीत्यादिका या सप्तमी तया सहचरितस्तदन्तप्रातिपदिकार्थ इति लक्षणया कुम्भमित्यादिकं सप्तमीशब्देन ग्राहिष्यत इत्यर्थः। **सप्तम्या एवेति**। न [8]'सप्तमीनिर्दिष्टस्य, नापि तदन्तस्य, कुत [9]इत्याह — **संज्ञावि-**

---

[1] पा. सू. २.२.८.
[2] पा. सू. २.२.८.
[3] पा. सू. ३.२.१८१.
[4] पा. सू. ३.२.१.
[5] पा. सू. ३.२.१.
[6] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[7] पा. सू. ३.२.१.
[8] 'सप्तमीनिर्दिष्टस्य' इत्यादि 'नेत्याह' इत्यन्तं नास्ति — ङ.
[9] इत्यत आहेत्यर्थः।

धाविति। यद्येवमुपपदसमासोऽपि सप्तम्या एव स्यादिति, नेत्याह — **समासस्त्विति**। [१]'स्वं रूपं शब्दस्य' इत्यनेन स्वरूपग्रहणस्य न्याय्यत्वात् 'यत्र वैतेन' इत्याद्युक्तमित्याह — [२]**सप्तमीति यदा रूपग्रहणमिति**। ननु क्रियमाणेऽपि स्थग्रहणे कुम्भकार इत्यत्र कुम्भशब्दस्य सप्तमीस्थत्वाभावात् कथमुपपदसंज्ञा स्यादित्यत आह — **सौत्रसप्तमीति**। सूत्रे या सप्तमी कर्मणीत्यादिका सात्र सप्तमीशब्देन गृह्यते, तस्यामुपलक्षणभूतायामुपलक्ष्यत्वेन स्थितं यत् तदुपपदसंज्ञम्। तच्च कुम्भमित्यादिकम्। तद्धि विशेषलक्षणम्, सामान्यस्य विशेषोपलक्षणार्थत्वात्। ततश्चाव्याप्तिदोषो नावतरतीत्यर्थः। अत एवोक्तं भाष्ये [३]'यत्र सप्तमी श्रूयते यत्र न' इत्यादि। ननु धात्वधिकारप्रतिनिर्देशार्थं 'तत्र' इति वक्तव्यमिति, नेत्याह — **धातोरित्यनुवर्तनादिति**। धातोरित्येवं यो विधीयते तत्र सप्तमीस्थमुपपदमित्यर्थो लभ्यते। **तत्रग्रहणेनेति**। प्रकरणवशाद्या प्रतीतिस्ततः[४] स्पष्टतरा [५]श्रुतिप्रतिपादितेऽर्थे इत्यर्थः। प्रश्नोत्तरयोरन्यथाशयं दर्शयति — **अथवेति**। **इति प्रतिपत्तिलाघवमिति**। अधिकारानपेक्षणात्। ननु [६]'कर्मण्यण्' इत्यादेः पदविधित्वात् [७]'समर्थः पदविधिः' इति परिभाषया सिद्धत्वात् किमर्थं समर्थवचनं क्रियत इत्याशङ्क्य कस्मिंश्चित् पक्षे वचनोपयोगं दर्शयति — **इह यदेति**। **चतुष्कपक्ष इति**। स्वार्थद्रव्यलिङ्ग[८]कर्मलक्षणे। **पञ्चकपक्षे वेति**। स्वार्थद्रव्यलिङ्गसंख्या[९]कर्मलक्षणे। **कुम्भशब्द उपपद इति**। ततश्च 'आहर [१०]कुम्भं कारः कटस्य' इति स्यात्। महान्तं कुम्भं करोतीत्यत्रापि सति को दोष इत्यत आह — **यदि चेति**। ननु महान्तं कुम्भमिति पदद्वयस्याप्युपपदत्वात् कारशब्देन समासोऽस्त्वित्यत आह — **सुबन्तसमुदायस्येति**। ननु [११]'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति वचनात् सुप्सुपेति संबन्धाभावादुपपदमात्रस्य समासो भविष्यति समुदायस्यासुबन्तत्वेऽपीत्यत आह — **उपपदसमास इति**। **प्रथमान्तस्यानुवर्तनादिति**। 'चर्मकारः' इत्यादौ नलोपादिसिद्ध्यर्थमिति भावः। [१२]'न तत् पदम्' इति पदद्वयमपेक्ष्योक्तमित्याह — **पदसमुदायत्वादिति**। 'यच्च पदम्' इत्यत्र विवक्षितं दर्शयति — **महान्तमित्येतदिति**। तर्हि कुम्भमित्येतस्य पदस्योपोच्चारित्वादुपपदत्वे प्रत्ययः स्यादित्याशङ्क्याह — **कुम्भमित्येतदिति**। अन्वर्थसंज्ञाश्रयणस्य प्रयोजनान्तरमाह — **अन्वर्थसंज्ञाकरणादेवेति**। **प्रकृत्यर्थविशेषणानामिति**। [१३]'हरतेरनुद्यमनेऽच्' इत्यादौ। **प्रत्ययार्थानां तद्विशेषणानां चेति**। [१४]'कर्तरि' 'कर्मणि' 'पशौ' इत्यादीनाम्। 'पदविधिः' इति शेषषष्ठ्याः समासः, न कर्मषष्ठ्याः, संबन्धश्च निमित्तनिमित्तिभाव इत्याह — **पदनिमित्तत्वादिति**। ननु यथा महान्तं कुम्भं करोतीत्यत्र सापेक्षत्वादसामर्थ्यात् प्रत्ययाभाव उक्तः। तेनैव न्यायेन च्व्यन्तेऽपि न भवितव्यमिति प्रश्नोऽयमसमञ्जस इत्यत आह — **इह क्वचिदिति**। ननु च्व्यन्तस्याव्ययत्वात् कर्मण्युपपदे विधीयमानस्याणः कथमत्र प्राप्तिरित्यत्राह — **च्व्यन्तस्य चेति**। च्व्यन्तस्याव्ययत्वेऽपि [१५]सत्त्वरूपं न निवर्तते। अत एव कर्तृत्वावगतिरित्यर्थः। प्रकृतिविवक्षायां

---

[१] पा. सू. १.१.६८.

[२] सप्तमीति स्वरूपग्रहणमिति — घ, ङ.

[३] भाष्ये 'यत्र च सप्तमी श्रूयते यत्र च न' इत्यत्र चशब्दरहितः पाठोऽभिमतः।

[४] तत्र स्पष्टतरा — घ.

[५] श्रुतिः प्रतिपादिते — ङ.

[६] पा. सू. ३.२.१.

[७] पा. सू. २.१.१.

[८] कर्मादिलक्षणे — घ, ङ.

[९] कर्मादिलक्षणे — घ.

[१०] कुम्भकारः कटस्येति — ङ.

[११] परिभाषा ७६.

[१२] न तत्पपदमिति — ङ.

[१३] पा. सू. ३.२.९.

[१४] कर्तरि कृत्, घः कर्मणि ष्ट्रन्, हरतेर्दृतिनाथयोः पशौ, इत्येतानि विवक्षितानि। आद्यद्वयं प्रत्ययार्थः, अन्त्यं प्रत्ययार्थविशेषणमिति बोध्यम्।

[१५] सत्त्वरूपत्वमित्यर्थः। भावप्रधानो बोध्यः।

च्विविधिमुपपादयति — **प्रकृतिविकारयोरिति**। तथा च तत्र वार्तिकम् [1]'प्रकृतिविवक्षाग्रहणं च' इति। 'इष्टमेवैतत्' इति भाष्यं व्याचष्टे — **काशान् कटीकरोतीति**। ननु [2]'प्रतिपदविधाना षष्ठी न समस्यते' इति प्रतिषेधात् 'काशकटीकारः' इति कथं समास इत्याशङ्क्य [3]'कृद्योगा षष्ठी समस्यते' इति प्रतिप्रसवविधानादिध्मप्रव्रश्चनादिवदत्र समास इत्याह — **तस्याः षष्ठीति समास इति। इत्याहुरिति**। इति भाष्यतात्पर्यपर्यालोचनेनाभियुक्ता आहुरित्यर्थः। कर्मणीत्यादि-सप्तमीनिर्देशसामर्थ्यात् [4]'यस्य च भावेन' इति सत्सप्तमीत्वाभ्युपगमात् सत्येव कर्मणि प्रत्ययो नासतीत्यर्थलाभान्निमित्तशब्दोपादानमन्तरेणापि निमित्तत्वं कर्मादेः सिद्धमित्याशयेन 'निर्देश इदानीं किमर्थः' इति चोदितमित्याह — **कर्मणीति सत्सप्तमीति**। सप्तमीनिर्देशस्यान्यथोपपत्त्या [5]सामर्थ्यो-पक्षयान्निमित्तार्थलाभो दुर्लभ इत्युत्तरभाष्यतात्पर्यमाह — **यथेत्संज्ञार्थमिति**। अर्थनिरपेक्षत्वम-वश्यमाश्रयणीयमित्याह — **अर्थापेक्षायां त्विति। तत्र चोपपद इति**। [6]तस्मिन्नुपपदे सत्येवाणा-दिप्रत्यय उत्पद्यते नासतीति वाक्यभेदेन संबन्धादुपपदस्य प्रत्ययोत्पत्तिं प्रति निमित्तत्वं लभ्यत इत्यर्थः॥

कृदतिङ् ३.१.९३.

[३, १९०–१९२]

(उद्द्योतनम्) भाष्ये **पचतीति**। तिङः कृत्संज्ञायां तदन्तस्य [7]प्रातिपदिकसंज्ञकत्वात् स्वा-द्युत्पत्तिप्रसङ्ग इत्यर्थः। भाष्ये **स्थानिवद्भावादिति**। [8]'लः कर्मणि' इत्यत्र धात्वधिकाराल्लका-रस्य कृत्संज्ञायां तदादेशानामपि [9]कृत्त्वप्रसङ्ग इत्यर्थः। 'अथ' इति शङ्कातात्पर्यमाह — **अति-ङिति**। तत्र हेतुः — **अनन्तरस्येति**। कृदित्यनेन प्राप्तिवचनम्। तदा स्थानिवद्भावात् प्राप्ति-र्व्यवहिता। [10]**अनर्थक इति**। धातोः परत्वाभावेन 'कृत्' इत्यनेन प्राप्त्यभावादप्रसक्तप्रतिषेधा-योगात् स्थानिवद्भावप्राप्त्यनिषेधे स्वाद्युत्पत्त्यनिरासेनानन्तरप्राप्तिनिषेधानर्थक्याच्चेत्यर्थः। [11]तिङ्-शब्देन लक्षणया स्थानिविवक्षेत्याह — **तिङ्भावीति। मूलेति**। लकारस्य कृत्त्वे तदादेशस्य कृत्त्वम्; स्थानिन एव तन्निषेधे नादेशस्य तत्प्रसङ्ग इत्यर्थः। तिङन्तस्यालिङ्गत्वात् कथं टाबा-दयः, अत आह — **यथेति**। [12]'भवत, [13]अभवत' इत्यादावकारान्ताट्टाप्प्रसङ्गः[14], 'भवति' इत्यादौ [15]'कृदिकारादक्तिनः' इति ङीष्। शङ्काशयं निराह — **शब्देति**। धातोरित्यधिकाराभावात् कथं तदनुवृत्तिः, अत आह — **धात्वादेरिति**। [16]'धात्वादेः षः सः' इत्यतो धातुग्रहणं तुग्विधावनु-

---

[1] का. वा. ५.४.५०–२.

[2] का. वा. २.२.१०–१.

[3] का. वा. २.२.८–१.

[4] पा. सू. २. ३. ३७.

[5] सामर्थ्यक्षयात् — घ.

[6] 'तस्मिन्नुपपदे' इत्यादि 'प्रत्ययोत्पत्तिम्' इत्यन्तं नास्ति — ङ.

[7] प्रातिपदिकत्वात् — ऋ.

[8] पा. सू. ३.४.६९. 'लः कर्मणीत्यत्र' इति नास्ति — अ.

[9] कृत्संज्ञाप्रसङ्गः — ऋ.

[10] अनन्तर इति — ऋ.

[11] अतिङ्शब्देन — ऋ.

[12] भूधातोर्लोण्मध्यमपुरुषबहुवचनम्।

[13] भूधातोर्लङ्मध्यमपुरुषबहुवचनम्।

[14] अकारान्तात् तत्प्रसङ्गः — अ.

[15] बह्वादिगणसूत्रम्. बह्वादिभ्यश्चेत्यत्र।

[16] पा. सू. ६.१.६४.

वर्तते। [1]'लिटि धातोः' इत्यत्रत्यस्य [2]'पद्दन्' इत्यादिना व्यवधानान्नानुवृत्तिः। [3]अतः शपो धात्ववयवत्वाभावान्न तुक्प्रसङ्ग इति भाष्यार्थः। **भाव्यमिति**। तथा च पूर्वान्तिग्रहणेन व्यवधानाभाव इत्यर्थः। **कृद्यकारत्वादिति**। तदागमस्य तद्ग्रहणेन ग्रहणात् [4]'अकृत्' इति निषेधादित्यर्थः। **यदि हीति**। चिनुयादित्यत्र दीर्घनिरासाय [5]'असार्वधातुक' इति प्रतिषेधः। स च कृत्प्रतिषेधेनैव सिद्ध इति [6]'अकृत्' इति [7]प्रतिषेधस्तिङो न भवतीति ज्ञापयतीत्यर्थः। **न च** श्यनर्थमसार्वधातुकग्रहणमिति वाच्यम्, दिवादिषु यस्मादजन्तात् श्यनि दीर्घो नेष्यते [8]तादृशस्याभावात्॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यस्य
सूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने
तृतीयाध्यायस्य प्रथमे पादे पञ्चममाह्निकम्[9]

[३, १९०–१९२]

(रत्नप्रकाशः) [10]**कथमिवैतत् सिध्यतीति**। कृदिति प्रकृतवचनेन विधीयमानाया एव कृत्संज्ञायाः 'अतिङ' इति निवर्तकं भवति, न त्वतिदेशप्रसक्ताया इति मन्यते। **प्रतिषेधवचनसामर्थ्यादिति**। प्राग्लादेशाद्धात्वधिकार इति पक्षे तिङामातिदेशिक्येव प्रातिपदिकसंज्ञा प्राप्तेति तस्या एव 'अतिङ' इति प्रतिषेधः। मतान्तरे त्वौपदेशिक्या एव निषेधे तस्यानर्थक्यादातिदेशिक्या अपि संभवतीति भावः। आद्यमते प्रकारान्तरमाह — **अथवेति**। **अत्रेति**। तिङीत्यर्थः। **उक्तार्थत्वान्न भविष्यन्तीति**। वस्तुतस्तु [11]'न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः' इति निषेधेनैकद्वयादिशब्देभ्य इव 'पचतिरूपम्' इत्यादाविव वा स्वादयः स्युरिति दोष एव। **टाबादय इति**। 'पचत, पचथ' इत्यादौ टाप् स्यात्। 'पचति, पचसि' इत्यादौ तु [12]'कृदिकारादक्तिनः' इति ङीषिति भावः। बहुवचनं तु प्रकृतिभेदेन तयोर्व्यक्तीनां बहुत्वादुपपन्नम्। **न च तिङन्तस्येति**। वस्तुगत्या स्त्रियां क्वचिद्वर्तमानत्वेऽपि स्त्रीत्वविशिष्टबोधकत्वं नास्ति, शब्दशक्तिस्वाभाव्यादिति भावः। **न च तिङन्तस्यापत्यादिभिरिति**। तिङभिहितस्य कर्त्रादेरसत्त्वरूपत्वेन तैर्योगो नेति भावः। **अथापि कथंचिदिति**। तिङर्थापेक्षया विशेष्यतार्हैरपत्यादिभिः कैश्चिद्योगाभावेऽपि तिङन्तार्थं प्रति विशेषणत्वार्हैः कैश्चिद्योगसंभवादिति भावः। **धातोरिति वर्तत इति**। [13]'धात्वादेः षः सः' इत्यतो धातुपदमनुवर्त्य ह्रस्वान्तस्य धातोस्तुगिति व्याख्यनान्न

---

[1] पा. सू. ६.१.८.
[2] पा. सू. ६.१.६३.
[3] 'अतः' इति नास्ति — अ.
[4] पा. सू. ७.४.२५.
[5] अकृत्सार्वधातुकेत्यत्रत्यस्य पृथक्कृत्य निर्देशोऽयम्।
[6] अकृतीति — अ.
[7] प्रतिषेधः स्थानिनो न भवतीति — अ; प्रतिषेधः क्तिनो न भवतीति — ऋ, लृ.
[8] 'तादृशस्याभावात्' इत्यस्यानन्तरम् 'इत्यर्थः' इत्यधिकम् — अ.
[9] एतदनन्तरं R. No. (O.M.L.) 2248. Vol. II. अत्र कोशे लेखकेन 'मुक्तामला-[ख्या] न्वयजो लक्ष्मीपतिबुधः स्वयम्। अध्यापनार्थमलिखत् प्रदीपोद्द्योतनं शुचि' इति श्लोको लिखितो दृश्यते॥
[10] भाष्ये 'कथमेवैतत्' इत्यत्र 'कथमिवैतत्' इति निर्णयसागरमुद्रिते पाठः।
[11] महाभाष्यम् १.२.६४.
[12] बह्वादिभ्यश्चेति सूत्रनिर्दिष्टबह्वादिगणसूत्रम्।
[13] पा. सू. ६.१.६४.

दोष इति भावः। **चिकीर्षयतीत्यत्र प्राप्नोतीति**। शबेकादेशस्यान्तवद्भावेन धातुग्रहणेन ग्रहणादिति शेषः। **शपा व्यवधानादिति**। एकादेशः पूर्वविधाविति वक्ष्यमाणोऽभिप्रायः। तमजानन्नाह — **एकादेशे कृत इति**। **एकादेश इति**। यत्तु 'स्थानिवद्भावं बाधित्वा परत्वादन्तवद्भावेन भाव्यम्। नैष दोषः, परशब्दस्येष्टवाचित्वात् स्थानिवद्भाव एवान्तवद्भावस्य बाधकः' इति। तत्तुच्छम्, अन्तवद्भावप्रवृत्त्युत्तरमेकादेशान्तस्य धातुत्वे सति तदाश्रयेण तुगागमे कर्तव्ये स्थानिवद्भावस्य जायमानत्वेन शङ्का[1]समाधानयोरुभयोरप्यसंभवदुक्तिकत्वात्। यदप्युक्तम् "नन्वतिङिति प्रत्याख्यायमाने पचेरन्निति प्रातिपदिकान्तत्वान्नकारलोपः प्राप्नोति। [2]'झस्य रन्' इति नकारोच्चारणसामर्थ्यान्न भविष्यति" इति। तदपि न, नकारोच्चारणाभावे पचतिरूपमित्यादाविवातोऽमि 'पंचेरम्' इत्यादिरूपापत्त्या पचेरन्निति रूपसिद्धेर्नकारोच्चारणाधीनत्वात्। तस्मात् कर्तव्यमेवातिङ्ग्रहणम्॥

इति श्रीहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते
महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य प्रथमे पादे [3]पञ्चममाह्निकम्

[३, १९०–१९२]

(नारायणीयम्) नन्वतिङिति प्रतिषेधेन स्थानिवद्भावनिमित्ता [4]प्राप्तिरपि बाध्यतामित्यत आह — **अतिङति प्रतिषेध इति**। **नन्वतिदेशेति**। [5]"स्थानिवदादेशः' इति या प्राप्तिः सा व्यवहितेति तां बाधितुं नोत्सहत इति, तदाह — **अनन्तरस्येति**। सामर्थ्यमेव दर्शयति — **अन्यथेति**। 'अथवा' इत्यादिनोक्तस्य पक्षस्य पूर्वस्माद्विशेषं स्फोरयति — **तिङभावीति**। नन्वाख्यातवाच्यस्य क्रियालक्षणस्यार्थस्यासत्त्वभूतत्वाल्लिङ्गायोगात् कथं तस्माट्टाबादिप्रसङ्ग इत्यत आह — **यथा साधनेति**। **शब्दशक्तीति**। तथा चोक्तम् [6]"एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया। भिद्यते, न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः॥' इति। **धात्वादेरित्यत इति**। स्वरितत्वप्रतिज्ञानसामर्थ्यात् समासे गुणभूतस्यापि धातुग्रहणस्यानुवृत्तिरित्याशयः। **स्थानिवद्भावं बाधित्वेति**। [7]"विप्रतिषेधे परम्' इति वचनात्। **नकारोच्चारणसामर्थ्यादिति**। यदि हि [8]'तिङन्ते नकारस्य लोपः स्यात् रन्निति नकारोच्चारणमनर्थकमेव स्यात्। अतस्तत्सामर्थ्यान्न भविष्यतीत्यर्थः। **सार्वधातुकप्रतिषेध इति**। न च श्यनर्थं सार्वधातुकग्रहणम्, श्यन्यजन्तस्य [9]धातोरभावाद्दीर्घप्रसङ्गात्। तस्मात् स्थितमेतत् प्रयोजनाभावात् 'अतिङ' इति प्रतिषेधोऽनर्थक इति॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य
प्रथमे पादे पञ्चममाह्निकम्॥

---

[1] समाधानयोरुभयोरप्यसंभवद्युक्तिकत्वात् — प.

[2] पा. सू. ३.४.१०५.

[3] 'पञ्चममाह्निकम्' इत्यस्यानन्तरम् 'समाप्तमिदं वासरूपान्तं भाष्यटिप्पणम्' इत्युपलभ्यते — ब; 'समाप्तमिदम्' इति नास्ति। 'वासरूपान्तभाष्यटिप्पणम्' इति 'प' कोशे दृश्यते।

[4] 'प्राप्तिरपि' इति नास्ति — ङ.

[5] पा. सू. १.१.५६.

[6] वाक्यपदीयम् ३.१२.१६. वाक्यपदीये 'तत्र तदाश्रितः' इति पाठो दृश्यते।

[7] पा. सू. १.४.२.

[8] तिङन्तनकारस्य — घ.

[9] धातोर्दीर्घप्रसङ्गात् — घ.

तृतीयाध्यायस्य प्रथमपादे षष्ठमाह्निकम्

वासरूपोऽस्त्रियाम् ३.१.९४.

[३, १९२–२००]

(उद्द्योतनम्) नन्वभिधेयायामिति कथं लभ्यते, अत आह — **स्त्रियामिति**। तथा च [1]स्त्र्यभिधायकोऽपवादो नित्यं बाधक [2]इत्याद्यकल्पार्थः। [3]स्त्रीप्रत्ययेष्वित्युक्ते स्त्र्यधिकारविहितप्रत्यय इष्यत एव, स्त्र्यभिधायकप्रत्ययश्चेत् पूर्वकल्पाभेदः, अत आह — **स्त्रियामिति**। स्त्रियामिति शब्दस्वरूपग्रहणं [4]द्वितीयकल्प इत्यर्थः। ननु शब्दस्वरूपनिषेधे प्रकृतानुपयोगः, सूत्रेषु 'स्त्रियाम्' इति शब्दस्यैवाभावप्रसङ्गात्, अत आह — **स्त्रियामित्युच्चार्येति**। स्त्रियामित्यनेन तच्छब्दयुक्तप्रत्ययविधिलक्षणयैतल्लभ्यते। ननु यत्प्रत्यये विद्यमाने तव्याभाव इष्ट एव, अत आह — **अचो यदिति**। णचि सति [5]'णचः स्त्रियामञ्' इत्यञि [6]'टिड्ढाणञ्' इति ङीप्; 'व्यावक्रोशी' इति रूपम्। क्तिना [7]णचो [8]बाधशङ्कां निराह — **णचेति**। [9]चतुर्थस्त्र्यधिकारशङ्कानिरासायाह — **स्त्रियां क्तिन्निति**। [10]'धातोः' इत्यधिकारादेतल्लभ्यते। ननु तेषां [11]निषेधे विधिवैयर्थ्यम्, [12]विहितप्रतिषेधाद्विकल्पो वा स्यात्, अत आह — **उत्सर्गेति**। अनेन ये विहिता उत्सर्गास्तेषां वासरूपविधिना प्रसक्तानां [13]प्रतिषेधोऽपवादेन विज्ञास्यत इति भाष्यार्थ उक्तः। ननु बाधकत्वविकल्पपक्षे उत्सर्गो भविष्यतीत्याशङ्क्य तद्विकल्पो न संभवतीत्याह — **वासरूप इति**। तदेवाभिनयति — **असरूप इति**। सत्ताया [14]अन्तरङ्गत्वे हेतुः — **यथोक्तमिति**। अव्यभिचारित्वरूपान्तरङ्गत्वादेव [15]'अस्तिः' इत्युक्तम्। अन्यथा धात्वन्तरं कुतो नोक्तमित्यर्थः। उत्पत्तिविकल्पेऽनिष्टमाह — **पक्ष इति**। **कश्चित्** उत्सर्गोऽपवादश्च। ननु [16]'यद्येतत्' इत्ययुक्तम्, अविद्यमानकार्यस्य [17]बाधकत्वासंभवात्, अत आह — **अपवादेति**। [18]कार्यस्याविद्यमानत्वम्, न तु शास्त्रस्येत्यर्थः। 'यथा तद्धिते' इति दृष्टान्तं व्याचष्टे — **तत्रेति**। दाक्षिरित्यत्रेञभावे दक्षस्यापत्यमिति वाक्यमेव भवति, न त्वण्प्रत्यय इत्यर्थः। ननु कर्त्राद्यभिधानाय [19]प्रत्ययस्यावृत्तिः स्यात्, अत आह — **प्रकृतिरेवेति**। तत्र दृष्टान्तः — **यथेति**। अस्मिन् पक्षे इष्टसिद्धिमाह — **बाधकत्व इति**।

---

[1] स्त्र्यभिधेयकः — ऋ.
[2] इत्यादिविकल्पार्थः — अ; इत्यद्यविकल्पार्थः — ऋ, ऌ.
[3] स्त्रीप्रत्यय इत्युक्ते — अ.
[4] द्वितीयविकल्प इत्यर्थः —अ; द्वितीयविकल्पार्थः — ऋ, ऌ.
[5] पा. सू. ५.४.१४.
[6] पा.सू. ४. १. १५.
[7] णिचः — अ.
[8] बाधकशङ्कां — अ, ऋ.
[9] चतुर्थाध्यायस्थस्त्रियामित्यधिकारेत्यर्थः।
[10] पा. सू. ३.१.९१.
[11] निषेधविधिवैयर्थ्यम् — अ, ऋ ऌ.
[12] 'विहित'. इति नास्ति — अ.
[13] प्रतिषेधोपपादनेन — ऋ, ऌ.
[14] अन्तरङ्गत्वहेतुः — अ.
[15] अस्तेरित्युक्तम् — अ, ऋ, ऌ.
[16] यद्येवमित्ययुक्तम् — अ, ऋ, ऌ.
[17] बाधकत्वसंभवात् — अ, ऋ, ऌ.
[18] कार्यस्य विद्यमानत्वं — अ.
[19] प्रत्ययावृत्तिः — अ.

'प्रकृतिरेव' इति यदुक्तं तन्निरासार्थत्वेन [1]'न केवला प्रकृतिः' इति भाष्यं व्याचष्टे — **केवलेति**। केवला प्रकृतिः स्वार्थमपि नाभिधत्त इत्येतदेवाह — **तथा हीति**। **अनुत्पन्नेति**। [2]क्विबादीनामुत्पन्नानां लोपविधानात् प्रकृतेस्तदर्थाभिधायित्वं युक्तम्। एकशेषस्थल इव शिष्यमाणस्यानेकार्थाभिधायित्वमिति भावः। [3]'न चान्यः शब्दोऽस्ति' इति भाष्यं व्याचष्टे — **अथापीति**। **न त्विति**। क्षेप्तेत्यत्र तु तन्मात्रकर्तृत्वमेव[4] प्रतीयत इति भावः। अन्तरङ्गत्वात् सत्ताविकल्प इत्युक्तं निराह — **तस्मादिति**। यस्मात् तस्मिन् पक्षेऽनिष्टम्, अस्मिंश्चेष्टसिद्धिस्तस्मादित्यर्थः। नन्विहापि प्रमाणं चेत् किमतः, अत आह — **समयस्येति**। अन्यत्र सावकाशः समय इति भावः। किं सामर्थ्यं प्रत्ययोत्पत्तिनिमित्तम्, अत आह — **अर्थेति**। 'न केवला प्रकृतिः' इत्यर्थप्रत्यायनसामर्थ्याभाव एव प्रत्ययोत्पत्तिप्रयोजक उक्तः, इहापि [5]स एवेत्यभेदमाशङ्क्याह — **पूर्वस्मिन्निति**। ननु दक्षस्यापत्यमित्यत्र प्रत्ययानुत्पत्तावपि सामर्थ्यमस्तीति 'कथं तर्हि' इत्ययुक्तम्, अत आह — **समयादिति**। प्रातिपदिकादित्यधिकारात् केवलप्रातिपदिकस्यैव प्रकृतित्वं न षष्ठ्यन्तस्येत्यर्थः। तद्धितवैषम्यमाह — **दक्षस्येति**। नन्वत्रापि [6]कृदनुत्पत्तौ तिङन्तस्य क्षिपतीत्यस्य प्रयोगो भविष्यति, न तु केवलस्य धातोरित्यनुशयात्,[7] 'अथवा' इति भाष्यम्। तत्र रूपवत्ता कथं लभ्यते, अत आह — **असरूपशब्देनेति**। **रूपवदिति**। सामान्यशास्त्रेण तत्र [8]तस्यैवोपस्थितत्वादित्यर्थः। [9]**अनुत्पत्तिः** अपवादस्येत्यादिः। ननु [10]भवतूत्पत्तिविकल्पपक्षे दोषाभावः, तथाप्यसरूपशब्दस्योत्सर्गार्थकत्वेऽपीष्टसिद्धेरपवादार्थकत्वं किमर्थमङ्गीक्रियते। एवं च वाशब्देनोत्सर्गस्यापवाद[11]विषये पक्षेऽनुत्पत्त्यनुज्ञानेऽपि [12]तदापवादसंभवादुत्पत्तिवाप्रसङ्गदोषो नास्तीत्यभिप्रेत्य शङ्कते — भाष्ये **एवमपीति**। **उत्सर्गेति**। अपवादेनोत्सर्गस्य बाधितत्वादप्राप्तविभाषेत्यर्थः। भाष्ये **सापेक्षोऽयमिति**। समाधानम्। 'अपि च सापेक्षोऽयम्' इति क्वचित् पाठः। तत्र 'अपि च' इति शङ्का[13]निरासार्थः। असरूपः सरूपभिन्नः सरूपसापेक्षः। भाष्ये **न चोत्सर्गवेलायामिति**। उत्सर्गविधेः [14]प्रत्ययान्तरनिरपेक्षत्वादित्यर्थः। **बाध्यत्वेनेति**। बाधकस्य बाध्यसापेक्षत्वमित्यर्थः। भाष्ये **ग्रामणीरिति**। [15]'सत्सूद्विष' इति क्विबपवादः, [16]ण्वुलुत्सर्गः। प्रयोगानुसारित्वाच्छास्त्रस्य प्रयोगगतमेव रूपं ग्राह्यम्, अत आह — **प्रत्यासत्तीति**। ननूभयत्र [17]'इतश्च' इति लोपे तकारमात्रस्य प्रयोगात् कथमसारूप्यम्, अत आह — **लङीति**। [18]'अस्तिसिचः' इतीत्वे ईच्छब्दः प्रत्ययः, न तकारमात्रमित्यर्थः। **असारूप्यादिति**। प्रयोग इत्यादिः। कथं न सर्वसंग्रहः, अत आह — **क्विबादय इति**। भाष्ये **ददातिदधात्योरिति**। [19]'श्याद्व्यधास्रु' सूत्रेणादन्तत्वात् प्राप्तस्य णस्यापवादः शो ददातिदधात्योर्विधीयते। तत्रानुबन्धकृतासारूप्यादेव शवि-

---

[1] 'न केवला' इति नास्ति — अ.

[2] क्विबादीनामनुत्पन्नानां — अ.

[3] न वान्यः — अ.

[4] एवकारो नास्ति — ऋ.

[5] स एवेत्यर्थभेदमाशङ्क्याह — अ.

[6] कृदनुवृत्तौ — अ.

[7] अस्वरसादित्यर्थः।

[8] तस्यैवावस्थितत्वादित्यर्थः — अ.

[9] अनुवृत्तिः — अ, लृ.

[10] भवतूत्पत्तिपक्षे विकल्पपक्षेऽपि दोषाभावः—अ.

[11] विषयपक्षे — अ.

[12] तदापवादत्वसंभवादुत्पत्तौ वाप्रसङ्ग — अ.

[13] निरासः — अ.

[14] प्रत्ययान्तरापेक्षत्वादित्यर्थः — अ.

[15] पा. सू. ३.२.६१.

[16] भाष्ये 'ग्रामणायः' [अत्र ग्रामनाय इति निर्णयसागरमुद्रिते दृश्यते] इत्यत्र 'ग्रामनायकः' इत्यन्नंभट्टपाठ इत्यनेन प्रतीयते।

[17] पा. सू. ३.४.१००.

[18] पा. सू. ७.३.९६.

[19] प. सू. ३.१.१४१.

षये णस्य [1]'सिद्धेर्विभाषाग्रहणं व्यर्थं सत् 'नानुबन्धकृतमसारूप्यम्' इति ज्ञापयतीत्यर्थः। ननु क्वचिदित्युक्ते उपदेशेऽसारूप्यमादाय [2]'कविषयेऽप्यण्प्रसङ्गः, अत आह — **प्रयोग इति**। [3]'विभाषां शास्ति' इत्यनन्तरेण 'अथ कथम्' इत्यतः प्राक्तनेन भाष्येण प्रकारत्रयेण प्रयोगेऽसारूप्यं गृह्यत इत्युक्तम्। तत्र कल्पत्रयेऽपि युक्तिमाह — [4]**उपदेशे हीति**। **अनर्थकं स्यादिति**। 'वापवादोऽस्त्रियाम्' इत्येव स्पष्टार्थं वक्तव्यं स्यादित्यर्थः। अत्र क्विबादिसंग्रहायोपदेश एवासारूप्यं ग्राह्यम्। अनुबन्धानामनेकान्तत्वात्, एकान्तपक्षे ज्ञापकात् तत्कृतमसारूप्यं न भवति। 'वापवादः' इत्युक्तेऽयं विशेषो न लभ्यत इति 'वासरूपः' इत्युक्तमिति तत्त्वम्। **स्त्र्यधिकारेति**। 'वासरूपः' [5]इति परिभाषाश्रयणे प्रथमः कल्पः, अधिकाराश्रयणे [6]तु द्वितीय इति विवेकः। भाष्ये **हसितमिति**। [7]'नपुंसके भावे क्तः'। **हसनमिति**। [8]'ल्युट् च' इति [9]नपुंसके ल्युट्। उभयत्र घञ् नाङ्गीक्रियते, भावे घञन्तस्य पुँल्लिङ्गत्वनियमात्। भाष्ये **इच्छतीति भोक्तुमिति**। [10]'समानकर्तृकेषु तुमुन्'। भाष्ये **लिङ्लोटावपीति**। [11]'इच्छार्थेषु लिङ्लोटौ' इत्यनेन। अत्र लोडेवापाद्यः, लिङुत्तरसूत्रेण विधीयत एवेत्याह — **लिङ् चेति**। तर्हि लिङ्ग्रहणं कथं कृतम्, अत आह — **इच्छार्थेष्विति**। पूर्वसूत्रे सहनिर्देशमात्रेणात्र तन्निर्देशः, न त्वापाद्यत्वेनेत्यर्थः। लोटोऽप्यापादनं न संभवतीत्याह — **लिङ् चेति**। वासरूपेणोभयप्राप्तौ [12]'लिङ् च' इति नियमार्थत्वोपपत्तेरित्यर्थः। तुमुना लोटो बाधो न संभवतीति शङ्कते — **नन्विति**। **भावेऽपीति**। [13]'लः कर्मणि च' इत्यनेन। भाष्ये **ईषत्पान इति**। [14]'आतो युच्' इतीषदादिषूपपदेष्वादन्ताद्युच् स्यात्। खलोऽपवादः। ननु 'आस्यते भोक्तुम्' इत्यत्रासनस्य[15] पूर्वकालत्वाप्रतीतेः कथं क्त्वाप्रसङ्गः, अत आह — **भोजनार्थत्वादिति**। एवमपि भावे क्त्वा, कर्मणि ल इति लस्य कथं बाधः, अत आह — **क्त्वा भाव इति**। **अत्र** आस्यते भोक्तुमित्यत्र। भाष्ये पक्षद्वयेऽपि [16]'दोषा एवोक्ताः, तत्र कः सिद्धान्तः, अत आह — **तत्रायमिति**। **परस्तादिति**। परिभाषापक्ष इत्यर्थः। तर्हि क्तल्युडादावपि विभाषाप्रसङ्गः, अत आह — **अर्ह इति**। 'अर्हे च' इति लिङ्विधावेव वासरूपेण कृत्यतृचोऽपि भविष्यन्तीति [17]तद्ग्रहणमनित्यत्वज्ञापनार्थम्। तेनाभिमतविषये विभाषा भविष्यति, नानभिमतविषय इति व्यवस्थासिद्धिरित्यर्थः॥

[३, १९२–२००]

(रत्नप्रकाशः) स्त्रीशब्दोऽर्थपरो वा स्यात् स्त्रीप्रत्ययपरो वेति संदेहात् पृच्छति — **कथमिति**।

---

[1] सिद्धये विभाषाग्रहणं — अ.

[2] कविषयेऽप्यप्रसङ्गः — अ, ऋ, लृ.

[3] भाष्ये 'विभाषा शं शास्ति' इत्यत्र 'विभाषां शास्ति' इति निर्णयसागरमुद्रिते पाठः।

[4] प्रदीपे 'उपदेशे सर्वस्यैव' इत्यत्र 'उपदेशे हि सर्वस्यैव' इत्यन्नंभट्टपाठ इति भाति।

[5] इत्यधिकाराश्रयणे — अ.

[6] 'तु' इति नास्ति — अ.

[7] पा. सू. ३.३.११४.

[8] पा. सू. ३.३.११५.

[9] 'न' इति नास्ति — ऋ.

[10] पा. सू. ३.३.१५८.

[11] पा. सू. ३.३.१५७.

[12] पा. सू. ३.३.१५९.

[13] पा. सू. ३.४.६९. अण् कर्मणि चेत्यनेन — ऋ, लृ.

[14] पा. सू. ३.३.१२८.

[15] 'आसनस्य' इत्यादि 'आस्यते भोक्तुमित्यत्र' इत्यन्तं नास्ति — अ.

[16] दोष एवोक्तः — अ.

[17] कृत्यतृज्ग्रहणमित्यर्थः।

लव्येति। [1]'अचो यत्' इति यता [2]तव्यदादीनां नित्यं बाधनं प्राप्नोतीति भावः। **व्यावक्रोशीति**। [3]'कर्मव्यतिहारे णच् स्त्रियाम्' इति विधीयमानस्त्रीप्रत्ययेन क्तिनो नित्यं बाधनं प्राप्नोतीति भावः। **स्त्रियामित्यधिकृत्येति**। [4]"स्त्रियां क्तिन्' इत्यधिकार इत्यर्थः। **उत्पत्तिवाप्रसङ्ग इति**। असरूपस्य प्रत्ययस्योत्पत्तिरेव विकल्पेन भवतीत्येव सूत्रार्थ उपपद्यते, स्याच्छब्दमात्राध्याहारस्यात्रौत्सर्गिकत्वात्। न तु वासरूपो बाधकः स्यादिति, बाधकशब्दाध्याहारे मानाभावादिति भावः। **अस्त्विति**। अपवादाप्रवृत्तावुत्सर्गप्रवृत्तेर्न्याय्यत्वादिति भावः। **यद्येतल्लभ्येतेति**। असरूपशब्दस्योत्सर्गापवादसाधारणत्वाद्विनिगमनाविरहाच्चोभयमेव विकल्पेन स्यादिति सूत्रार्थः स्यादिति भावः। **तद्धितेषु च सर्वमेवेति**। तत्र महाविभाषाधिकारादुभयं विकल्पितम्, [5]ज्ञापकबलेन चोभयवैकल्पिकत्वेऽपवादाप्रवृत्तावुत्सर्गाप्रवृत्तिः[6] साधिता, तद्वत् प्रकृते सूत्रेणैवोभयोर्वैकल्पिकत्वे बोधिते[7] तेनैव ज्ञापकेनापवादाप्रवृत्तावुत्सर्गाप्रवृत्तिः स्यादिति भावः। एतेन 'अपवादशास्त्रेणोत्सर्गशास्त्रस्य बाधितत्वादपवादाभावपक्षेऽप्युत्सर्गाप्रवर्तनादिति भावः' इति निरस्तम्। प्रवर्तमानेनापवादेनोत्सर्गस्य बाधसंभवे[8]ऽप्यप्रवर्तमानेन तेन तस्य बाधासंभवेन बाधितत्वहेतोः स्वरूपासिद्धत्वात्। **बाधकस्येति**। बाधकत्वस्येत्यर्थः। **वा बाधक इति**। "व्याख्यानतो विशेषप्रतिपत्तिः' इति बाधक[9]शब्दाध्याहारेण व्याख्यास्यत इति भावः। तमाशयमविद्वान् सूत्रमध्ये बाधकशब्दः प्रक्षिप्त इति मन्यमान आह — **सिध्यति**। **सूत्रं तर्हीति**। **तद्धितेषु विभाषोत्पत्तिरिति**। उत्सर्गापवादयोरिति शेषः। **अन्येनेति**। [10]दक्षस्यापत्यमित्यादावपत्यादिशब्देनेत्यर्थः। **न केवला प्रकृतिरिति**। केवला प्रकृतिः प्रकृत्यर्थेऽपि न वर्तते। किमु वक्तव्यं प्रकृत्यर्थविशिष्टे प्रत्ययार्थे न वर्तत इ[ती]ति भावः। ननु केवला प्रकृतिः प्रकृत्यर्थे तद्विशिष्टप्रत्ययार्थे [च] न वर्ततां नाम, अन्यस्यैव तत्र प्रयोगो भविष्यतीत्यत आह — **न चान्य इति**। **अनुत्पत्तिर्न भविष्यतीति**। अर्थबोधार्थत्वाच्छब्दप्रयोगस्य तत्रोत्सर्गेणापवादेन वान्यतरेणावश्यमुत्पत्तव्यमिति भावः। ननु क्षेपकर्तेत्यादेः शब्दस्य [11]प्रकृत्यर्थविशिष्टप्रत्ययार्थबोधकस्य सत्त्वेन तत्र [12]प्रत्ययानुत्पत्तिर्भविष्यतीत्यत आह — **अथवेति**। **समयादनुत्पत्तिर्भविष्यतीति**। ननु केवला प्रकृतिर्न प्रयोक्तव्येति समयेन क्षिपिप्रभृतेर्धातोः केवलस्य प्रयोगो मा भून्नाम। तावता तृजादेरौत्सर्गिकस्य वा [13]कादेरपवादस्य वैकस्योत्पत्तिर्भवत्येवेत्ययमर्थो न सिध्यतीति चेन्न, यदर्थकप्रत्ययप्रकृतित्वं यस्य तदर्थकप्रत्ययं विना तस्याः केवलायाः प्रयोगो नेति तत्समयार्थस्याश्रितत्वेन कर्तृबोधकतृजादिप्रकृतित्वेनावगतस्य क्षिप्यादेस्तं विना तदर्थे प्रयोगासंभवात्। ननु तर्ह्यपत्यार्थकतद्धितप्रकृतित्वेनावगतस्योपग्वादेस्तदर्थेन विना प्रयोगो न स्यात्, तस्य तं विना तत्र प्रयोगश्चेत् क्षिप्यादेरपि तृजादिकं विना तत्र प्रकारान्तरेण प्रयोगो भविष्यतीत्याशयेनाह — **य एव तस्येति**। **इदमप्याहेति**। उत्सर्गापवादौ विकल्पेन भवत इति तत्रापवादेन [14]मुक्ते उत्सर्गो न भवतीति चाहेत्यर्थः। अर्धाङ्गीकारेण समाधत्ते — **प्रमाणमसाविति**। **न चानुत्पत्ताविति**। तृजादेरिति शेषः। **सामर्थ्यमस्तीति**। क्षिप्यादेः कर्तृबोधन इति शेषः। **तद्धितेष्विति**। अनुत्पत्तावित्युत्पत्त्यभावं प्रत्याधारत्वविवक्षायां सप्तमी।

---

[1] पा. सू. ३.१.९७.
[2] तव्यादीनां — प.
[3] पा. सू. ३.३.४३.
[4] पा. सू. ३.३.९४
[5] अस्य साधितेत्यनेनान्वयः।
[6] उत्सर्गप्रवृत्तिः — प, ब.
[7] अपिशब्दो नास्ति — ब.
[8] परिभाषा १.
[9] शब्दोऽध्याहारेण — ब.
[10] दक्षापत्यमित्यादौ — प, ब.
[11] प्रकृत्यर्थविशिष्टस्य प्रत्ययार्थ — ब.
[12] प्रत्ययानुपपत्तिः — ब.
[13] इगुपधेत्यादिना विहितकप्रत्ययादेरित्यर्थः।
[14] युक्ते — ब.

तद्धितानामनुत्पत्ताविति फलितम्। **अन्येन प्रत्ययेनेति**। सहेति शेषः। ननु [१]'सुबन्तात् तद्धितः' इति सिद्धान्तात् सुबन्तस्य तद्धितप्रकृतित्वमवगतम्। तथा च सुबन्तस्य तद्धितं विना प्रयोगोऽनुपपन्नः स्यादित्यापादिते प्रातिपदिकस्यातद्धितेनापत्यार्थकत्वशून्येन षष्ठीरूपेण प्रत्ययेन सह सामर्थ्यकथनं यत्किंचिदेव भवतीत्यस्वरसादाह — **अथवेति**। **रूपवत्तामाश्रित्य वाविधिरुच्यत इति**। सत्येव रूपवत्त्वेऽसारूप्यमुपपद्यत इति भावः। तथा च तदभावपक्षेऽपि रूपवत्तया भवितव्यमित्युत्सर्गापवादयोरन्यतरेणावश्यमुत्पत्तव्यमेवेति भावः। **न चानुत्पत्तिरिति**। ह्यर्थे चः। उत्पत्त्यभावस्य रूपवत्त्वाभावस्य सर्वानुभवसिद्धत्वात् तदुपपत्तिः। वस्तुतस्त्विदमपि समाधानं युक्तिसहं न भवत्येव, असारूप्यस्योत्सर्गापवादयोः परस्परमाश्रितत्वेन तयो रूपवत्त्वावश्यकत्वेऽपि तदभावस्य रूपवत्त्वाश्रयणे मानाभावात्। तस्मात् तत्रान्यतरस्य विकल्पोऽनेन सूत्रेण फलति। यत्रोत्सर्गापवादौ [२]विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवतीति ज्ञाप्यस्य महाविभाषयाऽ यत्रोत्सर्गापवादौ विभाषितौ तत्रापवादेन मुक्ते उत्सर्गो न भवतीत्येवं विशेषपरत्वेन प्रकृते तदप्रवृत्तेरित्येतत्तात्पर्यकं प्रकृतभाष्यं ज्ञेयम्। तत्र शङ्कते — **एवमपीति**। **न चैवास्ति विशेष इति**। यद्यप्युत्सर्गविकल्पेऽप्राप्तविभाषा, अपवादविकल्पे प्राप्तविभाषेति विशेषोऽस्ति, तथापि सोऽकिंचित्करः, [३]रूपे विशेषाभावस्य तत्राभिमतत्वात्। सम्यग्विचार्यमाणेऽपवादस्यैव वैकल्पिकत्वमनेन सूत्रेण बोध्यत इत्याशयेनाह — **अपि चेति**। **सापेक्ष इति**। सरूपो वा भवतीत्युक्ते यथा कस्य सरूप इति सापेक्षो निर्देशो भवति, एवमसरूपो वेत्युक्ते कस्येत्यपेक्षाया जायमानत्वात् सापेक्षतेति भावः। **न चोत्सर्गवेलायामिति**। इदमपि समाधानं निर्युक्तिकमेव, प्रसक्तस्यानभिनिर्वृत्तस्यैवोत्सर्गस्यापवादेन निवर्तनीयत्वेन, अत एव [४]'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' [५]'प्रकल्प्य वापवादविषयमुत्सर्गोऽभिनिविशते' इति परिभाषितत्वेन चोत्सर्गस्यापि सापेक्षत्वाविशेषात्। तस्मादस्मिन् धात्वधिकारेऽसरूपोऽपवादो वा स्यादित्येष निर्णयो व्याख्यानत इत्येव सुवचम्। **अपवादवेलायामिति**। बाध्यत्वेनोत्सर्गस्यापेक्षणादपवादस्य तत्सापेक्षतेति भावः। **न ह्येते रूपवन्त इति**। प्रयोग इति शेषः। तेषां हि [६]'वेरपृक्तस्य' इति लोपो भवति। **उपदेशावस्थायामिति**। प्रत्ययानां विधिवेलायामित्यर्थः। यत्तु 'प्रत्यासत्तिन्यायादुपदेशावस्थायामसारूप्यमाश्रीयते' इति। तन्न, [७]'सिद्धे शब्दार्थसंबन्धे' इत्यादिना शास्त्रस्य प्रयुक्तविषयताया व्यवस्थापितत्वेन प्रयोगगतरूपाश्रयणस्यैव न्यायप्राप्तत्वात्। अन्यथा [८]'आदेच उपदेशेऽशिति' इत्यादावुपदेशग्रहणानर्थक्यापत्तेः। 'अथवा प्रयोग एवासरूपाणां वाविधिर्न्याय्यः' इत्युत्तरभाष्यविरोधाच्च। तस्मादुपदेशावस्थायामिति तु व्याख्यानलभ्यमेवेत्युचितं वक्तुम्। **अनुबन्धभिन्नेष्विति**। अनुबन्धकृतासारूप्येष्वित्यर्थः। **अनेकान्तत्वात्** अनवयवत्वात्। अनुबन्धानां ह्यवयवत्वमारोपितम्, न वास्तविकमित्यवोचाम। **प्रयोग इति**। प्रक्रियावाक्यरूपमत्र प्रयोगशब्देनाभिमतम्, तत्रैव शास्त्रप्रवृत्तेर्न्याय्यत्वात्। तत्र ह्यवान्तरकालविशेषे काणोः सारूप्यं भवति, क्विबणोस्तु वैरूप्यम्। न्याय्ये प्रयोगेऽसारूप्ये आश्रीयमाणेऽतिप्रसङ्गमाह — [९]**प्रयोगे लादेशेष्विति**। लकाराणां प्रयोगसमवायाभावेन प्रयोगे तदादेशगतवैरूप्यमाश्रित्योत्सर्गपवादयोर्लकारयोः पर्यायितापाद्यते। **ह्योऽपचदिति**। लङ्च्यनच्कस्तकारस्तिप्

---

[१] अयमर्थः विभाषा पूर्वाह्णापराह्णाभ्यामिति सूत्रे भाष्य उक्तः।

[२] विभाषया — प, ब.

[३] रूपविशेषाभावस्य — प, ब.

[४] परिभाषा ६३.

[५] परिभाषा ६४.

[६] पा. सू. ६.१.६७.

[७] का. वा. १.

[८] पा. सू. ६.१.४५.

[९] वार्तिके 'प्रयोगे चेल्लादेशेषु' इत्यत्र 'प्रयोगे लादेशेषु' इति निर्णयसागरमुद्रिते पाठः।

भवति, लुङि तु 'अपाक्षीत्' इतीकारतकारात्मक इति तयोर्वैरूप्यात् तदाश्रयेण लङ्विषये लुङुत्सर्गः पक्षे स्यादिति भावः। **यदयमिति**। परोक्षे लङ्लिटोः [1]समावेशोऽसारूप्यात् सिद्ध एवेति नार्थो लङ्विधानेनेति तद्विधानं तज्ज्ञापयतीति भावः। लक्ष्यानुसारेण क्वचिन्न्याय्यमपि परित्यज्य व्याख्यानमाश्रयणीयमित्याशयेनाह — **अथवेति**। [2]**उपदेशे चैते सरूपा इति**। अनुबन्धानामनेकान्तत्वादिति शेषः। [3]**ददातिदधात्योर्विभाषामिति**। शप्रत्ययस्येति शेषः। [4]'श्याद्व्यध' इति णप्रत्यये प्राप्ते विधीयमानः शो विभाषयैव भविष्यतीति विभाषाग्रहणं व्यर्थं सदनुबन्धकृतं वैरूप्यं तत्र [5]नाश्रीयत इति ज्ञापयतीति भावः। ज्ञापकं विनाप्यनुबन्धप्रयुक्तमसारूप्यं तत्र नाश्रीयत इत्युपपादयितुं शक्यत इत्याशयेनाह — **अथवेति**। **रूपान्यत्वेन वेति**। [6]अन्यथात्यन्ताभेदेऽपवादविधानमनर्थकं स्यादिति भावः। **अवश्यं किंचित् त्याज्यमिति**। अन्यथा सरूपापवादाप्रसिद्धया सूत्रमिदमयुक्तार्थकं स्यादिति भावः। [7]**तन्नाश्रयिष्याम इति**। अनुबन्धानामप्राधान्यात् प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययात् प्रधानप्रयुक्तमेव वैरूप्यमाश्रयणीयमिति भावः। अन्यतरापरित्यागेनाप्यसारूप्यमुपपादयितुं शक्यत इत्याह — **अथवेति**। प्रयोग [8]एवासारूप्यमाश्रयितुं शक्यत इत्याशयेनाह — **अथवेति**। अस्त्रियामित्यंशो यथाश्रुत एव युक्तो वा, तमपहाय 'प्राक् स्त्रियाः' इति वा वक्तुं युक्तमिति विचारयति — **अथ कथमिति**। **लिङ्लोटाविति**। [9]'इच्छार्थेषु लिङ्लोटौ' इति विहितौ भावकर्मकर्तृसाधारणत्वात् समानासमानकर्तृसाधारणत्वाच्चोत्सर्गौ भावेऽपि तुमुना सह पर्यायतां प्राप्नुत इति भावः। [10]'लिङ् च' इति तुमुन्विषये पुनर्लिङ्विधानं नियमार्थमिति लोड् न भविष्यतीति तत्समाधानं बोध्यम्। **आस्यते भोक्तुमिति**। भोजनार्थत्वादासनस्य पौर्वकाल्यमस्तीति समानविषयत्वमस्तीति भावः। अत्रायं निष्कर्षः — यथाश्रुतन्यास एवाश्रीयते। [11]'अर्हे कृत्यतृचश्च' इति चकारो [12]'विभाषाग्रेप्रथमपूर्वेषु' इति विभाषाग्रहणं चास्यानित्यत्वं ज्ञापयतः। तेन क्तल्युट्तुमुन्खलर्थेषु वासरूपविधेरप्रवृत्तौ नित्यमेव बाधकत्वं सिद्धमिति॥

[३, १९२–२००]

(नारायणीयम्) भाष्योपक्षिप्तं पक्षद्वयं विविच्य दर्शयति — **स्त्रियामित्यभिधेयेति**। ननु स्त्रियामित्यस्य स्वरूपस्य निषेधे तत्प्रयोगाभावः स्यात्, न तु स्त्रीप्रत्ययेषु वासरूपविधेर्निषेधः शक्यक्रिय इत्याशङ्क्यास्मिन् पक्षे सोपस्कारं सूत्रयोजना कार्येत्याह — **स्त्रियामित्युच्चार्येति**। ननु यदा [13]यत् तदा तव्यादीनामभाव इष्ट एवेत्यत आह — **अचो यदिति यतेति**। व्यावक्रोशीति न सिध्यतीति न योज्यमित्याह — [14]**कर्मव्यतिहार इति**। ननु स्त्रियामित्यधिकृत्य विहितानां तत्रैव निषेधे विधिवैयर्थ्यं स्यात्, विधिप्रतिषेधसामर्थ्याद्विकल्पो वा स्यादित्याशङ्क्य तेषां प्रतिषेध इति

---

[1] समावेशेऽसारूप्यात् — प, ब.

[2] 'उपदेशे चैतेऽसरूपाः' इत्यकारप्रश्लेषो दृश्यते हरयाणानिर्णयसागरचौखाम्बामुद्रितेषु। पूनामुद्रितेऽकारप्रश्लेषो नास्ति। स एवात्राभिमतः।

[3] भाष्ये 'ददातिदधात्योर्विभाषा शं शास्ति' इत्यत्र 'ददातिदधात्योर्विभाषां शास्ति' इति निर्णयसागरमुद्रिते पाठः।

[4] पा. सू. ३.१.१४१.

[5] वाश्रीयत इति — ब.

[6] अन्यथात्यन्तभेदे — ब.

[7] तन्नाश्रयितव्यमिति–प; तत्राश्रयितव्यमिति–ब.

[8] एव सारूप्यं — प, ब.

[9] पा. सू. ३.३.१५७.

[10] पा. सू. ३.३.१५९.

[11] पा. सू. ३.३.१६९.

[12] पा. सू. ३.४.२४.

[13] यत्प्रत्यय इत्यर्थः।

[14] कर्मव्यतीहार इति — घ.

तेषां वासरूपविधिना यः प्रसङ्गस्तस्य प्रतिषेध इति भाष्यं योजयन्नर्थमाह — **स्त्रियां क्तिन्नित्यस्मिन्निति**। तेन 'चिकीर्षा' इत्यादौ [1]'अ प्रत्ययात्' इत्यकारप्रत्ययेन [2]'स्त्रियां क्तिन्' इति क्तिन् नित्यं बाध्यते। ननु बाधकत्वस्य विकल्पे पक्ष उत्सर्गस्य भावात् किमत्रानिष्टमित्याशङ्क्य बाधकत्वविकल्प एव न सिध्येदिति वार्तिकाशयं दर्शयति — **वासरूप इत्येतावदिति**। **तत्रान्तरङ्गत्वादिति**। प्रथमं वस्तुनः सत्ता प्रतीयते। सतस्तु धर्मान्तरयोगः पश्चादवगम्यत इति सत्तान्तरङ्गा, बाधकत्वं बहिरङ्गम्। **बाधकाभाव इति**। बाधकेन स्वविषयस्याक्रान्तत्वाद्धि बाध्यस्याप्रवृत्तिः। तदभावे तूत्सर्गो निष्प्रतिद्वन्द्वं प्रवर्तत एवेत्यर्थः। नन्वसतः कथं बाधकत्वमित्यत्राह — **अपवादशास्त्रेणेति**। उत्सर्गापवादयोरेकवाक्यतायामपवादस्य यो विषयस्तद्व्यतिरिक्तविषयत्वं सामान्यशास्त्रस्य [3]प्रतीयत इत्यपवादस्याप्रवृत्तावपि तद्विषये सामान्यशास्त्रं नैव प्रवर्तते, प्रमाणाभावादित्यर्थः। एतं न्यायं हृदि कृत्वा भाष्यकृता दृष्टान्त उक्त इत्याह — **तत्र यथेति**। केवलायाः प्रकृतेः प्रत्ययार्थाभिधानमन्यत्रापि दृष्टमित्याह—**यथेति**। [4]बाधकत्वे विकल्पिते कथमिष्टसिद्धिरित्यत्राह — **बाधकत्व इति**। ननु प्रकृतिः प्रकृत्यर्थे वर्तत एवेति किमुच्यते 'न केवला प्रकृतिः' इति [इत्याशङ्क्य] कैमुतिकन्यायं दर्शयितुमेतदुक्तमित्याह — **किं पुनरिति**। नन्वन्वयव्यतिरेकाभ्यां प्रकृत्यादेरर्थाविगमात् कथं प्रकृतेरर्थानभिधानं प्रतिज्ञातमित्याशङ्क्य तदुपपादनायाह — **तथा हीति**। **अनुत्पन्नप्रत्यया त्विति**। अग्निचिदित्यादौ तु प्रत्ययस्योत्पन्नत्वाच्छास्त्रतोऽर्थप्रतीतिसिद्धिः। **करोतिक्रियापेक्षमपीति**। कर्तेत्यत्र करोतेः प्रकृतित्वात् तदर्थापेक्षमपि कर्तृत्वं देवदत्तादेः प्रतीयेत — क्षेपस्य करणस्य चायं कर्तेति, न तु क्षेपस्यैवेति। तस्माद्युक्तमुक्तं भाष्ये 'न चान्यः शब्दोऽस्ति, यस्तमर्थमभिदधीत' इति। फलितमर्थमाह—**तस्मादिति**। इहाप्यसौ प्रमाणं चेत् किमत्रायातमित्यत्राह—**समयस्यायमिति**। सामर्थ्यं संगतार्थत्वमिति व्याचष्टे — **अर्थप्रत्यायनायेति**। 'न च' इत्यादिभाष्यस्यार्थमाह — **न च प्रत्ययस्येति**। नन्वेवमयमपि पूर्वोक्त एव पक्षः संपन्न इत्याशङ्क्य विशेषं स्फोरयति — **पूर्वस्मिन्निति**। कृत्सूक्तो न्यायस्तद्धितेष्वपि प्रसजतीति चोदकाशयं दर्शयति — **समयादिति**। षष्ठीशब्देन षष्ठ्यन्तं प्रातिपदिकमुच्यत इत्याह — **दक्षस्यापत्यमिति**। वैधर्म्यं विशदयति — **इह त्विति**। किमत्र रूपवत्ताश्रयणमित्यत्राह — **असरूपशब्देनेति**। **रूपवदुत्सर्गापेक्षयेति**। असरूपत्वं नाम प्रतियोगिसापेक्षम्। केनचिद्धि किंचित् सरूपं भिन्नरूपं वा भवति। तत्र केनासरूप इत्यपेक्षायां यः स्वविधानसमये तस्मिन्विषये प्राप्तस्तस्य बुद्धिस्थत्वात् प्रतियोगित्वं गम्यते। स चोत्सर्ग एव। अपवादविधानवेलायां तमपि विषयमवगाढुमभिलषतस्तस्य बुद्धिस्थत्वादित्युत्सर्गापेक्षयापवादोऽत्रासरूप इत्युच्यते। ततश्च तद्विकल्पेन बुद्धिस्थ उत्सर्ग एव पक्षेऽभ्यनुज्ञायत इत्यर्थः। **उत्सर्गविकल्प इति**। अस्मिन् पक्षेऽयं सूत्रार्थः — असरूप उत्सर्गप्रत्ययोऽपवादविषये वा भवति, इति। एवं चापवादविषये उत्सर्गोऽप्राप्तो विकल्प्यते। पक्षान्तरे तु स्वविषये प्राप्तोऽपवादो विकल्प्यत इति पक्षद्वयेऽपि फलभेदाभाव इत्यर्थः। यद्यप्येवम्, तथापि [5]न्यायतोऽपवादविकल्प एवाश्रयणीय इति सिद्धान्तिन आशयं दर्शयन्नाह — **बाध्यत्वेनेति**। **प्रत्यासत्तीति**। प्रथममुपदेशतो रूपप्रतिपत्तिः, पश्चात् तदनुमिता प्रयोगे, इति हि क्रमः। प्रयोगे लङ्लुङोः सारूप्यं स्फोरयति — **लङ्चनक्क इति**। [6]'हशश्वतोर्लङ् च' इति लङ्विधानस्योक्तेऽर्थे ज्ञापकत्वमुपपादयति — **लिटा लङ इति**। कथं सर्वमिष्टं [7]न संगृहीतमित्यत्राह — **क्विबादय इति**।

---

[1] पा. सू. ३.३.१०२.
[2] पा. सू. ३.३.९४.
[3] प्रमीयत इति — ङ.
[4] बाधकत्वे कल्पिते — घ, ङ.
[5] न्यायेनापवाद — ङ.
[6] पा. सू. ३.२.११६.
[7] न गृहीतमित्यत्राह — ङ.

असरूपग्रहणसामर्थ्यात् प्रयोगेऽसरूपा इति लभ्यत इत्याह — [1]**उपदेशे हीति**। भाष्योपक्षिप्तं पक्षद्वयं विशदयति — **स्त्र्यधिकारविहितेष्वेवेति**। अत्र वासरूप इति परिभाषेत्याश्रित्य प्रथमः पक्षः। परिभाषायां हि स्त्र्यधिकारादूर्ध्वमपि धात्वधिकारात्लिङ्गात् प्रवृत्तिरुपपद्यते। तदाह — [2]**परतस्त्विति**। अधिकारोऽयमित्याश्रित्य द्वितीयः पक्षः। अत्र हि स्त्र्यधिकारे विच्छेदादुत्तरत्र न प्रवर्तते। तदेतद्दर्शयति — **स्त्र्यधिकारेण विच्छिद्यत इति**। **लिङ् चेति लिङ् भवत्येवेति**। 'समानकर्तृकेषु' इति तत्राधिकारात् तुल्यविषयत्वात्। तर्हि भाष्ये तन्निर्देशः किमर्थ इत्यत्राह — **इच्छार्थेष्विति**। **लिङ् चेति नियमादिति**। यदि तुमुन्विषये लिङ्लोटावपि भवतस्तदा [3]'लिङ् च' इति सूत्रं नियमार्थम् — इच्छार्थेषु समानकर्तृकेषु लिङेव भवति, न लोडिति। **भावेऽपीति**। इच्छत्यासितुमित्यादौ भावे लोडपि स्यादिति दोषः। भाष्ये तु 'इच्छति भोक्तुम्' इत्युपलक्षणमिति भावः। ननु पौर्वकाल्ये क्त्वा विधीयते, लडादिस्तु सामान्येनेति भिन्नविषयत्वात् कुतो बाध्यबाधकभावप्रसङ्ग इत्यत आह — **भोजनार्थत्वादिति**। समानार्थत्वाच्च बाध्यबाधकभावः स्यादित्याह — **क्त्वा भाव इति**। 'तुमर्थे' इति तत्राधिकारात्। **तत्रैव चेति**। भाव एव 'आस्यते भोक्तुम्' इत्यत्र लकार उत्पद्यत इत्यर्थः। भाष्ये पक्षद्वये दोषमुद्भाव्योपसंहारात् कः पक्षोऽत्र [4]ग्राह्य इत्याशङ्क्य भाष्यकृतोऽभिमतं पक्षं दर्शयति — **तत्रायमिति**। परिभाषेयमिति निर्णय इत्यर्थः। [5]तत्रोक्तं दोषं परिहरति — **अर्हे कृत्येति**। सामान्येन विहिताः कृत्यतृचोऽर्हेऽपि सिद्धाः, तत्रार्हे विहितेन लिङा तेषां बाधा मा विज्ञायीति पुनर्विधीयते। तच्च वासरूपविधिनैव सिद्धत्वादनर्थकमिति तदन्यथानुपपत्त्या स्त्र्यधिकारस्य परस्ताद्वासरूपविधेरनित्यत्वं ज्ञाप्यते। ततश्च क्तल्युट्तुमुन्खलर्थेषु प्रतिषेधो न वक्तव्य इत्यर्थः॥

कृत्याः ३.१.९५.

[३, २००]

(उद्द्योतनम्) सर्वसूत्रप्रत्याख्यानभ्रमं निराह — **कृत्या इत्येतावदिति**। किंयोगापेक्षम्, अत आह — **ण्वुल्तृचाविति**। [6]एतेन [7]'अल्पाच्तरम्' इति [8]तरनिर्देशेनेयसुनपि[9] स्वार्थे भवतीति योगापेक्षया ज्ञाप्यत इति सूचितम्॥

[३, २००]

(रत्नप्रकाशः) **प्राङ्ण्वुल्वचनमिति**। एवं च 'कृत्याः प्राङ्ण्वुलः' इति सूत्रपाठः कल्पित इति स्पष्टमेव। एवमन्यत्रापि भाष्यवार्तिकविरुद्धः सूत्रपाठः कल्पित एव ज्ञेयः। **योगापेक्ष-**

---

[1] प्रदीपे 'उपदेशे सर्वस्यैव' इत्यत्र 'उपदेशे हि सर्वस्यैव' इति पाठोऽभिमतः।

[2] प्रदीपे 'परस्तात् स्त्र्यधिकारस्य' इत्यत्र 'परतस्तु स्त्र्यधिकारस्य' इति पाठोऽभिमत इति भाति।

[3] पा. सू. ३.३.१५९.

[4] गृह्यत इति — ङ.

[5] तत्रोक्तदोषं — घ.

[6] तेन — अ.

[7] पा. सू. २.२.३४.

[8] तदभिन्ननिर्देशेन — अ.

[9] ईयसुनादयः स्वार्थे भवन्तीति — ऋ.

मिति। [1]'ण्वुल्तृचौ' इति सूत्रात् प्राक् कृत्यसंज्ञाधिकार इति तृज्ग्रहणेन ज्ञाप्यत इति भावः ।।

[३, २००]

(नारायणीयम्) एतावदिति। 'प्राङ् ण्वुलः' इति तु वार्तिकदर्शनात् सूत्रे कैश्चित् प्रक्षिप्त-मित्यर्थः। **इत्येवमिति**। एवमेवानुमातुमुचितम्, न त्वेकदेशेऽधिकारः, एकदेशे निवृत्तिरिति युक्तमाश्रयितुमित्यर्थः ।।

तव्यत्तव्यानीयरः ३.१.९६.

[३, २०१]

(उद्द्योतनम्) 'कर्मकर्तरि-चायमिष्यते' इति वृत्तिकारोक्तम्, तद् भाष्यविरुद्धमित्याह — **कर्म-कर्तरीति**। **भाष्यकारेणेति**। पक्तव्या इत्यर्थाभिधानात्। न हि [2]कर्मकर्तरि केळिमरन्तार्थः कर्मार्थतव्यप्रत्ययान्तेन प्रदर्शयितुमुचितः। न च 'पक्तव्याः' इत्यत्र तव्योऽपि कर्मकर्तर्येवास्त्विति वाच्यम्, [3]'लान्तस्य कर्ता कर्मवत्' इति वचनात्। 'केलिमर उपसंख्यानम्' इति [4]वार्तिके तव्यादितुल्यत्वप्रतीतेश्च। एतेन 'शब्दशक्ति[5]स्वाभाव्यात् कर्मकर्तर्येव भवति' इति [6]न्यासोऽपि निरस्तः, भाष्यकृता कर्ममात्रे प्रयोगाङ्गीकारात्। ननु [7]तद्धितेन वसतीति वास्तव्य इत्यर्थो न प्रतीयेत, अत आह — **नित्यानामिति**। यथा गोशब्दस्य [8]'गमेर्डोः' इति [9]गमिकर्तरि व्युत्पादि-तस्य जातिमात्रे प्रयोगस्तद्वद् भवार्थे व्युत्पादितस्यापि [10]वसिकर्तरि [11]प्रयोगोपपत्तिरिति भावः। [12]व्युत्पत्त्यर्थमुपात्तस्य त्यागे संमतिमाह — **यथेति**। उपशब्द उपादानार्थः, आयशब्दश्च हेयार्थ इत्युपायशब्दव्युत्पत्तिराद्यार्धेनोक्ता। तस्या एव विवरणं द्वितीयेन। ननु यत्तव्यतोस्तित्त्वात् 'वास्तव्यः' इत्यत्र स्वरभेदाभावेऽपि 'अवास्तव्यः' इत्यत्र [13]'कृत्योकेष्णुच्चार्वादयश्च', कृत्याद्यन्ता-श्चार्वादयश्च नञ उत्तरेऽन्तोदात्ता इति तव्यत्यन्तोदात्तत्वम्। यति तु [14]'तत्पुरुषे तुल्यार्थ' [15]इत्य-व्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिति [16]स्वरभेदः स्यात्, अत आह — **अवास्तव्य इति**। गुणप्रति-षेधविषयान्नञ उत्तरावतदर्थययदन्तावन्तोदात्ताविति यदन्तस्यान्तोदात्तत्वान्न स्वरभेद इत्यर्थः ।।

[३, २०१]

(रत्नप्रकाशः) केलिमर इति। कर्मकर्तर्ययमिति केचित्। तन्न, कृत्यसंज्ञाधिकारसत्त्वेनास्य

---

[1] पा. सू. ३.१.१३३.
[2] केलिमरित्यनेनास्यान्वयः।
[3] महाभाष्यम् ३.१.८७.
[4] 'वार्तिके' इति नास्ति — अ.
[5] स्वभावात् — अ.
[6] न्यासग्रन्थोऽपीत्यर्थः ।। उपन्यासोऽपि — अ.
[7] तद्धिते वसतीति — अ.
[8] उणादिसूत्रम् २३५.
[9] गमेर्व्युत्पादितस्य — अ.
[10] वसेः कर्तरि — अ.
[11] प्रयोगोपपत्तेरिति — ऋ.
[12] व्युत्पत्त्यर्थमुपात्तत्यागे — अ.
[13] पा. सू. ६.२.१६०.
[14] पा. सू. ६.२.२.
[15] इति पूर्वपद — ऋ.
[16] स्वरे भेदः — अ.

कृत्यसंज्ञायां सत्यां [1]"तयोरेव कृत्यक्तखलर्थाः' इति भावकर्मणोरेव न्याय्यत्वात्। [2]'कर्मवत् कर्मणा' इति सूत्रेण कर्मकर्तर्यपि [3]स प्राप्यत इत्यन्यदेतत्। **पचेलिमा माषा इति**। कर्मण्यत्र केलिमर्। उदाहरणस्य संकोचकत्वासंभवेन 'पचेलिमं माषाणाम्' इति भावेऽपि स ज्ञेयः। **वास्तुनि भव इति**। दिगादेराकृतिगणत्वाद्यदिति भावः। नित्यानां शब्दानां यथाकथंचिदन्वाख्यानं कर्तव्यम्, उपाये नियमाभावादिति फलितम्। तदुक्तम्— [4]"उपादायापि हेयांस्तानुपायान् संप्रचक्षते। उपायानां च नियमो नावश्यमवतिष्ठते'॥ इति। अवास्तव्य इत्यत्र स्वरेऽपि भेदो नास्ति। [5]'कृत्योकेष्णुच्चार्वादयश्च' [6]इत्यनेन [7]'ययतोश्चातदर्थे' इत्यनेनेवान्तोदात्तविधानात्॥

[३, २०१]

(नारायणीयम्) भाष्यकारेण तु कर्मणीति। 'पक्तव्याः, भेत्तव्याः' इति तव्यप्रत्ययेन तदर्थाभिधानात्। ननु वास्तव्यशब्दस्योभयथा व्युत्पादने नित्यत्वहानिः स्यादित्याशङ्क्य नित्यशब्दान्वाख्यानोपायभूतस्य प्रकृत्यादिविभागस्यैवानित्यत्वं न तूपेयस्येति परिहरति— **नित्यानामिति**। एतच्चोपायशब्दनिर्वचनेन हरिणापि दर्शितमित्याह— [8]**तथा चेति**। **उपादायापीति**। उपेयसिद्ध्यर्थमुपादायापि तस्मिन् संपन्ने प्रयोजनाभावाद् ये त्यज्यन्ते तानुपायानाहुरभियुक्ताः। ततश्चोपायनियमस्यानावश्यकत्वाद् [9]वैरवासिष्ठगिरिशादिषु निमित्तावधिसंकरेण व्युत्पत्तिरुपपद्यत इत्यर्थः। वास्तव्यशब्दस्य नञ्समासे स्वरभेदमाशङ्क्य परिहरति— **अवास्तव्य इत्यत्रेति**। [10]'कृत्योकेष्णुच्' [11]'ययतोश्च' इत्युभयत्रापि नञ इति वर्तते॥

अचो यत् ३.१.९७.

[३, २०२–२०३]

(उद्द्योतनम्) जनेर्ण्यतो रूपभेदाभावात् स्वरार्थं यद्विधानमित्याह— **यत इति**। यदन्तं

---

[1] पा. सू. ३.४.७०.

[2] पा. सू. ३.१.८७.

[3] केलिमर्प्रत्यय इत्यर्थः।

[4] वाक्यपदीयम् २.३८. तत्र 'उपादायापि ये हेयास्तानुपायान् प्रचक्षते।' इति पाठो दृश्यते। कैयटेऽपि तथैव।

[5] पा. सू. ६.२.१६०.

[6] "इत्यनेनेव 'ययतोश्चातदर्थे' इत्यनेन चान्तोदात्तविधानात्" इत्युचितं भाति।

[7] पा. सू. ६.२.१५६.

[8] प्रदीपे 'यथोक्तम्' इत्यत्र 'तथा चोक्तम्' इति पाठोऽभिमतः।

[9] वाक्यपदीये 'वैरवासिष्ठगिरिशास्तथैकागारिकादयः। कैश्चित् कथंचिदाख्याता निमित्तावधिसंकरैः'॥ इत्युक्तम्। तस्यार्थः— वीरस्येदं वीराया वा वीरादागतं तत्र भवमिति। वसिष्ठस्येदं तेन कृतं प्रोक्तं वा। गिरौ शेते गिरिं श्यति वा गिरिशः। **निमित्तम्** अर्थः, **अवधिः** प्रत्ययानां प्रकृतिः तत्संकरैरित्यर्थः, इति नागेशेनोद्द्योते 'अधिकरणे शेतेः' इति सूत्रे उक्तः॥

[10] पा. सू. ६.२.१६०.

[11] पा. सू. ६.२.१५६.

द्व्यच्कमाद्युदात्तं नौशब्दं वर्जयित्वेति यत्याद्युदात्तत्वम्, ण्यति [1]'तित् स्वरितम्' इति प्रत्ययस्य स्वरितत्वे [2]प्रकृतेरादिरनुदात्तः स्यात्। **यत्प्रत्यय इति**। 'दण्डादिभ्यो यः' इति सूत्रपाठोऽनार्षः, किं तु 'दण्डादिभ्यः' इत्येव पाठः। तत्र [3]'शीर्षच्छेदाद्यच्च' इत्यतो यदनुवर्तते, न ठक्, चानुकृष्टत्वात्। **समासस्य** तृतीयासमासस्य, शेषषष्ठ्या समासासंभवात्। **कृदुत्तरेति**। [4]'गतिकारकोपपदात् कृत्' इत्यनेन। **आद्युदात्त इति**। [5]'यतोऽनावः' इत्यनेन। असिवधशब्दस्य दण्डादावपाठात्तद्धितोऽपि न संभवतीत्याह — **न चेति**॥

[३, २०२–२०३]

(रत्नप्रकाशः) [6]**अजन्तभूतपूर्वादिति**। इदं प्रौढिमात्रम्, आर्धधातुकेऽचि **च**, परत एव गुणलोपयोर्वान्तादेशस्य च विधानात्। तथा चाज्ग्रहणं स्पष्टार्थमित्येव सारम्। **यति जनेरिति**। [7]'जनिवध्योः' इति वृद्धिनिषेधात् ण्यत्यपि जन्यमिति सिद्धम्, तथापि [8]'यतोऽनावः' इत्याद्युदात्तार्थं यद्वक्तव्य इति भावः। **वधमर्हतीति**। दण्डादित्वाद्यदिति भावः। **समासो न प्राप्नोतीति**। लक्षणाभावादिति शेषः। **एवं स्वर इति**। [9]'तित् स्वरितम्' इति यतः स्वरितत्वं स्यादिति भावः। **इति चेष्यत इति**। कृदुत्तरपदप्रकृतिस्वरेण वध्यशब्द आद्युदात्त इति भावः। असिवधशब्दस्य दण्डादिषु पाठाभावाद्यन्न भवतीत्यन्यदेतत्॥

[३, २०२–२०३]

(नारायणीयम्) स्वरार्थमिति। आद्युदात्तार्थम्। ण्यति सत्यन्तस्वरितत्वादनुदात्तादित्वं स्यात्। [10]**तित् स्वरितमिति स्वर इति**। [11]'यतोऽनावः' इत्यत्र [12]'निष्ठा च द्व्यजनात्' इत्यतो द्व्यज्ग्रहणानुवर्तनादाद्युदात्तत्वाभावे तत् स्वरितत्वं प्रसज्येतेत्यर्थः। **वध्यशब्द आद्युदात्त इति**। [13]'यतोऽनावः' इत्यनेन समासात् पूर्वमाद्युदात्तत्वात्। असिवधशब्दात् प्रत्ययप्राप्तिमभ्युपगम्य स्वरदोषो भाष्ये कथितः। न तु प्रत्ययः प्राप्नोतीत्याह — **न चेति**॥

अजर्यं संगतम् ३.१.१०५.

[३, २०४–२०५]

(उद्द्योतनम्) नञ्पूर्वात् जीर्यतेः कर्तरि यन्निपात्यते संगतं चेत् कर्तृ। न जीर्यतीत्यजर्य-

---

[1] पा. सू. ६.१.१८५.
[2] प्रकृतेरनुदात्तं स्यात् — अ; प्रकृतेरादेरनुदात्तः स्यात् — लृ.
[3] पा. सू. ५.१.६५.
[4] पा. सू. ६.२.१३९.
[5] पा. सू. ६.१.२१३.
[6] भाष्ये 'अजन्तभूतपूर्वमात्रात्' इत्यत्र 'अजन्तभूतपूर्वात्' इति रत्नप्रकाशकृत्पाठ इति भाति।
[7] पा. सू. ७.३.३५.
[8] पा. सू. ६.१.२१३.
[9] पा. सू. ६.१.१८५.
[10] प्रदीपे 'तित् स्वरितमिति स्वरितः प्रसज्येत' इत्यत्र 'तित् स्वरितमिति स्वरः प्रसज्येत' इति पाठोऽभिमत इति भाति।
[11] पा. सू. ६.१.२१३.
[12] पा. सू. ६.१.२०५.
[13] पा. सू. ६.१.२१३.

मार्यसंगतम्। संगतं किम्। अजरः कम्बलः। प्रत्युदाहरणस्य स्पष्टत्वात् प्रश्नायोगः, अत आह — **तयोरेवेति**। तथा सति किं स्यात्, अत आह — [1]**अजर्यं संगतेनेति**। प्राप्नोतीत्यन्वयः। इष्टापत्तिं [2]निराह — **कर्तरि चेति**। तदेवाभिनयति — **अजर्यमिति**। अनेन कथं शङ्काशय-निरासः, अत आह — **कर्तर्ययमिति**। प्रत्युदाहरणेन कथं कर्तरि प्रत्यय इति लभ्यते, अत आह — **तत इति**। **द्व्यङ्गेति**। भावे प्रत्यये भाव इत्यस्य संगतमित्यस्य चेदं प्रत्युदाहरणं स्यात्। न च तद्युक्तम्, संगतमित्यस्य प्रत्युदाहरणप्रश्ने तन्मात्रस्यैव वक्तव्यत्वादिति भावः। **न भावसाधन इति** भाष्यम्। 'कम्बलस्याजरः' इत्येवम्। तथा चाजर्यमिति भावे भविष्यतीत्यर्थः। 'गत्यर्था-नाम्' इति भाष्यदर्शनात् 'संगतम्' इति कर्तरि क्तः, तदर्थे निपात्यमानमजर्यमपि कर्तरि भविष्य-तीति भ्रमं [2]निरसितुमाह — **यद्यपीति**। नन्वकर्मकस्याप्युपसर्गवशात् सकर्मकत्वमनुभवतीत्यादि-वत्, अतः कथमकर्मकत्वम्, अत आह — **सोपसर्गस्येति**। अकर्मकाणामपि कालादिकर्मसद्भावात् कथमकर्मकत्वम्, अत आह — **द्रव्येति**। विशेष[3]निषेधे हेतुः — **कालादिनेति**। [4]**वैयधिकरण्यमिति**। 'अजर्यं संगतेन' इत्येवमित्यर्थः। हृषेर्निष्ठायामिड् वा स्यात् लोमसु कर्तृषु। हृष्टानि हृषितानि वा लोमानि। तत्र कथं [5]वैयधिकरण्येन विकल्पः, अत आह — [6]**तथा चेति**। भावे निष्ठायामपि लोम्नां [7]कर्तृत्वाविशेषाद् भावे निष्ठायामपीड्विकल्प इत्यर्थः। नन्वनेन भावे प्रत्यय इति प्रतीयते। स च नाङ्गीक्रियते, अत आह — **तस्मादिति**॥

[३, २०४–२०५]

(रत्नप्रकाशः) न जीर्यतीत्यजर्यमिति कर्तरि यन्निपात्यते। तच्च कर्तृ संगतमेव चेत्। तमर्थ-मविद्वान् कृत्यसंज्ञाप्रकरणपाठाद् भावकर्मणोरेव [8]यत् प्राप्नोतीति मन्यमानः पृच्छति — **संगतमि-तीति**। अस्येति शेषः। **अजरः कम्बल इति**। अत्र कम्बलः कर्तेति जः पचाद्यज् भवति। अजरितेति तु तृच्। **न भावसाधन इति**। जीर्यतेरकर्मकत्वेन कर्मणि यतोऽसंभवान्न [9]'कर्म-साधनः' इत्युक्तम्। [10]यक्षानुरूपबलिन्यायेनाह — **एवं तर्हीति**। **तेन योगादिति**। कर्तृक्तान्तेन संगतशब्देन योगादित्यर्थः। शङ्कते — **गत्यर्थानां वा इति**। **कर्मण्यपीति**। अपिशब्दाद् भावेऽ-पीत्यर्थः। तथा च संगतशब्दसाहचर्यात् 'अजर्यम्' इति कर्तर्येवेति निर्ज्ञातुं न शक्यते। किं च संगतमिति नपुंसकनिर्देशाद् भावक्तान्तमेवाश्रयणीयमिति कृत्वापि तेन तन्निर्णयो नेति भावः। **संगतग्रहणमिति**। अजर्यशब्दसामानाधिकरण्येन भावक्तान्तसंगतशब्दोपादानसामर्थ्यात् कर्तर्येव यत्प्रत्ययो निपातित इति ज्ञायत इति भावः। **कर्तृविशेषणमिति**। अजर्यमिति भाव एव भवतु संगतं चेत् कर्तृ, इति कर्तृविशेषणं संगतग्रहणं स्यादिति मन्यते। कर्तृ[11]विशेषसमर्पकपदाभावेऽपि कर्तृविशेषणतायां दृष्टान्तमाह — **तद्यथेति**। संभवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति कर्तर्येव स न्याय्य इति स्पष्टमेव ज्ञातुं शक्यत इति समाधानमुपेक्षितम्॥

---

[1] अजर्यमिति संगतेनेति — अ, ऋ, लृ.
[2] निराह — अ.
[3] निषेधहेतुः — अ.
[4] सामानाधिकरण्यमिति — ऋ, लृ.
[5] वैयधिकरण्यविकल्पः — अ.
[6] यथेति — अ, ऋ, लृ.
[7] कर्तृत्वाविशेषात् — लृ.
[8] तत् — ब.
[9] भावसाधन इत्यस्य स्थाने कर्मसाधनं इति नोक्तमित्यर्थः।
[10] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[11] कर्तृवाचकपदाभावेऽपीत्यर्थः। अत्र 'विशेष्य-समर्पक' इति युक्तं भाति।

[३, २०४–२०५]

(**नारायणीयम्**) विचारपरे भाष्ये प्रत्युदाहरणप्रश्नोत्तरयोरसंगतिमाशङ्क्याशयं दर्शयति — '**तयोरेवेति वचनादिति**। **अतः पृच्छतीति**। प्रत्युदाहरणे प्रदर्शिते तत एवाजर्यशब्दो विज्ञास्यत इत्याशयेन पृच्छतीत्यर्थः। अत एवाह — **कर्तरीति**। **कर्तैवेति**। पचाद्यचा तृचा च कर्तुः प्रदर्शनात्। 'गत्यर्थानां क्तः कर्तरि' [1]इत्यनेन संगतमिति कर्तरि क्तः, तदर्थे च निपात्यमानमजर्यमित्यपि कर्तरि भविष्यतीत्युक्तमिति यो भ्राम्येत् तं प्रत्याह — **यद्यपीति**। **सोपसर्गस्येति**। [2]अन्वाद्युपसर्गयुक्तस्यार्थान्तरवृत्तित्वात् सकर्मकत्वम्। अत एव [3]'गत्यर्थ'सूत्रे जीर्यतिग्रहणं कृतम्। **कालादिना तु सर्वस्यैवेति**। तत्रासंभवाद्विशेषणमनुपपन्नं स्यात्। **न हि गमेरिति**। अजरणसंगमनयोरत्यन्तभेदात्। **वैयधिकरण्यमिति**। अजर्यमित्येतद् भावे साधु भवति, यदि संगतं कर्तृ भवतीत्येवमन्वयः स्यात्। **वैयधिकरण्येऽपीति**। अन्यथा 'हृष्टानि लोमानि, हृषितानि लोमानि' इत्यत्रैव स्यात्। **सामानाधिकरण्यत्यागेनेति**। ततश्च संगतवाच्यजर्यशब्दः साधुर्भवतीति संबन्धे सत्यजरणसंगमनयोः सामानाधिकरण्ययोगात्[4] सामर्थ्यादजरणकर्तरि साधुत्वं विज्ञायत इत्यर्थः। **निपातनाद्वेति**। भावे प्राप्ते कर्तरि यथा स्यादित्येवमर्थं निपातनमित्यर्थः॥

वदः सुपि क्यप् च ३.१.१०६.

[३, २०५]

(**उद्द्योतनम्**) **एवमादौ** अधिकारविच्छेदाद्यभावयुक्ते 'वदः सुपि क्यप् च' इत्येवमादौ॥

[३, २०५]

(**रत्नप्रकाशः**) [5]'गदमद' इति सूत्रे कृतमप्यनुपसर्गग्रहणम् [6]'अवद्य' इत्यादिपञ्चसूत्र्या व्यवहितत्वादत्र न संबध्यत इति मन्यमान आह — **वदः सुप्यनुपसर्गग्रहणमिति**। **अनुपसर्ग इति वर्तत इति**। मण्डूकप्लुत्या तदनुवृत्तिराश्रयिष्यत इति भावः। मण्डूकप्लुतिलब्धार्थस्यैवान्वाख्यानं तद्वचनमित्याह — **एवं तर्हीति**। उक्तपञ्चसूत्र्या व्यवहितं तदित्यजानन् कश्चिदाह — **नैतदन्वाख्येयमिति**। तिष्ठतु [7]सान्न्यासिकं तदित्युपेक्षितं भगवता॥

[३, २०५]

(**नारायणीयम्**) '**यत्राधिकारस्येति**[8]। यथा [9]'धान्यानां भवने' इत्यतः खञ्ग्रहणं [10]'व्रीहिशाल्यो-

---

[1] इत्यनेन भाष्येणेत्यर्थः। अस्य 'उक्तमिति' इत्यनेनान्वयः।
[2] अत्राप्युपसर्गप्रयुक्तस्यार्थान्तर — ङ.
[3] पा. सू. ३.४.७२.
[4] अजर्यशब्दे यत्प्रत्ययस्य कर्त्रर्थकत्व एव तयोः सामानाधिकरण्यं युज्यते, अन्यथा नेति भावः।
[5] पा. सू. ३.१.१००.
[6] पा. सू. ३.१.१०१.
[7] संन्यसनं संस्थापनं तदेवास्य प्रयोजनं न तदतिरिक्तमित्याशयः।
[8] यस्याधिकारस्येति — घ.
[9] पा. सू. ५.२.१.
[10] पा. सू. ५.२.२.

ढक्' इत्यादौ विच्छिन्नमपि [1]''विभाषा तिल' इत्यत्रानुवर्तते। **अवध्यपरिज्ञानमिति**। यथा — 'अलुगधिकारः प्रागानङः, उत्तरपदाधिकारः प्रागङ्गाधिकारात्' इत्यादि। **सिंहावलोकितन्यायेति**। [2]'प्राचां ष्फ तद्धितः' इत्यत्रोत्तरसूत्रात् सर्वत्रेत्याकृष्यते बाधकबाधनार्थम्। **एवमादाविति**। अधिकारविच्छेदाद्यभावयुक्ते विषय इत्यर्थः॥

भुवो भावे ३.१.१०७.

[३, २०५–२०६]

(उद्द्योतनम्) प्राप्त्यर्थ इति। 'भू प्राप्तावात्मनेपदी' इति चुरादौ पठितः। **प्राथम्यादिति**। धातुपाठे 'भू सत्तायाम्' इत्यस्य प्राथम्यादित्यर्थः॥

[३, २०५–२०६]

(रत्नप्रकाशः) [3]**भवतिरकर्मक इति**। [4]''व्याख्यानतो विशेषप्रतिपत्तिः' इति 'भू सत्तायाम्' इति पठितस्यैवात्र ग्रहणम्, न तु 'भू प्राप्तौ' इति पठितस्य चौरादिकस्येति भावः। **उत्तरार्थमिति**। वस्तुतस्तु कालादिकर्मव्यावृत्त्यर्थमत्राप्युपयुज्यते भावग्रहणम्। अनभिधानाश्रयणं त्वगतिकगतिः॥

[३, २०५–२०६]

(नारायणीयम्) ननु प्राप्त्यर्थ इति। 'भू प्राप्तौ' इति पाठात्। **प्राथम्यादिति**। धातुपाठे प्रथमं पठितत्वात् प्रथमातिक्रमे कारणाभावात् 'भू सत्तायाम्' इत्यस्यैवात्र ग्रहणं युक्तमित्यर्थः॥

हनस्त च ३.१.१०८.

[३, २०६]

(उद्द्योतनम्) 'दस्युहत्याय' इति न लोकप्रयोग इत्याह — **छन्दस्येवेति**॥

[३, २०६]

(रत्नप्रकाशः) क्यपः पित्त्वादनुदात्तत्वे प्राप्त आह — **हनस्तश्चिदिति**। **दस्युहत्यायेति**। दस्युहत्यशब्दो नपुंसकश्छन्दस्येव ज्ञेय इत्याहुः॥

---

[1] पा. सू. ५.२.४.
[2] पा. सू. ४.१.१७.
[3] भाष्ये 'भवतिरयमकर्मकः' इत्यत्र 'भवतिरकर्मकः' इति निर्णयसागरमुद्रिते पाठः।
[4] परिभाषा १.

[३, २०६]

(नारायणीयम्) भाषायां त्विति। स्वभावतोऽस्य क्यबन्तस्य स्त्रीलिङ्गत्वात्। अत एव भाष्ये 'श्वहत्या वर्तते' इत्युदाहृतम्॥

एतिस्तुशास्वृदृजुषः क्यप् ३.१.१०९.

[३–२०६–२०७]

(उद्द्योतनम्) नन्वनेन [1]'पूर्वस्य कथं चित्त्वं ज्ञायते,' अत आह — **पूर्वस्मादिति। चिद् भवतीति।** इष्टवैलक्षण्यस्य द्योतनादिति भावः। 'कर्तव्यम्' इति भाष्यस्य व्याख्यातव्यमित्यर्थमभिप्रेत्य व्याख्याने लिङ्गमाह — **ईडवन्देति।** ण्यदन्तानामेषामाद्युदात्तः। **एतत्** अत्र वृञ्ग्रहणमित्येतत्। स्वरसूत्र एव वृञ्ग्रहणम्, [2]अत्र वृङ इति तेन स्यात्, अत आह — **तत्र हीति। आद्युदात्तमिति।** क्यपोऽनुदात्तत्वाद्धातुस्वरेणेत्यर्थः। **नप्** नपुंसकम्, अनिसन्तस्य नपुंसकस्यादिरुदात्त इति फिट्सूत्रार्थः। ननु पदानां नित्यत्वात् कथं पदकाराधीनत्वम्, अत आह — **संहिताया इति।** पौरुषेयत्वे हेतुः — **तथा चेति।** तदुदाहरति — **तदुक्तमिति।** तत्रार्थनिश्चयाभावमाह — **हरिद्रूरिति॥**

[३, २०६–२०७]

(रत्नप्रकाशः) [3]ओरावश्यक इति। ण्यदिति शेषः। **अथवेति।** पुनः क्यब्ग्रहणसामर्थ्यात् पूर्वसूत्रे क्यपः पित्त्वं नाश्रीयते, परशब्दस्येष्टवाचकत्वादेव पूर्वविप्रतिषेधा न पठनीया इति प्रागेवोक्तमिति भावः। **वृञ्ग्रहणं कर्तव्यमिति।** वृशब्देन वृञ एव ग्रहणं न वृङ इति व्याख्येयमिति भावः। [4]"ईडवन्दवृशंसदुहां ण्यतः" इति वृधातुप्रकृतिकण्यदन्तस्याद्युदात्तत्वविधानेन त्वियं व्यवस्था न सिध्यति, विनिगमनाविरहेणोभाभ्यां क्यप् ण्यच्चेत्येतावन्मात्रस्यैवात्र तत्र च वृग्रहणात् सिद्धेः। **अञ्जेश्चोपसंख्यानमिति।** क्यप इति शेषः। [5]**तस्मात् क्यबेवेति।** ण्यति सत्यपि [6]"नब्विषयस्यानिसन्तस्य" इत्याद्युदात्तमेव भवतीति भावः। **यथालक्षणं पदं कर्तव्यमिति।** तथा चावग्रहस्तत्र कर्तव्य एवेति भावः॥

[३, २०६–२०७]

(नारायणीयम्) कथं पुनः 'हनस्तश्चित्' इत्यस्यात्रत्येन क्यब्ग्रहणेनावक्तव्यत्वमुपपद्यत इत्यत्राह

---

[1] पूर्वस्य चित्संज्ञा ज्ञायते — अ.

[2] अत्र वृङ इति न स्यात् — अ; अत्र वृञ इति न स्यात् — ऋ.

[3] भाष्ये 'किं चान्यत् प्राप्नोति। ण्यत्।' इति दृश्यते। अत्र 'ण्यत्' इत्यस्य स्थाने 'ओरावश्यके' इति रत्नप्रकाशकृत्पाठ इति भाति।

[4] पा. सू. ६.१.२१४.

[5] भाष्ये 'तस्मात् क्यबेषः' इत्यस्य स्थाने 'तस्मात् क्यबेवैषः' इति निर्णयसागरमुद्रिते पाठः।

[6] फिट्सूत्रम् २६.

— **पूर्वस्मात् क्यपोऽस्य वैलक्षण्येति**। वैलक्षण्यं च लक्ष्यानुसारेणेदमेवेत्याह — **तेनेति**। भाष्ये 'कर्तव्यम्' इत्यस्य व्याख्यातव्यमित्यर्थमभिप्रेत्य व्याख्याने लिङ्गमाह — **ईडवन्देति**। ननु [1]'ण्यतः' इति वचनाण्ण्यदन्तो वार्यशब्दोऽस्तीत्येतावदेवावसीयते[2]। कुतस्तत्र वृङो ण्यदन्तस्य ग्रहणमिति ज्ञायत इत्यत्राह — **तत्र हीति**। **वृणातिरिति**। 'वृङ संभक्तौ' इति क्रैयादिकः। **क्यपि सतीति**। क्यपः पित्त्वादनुदात्तत्वाद्धातुस्वरेणाद्युदात्तत्वात्। **नब्विषयस्येति**। नपुंसकविषयस्येत्यर्थः। आज्यशब्दो हि नपुंसकलिङ्गः। 'आज्यमसि' इत्यादौ पदविच्छेदस्य पौरुषेयत्वं पदकारैरेवाङ्गीकृतमित्याह — **तथा चेति**। **अर्थनिश्चयाभाव इति**। उभयथा मन्त्रस्य योजनीयत्वात्। तथा [3]'आशुशुक्षणिः' इत्यग्निर्मनुष्यो वाभिधेयः। तत्राग्निपक्षे आशु शुचा दीप्त्या क्षणिता हिंसिता तमसामिति वा, सनिता[4]संभक्ता वा सर्वस्य पाकदाहप्रकाशनादेः स्वव्यापारस्येति विग्रहः। मनुष्यपक्षे आङ्पूर्वस्य शुचेर्दीप्तिकर्मणः सनि रूपम्। अतः पूर्वपदे संदेहान्नावगृह्णन्ति। तथा [4]'अरुणो मासकृत्' इति मन्त्रे 'मा, सकृत्' इति पदकारेण विभक्तमपि [5]यास्काचार्यो नेच्छति, ऐकपद्यमाश्रित्य तेन व्याख्याततत्वात् — मासकृत् मासानां चार्धमासानां च कर्ता चन्द्रमा इति। तस्मात् पदविभागस्य पौरुषेयत्वादवग्रहे नादर इति स्थितम्॥

ई च खनः ३.१.१११.

[३, २०७–२०८]

(उद्द्योतनम्) भाष्ये **पदान्तपदाद्योरिति**। अन्यथा [6]'वृक्षे छत्रम्' इत्यत्रैकादेशस्यासिद्धत्वाद्ध्रस्वाश्रयो नित्यस्तुक् स्यात्। 'वृक्षे' इत्यत्र सप्तम्येकादेशः पदान्तपदाद्योर्न भवतीत्यसिद्धत्वाभावात् [7]'दीर्घात्' [8]'पदान्ताद्वा' इति तुग्विकल्पसिद्धिरिति [9]'षत्वतुकोरसिद्धः' इत्यत्र [10]'वक्ष्यते। अत्र वृत्तिकारेण [11]'इकारद्वयस्य सवर्णदीर्घोऽयम्। द्वितीय इकारः [12]'ये विभाषा' इति पाक्षिकात्वबाधनार्थः'' इत्युक्तम्। तदुपन्यस्य दूषयति — **केचिदिति**। [13]न्यासेन यकाराश्रयमात्वमन्तरङ्गं क्यबाश्रयमीत्वं बहिरङ्गमिति वृत्तेरभिप्राय उक्तः, तं निरस्यति — **क्यप्संनियोगेनेति**। [14]**विप्रतिषेधाभावादिति**। अन्तरङ्गबहिरङ्गयोर्विप्रतिषेधायोगात्[15]। न च [16]विप्रतिषेधात् प्रागात्वाभावेऽपीत्वे कृते प्राप्नोतीति वाच्यम्, [17]'विड्वनोः' इत्यतोऽनुनासिकस्येत्यनुवृत्त्या [18]'ये विभाषा' इत्यनुनासिकस्यात्वविधानात्। न च स्थानिवद्भावादिकारस्यानुनासिकत्वम्, अल्विधित्वात्॥

---

[1] पा. सू. ६.१.२१४.
[2] इत्येतदेवावसीयते — ङ.
[3] निरुक्ते षष्ठाध्यायप्रथमपादे स्पष्टम्।
[4] ऋ. सं. १.१०५.१८.
[5] निरुक्ते पञ्चमाध्यायचतुर्थपादे।
[6] पक्षे — अ.
[7] पा. सू. ६.१.७५.
[8] पा. सू. ६.१.७६.
[9] पा. सू. ६.१.८६.
[10] भाष्य इति शेषः।
[11] अर्थानुवादोऽयम्॥ इकारप्रत्ययस्य — अ; इकारत्रयस्य — ऋ, लृ.
[12] पा. सू. ६.४.४३.
[13] न्यासकृतेत्यर्थः।
[14] विप्रतिषेधादिति — अ, ऋ, लृ.
[15] विप्रतिषेधासंभवात् — अ.
[16] विप्रतिषेधहेतुकं यदात्वं प्राग्भावि, तस्याभावेऽपीत्यर्थः।
[17] पा. सू. ६.४.४१.
[18] पा. सू. ६.४.४३.

[३, २०७–२०८]

(रत्नप्रकाशः) पदान्तपदाद्योरिति। तत्रैवैवं वक्ष्यति भाष्यकारः, आवश्यकं च तदिति भावः। **तस्मादि च खन इत्येव वक्तव्यमिति।** यत्तु "'ई च खनः' इति दीर्घनिर्देशेन द्वितीय इकारः [1]'ये विभाषा' इति परस्यात्वविकल्पस्य बाधनार्थो विधीयते" इति। तत्तुच्छम्, प्रत्ययसंनियोगशिष्टस्य इत्वस्यान्तरङ्गत्वेनैव परस्यात्वस्य तेन बाधसंभवादित्याहुः। वस्तुतस्त्वात्वबाधनार्थं द्वितीय इकारो विधेय एव, संनियोगशिष्टेत्वोत्तरं पाक्षिकात्वस्य दुर्वारत्वात्। न चेत्वानर्थक्यम्, आत्वाभावपक्षे तस्य चारितार्थ्यात्। न च प्रकृतभाष्यानुसारेण 'खायम्' इत्यपि रूपान्तरमिष्टमिति वाच्यम्, दीर्घनिर्देशं विनापि 'खेयम्' इति सिद्धमित्येतावन्मात्रेण तस्य भाष्यस्योपक्षीणत्वेन तद्बलेन रूपान्तराश्रयणानौचित्यात्॥

[३, २०७–२०८]

(नारायणीयम्) परत्वात् प्राप्तस्येति। आत्वस्यावकाशः — खायते, खन्यते। अस्य त्वात्वाभावपक्षेऽवकाशः। आत्वपक्षे उभयप्रसङ्गे परत्वादात्वं स्यात्। पुनर्विधानात्तु[2] तद् बाध्यत इति वृत्तिकारा आहुरित्यर्थः। **यकारादावुत्पन्न इति।** 'ये' इति परसप्तमीविज्ञानादाङ्गत्वादात्वस्य बहिरङ्गत्वमित्याह — **आङ्गस्येति।** न चेत्वे [3]कृते प्राप्नोतीति वाच्यम्, [4]अनुनासिकस्य तद्विधानात्। न च स्थानिवद्भावः, अल्विधित्वात्॥

भृञोऽसंज्ञायाम् ३.१.११२.

[३, २०८–२१०]

(उद्द्योतनम्) इष्टमिति। [5]'संज्ञायां समज' इति संज्ञायामपि क्यब्विधानादित्यर्थः। कस्य संज्ञेयम्, अत आह — **गृहिण्या इति।** ननु सूत्रान्तरप्राप्तस्याप्ययं [6]निषेधोऽस्तु, कथमानर्थक्यम्, अत आह — **भृञ इति।** [7]**लक्षणान्तरप्राप्तस्यापीति।** न चैवं लक्षणान्तरे भृञः क्यब्विधिवैयर्थ्यम्, विहितप्रतिषेधाद्विकल्पसंभवादिति भावः। षष्ठीसमासस्य जघन्यत्वादस्त्रीशब्दस्य संज्ञाशब्देन समानाधिकरणसमासमभिप्रेत्य सामानाधिकरण्यसिद्धये संज्ञाशब्दस्य कर्मसाधनत्वमाह — **संज्ञायत इति।** स्त्रीभिन्नस्य संज्ञात्वे प्रतिषेध इत्यर्थः। **लौकिकी त्विति।** [8]"स्त्रियां क्तिन्' इत्यत्र न लौकिक्या ग्रहणम्। तेन तदधिकारविहितः [9]क्यबलौकिक्यां [10]भवति। लौकिक्यां तु प्रतिषेधान्न भवति। तेन गृहिण्यां भार्येति ण्यत् सिद्ध्यतीत्यर्थः। भाष्ये **कर्मसाधनश्चाय-**

---

[1] पा. सू. ६.४.४३.
[2] तुशब्दो नास्ति — ङ.
[3] 'कृते' इति नास्ति — ङ.
[4] अननुनासिकस्य — घ, ङ.
[5] पा. सू. ३.३.९९.
[6] दोषोऽस्तु — ऋ.
[7] 'लक्षणान्तरेण प्राप्तस्यापि' इति प्रदीपे दृश्यते। 'लक्षणान्तरप्राप्तस्यापि' इति समस्ततयान्नंभट्टपाठ इति प्रतीयते।
[8] पा. सू. ३.३.९४.
[9] क्यप् लौकिक्यामपि — अ, ऋ.
[10] 'भवति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — लृ.

मिति। गृहिण्यां भार्याशब्दः। संज्ञाशब्दस्य कर्मसाधनत्वेऽभिधेय [पर] त्वमेव स्यात्, अत आह — **संज्ञाशब्द इति**। [1]'घञर्थे कविधानम्' इति संज्ञाशब्दः कप्रत्ययान्त इति भावकर्मार्थत्वसंभवः। **सूत्रान्तरेण** [2]'संज्ञायां समज' इत्यनेन। **अङविषय इति**। [3]'षिद्भिदादिभ्योऽङ' इति वचनात्॥

[३, २०८–२१०]

(रत्नप्रकाशः) असंज्ञायामित्यंशदूषणपरं वार्तिकमवतारयति — [4]**असंज्ञाग्रहणमिति**। **भार्येति**। जायायाः संज्ञेयम्। **अन्येन विहितत्वादिति**। अत एवायं निषेधस्तस्य नेति व्यर्थतास्येति भावः। **प्रतिषेध इदानीमिति**। अत्र प्रतिषेधसामर्थ्यात् [5]'संज्ञायां समज' इति सूत्रे संज्ञा हणस्य धात्वन्तरे चरितार्थत्वाच्चासंज्ञायामेव सूत्रान्तरेणापि क्यब् भविष्यतीति मन्यते। **अस्त्रीसंज्ञाप्रतिषेधार्थ इति**। अस्त्रीलिङ्गो यः संज्ञाशब्दः सः 'असंज्ञायाम्' इति प्रतिषेधस्य प्रयोजकमित्यर्थः। एतेन 'संज्ञायत इति कर्मसाधनोऽत्र संज्ञाशब्दः' इति निरस्तम्। संज्ञायतेऽनेनेति करणसाधनताया एव तत्रौचित्यात्। **ततो न स्त्रियामिति**। अत्र स्त्रीशब्देन लोकप्रसिद्धा स्त्री गृह्यते, न तु स्त्रीलिङ्गसामान्यम्। तेन 'भृत्या' इति भावे क्यब् भवत्येव। [6]**भाव इति तत्र वर्तत इति**। [7]'व्रजयजोर्भावे' इत्यत इति शेषः। तथा च भार्येति कर्मणि ण्यदुत्पत्तौ न काप्यनुपपत्तिरिति भावः। एवं च प्रकृतनिषेधसार्थक्यं स्पष्टमेव, कर्मणि 'भृत्या' इति रूपस्य भार्यायां तेन वारणात्। **य एत इति**। प्रत्यया इति शेषः। **संज्ञायामिति**। संज्ञाशब्दार्थे इति शेषः। एतेन 'संज्ञाशब्दः कर्मसाधनो न गृह्यते, किं तु भावसाधनः। तेन प्रत्ययान्तेन यदि रूढिर्गम्येत ततः प्रत्ययः' इति निरस्तम्। लोकप्रसिद्धसंज्ञाशब्दस्य करणव्युत्पत्तेर्न्याय्यत्वेन कर्मव्युत्पन्नत्वं कल्पयित्वा तन्निराकरणानौचित्यात्। संज्ञाशब्दस्य भावसाधनस्य रूढिपरत्वे मानाभावाच्च। **संज्ञा गम्यत इति**। संज्ञात्वं चेद् गम्यत इत्यर्थः। तथा च भृत्याशब्दस्य [8]'यस्मिन्नर्थे संज्ञात्वं गम्यते तत्रैव साधुत्वम्, न तु जायायामिति तत्र 'भार्या' इति ण्यत् निर्बाध इति भावः। उक्त एवार्थः केनचिदनुष्टुभा संगृहीत इत्याह — **अपर आहेति**। समाधानान्तरमाह — **अथवेति**। **समश्च बहुलमिति**। असंज्ञायामेवात्र क्यब् विधीयते॥

[३, २०८–२१०]

(नारायणीयम्) क्रियमाणेऽपि प्रतिषेध इति। [9]न तु तेन विनेष्टं सिध्यतीति। भार्याशब्दस्य संज्ञात्वात् प्रत्युदाहरणोपपत्तिं दर्शयति — **गृहिण्या इयमिति**। [10]अभ्रियमाणापि गृहिणी

---

[1] का. वा. ३.३.५८–४.
[2] पा. सू. ३.३.९९.
[3] पा. सू. ३.३.१०४.
[4] भाष्ये 'असंज्ञायामिति किमर्थम्' इत्यत्र 'असंज्ञाग्रहणं किमर्थम्' इति पाठो निर्णयसागरमुद्रितेऽधो निरदेशि।
[5] पा. सू. ३.३.९९.
[6] भाष्ये 'भाव इति तत्रानुवर्तते' इत्यत्र 'भाव इति तत्र वर्तते' इति पाठो रत्नप्रकाशकृदभिमतः।
[7] पा. सू. ३.३.९८.
[8] तस्मिन्नर्थे — ब.
[9] तदा तु — ङ.
[10] आह्रियमाणापि — घ; आद्रियमाणापि — ङ.

भार्येत्युच्यत इति रूढिरेव प्रवृत्तिनिमित्तमित्यर्थः। ननु प्राप्तिमात्रस्यायं प्रतिषेधः स्यादिति, नेत्याह — **भृञ इति प्राप्तेरिति**। प्रतिषेधस्य कैमर्थक्यं भवतु, प्रकृते किं तेनायातमित्यत्राह — **प्रतिषेधविधानेति**। अस्त्रीशब्दस्य संज्ञाशब्देन समानाधिकरणसमास इति सामानाधिकरण्य-सिद्धये कर्मणि संज्ञाशब्दव्युत्पत्तिं दर्शयति — **संज्ञायत इति**। [1]'आतश्चोपसर्गे' इति कर्मण्यङ्। ननु स्त्रियां भृञः क्यब्विधिः स्त्रियामेव तत्प्रतिषेध इति कथं युज्यत इत्यत्राह — [2]**स्त्रीशब्देन चेति**। [3]'स्त्रियां क्तिन्' इत्यत्र [4]शास्त्रीयं लिङ्गं गुणानामवस्थाविशेषलक्षणं गृह्यत इति तदधि-कारविहितः क्यबलौकिक्यां स्त्रियां भवति। लौकिक्यां तु स्तनकेशवत्यां गृहिण्यां प्रतिषेधान्न प्रवर्तत इति विषयविभागलाभ इत्यर्थः। 'संज्ञायाम्' इति कथमभिधेयसप्तमी न गृह्यत इत्यत्राह — **संज्ञाशब्द इति**। **प्रत्ययान्तेन यदि रूढिरिति**। प्रसिद्धिपरिग्रहार्थं संज्ञाग्रहणम्। ततश्च भृत्याशब्दस्य गृहिण्यां प्रसिद्ध्यभावात् प्रत्ययाभावः सिद्ध इत्याह — **न चेति**। श्लोकस्य पूर्वार्धं चोद्यप्रदर्शनपरत्वेन सोपस्कारं योजयति — **भार्या नामेति**। उत्तरार्धमुत्तरोक्तिपरत्वेन व्याचष्टे — **स्त्रीप्रकरण इति। अङ्विषय इति**। [5]'षिद्भिदादिभ्योऽङ्' इत्यङ्विषये क्वचित् क्तिन् भवति बहुलवचनादेव। न च वासरूपविधिरत्र भवति, [6]'अस्त्रियाम्' इति प्रतिषेधात्॥

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ३.१.११४.

[३, २१०]

(रत्नप्रकाशः) कर्तरीति। अनेन विशेषवचनेन [7]'तयोरेव' इत्यस्य बाधाद् भावकर्मणोर्नेति ज्ञेयम्। **कुप्यं संज्ञायामिति**। 'गुप गोपने' इत्यस्य गकारस्य कत्वं निपात्यते। **गोप्यमन्यदिति**। गोपनं गोपनकर्म वा॥

अमावस्यदन्यतरस्याम् ३.१.१२२.

[३, २११–२१२]

(उद्द्योतनम्) [8]ण्यत्यवृद्धिनिपातने स्वरभेदाभावादाह — **यत्प्रत्यय इति**। भाष्ये [9]'अमा-वास्याया वा' इत्यत्रामावस्याग्रहणं[10] न प्राप्नोतीत्युक्तम्। तत्र हेतुमाह — **शब्दान्तरत्वा-दिति**। तदेवाह — **अमावास्येति**। ननु यत्प्रत्ययस्यापि निपातनात् प्रधानस्येत्यतः को विशेषः, अत आह — **यत्प्रत्ययेति**। प्रकृतिप्रत्ययविभागं विना समुदायस्य निपातनमित्यर्थः। ननु [11]'श्रो-त्रियन्' इत्यत्र प्रकृतिप्रत्ययविभागाभावे [12]आद्युदात्तत्वासंभवाच्छन्दसः श्रोत्रभावः, अधीत इत्यर्थे

---

[1] पा. सू. ३.३.१०६.
[2] प्रदीपे 'स्त्रीशब्देनात्र' इत्यत्र 'स्त्रीशब्देन चात्र' इति पाठोऽभिमतः।
[3] पा. सू. ३.३.९४.
[4] शास्त्रीयलिङ्गं — ङ.
[5] पा. सू. ३.३.१०४.
[6] पा. सू. ३.१.९४.
[7] पा. सू. ३.४.७०.
[8] नित्यवृद्धि — अ, ऋ, लृ.
[9] पा. सू. ४.३.३०.
[10] अमावास्याग्रहणं — अ, ऋ, लृ.
[11] पा. सू. ५.२.८४.
[12] ञ्नित्यादिरित्यनेनेत्यर्थः।

घन् च निपात्यत इति युक्तम्। अत्र समुदायस्य तित्त्वेऽपि स्वरितत्वसिद्धेः 'यदि तर्हि' इत्यनेन प्रकृते किं दूषणमुच्यते, अत आह — **नन्विति।** **प्रत्ययग्रहणमिति।** अन्यथा 'किरति' इत्यत्रेकारस्य स्वरितत्वं स्यात्, [1]"ॠत इद्धातोः' इतीकारस्य [2]स्वरितत्वात्। स्थानिवद्भावेन धातुस्वर उदात्तत्वमेवेष्यते। एवंशब्दार्थमाह — **निरस्तेति।** द्विवचने बीजमाह — **वृद्धीति।** द्वयोरवृद्धिप्रसङ्गादाह — **एकतरस्येति।** **एकेति।** [3]'अमावास्याया वा' इति [4]"तत्र जातः' इत्यर्थे वुन्। पक्षे संधिवेलादित्वादण्। अमावास्यकः, आमावास्यः। एवम् अमावस्यकः, आमावस्यः। नन्वमावास्याग्रहणेन कथममावस्याग्रहणम्, रूपभेदात्, अत आह — **एकदेशेति।** तदेवाह — **तथा हीति॥**

[३, २११–२१२]

(रत्नप्रकाशः) कस्येति। समुदायस्य वा प्रत्ययस्य वेत्यर्थः। **प्रधानस्येति।** प्रत्ययस्येत्यर्थः। **एवं स्वर इति।** [5]"यतोऽनावः' इति वस्याशब्दस्याद्युदात्तत्वमित्यर्थः। **इति चेष्यत इति।** अन्तस्वरितत्वमिति शेषः। **न प्राप्नोतीति।** शब्दान्तरत्वादिति भावः। **निपातनस्येति।** प्रत्ययान्तस्येत्यर्थः। समुदायो हि निपात्यते। **एवंजातीयकानीति।** अप्रत्ययकान्यनुबन्धयुक्तानीत्यर्थः। **अमावसोरिति।** वृद्धिभावाभावकृतभेदाश्रयेण द्विवचनम्। **ण्यतोरिति।** ण्यदन्तयोरित्यर्थः। निर्धारणे षष्ठी। **अवृद्धितामिति।** एकस्येति शेषः। **एकवृत्तितेति।** [6]'अमावास्याया वा' [7]'अ च' इति विहिततद्धितभाक्त्वमुभयोः सिध्यतीति भावः॥

[३, २११–२१२]

(नारायणीयम्) यत्प्रत्ययो निपात्यत इति। तकारोच्चारणादनन्तरप्रकृतस्य क्यपस्तावद् ग्रहणं[8] न संभवति। तस्मात् परमप्रकृतस्य यत [9]एव निपातनमित्याशयः। **उत्तरपदमाद्युदात्तमिति।** कृदुत्तरपदप्रकृतिस्वरत्वेनेति शेषः। **शब्दान्तरत्वादिति।** [10]'अमावास्याया वा' इत्यत्रामावस्याशब्दस्य ग्रहणं न प्राप्नोति, शब्दान्तरत्वात्। एतदेवोपपादयति — **अमावास्येति।** **यत्प्रत्ययान्तत्वं नेति।** प्रकृतिप्रत्ययसमुदायो निपात्यते। तस्य च तकारोऽनुबन्ध इति भाष्यार्थः। नन्वस्मिन् पक्षेऽन्यत्र दोषकथनेनेह किमायातमित्याशङ्क्याशयमाह — **ननु तितीति।** नन्वेक एव ण्यन्निपात्यत इति द्विवचननिर्देशोऽनुपपन्न इत्यत आह — **वृद्धिभावेति।** [11]**एकस्येति शेष इति।** अमापूर्वयोर्वसोर्ण्यदन्तयोर्मध्ये एकस्य वृद्ध्यभावमहं निपातयामि। सूत्रकारायमाणस्य श्लोकवार्तिककारस्यैतद्वचनम्। **एका तद्धितवृत्तिरिति।** [12]'अमावास्याया वा' इत्यनेन॥

---

[1] पा. सू. ७.१.१००.
[2] तित्त्वेनेत्यादिः।
[3] पा. सू. ४.३.३०.
[4] पा. सू. ४.३.२५.
[5] पा. सू. ६.१.२१३.
[6] पा. सू. ४.३.३०.
[7] पा. सू. ४.३.३१.
[8] 'ग्रहणम्' इति नास्ति — घ.
[9] एवं निपातनम् — घ, ङ.
[10] पा. सू. ४.३.३०.
[11] प्रदीपे 'एकतरस्येति शेषः' इत्यत्र 'एकस्येति शेषः' इति पाठोऽभिमत इति प्रतीयते।
[12] पा. सू. ४.३.३०.

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ३.१.१२३.

[३, २१२–२१३]

(उद्द्योतनम्) कृतादेर्णत्वभ्रमं वारयति — **कृतशब्दस्येति**। कृतेराद्यन्तविपर्यय इत्यनेनैव सिद्धत्वात् 'कृताद्यर्थः' इत्यधिकम्, अत आह — **आद्यन्तयोरिति**। **न त्विति**। वर्णान्तररूपत्वेऽपि विपर्ययसंभवादित्यर्थः ॥

[३, २१२–२१३]

(रत्नप्रकाशः) आद्यन्तविपर्यय इति। आद्यन्तयोर्व्यञ्जनयोर्व्यत्यय इत्यर्थः। आद्यन्तयोर्व्यत्ययोऽस्मिञ्छास्त्रे न कुत्रचिदाश्रीयत इति शङ्कापनोदायावश्यमन्यार्थः स आश्रयणीय इत्याशयेनाह — **कृताद्यर्थ इति**। यद्यपि कृतधातुर्दार्ष्टान्तिको भवति, तथापि प्रत्ययभेदकृतभेदमाश्रित्य दृष्टान्तत्वेनाप्युपादानं युज्यत इत्याशयेनाह — **यथा कृतेरिति**। एतेन "कृतशब्दस्य धातोर्य आदिः ककारस्तत्प्रयोजनः। आदेरन्तत्वम्, अन्तस्य चादित्वं यथा स्यादित्यर्थः। आद्यन्तयोः परस्पररूपापत्तिर्न तु वर्णान्तररूपापत्तिरिति प्रदर्शनाय 'कृताद्यर्थः' इत्युक्तं भवति" इति निरस्तम्। कृतेराद्यन्तविपर्ययः कृतेराद्यन्तविपर्ययार्थः' इत्येवं [1]तद्व्याख्यानस्य पर्यवसितत्वेनासंबद्धप्रलापत्वात्। यथेत्यादिभाष्याननुगुणत्वाच्च ॥

[३, २१२–२१३]

(नारायणीयम्) कृतादीत्यादिशब्दोऽवयववचनः, न तु व्यवस्थावचन इत्याह — **कृतशब्दस्येति**। ननु 'आद्यन्तविपर्ययः' इत्येतावतैव विवक्षितार्थसिद्धेः किमर्थं 'कृताद्यर्थः' इत्यभिहितमित्यत्राह — **आद्यन्तयोरिति**। 'आद्यन्तविपर्ययः' इत्येतावत्युक्ते [2]आदेस्तकारः, अन्त्यस्य ककार इत्येतावदेव [न] प्रतीयत इति परस्पररूपापत्तिप्रतिपादनाय 'कृताद्यर्थः' इत्युक्तम्। परस्पररूपापत्तौ हि[3] तदर्थप्रतीतिः [4]स्फुटा भवतीति तदाश्रयणम् ॥

ओरावश्यके ३.१.१२५.

[३, २१३–२१४]

(उद्द्योतनम्) 'आवश्यके' इति स्वरूपग्रहणे 'अवश्य[5]लाव्यम्' इति न सिध्यति, अत आह —

---

[1] तद्व्याख्यानस्यापर्यवसितत्वेनासंबद्ध — ब.
[2] आदेशतकारः, अन्यस्य ककारः — ङ.
[3] हिशब्दो नास्ति — ङ.
[4] स्फुटीभवतीति — घ.
[5] वाच्यमिति — अ.

किमावश्यकार्थेति। [1]समस्तप्रयोगासंभवशङ्कां निराह — [2]**द्योतितेति।** [3]'विस्पष्टादीनि गुणवचनेषु'। गुणवचनेषु परतो विस्पष्टादीनि प्रकृतिस्वराणि। [4]'गतिरनन्तरः' इति विस्पष्टशब्द आद्युदात्तः। विस्पष्टादयः प्रवृत्तिनिमित्तविशेषणम्, न द्रव्यस्येति कर्मधारयाभावः। नन्वत्र पूर्वपदप्रकृतिस्वरः, 'अवश्य[5]लाव्यम्' इत्यत्रोत्तरपदप्रकृतिस्वर इति [6]वैषम्यात् कथं 'विस्पष्टादिवत्' इत्युक्तम्, अत आह — **यथेति।** मयूरव्यंसकादेराकृतिगणत्वाद् विस्पष्टकटुकादेरवश्यलाव्यादेश्च समासः। [7]समासमात्रे वा दृष्टान्तः, [8]न तु स्वरे। प्रकृतिस्वरत्वमात्रे वा दृष्टान्तः। तच्च पूर्वपदस्योत्तरपदस्य वेति विशेषोऽनादरणीयः। **प्रकृतिस्वरः** [9]'विस्पष्टादीनि' इत्यनेन। 'अवश्यलाव्यम्' इत्यादौ [10]'लुम्पेदवश्यमः' [11]इत्यन्त्यलोपः। **निपातनादिति।** यद्यपि तत्र पाठो नास्ति, तथाप्युत्तरपदस्य प्रकृतिस्वरनिपातनार्थं तत्र पाठः कर्तव्य इत्यर्थः। [12]'तित् स्वरितम्' इति [13]'लाव्यम्' इत्यन्तस्वरितम्। अवश्यं भाव इत्यर्थे मनोज्ञादित्वाद् वुञ्। [14]'अव्ययानां भमात्रे टिलोपः'। तत्र च 'आवश्यके' इति सौत्रनिर्देश एव ज्ञापकः॥

[३, २१३–२१४]

(**रत्नप्रकाशः**) वार्तिके अवतारयति — **कथमिदमिति।** **आवश्यक उपपद इति।** आवश्यकवाचक उपपद इत्यर्थः। तेन 'अवश्यलाव्यम्' इत्युत्तरग्रन्थ उपपन्नो भवति। **विस्पष्टादिवदिति।** विस्पष्टपट्वादयो हि समासा मयूरव्यंसकादेराकृतिगणत्वात् सिद्धाः। तत्र पट्वादिषु परतो विस्पष्टादेर्यथा पूर्वपदस्य वचनान्तरेण प्रकृतिस्वरो भवति, एवं मयूरव्यंसकादिषु [15]निपातनाद्वा [16]'गतिकारकोपपदात् कृत्' इत्यत्र कृदित्यस्यावृत्तिमाश्रित्य क्वचिदुत्तरपदस्य प्रकृतिस्वरो भवतीति [17]व्याख्यानाद्वा 'अवश्यलाव्यम्' इत्यादौ मयूरव्यंसकादित्वात् सिद्धे समासे उत्तरपदस्य प्रकृतिस्वरः सेत्स्यतीति भावः॥

---

[1] भाष्ये द्योत्य इति पक्षेऽवश्यलाव्यमित्यत्र स्वरसमासानुपपत्तिदोष उक्तः। तत्र ण्यतोक्तार्थत्वादवश्यशब्दप्रयोगो न संभवति, अथवा तत्प्रयोगे ण्यद्वा न संभवति। एवं सति कथमवश्यलाव्यशब्दाङ्गीकार इत्याशङ्क्य परिहारपरत्वेन 'द्वावपूपौ' इति प्रदीपोऽवतारित उद्द्योते। स एवार्थोऽत्रापि विवक्षित इति भाति। अत्र 'समस्त' इत्यत्र समुच्चितेत्यर्थोऽभिसंहितः स्यादिति भाति॥ समस्तप्रयोगसंभव — अ.

[2] प्रदीपे 'गतार्थस्यापि' इत्यत्र 'द्योतितार्थस्यापि' इति पाठोऽन्नंभट्टाभिमत इति भाति॥ द्योतित इति — अ.

[3] पा. सू. ६.२.२४.

[4] पा. सू. ६.२.४९.

[5] वाच्यमित्यत्र — अ.

[6] वैलक्षण्यात् — अ.

[7] समासमात्रदृष्टान्तः — अ.

[8] न तित्स्वरे — ऋ.

[9] पा. सू. ६.२.२४.

[10] लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि। समो वा हिततयोर्मांसस्य पचि युड्घञोः' इति श्लोको व्याकरणान्तरे पठित इति सर्वादिसूत्रव्याख्याने रत्नप्रकाशे उक्तम्।

[11] इत्यन्तलोपः — अ.

[12] पा. सू. ६.१.१८५.

[13] वाच्यमिति — अ.

[14] का. वा. ६.४.१४४–५.

[15] अस्य 'उत्तरपदस्य प्रकृतिस्वरः' इत्यनेनान्वयः।

[16] पा. सू. ६.२.१३९.

[17] उत्तरपदस्य प्रकृतिस्वर इत्यनेनास्यान्वयः।

[३, २१३–२१४]

(नारायणीयम्) किमावश्यकेति। आवश्यकशब्देन तद्वाची शब्द उपचाराद्युच्येत तदायं पक्षः। ननु द्योत्यपक्षे प्रत्ययेनैव तदर्थस्य द्योतितत्वादवश्यंशब्दस्य प्रयोगोऽनुपपन्न इत्यत आह — [१]**द्योतितार्थस्यापीति**। **क्वचिदिति**। [२]'अपूपौ द्वावानय' इत्यादौ। **यथा विस्पष्टकटुकमिति**। विस्पष्टादयो हि गुणमात्रस्य विशेषणानि, न द्रव्यस्य। कटुकादिशब्दैर्गुणवद्द्रव्यमभिधीयत इति समानाधिकरणसमासाभावान्मयूरव्यंसकादेराकृतिगणत्वात् समास आश्रीयते। ततो [३]'विस्पष्टादीनि गुणवचनेषु' इति पूर्वपदप्रकृतिस्वरो भवति, एवमिहापि समास उत्तरपदप्रकृतिस्वरश्च भविष्यतीत्यर्थः॥

आनाय्योऽनित्ये ३.१.१२७.

[३, २१५]

(उद्द्योतनम्) विध्यादिलिङोऽसंभवादाह — **संभावन इति**। [४]'संभावनेऽलमिति चेत्' इत्यनेन। घटादिष्वतिप्रसङ्गं निराह — **निपातनादिति**। ननु गार्हपत्यादेव दक्षिणाग्निरानीयत इति 'एकयोनौ' इति विशेषणं व्यर्थम्, अत आह — **यस्त्विति**। दक्षिणाग्नेर्योनिर्विकल्प्यते वैश्यकुलाद्वित्तवतो भ्राष्ट्राद् [५]गार्हपत्यादाहवनीयाद्वेति॥

[३, २१५]

(रत्नप्रकाशः) यथाश्रुतसूत्रेणानाय्यशब्दो घटादावतिप्रसक्त इति तद्वारणायाह — **दक्षिणाग्नाविति**। अयमर्थोऽनुष्टुबर्धेनोच्यते। **आनाय्योऽनित्य इति चेदिति**। घटादावतिप्रसङ्गादिति शेषः। **दक्षिणाग्नौ कृतं भवेदिति**। दक्षिणाग्नाविति वक्तुमुचितमिति भावः। दक्षिणाग्नौ च न सर्वत्र भवति, वैश्यकुलादेरानीते दक्षिणाग्नौ 'आनेयः' इत्यस्यैवेष्टत्वादित्याशयेनाह — **एकयोनौ त्विति**। आहवनीयेन सह एका योनिर्गार्हपत्यरूपा यस्य तस्मिन्नित्यर्थः॥

[३, २१५]

(नारायणीयम्) घटादिष्विति। वाक्यस्यापरिपूर्णत्वादध्याहारेण योजना कार्येत्यर्थः। **निपातनाद्धीति**। उक्तं च 'रूढयर्थं च निपातनम्' इति। दक्षिणाग्नावपि क्वचिदेवेष्यते न सर्वत्रेति प्रतिपादनाय [६]'एकयोनौ कृतं विद्यात्' इत्युक्तमिति व्याचष्टे — **यो गार्हपत्यादिति**। दक्षिणा-

---

[१] प्रदीपे 'गतार्थस्यापि' इत्यस्य स्थाने 'द्योतितार्थस्यापि' इति पाठोऽभिमत इति प्रतीयते।
[२] एतेन प्रदीपे 'द्वावपूपावित्यादौ' इति नास्तीति सूच्यते। मुद्रितपुस्तकेषु तु तद् दृश्यते।
[३] पा. सू. ६.२.२४.
[४] पा. सू. ३.३.१५४.
[५] 'गार्हपत्याद्वा' इत्यन्तमेव काशिकामाधवीयधातुवृत्तितत्त्वबोधिनीषूपलभ्यते।
[६] भाष्ये 'एकयोनौ तु तं विद्यात्' इत्यत्र 'एकयोनौ कृतं विद्यात्' इति पाठोऽभिमतः।

ग्नेर्ह्युत्पत्तिस्थानं विकल्प्यते — वैश्यकुलाद्वित्तवतो भ्राष्ट्राद् गार्हपत्याद्वा, इति। तत्र यो गार्हपत्यादानीयते स एवैकयोनिः, आहवनीयस्यापि तस्मादेवानयनात् तेन सहैकयोनित्वादिति तत्रैवानाय्यशब्दो निपात्यते, न दक्षिणाग्निमात्र इति। तदाह — **यस्त्विति**॥

अग्नौ परिचाय्योपचाय्यसमूह्याः ३.१.१३१.

[३, २१५–२१६]

(उद्द्योतनम्) ऊहेर्विग्रहेण कथं वह्यर्थत्वम्, क्व वा स विग्रहः, अत आह — **वहीति**। पशूनेवास्मै तत् समूहति, वहति प्रापयतीत्यर्थः॥

[३, २१५–२१६]

(रत्नप्रकाशः) ऊहेर्वहिसमानार्थकताया वेदे दृष्टत्वेन 'समूह्य' इति निपातनं व्यर्थम्, ऊहेरौत्सर्गिकेण ण्यतैव तत्सिद्धेरित्याह — **समूह्येत्यनर्थकमिति**॥

[३, २१५–२१६]

(नारायणीयम्) ऊहिना विग्रहो निर्वचनम्, तस्माद्धेतोरिति वार्तिकार्थं दर्शयति — **वहिसमानार्थेनेति**॥

चित्याग्निचित्ये च ३.१.१३२.

[३, २१६]

(रत्नप्रकाशः) 'चित्या' इत्येव निपातिते षष्ठीतत्पुरुषेणाग्निचित्याशब्दस्य सिद्धत्वात् 'अग्निचित्या' इति पृथङ् निपातनं व्यर्थमित्यत आह — **अग्निचित्या भावेऽन्तोदात्त इति**। तथा च चित्यशब्दः कर्मणि निपातितः। तेन 'चित्योऽग्निः' इति सिध्यति चेदपि 'अग्निचित्या' इति भावे न सिध्यतीति पृथङ् निपातनमिति फलितम्। ननु 'अग्निश्चित्योऽस्याम्'[१] अग्निचित्येति बहुव्रीहिणा तत् सिध्यतीति चेन्न, पूर्वपदप्रकृतिस्वरापत्तेः, अन्तोदात्तस्यैवेष्टत्वात्॥

ण्वुल्तृचौ ३.१.१३३.

[३, २१६–२१७]

(उद्द्योतनम्) ननु तृन्साहचर्येण 'तृ' इति प्रत्ययग्रहणात् मातृशब्दस्याव्युत्पन्नत्वेन 'तृ' इत्य-

---

[१] चयनक्रियायामित्यर्थः।

स्याप्रत्ययत्वान्न तत्रातिप्रसङ्गः, अत आह — **उणादिष्विति**। स्वसृशब्दः संपातायात इत्याह — **नप्त्रिति**। [१]'तुश्छन्दसि' इत्यादिभाष्यतात्पर्यमाह — **सामान्यग्रहणेति**। अन्यथा [२]'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति तृनो ग्रहणं न स्यादित्यर्थः॥

[३, २१६–२१७]

(रत्नप्रकाशः) मातराविति। उणादिषु नप्तृनेष्ट्रादयस्तृप्रत्ययान्ता निपातिता इति भावः। **स्वसृनप्तृग्रहणं नियमार्थमिति**। नप्तृग्रहणमेव नियमार्थम्, स्वसृग्रहणं तु [३]ऋन्प्रत्ययान्तत्वेनाप्राप्तत्वाद्विध्यर्थमेव। **अत्रैवेति**। [४]'अप्तृन्तृच्'सूत्र एवेत्यर्थः। **तृ इति वक्ष्यामीति**। 'अप्तृस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्' इति वक्ष्यामीति भावः। तत्र [५]क्षत्तृग्रहणमौणादिकतृजन्तानां दीर्घश्चेत् क्षत्तुरेवेति नियमार्थम्। प्रशास्तृग्रहणमौणादिकतृन्नन्तानां दीर्घश्चेत् प्रशास्तुरेवेति। नेष्टृत्वष्टृहोतृपोतॄग्रहणं तु तत्सूत्रे तृग्रहणेन सानुबन्धकयोस्तृन्तृचोरेव ग्रहणमिति ज्ञापनार्थम्। [५]'नप्तृनेष्टृत्वष्टृ' इत्यादिना ह्युणादिसूत्रेण तृप्रत्ययान्ता निपातिता इत्युक्तम्। तत्र यदि तृशब्देनाननुबन्धकपरिभाषासहकृतेनोणादीनामेव ग्रहणं स्यात् तर्हि नप्तृशब्दस्य नियमार्थत्वाश्रयणेनैव पित्रादिवारणसिद्धौ किं नेष्ट्रादिग्रहणेनेति। ननु 'अप्तृस्वसृ' इत्यादिसूत्रभेदाश्रयेण चित्त्वोपपादनमयुक्तमित्यत आह — [६]**तुश्छन्दसि, तुरिष्ठेमेयस्स्वित्यत्रेति**। सर्वथा वक्तव्यांशमाह वार्तिककारः — **ण्वुलि सकर्मकग्रहणमिति**। तं निराकरोति भाष्यकारः — **न वेति**। वार्तिककार आह — **तृजादिष्विति**। भगवानाह — **न वेति**॥

[३, २१६–२१७]

(नारायणीयम्) उणादिष्विति। [७]'नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृजामातृपितृमातृभ्रातृदुहितृ' इत्यनेन। **नप्तृग्रहणमिति**। स्वसृग्रहणं तु सूत्रे सहपाठादत्रापि पठितमित्याह — **स्वसृशब्द इति**। उक्तमर्थं निगमयति — [८]**एवमिति**। यद्यपि [९]'अप्तृन्तृच्' इत्यत्र तृन्तृचोभदेनोपादानात् सूत्र-

---

[१] भाष्ये 'ण्वुलि सकर्मकग्रहणम्' इति वार्तिकात् प्राक् "'तुश्छन्दसि, तुरिष्ठेमेयस्सु' इति चोभयोर्ग्रहणं यथा स्यात्" इति निर्णयसागरमुद्रिते पाठो दृश्यते। स पाठोऽत्राभिमतः।

[२] परिभाषा ८२.

[३] 'सुञ्यसेर्ऋन्' इत्युणादिसूत्रेणेत्यादिः।

[४] पा. सू. ६.४.११.

[५] उणादिसूत्रम् २६०.

[६] भाष्ये 'ण्वुलि सकर्मकग्रहणम्' इति वार्तिकात् प्राक् "'तुश्छन्दसि, तुरिष्ठेमेयस्सु' इति चोभयोर्ग्रहणं यथा स्यात्" इति निर्णयसागरमुद्रिते पाठः। सोऽत्रादृतः।

[७] उणादिसूत्रम् २६०. तत्र 'पोतृभ्रातृजामातृमातृपितृदुहितृ' इति क्रम उपलभ्यते १९१५ क्रैस्ताब्दे निर्णयसागरमुद्रिते तत्त्वबोधिनीसहिते कौमुदीपुस्तके।

[८] प्रदीपे 'विध्यर्थ एव। सामान्य' इत्यत्र 'विध्यर्थः। एवं सामान्य' इति पाठोऽभिसंहित इति भाति।

[९] पा. सू. ६.४.११.

कारस्य सामान्यग्रहणाविघातार्थत्वं चकारस्य नाभिमतम्, तथापि [1]'तुरिष्ठेमेयस्सु' इत्यत्र तस्याप्येतत् प्रयोजनमित्याह — [2]**तुश्छन्दसीति** ॥

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३.१.१३४.

[३, २१७–२१९]

(उद्द्योतनम्) 'श्वपच' इत्यत्र बाध्यमाह — **कर्मणीति**। श्वानं [3]पचतीत्यर्थे। पक्षे सोऽपीष्यत इत्याह — **न्यङ्क्वादिष्विति** ॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य प्रथमपादे षष्ठमाह्निकम् ॥

॥ पादश्च समाप्तः ॥

[३, २१७–२१९]

(रत्नप्रकाशः) **अजपीति**। ण्वुल्तृचाविवेति शेषः। **जारभरेति**। यद्यपि गङ्गाधरादिवत् जारशब्दस्य भराशब्देन षष्ठीतत्पुरुषेऽपि सिध्यति, तथापि 'जारभार' इति मास्त्वित्येतदर्थं तत् पठनीयमिति भावः। **श्वपचेति**। 'श्वपाची' इति न भवतीति भावः। न्यङ्क्वादिषु श्वपाकशब्दपाठात् पक्षे 'श्वपाकी' इत्यपि भवति ॥

[३, २१७–२१९]

(नारायणीयम्) **कर्मण्यण् बाध्यत इति**। पाठाभावे धातुमात्राद्विहितस्याचः कर्मण्यण् बाधकः स्यात्। पाठेन तु स बाध्यते। न सर्वथा बाधः, कदाचिदणपि भवति प्रकारान्तरेणेत्याह — **न्यङ्क्वादिष्विति** ॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥

॥ पादश्च समाप्तः ॥

---

[1] पा. सू. ६.४.१५४.

[2] भाष्ये 'ण्वुलि सकर्मकग्रहणम्' इति वार्तिकात् प्राक् "'तुश्छन्दसि, तुरिष्ठेमेयस्सु' इति चोभयोर्ग्रहणं यथा स्यात्" इति निर्णयसागरमुद्रिते पाठः। सोऽत्राभिमतः।

[3] पचतीत्यर्थः — अ.

इगुपधज्ञाप्रीकिरः कः ३.१.१३५.

[३, २१८]

(रत्नप्रकाशः) वार्तिककार आह — **इगुपधेभ्य इति**। भगवानाह — **न वेति**॥

पाघ्राध्माधेट्दृशः शः ३.१.१३७.

[३, २१८]

(रत्नप्रकाशः) जिघ्र इति। जिघ्रादेशनिमित्तस्य शस्येत्यर्थः। तस्य प्रतिषेधे तु [1]"आतश्चोपसर्गे" इति के व्याघ्रशब्दः सिध्यति, नान्यथेति वचनारम्भः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम्॥

॥ पादश्चायं समाप्तः॥

---

[1] पा. सू. ३. १. १३६.

तृतीयाध्यायस्य द्वितीयपादे प्रथममाह्निकम्

कर्मण्यण् ३.२.१.

[३, २२० –२२५]

(उद्द्योतनम्) निर्वर्त्यादीनामिति। आदिना विकार्यप्राप्यग्रहः। **विशेष इति।** [1]'अवान्तर-' भेद इत्यर्थः। निर्वर्त्यस्य [2]द्वैविध्यं तावदुक्तमाह — **सती वेति।** [3]श्लोके [4]'निर्वर्त्यमिति भाव-प्रधानम्। 'अविद्यमाना' इत्येतद्व्याचष्टे — **यस्येति। संयोगमिति।** श्लोके 'प्रकृतिः परि-णामिनी' इत्युक्तम्। परिणामश्च पूर्वाकारपरित्यागेनाकारान्तरग्रहः। यथा मृदो घटः, सुवर्णस्य कुण्डलम्, न तथा घटपटयोः संयोग इति न तयोः परिणामित्वरूपमुपादानत्वमित्यविद्यमानोपादा-नत्वं संयोगस्य। 'सती वा' इत्येतद्व्याचष्टे — **यस्यापीति।** घटस्य [5]विकार्येष्वन्तर्भावः संभवतीत्याह — **यदा त्विति।** [6]विकार्यस्यापि द्वैविध्यमाह — **विकार्यमपीति। काष्ठादीति।** काष्ठं भस्म करोतीत्यत्र। **सुवर्णादीति।** सुवर्णं कुण्डलं करोतीत्यत्र। **क्रियाकृतेति।** [7]निर्व-र्त्यविकार्ययोरुक्तविशेषाणामित्यर्थः। त्रैविध्यमाक्षिपति — **तत्रेति। क्रिययेति।** [8]'कर्तुरीप्सित-तमम्' इति वचनात्। **अवान्तरेति।** निर्वर्त्यविकार्यभिन्नं प्राप्यमिति विवक्षयेत्यर्थः। वेदस्या-नित्यत्वमते निर्वर्त्यत्वमाशङ्क्याह — **नित्य इति।** 'वेदाध्यायादीनाम्' [9]इत्यनेनैव छत्रधारादीना-मपि संग्रहात् 'यत्र च नियुक्तः' इति वार्तिकं व्यर्थम्, अत आह — **वेदेति।** छत्रस्य [10]विकार्येऽ-न्तर्भावं निराह — [11]**तत्प्रेति।** अभिधानस्य साधुत्वप्रयोजकत्वे शास्त्रवैयर्थ्यं निराह — **नित्या-नामिति। अन्वाख्यानमात्रमिति।** न हि शास्त्रं शब्दानामुत्पादकम्, किं तु [12]प्रयुक्तानां प्रकृति-प्रत्ययविभागेन साधुत्वज्ञापकम्। न च [13]'यथालक्षणमप्रयुक्ते' इत्यस्य [14]निर्विषयता, विशिष्य-प्रयोगाज्ञानविषयत्वात्। यत्र प्रयोगव्यतिरेकनिश्चय आप्तोक्तिसिद्धस्तत्र लक्षणस्य [15]न व्यापार इति भावः। दर्शनं दर्शः, आदित्यस्य दर्शने 'आदित्यदर्शः' इत्यादेः साधुत्वमनुजानाति — **न चेति।** ननु [16]'अच् सर्वधातुभ्यः' इति वचनात् कुम्भकार इति कथमणोऽवकाशः, अत आह — **यदेति।** करोतिव्यतिरिक्तसर्वधातुविषयोऽच्प्रत्यय इति शङ्कां वारयति — **तथा चेति। कर**

---

[1] अवान्तरविच्छेद इत्यर्थः — ऋ.

[2] त्रैविध्यं — अ.

[3] 'श्लोके' इति नास्ति — अ.

[4] 'वाक्यपदीयश्लोके प्रदीपे 'तस्य निर्वर्त्यत्वं प्रचक्षते' इति दृश्यते। वाक्यपदीयेऽपि तथैव पाठः। 'तस्य निर्वर्त्यं संप्रचक्षते' इत्यन्नंभट्टपाठः स्यादिति भाति।

[5] विकारेष्वन्तर्भावः — अ.

[6] विकारस्यापि — अ.

[7] 'निर्वर्त्य' इति न दृश्यते — अ.

[8] पा. सू. १.४.४९.

[9] इत्यनेनेव — ऋ.

[10] विकार्यान्तर्भावं — लृ.

[11] 'तत्प्राप्यमेव' इत्यस्यैकदेशग्रहणम्।। तत्रेति — अ, ऋ, लृ.

[12] 'प्रयुक्तानाम्' इति नास्ति — ऋ.

[13] महाभाष्यम् १. १. २४.

[14] निर्विषयत्वं, शिष्टप्रयोगाज्ञान — अ.

[15] 'न' इति नास्ति — ऋ.

[16] का. वा. ३. १. १३४–१.

इति। करोतीति करः, अच्प्रत्ययान्तः। तद्योगात् षष्ठी लभ्यते। षष्ठयन्तेभ्य एभ्यः [१]करेऽर्थे तातिल्। शिवं करोतीति शिवतातिः, शंतातिः, अरिष्टतातिः। न केवलमणोऽपवादत्वाद्विप्रतिषेधाभावः [२]अणोऽवकाशोक्तिरप्ययुक्तेत्याह — **ततश्चेति**। **अत एवेति**। यतोऽणचोर्विप्रतिषेधासंभवः, अत एवास्वरसात् [३]काणोस्तं वक्ष्यतीत्यर्थः। अपवादविप्रतिषेधादत्राण् भवतीत्याह — [४]**सर्वेति**। **काणाविति**। [५]'इगुपधज्ञा' इति कः, [६]'कर्मण्यण्'। भाष्ये **अर्थज्ञ इति**। [७]'आतोऽनुपसर्गे कः'। भाष्ये **तेषां णः** [८]'ज्वलितिकसन्तेभ्यो णः'। **णस्य कः** [९]'इगुपधज्ञा' इति कः। एतेन [१०]'ज्वलितिकसन्तेभ्यो णः' इत्यत्र घटादिमध्यस्थो ज्वलिर्गृह्यते, न तु [११]तस्मात् परः। परस्य ग्रहणे [१२]जानातेर्ज्वलादित्वाभावेन णप्रत्ययस्य प्राप्त्यभावात् [१३]तस्य केन बाधाभावात्। तस्मात् 'घटादिगणात् परो ज्वलिस्तत्र गृह्यते' इति [१४]न्यासश्चिन्त्यः। ननु [१५]येन नाप्राप्तिन्यायेन णस्यैव [१६]को बाधकः, न तु कर्मोपपदस्यापि कस्य, अत आह — [१७]**प्राप्तमात्रस्येति**। बाध्यमात्रापेक्षायां पुरस्तादपवादन्यायो नास्तीति भावः। **कः पुनरिति**। 'अर्थज्ञः' इत्यत्र [१८]'इगुपध' इत्यनुपपदः कः, [१९]'आतोऽनुपसर्गे' इति कर्मोपपदः कः, तयो रूपे विशेषाभावाद् विप्रतिषेधकथनं निष्फलमित्यर्थः। **नित्येति**। [२०]'उपपदमतिङ्' इत्यनेन। **विकल्पेनेति**। ततश्च 'अर्थस्य ज्ञः' इति वाक्यमसाध्विति भावः। **नन्वर्थज्ञ इति**। उभयप्राप्तिस्थल इत्यर्थः। किमतः, अत आह — **तत्कथमिति**। कानुपपत्तिः, अत आह — **न हीति**। [२१]कृञ्ञ आदन्तत्वाभावादित्यर्थः। **एवं तर्हीति**। 'अर्थज्ञः' इत्यत्रेगुपधलक्षणः को न भवति, किं तु कर्मोपपद इति भाष्यकारस्य साध्यम्, न तु क्रमविशेषे आग्रह इति भावः। **काणोः** [२२]'इगुपध' इति कस्य, कर्मण्यणश्च। तथा च 'कर्मोपपदस्य स एव' इत्युपपन्नम्। 'नैष युक्तः' इत्यादि भाष्यं [२३]तु यथाश्रुतं कथंचिद्व्याख्यातमिति भावः। भाष्ये **का तर्हीति**। तथा च [२४]शेन कस्यैव बाधो नाण इत्यर्थः। भाष्ये **सुग्ल इति**। [२५]'आतश्चोपसर्गे' इति कः। **गोसंदाय**

---

[१] करोत्यर्थे — अ.

[२] अणोऽपवादोक्तिरयुक्तेत्याह — अ; अणोऽनवकाशोक्तिरप्ययुक्तेत्याह — लृ.

[३] काणोः पर्यवस्यतीत्यर्थः — अ; काणोर्भवतीत्यर्थः — ऋ, लृ.

[४] 'सर्वेति' इत्यस्यानन्तरं 'भाष्येऽर्थज्ञ इति। आतोऽनुपसर्गे कः' इति वर्तते 'अ, ऋ, लृ' कोशेषु। भाष्यक्रममनुसृत्य 'काणाविति' इत्यादि 'कर्मण्यण्' इत्यस्यानन्तरं तन्निवेशितम्।

[५] पा. सू. ३.१.१३५.

[६] पा. सू. ३.२.१

[७] पा. सू. ३.२.३.

[८] पा. सू. ३.१.१४०. ज्ञाधातोर्ज्वलादित्वं णप्रत्ययार्थमन्नंभट्टाभिमतमिति प्रतीयते ॥ 'श्याद्व्यध' इत्यादन्तत्वाण्ण इति नागेशः।

[९] पा. सू. ३.१.१३५.

[१०] पा. सू. ३.१.१४०.

[११] तस्मात् परस्य ग्रहणम् — अ.

[१२] भामतेः — अ; भासतेः — ऋ, लृ.

[१३] 'तस्य केन बाधाभावात्' इति नास्ति — अ.

[१४] अयं न्यासग्रन्थः 'ज्वलितिकसन्तेभ्यो णः' इत्यत्र।

[१५] पुरस्तादपवादन्यायोऽत्र विवक्षित इति भाति, उपरि तस्यैवोपादानात्।

[१६] शो बाधकः — अ.

[१७] प्रदीपे 'प्राप्तिमात्रस्य' इत्यत्र 'प्राप्तमात्रस्य' इत्यन्नंभट्टपाठ इति भाति।

[१८] पा. सू. ३.१.१३५.

[१९] पा. सू. ३.२.३.

[२०] पा. सू. २.२.१९.

[२१] 'कृञ्ञः' इत्यादि 'एवं तर्हीति' इत्यन्तं नास्ति — अ.

[२२] पा. सू. ३.१.१३५.

[२३] तुशब्दो नास्ति — अ.

[२४] तेन — अ.

[२५] पा. सू. ३.१.१३६.

इति। [1]"कर्मण्यण्"। पूर्वपदप्रकृतिस्वरत्वं चेत्युक्तम्। तत्र पूर्वपदस्य कः स्वरः, अत आह — **मांसशब्द इति**। [2]"वृतॄवदिहनिकमिकषिभ्यः सः" [3]"मनेर्दीर्घश्च" इति सप्रत्ययः। **लघाविति**। अन्ते लघौ सति द्वयोश्च लघ्वोः सतोः **बह्वचः** बह्वच्कस्य गुरुरुदात्त इति फिट्सूत्रार्थः। **कृदुत्तरेति**। [4]"गतिकारकोपपदात् कृत्" इत्यनेन। प्रत्ययस्वरेण कामशब्दोऽन्तोदात्तः। **नास्तीति**। भाष्यवार्तिकयोरदर्शनात्। बहुव्रीहित्वे पूर्वपदप्रकृतिस्वरस्य [5]क्वचिद्बाधमाशङ्कते — **नन्विति**। व्यधिकरणबहुव्रीहिणा स्वरसिद्धिमाह — **नैष इति**। समानाधिकरणबहुव्रीहिः स्वरानुरोधान्नाङ्गीक्रियत इति भावः। [6]लुनातेरपि 'लावः' इति न सिध्यति, अत आह — **लावयतेरिति**। [7]"भवति बहुव्रीहिरपि" इति भाष्यस्य तात्पर्यमाह — **तेनेति**। ननु 'मांसकामः' इत्यत्र बहुव्रीह्यङ्गीकारे 'अम्भोऽभिगमा' इत्यपि बहुव्रीहिः स्यादित्याशङ्क्य 'न तु' इति भाष्यम्। तस्य तात्पर्यमाह — **तेनेति**। तथापि [8]"काण्डलावः" इत्यत्र बहुव्रीह्यभावः कथम्, अत आह — भाष्ये **काण्डलावेऽपीति**। तत्र लावयतेरचि विग्रहसंभवमाशङ्क्याह — **काण्डानीति**। **प्रकृत्यर्थ** अच्प्रत्ययप्रकृत्यर्थे। णिचोऽभावादित्यन्वयः। **भाव्यमिति**। तत्र [9]"काण्डलवः" इति बहुव्रीहिरिष्ट एवेति भावः। व्यत्ययेन कः प्रत्ययोऽभिमतः, अत आह — **अन्नमिति**। तस्य प्रयोजनमाह — **तेनेति**। अणि सति 'अन्नाद इत्यत्र आदः' इत्यवग्रहः स्यात्। कृदुत्तरपदप्रकृतिस्वर एवोभयत्रेति न स्वरभेद इति भावः॥

[३, २२०–२२५]

(रत्नप्रकाशः) निर्वर्त्यविकार्यप्राप्यभेदेन कर्म त्रिविधम्। तत्राद्ययोरुपपदयोः प्रत्ययो भवति, नान्त्य इत्याशयेनाह — **निर्वर्त्यमानेति**। कुम्भं करोतीत्यादौ कुम्भादीनि निर्वर्त्यानि, 'स्वर्णं करोति, तण्डुलान् पचति' इत्यादौ स्वर्णादीनि विकार्याणि। निर्वर्त्यते निष्पाद्यत इति निर्वर्त्यम्, विक्रियते विकारात्मकतां प्राप्यत इति विकार्यमित्यवयवार्थानुगतिस्तत्र द्रष्टव्या। 'भेरीमाहन्ति, वीणां वादयति' इत्यादावपि भेरीवीणादीनां ध्वनिविशेषयुक्ततया विकारात्मकताप्राप्तिर्ज्ञेया। एतेन 'सती वाविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते' इति निर्वर्त्यलक्षणम्, 'यस्योपादानकारणं नास्ति तन्निर्वर्त्यम्, यथा — संयोगं करोतीति। यस्यापि सदप्युपादानकारणं न विवक्ष्यते तदपि निर्वर्त्यम् — यथा — घटं करोतीति। यदा तूपादानकारणमेव परिणामित्वेन विवक्ष्यते — मृदं घटं करोतीति, तदा विकार्यं कर्म। भेदविवक्षायां तु [10]"मृदो घटं करोतीति निर्वर्त्यमेव' इति तद्व्याख्यानं च निरस्तम्। परिणामिन्याः प्रकृतेराश्रीयमाणत्वेऽपि घटादेर्निर्वर्त्यत्वानपायेन 'सती वा, असती वा' इत्यादिविशेषणस्यानर्थक्यात्, संयोगस्याप्युपादानकारणस्य सत्त्वाच्च। यदप्युक्तम् "विकार्यमपि द्विविधम् — 'प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत्। किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्" इति। तदपि न, 'भस्म करोति, कुण्डले करोति' इत्यादौ भस्मकुण्डलादेर्निर्वर्त्यत्वेन विकार्यत्वाभावात्। **आदित्यं पश्यतीति**।

---

[1] पा. सू. ३.२.१.
[2] उणादिसूत्रम् ३४९.
[3] उणादिसूत्रम् ३५१.
[4] पा. सू. ६.२.१३९.
[5] क्वचिदसंभवमाशङ्कते — अ.
[6] लुनातेरभिलाव इति — ऋ.
[7] भाष्ये 'भवति तु बहुव्रीहिरपि' इत्यत्र तुशब्दरहितः पाठो निर्णयसागरमुद्रिते।
[8] काण्डलावे बहुव्रीह्यभावः — अ.
[9] काण्डलाव इति — अ.
[10] प्रदीपे 'मृदा घटं करोतीति' इत्यत्र 'मृदो घटं करोतीति' इति पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टः।

प्राप्यमिदं कर्म। यद्यपि कर्म सर्वं प्रायेण प्राप्यमेव, कर्तुः क्रिययाप्तुमिष्टस्य तथायुक्तस्य च [1]तथात्वात्। तथापि क्रियाकृतविशेषशून्यं यत् कर्म तत्प्राप्यमित्यवान्तरभेदविवक्षायां प्राप्यं कर्म भेदेनोक्तम्। अतिव्याप्तिपरिहाराय वचने कृतेऽव्याप्तिः प्रसज्यत इत्याह — **वेदाध्यायादीनामिति**। वेदस्यानुपूर्वीविशेषविशिष्टस्यापौरुषेयत्वेन निर्वर्त्यत्वाभावात् तस्य विकारान्तरानुपादानत्वेन विकार्यत्वाभावाच्चाव्याप्तिः। **छत्रधार इति**। यद्यपि वेदाध्यायादिशब्देनैषामपि संग्रहः संभवति, तथापि प्रपञ्चार्थं 'यत्र नियुक्तः' इति पृथगुपादानम्। 'आदित्यं पश्यति' इत्यादावतिप्रसङ्गवारणार्थं परिगणनं कर्तव्यम्, तेनोक्ताव्याप्तिदोषो न भविष्यतीत्याशयेनाह — **हृग्रहिनीवहिभ्यश्चेति**। चकारः प्रागुक्तानामिङादीनां समुच्चयार्थः। न शक्यं परिगणनं कर्तुमित्याशयेनाह — **अपरिगणनं वेति**। **अनभिधानादिति**। [2]'अभिधानलक्षणाः कृत्तद्धितसमासाः' इति परिभाषितत्वादिति भावः। **कर्मोपपदस्यावकाश इति**। यथाश्रुतसूत्रगणपाठानुसारेणेदम्। [3]'अणपि सर्वधातुभ्यः' इति वार्तिकानुसारेण त्वजपवाद एवाण् भवतीति न विप्रतिषेधविषयता। तदुदाहरणान्तरमाह — **काष्ठभेद इति**। ण्वुल्तृजच उत्सर्गाः, तेषामिगुपधलक्षणः कः कर्मण्यण् चापवादौ। तयोर्विप्रतिषेधेऽणेव भवतीति भावः। **कर्मोपपदस्य स एवेति**। 'गोदः, कम्बलदः' इत्यादिरिति भावः। **कर्मोपपदो भवतीति**। [4]'आतोऽनुपसर्गे कः' इति को भवतीति भावः। 'कर्मोपपदस्य स एव' इत्यनन्तरोक्तेन 'कुम्भकारः' इत्येव निर्दशितमिति काणोर्विप्रतिषेधोऽभिमत इति मन्यमान आह — **नैष युक्त इति**। **तेषां ण इति**। [5]'श्याद्व्यध' इति विहितः। **कर्मोपपदमपीति**। [6]'पुरस्तादपवादाः' इति परिभाषाया अनित्यत्वादिति मन्यते। **उभयोस्तृतीययोरिति**। कप्रत्यययोरिति शेषः। **का तर्हि गतिरिति**। विप्रतिषेधोपपादन इति शेषः। तत्र गतिमाह— **मध्येऽपवादा इति**। **कर्मोपपदं न बाधिष्यत इति**। तथा च विप्रतिषेधश्चोपपन्न इति भावः। एवमुत्तरत्र बोध्यम्। तत्र कर्मोपपदे सति नित्यसमासः, अन्यस्मिंस्तु वैकल्पिकः षष्ठीतत्पुरुष इति तयोर्विशेषः। **पूर्वपदप्रकृतिस्वरत्वं चेति**। अन्यथा कृदुत्तरपदप्रकृतिस्वरः स्यादिति भावः। मांसशब्दः सप्रत्ययस्वरेणान्तोदात्तः, कल्याणशब्दो [7]'लघावन्ते' इति मध्योदात्तः। **ईक्षिक्षमिभ्यां चेति**। णः पूर्वपदप्रकृतिस्वरत्वं चेत्यनुषज्यते। **भक्षयतेरजिति**। 'एरजण्यन्तानाम्' इति त्वनार्षम्। [8]कल्प्यादिप्रतिषेधस्यार्षत्वेऽपि तत्र भक्षेरनिर्देशादुपपन्नमिदम्। **तदन्तेन बहुव्रीहिरिति**। यद्यपि बहवो भक्षा अस्य 'बहुभक्षः' इत्यत्र [9]'बहोर्नञ्वदुत्तरपदभूम्नि' इत्यन्तोदात्तत्वं प्राप्नोति, तथापि भक्षणं भक्षः, बहुषु भक्षोऽस्येत्येवं व्यधिकरणपदबहुव्रीह्याश्रयणेन पूर्वपदप्रकृतिस्वरोऽपि साधयितुं शक्यत इति भावः। **काण्डानि लावोऽस्येति**। लावयतेरच्। **बहुव्रीहिर्न भवतीति**। तथा च कृदुत्तरपदप्रकृतिस्वर एव तत्र स्थित इति भावः। **बहुव्रीहिरपीति**। तत्रेष्ट इति शेषः। तथा च ज्ञापनप्रयोजनाभावाद् व्यर्थमेव तद्वचनमिति भावः। **न त्वम्भोऽभिगमेति**। अनभिधानादत्र बहुव्रीहिर्न भवतीति भावः। **नैषोऽस्तीति**। काण्डानि लुनातीति प्रकृत्यर्थकर्तृविवक्षायां णिजभावात् लूयत इति लवः, काण्डानि लवोऽस्येत्येव तत्र विग्रहेण भवितव्यमिति भावः। **अन्नादायेति**। अन्नमत्तीत्यणः प्रसङ्गेऽच् क्रियते। तेन 'अन्न अदाय' इत्यवग्रह उपपद्यत इति भावः॥

---

[1] यथात्वात् — ब.
[2] महाभाष्यम् ३. ३. १९.
[3] का. वा. ३.१.१३४–१.
[4] पा. सू. ३.२.३.
[5] पा. सू. ३.१.१४१.
[6] परिभाषा ६०.
[7] फिट्सूत्रम् ४२.
[8] कल्पादिभ्यः प्रति — ब.
[9] पा. सू. ६.२.१७५.

[३, २२०–२२५]

(नारायणीयम्) **सती वेति**। यस्याविद्यमाना प्रकृतिः, तस्य निर्वर्त्यत्वम्, यस्यापि सती **नाश्रीयते** न विवक्ष्यते [1]तदपि निर्वर्त्यम्, यस्यापि सती परिणामित्वेन नाश्रीयते तस्यापि निर्वर्त्यत्वं प्रचक्षते तद्विद इति कारिकायोजनां हृदि निधायाह— **यस्येति**। 'उपादानकारणम्' इत्यनेन प्रकृतिशब्दो व्याख्यातः। **यथा संयोगमिति**। संयोगविभागादेर्गुणत्वादुपादानकारणाभावः। 'परिणामिनी न विवक्ष्यते' इति विशेषणकृत्यं दर्शयन् [2]तद्विवक्षायां कर्मान्तरङ्गत्वमाह— **यदा त्विति**। **परिणामित्वेनेति**। कार्यभेदेन परिणामितयेत्यर्थः। **तदा विकार्यमिति**। अवस्थाद्वयानुयायिन एकस्यैव पूर्वाकारपरित्यागेनाकारान्तरप्राप्त्यवगमात्। उक्तं च— [3]'प्रकृतेस्तु विवक्षायां विकार्यम्' इति। **प्रकृत्युच्छेदेति**। तत्र प्रकृतेरुच्छेदो निरन्वयविनाशः, तेन जातं यथा— काष्ठानि भस्म करोति, इति। काचित्तु प्रकृतिः स्वरूपमजहती गुणान्तरस्य संनिवेशादेर्धर्मस्योत्पत्त्या विकृतत्वाद् विकार्यं कर्मेत्युच्यते। यथा— सुवर्णं कुण्डलं करोतीति। **प्राप्यमपीति**।, हरिणा दर्शितमित्यनुषङ्गः। **क्रियाकृतेति**। यत्र क्रियाकृतो विशेषः **दर्शनात्** प्रत्यक्षात्, अनुमानाद्वा न गम्यते क्रियाविषयभावमात्रेण कर्तुरीप्सिततमत्वात् तत् प्राप्यं कर्मेति गीयते। यथा— आदित्यं पश्यति, हिमवन्तं शृणोति, नगरमुपसर्पतीत्यादावादित्यादेर्हि दर्शनादिक्रियया कश्चिदाहितो विशेषः प्रमाणद्वयेन नावधार्यते। निर्वर्त्ये तु निर्वृत्तिरात्मलाभ एव क्रियाकृतो विशेषः प्रत्यक्षादवगम्यते। विकार्येऽपि भस्मकुडलादौ विकारः प्रत्यक्षगम्यः। [4]क्वचिदनुमानात्, यथावृक्षमवसिञ्चतीत्यत्र तदानीं सूक्ष्मत्वाद् दुरवधारत्वेऽपि पश्चात् प्रचिततरविशेषदर्शनादनुमीयते नूनमवसेचनक्रियाकृतोऽयं विशेष इति। एतदुपलक्षणम्, शास्त्रेणापि क्वचिद्विकारोऽवगम्यते। यथा व्रीहीन् प्रोक्षतीत्यत्र। प्रोक्षणेन व्रीहिषु कश्चिदतिशयो जन्यत इति शास्त्रेणावसीयते। एतावता भेदेन संस्कार्यमेतत् कर्मेति चातुर्विध्यं मीमांसका आचक्षते। अस्मन्मते तु त्रिविधमेव कर्म। [5]गोबलीवर्दन्यायेन प्राप्यस्येतरयोश्च भेद इति दर्शयितुमाह— **तत्र प्राप्यस्येति**। नन्वध्ययनेन वेदो जन्यत इति निर्वर्त्यत्वात् कथं प्राप्यकर्मतेत्यत्राह— **नित्यो वेद इति**। अध्ययनेन वेदस्य प्रकाशनमेव, न तूत्पत्तिः, सर्वशब्दानां नित्यत्वाभ्युपगमात्। **सदृशानामिति**। शब्दकर्मकाणामित्यर्थः। ननु छत्रस्य धारणेनावस्थान्तरोत्पत्त्या विकार्यता युक्तेति, नेत्याह— [6]**तत्र च्छत्रमिति**। **न हि धारणादूर्ध्वमिति**। देशान्तरप्राप्तिर्धारणाङ्गमेव, न धारणफलम्। यद्धि क्रियाप्रवृत्त्युत्तरकालं तज्जन्यमवगम्यते प्रत्यक्षादिना, तदेव क्रियाकृतो विशेष इति, अत्र तदभावाच्छत्रं प्राप्यमेव कर्मेत्यर्थः। किमिदमनभिधानं नामेति तद्व्युत्पादनायाह— **नित्यानां शब्दानामिति**। नित्याः शब्दा लोकवेदयोः प्रयुक्ता एव शास्त्रस्य विषय [7]इत्यप्रयुक्तेषु शास्त्रस्याप्रवृत्तिर्न यत्नसाध्येत्यर्थः। सर्वधातुविषयोऽच्प्रत्ययः [8]सूत्रकारस्याप्यभिमत इत्याह— **तथा चेति**। कथं तर्ह्येतदुदाहरणं भाष्यकृता विप्रतिषेधस्यादर्शीत्यत आह— **अत एवेति**। पूर्वत्रानाश्वासादित्यर्थः। काणोर्विप्रतिषेधस्य युक्ततां दर्शयति— **सर्वधातुभ्य इति**। **न तु कर्मोपपदस्येति**। कर्मोपपदस्यानुपपदे प्राप्यभावात्।

---

[1] तस्यापि निर्वर्त्यत्वमित्युचितं भाति, पूर्वापरानुसारात्।

[2] तद्विवक्षायाः— ङ.

[3] वाक्यपदीयम् ३.७.४८.

[4] क्वचिदनुमानेन— ङ.

[5] लौ. न्या. प्रथमभागे पृष्ठम् २५.

[6] प्रदीपे 'तत् प्राप्यमेव' इत्यत्र 'तत्रच्छत्रं प्राप्यमेव' इति पाठोऽभिमत इति भाति।

[7] इत्यप्रयुक्ते तु शास्त्रस्याप्रवृत्तिः— ङ.

[8] सूत्रकारस्याभिमतः— ङ.

नित्यसमास इति। [1]'उपपदमतिङ्' [2]इत्यत्र नित्यमित्यधिकारात् तेन नित्यसमासो भवति। **अकर्मोपपद इति।** [3]'इगुपधज्ञाप्रीकिरः' इति निरुपपदे के सति 'अर्थस्य ज्ञः, अर्थज्ञः' इति कर्मषष्ठ्या विकल्पेन समासः स्यात्। **नन्वर्थज्ञ इत्यत्रेति।** यत्र काणोर्युगपत्प्राप्तिस्तत्रेत्यर्थः। तर्हि द्वयोः कप्रत्यययोर्विप्रतिषेधोऽस्त्विति चेत् [4]तन्न, [5]तत्र भाष्यस्यानुगुण्याभावादित्याह — **तत्कथमिति।** अनानुगुण्यमुपपादयति — **न हि कुम्भकार इति।** अनाकारान्तत्वात् काणोरेव पूर्वं विप्रतिषेध [6]उक्तो भाष्ये। ततो विशेषचिन्तायामपवादत्वात् तस्य विप्रतिषेधस्यायुक्ततामुद्भाव्य द्वयोः कप्रत्यययोर्विप्रतिषेधः स्थापित इत्याशयः। 'पूर्वपदप्रकृतिस्वरत्वं च' इत्ययुक्तम्, तत्र पूर्वपदस्य प्राक् समासात् कः स्वरः प्राप्नोतीत्यत्राह — **मांसशब्दः सप्रत्ययान्त इति।** [7]'मनेर्दीर्घश्च' इत्यनेन। **लघावन्त इति।** **अन्ते** एकस्मिन् लघौ, द्वयोर्वा लघ्वोः परतश्च[8] **बह्वषः** बह्वच्शब्दस्य यो गुरुः स उदात्तो भवतीति सूत्रार्थः। अषित्यचः पूर्वाचार्यसंज्ञा। **भक्षणं भक्ष इति।** यदा भावेऽजन्तेन व्यधिकरणपदो बहुव्रीहिः क्रियते तदोत्तरपदार्थस्य बहुत्वे बहुशब्दस्यावर्तनात् [9]'बहोर्नञ्वत्' इत्यपवादाभावात् पूर्वपदप्रकृतिस्वरः सिध्यतीति भाष्यकारस्याशय इत्यर्थः। **लावयतेरजिति।** ण्यन्तात् कर्मण्येरजित्यर्थः। [10]'भवति बहुव्रीहिरपि' इत्यनेन ज्ञापनप्रयोजनं विघटयतीत्याह — **तेनेति।** **अण्बाधनार्थमेवेति।** तेन 'मांसशीला' इत्यादौ [11]'टिड्ढाणञ्' इति ङीप् न भवति। कथं पुनः 'अम्भोऽभिगमा' इत्यत्र बहुव्रीहिर्न भवतीत्यत्राह — **तेनेति।** विग्रहाभावमुपपादयति — **काण्डानि लुनातीति।** ननु 'अन्नादाय' इत्यत्राण्यचि च रूपभेदः स्वरभेदश्च नास्ति, उभयथा कृदुत्तरपदप्रकृतिस्वरेण [12]थाथादिस्वरेण वान्तोदात्तत्वादित्यत आह — **तेनेति**॥

आतोऽनुपसर्गे कः ३.२.३.

[३, २२५–२२८]

(उद्द्योतनम्) डप्रत्यय इति। तस्मिन् टिलोपः। भाष्ये **आह्व इति।** [13]'आतश्चोपसर्गे' इति कः। ननु [14]'वार्णादाङ्गम्' इत्यस्य निर्दुष्टत्वात् तदनन्तरम् 'अथवा' इति भाव्यम्, न तु 'एवं तर्हि' इति, अत आह — **वार्णादिति।** कप्रत्ययाश्रय आकारलोपः, आकाराश्रयं च पूर्वरूपत्वमत्र भिन्नाश्रयम्। नन्वाकारलोपोऽपि नित्यः, अत आह — **संप्रसारण इति।** [15]'वार्णादाङ्गं बलीयः' इत्याकारलोपः [16]परपूर्वत्वं बाधताम्, अत आह — **वार्णादिति।** आकारलोपो न सिध्यतीत्यन्वयभ्रमं निराह — **आह्व इति।** **उकारश्चेति।** आकारलोपात् पूर्वं संप्रसारणाभावा-

---

[1] पा. सू. २.२.१९.
[2] 'इत्यत्र नित्यम्' इति नास्ति — ङ.
[3] पा. सू. ३.१.१३५.
[4] 'तन्न' इति नास्ति — ङ.
[5] तत्र तद्भाष्यस्यानु — ङ.
[6] 'उक्तो भाष्ये' इत्यादि 'कप्रत्यययोर्विप्रतिषेधः' इत्यन्तं नास्ति — ङ.
[7] उणादिसूत्रम् ३५१.
[8] अत्र चकारोऽनावश्यको भाति।
[9] पा. सू. ६.२.१७५.
[10] भाष्ये 'भवति तु बहुव्रीहिरपि' इत्यत्र 'भवति बहुव्रीहिरपि' इति तुशब्दरहितः पाठो निर्णयसागरमुद्रिते।
[11] पा. सू. ४.१.१५.
[12] थाथघञ्क्ताजबित्रकाणामित्यनेनेत्यर्थः।
[13] पा. सू. ३.१.१३६.
[14] परिभाषा ५५.
[15] परिभाषा ५५.
[16] परस्य पूर्वत्वम्, पूर्वरूपमित्यर्थः।

दित्यर्थः। **नन्विति**। लौकिके पूर्वत्वेऽपि स्थानिवद्भाव इति शङ्का, शास्त्रीयकार्य एवेत्युत्तरम्। जुहोतेर्जुहुवतुरिति रूपेऽनुपपत्त्यभावादाह — **ह्वेञ इति**। [1]**अशितीति**। शिद्भिन्नप्रत्ययनिमित्तत्वे आत्वस्यान्तरङ्गत्वाभावात् परत्वेन व्यवस्थेत्यर्थः। कस्य योगस्य विभागः, अत आह — **एङ इति**। ननु [2]'अशिति' इति प्रसज्यप्रतिषेधपक्षे पूर्वमात्वं पश्चात् क इति युक्तम्, पर्युदासपक्षे प्रत्ययसापेक्षमात्वं प्रत्ययात् पूर्वं नास्तीति कथं ह्वेञः कप्रत्ययः, अत आह — **पर्युदासेति**। [3]'ह्वावामश्च' इति [4]कापवादोऽणत्र विधीयते। कात्पूर्वमात्वाभावेऽण्विधानं व्यर्थं सत् [5]'कात्पूर्वमात्वं ज्ञापयतीत्यर्थः। 'नित्यम्' इति हेतुगर्भविशेषणम्। तदुपपादयति — **कृतेति**। 'ह्वो यण्' इति फलितनिर्देश इति द्योतनाय [6]'वार्णादाङ्गम्' इत्यनन्तरं व्याख्यातम्। भाष्ये 'यणस्तु' इत्यत्र 'यण् अस्तु' इति छेदः। **इत्याह** इत्यत आह। **एङः पूर्व इति**। एङ इति योगविभागादेङ एव पूर्वत्वं क्रियत इति 'जुहुवुः' इत्यादौ यण् [7]न भवतीत्यर्थः। **तथैव** एङ एव पूर्वत्वम्॥

[३, २२५–२२८]

(रत्नप्रकाशः) **ब्रह्मज्य इति**। ब्रह्म जिनातीति डः, डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। **किमुच्यत इति**। किमर्थमुच्यत इत्यर्थः। **अन्यत्रापीति**। अन्यत्रापि भवत्वित्येवमर्थमित्यर्थः। **आह्व इति**। [8]'आतश्चोपसर्गे' इति कः संप्रसारणविषयः। **वार्णादाङ्गं बलीय इति**। समानाश्रय एवेयं परिभाषा प्रवर्तत इत्यजानत उक्तिरियम्। तज्जानत इतरबुद्धिपरीक्षकस्य वा। गूढाभिसंधिर्वार्तिकस्थापयिताह — **एवं तर्हीति**। एतेन "[9]'वार्णादाङ्गं बलीयः' इत्युक्ते यो ब्रूयात् समानाश्रयाङ्गवार्णविषयमेतदिति, तं प्रत्याह — **एवं तर्हीति**।" इति निरस्तम्। 'कविधौ सर्वत्र प्रसारणिभ्यो डः' इति वार्तिकप्रत्याख्यानाय [10]'वार्णादाङ्गं बलीयः' इत्याकारलोपो भविष्यतीत्युक्ते तद्वार्तिकस्थापयित्रा 'एवं तर्हि' इत्यादिना विचारान्तरस्य प्रक्रान्तत्वेन तं विचारान्तरप्रक्रमं तद्वार्तिकप्रत्याख्यातृसंबन्धित्वेन बुद्ध्वा तथावतारानौचित्यात्। न च सविचारप्रक्रमो वार्तिकप्रत्याख्यातुरेव कुतो न स्यादिति वाच्यम्, यथाश्रुतभाष्यात् तथा प्रतीयमानत्वाभावात्। तत्प्रत्याख्यानवाद्याह — **परत्वादाकारलोप इति**। तत्स्थापयिताह — **नित्यं संप्रसारणमिति**। **अन्तरङ्गं [हि] पूर्वत्वमिति**। [11]समानाश्रयत्वाभावात् [12]'वार्णादाङ्गं बलीयः' इति न प्रवर्तत इति भावः। इतरस्तमाशयं बुद्ध्वा [13]'वार्णादाङ्गं बलीयः' इति प्रागुक्तमप्युपेक्ष्य युक्त्यन्तरमाह — **यस्येति**। वार्तिकस्थापयिताह — **एवमपीति**। इतर आह — **एवं तर्हीति**। **असिद्धत्वादिति**। [14]'असिद्धवदत्राभात्' इत्यनेनेति शेषः। **जुहुवतुरिति**। ह्वेञो लिटि [15]'ह्वः

---

[1] 'अशितीति' इत्यादि 'एङ इति' इत्यन्तं नास्ति — अ.
[2] पा. सू. ६.१.४५.
[3] पा. सू. ३.२.२.
[4] कापवादो णोऽत्र — अ, ऋ.
[5] 'कात्पूर्वमात्वम्' इति नास्ति — अ.
[6] परिभाषा ५५.
[7] 'न' इति नास्ति — ऋ.
[8] पा. सू. ३.१.१३६.
[9] परिभाषा ५५.
[10] परिभाषा ५५.
[11] समानाश्रयत्वात् — ब.
[12] परिभाषा ५५.
[13] परिभाषा ५५.
[14] पा. सू. ६.४.२२.
[15] पा. सू. ६.१.३२.

संप्रसारणम्' [1]"अभ्यस्तस्य च' इति संप्रसारणे रूपमिदम्। **परत्वादात्वमिति**। [2]"अशिति' इति पर्युदासाश्रयेणैतत्। प्रसज्यप्रतिषेधे तु तस्मिन्ननैमित्तिकत्वादात्वमन्तरङ्गमिति न युक्तो विप्रतिषेधः। **पूर्वत्व इति**। [3]"एङः पदान्तादति' इति सूत्र इत्यर्थः। **आकारान्तलक्षण इति**। [4]"अशिति' इति पर्युदासेऽपि [5]"ह्वावामश्च' इति ज्ञापकादाकारान्तलक्षणे के कर्तव्ये पूर्वमेवात्वं भवतीति भावः। तदेवं वार्तिकं प्रत्याख्यायोक्तमर्थं संगृह्णाति — **नित्यं प्रसारणमिति**। आकारलोपापेक्षयेति शेषः। इदं वार्तिकखण्डनोपक्रमानुसारेण। तदुत्तरग्रन्थानुसारेण तु पर आलोप इति वक्तुमुचितम्। **ह्वो यणिति**। आलोपस्यासिद्धत्वादुवङोऽभावे यणि 'आह्वः' इति सिद्धमिति भावः। ननु संप्रसारणोत्तरं पूर्वरूपमेवान्तरङ्गत्वात् स्यात्, न त्वालोप इति, न सिध्यति 'आह्वः' इति रूपमित्यत आह — **वार्णादाङ्गमिति**। यतो बलीयोऽत आलोप एव भविष्यतीति शेषः। इदं च पूर्वविचारापेक्षमेव, उत्तरविचारे संप्रसारणात् पूर्वमेवालोपस्य प्रवृत्तत्वात्। **तेनेति**। येन स्थानिवद्भावो न घटते तेनालोपस्यासिद्धत्वमेवाभ्युपेयमिति भावः। **यणस्तु त इति**। यणा रूपसिद्धेरुक्तत्वेन श्लोकपूरणमात्रफलमिदम्, न तु यणस्त्वित्याशीर्वादोऽप्यपेक्षितः। अन्यदुत्तरप्रमेयसंग्राहकं सुगमम्।

अत्रेदं रहस्यम् — कर्तव्यमेव 'सर्वत्र प्रसारणिभ्यो डः' इति वार्तिकम्। अङ्गत्वाकारान्तत्वकित्त्वाजादित्वार्धधातुकत्वाश्रयत्वेन बहिरङ्गमालोपं बाधित्वा यजादित्वकित्त्वमात्राश्रयत्वेनान्तरङ्गे संप्रसारणे कृते ततः समानाश्रयत्वाभावेन [6]"वार्णादाङ्गम्' इत्यस्याप्रवृत्तौ बहिरङ्गमालोपं बाधित्वा पूर्वरूपे सति 'आहुवः' इत्येवानिष्टप्रसङ्गात्। न च संप्रसारणमेव वर्णकार्यं तत्तु समानाश्रयमिति [7]तद् बाधित्वाङ्ग आतो लोपो भविष्यतीति वाच्यम्, तादृशकल्पनायां मानाभावात्। अन्यथा 'आङ्गं बलीयः' इत्येव वक्तव्यत्वापत्तेश्च। तथोक्ते ह्याङ्गमनाङ्गाद् बलीय इति गम्यत इति॥

[३, २२५–२२८]

(नारायणीयम्) ननु [8]"वार्णादाङ्गं बलीयः' इत्याकारलोपे तस्य स्थानिवद्भावादियङुवङोरभावाद्यणादेशेन 'ब्रह्मज्यः' इत्यादीनि रूपाणि सिध्यन्तीति डप्रत्याख्याने सिद्धे पुनः 'एवं तर्हि' इत्यादिना तत्प्रत्याख्यानमनर्थकमित्याशङ्क्य तदुपयोगं दर्शयति — **वार्णादाङ्गमिति**। **इत्याकारलोपस्यानित्यत्वमिति**। लक्षणान्तरेण निमित्तस्य विहननादनित्यत्वमिति पक्षमाश्रित्यैतदुक्तमित्यर्थः। **उकारश्चेति**। आकारलोपे कृते संप्रसारणप्रवृत्तेरुक्तत्वात्। 'नन्वनादिष्टात्' इत्यादिः स्पष्टार्थः। नन्वात्वस्यान्तरङ्गत्वेऽपि [9]पूर्वप्रवृत्तिः सिद्धेति चेत् सत्यम्, भाष्यं त्वनुपपन्नं स्यादित्याह — **न चेति**। अतुल्यबलत्वात्। **तेनात्वं बाध्यत इति**। संप्रसारणादेङि परतः पूर्वपरयोः पूर्वरूपं भवतीति पूर्वसूत्रेणैव सिद्धे यत् पूर्वत्वं शास्ति तज्ज्ञापनार्थम् — यत्र संप्रसारणात् पर एङ संभवति तत्र [10]"आदेच उपदेशेऽशिति' इत्यात्वं न भवतीति। तेन 'जुहुवतुः' इत्यादावनैमित्तिकत्वेनान्तरङ्गमप्यात्वमकृत्वैङन्तादेव

---

[1] पा. सू. ६.१.३३.
[2] पा. सू. ६.१.४५.
[3] पा. सू. ६.१.१०९.
[4] पा. सू. ६.१.४५.
[5] पा. सू. ३.२.२.
[6] परिभाषा ५५.
[7] तद्बाधित्वान्तरङ्ग आतो लोपः — ब.
[8] परिभाषा ५५.
[9] पूर्ववत्प्रवृत्तिः — घ, ङ.
[10] पा. सू. ६.१.४५.

लिट् क्रियते। ततः संप्रसारणं पूर्वत्वम्, तत आकारलोपाभावात् तस्यासिद्धत्वेनोवङोऽसिद्धिः 'जुहुवतुः' इत्यादौ नास्तीति स्थितम्। ननु [1]'अशिति' इति पर्युदासाश्रयणे शिद्वर्जिते प्रत्यये परत आत्वेन भाव्यम्। तत्र यदि ह्वेञः [2]'आतश्चोपसर्गे' इति कः, तदेतरेतराश्रयत्वं स्यात् — कृते ह्यात्वे कः, के परत आत्वमिति। तत्राह — **पर्युदासाश्रयेऽपीति**। प्रसज्यप्रतिषेधे तावदनैमित्तिकत्वा-दन्तरङ्गत्वात् पूर्वमात्वं भवति, [3]पदर्युासाश्रयेऽपि ज्ञापकादित्यपिशब्दार्थः। ह्वेञ आत्वाभावात् कप्रत्ययाभावात् कर्मण्यणित्येवाणः सिद्धत्वात् तद्विधानमनर्थकं स्यात्। कृतं तु तदाकारान्तलक्षणे कप्रत्यये कर्तव्ये प्रागेवात्वं भवतीति सामान्येन ज्ञापयतीत्यर्थः। **उक्तार्थेति**। अयं श्लोकार्थः — ह्वेञः के कृते आकारलोपात् पूर्वं नित्यत्वात् संप्रसारणं भवति। तत्र नित्यत्वमुपपादयति — **कृतेति**। आर्थेन क्रमेण 'वार्णादाङ्गम्' इत्येतत् पूर्वं व्याचष्टे — **तत्र कृत इति**। आ हु आ अ इति स्थिते पूर्वमाकारलोपः, तत उवङ प्राप्नोति। स चाकारलोपस्य स्थानिवत्त्वाद-जादिप्रत्ययपरत्वाभावान्न भवतीति यणि सति रूपं सिध्यतीत्यर्थः। **इतर इति**। हिर्हेतौ। यस्माद्योऽनादिष्टादचः पूर्वस्तत्कार्ये स्थानिवद्भावस्तस्माद् भगवान् **कात्यः** वार्तिककारः प्रसारणिभ्यो डं प्रोवाचेत्यारम्भ[4]वादिनो वचनम्। प्रत्याख्यानवाद्याह — **तेनासिद्धिरिति**। तद्व्याचष्टे — **असिद्धवदिति**। येनाकारलोपस्यासिद्धिस्तेन यणस्तु **ते** तव मतेऽपीति यच्छब्दाध्याहारेण योजनां दर्शयति — **तस्यासिद्धत्वादिति**। पूर्ववदार्थेनैव क्रमेण व्याचष्टे — **जुहुवतुरिति**। **तथैवेति**। आकारलोपस्यासिद्धत्वादुवङोऽप्राप्त्या यण् स्यादित्याशङ्कां परिहर्तुम् 'एङः पूर्वः' इत्युक्तमित्यर्थः। 'एङः' इति योगविभागेन पूर्वत्वविधानादात्वबाधनादुवङि सति 'जुहुवतुः' इत्यादिरूपसिद्धिरित्यर्थः। **तथैवेति**। 'जुहुवतुः' इत्यत्रोक्तेन न्यायेनेत्यर्थः। 'लिण् न' इत्यत्रात इत्यनुषज्यत इत्याशयेन व्याचष्टे — **लिड् धातुमात्रादिति**॥

सुपि स्थः ३.२.४.

[३, २२९]

(उद्द्योतनम्) योगविभागं विनापि रूपसिद्धिरिति कैश्चिदुक्तम्। तन्निरस्यति — **अत्र केचिदिति**। द्वाभ्यां पिबतीति द्विपः। पङ्कजादिवदेतो योगरूढा इति भावः। **तैलपायिकेति**। [5]'संज्ञायाम्' इति ण्वुल्। **नित्यसमासार्थमिति**। [6]'उपपदमतिङ्' इति नित्यसमासः। नेदं वाचनिकमित्याह — **प्रत्यासन्नत्वादिति**। **समस्थ इति**। समे तिष्ठतीति समस्थः, 'सुपि' इति योगविभागात् कर्तरि कः। तिष्ठतेरकर्मकत्वात् कर्मणीति न संबध्यते। बाध्यबाधकयोः स्व-शब्देनोपादानस्थल एव विशेषेण सामान्यबाध इति दर्शयितुं 'तक्र' इत्युक्तम्। 'ब्राह्मणेभ्यो दधि दीयताम्' इत्येतावत्युक्ते [7]कदाचित् कौण्डिन्याय सति संभवे दधि दीयते, असंभवे तक्रम्॥

---

[1] पा. सू. ६. १.४५.

[2] पा. सू. ३.१.१३६.

[3] 'पर्युदासाश्रयेऽपि' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ङ.

[4] वादिनां वचनम् — ङ.

[5] पा. सू. ३.३.१०९.

[6] पा. सू. २.२.१९.

[7] क्वचित् — अ.

[३, २२९]

(रत्नप्रकाशः) कच्छेन पिबतीति। केचिदाहुः—कच्छं पिबतीत्यविद्यमानमेवावयवार्थमाश्रित्य के कृते सिध्यति कच्छपादीति भावे आखूत्थादिसाधकमेव 'सुपि स्थः' इति सूत्रमिति। तन्न, कच्छेन पिबतीत्याद्यवयवार्थसत्त्वेन तमादाय कच्छपादिसाधनेनोपक्षीणस्य प्रकृतसूत्रस्यासन्तमर्थमाश्रित्यान्यथासिद्धत्वकथनानौचित्यात्। एकमेवार्थमादाय सर्वतद्धितप्रदर्शनोपपत्तौ तद्विधौ नानार्थनिर्देशानर्थक्यापत्तेश्च। **भावे यथा स्यादिति।** यद्यपि घञर्थे कविधानेन भावे कः सिध्यति, तथापि नित्यसमासार्थमिदमपेक्षितम्। **योगविभागादिति।** योगविभागसामर्थ्यादित्यर्थः। यदि कर्तुर्नापकृष्यते तर्हि योगविभागो व्यर्थः स्यादिति भावः। **न चान्यस्मिन्नर्थ आदिश्यत इति।** योगविभागस्य कर्तुरपकर्षमात्रे उपक्षीणत्वादिति भावः। **अनिर्दिष्टार्था इति।** परिभाषेयं ज्ञापकसिद्धेति [1]वक्ष्यति भगवान्। न्यायेनाप्येतत् सिध्यति, प्रतीयतेऽर्थोऽनेनेति प्रत्यय इत्यन्वर्थसंज्ञाविधानसामर्थ्येन कस्मिन्नर्थेऽयमित्याकाङ्क्षायामुपस्थितत्वात् प्रकृत्यर्थ एवायमिति कल्प्यत इति। यत्तु 'स्थः' इत्यनेन भावे विधीयमानः कः कर्तरि कं बाधेतेति। तन्न, विषयभेदेन तयोर्बाध्यबाधकभावायोगात्। यत्तु समाहितम् 'यद्यत्र साक्षाद्भावशब्दोपादानेन भावे को [2]विधीयेत तदा भावः कर्तारं [3]तक्रकौण्डिन्यन्यायेन बाधेत। सामर्थ्यात्त्वयं भावे व्यवतिष्ठत इति भावेन न बाध्यते कर्ता' इति। तदतिफल्गु, शङ्कायाः प्रत्ययविषयत्वेनार्थयोर्बाध्यबाधकभावनिराकरणस्यानुक्तोपालम्भमात्रत्वात्। साक्षाद्भावशब्दोपादाने भावस्य कर्तृबाधकत्वे मानाभावाच्च॥

[३, २२९]

(नारायणीयम्) असन्तमप्यवयवार्थमिति। [4]रूढिशब्दानामवयवार्थानुगमाभावात्। यथा गच्छतीति गौरिति व्युत्पन्नोऽपि गोशब्दस्तिष्ठत्यपि वर्तते, [5]जातिविशेषे रूढत्वात्। **नैतत् साध्विति।** रूढिशब्देष्वपि योऽर्थः संभवति स न त्यज्यते, त्यागे कारणाभावात्। अन्यत्रावृत्त्यर्थं हि रूढिराश्रीयते। यथा पङ्कजादिशब्दानां कुमुदादिनिवृत्तये। संभवति चात्र कच्छादेः पाने करणत्वम्, न तु कर्मत्वम्। तदाह—**कच्छेनेति।** यत्र त्वत्यन्तमेवावयवार्थानुगमाभावस्तत्र व्युत्पत्त्यर्थमेव क्रियोपादानमित्याह—**यत्र त्विति। नित्यसमासार्थ इति।** उपपदसमासो नित्यसमासः, तदर्थ इत्यर्थः। अनिर्दिष्टार्था इत्यस्य न्यायसिद्धतां दर्शयति—**प्रत्यासन्नत्वादिति।** 'यद्येवम्' इत्यादिः स्पष्टार्थः॥

तुन्दशोकयोः परिमृजापनुदोः ३.२.५.

[३, २३०]

(उद्द्योतनम्) नन्वालस्यसुखाहरणयोः प्रत्ययार्थत्वे तुन्दपरिमृज इत्यादौ कर्तृप्रतीतिर्न स्यात्,

---

[1] 'तुमर्थे सेसेन्' इति सूत्रे महाभाष्ये।

[2] विधीयते—ब.

[3] न्यायोऽयं 'मिदचोऽन्त्यात्परः' इति सूत्रभाष्ये प्रतिपादितः।

[4] रूढिशब्दानामवयवानुगमाभावात्—ङ.

[5] प्राणिविशेषे—ङ.

अत आह — **आलस्य इति।** **उत्पादने** [1]गम्यमान इत्यन्वयः। **तत्र सामर्थ्यादिति।** अन्यथा-लस्यसुखाहरणयोः प्रतीत्यसंभवादिति भावः। एतेन "अलस एवालस्यः, चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्।[3] आहरतीत्याहरणः, [2]'कृत्यल्युटो बहुलम्' इति कर्तरि ल्युट्" इति न्यासो निरस्तो वेदितव्यः। भाष्ये **तुन्दपरिमृज इति।** अत्र [3]'मृजेरजादौ संक्रमे' इति विभाषा वृद्धिर्न भवति। 'मृजोऽचि' इत्येव सिद्धेऽजादिग्रहणस्य मुख्याजादिपरिग्रहार्थत्वात्। अस्य च [4]"अन्तादिवच्च' इति गौणाजादित्वात्। सर्वस्य शोकापनोदकस्य सुखाहर्तृत्वात् 'शोकापनोदः' इति प्रत्युदाहरणमयुक्तम्, अत आह — **यः संसारेति।** भाष्ये 'मूलविभुजादिभ्यः' इति तादर्थ्ये चतुर्थी॥

[३, २३०]

(रत्नप्रकाशः) आलस्यसुखाहरणयोरिति। यस्मिन् कर्तर्यालस्यं सुखाहर्तृत्वं च गम्यते तत्रे-त्यर्थः। **शोकापनोद इति।** यः संसारानित्यत्वबोधनेन शोकमेव निवर्तयति, न सुखमाहरति स इत्यर्थः। **मूलविभुजादिभ्य इति।** मूलादिषूपपदेषु विभुजादिभ्य इत्यर्थः॥

[३, २३०]

(नारायणीयम्) यद्यालस्ये सुखाहरणे चार्थे प्रत्ययः कथं तर्हि 'तुन्दपरिमृजोऽलसः' इत्याद्यु-दाहरणं दत्तमित्यत्राह — **आलस्ये गम्यमान इति।** आहरणशब्दार्थमाह — **सुखोत्पादन इति।** ततश्च [5]"कर्तरि कृत्' इति कर्तर्येव प्रत्यय इत्याह — **तत्रेति।** ननु शोकापनोदे सुखस्योत्पत्तेः प्रत्युदाहरणमयुक्तमित्यत आह — **यः संसारेति।** 'मूलविभुजादिभ्यः' इति तादर्थ्ये चतुर्थीति स्पष्टत्वान्नोक्तम्॥

गापोष्टक् ३.२.८.

[३, २३०–२३१]

(उद्द्योतनम्) ननु 'पिबतेः' इति कथम्, पातेरपि ग्रहणसंभवात्, अत आह — **लुगिति।** [6]'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इति परिभाषया। [7]तत्साहचर्यात् [8]"गामा-दाग्रहणेष्वविशेषः' इति सत्त्वेऽपि 'गै शब्दे' इत्यस्यैव ग्रहणम्, न 'गाङ गतौ' इत्यस्य॥

[३, २३०–२३१]

(रत्नप्रकाशः) पिबतेरिति। [9]लुग्विकरणपरिभाषालभ्यार्थनिदर्शनमिदम्॥

---

[1] अवगम्यमान इत्यन्वयः — अ.
[2] पा. सू. ३.३.११३.
[3] महाभाष्ये १.१.३.
[4] 'अन्तादिवच्च' इत्येव 'अ, ऋ, लृ' कोशेषूपलभ्यते। 'आद्यन्तवत्' इति युक्तम्।
[5] पा. सू. ३.४.६७.
[6] परिभाषा ९१.
[7] गै शब्द इत्यस्यैव ग्रहणमित्यनेनास्यान्वयः।
[8] परिभाषा ११५.
[9] परिभाषा ९१.

[३, २३०–२३१]

(नारायणीयम्) [१]**लुग्विकरणपरिभाषयेति**। [२]'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' इत्यनया परिभाषया ॥

हरतेरनुद्यमनेऽच् ३.२.९.

[३, २३१]

(उद्द्योतनम्) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषयैव [३]घटीग्रहणसिद्धे-स्तद्ग्रहणं व्यर्थम्, अत आह — **घटेति**। ज्ञापनप्रयोजनं 'गोमत्यः' इत्यादौ [४]नुमाद्यभावः ॥

[३, २३१]

(रत्नप्रकाशः) घटघटीति। घटग्रहणेनैव सिद्धे घटीग्रहणं लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थम्। तेन 'महतीप्रियः' [५]इत्यादावात्वादिकं न ॥

[३, २३१]

(नारायणीयम्) लिङ्गविशिष्टेति। तेन दितिशब्दादुच्यमानो ण्यप्रत्ययो दितीशब्दान्[६]ङीषन्तान्न भवतीति [७]'स्त्रीभ्यो ढक्' इति ढगेव भवति 'दैतेयः' इति। तथा गोमतीत्यादौ नुमाद्यभावः ॥

शमि धातोः संज्ञायाम् ३.२.१४.

[३, २३१–२३२]

(उद्द्योतनम्) अनेन धातुग्रहणप्रत्याख्यानमित्याह — [८]**तत्रेति** ॥

[३, २३१–२३२]

(रत्नप्रकाशः) धातुग्रहणसामर्थ्यादिति। शमि उपपदे धातुमात्रादच् भवति, न त्वन्य इत्यर्थ-

---

[१] प्रदीपे 'लुग्विकरणपरिभाषालभ्यार्थे' इत्यत्र 'लुग्विकरणपरिभाषया लभ्यार्थे' इति पाठोऽभिमत इति प्रतीयते।

[२] परिभाषा ९१.

[३] घटीग्रह इति सिद्धेः — अ.

[४] उगिदचामित्यनेन प्राप्तिर्नुमागमस्य।

[५] 'आन्महतः' इति महच्छब्दस्य विहितमात्वं महतीशब्दस्यापि लिङ्गविशिष्टपरिभाषया प्राप्तम्, तदनित्यत्वान्न भवतीत्यर्थः।

[६] कृदिकारादिति ङीष् ॥ ङीबन्तात् — ङ.

[७] पा. सू. ४.१.१२०.

[८] प्रदीपे 'पृषोदरादित्वात् संज्ञायाम्' इत्यत्र 'तत्र पृषोदरादित्वात् संज्ञायाम्' इत्यन्नंभट्टाभिमतः पाठ इति भाति।

लाभार्थं धातुग्रहणम्। अन्यथा धातोरित्यनुवृत्त्यैव सिद्धे किं तेनेति भावः। धातुग्रहणनिराकरणपरं मतान्तरमाह — **कुणरवाडवस्त्विति**। **नैषा शङ्कुरेति**। शङ्कुरेत्येषा संज्ञा न भवति, किं तु[1] शंगरेति भावः। एतेन 'पृषोदरादित्वात् संज्ञायां गकार [स्य ककार] व्यत्ययेन शङ्कुराशब्दस्य 'सिद्धत्वात् तदर्थं धातुग्रहणं न कर्तव्यमित्यर्थः' इति निरस्तम्। पृषोदरादित्वेन सिद्धिमाश्रित्य सूत्रस्य तदवयवस्य वा प्रत्याख्याने [2]तत्सूत्रमात्रस्यैव [3]'व्याख्यानतः' इति परिभाषासहितस्य व्याकरणत्वापत्त्या समस्ताष्टाध्याय्या एवानर्थक्यापत्तेः। प्रकृतभाष्यस्य तदुक्तार्थकत्वासंभवाच्च॥

[३, २३१–२३२]

(नारायणीयम्) ननु शङ्कराशब्द एव शकुनिकायां प्रयुज्यते न शङ्गराशब्द इति किमुच्यते 'शङ्गरैषा' इति, तत्राह — [4]**तत्र पृषोदरादित्वादिति**॥

अधिकरणे शेतेः ३.२.१५.

[३, २३२–२३३]

(उद्द्योतनम्) प्रत्येकोपपदत्वशङ्कां निराह — **दिग्धेति**। व्याख्यानादिति भावः। दिग्धशब्दस्य सहेत्यव्ययेन कथं समासः, अत आह — **तत्रेति**। **मयूरेति**। शब्दत्रयस्य युगपत् [5]समास इत्यर्थ इति केचित्। अन्ये तु दिग्धस्य सहशब्देन प्राक् समासः, पश्चात् शयशब्देनोपपदसमासः। तथा च [6]'गतिकारक' इति स्वरसिद्धिरित्याहुः। [7]शयनकर्तरि [8]'वर्तमानानामुत्तानादीनामनन्तरस्य शेतेरिति वार्तिकार्थः। सुपीत्यनुवर्तनादुदात्तादीनामुपपदत्वं ज्ञेयम्। मत्वर्थीये शे सति गिरौ शेत इत्यर्थो [9]न लभ्यते, अत आह — **अन्ये त्विति**। [10]'नमो गिरिशाय च' इति नमके दर्शनेनास्य शसन्तत्वेऽव्ययत्वप्रसङ्गान्मत्वर्थीय एव शः। [11]न चार्थविरोधः, यथाकथंचित् साधुत्वान्वाख्यानस्य प्रयोगसिद्धार्थाविरोधित्वादित्यभिप्रेत्याह — **व्युत्पत्तिर्हीति**। [12]उपायानियमे हरिसंमतिमाह — **तदुक्तमिति**। वीरेषु भवं वीरैर्लब्धं वीराणामिदमिति वा [13]निमित्तसंकरेण **वैर**शब्द आख्यातः। वासयतीति वासः, अतिशयेन वासयतीति **वासिष्ठः**। वासस्यापि गुणत्वाङ्गीकारेणेयं व्युत्पत्तिः। वसिष्ठेन दृष्टमधीते वासिष्ठः। अत्र निमित्तसंकरेण प्रकृतिप्रत्ययावधिसंकरेण चान्वाख्यानम्। ऐकागारिकशब्दोऽपि 'एकेनागारेण [14]जयतीति वा, एकमगारं प्रयोजनमस्येति वा' निमित्तसंकरेणान्वाख्यातः॥

---

[1] सिद्धत्वाद्धचर्थं धातुग्रहणं — ब.
[2] पृषोदरादीनीति सूत्रमात्रस्यैवेत्यर्थः।
[3] परिभाषा १
[4] प्रदीपे 'पृषोदरादित्वात् संज्ञायाम्' इति दृश्यते। 'तत्र पृषोदरादित्वात् संज्ञायाम्' इति पाठोऽभिमत इति भाति।
[5] समास इति केचित् — अ.
[6] पा. सू. ६.२.१३९.
[7] शयेन — अ, लृ.
[8] एतेन वार्तिके 'उत्तानादिषु कर्तृषु' इत्यत्र 'उत्तानादीनां कर्तरि' इति पाठोऽन्नंभट्टाभिमत इति ज्ञायते।
[9] न सिध्यति — अ.
[10] तै. सं. ४.५.५.
[11] न वार्थविरोधः — ऋ.
[12] उपायनियमे — अ.
[13] निमित्तशब्देनार्थ उच्यत इत्युद्द्योते।
[14] वायतीति वा — अ.

[३, २३२–२३३]

(रत्नप्रकाशः) दिग्धसहपूर्वादिति। 'दिग्धसहे च' इत्युक्ते दिग्धसहशब्दयोरुभयोरुपपदत्वं प्रसज्येत, तन्मा भूत्, समस्तस्यैव तद्यथा स्यादित्येवमर्थमेवमुक्तम्। दिग्धेन सह शेत इत्यर्थे वृत्तिविषये मयूरव्यंसकादित्वाद्दिग्धसहशब्दयोः समासः, तस्मिन्नुपपदे शेतेरच्। **तद्धितो वेति**। वाशब्दोऽवधारणार्थः। तेन 'गिरिशः' इति लोकवेदसाधारण्येन तद्धितान्त एवाश्रयणीयः, न तु प्रकृतवार्तिकेन वेदमात्र इति सिद्धम्। अत एव लोमादिगणे गिरिशब्दः पठ्यते सर्वैः। एतेन प्रकृतवार्तिकाश्रयेण लोके गिरिशशब्दस्यासाधुत्वं वदन्तो भाष्याशयानभिज्ञा निरस्ताः। यत्तु "गिरौ गिरौ शेत इति [१]'संख्यैकवचनात्' इति सप्तम्यन्तात् शस्" इति। तत् तुच्छम्, ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात्॥

[३, २३२–२३३]

(नारायणीयम्) [२]'उत्तानादीनां कर्तरि' इति वार्तिकस्यायमर्थः — कर्तरि वर्तमानानामुत्तानादीनां प्रयोगे शेतेरजिति। सुपीत्यनुवर्तनात् तेषामुपपदत्वं बोद्धव्यम्। उत्तानः शेते उत्तानशयः। ननु 'गिरौ शेते' इत्यस्मिन्नर्थे कंचित् तद्धितं न पश्याम इत्यत आह — **यो गिराविति**। 'अन्ये तु' इत्यनेनास्मिन् पक्षे स्वस्यानभिरुचिं सूचयति, शस्प्रत्ययान्तस्याव्ययत्वात् 'गिरिशम्' इत्यादिप्रयोगायोगात्। ननु नित्यस्य शब्दस्यानेकधा व्युत्पत्तिः कथमुपपद्यत इत्याशङ्क्योपेयस्य सत्यस्य शब्दस्य व्युत्पत्तावुपायभूतानां कल्पितानां प्रकृतिप्रत्ययादीनां रेखागवयस्थानीयानामनियमेन [३]न नित्यत्वहानिरित्याह — **व्युत्पत्तिर्हीति**। **वैरेति**। वीरकर्म **वैरम्**, वीरेषु भवं **वैरम्**, वीराणामिदं **वैरम्**, इत्यादिनिमित्तसंकरेण वैरशब्दोऽन्वाख्यातः। वसिष्ठेन दृष्टं प्रोक्तं वा **वासिष्ठम्**, वसिष्ठशब्दोऽस्मिन्नस्तीति [वा] **वासिष्ठं** सूक्तम्। एकागारे तिष्ठतीति वा, एकागारेण जयतीति वा, एकमगारं प्रयोजनमस्येति वा **ऐकागारिकः** चोर उच्यते। आदिशब्देन [४]मरुत्तवास्तव्यादयो गृह्यन्ते। निमित्तशब्देन प्रत्ययोत्पत्तेर्निमित्तत्वादर्थ उच्यते। **अवधिः** प्रकृतिप्रत्ययादिः, तयोः **संकरेण** अनियमेन, केनचित् कंचित् प्रकारमाश्रित्यान्येनान्यं प्रकारमित्येवं वैरादय आख्याता इत्यर्थः। **गिरिशशब्दस्यासाधुत्वमिति**। [५]'गिरिशमुपचचार प्रत्यहं सा सुकेशी' [६]'आरोपितं यद् गिरिशेन पश्चात्' इत्यादौ। **इत्याहुरिति**। इति केचिदाहुरित्यर्थः। अन्ये त्वाहुः — यदा तु [७]लोमादित्वाच्छप्रत्ययस्तदा तत्र छन्दसीत्यभावाद् भाषायां प्रयोग उपपद्यते। अत एव 'तद्धितो वा' इति पक्षान्तरमुक्तं वार्तिककृतेति॥

---

[१] पा. सू. ५.४.४३.

[२] वार्तिके 'उत्तानादिषु कर्तृषु' इत्यत्र 'उत्तानादीनां कर्तरि' इति पाठोऽभिमत इति भाति।

[३] 'न' इति नास्ति — घ.

[४] मरुत्तशब्दे मरुत् अस्यास्तीत्यर्थे 'तप् पर्वमरुद्भ्याम्' इति वार्तिकेन तप्रत्ययः, मरुद्भिर्दत्त इत्यर्थे 'मरुच्छब्दस्योपसंख्यानम्' इति वार्तिकेन दाधातोरचस्तत्वम्, इति च द्वेधा व्युत्पत्तिः। वास्तव्यशब्दे 'वसेस्तव्यत्कर्तरि णिच्च' इति वार्तिकेन वसतीति वास्तव्यः, 'तद्धितो वा' इति वार्तिकेन वास्तुनि भव इति च व्युत्पत्तिः।

[५] कुमारसंभवे १.६०.

[६] कुमारसंभवे १.३७.

[७] लोमादित्वात् प्रत्ययः — ङ.

चरेष्टः ३.२.१६.

[३, २३३]

(**उद्द्योतनम्**) ननु कुरूंश्चरतीति, कुरुषु [1]चरतीत्यर्थैक्यात् किमर्थं कर्मण्युपपदे प्रत्ययो नाङ्गी-क्रियते, अत आह — [2]**कुरूनिति**। **भ्रमतीति**। अन्यत्रापि चरंस्तत्र बहुकालं यश्चरति स कुरु-चर इत्यर्थः। भाष्ये **यद्यमिति**। 'चरेष्टः' इति कर्मण्युपपदे चेद् भिक्षां चरतीति भिक्षाचर इति सिद्धेरत्र भिक्षाग्रहणं व्यर्थं स्यात्। अधिकरणे तु तेनाप्राप्तत्वात् तद्ग्रहणं सार्थकमित्यर्थः॥

[३, २३३]

(**रत्नप्रकाशः**) **अधिकरण इति वर्तत इति**। अनन्तरत्वात् तदेव संबध्यते उपपदत्वेनेति भावः। **कर्मणीत्यपि वर्तत इति**। तथा च विरोधाभावात् तस्मिन्नप्युपपदे चरेष्टः स्यादिति भावः। **चरेर्भिक्षाग्रहणं करोतीति**। टज्विधावुपपदत्वेनेति शेषः॥

[३, २३३]

(**नारायणीयम्**) यदि द्वितीयान्तस्य सप्तम्यन्तस्य [3]चार्थभेदो न स्यात् ततो द्वितीयान्तात् प्रत्य-यानुत्पत्तिप्रतिपादनमनर्थकमेव स्यात्। अतः कोऽनयोरर्थभेद इत्याशङ्क्याह — **यस्य कुरव इति**॥

दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्ति-कर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु ३.२.२१.

[३, २३४]

(**उद्द्योतनम्**) **वार्तिकेनेति**। अहेत्वाद्यर्थोऽयमारम्भः। तथा च हेत्वादिविवक्षाभावेऽचा टस्य बाधात् 'किंकरा' इति भवति। हेत्वादिविवक्षायां पूर्वसूत्रेण टे सति 'किंकरी' इत्यपि भवतीति प्रदीपाशय इति केचित्। अन्ये तु हेत्वादावन्यत्र च [4]दिवादिषूपपदेष्वजेव, न ट इति 'किंकरी' इत्यसाधुरेव। अत एव 'वार्तिकेन सूत्रस्य बाधितत्वात्' इत्युक्तम्। अन्यथाचि 'किंकरा' टेन 'किंकरी' इति भवतीति 'वार्तिकेन' इत्याद्यनुपयुक्तं स्यादित्याहुः॥

[३, २३४]

(**रत्नप्रकाशः**) **कियत्तदिति**। वार्तिकबलात् 'किंकरा' इति भवति। सूत्रे किंशब्दनिर्देशात्

---

[1] चरतीत्यत्रार्थैक्यात् — अ.

[2] प्रदीपे 'कुरूंश्चरतीति'। इति प्रतीकः, तदनन्तरं 'यस्य कुरव एव प्राप्याः स कुरूंश्चरतीत्युच्यते' इति दृश्यते। अतोऽत्र 'यस्येति' इति प्रतीको युक्तः। 'कुरूनिति' इत्येव प्रतीकः 'अ, ऋ, लृ' कोशेषु समुपलभ्यते। प्रदीपे 'कुरूंश्चरतीति यस्य कुरवः प्राप्याः स उच्यते' इत्यत्रंभट्टपाठः स्यादिति भाति।

[3] वार्थभेदः — ङ.

[4] दिव्यादिषूपपदेषु — अ, ऋ, लृ.

'किंकरी' इत्यपि साधु। एतेन "वार्तिकेन सूत्रस्य बाधितत्वाट्टस्याभावे 'किंकरी' इत्यसाधुः" इति निरस्तम्। अबाधेनोपपत्तौ बाधकल्पनायां मानाभावात्॥

[३, २३४]

(नारायणीयम्) वार्तिकेन सूत्रस्येति। उत्तरोत्तरं मुनित्रयस्य प्रामाण्याभ्युपगमात्॥

नासिकास्तनयोर्ध्माधेटोः ३.२.२९.

[३, २३५–२३६]

(उद्द्योतनम्) भाष्ये न्यासान्तरकरणं यथासंख्यनिरासार्थमित्याह — **यथासंख्येति।** भाष्ये [१]'नासिकायां ध्मश्च' इति योगान्तरम्। तत्र चकाराद् धेट इत्याकृष्यते। 'नासिकानाडी' इत्यादिवार्तिकत्वभ्रमं निराह — **वार्तिकस्येति॥**

[३, २३५–२३६]

(रत्नप्रकाशः) यथासंख्यस्याश्रयणेऽनाश्रयणे चावश्यं वक्तव्यमाह — **स्तने धेट इति।** वार्तिककृताप्यभिमतं सर्वं नोक्तमित्याशयेन भगवानाह — **अत्यल्पमिति। इदमिति।** [२]नासिकायां ध्मश्चेत्यर्थः॥

[३, २३५–२३६]

(नारायणीयम्) ननु सूत्रेणैव स्तने धेटः खश् सिद्धः, किं वार्तिकेनेत्यत आह — **यथासंख्येति॥**

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ३.२.५६.

[३, २३८–२४०]

(उद्द्योतनम्) भाष्ये **सौनागा इति।** [३]टिदादिसूत्रे ख्युन्ग्रहणे विद्यमानेऽपि संमत्यर्थं तदुक्तिः। अत्र 'अच्वौ' इति प्रतिषेधसामर्थ्यात् ख्युना मुक्ते ल्युडपि न भवति, [४]'आढ्यीकरणम्' इति [५]'ल्युट्-

---

[१] भाष्ये 'मुष्टिधयः' इत्यस्यानन्तरं 'नासिकायां ध्मश्च धेटश्च' इति वार्तिकं निर्णयसागरमुद्रिते समुपलभ्यते। तत्र 'नासिकायां ध्मश्च' इति पाठोऽन्नंभट्टाभिमतः, 'धेटश्च' इत्यनुवृत्तिलभ्यमित्यभिमतमिति भाति।

[२] भाष्ये 'मुष्टिधयः' इत्यस्यानन्तरं 'नासिकायां ध्मश्च' इति वार्तिकं निर्णयसागरमुद्रिते दृश्यते। तदत्राभिमतम्।

[३] टिड्ढाणञ् इति सूत्रे ख्युनश्चेति वार्तिक इत्यर्थोऽभिप्रेत इति भाति॥ उणादिसूत्रे — अ; दिवादिसूत्रे — ऋ; उदादिसूत्रे — लृ.

[४] आढ्यंकरणमिति — ऋ, लृ.

[५] 'ल्युट्ख्युनोः' इति नास्ति — लृ.

ख्युनोः रूपे [1]स्वरे च [2]विशेषाभावात्, [ख्युनि] प्रकृतेरादिरुदात्तः, लिति प्रत्ययात् पूर्वमुदात्तमिति ककाराकारस्योभयत्रोदात्तत्वादिति वृत्तावुक्तम्। तद् भाष्यविरोधेन दूषयति — **उत्तरत्रेति**। अस्मिन् सूत्रेऽनुपयोगकथनात् सामर्थ्याभावादिति भावः। भाष्ये **अथेदानीमिति**। ख्युनभावे [3]'आढचीभविता' इतिवत् [4]'आढचीभविष्णुः' इत्यपि कुतो न स्यात्, [5]'आक्वेः' इत्यधिकारे [6]'भुवश्च' इतीष्णुज्विधानादित्यर्थः। ननु क्रियाशब्दानां [7]पाचकादिवद्रूढत्वं नास्ति, अत आह — **यथेति**। **गच्छतीति**। गमेर्डोप्रत्ययविधानात्। रुढिषु क्रियानुपादाने हेतुमाह — **तेनेति**। नन्वेवम् 'आगामुकः' इत्यादौ कथं 'गतिसंबन्धः, [8]'लषपत' [9]इत्युकञस्ताच्छीलिकत्वात्, अत आह — **केचिदेवेति**। ताच्छीलिकाः [11]'केचिद्योगरूढाः, केचित् केवलरूढा इति प्रयोगानुसारादङ्गीक्रियत इति भावः। नन्वेतद् भाष्यकृतो नाभिप्रेतम्, अत आह — **अत एवेति**। **ग्रहणं** प्रतिपादयतीत्यन्वयः। सादृश्यार्थं सदित्यर्थः। सादृश्यस्य किंचिद्वैलक्षण्यगर्भत्वात्। **सर्वथा** साम्ये 'रुढिशब्दाः' इत्येव ब्रूयादिति भावः। गतिभिरविशेषणे हेतुमाह — **द्रव्येति**। **तदतिशयः** क्रियातिशयः। देवशब्दार्थविशेषकत्वं देवदत्तशब्दार्थविशेषकत्वं च प्रशब्दस्य न संभवतीत्याह — **प्रकर्षेणेति**। **तदवयवस्येति**। बहुव्रीहिः। देवदत्तशब्दस्यापि रुढि[शब्द]त्वादित्यन्वयः। ननु रुढिशब्देष्वपि गतियोगः क्वचिद् [12]दृश्यते, अत आह — **व्याघादय इति**। [13]'आतश्चोपसर्गे' इति कः॥

[३, २३८–२४०]

(रत्नप्रकाशः) ल्युटो वेति। [14]च्व्यन्त उपपद इति शेषः। **तदेव रूपमिति**। आढचीकरणमितीत्यर्थः। **स एव [च] स्वर इति**। कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वमित्यर्थः। **ईकारेणेति**। [15]'टिड्ढाणञ्' इति ङीपेत्यर्थः। **मुमा भवितव्यमिति**। [16]'खित्यनव्ययस्य' इत्यनेनेति शेषः। **उत्तरार्थमिति**। तथा च 'अच्वौ' इति निषेधस्योत्तरत्र चरितार्थत्वेनात्र ल्युटि 'आढचीकरणम्' इति भवत्येव। एतेन "अच्वाविति प्रतिषेधसामर्थ्यात् ल्युटोऽप्यप्रवृत्तौ 'आढचीकरणम्' इति न भवत्येव[17]" इति निरस्तम्। ल्युटमभ्युपगम्य 'अच्वौ' इति निषेधस्योत्तरार्थतां वदता भगवता विरोधात्। **न रूढिशब्दा गतिभिर्विशेष्यन्त इति**। गतियोगमन्तरेण ये रूढिशब्दास्तेऽत्र रूढिशब्दत्वेनाभिमताः। ये तु गतियोगमन्तरेण न रूढिशब्दास्तेषां रूढिशब्दतासिद्धये गति-

---

[1] स्वरे वा — अ.
[2] विशेषाभाव इति प्रकृतेः — ऋ, लृ.
[3] आढचो भवतीतिवत् — ऋ; आढचो भवितेतिवत् — लृ.
[4] आढचो भविष्णुः — ऋ, ल.
[5] पा. सू. ३.२.१३४.
[6] पा. सू. ३.२.१३८.
[7] पाचकादिवद्रूढित्वं — अ.
[8] गतिसंभवः — ऋ.
[9] पा. सू. ३.२.१५४.
[10] इति विहितस्यानञः — ऋ.
[11] 'केचिद्योगरूढाः' इति नास्ति — अ.
[12] ध्वन्यते — अ.
[13] पा. सू. ३.१.१३६.
[14] एतेन भाष्ये 'न चैवास्ति विशेषः ख्युनो वा ल्युटो वा' इति रत्नप्रकाशकृदभिमतः पाठ इति ज्ञायते। दृश्यमानेषु तु भाष्यपुस्तकेषु 'न चैवास्ति विशेषश्च्व्यन्त उपपदे ख्युनो वा ल्युटो वा' इत्येवोपलभ्यते।
[15] पा. सू. ४.१.१५.
[16] पा. सू. ६.३.६६.
[17] इदं वृत्तिकृतोक्तम्।

ख्युनोः रूपे [1]स्वरे च [2]विशेषाभावात्, [ख्युनि] प्रकृतेरादिरुदात्तः, लिति प्रत्ययात् पूर्वमुदात्तमिति ककाराकारस्योभयत्रोदात्तत्वादिति वृत्तावुक्तम्। तद् भाष्यविरोधेन दूषयति — **उत्तरत्रेति**। अस्मिन् सूत्रेऽनुपयोगकथनात् सामर्थ्याभावादिति भावः। भाष्ये **अथेदानीमिति**। ख्युनभावे [3]'आढ्यीभविता' इतिवत् [4]'आढ्यीभविष्णुः' इत्यपि कुतो न स्यात्, [5]'आक्वेः' इत्यधिकारे [6]'भुवश्च' इतीष्णुज्विधानादित्यर्थः। ननु क्रियाशब्दानां [7]पाचकादिवद्रूढत्वं नास्ति, अत आह — **यथेति**। **गच्छतीति**। गमेर्डोप्रत्ययविधानात्। रुढिषु क्रियानुपादाने हेतुमाह — **तेनेति**। नन्वेवम् 'आगामुकः' इत्यादौ कथं [8]'गतिसंबन्धः, [9]'लषपत' [10]इत्युकञस्ताच्छीलिकत्वात्, अत आह — **केचिदेवेति**। ताच्छीलिकाः [11]केचिद्योगरूढाः, केचित् केवलरूढा इति प्रयोगानुसारादङ्गीक्रियत इति भावः। नन्वेतद् भाष्यकृतो नाभिप्रेतम्, अत आह — **अत एवेति**। **ग्रहणं** प्रतिपादयतीत्यन्वयः। सादृश्यार्थं सदित्यर्थः। सादृश्यस्य किंचिद्वैलक्षण्यगर्भत्वात्। **सर्वथा** साम्ये 'रुढिशब्दाः' इत्येव ब्रूयादिति भावः। गतिभिरविशेषणे हेतुमाह — **द्रव्येति**। **तदतिशयः** क्रियातिशयः। देवशब्दार्थविशेषकत्वं देवदत्तशब्दार्थविशेषकत्वं च प्रशब्दस्य न संभवतीत्याह — **प्रकर्षेणेति**। **तदवयवस्येति**। बहुव्रीहिः। देवदत्तशब्दस्यापि रुढि[शब्द]त्वादित्यन्वयः। ननु रुढिशब्देष्वपि गतियोगः क्वचिद् [12]दृश्यते, अत आह — **व्याघादय इति**। [13]'आतश्चोपसर्गे' इति कः॥

[३, २३८–२४०]

(रत्नप्रकाशः) ल्युटो वेति। [14]च्व्यन्त उपपद इति शेषः। **तदेव रूपमिति**। आढ्यीकरणमितीत्यर्थः। **स एव [च] स्वर इति**। कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वमित्यर्थः। **ईकारेणेति**। [15]'टिड्ढाणञ्' इति ङीपेत्यर्थः। **मुमा भवितव्यमिति**। [16]'खित्यनव्ययस्य' इत्यनेनेति शेषः। **उत्तरार्थमिति**। तथा च 'अच्वौ' इति निषेधस्योत्तरत्र चरितार्थत्वेनात्र ल्युटि 'आढ्यीकरणम्' इति भवत्येव। एतेन "अच्वाविति प्रतिषेधसामर्थ्यात् ल्युटोऽप्यप्रवृत्तौ 'आढ्यीकरणम्' इति न भवत्येव[17]" इति निरस्तम्। ल्युटमभ्युपगम्य 'अच्वौ' इति निषेधस्योत्तरार्थतां वदता भगवता विरोधात्। **न रूढिशब्दा गतिभिर्विशेष्यन्त इति**। गतियोगमन्तरेण ये रूढिशब्दास्तेऽत्र रूढिशब्दत्वेनाभिमताः। ये तु गतियोगमन्तरेण न रूढिशब्दास्तेषां रूढिशब्दतासिद्धये गति-

---

[1] स्वरे वा — अ.
[2] विशेषाभाव इति प्रकृतेः — ऋ, लृ.
[3] आढ्यो भवतीतिवत् — ऋ; आढ्यो भवितेतिवत् — लृ.
[4] आढ्यो भविष्णुः — ऋ, लृ.
[5] पा. सू. ३.२.१३४.
[6] पा. सू. ३.२.१३८.
[7] पाचकादिवद्रूढित्वं — अ.
[8] गतिसंभवः — ऋ.
[9] पा. सू. ३.२.१५४.
[10] इति विहितस्यानञः — ऋ.
[11] 'केचिद्योगरूढाः' इति नास्ति — अ.
[12] ध्वन्यते — अ.
[13] पा. सू. ३.१.१३६.
[14] एतेन भाष्ये 'न चैवास्ति विशेषः ख्युनो वा ल्युटो वा' इति रत्नप्रकाशकृदभिमतः पाठ इति ज्ञायते। दृश्यमानेषु तु भाष्यपुस्तकेषु 'न चैवास्ति विशेषश्च्व्यन्त उपपदे ख्युनो वा ल्युटो वा' इत्येवोपलभ्यते।
[15] पा. सू. ४.१.१५.
[16] पा. सू. ६.३.६६.
[17] इदं वृत्तिकृतोक्तम्।

योगो भवत्येव। यथा — आगामुकः, प्रवर्षुकः, व्याघ्रः, इत्यादि। **प्रदेवदत्त इति**। देवदत्त इत्यर्थे 'प्रदेवदत्तः' इति न भवतीति भावः। प्रगत आचार्यः 'प्राचार्यः' इतिवत् प्रगतो देवदत्तः 'प्रदेवदत्तः' इति भवत्येव॥

[३, २३८–२४०]

(नारायणीयम्) तदयुक्तमिति। उत्तरार्थत्वेनार्थापत्तेः परिक्षयात्। यत्तु कैश्चिदुच्यते 'उत्तरार्थत्वे तत्रैव कर्तुमुचितत्वादिह करणसामर्थ्यादिहार्थत्वमप्यस्ति' इति। तन्न, भाष्यविरोधात्। [1]भाष्यकारेण ह्युत्तरार्थत्वमेवावस्थापितम्। 'रूढिशब्दास्ताच्छीलिकाः' इत्येव सिद्धे किमर्थं प्रकारग्रहणमित्याशङ्क्य तस्योपयोगं दर्शयन् व्याचष्टे — **यथा रूढिशब्देष्विति**। रूढिशब्देषु व्युत्पत्त्यर्थमेव क्रिया, न शब्दप्रवृत्तिनिमित्तमित्येतदेवान्वयव्यतिरेकाभ्यां स्फोरयति — **तेनेति**। **सादृश्यार्थमिति**। [2]प्रकृष्टगुणे न्यूनगुणस्य सादृश्यं संभवति। ततश्चायमर्थः संपद्यत इत्याह — **रूढिशब्दानामिति**। ताच्छीलिकानां [3]गतिभिर्विशेषणाभावे हेतुमाह — **द्रव्योपलक्षणार्येति**। यत्र तु न द्रव्योपलक्षणार्था क्रिया, किं तर्हि, स्वनिष्ठैव प्रवर्तते, तत्र गतिसंबन्धस्तस्याः 'आगामुकः' इत्यादौ। **तदवयवस्येति**। स देवशब्दोऽवयवो यस्येति बहुव्रीहिः। अवयवस्य समुदायस्य च रूढिशब्दत्वमित्यर्थः। ननु रूढिशब्देष्वपि क्वचिद् गतिसंबन्धो दृश्यत इत्युक्तार्थस्य व्यभिचार इत्याशङ्कां परिहरति — **व्याघ्रादय इति**॥

कर्तरि भुवः खिष्णुच्खुकञौ ३.२.५७.

[३, २४०–२४१]

(उद्द्योतनम्) भाष्ये **स्वरार्थश्चकार इति**। प्रत्ययस्वरेणैवोकारस्योदात्तत्वसिद्धेः। इकारादित्वेऽन्तोदात्तार्थं चः कर्तव्यः। नञ इति षष्ठ्यन्तत्वशङ्कां निराह — **नञ इति**। कृत्याद्यन्ताश्चार्वादयश्च नञ उत्तरेऽन्तोदात्ताः। अकर्तव्यम्, अवर्षुकः, अनलङ्करिष्णुः। ननु चकारो न कर्तव्य इत्युक्तेः [4]कथमेतस्येष्णुज्ग्रहणेन ग्रहणम्, अत आह — **क्स्नुजिति**। खिष्णुचो द्व्यनुबन्धकत्वादिष्णुज्ग्रहणेन ग्रहणं न संभवति, [5]'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति नियमात्, अत आह — [6]**इकारेति**। [7]स्वरार्थमेव तदुच्चारणादिति भावः॥

[३, २४०–२४१]

(रत्नप्रकाशः) नञस्त्विति। परस्येति शेषः। **एष स्वर इति**। नञ उत्तरस्येष्णुजन्त-

---

[1] भाष्यकारेणास्योत्तरार्थत्वम् — ङ.

[2] प्रकृष्टगुणकवस्तुनिरूपितं सादृश्यमित्यर्थः। सादृश्यानुयोगिभूतं न्यूनगुणकं संबन्धसामान्येन विवक्षितं बोध्यम्। प्रकृष्टगुणकसादृश्यं न्यूनगुणके संभवतीति यावत्।

[3] गतिभिर्विशेषणत्वाभावे — घ, ङ.

[4] कथमेतस्येष्णुग्रहणेन — अ, लृ; इष्णुग्रहणम् — ऋ.

[5] परिभाषा ८३.

[6] 'इकारेति' इति नास्ति — अ.

[7] स्वरार्थमेतदुच्चारणादिति — अ.

स्यान्तोदात्तत्वमित्यर्थः। **अयमपीति**। ख्स्नुजपीत्यर्थः। नन्विकारोच्चारणसामर्थ्याद् यथा [1]तदनुबन्धकपरिभाषा न प्रवर्तते, एवं चकारानुबन्धकरणसामर्थ्यात् [2]लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इत्यत आह — **अथवेति**। [3]**असिद्धमिति**। यद्यपि चित्त्वसामर्थ्यात् षत्वमसिद्धं नेत्यपि वक्तुं शक्यते, तथापि मन्दबुद्धयनुग्रहाय स्पष्टप्रतीत्यनुकूल इकारादिः कृत इति बोध्यम् ॥

[३, २४०–२४१]

(नारायणीयम्) ननु यदेकारो न क्रियते तदा चकारस्यापि न कर्तव्यता स्वरार्थत्वाभावादिति किमुच्यते 'अयमपीटि कृते' इत्यादि, तत्राह — **क्स्नुच्प्रत्यय इति**। ननु सत्यपीकारादित्वे [4]"तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषया [5]अलंकृञादिसूत्रविहितस्येष्णुच एव ग्रहणं स्यात्, नैतस्येत्यत आह — **खिष्णुचीति** ॥

स्पृशोऽनुदके क्विन् ३.२.५८.

[३, २४१–२४२]

(उद्द्योतनम्) ननु [6]पकाररहितत्वे निर्देशात् कथं संदेहः, अत आह — **किमिति**। नन्वेकपकारनिर्देशेऽपि क्विपः क्विरूपसद्भावाद् ग्रहणं स्यादेव, अत आह — **तदनुबन्धकेति** ॥

[३, २४१–२४२]

(रत्नप्रकाशः) संदेहः स्यादिति। एकपकारको वा निर्देशो द्विपकारको वेति संदेहात् क्विर्वा क्विब् वेति संदेह इति भावः। **सर्वसंदेहेषु चेदमुपतिष्ठत इति**। प्रौढिमात्रमेतत्, व्याख्यानपरिभाषामाश्रित्य निर्णायकप्रत्याख्याने [7]'पृषोदरादीनि यथोपदिष्टम्' इत्येतत्सूत्रमात्रस्यैव स्थापनीयत्वापत्तेः। यत्तु [8]"तदनुबन्धकपरिभाषया च क्विपो ग्रहणाभावः' इति। तन्न, एकपकारको वा द्विपकारको वेति संदेहे विद्यमाने तत्परिभाषायास्तत्राप्रसङ्गेन व्याख्यानपरिभाषाया अप्रवृत्तौ तया निर्णयासंभवात्। तत्प्रवृत्तौ तयैव निर्णये परिभाषान्तरसंचारानर्थक्याच्च ॥

[३, २४१–२४२]

(नारायणीयम्) किमेकेति। श्रुतौ विशेषाप्रतिभानादेवं संदेहः स्यादित्यर्थः। ननु क्विरिति व्याख्यानेऽपि क्विपः क्विरूपसद्भावाद् ग्रहणं कस्मान्न भवतीत्यत आह — **तदनुबन्धकेति**। यद्वा न केवलं व्याख्यानादेव, [9]तदनुबन्धक[10]ग्रहणपरिभाषया च क्विपो ग्रहणाभाव इत्यर्थः ॥

---

[1] परिभाषा ८३.
[2] परिभाषा ११४.
[3] असिद्धत्वमिति — ब.
[4] परिभाषा ८३.
[5] पा. सू. ३.२.१३६.
[6] क्विप्रत्ययस्य कुरिति पकाररहिततया निर्देशे सति तादृशनिर्देशादित्यर्थः।
[7] पा. सू. ६.३.१०९.
[8] परिभाषा ८३.
[9] परिभाषा ८३.
[10] ग्रहणं परिभाषयैव क्विपः — ङ.

त्यदादिषु दृशोऽनालोचने कञ् च ३.२.६०.

[३, २४२–२४३]

(उद्द्योतनम्) कार्यद्वयं स्वरो [1]विशेषणार्थत्वं चेति। [2]कः कृतोऽर्थः, कथं वा तस्यानुपपत्तिः, अत आह — **य इति। कर्मण एवेति।** [3]'लान्तस्य कर्ता कर्मवत्' इति वचनान्नात्र कर्मवद्भावः ॥

[३, २४२–२४३]

(रत्नप्रकाशः) विशेषणार्थस्तर्हीति। तथा चावश्यं विशेषणार्थं ञकार [5]आश्रीयमाणे तेनैव स्वरोऽपि सिध्यतीति भावः। **कृदर्थानुपपत्तिरिति।** कृदर्थस्य कर्तुस्तादृगादिशब्दैरप्रतीतिरनुपपत्तिः। तथा च कृत्प्रत्ययेन तादृगादिशब्दसाधनमयुक्तमिति भावः। तर्हि कथं तत्साधनं युक्तमित्यत आह — **इवार्थे तु तद्धित इति। कर्मकर्तायमिति।** तथा च कृदर्थ उपपन्न एवेति भावः ॥

[३, २४२–२४३]

(नारायणीयम्) ननु नकारकरणेऽपि विशेषाभावात् प्रश्नप्रतिवचने अनर्थके इत्यत आह — **ञकारस्येति।** नन्वेकस्य कर्मत्वं कर्तृत्वं च विरुद्धमिति किमुच्यते कर्मकर्तायमिति, तत्राह — **कर्मण एवेति।** कश्चित् प्राकरणिक आभिजात्यादिगुणविशिष्टतया प्रकृतोऽन्य इव जनैरवलोक्यमानस्तदालोकनेऽत्यन्तं[4] सौकर्यमाचरन् तमिवात्मानं पश्यतीत्यस्यां विवक्षायां तादृशादयः शब्दाः प्रयुज्यमाना अनुगुणं व्युत्पत्तिनिमित्तमर्थं लभन्त इति कृदर्थस्य कर्तुर्नात्र काचिदनुपपत्तिरिति भाष्यकारस्याशयः ॥

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ३.२.६१.

[३, २४३–२४४]

(उद्द्योतनम्) ननु सदादेरकर्मकत्वात् कर्मणीत्यसंबन्धात् सुपीत्येव संबध्यत इति वचनानर्थक्यम्, अत आह — **सदादीनामिति।** द्विषादीनामित्यर्थः। **पूर्वेति।** पूर्वपदस्थान्निमित्तात् परस्य सस्य षो वा स्याच्छन्दसि। ननु [5]'गदमद' इत्यतोऽनुपसर्ग इत्यनुवर्तनादनुपसर्ग इति न वक्तव्यमेव, अत आह — [6]**अनुपसर्गेति। सिद्धत्वात्** [7]ज्ञापकेनैवेत्यादिः। नन्वनुवृत्त्यापि लब्धस्य न [8]ज्ञापनप्रयोजनत्वमित्याशङ्क्यासाधारणप्रयोजनमाह — **यत्र चेति** ॥

---

[1] विशेषणार्थं चेति — अ.
[2] को दृष्टार्थः — अ, ऋ, लृ.
[3] महाभाष्यम् ३.१.८७.
[4] अत्यन्तसौकर्यं — ङ.
[5] पा. सू. ३.१.१००.
[6] अनुपसर्गस्येति — अ, ऋ, लृ.
[7] ज्ञापकेनेत्यादिः — अ.
[8] ज्ञानप्रयोजनमाशङ्क्यासाधारण — अ; ज्ञानप्रयोजनत्वमित्याशङ्क्यासाधारण — ऋ, लृ.

[३, २४३–२४४]

(रत्नप्रकाशः) सदादिषु केचन सकर्मका वर्तन्त इति तेभ्यः कर्मण्येवोपपदे प्रत्ययः प्रसज्येत, सुपि त्विष्यत इत्याशयेनाह — **सदादिष्विति। वेदिषदिति।** वेद्यां सीदतीत्यर्थः। [1]"पूर्वपदात्' इति षत्वम्। **दुरोणसदिति।** दुरोणे गृहे सीदतीत्यर्थः। **तत्र वक्तव्यं भवतीति।** यत्तु "[2]'स्पृशोऽनुदके क्विन्' इत्यपि सोपसर्गान्न भवति — अपस्पृक्, संस्पृक्, इति" इति। तन्न, ज्ञापनफलस्य विशिष्य भगवतोक्तत्वेन तस्योपलक्षणतया व्याख्यानस्य लक्षणैकचक्षुष्काणामसंभवात्॥

[३, २४३–२४४]

(नारायणीयम्) ननु सुपीत्यनुवर्तनादेव सिद्धे किमर्थं सुब्ग्रहणं चोद्यत इत्यत्राह — **सदादीनामिति।** येऽत्र सकर्मकास्तेषु कर्मणीति संबध्येतेति तन्निवृत्त्यर्थं पुनः सुब्ग्रहणम्। ननु [3]'वदः सुपि' इत्यत्र [4]'गदमद' इत्यतोऽनुपसर्ग इत्यधिकारादेव सिद्धमिति वदन्तं प्रत्याह — [5]**यत्रानुपसर्गेति।** यद्यपि निपातनैर्विच्छिन्नत्वादत्रानुपसर्गग्रहणानुवृत्तिर्नास्ति, तथापि मण्डूकप्लुत्यादिन्यायाश्रयेणानुवृत्तिः संभाव्यते। [6]तदपि यत्र नास्ति, तदपि ज्ञापनफलमित्यर्थः॥

अदोऽनन्ने ३.२.६८. क्रव्ये च ३.२.६९.

[३, २४४]

(उद्द्योतनम्) वासरूपनिवृत्तौ प्रयोजनमाह — **तेनेति**॥

[३, २४४]

(रत्नप्रकाशः) **वासरूपनिवृत्त्यर्थमिति।** तेन 'क्रव्यादः' इत्यण् न भवतीति भावः॥

[३, २४४]

(नारायणीयम्) वासरूपनिवृत्तेः फलमाह — **तेनेति**॥

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ३.२.७१.

[३, २४५–२४६]

(उद्द्योतनम्) [7]पक्षे ण्विन्प्रसङ्गं निराह — **ण्विन्प्रत्ययेति।** ननु सुबुत्पत्तौ पदत्वम्, सा च

[1] पा. सू. ८.३.१०६.
[2] पा. सू. ३.२.५८.
[3] पा. सू. ३.१.१०६.
[4] पा. सू. ३.१.१००.
[5] प्रदीपे 'यत्र चानुपसर्ग' इत्यत्र चकाररहितः पाठ आश्रितः।
[6] अनुवृत्तिसंभावनमपीत्यर्थः।
[7] सूत्रपक्षे — अ.

प्रातिपदिकात्, ङसि च कृदन्तत्वेन प्रातिपदिकत्वम्, तथा च पदसंज्ञाङसोरन्योन्याश्रयः, अत आह — **भावीति**। **ङसैवेति**। [१]'अत्वसन्तस्य' इति दीर्घेण 'श्वेतवाः' इत्यादि[२]रूपस्येत्यर्थः। निपातनेनोत्वासिद्धिं द्वेधाह — **अवया इत्यादीनीति**। **पदमात्रेति**। यत्र भाविपदत्वं तत्र सर्वत्र 'अवयाः' इति निपातनमित्यर्थः। **आकारादिति**। 'अवयाः' इत्याकारान्तानामेव निपातनात्। **कर्तव्यमिति**। [३]'अवयाः' इति सूत्रे चकारोऽनुक्तसमुच्चयार्थो [४]व्याख्येय इत्यर्थः। निपातनेन 'उक्थशोभ्याम्' इति न सिध्यतीत्याह — **ण्विनि हीति**। संबुद्धौ 'उक्थशाः' इति निपातनेन नलोपमात्रं निपात्यते, वृद्धयैवाकारस्य सिद्धत्वात्। तथा च 'उक्तशास् भ्याम्' इति स्थितेऽतः परत्वाभावादुत्वं न स्यादिति ङसपि वक्तव्य इत्यर्थः। मन्त्रे 'उक्थशोभ्याम्' [५]इत्यादेरदर्शनात् ङस् न वक्तव्यः, अत आह — **यदीति**। [६]दर्शनमस्ति चेद्वक्तव्यम्, न चेन्न वक्तव्यमेवेत्यर्थः॥

[३, २४५–२४६]

(रत्नप्रकाशः) श्वेतवहादीनामिति। आदिशब्देनोत्तरसूत्रस्थस्यावयजेरपि ग्रहणम्। **ङस् वक्तव्य इति**। असरूपत्वात् पक्षे ण्विनपि भवति श्वेतवाडिति। एतेन 'ण्विन्प्रत्ययबाधनार्थः' इति निरस्तम्। नित्यं ङसा ण्विन्बाधनाभ्युपगमे मानाभावात्। न च पाक्षिकबाधनाभिप्रायेणैव तथोक्तमिति वाच्यम्, 'यत्र ङसन्तस्य पदत्वं भविष्यति तत्र ङस्, अन्यत्र ण्विन्' इति व्यवस्थापर[७]स्वोत्तरग्रन्थविरोधात्। अथवा 'ण्विन्नेव' इत्येवकारस्तन्मुखाद् [८]घुणाक्षरन्यायेन निस्सृत इति ङसित्यत्र ङसपीति व्याख्यानसंभवादविरोधो वा तत्र ज्ञेयः। परं तु नित्यबाधकत्वमेव तद्ग्रन्थादन्यैरवगतमित्यन्यदेतत्। **पदस्य चेति**। ङसन्तस्य पदत्वे भाविनि ङस् वक्तव्य इति भावः। **किंप्रयोजनमिति**। बहुव्रीहिरयम्। ङस्विधानमिति शेषः। उत्तरमाह — **र्वर्थमिति**। [९]'ससजुषो रुः' इति सकारषकारयो रुत्वं विधीयते, न तु [१०]हकारस्य [११]ढकारस्य डकारस्य [१२]शकारस्य [१३]जकारस्य वेति भावः। **र्वर्थं निपातनमिति**। पदान्तत्वे विषये सति जकारहकारशकाराणां रुत्वम् [१४]'अवयाः' इत्यादिना निपातितमिति मन्यते। [१५]'अवयाः श्वेतवाः' इत्यादिसूत्रे उक्थशस्शब्दस्य पाठाभावादपि रुत्वनिपातनार्थमेव तत् सूत्रमिति वक्तुं युक्तमिति मन्यमान आह — **आतश्चेति**। **सामान्येनेति**। [१६]'ससजुषोः' इति सूत्रेणेत्यर्थः। **सिद्ध इति**। इति कृत्वेति शेषः। **तन्न वक्तव्यमिति**। ङसैव सिद्धे रुत्वनिपातनार्थम् [१७]'अवयाः' इत्यादिसूत्रं न कर्तव्यमिति भावः। **अवश्यमिति**। ङसि कृतेऽपीति शेषः। **दीर्घार्थमिति**। दीर्घनिपातनार्थमित्यर्थः। **संबुद्धाविति**। [१८]'अत्वसन्तस्य' इत्यत्रासंबुद्धावित्यनुवर्तत इति भावः। मध्यस्थः पृच्छति — **न तर्हीदानीमिति**।

---

[१] पा. सू. ६.४.१४.
[२] रूपसिद्धिरित्यर्थः — अ.
[३] पा. सू. ८.२.६७.
[४] व्याख्यायत इत्यर्थः — अ.
[५] इति दर्शनात् — ऋ, लृ.
[६] अदर्शनमस्ति चेत् — अ.
[७] स्वोक्तग्रन्थ — ब.
[८] लौ. न्या. साहस्री. पृष्ठम् ४३.
[९] पा. सू. ८.२.६६.
[१०] श्वेतवह्शब्द इति भावः।
[११] हकारस्य हो ढ इति ढत्वे ढकारस्य, तस्य जश्त्वे डकारस्येति बोध्यम्।
[१२] पुरोडाश् इत्यत्रेति भावः।
[१३] अवपूर्वस्य यज इति भावः।
[१४] पा. सू. ८.२.६७.
[१५] पा. सू. ८.२.६७.
[१६] पा. सू. ८.२.६६.
[१७] पा. सू. ८.२.६७.
[१८] पा. सू. ६.४.१४.

वक्तव्यश्चेति। चोऽवधारणार्थः। वक्तव्य एवेत्यर्थः। **उत्वार्थमिति**। अतः परस्य रोरुत्वं क्रियते। ण्विन्प्रत्यये तूपधावृद्धावातः परस्य रोस्तन्न स्यादिति भावः। यत्तु 'उक्थशा इत्यपि संबुद्धचर्थं निपातनं कर्तव्यम्, यदि मन्त्रे दर्शनमस्ति' इति। तन्न, अचो व्यत्ययेनैव सिद्धौ मन्त्रे तद्दर्शनेऽपि निपातनानावश्यकत्वात्। ननु तर्हि [1]'अवयाः श्वेतवाः' इति सूत्रमेव व्यर्थं स्यात्। अज्व्यत्ययेनैव सिद्धेरिति चेन्न, [2]'सुप्तिङुपग्रह' इत्यादिकारिकाविषयसंग्रहार्थमपि बहूनि सूत्राण्यन्यानि कर्तव्यानीत्यस्यापि वक्तुं शक्यत्वात्॥

[३, २४५–२४६]

(नारायणीयम्) **ण्विन्प्रत्ययबाधनार्थ इति**। न तु ण्विना सह समुच्चयार्थः। ननु 'पदस्य' इत्ययुक्तम्, डस्विधानकाले पदत्वायोगात्। डसि सति कृत्त्वात् प्रातिपदिकसंज्ञायां सुपि सति पदत्वादित्यत आह — **भाविपदेति**। निपातनेनासिद्धचा डसो वक्तव्यतामुपपादयति — **अवया इत्यादीनीति**। **अन्यथेति**। असति डस्विधावित्यर्थः। ननु डसोऽवश्यवक्तव्यत्वे स एव कर्तव्यः, किं निपातनेनेत्यत्राह — **तस्मादिति**। **उक्थशा** [3]**इत्येतदपीति**। चकारस्यानुक्तसमुच्चयार्थत्वाङ्गीकारात्। श्वेतवोभ्यामित्यादौ डसं विनोत्वस्यासिद्धिं दर्शयति — **ण्विनि हीति**। **यदि मन्त्रे दर्शनमिति**। यदि 'उक्थशाः' इति [4]संबुद्धचन्तस्य मन्त्रे प्रयोगो दृश्यते, तर्ह्येवमाश्रयणीयम्, नान्यथेत्यर्थः॥

स्थः क च ३.२.७७.

[३, २४६]

(उद्द्योतनम्) ननु 'शंस्थाः' इत्यत्र [5]'घुमास्था' इतीत्वं किं न स्यात्, अत आह — **ईत्वमवकारादावितीति**। अन्यथा [6]'घृतं घृतपावानः पिबत' इत्यादावपीत्वं स्यात्। 'घृतपावानः' इति वनिबयम्, न क्वनिबिति वकारप्रतिषेधो न कर्तव्य इति [7]'घुमास्था' इति सूत्रे स्थितम्, अत आह — **भाष्यकारेति**। [8]'वि' इति सप्तमीनिर्देशादेव तदादिविधौ लब्धे वकारादाविति वचनं मुख्यवकारादिपरिग्रहार्थमिति वदन्तं प्रत्याह — **भाष्येति**। [9]क्वन्नन्तस्य प्रत्याख्यानेनैतादृशकल्पनायोगात्, 'शंस्थाः' इति भाष्यकारेणोदाहृतत्वादित्यर्थः॥

[३, २४६]

(रत्नप्रकाशः) **शंस्था इति**। क्विपो लुप्तत्वात् [10]'अनल्विधौ' इति स्थानिवत्त्वनिषेधात्

---

[1] पा. सू. ८. २. ६७.
[2] महाभाष्यम् ३.१.८५.
[3] इत्येतदर्थमिति — ङ.
[4] संबुद्धचन्तस्यात्र प्रयोगः — ङ.
[5] पा. सू. ६.४.६६.
[6] तै. सं. १.३.१०.
[7] पा. सू. ६.४.६६.
[8] सति सप्तमी — अ, ऋ, लृ.
[9] तुन्नन्तस्य — अ, लृ; तुनः तस्य — ऋ.
[10] पा. सू. १. १.५६.

[1]'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रस्य नियमार्थत्वेन व्यवस्थापितत्वाच्च [2]'घुमास्थागापा' इतीत्वं न भवति। एतेन "[3]'ईत्वमवकारादौ' इति वचनाद् भाष्यकारवचनप्रामाण्याद्वा प्रत्ययलक्षणेनेत्वाभावः" इति निरस्तम्। [4]'ईत्वे वकारप्रतिषेधः' इति वचनस्य प्रत्याख्यातत्वात्। सत्यपि तस्मिन् वकारस्य लुप्तत्वेन तन्निषेधासंभवात्। न्यायसिद्धस्यार्थस्य भाष्यकारवचनप्रामाण्येन साधनानौचित्याच्च। **स यथैवाच् टं बाधत इति**। एतेनापि [5]'तत्र धातुग्रहणं न कर्तव्यम्' इति कस्यचिदुक्तिर्निरस्ता ॥

[३, २४६]

(नारायणीयम्) नन्वन्तरङ्गत्वात् प्रथमं वेर्लोपेऽपि प्रत्ययलक्षणेन 'शंस्थाः'[5] इत्यत्र [6]'घुमास्थादिसूत्रेणेत्वं प्राप्नोति। न च हलीति वचनाद्वर्णाश्रयत्वात् [7]'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इतीत्वमत्र न भवतीति वाच्यम्, अङ्गाधिकारे विधानात् प्रत्ययस्याक्षेपाद्धलादिप्रत्यये[8] तस्य विधानादित्यत आह — **ईत्वमवकारादाविति**। अस्मिन् वचने सति 'सुधीवा, सुपीवा' इत्यादौ न स्यादीत्वमिति तदनाश्रयेण परिहारान्तरमाह — **भाष्यकारेति** ॥

सुप्यजातौ णिनिस्ताच्छील्ये ३.२.७८.

[३, २४७]

(उद्द्योतनम्) सूत्रेणैव सिद्धेरुपसंख्यानं व्यर्थम्, अत आह — **अताच्छील्येति** ॥

[३, २४७]

(रत्नप्रकाशः) साधुकारिण्युपसंख्यानमिति। [9]अताच्छील्यार्थमिदम्। यः सकृदपि सम्यक् करोति स साधुकारीत्युच्यत इति भावः। एवं 'ब्रह्मणि वदः' इत्यप्यताच्छील्यार्थं वचनं ज्ञेयम् ॥

व्रते ३.२.८०.

[३, २४७–२४८]

(उद्द्योतनम्) उदाहरणे उदाहरणविशेषे, न तूदाहरणमात्रे[10] इत्याक्षेपेण प्रश्नः। अभक्षणे

---

[1] पा. सू. १.१.६२.

[2] पा. सू. ६.४.६६.

[3] का. वा. ६.४.६६–१. 'ईत्वे वकारप्रतिषेधः' इत्यस्यार्थानुवादोऽयम्।

[4] का. वा. ६.४.६६ – १.

[5] शमि धातोरिति सूत्र इत्यर्थः।

[6] पा. सू. ६.४.६६.

[7] परिभाषा १५२.

[8] एवं च वर्णस्य प्राधान्येनाश्रयणाभावान्न तस्य निषेधस्य विषयतेति भावः।

[9] अताच्छील्यार्थमिति। यः सकृदपि — ब.

[10] मात्राक्षेपेण — ऋ.

व्रतलोपाभावं शङ्कते — **नन्विति**। श्राद्धभोजननिषेधपरमिदम्, न त्वश्राद्धभोजनविधिपरम्, श्राद्धाश्राद्धभोजनयो रागतः प्राप्तत्वेन विध्यनपेक्षणात्। तथा च कदाचिदश्राद्धभोजनाभावेऽपि न व्रतलोप इत्यर्थः। 'बुभुक्षा' इत्यनेन भोजने रागात् प्रवृत्तिरित्युक्तम्। [1]रागप्राप्ते भक्षणे नापूर्वविधिः, किं तु परिसंख्येत्यत्र दृष्टान्तः — **पञ्चेति**। [2]"भक्ष्याः पञ्चनखाः [3]श्वाविड्गोधा-कच्छपशल्यकाः। शशश्च' इति याज्ञवल्क्यः। दृष्टान्तवैषम्यमाह — **स्थायीति**। **उच्यत इति**। अश्राद्धभोजननियमसंकल्पपक्षे व्रतलोप एवेत्यर्थः। [4]श्राद्धभोजिशब्देन विग्रहदर्शनात् तस्य लोके [5]प्रयोगप्रसङ्गं निराह — [6]**न हीति**। श्राद्ध[7]भोजिशब्देन नञ्समासे [8]"तत्पुरुषे तुल्यार्थ' इति [9]नञः प्रकृतिस्वरेणाद्युदात्तत्वम्। 'अश्राद्धं भुङ्क्ते' इत्युपपदसमासे तु [10]"गतिकारक' इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्। **नन्विति**। णिन्यन्त उत्तरपदे पूर्वपदमाद्युदात्तमित्युपपद-समासनञ्समासयोर्नास्ति स्वरभेद इत्यर्थः। **यदेति**। [11]'संज्ञायां च' इति [12]सूत्रात्। एतद्-भाष्यदर्शनात् तत्र संज्ञायामित्यस्यानुवृत्तिः कल्प्यत इति भावः। तस्मिन् सूत्रे 'पुष्पहारी, फल-हारी' इत्यादिवृत्तिदर्शनेन संज्ञानुवृत्तिर्नास्तीति मत्वाह — **अथेति**। तर्हि कीदृशं विग्रहवाक्यम्, अत आह — **एतदुक्तमिति**। असमर्थसमासस्य प्रयोजनमाह — **णिनीत्यत्रेति**। **कृत्स्वरः** कृदु-त्तरपदप्रकृतिस्वरः। तत्र संज्ञानुवृत्तौ [13]'गोतन्ति'सूत्रेऽपि तदन्वयप्रसङ्गे गोपालाद्युदाहरणासंगते-र्वृत्तावनुवृत्त्यकथनाच्च नञ्समासेऽपि न स्वरभेद इति प्रागुक्तमेव तात्पर्यमित्याहुः॥

[३, २४७–२४८]

(**रत्नप्रकाशः**) 'अश्राद्धभोजी' इति प्रकृतसूत्रोदाहरणं दुरुपपादमिति मन्यमानः पृच्छति — **किमुदाहरणमिति**। सूपपादमेव तदित्याशयेनोत्तरमाह — **अश्राद्धभोजीति**। प्रष्टाह — **किं य इति**। समाधाताह — **किं चात इति**। **व्रतलोपः स्यादिति**। न श्राद्धमश्राद्धमिति समर्थ-समास आश्रीयमाणे 'अश्राद्धं भोक्ष्ये' इति संकल्पस्यैव व्रतत्वसंभवेन तदभोजने तल्लोपः स्यादिति भावः। एतेन "ननु बुभुक्षाप्रयुक्तं [14]श्राद्धाश्राद्धभोजनं प्रसक्तम्। तत्राश्राद्धं भुङ्क्त इत्यनेन श्राद्धभोजनं निषिध्यते। यथा [15]"पञ्च पञ्चनखा भक्ष्याः' इति शशादिव्यतिरिक्तपञ्चनखभक्षणं [16]निवर्त्यते। तत्र कथं व्रतलोपः स्यात्। [17]स्थण्डिलस्थायीत्यत्र तु स्थण्डिलस्थानविपरीतगमना-

---

[1] रागप्राप्तभक्षणे — अ.

[2] याज्ञवल्क्यस्मृतिः आचाराध्याये श्लो. १७७. तत्र 'भक्ष्याः पञ्चनखाः सेधागोधा' इति दृश्यते। सेधाशब्दस्य 'श्वावित्' इत्यर्थश्च व्याख्यायां कृतः।

[3] 'श्वाविद्गोधा' इत्युचितं भाति।

[4] श्राद्धभोजनशब्देन — अ; श्राद्धभोजीशब्देन — ऋ, लृ.

[5] प्रयोगं निराह — अ.

[6] णिनिरिति — अ; णिनीति — ऋ, लृ.

[7] भोजनशब्देन — अ; भोजीशब्देन — ऋ.

[8] पा. सू. ६.२.२.

[9] नञ्प्रकृति — अ.

[10] पा. सू. ६.२.१३९.

[11] पा. सू. ६.२.७७.

[12] सूत्रेण तद्भाष्य — अ.

[13] पा. सू. ६.२.७८.

[14] श्राद्धभोजनं — ब.

[15] रामायणम् किष्किन्धाकाण्डे १७-३९.

[16] निवर्तते। तत् कथं — ब.

[17] प्रदीपे 'स्थायीत्यत्र' इत्यत्र 'स्थण्डिस्थायीत्यत्र' इति पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टः। तादृशपाठानुसारेणोपरि 'स्थानविपरीत' इत्यत्र 'स्थण्डिलस्थानविपरीत' इति पाठोऽभिमतः।

चरणे युक्तो व्रतलोपः" इति भ्रान्तशङ्का निराकृता। 'अश्राद्धभोजी' इति पदस्य वा, [1]"अश्राद्धं भुङ्क्ते यः स तद्व्रतः' इति तद्विग्रहवाक्यस्य वा [2]"पञ्च पञ्चनखा भक्ष्याः' इति वन्नियमवाक्यतायाः 'न ब्राह्मणं हन्यात्' इत्यादिवन्निषेधवाक्यतायाश्चासंभवेन तच्छङ्काया अतितुच्छत्वात्। **णिन्यन्तेन समासो भविष्यतीति**। नञा इति शेषः। **न श्राद्धभोजीति**। व्रते विषये सति णिनिरिति व्याख्यानात् नञ्समासमन्तरेणैव श्राद्धशब्द उपपदे भुजेर्णिनिः संभवतीति खट्वामारूढः खट्वारूढ इतिवत् कथंचिदलौकिकविग्रहोपलक्षणतया लौकिकविग्रहोपपत्तिः। एतेन 'न हि केवलः श्राद्धभोजिशब्दो व्रतविषय उपपद्यते, अश्राद्धभोजिशब्दस्यैव व्रतविषयत्वात्' इति निरस्तम्। अश्राद्धभोजिशब्देन व्रते गम्यमानेऽपि श्राद्धभोजिशब्दस्य व्रते विषये सति साधयितुं शक्यत्वात्। अन्यथा केवलेन गार्गिकादिशब्देन श्लाघादेरगम्यमानत्वेन गार्ग्यादिर्वुञपि न स्यात्। **एवं स्वर इति**। अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वमिति भावः। **इति चेष्यत इति**। इदस्त्वर्थः। कृदुत्तरपदप्रकृतिस्वरस्त्विष्यत इति भावः। **न भोजी श्राद्धस्येति**। अस्यालौकिकवाक्यस्य पूर्ववदुपपत्तिर्ज्ञेया। अन्यद् व्याख्यातार्थकभाष्यम्॥

[३, २४७–२४८]

(नारायणीयम्) दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादयुक्तमिदं भाष्यमित्याक्षिपति — **ननु बुभुक्षाप्रयुक्तमिति**। तस्माद् भोजनं न विधेयम्, अर्थात् प्राप्तत्वादित्यश्राद्धं भुङ्क्त एवेत्यवधारणं नोपपद्यते। तस्मादश्राद्धमेव भुङ्क्त इत्ययमेव नियमो युक्तः। तत्रार्थाच्छ्राद्धभोजननिवृत्तिः प्रतीयत इत्याह — **तत्राश्राद्धमिति**। अत्र सदृशदृष्टान्तमाह — **यथा पञ्चेति**। अत्रापि क्षुदुपघातार्थं प्राप्तं मांसभक्षणं पञ्चसु पञ्चनखेषु नियम्यमानमितरभक्षणमर्थान्निवर्तयति। एवं भाष्यमाक्षिप्य समाधत्ते — **उच्यत इति**। श्राद्धादन्यन्मया भोक्तव्यमेवेति पर्युदासवृत्तिमयोगव्यवच्छेदं चाश्रित्य 'अश्राद्धं भुङ्क्त एव' इति यदा नियमः क्रियते तदा निमित्ते सत्यलाभाशक्त्यादिना यस्मिन्नहन्यश्राद्धं न भुङ्क्ते तदा स्यादेव तस्य व्रतलोप इति भाष्यार्थः। भाष्येऽभिसंहितं स्वरदोषं विशदयति — **अव्ययपूर्वपदेति**। **अन्तोदात्तत्वमिति**। उत्तरपदस्य प्रत्ययस्वरेणान्तोदात्तत्वात्। 'ननु च' इत्यादिः स्पष्टार्थः। असमर्थसमासे कथं विग्रहः, कथं वा प्रत्यय उत्पाद्य इत्येतामाशङ्कां परिहर्तुमाह — **तदेतदिति**॥

आत्ममाने खश्च ३.२.८३.

[३, २४८–२५०]

(उद्द्योतनम्) ननु परात्मनोऽप्यात्मत्वात् कथं तेन तद्व्यावृत्तिः, अत आह — **आत्मशब्द इति**। स्वात्मापेक्षया भिन्नं [3]सर्वं परम्। [4]स्वात्मा **प्रत्यगात्मा**। एकस्य [5]'युगपत् कर्मत्वकर्तृत्वविरोधं विशिष्टाविशिष्टभेदेन परिहरति — **यदेति**। 'आत्मग्रहणसामर्थ्यात्' इति भाष्यतात्पर्य-

---

[1] अश्राद्धे भुङ्क्ते — ब.
[2] रामायणम्. किष्किन्धाकाण्डम् १७. ३९.
[3] सत्त्वं — अ.
[4] सर्वात्मा — ऋ.
[5] 'युगपत्' इति नास्ति — ऋ, लृ.

माह — **तत्र यदीति**। ननु 'लान्तस्य कर्ता कर्मवत्' इत्युक्तम्। तथा च खशन्तस्य कर्ता न कर्मवदिति कथमत्र यक्प्रसङ्गः, अत आह — **लान्तस्येति**। [1]'तदपेक्षायामत्र यक् कथं स्यात्, अत आह — **श्यनैवेति**। **सिद्धेः** स्वरसिद्धेः। **उपेक्षणीयत्वात्** 'कर्मापदिष्टो यग् यथा स्यात्' इति भाष्यस्येत्यर्थः। नन्वेवं 'शिश्ये' इत्यार्धधातुकस्याप्यनुदात्तत्वं स्यात्, अत आह — **सार्वधातुकेति**। मात्रशब्देन लादेशस्य निवृत्तिः॥

इति महाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य द्वितीयपादे प्रथममाह्निकम्

[३, २४८–२५०]

(रत्नप्रकाशः) [2]'स्वो ज्ञातावात्मनि' इत्युक्तत्वेनात्मशब्दोऽत्र स्वपर्यायः। आत्मनो माने आत्ममान इत्यर्थः। तत्रात्मन इति कर्तृषष्ठीं मन्यमानः पृच्छति — **आत्मग्रहणं किमर्थमिति**। सा कर्मषष्ठीत्याशयेन समाधत्ते — **परमाने मा भूदिति**। **कर्मकर्तरि चेति वक्तव्यमिति**। कृद्योगे कर्मकर्तरि च षष्ठी भवतीति वक्तव्यमित्यर्थः। तथा च कर्मणि वा कर्तरि वा कर्मकर्तरि वेयं षष्ठीति संदेहे [3]एकाज्द्विर्वचनन्यायेन कर्मकर्तर्येवेयं षष्ठीत्यवधारणं भविष्यतीति भावः। एतेन 'यदा प्रत्ययार्थः कर्ता आत्मानमेव पाण्डित्यादियुक्तं मन्यते तदासौ कर्मकर्ता भवति' इति निरस्तम्। कर्मकर्तुरत्यन्तप्रसिद्धत्वेन तत्पदार्थव्युत्पादनस्यानर्थक्यात्। 'कर्मकर्तरि चेति वक्तव्यम्' इति वाक्यार्थाज्ञानविजृम्भितत्वाच्च। यदप्युक्तम् 'तत्र यदि कर्तरि षष्ठी स्यात् तदात्मग्रहणमनर्थकं स्यात्, कर्तृसंबन्धाव्यभिचारान्मननक्रियायाः' इति। तदपि न, तस्य 'कर्मकर्तरि चेति वक्तव्यम्' इति वाक्यार्थत्वाभावात्। 'एवं तर्हि' इत्यादिना तद्युक्तेर्वक्ष्यमाणत्वेन पौनरुक्त्यदोषापाताच्च। **तर्त्हि वक्तव्यमिति**। कर्मकर्तरि चेत्यनुषज्यते, तच्छब्देनैव तत् परामृश्यते वा। **एवमपीति**। [4]'कर्तृकर्मणोः कृति' इत्यत्र 'कर्मकर्तरि च' इति वचनं विना कर्मण्येवेयं षष्ठीति निर्णयेऽपीत्यर्थः। **कर्मकर्तृग्रहणं कर्तव्यमिति**। प्रकृतसूत्र इति शेषः। **कर्मापदिष्टो यग् यथा स्यादिति**। खशः कर्मरूपकर्तर्थे इति कर्मवाचके सार्वधातुके परतो विधीयमानो यक् श्यनं बाधित्वा स्यादिति भावः। एतेन 'लान्तस्य कर्ता कर्मवदित्येतदनपेक्ष्यैवमुक्तम्' इति निरस्तम्। प्रकृते तत्सूत्रव्यापारस्यानपेक्षितत्वात्। [5]'आत्मानं पण्डितत्वेन मन्यमानः पण्डितंमन्य इति कर्तृरूपे कर्मण्येव हि खश् जातस्तत्र। अत एव 'श्यनैव सिद्धेर्वक्ष्यमाणत्वाद्यकः सिद्धान्तत्वाभावादुपेक्षणीयत्वात्' इत्यपि निरस्तम्। असंबद्धप्रलापत्वात्। न हि युक्त्या यक आनर्थक्यमुक्तमित्येतावता तदनपेक्ष्योक्तमिति सिध्यति। **अविशेषेणेति**। सार्वधातुकमात्र इत्यर्थः। तदेतदभिप्रेत्य वक्ष्यति — [6]'सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः' इति॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्री-
शिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
तृतीयस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्

---

[1] तदापेक्षायां — अ.

[2] अमरकोशे नानार्थवर्गे. श्लो. २११.

[3] अयं न्यायो महाभाष्ये ६.१.१. सूत्रे उक्तः।

[4] पा. सू. २.३.६५.

[5] आत्मना पण्डितत्वेन मन्यमानं पण्डितंमन्य इति — ब.

[6] महाभाष्यम् ६.१.१५८. अत्रार्थानुवादो बोध्यः।

[३, २४८–२५०]

(नारायणीयम्) प्रत्यगात्मवचन इति। प्रतिपुरुषमञ्चति चेष्टत इति प्रत्यङ अन्तर्यामी जीवात्मा देहाद्यवच्छिन्नः, तद्वचनः स्वशब्दपर्यायः, न तु चेतनद्रव्यवचनः, अत एवाह — **परव्यावृत्तिमिति**। चेतनद्रव्यवचने तु कर्मणि [१]षष्ठयां चेतनान्तरे कर्मणि प्रत्ययप्रसङ्गः। कथं पुनरेकस्यैवैकस्मिन् [२]मनने कर्मत्वं कर्तृत्वं च भवेदित्यत्राह — **यदा प्रत्ययार्थ इति**। एकस्याप्यात्मनः स्वरूपेण कर्तृत्वं पण्डितत्वादिविशिष्टरूपेण कर्मत्यं च युक्तमेवेत्यर्थः। 'आत्मग्रहणसामर्थ्यात् कर्मणि' इति भाष्यस्य तात्पर्यमाह — **तत्र यदीति**। **कर्तृसंबन्धेति**। मन्तात्र कर्ता। सर्वं हि मननं मन्तृकर्तृकमेवेत्यव्यभिचारादात्मग्रहणेन विशेषणमनर्थकमेव स्यादित्यर्थः। अनपेक्षायां हेतुमाह — **श्यनैवेति**। अविशेषशब्दार्थमाह — **सार्वधातुकमात्र इति**। तस्माच्छयन्यपि सति प्रत्ययस्वर एव भवति, न नित्स्वर इति स्थितम्॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे
तृतीयस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्

---

[१] षष्ठ्या चेतनान्तरे — ङ.   [२] जनने — घ.

तृतीयाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्

भूते ३.२.८४.

[३, २५०–२५४]

(उद्द्योतनम्) व्यपवृक्ता अपेता। 'भूते काले' इत्येकग्रन्थत्वशङ्कां निराह— **इतर इति**। अनेकपदार्थसंभवात् कथं तस्यैव ग्रहणम्, अत आह— **तस्यैवेति**। पदार्थानां स्थित्यादिहेतुमित्यन्वयः। [1]**अनुज्ञा** उत्पत्तिस्थित्यनुकूलत्वम्, **प्रतिबन्धः** नाशानुकूलत्वम्। नित्यस्य कालस्य कथं सत्ताव्यपवृक्तत्वम्, अत आह— **तत्रेति**। कालसंसर्गिणां सूर्यादीनां [2]या क्रिया परिस्पन्दलक्षणा, तया भिन्नयोपाधिभूतया [3]य औपाधिको भेदस्तदाश्रयो मासादिभेदव्यवहार इत्यर्थः। वैयाकरण[4]मतमाह— **अन्ये त्विति**। क्षणघटिकादिभेदेन [5]प्रसिद्धपरिमाणा। **अप्रसिद्धेति**। **अध्ययनादिक्रियायाः** प्रहरमधीते, प्रहरं गच्छतीत्यादौ। सूर्यादीत्यनेन गोदोहादेरपि कालोपाधित्वं सूचितम्। आवश्यकसूर्यक्रिययैव सर्वकालव्यवहारोपपत्तावतिरिक्तकाले न मानम्। न च सूर्यपरिस्पन्दस्य पिण्डसंबन्धघटकतया तत्सिद्धिः, ईश्वरेणैवान्यथा[6]सिद्धेरिति भावः। 'न वै' इत्यनेन [7]प्रश्नतादवस्थ्यमुक्तमित्याह—**ततश्चेति**। शब्दस्यानित्यत्वे भूतादिसंभवमाशङ्क्याह— **शब्दस्येति**। [8]अर्थप्रतीत्यर्थत्वाच्छब्दस्यार्थं प्रति गुणभावः। अनेन वर्तमानतायां शब्दस्य विशेष्यत्वसंभवो नास्तीति भाष्यार्थ उक्तः। [9]अनित्यत्वपक्षे शब्दभूतत्वाग्रहे हेत्वन्तरमाह— **अनित्यत्वेऽपीति**। अतीतस्य प्रकृतित्वासंभवादित्यर्थः। अस्मिन् पक्षे यथा वर्तमानस्य प्रकृतित्वसंभवः नैवं भूतभविष्यतोरिति भाष्ययोजना। भूत इत्यस्योच्चारित इत्यर्थश्चेदाह— [10]**उच्चारितेति**। अनुच्चारितस्य प्रकृतित्वासंभवाद् धातोः प्रत्ययविधानादेवोच्चारणलाभाद् भूत इति विशेषणं व्यर्थमित्यर्थः। भूत इति निर्देशस्य भूतकालस्य [11]चान्योन्याश्रयः प्रतीयते, स चायुक्तः, निर्देशं विनापि भूतकालसंभवात्, अत आह— **भवतेरिति**। भाष्ये **निर्देशः** अधिकारः। **शास्त्रीयं** [12]'स्वरादिनिपातमव्ययम्' इति। [13]**अनेनार्थेन** अतिक्रान्तार्थेन। कर्मणि घञ्, [14]**संबन्धः** संबन्धो भूतशब्द इत्यन्वयः। नित्यशब्दपक्षे नान्योन्याश्रय इति भावः। भाष्ये [15]वार्तिकेऽव्ययशब्दस्य

---

[1] 'अनुज्ञा' इति नास्ति— अ.

[2] 'या' इति नास्ति— अ.

[3] यदौपाधिको भेदः— अ.

[4] मत आह— अ.

[5] प्रसिद्धपरिमाणः— अ, ऋ, लृ.

[6] सिद्धिरिति— अ.

[7] प्रश्नातादवस्थ्यम्— अ.

[8] अर्थप्रतिपत्त्यर्थत्वात्— अ.

[9] नित्यत्वपक्षे— अ.

[10] प्रदीपे 'उच्चरितत्वलक्षण' इत्यत्र 'उच्चारितत्वलक्षण' इति पाठोऽभिमतः।

[11] चकारो नास्ति— अ.

[12] पा. सू. १.१.३७.

[13] प्रदीपे 'नित्येनार्थेन' इत्यत्र 'अनेनार्थेन' इति पाठोऽन्नंभट्टाभिमत इति भाति।

[14] संबन्धशब्दः कर्मणि घञन्त इत्यर्थः॥ प्रदीपे 'प्रतिद्वन्द्विना संबद्धोऽधिक्रियते' इत्यत्र 'प्रतिद्वन्द्विना संबन्धोऽधिक्रियते' इत्यन्नंभट्टपाठ इति भाति।

[15] वार्तिकस्थाव्ययशब्दस्येत्यर्थः।

तद्वल्लक्षणया न्यासान्तराभिप्रायेण प्रथमा व्याख्या। लक्षणासूत्रभेदयोः परिहाराय भूते-शब्दस्याव्ययस्य निर्देशादिति द्वितीया। भूतशब्दस्य स्वरादितुल्यत्वं न संभवति, [1]अविविधार्थ-गामिनो नियमेनातिक्रान्तवाचिनो भूतशब्दस्य निर्देशादिति तृतीयेति विवेकः। 'कुमारघाती' इत्यादिवार्तिकं व्याचष्टे — **यदीति**। **सामान्येन** भूतभविष्यद्वर्तमानकालसाधारण्येन। [2]'कुमार-शीर्षयोः' इति पुनर्विधानसामर्थ्यादर्थभेदो भविष्यति, अत आह — **पुनरिति**। [3]**वासरूपेति**। [4]कर्मण्यणो निवृत्त्यर्थमित्यर्थः। उभयोः सामान्यविधित्वे को दोषः, अत आह — **ततश्चेति**। [5]भविष्यद्वर्तमानयोरेवेष्यत इति भावः। भूताधिकारे तत्सिद्धिमाह — **सतीति**। [6]'कर्मणि हनः' इत्यनेन हि कर्ममात्र उपपदे भूते णिनिर्विधीयते[7]। कुमार[8]शीर्षयोस्तूपपदयोर्भविष्यद्वर्तमान-योरेव, [9]न भूत इतीष्टसिद्धिरित्यर्थः। [10]'कुमारशीर्षयोः' इति विधेः कालसामान्यपरत्वे [11]भूतेऽ-नुवादत्वादितरत्र विधित्वाद्विध्यनुवाददोषपरिहाराय भूतव्यतिरिक्तकालविषयत्वं सिध्यति। न च भूत एव वासरूपनिवृत्त्यर्थं पुनर्विधानमिति वाच्यम्, तथा सति [12]'कर्मणि हनः' इत्यनन्तरं 'कुमार-शीर्षयोश्च' इत्येव ब्रूयादिति भावः। **सतीति**। असति भूताधिकारे [13]'क्विप् च' इति सामान्य-विहितः क्विप् भूतेऽपि स्यात्, सति तु ब्रह्मादिष्वेव [14]हन्तेर्भूते नियम इत्युपपदान्तरे भूतातिरिक्त-काले क्विप् सिद्ध इत्यर्थः। ननु [15]'सुञो यज्ञसंयोगे' इति वर्तमानाधिकारे, न भूताधिकार इति कथमस्योपन्यासः, अत आह — **तत्र यदीति**। भूताधिकारप्रसङ्गेन वर्तमानाधिकारस्यापि प्रयोजनं कथ्यत इति भावः। **ङ्वनिपं** [16]'सुयजोर्ङ्वनिप्' इति विहितम्। **ततश्चेति**। सति तु वर्तमानाधिकारे वर्तमाने शता, भूते ङ्वनिबिति व्यवस्थासिद्धिरिति भावः। अधिकारा-भावेऽपि वासरूपेण ङ्वनिप् स्यात्, अत आह — **अथेति**। **कालभेद इति**। वर्तमानेऽपि ङ्व-निप् स्यादित्यर्थः। **सतीति**। प्रत्ययद्वयस्य कालभेदेन व्यवस्थाधिकाराधीनेत्यर्थः[17]। **सुषुपुष इति**। स्वपेर्लिटः [18]'क्वसुश्च' इति क्वसुरादेशः। [19]'वचिस्वपि' [20]इत्युत्वम्, द्वित्वम्, षत्वम्, सुषुप् वस् इति स्थिते [21]'वसोः संप्रसारणम्'। एतद् भूताधिकारस्य प्रयोजनम्। **नजिङ** [22]'स्व-पितृषोर्नजिङ्' इति विहितेन। वासरूपेण लिट् स्यात्, अत आह — **ताच्छीलिकेष्विति**। ण्वु-लैव सिद्धे निन्दहिंसादिभ्यो वुञ्विधानं ताच्छीलिकेषु वासरूपेण तृजादयो न भवन्तीति ज्ञापनार्थम्। [23]'अनुदात्तेतश्च' इत्येव युचि सिद्धे [24]'जुचङ्क्रम्य' इत्यत्र पदिग्रहणं ताच्छीलिकेषु ताच्छीलिका वास-

---

[1] विविधार्थगामित्वरहितस्येत्यर्थः।

[2] पा. सू. ३.२.५१.

[3] 'वासरूपेति' इति नास्ति — अ.

[4] कर्मण्यण्निवृत्त्यर्थमित्यर्थः — ऋ.

[5] 'भविष्यद्वर्तमानयोरेव' इत्यस्यानन्तरं 'सः' इत्यधिकम् — ऋ.

[6] पा. सू. ३.२.८६.

[7] 'विधीयते' इति नास्ति — अ.

[8] शीर्षयोस्तावदनयोर्भविष्यद्वर्तमानयोरेव — अ.

[9] 'न' इति नास्ति — ऋ.

[10] पा. सू. ३.२.५१.

[11] भूतेऽनुवादत्वादितरमात्रविधित्वात् — ऋ.

[12] पा. सू. ३.२.८६.

[13] पा. सू. ३.२.७६.

[14] हन्तेर्भूतनियम इति — अ.

[15] पा. सू. ३.२.१३२.

[16] पा. सू. ३.२.१०३.

[17] अधिकारादिनेत्यर्थः — अ.

[18] पा. सू. ३.२.१०७.

[19] पा. सू. ६.१.१५.

[20] वकारस्य संप्रसारणेनेति भावः।

[21] पा. सू. ६.४.१३१.

[22] पा. सू. ३.२.१७२.

[23] पा. सू. ३.२.१४९.

[24] पा. सू. ३.२.१५०.

रूपेण न भवन्तीति ज्ञापनार्थमिति [1]वक्ष्यते। [2]**नञीति**। नञ्युपपदे [3]हन्तेरसिप्रत्ययः, हन एहादेशश्च। [4]'उणादयो बहुलम्' इत्यत्र [5]'वर्तमाने लट्' इत्यतो वर्तमान इत्यनुवर्तते। [6]'लिटः कानज्वा' इति कानच्। [7]'ताच्छील्यवयोवचनशक्तिषु चानश्' वर्तमानाधिकारे विहितः। **असति** भूतवर्तमानाधिकारे। 'आदधानः' इत्यत्र रूपभेदाभावेऽपि स्वरभेदः स्यात्, चानशः सार्वधातुकत्वेन [8]'अभ्यस्तानामादिः' इत्याद्युदात्तत्वात्, कानच आर्धधातुकत्वेन तदभावात्, अत आह— **यावतेति**। चानशो लादेशत्वाभावेन लसार्वधातुकत्वाभावादुभयत्रापि चित्स्वर एवेत्यर्थः। **उपग्रहकृतः** आत्मनेपदपरस्मैपदकृतोऽर्थभेदः, तमेवाह— **कानजिति**। **भूते कानजिति**। क्वसुरित्यपि [9]द्रष्टव्यम्। तत्रासत्यधिकारे भूते [10]लः कर्त्रभिप्राये ताच्छील्यादिषु क्वसुर्न स्यात्। वासरूपविधिना तदङ्गीकारे वर्तमानेऽपि क्वसुः स्यात्। अधिकारात्तु भूते क्वसुः, वर्तमाने चानशिति सिध्यतीति भावः।

[३, २५०–२५४]

(**रत्नप्रकाशः**) स्वसत्तया [11]व्यपवृक्तं सर्वं भूतमित्युच्यते। तत्र विशेषपरिज्ञानाय पृच्छति— **कस्मिन्निति**। उत्तरमाह— **काल इति**। तस्यैव भूतादिशब्दवाच्यत्वेन सुप्रसिद्धत्वादिति भावः। **न वै कालाधिकारोऽस्तीति**। तथा च 'काले' इत्यवधारणं न युज्यत इति भावः। **न च शब्दस्येति**। शब्देनोच्यमानेन भूतत्वादिनार्थस्यैव संबन्धो न्याय्य इति भावः। यत्तु 'शब्दस्य नित्यत्वात् तद्योगो न' इति। तन्न, तस्य नित्यत्वे मानाभावात्। कुतर्कवासनादुष्टहृदयः शङ्कते —**यद्येवमिति**। वस्तुतो भूतादिशब्दानां लोकप्रसिद्धार्थकत्वेनेतरेतराश्रयप्रसङ्ग एव नास्ति। इदमेव मनसि निधाय वक्ष्यति भगवान् 'अथवा भवतेर्निष्ठा' इति। **भूतकालेनेति**। भवतेर्भूतक्रियावाचिनो निष्ठायां भूतशब्दसिद्धिः, तत्सिद्धौ भूताधिकारे सति निष्ठाविधिरित्यन्योन्याश्रयं मन्यते। **अव्ययनिर्देशादिति**। अव्ययं नञ्, तद्विशिष्टनिर्देशात् सिद्धमित्यर्थः। स कुतार्किको भूताधिकारस्यानर्थक्यं शङ्कते— **न वेति**। येभ्यो धातुभ्यः परेण प्रत्ययेन भूतैव क्रिया द्योत्यते तदर्थोऽयमधिकारो नारभ्यते, किं तु येभ्यः परेण कालत्रयसंबन्धिनी क्रिया द्योत्यते तत्र व्यवस्थार्थमयमधिकार इत्याशयेनोत्तरमाह— **भूताधिकारस्येति**। **कुमारघाती शीर्षघातीति**। [12]'कुमारशीर्षयोर्णिनिः' इति णिनिर्भविष्यद्वर्तमानयोरेव स्यात्, भूते मा भूदित्येवमर्थमत्र भूताधिकारः कर्तव्य इति भावः। सति ह्यस्मिन् भूताधिकारे [13]'कर्मणि हनः' इति सूत्रेण कर्मण्युपपदे हन्तेर्भूतार्थवृत्तेर्णिनि[14] प्राप्ते [15]तक्रकौण्डिन्यन्यायेन तद्बाधनार्थं [16]'कुमारशीर्षयोर्णिनिः' इति सूत्रमारभ्यत इति

---

[1] जुचङ्क्रम्येति सूत्रे भाष्य इत्यर्थः।
[2] प्रदीपे 'नञ्याहन एह च' इति दृश्यते। 'नञि हन एह च' इत्येव कौमुद्यामुणादिपाठः। स एवाभिमतोऽत्र।
[3] हन्तेरसुन्प्रत्ययः — ऋ, लृ.
[4] पा. सू. ३.३.१.
[5] पा. सू. ३. २.१२३.
[6] पा. सू. ३.२.१०६.
[7] पा. सू. ३.२.१२९.
[8] पा. सू. ६.१.१८९.
[9] द्रष्टव्यः — अ, ऋ, लृ.
[10] लकारस्य, लिट इत्यर्थः।
[11] व्यपवृक्ते सर्वं — प, ब.
[12] पा. सू. ३.२.५१.
[13] पा. सू. ३.२.८६.
[14] णिन्प्रत्यये प्राप्त इत्यर्थः।
[15] अयं न्यायो मिदचोऽन्त्यात्सूत्रभाष्य उक्तः।
[16] पा. सू. ३.२.५१.

सिद्धमिष्टम्। **आखुहेति**। सति भूताधिकारे ब्रह्मादिष्वेवोपपदेषु हन्तेर्भूते क्विप् भवतीति नियमादुपपदान्तरे भविष्यद्वर्तमानयोरेव [1]स भवतीति भावः। **त्रिषु कालेषु निवर्तकः स्यादिति**। तथा च 'आखुहा' इत्यादयो भविष्यद्वर्तमानयोर्न स्युरिति भावः। **त्रिषु कालेषु शतापवादो मा भूदिति**। भूतवर्तमानाधिकाराभावे हि [2]"सुयजोर्ङ्वनिप्' इति कालत्रयसाधारणेनोत्सर्गतो विहितस्य ङ्वनिपो यज्ञसंयोगरूपविशेषपुरस्कारेण विहित इति कालत्रयसाधारणोऽपि शता बाधकः स्यादिति भावः। सतोर्हि तयोरधिकारयोर्वर्तमाने विहितः शता भूते विहितं ङ्वनिपं न बाधते, विषयभेदात्। अनेन भाष्येण 'न वा भूताधिकारेणार्थः' इति शङ्का [3]तुच्छा भवति, भूतशब्दस्य भविष्यद्वर्तमानसंबन्धाभावो लोकतो निर्णीत इत्येतावन्मात्रेण सर्वेषां भूतार्थकानां ततस्तन्निर्णयसंभवात् कर्तव्य एव भूताधिकार इति। यदि सा शङ्का दृढा स्यात् तर्हि 'सुत्वा' इति शब्दो भूतमात्रवृत्तिरेवेति तस्य कालत्रयसाधारणेन शत्रा बाधनोक्तिरयुक्ता स्यात्। **सुषुपुष इति**। अत्रापि भूतवर्तमानाधिकाराभावे [4]"छन्दसि लिट्' [5]"लिटः कानज्वा' [6]"क्वसुश्च' इत्युत्सर्गस्य कालत्रयसाधारणत्वापत्तौ तस्य [7]"स्वपितृषोर्नजिङ्' इति विशेषविहितो नजिङपि कालत्रयसाधारणः सन्नपवादः स्यादिति भावः। सतोस्तु तयोरधिकारयोर्वर्तमाने विहितस्य नजिङो भूतविहितक्वसुबाधकत्वं न भवति। **अनेहेति**। उणादिषु वर्तमानाधिकाराभावेन [8]"नञ्याहन एह च' इत्यसिप्रत्ययः सर्वस्मिन् काले तृचं बाधेत। सति तु तस्मिन् वर्तमानकाल एव स तृचं बाधते, न भूतभविष्यतोरिति भावः। **आदधानस्येति**। भूतवर्तमानाधिकारयोरभावे कानचस्ताच्छील्यचानश् कालत्रये बाधकः स्यात्। सतोस्तु तयोर्वर्तमाने चानश् भूते कानजिति न तयोर्बाध्यबाधकभाव इति भावः। चानश् सर्वेभ्यो भवति धातुभ्यः, कानच् त्वात्मनेपदिभ्य एवेति तयोर्महान् भेदः। **सर्वकालापवादो मा भूदिति**। इत उत्तरं 'सुषुपुषोऽनेहाग्निमादधानस्यादधानस्येत्येव' इति ग्रन्थो मूर्खप्रक्षिप्त इत्युपेक्षितः, दूरीकृतश्च स्वकीयभाष्यपुस्तकात्॥

[३, २५०–२५४]

(नारायणीयम्) [9]**व्यपवृक्तेति**। अतिक्रान्तेत्यर्थः। **तत् सर्वमिति**। घटादिकमपीत्यर्थः। 'कस्मिन् भूते काले' इत्येकग्रन्थत्वशङ्कां निरस्यति — **इतर इति**। कथं पुनः पदार्थान्तरस्य भूतत्वसंभवे कालस्यैव नियोगतो ग्रहणं भवेदित्यत आह — **तस्यैवेति**। **तत्र केचिदिति**। परावरादिप्रत्ययसिद्धो व्यापक एकोऽनुद्भूतोऽकृतत्वान्नित्यः क्रियाव्यतिरिक्तः काल इति वैशेषिकादीनां [10]मतम्। तथा चोक्तम् — [11]"व्यापारव्यतिरेकेण [12]कालमेके प्रचक्षते। नित्यमेकं विभुद्रव्यं परिमाणं क्रियावताम्।' इति। स एव पदार्थानां स्थित्यादेर्हेतुः प्रतिबन्धाभ्यनुज्ञाभ्याम्। काला-

---

[1] क्विबित्यर्थः॥ संभवतीति — ब.
[2] पा. सू. ३.२.१०३.
[3] तुच्छेति सूचिता भवतीत्यर्थः।
[4] पा. सू. ३.२.१०५.
[5] पा. सू. ३.२.१०६.
[6] पा. सू. ३.२.१०७.
[7] पा. सू. ३.२.१७२.
[8] उणादिसूत्रम् ६७३. कौमुद्यामुणादिपाठः 'नञि हन एह च' इति। 'नञ्याहन एह च' इति प्रदीपे पाठो दृश्यते। सोऽत्रानुसृतः।
[9] 'व्यपवृक्तेति' इत्यादि 'भूतादिव्यपदेशश्चोपपद्यत इत्यर्थः। तथाहि' इत्यन्तं नास्ति — ङ.
[10] मतः — घ.
[11] वाक्यपदीयम् ३.९.१.
[12] कालमेते — घ.

पेक्षो हि पदार्थानां क्रियादिरवस्थाविशेषोऽवतिष्ठत इति जन्मादिमतां पदार्थानां निमित्तकारणं कालमाचक्षते। तथाहि — केचिद्वसन्ते जायन्ते, अपरे प्रावृषि, शरद्यन्य इत्यादि। एवं स्थितिविनाशयोरपि [1]द्रष्टव्यम्। उक्तं च — [2]'उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम्। निमित्तं [3]कालमेवाहुर्विभक्तेनात्मना स्थितम्। [4]तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते। प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं [5]विभज्यते। [6]यदि न प्रतिबध्नीयात् प्रतिबन्धं च [7]नोत्सृजेत्। अवस्था व्यतिकीर्येरन् [8]पौर्वापर्यविनाकृताः॥' इति॥

नन्वेकत्वे कालस्य कथं मासादिभेदव्यवहार उपपद्यत इत्यत्राह — [9]**तस्येति**। कालसंसर्गेण कालसंबन्धिनो ये सूर्यादिक्रियाभेदास्तदाश्रय इत्यर्थः। तथा हि — सूर्योदयास्तमयावधिपरिच्छिन्नः कालोऽहरिति व्यपदिश्यते। अस्तमयादिरुदयान्तो निशा। तदावृत्त्या पक्षमासर्त्वयनसंवत्सरयुगमन्वन्तरादिव्यवहारः, तथाक्षिनिमेषोन्मेषादिक्रियोपहितभेदः क्षणलवादिव्यपदेशः। अत एवौपाधिकाद् भेदाद् भूतादिव्यपदेशश्चोपपद्यत इत्यर्थः। तथा हि — उत्पन्नध्वस्ता या क्रिया भवति तदा तदुपाधिककालो भूतशब्दवाच्यः। यदा तु साधनसंनिधानात् संभाव्यमाना क्रिया तदा भविष्यद्व्यपदेशः। प्रारब्धापरिसमाप्तक्रियोपाधिस्तु वर्तमानाख्यः। **अन्ये त्विति**। सूर्यादीनां गतिक्रिया प्रसिद्धपरिमाणा गोदोहादिक्रिया च। सा यदा क्रियान्तरस्याप्रसिद्धपरिमाणस्याध्ययनादेः परिच्छेदायोपादीयते तदाहरादिकालाख्यां लभते — दिवसमधीते, निशामधीते, गोदोहमास्ते, इत्यादि। उक्तं च — [10]'क्रियान्तरपरिच्छेदप्रवृत्ता या क्रियां प्रति। निर्ज्ञातपरिमाणा सा काल इत्यभिधीयते।' इति। ननु 'भूते काले' इत्युक्ते कालाधिकाराभावकथनेन किमायातमित्यत्राह — **ततश्चेति**। शब्दान्तरसंनिधानादिना सामान्यशब्दस्य विशेषेऽवस्थानं भवेत्। तदभावे तु तन्न [11]लभ्यत इत्यर्थः। भूतभविष्यद्वर्तमानभावासंबन्धिनः शब्दस्य विशेष्यत्वे संभवो नास्तीति भाष्ययोजनां हृदि [12]निधायासंभवे हेतुमाह — **शब्दस्यार्थ इति**। **नित्यत्वाद्वेति**। न हि नित्यस्य भूतादिभिर्विशेष्यत्वमुपपद्यते। **अनित्यत्वेऽपीति**। अस्मिन् पक्षेऽयं भाष्यार्थः। यथा वर्तमानतया प्रत्ययप्रकृतेर्धातोर्विशेष्यत्वसंभवः, न तथा [13]भूतभविष्यत्ताभ्यामिति। **भूतादिति**। [14]भूतकालोच्चारितात्। यद्यपीदानीमुच्चारितमपि भूतम्, तस्मात् प्रत्ययविधानमपि संभवति, तथापि तस्य भूतत्वेन विशेषणं व्यर्थमित्याह — [15]**उच्चरितत्वेति**। इतरेतराश्रयत्वं स्फोरयति — **भवतेर्निष्ठाप्रत्यय इति**। 'अव्ययनिर्देशात् सिद्धम्' इति वार्तिकं भाष्ये [16]प्रथममेवं व्याख्यातम् — अव्ययशब्देन तद्वच्छब्दरूपं लक्ष्यते, न्यासान्तरकरणं च वार्तिकेऽभिप्रेतमिति। अस्मिन् व्याख्याने लक्षणाया आश्रयणीयत्वात् मुख्यार्थ[17]संभवे तदयोगात् सूत्रभेदप्रसङ्गाच्च 'अव्ययस्य भूतेशब्दस्य

---

[1] द्रष्टव्यः — घ.

[2] वाक्यपदीयम् ३.९.३. उत्पत्तौ यः स्थितौ — घ.

[3] कालमेवाहुर्विकृतेनात्मना स्थितः — घ.

[4] वाक्यपदीयम् ३.९.४.

[5] वियुज्यते — घ.

[6] वाक्यपदीयम् ३.९.५.

[7] नोद्व्रजेत् — घ.

[8] पौर्वापर्यं विनाकृताः — घ.

[9] प्रदीपे 'तत्र संसर्गिसूर्यादि' इत्यत्र 'तस्य संसर्गिसूर्यादि' इति पाठोऽभिमतः।

[10] वाक्यपदीयम् ३.९.७७.

[11] लभ्येतेत्यर्थः — ङ.

[12] निधाय संभवे — ङ.

[13] भूतभविष्यत्वाभ्यामिति — ङ.

[14] चिरकालोच्चारितात् — घ.

[15] उच्चारितत्वेति — ङ.

[16] प्रथममेव व्याख्यातम् — ङ.

[17] संभवायोगात् — घ.

[1]'निर्देशात् सिद्धम्' इति द्वितीयं व्याख्यानम्। अव्ययस्य भूतेशब्दस्यान्यत्रादर्शनात्[2] 'अथापि' इत्यादिना प्रकारान्तरेण [3]व्याख्यातम्। तत्र पूर्वव्याख्यानाद् भेदं स्फोरयति — **न शास्त्रीयमिति**। 'एतौ कालविशेषौ' इत्यादिभाष्यं व्याचष्टे — **नित्येनार्थेन भविष्यद्वर्तमानप्रतिद्वन्द्विनेति**। [4]'कर्मणि हनः' इत्यत्रासति भूताधिकारेऽनिष्टप्राप्तिं दर्शयति — **यदीहेति**। **वासरूपनिवृत्त्यर्थमिति**। अन्यथा वासरूपविधिना पक्षे [5]'कर्मण्यण्' इत्यणपि स्यादिति भावः। भूताधिकारे तु सतीष्टं सिध्यतीत्याह — **सति त्विति**। [6]**भूते णिनिं बाधित्वेति**। [7]एतद्दर्शितं भाष्ये 'भविष्यद्वर्तमानार्थौ भूतनिवृत्त्यर्थः' इति, 'आखुहा' इति। **नियमेनेति**। धात्वर्थयोर्नियमाश्रयेणेत्यर्थः। **भविष्यद्वर्तमानयोरिति**। अन्यथोपपदान्तरे हन्तेः क्विपः [8]प्रयोग एव न स्यात्। अत एवोक्तं भाष्ये 'इतरथा हि' इति। **ङ्वनिपमिति**। [9]'सुयजोर्ङ्वनिप्' इत्यनेन [10]विहितम्। **कालभेदो न स्यादिति**। वासरूपेण वर्तमानेऽपि ङ्वनिप् प्राप्नोतीत्यर्थः। अनेन वर्तमानाधिकारस्यापि प्रयोजनं प्रसङ्गादुक्तम्। **कालभेदेन तयोरिति**। वर्तमाने शता, भूते ङ्वनिबिति व्यवस्था सिध्यतीत्यर्थः। **नजिङेति**। [11]'स्वपितृषोर्नजिङ्' इति तच्छीलादिषु विहितेन। ननु वासरूपविधिना लिडपि भविष्यतीति चेन्नेत्याह — **ताच्छीलिकेष्विति**। ताच्छीलिकेषु यः प्रत्ययस्तस्यान्येन सह वासरूपविधिर्नास्तीत्यर्थः। [12]**वर्तमाने नजिङिति**। ताच्छीलिकेषु [13]'वर्तमाने लट्' इत्यतो वर्तमानाधिकारात्। **वर्तमानकाल एवेति**। [14]'उणादयो बहुलम्' इत्यत्रापि वर्तमानाधिकारात्। **असत्यधिकार इति**। असति लिड्विधौ भूताधिकारे, चानश्विधौ चासति वर्तमानाधिकारे सार्वकालिकस्य कानचस्ताच्छील्यादिषु तथाविध एव चानश् बाधकः स्यादित्यर्थः। **लसार्वधातुके विधीयत इति**। यदि सार्वधातुकमात्रेऽभ्यस्तस्वरो विधीयेत तदा चानशि सत्याद्युदात्तं पदं स्यात्। कानचि तु चित्स्वरेणान्तोदात्तमिति स्वरभेदो भवेत्। यतस्तु लसार्वधातुके स स्वरो विधीयतेऽतश्चानशादीनाम[15]लादेशत्वाभ्युपगमादुभयत्रापि चित्स्वर एव प्रवर्तत इति न स्वरभेद इत्यर्थः। **उपग्रहकृत इति**। आत्मनेपदपरस्मैपदाभ्यां योऽर्थभेदः प्रतीयते स उपग्रह इत्युच्यते। तथा चोक्तम् — [16]'य आत्मनेपदाद् भेदः क्वचिदर्थस्य गम्यते। अन्यतश्चापि [17]लादेशान्मन्यन्ते तमुपग्रहम्॥' इति। **कानजिति**। स्वरितञ्जिद्भ्यो विधीयमानः। **चानश् पुनरिति**। [18]तस्यालादेशत्वादात्मनेपदत्वाभावात्॥

ब्रह्मभ्रूणवृत्रेषु क्विप् ३.२.८७.

[३, २५४–२५५]

(उद्द्योतनम्) अत्र श्रुतत्वात् पूर्वं ब्रह्मादय उद्देश्याः, ततः समनन्तरप्रकृतो हन्तिः, ततो भूत

---

[1] 'निर्देशात्' इत्यादि 'अव्ययस्य भूतेशब्दस्य' इत्यन्तं नास्ति — ङ.
[2] अन्यदर्शनात् — ङ.
[3] व्याख्यानम् — ङ.
[4] पा. सू. ३.२.८६.
[5] पा. सू. ३.२.१.
[6] 'भूते' इति नास्ति — घ.
[7] एतद्दर्शनं भाष्ये — ङ.
[8] प्रयोगबलात्। अत एवोक्तं — घ.
[9] पा. सू. ३.२.१०३.
[10] विहितः — घ, ङ.
[11] पा. सू. ३.२.१७२.
[12] 'वर्तमाने' इति नास्ति — ङ.
[13] पा. सू. ३.२.१२३.
[14] पा. सू. ३.३.१.
[15] लादेशत्वानभ्युपगमादित्यर्थः।
[16] वाक्यपदीयम् ३.१२.१.
[17] लादेशं मन्यन्ते — घ.
[18] तस्य लादेशत्वाभावादित्यर्थः।

इति, विधेयत्वात्तु पश्चात् क्विब्निर्देष्टव्यः। तत एवं वचनव्यक्तिर्भवति — ब्रह्मादिषूपपदेषु हन्तेर्भूते क्विब् भवतीति। तत्र 'यतोऽवधारणं ततोऽन्यत्र नियमः' इति न्यायेन ब्रह्मादिष्वेव हन्तेर्भूते क्विबित्युक्तेऽनन्तरस्य धातोरुपपदान्तरसंबन्धनिवृत्त्या नियमो लभ्यते। 'ब्रह्मादिषु हन्तेरेव भूते' इत्युक्ते आनन्तर्याविशेषेऽपि प्राथम्यादुपपदनियमो भवति। 'ब्रह्मादिषु हन्तेर्भूत एव क्विप्' इत्युक्ते धातुप्रत्यययोरानन्तर्याविशेषेऽपि प्राधान्यात् प्रत्ययस्य नियमः। 'ब्रह्मादिषु हन्तेर्भूते क्विबेव' इत्युक्तावानन्तर्यात् कालनियम इति नियमचतुष्टयं ज्ञेयम्। **एतदेव** धातुकालनियमद्वयम्। 'हन्तेरेव' इत्युपपदनियमः, 'भूत एव' इति प्रत्ययनियमः। वृत्तौ नियमचतुष्टयमुक्तम्। तन्निराह — **अन्यैस्त्विति**॥

[३, २५४–२५५]

(रत्नप्रकाशः) किमविशेषेणेति। कालविशेषमनपेक्ष्य किमयं नियम इति प्रश्नः। **एतस्मिंश्च विशेष इति**। भूतकालं चापेक्ष्यैवायं नियम इति भावः। ब्रह्मादिष्वेवेत्युपपदनियमे णिनिप्रत्ययनियमो न जात इत्याशयेन पृच्छति — **अथेति**। **णिनिनेति**। [१]'कर्मणि हनः' इति विहितेनेति शेषः। **उभयतो नियम इति**। [२]विनिगमनाविरहादिति भावः। तथा च वृत्तिकारोक्तचतुर्विधनियमोऽप्युपपन्नः। 'उभयतो नियमः' इति भाष्यस्य साक्षाच्छ्रुतपदविषयस्य[३] तावतापि प्रश्नस्योत्तरं जातमिति तात्पर्यसंभवात्। एतेन किमविशेषेणेति प्रतीकमादाय 'किं धातूपपदकालप्रत्ययाश्चत्वारोऽपि नियम्यन्ते, अथ किंचिदेव नियम्यत इति प्रश्नः' इति व्याचक्षाणो निरस्तः। 'ब्रह्मादिष्वेव [४]हन्तेः क्विब् यथा स्यात्' इति विशिष्यैवोपपदनियमस्य दर्शितत्वेन तच्छृण्वतस्तादृशप्रश्नासंभवात्। भाष्यकृन्निदर्शितनियमवाक्ये 'भूते' इति पदाभावेन तन्नैरपेक्ष्यस्यैव प्रश्नगताविशेषशब्दार्थतौचित्याच्च। यदप्युक्तम् '**उपपदविशेष इति**। अनेन धातुनियमं दर्शयति' इति। तदपि न, यत्रैवकारः श्रूयते ततोऽन्यत्र नियम इति पक्षाश्रयणे उपपदान्यत्वस्य भूतधातुप्रत्ययेष्वविशिष्टत्वेन धातुनियमः स इति विशेषकथने मानाभावात्। यत्तूच्येत 'यत्रैवकारः श्रूयते ततोऽन्यत्र संनिहिते नियम इति कल्प्यते, संनिहितश्च तत्र धातुः' इति। तदपि न, तादृशकल्पनायां मानप्रयोजनयोरभावात्। एतेन '**क्विबेवेति**। [५]अनेन ब्रह्मादिषु हन्तेर्भूते क्विबेव भवति न प्रत्ययान्तरमिति क्विपि भूतकालो नियम्यत इति कालनियमोऽयं भवति' इत्यपि निरस्तम्। यदप्युक्तम् 'एतदेव नियमद्वयं भाष्यकारेणाश्रितम्। ब्रह्मादिषु हन्तेरेव भूते क्विब् भवति, ब्रह्मादिषु हन्तेः क्विब् भूत एवेत्येतत्तु नियमद्वयं नाभ्युपगतम्। अन्यैस्त्वाहोपुरुषिकया चतुर्विधो नियमो व्याख्यातः, स भाष्यविरोधान्नादरणीयः' इति। तदपि न, नियमचतुष्टयोपपत्तेर्भाष्याविरोधेन दर्शितत्वात्। **तथा चेति**। ब्रह्मादिष्वेवेति नियमाश्रयणे सतीत्यर्थः। **वचनार्थ इति**। वचनस्योक्तेरर्थो वचनार्थः। वचनशब्दस्य संबन्धिशब्दत्वादुत्तरस्येत्येतत्सापेक्षत्वेऽपि समासः। [६]**न भवति चेति**। बहुलग्रहणादिति भावः॥

---

[१] पा. सू. ३.२.८६.

[२] 'विनिगमना' इत्यादि 'नियम इति' इत्यन्तं नास्ति — ब.

[३] हेतुगर्भविशेषणम्, श्रुतपदविषयत्वादित्यर्थः।

[४] 'हन्तेर्भूते क्विब् यथा स्यात्' इति भाष्ये दृश्यते। तत्र 'भूते' इति रत्नप्रकाशकृत्पाठे नास्तीति ज्ञायते। उपरि तथैव वक्ष्यते च 'भूत इति पदाभावेन' इति।

[५] 'अनेन' इति पदं प्रदीपे न दृश्यते।

[६] भाष्ये 'न च भवति' इत्यत्र 'न भवति च' इति पाठोऽभिमत इति भाति।

[३, २५४–२५५]

(नारायणीयम्) किं धातूपपदेति। अत्रायमन्वयप्रकार: — पूर्वं ब्रह्मादय: श्रुतत्वादुद्देश्या:, तत: प्रकृत्यपेक्षायां प्रकृतत्वाद्धन्ति:, ततोऽर्थाकाङ्क्षायां भूत इति, एवं सर्वोद्देश्यपर्यालोचनानन्तरं विधेयत्वात् क्विप् संबन्धनीय:। ततश्चैवं वचनव्यक्ति: — ब्रह्मादिषूपपदेषु हन्तेर्भूते[1] क्विब् भवतीति। तत्र 'यतोऽवधारणं ततोऽन्यत्र नियम:' इति न्यायेनान्यत्र भवन्नियम: [2]'अनन्तरस्य विधि:' इति न्यायेनानन्तरस्य भवति। ततश्च 'ब्रह्मादिष्वेव हन्ते:' इति नियमेन धातोस्तदनन्तरनिर्दिष्टत्वादुपपदान्तर[3]संबन्धनिवृत्तिफलो नियमो भवति। 'ब्रह्मादिषु हन्तेरेव भूते' इत्यनेनानन्तरत्वाविशेषेऽपि प्राथम्यादुपपदनियमो भवति। 'ब्रह्मादिषु हन्तेर्भूत एव क्विप्' इति तूच्यमाने क्विब्धात्वोरानन्तर्याविशेषेऽपि [4]प्राधान्यात् प्रत्ययनियम:। 'ब्रह्मादिषु हन्तेर्भूते क्विबेव' इत्यनेनानन्तर्यात् कालनियम इति नियमचतुष्टयोपपत्ति:। **एतदेव नियमद्वयमिति**। अत्र [5]श्रुतिलिङ्गाधिकरणन्यायेन धातुकालौ प्रकरणलक्षणजघन्य[6]प्रमाणोपस्थापितत्वादेवकारेण संबन्धं प्राप्तुमनर्हौ, उपपदप्रत्ययौ तु श्रुत्युपस्थापितत्वात् तत्संबन्धार्हावित्याशयेन भाष्यकारो धातुकालनियमावेव वाक्यभेदेन प्रत्यपीपदत्। उपपदप्रत्ययनियमावपि केचिद्दूरीकृतवन्त:, ते भाष्यं न्यायं च बाधमाना नादरणीया इत्याह — **अन्यैस्त्वाहोपुरुषिकयेति**। अहो अहं पुरुष इत्यभिमान [7]**आहोपुरुषिका**। भाष्यकारेणोक्तस्यैवार्थस्य कथने स्वपौरुषहानि: स्यादिति तैश्चतुर्विधोऽपि नियम आख्यात:। तदेवावद्यरूपेण परिणतमित्याशय:। 'तथा च' इति पूर्वोक्तो धातुनियमो हेतुत्वेन परामृश्यते। अर्थशब्द: प्रयोजनवचन इति व्याचष्टे — **यस्मादिति**॥

कर्मणीनिर्विक्रिय: ३.२.९३.

[३, २५५]

(उद्द्योतनम्) इह 'सोमविक्रयी' इत्युदाहरणम्। तत्र सोमादे: कथं कुत्सितत्वम्, अत आह — [8]**यस्य हीति**॥

[३, २५५]

(रत्नप्रकाश:) कर्मणि कुत्सित इति। यस्य सोमघृतादे: शास्त्रेण विक्रय: प्रतिषिद्धस्तत्कर्म विक्रये कुत्सितम्॥

---

[1] 'भूते' इति नास्ति — घ.

[2] परिभाषा ६२.

[3] संबन्धिनिवृत्ति — ङ.

[4] विधेयत्वेनेत्यादि:।

[5] 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' मीमांसासूत्रम् ३.३.१४. तृतीयाध्यायतृतीयपादसप्तमाधिकरणोक्तन्यायेनेत्यर्थ:।

[6] प्रमाणावस्थापितत्वात् — ङ.

[7] 'आहोपुरुषिका' इत्यादि 'तथा' इत्यन्तं नास्ति — ङ.

[8] प्रदीपे 'यस्य सोमघृतादे:' इत्यत्र 'यस्य हि सोमघृतादे:' इत्यन्नंभट्टाभिमतपाठ इति भाति।

[३, २५५]

(नारायणीयम्) [1]'अत्रातिव्याप्तिपरिहाराय वार्तिककृता 'कुत्सितग्रहणं कर्तव्यम्' इत्युक्तम्। तत्र मूलोदाहरणे 'सोमविक्रयी' इत्यादौ सोमादेः स्वरूपेण प्रशस्तत्वात् कथं कुत्सितत्वमित्यत आह— **यस्येति**। [2]'तत्र सोमविक्रयः 'पापो हि सोमविक्रयी'[3] इत्यादिना निन्दार्थवादेन प्रतिषिद्धः, तथा 'तैलं न विक्रेयम्' 'घृतं न विक्रेयम्' इति तैलादिविक्रयः स्मृतिषु निषिद्धः। **तत्कर्म विक्रये कुत्सितमिति**। न स्वरूपेण कुत्सितत्वमत्र विवक्षितम्, किं तर्हि, यत्कर्म क्रियया संबध्यमानं कर्तुः कुत्सामापादयति तस्य तद्द्वारेण कुत्सितत्वमित्यर्थः॥

अन्येष्वपि दृश्यते ३.२.१०१.

[३, २५६]

(उद्द्योतनम्) 'अन्येषु' इत्यनेनैव धात्वन्तस्यापि[4] लाभाद् वचनं व्यर्थम्, अत आह— [5]'**अन्येष्विति**॥

[३, २५६]

(रत्नप्रकाशः) 'अन्येषु' इति सप्तमीनिर्देशेनोपपदान्तरसंग्रह एव भवति, न धात्वन्तरसंग्रह इत्याशयेनाह— **अन्येभ्येऽपीति**॥

[३, २५६]

(नारायणीयम्) [6]'वार्तिके सप्तमीनिर्देशमपहाय [7]'चतुर्थीनिर्देशः कर्तव्य इति नोच्यते, किं तर्हि, सोऽपि कर्तव्य इति। [8]'तदाह— **सप्तमीनिर्देशादिति**॥

निष्ठा ३.२.१०२.

[३, २५६–२५९]

(उद्द्योतनम्) [9]''तौ सदिति वचनमसंसर्गार्थम्' इति वार्तिकम्। वर्तमानकालादिनासंसक्तयोः[10] [11]'शतृशानचोर्यथा स्यादित्येवमर्थं तौग्रहणमिति तदर्थः। तद्वदत्रापि तौग्रहणस्य भूतकालासंसर्गः

---

[1] 'अत्र' इति नास्ति — घ.
[2] 'तत्र' इति नास्ति — ङ.
[3] विक्रय इत्यादिना — ङ.
[4] अपिशब्दो नास्ति — अ.
[5] अन्येष्वपीति — अ.
[6] वार्तिकेन सप्तमी — घ, ङ.
[7] 'पञ्चमीनिर्देशः' इति युक्तं भाति॥ चतुर्थ्या निर्देशः — ङ.
[8] तत्राह — ङ.
[9] का. वा. ३.२.१२७–१.
[10] असंसक्तयोरिति छेदः।
[11] शतृशानचौ यथा स्यातामित्येवमर्थम् — अ, ऋ, लृ.

प्रयोजनमित्याह— भाष्ये **असंसक्तयोरिति**। [1]'ञीतः क्तः' इति वर्तमाने क्तः, भिन्नः। 'अदृष्ट-श्रुतौ' इति पदद्वयस्य भिन्नार्थत्वेन पौनरुक्त्यं निराह — **लौकिक इति**। [2]'इति च' इत्यनन्तरं विधीयमाना निष्ठासंज्ञाश्रुतयोः[3] कथं स्यात्, [4]'ञीतः क्तः' इत्यादौ श्रुतत्वात् क्तस्य, अत आह — **एतदुक्तमिति**। द्विवचनं संपातायातमित्याह — **यद्यपीति**। **अन्यः** [5]'ञीतः क्तः' इतिवत् स्वशब्देन विहितः। [6]'क्तक्तवतू निष्ठा' इति संज्ञाविधानेऽनेकेषामेकत्वासंभवादाह — **सामान्ये-नेति**। ननु वृद्ध्यादिसंज्ञाया अपि कृत्रिमत्वेनानित्यत्वात् कथं तत्रेदं समाधानमुक्तम्, अत आह — **वृद्ध्यादिकेति**। नित्यत्वे [7]'मृजेर्वृद्धिः' इत्यादेर्वैयर्थ्यं निराह — **तत्र मृजेरिति**। **सानुबन्ध-काविति**। यद्यपि 'आत्' इत्यस्य सानुबन्धकस्य न प्रयोगः, तथापि तस्योत्तरार्थत्वेनाकारासं-बन्धेऽपि न दोषः। ऐचा [8]संबद्धस्यापि तपरत्वसंपादकत्वं संभवतीति भावः। इदानीं क्रिय-माणा संज्ञा कथं भाविनी, अत आह — **संज्ञिन इति**। भाविसंज्ञिविषयत्वे भावित्वमभिमत-मित्यर्थः। [9]भाविसंज्ञिविषयत्वमेवाह — **तथा हीति**। **सामर्थ्यादिति**। तद्वाक्यस्य स्मृतसूत्र-विधेयत्वात् संज्ञायाः पूर्वमेव विधानात् संज्ञिविधाननिश्चय इत्यर्थः। नन्वादिकर्मशब्देन कर्मण आदिक्षणा उच्यन्ते। तेषां भूतत्वेन निष्ठा सिद्धेति वचनं व्यर्थम्, अत आह — **आद्येष्विति**। ज्ञापकादादिकर्मणि क्तं शङ्कित्वा निषेधति — **न चेति**। यच्छब्दो यस्मादर्थे, वा विकल्पे, भवन्ती लडुच्यत इति पदार्थं गृहीत्वा वाक्यार्थमाह — **यस्मादिति**। **लटोऽर्थे** वर्तमानत्वे। **विकल्पेनेति**। 'कृतः कटो देवदत्तेन' इति [10]भूते प्रयोगः, प्रकृतः कटं देवदत्त इति वर्तमान इत्यर्थः। [11]**भाष्यते** प्रयुज्यते। तस्माद्वर्तमाने प्रयोगात् तत्सिद्धये आदिकर्मणि निष्ठा वक्तव्येत्यर्थः। नन्वे-कदेशापवर्गेऽपि[12] सर्वापवर्गाभावात् कथं [13]न्याय्या भूतता, अत आह — **आदिभूत एवेति**। एव-कारोक्तं [14]'वासरूपोऽस्त्रियाम्' इत्ययोगव्यवच्छेदे। **तथाभूतः** पूर्वापरीभूतानेकक्षणरूपः, **प्रति-भेदं** भिद्यत इति भेदः क्षणः। [15]**ततः** समूहिक्षणभेदात्, समूहस्यापि भेदे सतीत्यर्थः। समूहिनि समूहारोपात् 'पचति, अपाक्षीत्, पक्ष्यति' इति कालभेदनिबन्धनप्रत्ययसंभव इति तात्पर्यम्। [16]'वा च' इत्यस्य तात्पर्यमाह — **यदुक्तमिति**। व्यभिचारमेवाह — **लुङोऽपीति**। **यावदभिमतेति**। तथा च 'प्राकार्षीत् कटं देवदत्तः' इति आदिकर्मणि प्रयोगो न साधुः। 'प्रकृतः कटं देवदत्तः' इति वर्तमाने साधुरिति आदिकर्मणि निष्ठा वक्तव्येत्यर्थः। [17]परेणादृष्टस्यापि स्वस्य दर्शनसंभ-वात् कथं तावतानुमानगम्यत्वम्, अत आह — **परमिति**। न तूत्पन्नानामपि स्थायिनां समूहः संभवति, क्षणिकानामपि युगपदुत्पन्नानां क्रियाक्षणानां द्वयाभावान्न प्रत्यक्षमित्याह — **अवयवेति**।

---

[1] पा. सू. ३.२.१८७.

[2] पा. सू. १.१.२५.

[3] अश्रुतयोरिति छेदः॥ अश्रुततया कथं — अ.

[4] पा. सू. ३.२.१८७.

[5] पा. सू. ३.२.१८७.

[6] पा. सू. १.१.२६.

[7] पा. सू. ७.२.११४.

[8] संबन्धस्यापि तात्परत्वसंपादकत्वं — अ, ऋ, लृ.

[9] भाविसंज्ञाविषयत्वमेवाह — अ.

[10] भूतप्रयोगः — अ.

[11] भाष्येते युज्येते — ऋ.

[12] एकदेशसमाप्तावपीत्यर्थः।

[13] 'न्याय्या' इति नास्ति — अ.

[14] पा. सू. ३.१.९४.

[15] अनेन हरिकारिकायां 'ततः, भेदे' इतिपद-च्छेद इति सूच्यते। वाक्यपदीये च तथैव दृश्यते। प्रदीपेषु तु 'ततोऽभेदे' इत्यकार-प्रश्लेषेण मुद्रणमुपलभ्यते। उद्द्योते च 'अभेदे' इत्येवाश्रितम्।

[16] वा चाद्यतन्यामित्यस्येत्यर्थः।

[17] परेण दृष्टस्यापि — अ.

क्रमादुत्पन्नानां[1] सदसतां [2]समूहिनां [3]तेषां क्रियाक्षणानामात्मानः समूहाश्चक्षुरादिभिः संबन्धं न यान्ति। 'सद्वस्तुविषयैः' इति हेतुगर्भविशेषणम्, वर्तमानमात्रगोचरत्वात् प्रत्यक्षस्य। तृतीयाद्वयस्य सामानाधिकरण्येऽन्वये क्रियायाः शब्दे परिसमाप्तिरुक्ता स्यात्, न च सा संभवतीत्यतो वैयधिकरण्येन व्याचष्टे — **शब्देनेति** ॥

[३, २५६–२५९]

(**रत्नप्रकाशः**) प्रत्ययत्वेन सिद्धयोः क्तक्तवत्वोर्निष्ठासंज्ञा विहितेति मन्यमान आह — **निष्ठायामितरेतराश्रयत्वादिति। अप्रसिद्धिरिति।** क्तक्तवतोरप्रसिद्धत्वात् तयोः संज्ञाया अप्यसिद्धत्वेन संज्ञया तद्विधानमयुक्तमिति भावः। तत्र कथं क्तक्तवत्वोर्विधानं न्याय्यमित्यत आह — **द्विर्वेति।** त्वर्थे वाशब्दः। अत्र भूत इत्यनुवर्तमाने 'क्तक्तवतू' इति सूत्रं कर्तव्यम्, [4]'क्तक्तवतू निष्ठा' इति यथास्थानं संज्ञासूत्रमिति भावः। 'क्तक्तवतू निष्ठा' इति सूत्रमेवात्र विभज्य पठनीयम् 'क्तक्तवतू, निष्ठा' [5]इति। तावतैवेष्टसिद्धौ द्विः क्तक्तवतुग्रहणं न कर्तव्यमेवेति मन्यमान आह — **यदि पुनरिहैवेति। एवमपीति।** अत्रैव संज्ञाकरणेऽपीत्यर्थः। 'तौ' इत्यवश्यं वक्तव्यमित्याशयेन तदावश्यकतां दृष्टान्तदार्ष्टान्तिकभावेन द्रढयति — **वक्ष्यतीति।** [6]'तौ सत्' इत्यत्रेति शेषः। **असंसर्गार्थमिति।** तद्वदिति शेषः। **यथा स्यादिति।** एवमर्थमिति शेषः। भूतकालासंसक्ततायाः फलमाह — **ञिमिदा मिन्न इति।** [7]'ञीतः क्तः' इति वर्तमानेऽत्र क्तः। अत्रैव 'क्तक्तवतू निष्ठा' इति सूत्रं कृत्वा भूते यौ क्तक्तवतू तौ निष्ठासंज्ञौ स्त इति व्याख्येयम्। तद्विधानसामर्थ्याच्च भूते क्तक्तवतू भवत इत्यनुमास्यते। [8]'ढकि लोपः' इति लोपविधानाद्यथा ढग् भवतीति। तथा [च] नोक्तेतरेतराश्रयदोष[9] इति मन्यमान आह — **यदि पुनरिति। अदृष्टश्रुताविति।** प्रयोगेऽदृष्टौ शास्त्रेऽश्रुतावित्यर्थः। ननु 'सूक्तम्, उक्तम्, भुक्तम्, भुक्तवान्' इत्यादौ प्रयोगे [शास्त्रे च दृष्ट]श्रुतावेव क्तक्तवतू इति चेन्न, तत्र ककारस्य धात्ववयवत्वेन तद्विशिष्टस्यानर्थकस्य भूते वर्तमानत्वाभावात्। **दृष्टश्रुतयोरिति।** यद्यपि क्तवतुर्दृष्टः श्रुतो वान्यो नास्ति, तथापि संज्ञाविधौ द्विवचनेन निर्देशः कृत इत्येतावन्मात्रेणात्र द्विवचननिर्देशः, [10]न तु द्वित्वं विवक्षितम्। तदेवं संभाविते पक्षान्तरे निराकृते वार्तिककारेण स्वमतमेव प्रबलमित्युपसंह्रियते — **न चेदेवमिति।** एवम् उक्तप्रकारेण, कल्पान्तरेऽसंभवति सतीत्यर्थः। **इतरेतराश्रयं वा भवतीति।** ह्यर्थेऽत्र वाशब्दः। [11]'क्तक्तवतू निष्ठा' [12]'निष्ठा' इति यथाश्रुते पाणिनीये सूत्रे आश्रीयेते चेदिति शेषः। भगवानाह — **नैष दोष इति। एकत्वेनेति।** सामान्येनेत्यर्थः। **न हि संज्ञा नित्येति।** वृद्ध्यादिका संज्ञा विषयनित्यत्वान्नित्या। आकारादयो हि प्रयोगे विद्यन्ते। क्तक्तवतू तु सानुबन्धकौ प्रयोगे न विद्येते इति निष्ठासंज्ञा न नित्येति भावः।

---

[1] 'उत्पन्नानाम्' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ.

[2] समूहानां — अ.

[3] तेषु — अ, ऋ, लृ.

[4] पा. सू. १.१.२६.

[5] 'इति' इत्यस्मादनन्तरम् इतिशब्दोऽधिकः — — ब.

[6] पा. सू. ३.२.१२७.

[7] पा. सू. ३.२.१८७.

[8] पा. सू. ४.१.१३३.

[9] 'दोषः' इति नास्ति — प.

[10] भवतु द्वित्वं — प, ब.

[11] पा. सू. १.१.२६.

[12] प्रकृतसूत्रम्।

भाविनी संज्ञेति। भूते तौ भवतः, ययोर्जातयोर्निष्ठेति संज्ञा भवतीति सूत्रार्थाश्रयणात् क्तक्तवत्वोश्च निष्ठासंज्ञाविधानात् क्तक्तवतू भूते भविष्यत इति नेतरेतराश्रयदोषप्रसङ्ग इति भावः। वस्तुतस्तु क्तक्तवतू इत्येव प्रकृते सूत्रं कर्तुमुचितम्। यथाश्रुतन्यासे हि [1]'क्तक्तवतू निष्ठा' इति संज्ञासूत्रे क्तमात्रस्य शास्त्रे श्रुतस्यानुवादसंभवेऽपि क्तवतोः कुत्रापि शास्त्रेऽस्मिन्नश्रुतत्वेन सानुबन्धकस्य प्रयोगाभावेन चासंभवदुक्तिकं संज्ञासूत्रं स्यात्। किं चैवंजातीयकमन्यत् संज्ञासूत्रमस्मिन् शास्त्रे दृष्टमपि नास्ति। यदि लाघवे कश्चनादरः क्रियते तर्हि प्रकृते 'क्तक्तवतू' इति सूत्रानन्तरं 'तौ निष्ठा' इति सूत्रं कर्तव्यम्। यथाश्रुतपाणिनीयसंज्ञासूत्रं 'निष्ठा' इति प्रकृतसूत्राश्रयणेऽयुक्तमेव। **आदिकर्मणीति।** आद्यायां क्रियायामित्यर्थः। आरब्धायामपरिसमाप्तायां क्रियायामिति यावत्। **प्रकृतः कटं देवदत्त इति।** प्रकृतवान् कटं देवदत्त इत्युदाहरणस्योपलक्षणमेतत्। **किं पुनः कारणं न सिध्यतीति।** 'न्याय्या तु' इत्यादिना वक्ष्यमाणोऽभिप्रायः। **यद्वा भवन्त्यर्थ इति।** 'यद्वा' इत्यव्यये यस्मादर्थे। **भवन्त्यर्थ इति।** लडर्थे, वर्तमान इत्यर्थः। [2]**भाष्येते इति।** प्रयुज्येते इत्यर्थः। 'निष्ठा' इति यथाश्रुतसूत्रेणैव तत्र क्तक्तवतू सिध्यत इत्याशयेनाह — **न्याय्या त्विति। आद्यपवर्गादिति।** कटादिस्वरूपनिष्पत्त्यनुकूलक्रियासमूहस्याद्यवयवस्य, **अपवर्गात्** अतीतत्वादित्यर्थः। 'प्रकृतः कटं देवदत्तः' इति लुङर्थे प्रयोगादपि तत्र भूतकालता न्याय्येत्याशयेनाह — **वा चेति।** यस्मादित्यर्थः। इतरः स प्रयोगो भूतेऽयुक्त इति मन्यमान आह — **किं शक्यन्त इति।** परिहरति — **नावश्यमिति। अत्यन्तापरदृष्टेति।** परेण प्रत्यक्षेण दृष्टा, [3]परदृष्टा। न परदृष्टा अपरदृष्टा। [4]अत्यन्तमपरदृष्टा अत्यन्तापरदृष्टेत्यर्थः। तर्हि केन प्रमाणेन गम्या सेत्यत आह — **अनुमानगम्येति।** अत्यन्तापरदृष्टा कुत इत्यत आह — [5]**न शक्येति।** आश्रयात् पार्थक्येन पिण्डीभूता निदर्शयितुं न शक्यत इति भावः। **येन येन शब्देनेति।** भूतभविष्यद्वर्तमानरूपयद्यदर्थप्रतिपादकेन येन येन शब्देन क्रिया **अभिसंबध्यते** बोध्यते, स स शब्दः **तावति तावति** क्रियांशे, **परिसमाप्यते** पर्यवस्यति। तदंशाभिप्रायेणैव स शब्दः प्रयुक्तो नेतरक्रियांशाभिप्रायेणेति भावः। तथा च 'प्रकृतः कटं देवदत्तः' इति प्रयोगो भूतक्रियांशाभिप्रायेणैव प्रयुक्तः। 'प्रकरोति कटं देवदत्तः' इति तु वर्तमानक्रियांशाभिप्रायेणैवेति सर्वमनवद्यम्। एतेन प्रकृतभाष्याशयानभिज्ञकृतः [6]'समूहः स तथाभूतः प्रतिभेदं समूहिषु। समाप्यते ततो भेदे कालभेदस्य संभवः' इति श्लोको निरस्तः। प्रकृतभाष्येण प्रत्यवयवमवयवी समाप्यत इत्यर्थस्यागम्यमानत्वात्॥

[३, २५६–२५९]

(नारायणीयम्) ननु शब्दस्य दर्शनं श्रवणमेवेति 'अदृष्टश्रुतौ' इत्युभयोपादानमनर्थकम्, अन्यतरेणैव सिद्धत्वादित्याशङ्कयाह — **लौकिक इति।** कथं पुनरदृष्टश्रुतौ क्तक्तवतू गृहीत्वा संज्ञा विधीयेत, कथं वा [7]तेनात्रेष्टसिद्धिरित्यत्राह — **एतदुक्तमिति। न तु द्वित्वं विवक्षितमिति।**

---

[1] पा. सू. १.१.२६.

[2] भाष्ये 'यद्वा भवन्त्या अर्थे भाष्यते' इत्यत्र 'यद्वा भवन्त्या अर्थे भाष्येते' इति रत्नप्रकाशकृत्पाठ इति भाति।

[3] 'परदृष्टा' इति नास्ति — ब.

[4] 'अत्यन्तमपरदृष्टा' इति नास्ति — ब.

[5] भाष्ये 'अशक्या पिण्डीभूता' इत्यत्र 'न शक्या पिण्डीभूता' इति निर्णयसागरमुद्रिते पाठः।

[6] वाक्यपदीयम् ३.८.५.

[7] तेनापीष्टसिद्धिः — ङ.

'यद्येतौ व्याधितौ स्यातामिदमौषधं ददामि' इति व्याधितोपलक्षणार्थत्वात् 'एतौ' इत्यत्र यथा द्वित्वं [न] विवक्षितं तथात्रापीत्यर्थः। इतरेतराश्रयदोषपरिहारे कथमेकत्वसंख्या हेतुः [1]स्यादित्यत आह— **सामान्येनेति**। [2]सामान्यस्यैकत्वादेकत्वेन सामान्यं लक्ष्यते, नित्य[3]शब्दत्वसामान्यादित्यर्थः। ननु वृद्धयादिकापि संज्ञा कृत्रिमत्वादनित्यैवेति विशिष्यास्या अनित्यत्वमुक्तमयुक्तमित्यत आह— **वृद्धयादिकेति**। संज्ञिनो नित्यत्वात् संज्ञापि नित्येत्युच्यते, संज्ञासंज्ञिनोरभेदोपचारात्। तत्राकारादीनां प्रयोगे विद्यमानानां संज्ञाविधानमुपपद्यते। तर्हि [4]"मृजेर्वृद्धिः" [5]इत्यादिना तेषां विधानं किमर्थमित्यत्राह— **तत्र मृजेर्वृद्धिरिति**। इह तु संज्ञिनो नित्यत्वं नोपपद्यत इति संज्ञाविधानानुपपत्तिरित्याह— **क्तक्तवतू [6]तु सानुबन्धकाविति**। भाविन्याः संज्ञाया विज्ञाने क्तक्तवत्वोरेवात्र विधानमिति कथं लभ्यत इत्याशङ्क्य तत्प्रकारप्रदर्शनायाह— **तथा हीति**। **सामर्थ्यादिति**। [7]न ह्यन्यस्योत्पन्नस्य निष्ठेति संज्ञा भवतीत्येतत् सामर्थ्यम्। 'आदिकर्मणि' इत्यत्र कर्मशब्दः क्रियावचनः, न कारकवचनः, भूत इति संबध्यत इत्याशयेन व्याचष्टे— **आद्येष्विति**। **सर्वस्याः क्रियाया इति**। एकफलोद्देशेन प्रवृत्तायाः क्षणसमूहरूपाया धातुवाच्यायाः क्रियाया इत्यर्थः। **तस्यैवैतदर्थदेशनमिति**। [8]तस्य हि वर्तमानविषयत्वादादिकर्मणि वृत्त्युपपत्तेरेतदर्थादेशनमुपपद्यत इत्यर्थापत्ति[9]परिक्षयात् तस्य न ज्ञापकत्वमित्यर्थः। यदिति निपातो हेत्वर्थः, 'भवन्ती' इति पूर्वाचार्यप्रसिद्ध्या लडुच्यत इति व्याचष्टे— **यस्मादिति**। **आदिभूत एवेति**। यद्यपि [10]समूहरूपा क्रिया, तथापि [11]क्वचिदवयवे समूहस्य समारोपात् समाप्तिः शब्देन गम्यत इति तदाश्रयेण तत्र भूतप्रत्ययोपपत्तिरित्यर्थः। **तथाभूत इति**। गुणभूतावयवसमूहरूपः। **प्रतिभेदमिति**। प्रत्येकमवयवेष्वित्यर्थः। **ततो भेद इति**। तस्माद्धेतोरेकस्या एव क्रियाया अवयवभेदेन भेदे भूतादिकालयोगः कस्मिंश्चिदेवावयवे भूते वर्तमाने [12]भविष्यति वोपपद्यत इत्यर्थः। 'वा चाद्यतन्याम्' इति वार्तिकं प्रकृते संगमयति— **यदुक्तमिति**। [13]आद्यपवर्गादुक्तं भूतत्वमाक्षेप्तुमुपहासपरं 'किं [14]शक्यन्ते' इति चोद्यमिति चोदकाशयं दर्शयति— **यावदभिमतेति**। **तत्पूर्वकत्वादिति**। व्याप्तिग्रहणे प्रत्यक्षसापेक्षत्वादित्यर्थः। [15]यद्यप्येकैकक्षणः प्रत्यक्ष एव, तथापि समूहरूपाया धातुवाच्यायाः क्रियाया अप्रत्यक्षत्वमत्रोच्यत इत्याह— **अवयवसमूहस्येति**। यदि क्रमेणोत्पन्नानामपि क्वचिदवस्थानं भवेत् स्यादेव प्रत्यक्षत्वम्, तदपि नेत्याह— **अनवस्थानाच्चेति**। उत्पन्नप्रध्वंसित्वात्। **क्रमात् सदसतामिति**। तेषां समूहिनां क्रियाक्षणानां क्रमेण [16]भवतामत एव सदसद्रूपाणामात्मानः समूहाः सदेकवस्तुविषयैश्चक्षुरादिभिरिन्द्रियैः संबन्धं न प्रतिपद्यन्त इतीन्द्रियार्थसंनिकर्षजज्ञानविषयभावः क्रियाया नोपपद्यत इत्यर्थः। 'येन येन शब्देन' इति [17]सामानाधिकरण्येनान्वये यच्छब्देनोद्दिष्टस्य

---

[1] स्यादित्यत्राह — घ.
[2] सामान्यस्यैकत्वादेस्तत्त्वेन सामान्यं — ङ.
[3] शब्दस्य तु सामान्यात् — घ; शब्दसंबन्धत्वसामान्यात् — ङ.
[4] पा. सू. ७.२.११४.
[5] इत्यादीनां तेषां — ङ.
[6] तुशब्दो नास्ति — घ.
[7] न ह्यन्यस्योत्पद्यमानस्य निष्ठेति — ङ.
[8] तस्यापि वर्तमान — ङ.
[9] परीक्षया कृतस्य — घ; परीक्षया तस्य — ङ.
[10] समूहरूपक्रिया — घ.
[11] कदाचिदवयवे — घ.
[12] भविष्यतीवोपपद्यत इत्यर्थः — घ.
[13] आद्यपवर्गोक्तं — ङ.
[14] शक्यत इति — घ.
[15] यद्यप्येकैकलक्षणः — घ; यद्यप्यैकैकलक्षणं — ङ.
[16] 'भवताम्' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — घ, ङ.
[17] सामानाधिकरण्येनाप्यन्वये — ङ.

तच्छब्देन परामर्शात् क्रियायाः शब्दे परिसमाप्तिरुक्ता स्यात्, सा तु न युक्तेत्यतो वैयधिकरण्यमाश्रित्य सोपस्कारं व्याचष्टे — **शब्देनेति** ॥

लिटः कानज्वा ३.२.१०६. क्वसुश्च ३.२.१०७.

[३, २६०–२६१]

(उद्द्योतनम्) वाकारं विनापि वासरूपेण तिङ भविष्यति, अत आह — **लादेशेष्विति**। अनन्तरस्यैव ग्रहणे हेतुः — **आनन्तर्यादिति**। [1]'अनन्तरस्य विधिर्वा' इति न्यायादिति भावः। एतेन [2]"अनन्तरस्यानुवृत्त्यैव लाभे लिट इत्यस्य वैयर्थ्यप्रसङ्गाल्लिड्ग्रहणं लिण्मात्रस्य ग्रहणार्थम्। तेन [3]'परोक्षे लिट्' इत्यस्यापि कानज् भवति" इति काशिका परास्ता, भाष्यविरोधात्। कानचः प्रत्ययान्तरत्व[4]शङ्कानिरासाय लिट इत्युपपत्त्या सामर्थ्याभावात्। प्रत्ययान्तरत्वे [5]'न लोक' इति निषेधाभावेन 'अग्निं चिच्यानः' इत्यत्र [6]षष्ठी स्यात्। **उत्तरत्र** [7]'भाषायाम्' इति सूत्रे ॥

[३, २६०–२६१]

(रत्नप्रकाशः) **छन्दसि तिङो दर्शनादिति**। वासरूपविधिस्तु लादेशेषु नास्तीत्युक्तम्। **अनेनेति**। [8]"छन्दसि लिट्' इत्यनेनेत्यर्थः। प्रत्यासन्नत्वात् तस्यैव परामर्श इति भावः। सत्यसति च वावचने न कोऽपि दोषः, सति तु काचन स्पष्टा प्रतिपत्तिर्जायते, उत्तरत्र चोपयोगोऽस्तीत्याशयेनाह — **तदेतदिति**। **सांन्यासिकमिति**। संन्यासं त्यागमर्हति, प्रकृते व्यर्थत्वात्, सांन्यासिकमित्यर्थः। **बद्धधानस्येति**। 'बन्ध बन्धने' इति संयोगान्तो धातुः। छान्दसत्वादभ्यासधकारस्य हलादिशेषेण निवृत्त्यभावे [9]'झलां जश् झशि' इति जश्त्वम् ॥

[३, २६०–२६१]

(नारायणीयम्) ननु विनापि [वा]वचनं वासरूप[10]विधिना तिङ भविष्यतीत्यत्राह — **वासरूपेति**। इदंशब्देन कस्य लक्षणस्य परामर्श इत्यत आह — **छन्दसीति**। अस्यैव लिट इदमादेशवचनमिति नियमः कुतो लभ्यत इत्यत्राह — **तस्यैवेति**। तस्यैवानुकृतत्वमित्यत्र हेतुः — **आनन्तर्यादिति**। 'तदेतत्' इति भाष्यस्यायमर्थः — सति शोभने सूत्रन्यासे [11]भवं वावचनं तिष्ठतु, न प्रत्याख्येयमिति। तत्र प्रयोजनाभावात् प्रत्याख्येयमेवेति वदन्तं प्रत्याशयमाह — **उत्तरत्रेति**। ननु 'बबधानस्य' इति भाव्यमित्यत्राह — **छान्दसत्वादिति**। छन्दसि सर्वविधीनां विकल्पाभ्युपगमादित्यर्थः ॥

---

[1] परिभाषा ६२.
[2] आनन्तर्यस्यानुवृत्त्यैव — ऋ.
[3] पा. सू. ३.२.११५.
[4] 'शङ्का' इति नास्ति — ऋ.
[5] पा. सू. २.३.६९.
[6] 'षष्ठी' इत्यस्यानन्तरं 'न' इत्यधिकम् — अ.
[7] पा. सू. ३.२.१०८.
[8] पा. सू. ३.२.१०५.
[9] पा. सू. ८.४.५३.
[10] विधिनापि भविष्यतीत्यत्राह — ङ.
[11] भवं वचनं — ङ.

भाषायां सदवसश्रुवः ३.२.१०८.

[३, २६१–२६३]

(उद्द्योतनम्) [1]भाषायां सदादिभ्यो लिडेव नास्ति, कस्य वावचनम्, अत आह — **इहेति। भूतसामान्य इति।** तत्रैव [2]'छन्दसि लिट्' इति तस्य विधानात्। **लिडिति च** अपवादाविति विपरिणतानुषङ्गः। ननु परोक्षे लिटा भूतसामान्यलिटो बाधे तस्य क्वस्वादेशाभावात् 'उपसेदिवान्' इति [3]न स्यात्, अत आह — **अस्य त्विति।** [4]'छन्दसि लिट्' इति विहितस्य। ननु परोक्षलिटोऽपि सदादिभ्यः भरस्य नित्यं क्वस्वादेशे 'उपससाद' इति [5]न स्यात्, अत आह — **एतदादेशेति।** कानच्क्वस्वादेशेत्यर्थः। [6]नित्यापरोक्षपदयोः कृत्यमाह — **नित्यग्रहणमिति।** ननु 'अनद्यतनपरोक्षयोश्च' इत्यनेन छन्दसि लिड्विधानात् तस्य च क्वस्वादेशाल्लिटः श्रवणं कथं स्यात्, अत आह — **अनद्यतनेति।** [7]तस्यापि क्वस्वादेशे लिटः श्रवणं **न** स्यात्, अत आह — **ततश्चेति।** वक्तव्यं विनैव भाष्योक्तं चातुरूप्यं विशदयति — **लिटः कानज्वेत्यत इति॥**

[३, २६१–२६३]

(रत्नप्रकाशः) इह क्वस्वादेशविधानाद् भूतसामान्ये सदादिभ्यो लिडनुमीयते। स विशेषविषयो लुङ औत्सर्गिकस्य बाधकः प्राप्नोतीत्याशयेनाह — **भाषायामिति। अनद्यतनपरोक्षयोश्चेति।** [8]अनद्यतने भूते नित्यं लङ मा भूत्, पक्षे लिड् यथा स्यादित्येवमर्थम्, परोक्षे भूतानद्यतने नित्यं क्वसुरहितो लिट् मा भूत्, पक्षे क्वसादेशसहितो यथा स्यादित्येवमर्थमिति भावः। अनद्यतनपरोक्षयोश्चेति वचनाभावे किं स्यादित्यत आह — **अपवादविप्रतिषेधाद्धीति। तौ स्यातामिति।** तावेव स्यातामिति भावः। **लङ्लिटाविति।** लिट्शब्देन क्वस्वादेशशून्यः स गृह्यते, [9]प्रकृतवचनेन क्वस्वादेशोपयोगितया लिट एव विधानात्। **नित्यमित्येवेति।** वाग्रहणस्य प्रकृतत्वात् तन्निवृत्त्यर्थं 'नित्यम्' इत्येतावद्वक्तव्यम्, क्वसुग्रहणं त्वनुवर्तत एवेति भावः। **अनुवृत्तिः करिष्यत इति।** लिट्, लिटः, वा, क्वसुश्च, इति पदानामिति शेषः। **सदादिभ्यो वेति।** सदवसश्रुवो वेत्यर्थः। 'भूते' इति पूरणीयम्। **ततो लुङिति।** [10]'उपेयिवाननाश्वाननूचानश्च' इत्यत्राप्यनेनैव न्यायेन संबन्धानुवृत्तिर्ज्ञातुं शक्यत इति तदुपेक्षितम्। **क्वसुरपरोक्षे नित्यमित्येतन्न वक्तव्यं भवतीति।** वाग्रहणस्य लिड्विधिनैव संबन्धेन क्वसोर्नित्यमेव प्रवर्तनादिति भावः॥

[३,२६१-२६३]

(नारायणीयम्) ननु भाषायां सदादिभ्यो लिट् [11]'परोक्षे लिट्' इत्यनेन विहित इति तस्या-

---

[1] 'भाषायाम्' इति नास्ति — ऋ.
[2] पा. सू. ३.२.१०५.
[3] 'न' इति नास्ति — अ.
[4] पा. सू. ३.२.१०५.
[5] 'न' इति नास्ति — अ.
[6] नित्यापरोक्षयोः — अ.
[7] परोक्षे लिडिति विहितस्यापीत्यर्थः।
[8] 'अनद्यतने भूते' इत्यादि 'एवमर्थमिति भावः' इत्यन्तं नास्ति — ब.
[9] प्रकृते वचनेन — ब.
[10] पा. सू. ३.२.१०९.
[11] पा. सू. ३.२.११५.

यमादेशो विधीयते, अनन्तरस्य [1]'छन्दसि लिट्' इत्यस्याप्राप्तत्वात्। ततश्च भूतसामान्ये लुङ भविष्यतीति [2]नार्थो वचनेनेत्यत आह— **इह क्वस्वादेशविधानादिति**। [3]'परोक्षे लिट्' [4]इत्यत्रानुवृत्तेस्तद्विषयेऽप्ययं भवतीति वक्ष्यति। ततो नानेन परोक्षे [5]लिट आदेशो विधीयते, किं तर्हि, भूतसामान्ये। ततश्चादेशविधानान्यथानुपपत्त्या लिडपि तद्विषयस्सदादिभ्योऽनुमीयत इत्यर्थः। **तत्रास्येति**। आदेशानुमितस्य लिट इत्यर्थः। नन्वनेन परोक्षे [6]लिट आदेशोऽस्तु। तस्मिन् संभवत्यर्थापत्ति[7]परिक्षयाद् भूतसामान्ये लिडनुमानं न युज्यत इत्यत आह— **'एतत्सूत्रेति**। **तस्याप्रकृतत्वादिति**। [9]'लिटः कानज्वा' [10]'क्वसुश्च' इत्यत्र भूतसामान्यविहितस्य लिटो ग्रहणात् तस्यैवेहानुवर्तनादित्यर्थः। 'तस्य क्वसुः' इत्यत्र तच्छब्देन पूर्ववार्तिकद्वयविहितो लिट् परामृश्यते। तत्र नित्यग्रहणस्योपयोगमाह— **निग्यग्रहणमिति**। अपरोक्षग्रहणस्योक्ते प्रयोजने सति तत्प्रत्याख्यानं कथं युज्यत इत्यत्राह— **अनद्यतनेति**। **तत्र लङ्लिटाविति**। [11]'अनद्यतने लङ्' [12]'परोक्षे लिट्' इत्येताभ्याम्। **सूत्रान्तरविहितत्वादिति**। अत्र विहितस्यैव लिटः 'तस्य' इत्यनेन परामर्शादन्येन विहितस्य लिटः क्वसुर्न भवतीत्यर्थः। यदि वाग्रहणमनुवर्तते पक्षे क्वस्वादेशः, पक्षे [13]तिङां श्रवणं स्यादित्यत आह— **तच्चेति**। **किं तर्हि, लिटेति**। [14]सहानुवर्तनाद् भाषायां [15]सदादिभ्यो वा लिट्, तस्य क्वसुर्नित्यमित्यर्थो लभ्यते। ततश्चानेन लिटा मुक्ते भूतसामान्ये लुङ सिध्यतीत्याह— **तत्रेति**। 'ततोऽनद्यतने' इत्यादिभाष्यं व्याचष्टे— **तत इति**॥

उपेयिवाननाश्वाननूचानश्च ३.२.१०९.

[३, २६३–२६६]

(उद्द्योतनम्) उपसर्गस्येति। बहुल[16]ग्रहणानुवृत्त्यैतल्लभ्यते। [17]वस्वेकाजाद्घसाम्। एकाचामादन्तानां घसेश्च संबन्धिनो वसोरिट् इति। द्विर्वचनात् पूर्वं परत्वादिटि रूपसिद्धेर्निपातनं व्यर्थम्, अत आह— **इण इति**। [18]द्विर्वचने कृते एकाच्त्वाभावान्नेडित्यर्थः। सवर्णदीर्घे कृते एकाच्त्वं स्यात्, अत आह— **दीर्घ इति**। इणोऽभ्यासस्य दीर्घः किति लिटि। **दीर्घत्वमिति**। परत्वात् [19]'वार्णादाङ्गं बलीयः' इति वा। नन्वभ्यासदीर्घानन्तरमेकादेशः किं न स्यात्, अत आह— **तत्सामर्थ्यादिति**। अनवकाशोऽभ्यासदीर्घ एकादेशस्य बाधक इत्यर्थः। **ईयतुरिति**। इण्

---

[1] पा. सू. ३.२.१०५.
[2] नार्थो वावचनेनेत्याह — ङ.
[3] पा. सू. ३.२.११५.
[4] इत्यस्यानुवृत्तेः — घ.
[5] लिडादेशः — ङ.
[6] लिडादेशोऽस्तु — ङ.
[7] परीक्षया भूतसामान्ये — ङ.
[8] प्रदीपे 'एतदादेशविधानानुमितस्यैव' इत्यत्र 'एतत्सूत्रानुमितस्यैव' इति पाठोऽभिमत इति भाति।
[9] पा. सू. ३.२.१०६.
[10] पा. सू. ३.२.१०७.
[11] पा. सू. ३.२.१११.
[12] पा. सू. ३.२.११५.
[13] तिङः श्रवणं — ङ.
[14] सर्वानुवर्तनात् — घ.
[15] 'सदादिभ्यः' इत्यस्यानन्तरं 'यः' इत्यधिकम् — घ.
[16] ग्रहणानुवृत्त्यैव लभ्यते — अ.
[17] पा. सू. ७.२.६७.
[18] द्विर्वचने स्वरे एकाच्त्वाभावात् — अ.
[19] परिभाषा ५५.

अतुस्, [1]परत्वात् [2]'इणो यण्'। ततः [3]'द्विर्वचनेऽचि' इति स्थानिवत्त्वाद् द्वित्वम्, [4]'दीर्घ इणः किति' इत्यभ्यासदीर्घः। तत्र सवर्णदीर्घप्रसङ्गो नास्तीत्यर्थः। तत्रापि यणोऽसिद्धत्वाद् [5]दीर्घ-प्रसङ्गमात् — **तत्रापीति**। [6]द्वितीयस्य यण्, उभयोः स्थाने दीर्घः, स कथं पूर्वविधिः, अत आह — **पूर्वपरेति**। **तत्र** एकादेशे। सवर्णदीर्घाभावोपपादनस्य प्रकृतोपयोगमाह — **तत्रेति**। इटि सति द्वितीयस्य यणि पूर्वस्य गुणे 'उपेयिवान्' इति सिध्यतीत्यर्थः। [7]'वसोः संप्रसारणम्' इति संप्रसारणे कृते वसोरजादित्वम्। **विशेषेति**। [8]वलादित्वहलादित्व[9]रूपेत्यर्थः। निमित्तविशे-षानुपादानेऽजादावपीट्प्राप्तौ वार्तिककारसंमतिमाह — **यथेति**। अयं चिण्वदिट् नित्यः वलादि-लक्षणस्त्वनित्यः। हेतुगर्भविशेषणम् — **विघातीति**। निमित्तविघातवान्, चिण्वदिटि कृते वला-दित्वविघातादिति वार्तिकार्थः। अनेन निपातनेन [10]वलादिलक्षणस्येटः प्रतिप्रसवः क्रियते, ना-पूर्व इड् विधीयत इत्यङ्गीकारे नाजादावतिप्रसङ्ग इत्याह — **यदीति**। निपातनेन प्रतिप्रसवमात्रं क्रियत इत्यन्वयः। तदेवोपपादयति — **क्रादीति**। क्रादिनियमादेव वसोरिति प्राप्ते [11]'वस्वेकाच्' इति नियमार्थमित्यर्थः। [12]**निवारितस्य** एकस्य द्विर्वचने कृतेऽनेकाच्त्वात्। **इदानीमिति**। स्वयं पूर्वप्रकारेऽपि [13]दोषोद्धारादिदं प्रकारान्तरमित्यर्थः। दीर्घप्रयोजनमाह — **यद्यपीति**। अभ्यास-दीर्घस्यैकादेशबाधकत्वं प्रागुक्तं शङ्कते — **नन्विति**। **नैष इति**। स्थान्याश्रितं कार्यमादेशेऽति-दिश्यते, न त्वविद्यमानस्य स्थानिनः [14]कार्यित्वमित्यर्थः। [15]**रूपम्** इकाररूपमच्त्वम्। ननु स्था-निकार्यं सवर्णदीर्घत्वं यकारस्यैव किं न स्यात्, अत आह — **अथवेति**। [16]'देवदत्तस्य हन्तरि' इति न्यायादिति भावः। **अभ्यासदीर्घत्वे कृत इति**। परत्वादित्यादिः। ई इवस् इति स्थिते यणादेशो द्वितीयस्येकारस्य, **हलादौ** वसौ। **अजादौ न भवतीति**। क्रादिनियमात् प्राप्तस्य वला-दिलक्षणस्यैवेटो [17]'वस्वेकाच्' इति नियमादिति भावः। ननु निपातनानङ्गीकारे लिट्क्वसुः कथं लभ्यते, अत आह — **इणो भाषायामिति**। **भूतमात्र इति**। तथा च परोक्षे [18]लिडन्यथासिद्धः। **क्वसुरादेशः** [19]विधेय इत्यनुषङ्गः। इडादिनिपातननिषेधोऽयमित्याह — **कार्यान्तरमिति**। भाष्योक्त-[20]रीत्येट्सिद्धिरित्यर्थः। **भिदादीनामिति**। बिभिद्वानित्यादौ। **अनित्यत्वम्** इट इत्यादिः। अत्र तु द्वित्वे कृतेऽप्येकादेशे [21]एकाच्त्वमितीडपि नित्यः, परत्वाद् द्विर्वचनात् पूर्वं भविष्यतीतीड् [22]न निपात्य इति भावः॥

---

[1] द्विर्वचनादित्यादिः।
[2] पा. सू. ६.४.८१.
[3] पा. सू. १.१.५९.
[4] पा. सू. ७.४.६९.
[5] स्थानिवत्त्वेनेति भावः।
[6] द्वितीययण् — ऋ.
[7] पा. सू. ६.४.१३१.
[8] वलादित्वावलादित्व — अ.
[9] रूपेणेत्यर्थः — ऋ, लृ.
[10] वलादिलक्षणस्येति प्रतिप्रसवः — अ, ऋ, लृ.
[11] पा. सू. ७.२.६७.
[12] निपातितस्य — अ, ऋ, लृ.
[13] दोषोद्धारादिकं प्रकारान्तरमित्यर्थः — अ, ऋ, लृ.
[14] कार्यत्वमित्यर्थः — ऋ.
[15] 'रूपम्' इत्यादि 'स्थानिकार्यं सवर्ण' इत्यन्तं नास्ति — ऋ.
[16] अयं न्यायोऽन्यः परस्मिन्सूत्रे महाभाष्ये प्रति-पादितः।
[17] पा. सू. ७.२.६७.
[18] लिटचन्यथासिद्धिः — अ.
[19] विधीयत इत्यनुषङ्गः — अ, ऋ, लृ.
[20] रीत्येष्टसिद्धिरित्यर्थः — अ.
[21] एकाच्त्वमिति तदपि चिन्त्यम्। परत्वात् — अ.
[22] न निपात्यत इति — अ, ऋ.

[३, २६३–२६६]

(रत्नप्रकाशः) **किमर्थमुपेयिवानिति**। उपसर्गस्याविवक्षणीयत्वात् कार्यान्तरस्य च तत्तल्लक्षणेनैव सिद्धेः 'इणः' इत्येतावत् पृथक् सूत्रयितुमुचितमिति भावः। उत्तरमाह — **उपेयुषीति**। **दीर्घत्वेन बाध्यत इति**। [1]'द्विर्वचनेऽचि' इति सूत्रं द्वित्वनिमित्ताजादिप्रत्यये परेऽच आदेशो न स्याद् द्वित्वे कर्तव्ये, इति व्याख्यास्यते। तथा च सर्वत्र दीर्घविषये सवर्णदीर्घः प्राप्नोतीति [2]तक्रकौण्डिन्यन्यायेन किति दीर्घः सवर्णदीर्घं बाधत इति भावः। यत्तु 'न च दीर्घस्यावकाश ईयतुरित्यादिः, तत्रापि पूर्वपरविधेः पूर्वविधित्वात् तत्र कर्तव्ये यणादेशस्य स्थानिवत्त्वादेकादेशप्रसङ्गात्' इति। तत्तुच्छम्, यणादेशापेक्षया सवर्णदीर्घस्यान्तरङ्गत्वेन व्याश्रयत्वेन च यणादेशं बाधित्वा सवर्णदीर्घे इयङादेशे च सति तत्र स्थानिवद्भावेनाभ्याससंज्ञामाश्रित्य [3]'दीर्घ इणः किति' इत्यस्य प्रवृत्तिसंभवात्। [4]'असति संभवे बाधनं भवति, अस्ति च संभवो यदुभयं स्यात्' इति पक्षस्यापि शास्त्रारूढत्वात्। पूर्वस्यैव परस्यैव वा कार्ये कर्तव्ये स्थानिवद्भावस्य व्यवस्थापितत्वेन तत्र सवर्णदीर्घे कर्तव्ये स्थानिवद्भावोक्तेरसंबद्धप्रलापत्वापत्तेः। [5]पक्षान्तराश्रयेण प्रकृतभाष्यस्योपपादितत्वाच्च। **अजादावतिप्रसङ्ग इति**। वलादित्वानपेक्षणेनापूर्वे इटि निपातिते तस्य केनापि [6]बाधनासंभवेन वस्वन्तस्य भसंज्ञायामपीटः श्रवणं यणादेशद्वारा स्यादिति भावः। इदानीं पक्षान्तरं परिगृह्णाति — **एकादिष्टस्येति**। एकादेशस्येत्यर्थः। **ईय् निपात्यत इति**। ततश्च क्वसोरिटि 'ईयिवान्' इति सिध्यतीति भावः। **तद्धि न सुष्ठूच्यत इति**। बहिरङ्गस्य किति दीर्घस्यान्तरङ्गसवर्णदीर्घबाधकत्वासंभवादिति भावः। एतेन 'द्विर्वचने कृतेऽभ्यासदीर्घत्वे चैकादेशः, तस्य ईय्भावो निपात्यते' इति निरस्तम्। अन्तरङ्गसवर्णदीर्घात् पूर्वमभ्यासदीर्घ[7]प्रवृत्तेर्निर्युक्तिकत्वात्। **यणादेश इति**। यद्यपि यणादेशोऽपि किति दीर्घसमकक्ष एवेति तेनापि सवर्णदीर्घबाधनं न संभवति, तथापि [8]'द्विर्वचनेऽचि' इति सूत्रस्य स्थानिवद्रूपातिदेशपरतया व्याख्यानमेव मुख्यमिति द्विर्वचनोत्तरमुत्तरदले इकारस्य यकाररूपेणैवावस्थानात् सवर्णदीर्घं यणादेशो बाधत इत्युपचारो ज्ञेयः। यत्तु "ननु चोक्तमीयतुरित्यत्राप्यभ्यासदीर्घत्वे कृते एकादेशात् पूर्वं [9]'वार्णादाङ्गं बलीयः' इति यणि कृते स्थानिवत्त्वादेकादेशः प्राप्नोति। तस्मादवश्यमभ्यासदीर्घेणैकादेशो बाध्यः" इति। [10]तत् तुच्छम्, सवर्णदीर्घादन्तरङ्गात् पूर्वं बहिरङ्गस्याभ्यासदीर्घस्य प्रवृत्तेरयोगात्। व्याश्रयत्वेन [11]'वार्णादाङ्गम्' इत्यस्याप्यप्रवृत्त्या सवर्णदीर्घं बाधित्वा यणित्यस्याप्ययोगात्। पूर्वपरोभयादेशे स्थानिवद्भावाप्रसक्तेरुक्तत्वात् सवर्णदीर्घबाधनमन्तरेणैवाभ्यासदीर्घस्योपपन्नत्वाच्च। यदप्युक्तम् 'न हि स्थानिवद्भावेन रूपमतिदिश्यते। रूपाश्रयश्च पूर्वपरयोरेकादेशो न यकारस्य भवितुमर्हति' इति। तदपि तुच्छम्, [12]'अचः परस्मिन्' इति सूत्रेण रूपमेवातिदिश्यत इति भगवतोऽभिमतत्वात्। एकादेशवदालोपस्यापि रूपाश्रयत्वेन तन्निमित्तरूपस्य लुप्तत्वादेव तत्र स्थानिवद्भावाप्रसक्त्या वरेग्रहणानर्थक्यापत्तेश्च। यदप्युक्तम् "अथवा यणादेशेन [13]'वार्णादाङ्गम्' इति वचनेन बाधितस्यै-

---

[1] पा. सू. १.१.५९.

[2] अयं न्यायो मिदचोऽन्त्यात्सूत्रे भाष्ये उक्तः।

[3] पा. सू. ७.४.६९.

[4] महाभाष्यम् ६.१.२.

[5] पक्षान्तराश्रयणे प्रकृत — ब.

[6] बाधनासंभवे वस्वन्तस्य — ब.

[7] प्रयुक्तेः — प, ब.

[8] पा. सू. १.१.५९.

[9] परिभाषा ५५.

[10] तदतितुच्छम् — ब.

[11] परिभाषा ५५.

[12] पा. सू. १.१.५७.

[13] परिभाषा ५५.

कादेशस्य बाधितत्वादेव पुनः स्थानिवद्भावात् प्रवृत्त्यभावः" इति। तदपि तुच्छम्, तत्र [1]"वार्णादाङ्गम्' इति वचनाप्रवृत्तेरुक्तत्वात् 'बाधितत्वात् पुनः स्थानिवद्भावेनाप्रवृत्तिः' इत्यस्यापि निर्मूलत्वाच्च। **यत्रास्य निमित्तमिति**। [2]अजादिः प्रत्यय इत्यर्थः। **यत्र हि निमित्तं नास्तीति**। तथा च प्रकृते निष्प्रतिद्वन्द्वः सवर्णदीर्घ इति सिद्धम्। उक्तपक्षस्य निर्दुष्टत्वेऽपि संभवमात्रेण पक्षान्तरं परिगृह्णाति — **व्यञ्जने यणादेशार्थमिति**। द्वित्वोत्तरं सवर्णदीर्घबाधकत्वेन यणि निपातितेऽभ्यासदीर्घे ईय्भावो भवति। तत एकाच्त्वात् तस्य [3]"वस्वेकाजाद्घसाम्' इतीटि 'ईयिवान्' इति रूपं सिध्यतीति भावः। एतेन "अभ्यासदीर्घत्वे कृतेऽजादौ विधीयमानः [4]"इणो यण्' इति यणादेशो हलादौ न प्राप्नोतीति निपात्यते" इति निरस्तम्। अन्तरङ्गव्याश्रयसवर्णदीर्घात् पूर्वमभ्यासदीर्घप्रवृत्तेरसंभवात्। **नोपेयिवान् निपात्य इति**। 'इणः' इति पृथक् सूत्रं कृत्वा 'इणो भूते लिड् वा स्यात्, लिटश्च क्वसुः' इति व्याख्यानेनैव सिद्धत्वादिति भावः। कथं तेन तत्सिद्धिरित्यत आह — **द्विर्वचनादिड् भविष्यतीति**। [5]"आर्धधातुकस्येड् वलादेः' इत्यनेनेति शेषः। **अन्येषामिति**। अजादिभ्य एकाज्भ्योऽन्येषां हलादीनामित्यर्थः। **[द्विर्वचनमिति।]** द्विर्वचनमेवेत्यर्थः। इट् त्वनित्यः, कृते द्विर्वचनेऽनेकाच्त्वादिटोऽप्रसक्तेः। **अस्येति**। इण इत्यर्थः। **तस्मादिड् द्विर्वचनं बाधत इति**। इडागमोत्तरं द्विर्वचनं बाधित्वा परत्वादिणो यणि तस्य स्थानिवद्रूपातिदेशे सति द्वित्वे तत उत्तरदलस्य यण्रूपेणावस्थितौ [6]"दीर्घ इणः किति' इत्यभ्यासदीर्घे 'ईयिवान्' इति सिध्यतीति भावः। 'उपेयुषः' इत्यादौ [7]"अन्तरङ्गानपि विधीन् तन्निमित्तविघातको बहिरङ्गो विधिर्बाधते' इति संप्रसारणेनेड् बाध्यत इति न काप्यनुपपत्तिः। एवं च द्वितीयतृतीयावपि निपातनपक्षावसंगताविति स्पष्टमेव। **अनूचानः कर्तरीति**। कानच आत्मनेपदत्वेन भावकर्मणोरतिप्रसक्तौ वचनम्। लिट्क्वसुस्तु [8]परस्मैपदसंज्ञक इति कर्तर्येव प्रवर्तते॥

[३, २६३–२६६]

(नारायणीयम्) उपसर्गस्यातन्त्रत्वादिति। सोपसर्गनिर्देशस्याविवक्षितत्वादुपसर्ग[9]रहितस्यान्योपसृष्टस्यापि प्रयोग उपपद्यते [10]"ईयिवांसमतिस्रिधः' इत्यादौ। 'उपेयिवान्' इत्यत्रेडर्थत्वं निपातनस्य दर्शयितुमिटोऽप्राप्तिमुपपादयति — **इणो लिडिति**। **इडागमादिति**। [11]"वस्वेकाजाद्घसाम्' इत्यनेन विहितात्। **नित्यत्वाद् द्विर्वचनमिति**। [12]इडागमस्त्वनित्यः, द्विर्वचने सत्यनेकाच्त्वात् प्राप्त्यभावात्। ननु द्विर्वचने कृते सवर्णदीर्घत्वे चैकाच्त्वात् प्राप्नुवन्निट् कथमनित्य इत्यत आह — **दीर्घ इण इति**। **तत्सामर्थ्यादिति**। यदि ह्येकादेशः प्रवर्तेत दीर्घविधानमनर्थकं स्यात्, एकादेशेनैव रूपस्य सिद्धत्वादित्यर्थः। नन्विणो लिटचतुसि द्विर्वचने कृते इ इ अतुस् इति स्थिते दीर्घत्वं

---

[1] परिभाषा ५५.
[2] आदिः — ब.
[3] पा. सू. ७.२.६७.
[4] पा. सू. ६.४.८१.
[5] पा. सू. ७.२.३५.
[6] पा. सू. ७.४.६९.
[7] परिभाषेदृशी प्रत्ययोत्तरपदयोश्चेति सूत्रेण ज्ञापितेति रत्नप्रकाशकृदभिमतम्।
[8] लादेशत्वादिति भावः।
[9] रहितस्यान्येनोपसृष्टस्यापि — ङ.
[10] ऋक्संहिता ३.९.४.
[11] पा. सू. ७.२.६७.
[12] 'इट्' इति नास्ति — ङ.

प्राप्नोति, [1]'इणो यण्' इति यणादेशश्च। तत्र परत्वाद्वा [2]'वार्णादाङ्गं बलीयः' इति वा यणि सति निमित्ताभावादेकादेशस्याप्राप्तत्वाद् दीर्घविधानमर्थवद् भवतीति किं तत् सामर्थ्यमित्यत आह — **न चेति**। **विशेषानुपादानादिति**। अत्र सूत्रे वलादेरिति विशेषस्यानुपादानादित्यर्थः। प्रकरणभेदादुपाध्यसंबन्धे दृष्टान्तमाह — **यथेति**। **नित्यश्चायमिति**। अनेन [3]'स्यसिच्सीयुट्' इति विहितस्येटो वलादिलक्षणत्वाभावं दर्शयति — **प्रतिप्रसवमात्रमिति**। प्रतिबन्धापनयनेन पुनरपि तस्यैव प्रवर्तनामात्रमित्यर्थः। भाष्ये दीर्घोच्चारणस्य प्रयोजनं दर्शयितुमाह — **यद्यपीति**। **अजादौ विधीयमान इति**। तेन क्वसौ हलादौ यणभावादसति प्रतिबन्ध एकादेशः प्रवर्तत एवेति भावः। तदेतदुक्तम् — भाष्ये [4]**निष्प्रतिद्वन्द्वस्तत्रैकादेश इति**। **न हीति**। [5]'कार्यातिदेशाश्रयणात्। **न यकारस्येति**। [6]अकोः पूर्वपरयोः स्थानित्वात्। बाधितत्वादेव[7] पुनः स्थानिवत्त्वात् प्रवृत्त्यभावान्नैष दोष इत्यनुषङ्गः। वार्तिके 'व्यञ्जने' इत्यनेन यणादेशस्याप्राप्त्या निपात्यत्वमुक्तमिति दशयति — **अजादौ विधीयमान इति**। [8]**इति निपात्यत इति**। ई इवस् इति स्थिते यणादेशो निपात्यते। अतश्च लक्षणेनैवेटः प्रवर्तनादजादावतिप्रसङ्गोऽपि न[9] भवतीत्याह — [10]**ततश्चेति**। ननु 'उपेयिवान्' इति निपातनाभावे भाषायां भूतमात्रे क्वसुर्न[11] सिध्यतीत्याह **इणो भाषायामिति**। **कार्यान्तरं त्विति**। इडादिकं निपातनेन विनापि सिध्यतीति [12]भाष्यतात्पर्यमित्यर्थः। अन्यशब्दार्थमाह — **भिदादीनामिति**। अनित्यत्वमिटो दर्शयति — **द्विर्वचने कृत इति**। ततश्च नित्यत्वात् पूर्वं द्विर्वचने कृतेऽनेकाच्त्वादिटोऽप्रसङ्गः 'बिभिद्वान्' इत्यादौ ॥

लुङ ३.२.११०.

[३, २६६–२६८]

(उद्द्योतनम्) सामान्यविषयत्वाविशेषाद् द्वयोर्युगपद्विचाराय 'लुङ्लृटोः' इति वार्तिकम्। तत्र भूतभविष्यत्कालसामान्यविवक्षायां नापवादप्रसङ्गः, अत आह — **कालविशेषेति**। [13]सामान्ये विशेषसद्भावाच्चोद्यमित्यर्थः। **सामान्येति**। सामान्यविशेषयोर्भेदाद्विवक्षाभेदेन प्रयोगद्वयोपपत्तिरित्यर्थः। **विशेषनिश्चयेति**। विशेषानिश्चयः सामान्यविवक्षाहेतुः, तत्सत्त्वे सामान्यविवक्षैव नास्तीति चोद्याशयः। नन्वत्र सत एव सामान्यस्य विवक्षा, न त्वसत इति 'असतश्च' इति प्रकृतानुपयुक्तम्, अत आह — **विवक्षोपारूढ इति**। शब्दप्रयोगे विवक्षैव प्रयोजिका, न तु [14]वस्तुसत्तामात्रम्। तथा च [15]विशेषाविवक्षायां सत्यपि [16]तस्मिन् सामान्यप्रयोगोपपत्तिरित्यर्थः। [17]कैमुतिकन्यायसूचनार्थं

---

[1] पा. सू. ६.४.८१.
[2] परिभाषा ५५.
[3] पा. सू. ६.४.६२.
[4] निष्प्रतिबन्धस्तदैकादेश इति — घ, ङ.
[5] अर्थातिदेशात्। न यकारस्येति — घ.
[6] अनयोः — घ, ङ.
[7] एवकारो नास्ति — ङ.
[8] इतिशब्दो नास्ति — ङ.
[9] 'न' इति नास्ति — ङ.
[10] अतश्चेति — घ, ङ.
[11] 'न' इति नास्ति — ङ.
[12] 'भाष्य' इति नास्ति — ङ.
[13] सामान्यविशेष — अ.
[14] वस्तुतन्मात्रम् — अ.
[15] विशेषविवक्षायां — अ.
[16] 'तस्मिन्' इति नास्ति — अ.
[17] लौ. न्या. साहस्री. पृष्ठम् ४९.

तदुक्तिरिति भावः। [1]रात्रिशेषशब्देन कियान् कालोऽभिमतः, अत आह — **रात्रेश्चतुर्थ इति**। अतीतप्रहरत्रयस्य कथमनद्यतनत्वम्, अत आह — **एकस्या इति**॥

[३, २६६–२६८]

(रत्नप्रकाशः) अद्यतने भूते लुङ्विधिरुचितः, अद्यतने भविष्यति तु लृड्विधिरिति मन्यमान आह — **लुङ्लृटोरिति**। **अविशेषवचनादिति**। भूतसामान्ये लुङो भविष्यत्सामान्ये लृटो वचनात् कारणादित्यर्थः। परिहरति — **न वेति**। **निमित्ताभावादिति**। निमित्तशब्दस्य संबन्धिशब्दत्वादपवादशब्दसापेक्षत्वेऽपि समासः। ननु भूतभविष्यत्सामान्येऽनद्यतनोऽप्यस्ति काल इति चेन्न, तद्विवक्षायास्तत्र हेतुत्वेन तत्सत्त्वेऽपि तदप्रवृत्तेरित्याशयेनाह — **न चात्रानद्यतनः कालो विवक्षित इति**। **यत्रैतन्न ज्ञायत इति**। भविष्यत्सामान्ये लृटो विधानात् तद्विशेषज्ञाने प्रमाणान्तराभावादिति भावः। **निर्ज्ञातमिति**। अनुभूते वस्तुनि स्मरणसंभवादिति भावः। **अत्रापीति**। विशेषज्ञानमपि लङ्लुटोर्निमित्तं न भवति, किं तु विशेषविवक्षेति भावः। **असतश्चेति**। तथा च शब्दप्रयोगे विवक्षैव कारणम्, न वस्तुसद्भावमात्रमिति फलितम्। एतेन 'इह तु सदेव विशेषेषु सामान्यमाश्रित्य लुङादिप्रयोग उपपद्यते। विशेषविवक्षायां तु लङादिप्रयोग इति न कश्चिद्दोषः' इति निरस्तम्। सामान्यविधौ सामान्यसद्भाव एव कारणम्, विशेषविधौ तु तद्विवक्षेति व्यवस्थायां मानाभावात्। प्रकृतभाष्येण 'न चात्रानद्यतनः कालो विवक्षितः, किं तर्हि, भूतकालसामान्यं भविष्यत्कालसामान्यं च' इति पूर्वभाष्येण च सर्वत्र विवक्षाया एव कारणत्वस्य स्पष्टमुक्तत्वेन तदुपेक्षायां मानप्रयोजनयोरभावाच्च। विशेषविवक्षायामपि लुङेव क्वचिदिष्ट इत्याशयेनाह — **वसेर्लुङ् रात्रिशेष इति**। चतुर्थो यामो रात्रिशेषत्वेनात्राभिमतः। तदभिप्रायेणैवाह — **न्याय्य इति**। न्यायादनपेत इत्यर्थः। **प्रत्युत्थान इति**। प्रत्युत्तिष्ठन्त्यस्मिन्निति प्रत्युत्थानः, अधिकरणे ल्युट्। [2]**प्रस्थितमिति**। प्रत्युत्थितमित्यस्योपलक्षणमिदम्। **अवसमिति प्राप्नोतीति**। अनद्यतनविवक्षायामिति शेषः। **जागरणसंतताविति**। येनोत्तरं देयं तस्य गतयामत्रये जागरणस्याविच्छेदश्चेज्जातस्तदानद्यतनविवक्षायां तेन लुङ्प्रयोगेणैवोत्तरं देयम्, न तु लङ्प्रयोगेणेति भावः। **अवसमित्येव भवितव्यमिति**। विशेषविवक्षायामिति शेषः॥

[३, २६६–२६८]

(नारायणीयम्) कालाविशेषेति। चिरवृत्तं हि कथयन्तः 'अगमाम घोषान्' इत्यादि प्रयुञ्जते। तत्र वस्तुतोऽनद्यतनविशेषसद्भावाल्लङ् प्राप्नोति। तथा 'गमिष्यामो घोषान्' इत्यादौ लुट् च प्राप्नोतीति पूर्वः पक्षः। **सामान्यविवक्षाश्रयेणेति**। विवक्षारूढो ह्यर्थः शब्दप्रयोगस्य निमित्तम्, न वस्तुतः सन्। [3]ततश्चैवमादौ विषयविशेषे सामान्यस्यावश्यंभावात् तद्विवक्षाश्रयेण लुङ्लृट्प्रयोगोपपत्तिः। तथा च वैयाकरणचूडामणेर्महाकवेः प्रयोगः [4]"अभून्नृपो विबुधसखः परंतपः' इति। **विशेषनिश्चयाभावादिति**। [5]भविष्यत्यर्थे विशेषनिश्चयो नास्तीत्यर्थः। यदि सत एव

---

[1] सूत्रे शेषशब्देन — अ.

[2] भाष्ये 'प्रत्युत्थितम्' इत्यस्य स्थाने 'प्रस्थितम्' इति रत्नप्रकाशकृदभिमतः पाठः। अयं पाठ उद्द्योते पाठान्तरत्वेन निर्दिष्टः।

[3] अतश्चैवमादौ — घ.

[4] भट्टिकाव्यम् सर्ग १. श्लो. १.

[5] भविष्यत्यर्थविशेष — घ, ङ.

सामान्यस्यात्र विवक्षा, तर्हि कथमसतो विवक्षा भाष्य उदाहृतेत्यत्राह — **विवक्षोपारूढ एवेति**। [1]कैमुतिकन्यायप्रदर्शनायैतदुक्तमित्यर्थः। एतदेव दर्शयति — **इह त्विति**। 'अमुत्रावात्सम्' इत्यादौ सूत्रेण लुङोऽप्राप्तिं दर्शयति — **रात्रेश्चतुर्थ इति**। अनेन 'न्याय्ये प्रत्युत्थाने प्रत्युत्थितम्'[6] इत्येतद् व्याख्यातम्। तथा च [2]स्मर्यते [3]'ब्राह्मे मुहूर्ते उत्थाय' इति, [4]'रात्रेस्तु पश्चिमो यामो मुहूर्तो ब्राह्म उच्यते' इति च। अतिक्रान्तरात्रिप्रहरत्रयमनद्यतनमित्येतदुपपादयितुमद्यतनस्वरूपमाह — **एकस्या इति**। 'इत्याहुः' इत्यनेन पूर्वाचार्याणां वचनमत्र प्रमाणत्वेन दर्शयति। 'यो हि मुहूर्त-[मात्र]म्' इत्यादिभाष्यं व्याचष्टे — **यदा त्विति**॥

अनद्यतने लङ् ३.२.१११.

[३, २६८–२६९]

(उद्द्योतनम्) सन्तीति। वृक्षे शाखावदिति भावः। ननु समुदायस्य समुदाय्यपेक्षया भिन्नत्वान्मुख्य एवाधाराधेयभावोऽस्तु, किं व्यपदेशिवद्भावेन, अत आह — **न त्विति**। **अत्र** काले। [5]अवयविरूपः समुदाय इत्यर्थः। यथा तन्त्वारब्धः पटस्तन्त्वतिरिक्तस्तथा [6]क्षणाद्यारब्धा घटिकादयो न सन्तीति भावः। **कालस्यापीति**। 'प्रहरे मुहूर्तोऽस्ति' [7]इत्यादिलौकिकव्यवहारः। दर्शनाविषयत्वं परोक्षत्वमिति दर्शनविषयस्य परोक्षत्वविरोधः, अत आह — **अननुभूतत्वादिति**। प्रत्यक्षविषयत्वाभावः परोक्षत्वं तद्योग्यत्वमात्रं दर्शनविषयत्वं पर्वतीयवह्न्यादाविवैकत्र[8] न विरुद्धमित्यर्थः। यवनावरणसमये साकेताद् दूरस्थस्यायं प्रयोग इति भावः॥

[३, २६८–२६९]

(रत्नप्रकाशः) अनद्यतनशब्दस्य नञ्तत्पुरुषत्वाश्रयणे 'अद्य ह्योऽभुक्ष्महि' [9]इत्यादावनद्यतनविवक्षासत्त्वेन लङ् स्यात्, स नेष्टः, किं तु [10]भूतसामान्यविवक्षाधीनो लुङेवेत्याशयेनाह — **अनद्यतन इति बहुव्रीहिरिति**। **यद्येवमिति**। यदि बहुव्रीहिराश्रीयत इत्यर्थः। **व्यपदेशिवद्भावेनेति**। यथैकस्मिन्नच्यविद्यमानैकाच्त्वं नास्ति, व्यपदेशिवद्भावेन विद्यमानैकाच्त्वात्, तथा व्यपदेशिवद्भावेन विद्यमानाद्यतन[11]कालेऽविद्यमानाद्यतनकालत्वं नेति भावः। एतेन 'यथा मुख्ये भेदे आधाराधेयभावो भवति तटे तिष्ठतीति तथेहापि समुदायावयवभेदाश्रयेण समुदायेऽद्यतनेऽवयवा अद्यतनाः सन्तीत्यनद्यतनो न भवतीत्युच्यते, न तु तत्त्वतोऽवयवव्यतिरिक्तोऽत्र समुदाय आधारोऽस्ति' इति निरस्तम्। औपश्लेषिकवद्वैषयिकाभिव्यापकयोरप्याधारतायां मुख्यताश्रयेण 'तिलेषु, तैलम्, दध्नि सर्पिः, वृक्षे शाखा' इत्यादाविव सर्वत्रावयवावयविभावस्थले मुख्याधारतासंभवेन

---

[1] लौ. न्या. साहस्री. पृष्ठम् ४९.
[2] बुध्यते — घ.
[3] याज्ञवल्क्यस्मृतिः आचाराध्याये श्लो. ११५.
[4] 'स्मृतिभास्करे' इत्याह्निककाण्डे वैद्यनाथदीक्षितीये.
[5] अवयविरूपसमुदाय इत्यर्थः — अ.
[6] क्षणाद्यारब्धघटिकादयः — अ.
[7] इति तार्किकव्यवहारः — अ.
[8] 'एकत्र' इति नास्ति — ऋ.
[9] इत्यादावद्यतन — प, ब.
[10] भूते सामान्य — प, ब.
[11] कालेऽविद्यमानानद्यतन — प, ब.

व्यपदेशिवद्भावपरभाष्यस्यावयवावयविभावभेदपरतया व्याख्यानानौचित्यात्। यदप्युक्तम् "तदुक्तं हरिणा—[1]"कालस्याप्यपरं कालं निर्दिशन्त्येव लौकिकाः। न च निर्देशमात्रेण व्यतिरेकोऽनुगम्यते"॥ इति" इति। तदपि न, तस्य श्लोकस्य यथाश्रुतभाष्यानुसारिणोऽवयवावयविभावकल्पनपरत्वाभावेन स्वोक्तेऽर्थे संमतित्वाभावात्। अवयवातिरिक्तावयविनो [2]निराकरणे स्फोटवादोच्छेदापत्तेश्च। **परोक्षे चेति**। दूरस्थत्व[3]व्यवहितत्वादिना साधनानां परोक्षत्वात् तन्निष्ठक्रियायाः परोक्षत्वं लोकविज्ञातं भवति। प्रयोक्ता च तत्क्रियानिष्पत्तिसमये तत्र स्थित इति तदपेक्षया दूरत्वादिदोषाभावेन तस्य साधनदर्शनं भवतीति तन्निष्ठक्रियायास्तद्दर्शनविषयत्वमौपचारिकमुपपद्यते। एतेन 'अननुभूतत्वात् परोक्षोऽपि प्रत्यक्षयोग्यतामात्राश्रयेण दर्शनविषय इति विरोधाभावः' इति निरस्तम्। भिन्नविषयत्वेन यथाश्रुतभाष्यस्योपपन्नस्यान्यथाव्याख्यानानौचित्यात्॥

[३, २६८–२६९]

(नारायणीयम्) मुख्यो व्यपदेशो यस्यास्ति स व्यपदेशी, तद्वद्भावो **व्यपदेशिवद्भावः**, अमुख्यो व्यपदेश इति यावत्। एतदेव विविच्य दर्शयति—**यथा मुख्य इति**। **अवयवा अद्यतना इति**। क्षणमुहूर्तादयः। **कालस्यापीति**। 'अद्य भवोऽद्यतनः कालः, श्वो भवः श्वस्तनः' [4]इत्यादयो लोके व्यपदेशाः सन्ति। न चैतावता वस्तुतः कालस्याधाराधेयभावेन भेदः प्रमाणसिद्धः, काल्पनिकत्वात् तस्येत्यर्थः। ननु परोक्षत्वं प्रयोक्तुर्दर्शनविषयत्वं चैकस्य विरुद्धमित्यत्राह—**अननुभूतत्वादिति**। [5]**द्रष्टुं शक्यत्वाच्चेति**। यद्यसौ दिदृक्षया तत्र गत्वा यवनकृतं साकेतरोधनं वीक्षेत [6]तदासौ तद् द्रष्टुं शक्नुयादेव, तत्कालीनत्वात्। कंसवधादिस्तु चिरातीतत्वाद् द्रष्टुं न शक्यत इत्यर्थः॥

विभाषा साकाङ्क्षे ३.२.११४.

[३, २६९–२७०]

(उद्द्योतनम्) परोपकारित्वं साकाङ्क्षत्वमभिप्रेत्य शङ्केत्युपपादयति—**यदतिप्रसिद्धमिति**। **तत्स्मार्यमाणत्वात्** तेन वासगमनादिना स्मार्यमाणत्वात्। [7]'अस्त्याकाङ्क्षा' इति भाष्यमुपपादयति—**सहशब्द इति**। निपातानामनेकार्थत्वादित्यर्थः। **तेनेति**। **सह** विद्यमाना आकाङ्क्षा यस्येति [8]"अनेकमन्यपदार्थे' इति बहुव्रीहिः, न तु [9]'तेन सह' इत्यनेन, पदार्थाकाङ्क्षयोस्तुल्यत्वाभावात्। तत्र वाक्यार्थज्ञानहेतुभूताया आकाङ्क्षाया उभयोरपि सत्त्वात् साकाङ्क्षत्वमविशिष्टमित्यर्थः। इदं नापूर्ववचनमित्याह—[10]**यदीति**॥

---

[1] वाक्यपदीयम् ३.३.८५.

[2] 'निराकरणे' इत्यस्यानन्तरम् 'अस्य' इत्यधिकम्—प.

[3] व्यवहितत्वादिसाधनानां—प, ब.

[4] इत्यनयोर्लोके—ङ.

[5] प्रदीपे 'अननुभूतत्वात् परोक्षोऽपि' इत्यत्र 'अननुभूतत्वाद् द्रष्टुं शक्यत्वाच्च परोक्षोऽपि' इति पाठोऽभिमत इति भाति॥ द्रष्टुमशक्यत्वाच्चेति—घ.

[6] तदासौ शक्नुयादेव द्रष्टुं तत्कालीनत्वात्—ङ.

[7] अस्त्यस्मिन्नाकाङ्क्षेत्यत्र तात्पर्यम्।

[8] पा. सू. २.२.२४.

[9] पा. सू. २.२.२८.

[10] 'यदीति' इति नास्ति—ऋ.

[३, २६९–२७०]

(रत्नप्रकाशः) **पूर्वं परमाकाङ्क्षतीति**। 'कश्मीरेषु वत्स्यामः' इत्युक्ते आकाङ्क्षा जायते। पुनस्तत्र किं कृतवन्त इत्याकाङ्क्षायां 'सक्तून् पास्यामः' इति प्रयुक्तत्वात् पूर्वं परं प्रति साकाङ्क्षमिति युक्तम्। 'तत्र सक्तून् पास्यामः' इत्युक्ते पुनः किं कृतवन्त इत्याकाङ्क्षा न जातेति कृत्वैव वाक्यान्तरं न प्रयुक्तमिति तस्य साकाङ्क्षत्वं न युज्यत इति भावः। एतेन 'यदतिप्रसिद्धं वासगमनादि तल्लक्षणम्, तच्च परार्थमुपादीयमानं यत् तत्स्मार्यमाणत्वाल्लक्ष्यं भोजनादि प्रति भवतु साकाङ्क्षम्, लक्ष्यं प्रधानमपरोपकारि कथं साकाङ्क्षमित्यर्थः, इति निरस्तम्। वासादेर्लक्षणत्वे भोजनादेर्लक्ष्यत्वे लक्षणस्य लक्ष्याकाङ्क्षायां [1]लक्ष्यस्य [2]लक्षणानाकाङ्क्षायां च मानाभावात्। पूर्वपरशब्दघटितस्य भाष्यस्य मदुक्तप्रकारेणैवोपपन्नत्वाच्च। **अस्मिन्निति**। परस्मिन्नित्यर्थः। पूर्वस्येति शेषः। तथा चाकाङ्क्षाकर्तुः पूर्वस्यैवाकाङ्क्षाविषयस्य परस्य साकाङ्क्षत्वं युक्तमिति फलितम्। एतेन 'सहशब्दो विद्यमानार्थवृत्तिः। तेन विद्यमानाकाङ्क्षः साकाङ्क्षोऽर्थ उच्यते। लक्ष्यलक्षणयोश्च परस्परापेक्षत्वाद् द्वयोरपि साकाङ्क्षत्वमित्यर्थः' इति निरस्तम्। प्रकृतभाष्यस्य तदर्थकत्वाभावात्। आक्षेप्तुरपि विद्यमानाकाङ्क्षताया एव साकाङ्क्षताया अभिमतत्वेन तत्कथनस्य व्यर्थप्रलापत्वात्। लक्ष्यलक्षणभावस्य तदभिमतस्य निरस्तत्वात्, तयोस्तत्र परस्पराकाङ्क्षायां मानाभावाच्च। **सर्वत्रेति**। [3]'न यदि' इति निषेधः [4]'अभिज्ञावचने लृट्' इत्यस्यैव, विधिपूर्वकत्वान्निषेधस्य। यदीति चात्र नानुवर्तते, तथा चोभयत्र विभाषेयमिति भावः॥

[३, २६९–२७०]

(नारायणीयम्) **लक्ष्यं तु प्रधानमिति**। प्रधानत्वादेव परोपकारित्वाभावः। तेन साकाङ्क्षत्वमपि तस्य नोपपद्यत इत्यर्थः। **सहशब्दो विद्यमानार्थवृत्तिरिति**। [5]'तेन सहेति तुल्ययोगे' इत्यत्र [6]तुल्ययोग इति विशेषणं प्रायिकमिति भावः। **लक्ष्यलक्षणयोश्चेति**। [7]आकाङ्क्षा हि प्रयोक्तृधर्मः। प्रयोक्ता हि वासमात्रप्रतिपादनेन [8]न चरितार्थः, किं तर्हि, प्रसिद्धेन तेन भोजनादिकं स्मारयितुं प्रयतत इति द्वयोरपि लक्ष्यलक्षणयोः साकाङ्क्षत्वमुपपद्यत इत्यर्थः। 'सर्वत्रेति वक्तव्यम्' इत्यस्य व्याख्यातव्यमित्यर्थमाह— **यदीति नेति**। **उभयत्रविभाषेति**। असति यच्छब्दे [9]'अभिज्ञावचने लृट्' इति प्राप्ते, सति तु तस्मिन् [10]'न यदि' इति [11]प्रतिषेधादप्राप्ते॥

---

[1] 'लक्ष्यस्य लक्षणानाकाङ्क्षायाम्' इति नास्ति — प.
[2] लक्षणाकाङ्क्षायां च — ब.
[3] पा. सू. ३.२.११३.
[4] पा. सू. ३.२.११२.
[5] पा. सू. २.२.२८.
[6] तुल्ययोगविशेषणं — ङ.
[7] आकाङ्क्षापि प्रयोक्तृधर्मः — ङ.
[8] 'न' इति नास्ति — ङ.
[9] पा. सू. ३.२.११२.
[10] पा. सू. ३.२.११३.
[11] प्रतिषेधे प्राप्ते — ङ.

परोक्षे लिट् ३.२.११५.

[३, २७०–२७४]

(उद्द्योतनम्) परोक्षशब्दार्थस्य प्रसिद्धत्वान्नैतन्मात्रविषयः प्रश्न इत्याह — **यद्यपीति**। उक्तविग्रहे समासान्तरासंभवादाह — **मयूरेति**। अकारान्तत्वं द्वेधाह — **अच् प्रतीति**। प्रकारान्तरासंभवे योगविभागनिपातनयोराश्रयणम्, न तु संभवेऽपीत्याशयेनाह — **यद्वेति**। ननु शरदादिगणसूत्रमिदम्, तथा च कथं तत्पुरुषाट्टच्, अत आह — **स च यद्यपीति**। अनुभूयमानगन्धरसादेः परोक्षत्वनिरासायाहै — **वृत्तिविषय इति**। अक्षिशब्दस्य चक्षुःपर्यायत्वाभावः सूत्रकृतोऽपि [1]संमत इत्याह — [2]**अत एवेति**।[3] परोक्षमित्यत्राच्प्रत्ययम् [3]'अक्ष्णोऽदर्शनात्' इत्यनेन केचित् कुर्वन्तीत्यर्थः। अक्षिशब्दस्येन्द्रियपरत्वकथनप्रयोजनमाह — **तत इति**। 'अश्नोतेः' इत्यनेन प्रश्नोत्तरं किमपि नोक्तम्, अत आह — **व्युत्पत्तिद्वारेणेति**। परोभावस्योत्वस्य वा निपातनशङ्कां वारयति — **निर्भाग इति**। पूर्वत्र परोभाव उत्वं वा निपातनादेव लभ्यम्, अतोऽत्र निर्भागनिपातनं विवक्षितमिति भावः। 'भूते' इति सूत्रोक्तप्रकारं परोक्षत्वेऽप्यतिदिशति — [4]**यथेति**। शब्दस्यातीतस्य परोक्षत्वं विद्यमानस्यापरोक्षत्वमिति 'न च शब्दस्य' इत्ययुक्तम्, अत आह — **प्रत्ययप्रकृतेरिति**। प्रत्यक्षत्वं दृष्टान्तत्वेनोक्तमित्याह — [5]**तत्र यथेति**। एवं च प्रत्यक्षपरोक्षताया [6]विशेषणत्वेन शब्दे संभवो नास्तीति भाष्यार्थः। क्रिया धात्वर्थ इति प्रसिद्धत्वात् प्रश्नायोगः, अत आह — **यदीति**। **युक्तं विशेषणमिति**। तथा चैवमेव देवदत्ते 'पपाच' इति प्रयोग इति भावः। **समूहरूपेति**। यद्यपि तस्याः परोक्षत्वमविशेषणमित्युक्तम्, तथापि तत एवास्वरसात् 'साधनेषु' इति वक्ष्यतीति भावः। ननु साधनं शक्तिः, सापि नित्यपरोक्षा। ततश्च विशेषणवैयर्थ्यम्, 'ह्योऽपचत्' इत्यत्र लिट्प्रसङ्गश्च, अत आह — **शक्तिशक्तिमतोरिति**। [7]गुणशब्दस्य रूपादिपरत्वशङ्कां निराह — **शक्तीनामिति**। समुदायग्रहणस्य कार्त्स्न्यार्थकत्वेन साफल्यमाह — **समुदायग्रहणमिति**। ननु क्रियाया अपि परोक्षत्वापरोक्षत्वव्यवहारो [8]लोके दृश्यते, स किंनिबन्धनः, अत आह — **तत्र द्रव्येति**। एवं च क्रियायाः परोक्षत्वविवक्षायामपि नानुपपत्तिरिति भावः। ननु तण्डुलदर्शनेन पाकनिश्चये तत्साधनत्वनिश्चयात् परोक्षत्वाभावात् कथं 'पपाच' इति तदानीं प्रयोगः, अत आह — [9]**दृष्ट्वापीति**। तण्डुलोदकं दृष्ट्वेत्यन्वयः। अनिश्चयमेवाभिनयति — **किमेत इति**। [10]**संबन्धिरूपस्य** क्रियाकारकसंबन्धिरूपस्य। क्रियाकृतविशेषाणामक्रियात्वादक्रियासाधनत्वाच्च कथं [11]तत्पारोक्ष्ये प्रत्ययः, अत आह — **क्रियाकृतेति**। [12]**तत्परोक्षत्व इति**। [13]द्रव्यपारोक्ष्य इव क्रियाकृतविशेष[14]पारोक्ष्येऽपि क्रियापारोक्ष्यव्यवहारादित्यर्थः। सर्वेषां सिद्धान्तत्वभ्रमं वारयति — **मतभेदेति**।

---

[1] न संमत इत्याह — ऋ.

[2] अचिरेति — ऋ, लृ.

[3] पा. सू. ५.४.७६.

[4] यदेति — अ, ऋ, लृ.

[5] प्रदीपे 'ततो यथा' इत्यत्र 'तत्र यथा' इत्यन्नंभट्टपाठ इति भाति।

[6] विशेषरूपत्वेन शब्दे — अ.

[7] गुणशब्दस्य स्वरूपादि — अ.

[8] 'लोके' इति नास्ति — ऋ.

[9] दृष्टा त्विति — अ; द्रष्टा त्विति — ऋ, लृ.

[10] प्रदीपे 'साधनत्वस्य संरम्भरूपस्य' इति पाठो दृश्यते। 'साधनस्य संबन्धिरूपस्य' इत्यन्नंभट्टपाठः स्यादिति भाति।

[11] तत्परोक्षे प्रत्ययः — अ; तत्पारोक्ष्यप्रत्ययः — ऋ.

[12] तत्परोक्ष इति — अ, ऋ, लृ.

[13] 'द्रव्यपारोक्ष्य इव' इति नास्ति — अ; द्रव्यपारोक्ष्य इति — ऋ.

[14] 'पारोक्ष्येऽपि क्रिया' इति नास्ति — अ.

तर्हि कः सिद्धान्तः, अत आह — **इन्द्रियेति**। **विषयान्तरेणेति**। शब्दविशेषश्रवणे व्यासक्तं मनश्चक्षुषा न संबध्यत इत्यर्थः। अत्यन्त[1]पदस्य कृत्यमाह — **न केवलमिति**। 'न कारिसोमम्' इति भाष्यं व्याचष्टे — **त्वयेति**। 'न दार्वजस्य' इत्येतद्व्याचष्टे — **तयेति**। 'को [मे] मनुष्यः' इत्येतद्व्याचष्टे — **को मनुष्य इति**। मयाकृत्यं[2] कलिङ्गगमनादि किमपि न कृतम्, अतो मम वधपर्यन्तव्यापिनमसत्यारोपरूपं प्रहारं को वा कुर्यादित्यर्थः॥

[३, २७०–२७४]

(रत्नप्रकाशः) 'परोभावः' इत्यादिश्लोकवार्तिकमवतारयति — **किं परोक्षं नामेति**। परोक्षशब्दः कथं व्युत्पन्न इत्यर्थः। एतेन 'यद्यपीन्द्रियाविषयोऽर्थः परोक्षशब्दवाच्य' इति जानाति, तथापि सर्वस्याः क्रियायाः परोक्षत्वाद् विशेषणानर्थक्यमिति प्रश्नः' इति निरस्तम्। तथात्वे प्रश्नस्य 'परमक्ष्णः परोक्षम्' इत्यवयवदर्शनेनोत्तरस्य, पुनः 'किं पुनरक्षि' इत्यक्षिव्युत्पत्तिविषयकप्रश्नस्य 'अश्नोतेरयमौणादिकः करणसाधनः सिप्रत्ययः अश्नुतेऽनेनेत्यक्षि' इति पुनरुत्तरस्य चासंगतत्वापत्तेः। **परमक्ष्ण इति**। मयूरव्यंसकादित्वात् तत्पुरुष इति भावः। **पराक्षमिति प्राप्नोतीति**। [3]'प्रतिपरसमनुभ्योऽक्ष्णः' इति शरदादिगणे पाठात् समासान्तरेऽपि टज् भवतीति ज्ञात्वैवमुक्तम्। अन्यथा 'पराक्षि' इति प्राप्नोतीत्यप्युक्तं स्यात्। **परोभाव इति**। 'परोक्षे लिट्' इति सूत्रे निर्दिष्टस्य लोकेऽपि साधुत्वेन प्रतिपन्नस्य सिद्धये परशब्दस्याक्षशब्दे परे परो इत्योकारान्त आदेशो वक्तव्य इत्यर्थः। **निपातनादेव सिद्धमिति**। तथा च शरदादिगणे 'प्रतिसमनुभ्योऽक्ष्णः' इत्येव पठनीयमित्यपि सूचितम्। **कस्मिन् पुनरिति**। धात्वर्थतत्साधनकालानां परोक्षत्वार्हत्वात् प्रश्नः। **काल इति**। [4]क्रियोपाधिकस्य कालस्य परोक्षत्वादिकं संभवतीति भावः। **न वै कालाधिकार इति**। काल इति विशेष्यसमर्पकोऽधिकारो नास्तीति कृत्वा परोक्षशब्दस्य कालविशेषणसमर्पकत्वं न युज्यत इति भावः। ननु [5]'भूते' इत्येव कालपरं विशेष्यसमर्पकं भवत्विति चेन्न, तत्रापि कालाधिकाराभावस्य तुल्यत्वेन भूतशब्दस्यापि कालपरत्वनिर्णयाभावात्। **न च शब्दस्येति**। प्रत्ययप्रकृतेर्धातुरूपस्य प्रयुज्यमानस्य श्रोत्रेन्द्रियग्राह्यस्य शब्दस्य परोक्षत्वं बाधितमित्यर्थः। **परोक्षे धात्वर्थ इति**। परोक्षे वर्तमानाद्धातोरिति भावः। धात्वर्थजिज्ञासया पृच्छति — **कः पुनरिति**। एतेन 'यद्येकैकक्षणो धात्वर्थस्तदा तस्य प्रत्यक्षत्वपरोक्षत्वसंभवाद्युक्तं विशेषणम्। अथ समूहः, तस्य युगपदसंनिधानादप्रत्यक्षत्वाव्यभिचारात् परोक्षत्वमविशेषणमिति प्रश्नः' इति निरस्तम्। वर्णानामाशुतरविनाशित्वेऽपि तत्समुदायस्य पदस्येव क्रियासमुदायस्यापि प्रत्यक्षत्वसंभवेनावयवस्य प्रत्यक्षत्वाभ्युपगमे समूहस्याप्रत्यक्षत्वाभ्युपगमे च मानाभावात्। 'क्रिया नामेयमत्यन्तापरदृष्टा'[6] इत्युत्तरभाष्यविरोधाच्च। उत्तरमाह — **क्रियेति**। एतेन 'समूहरूपेति भावः' इति निरस्तम्। तत्र मानाभावात्। **ह्योऽपचदित्यत्रेति**। तत्रापि क्रियाया भू[तायाः] परोक्षत्वादिति भावः। **किं कारणमिति**। पूर्वदिवसे वक्त्रा क्रियाया दृष्टत्वसंभवात् परोक्षत्वाभावेन तत्र [7]तदभावसंभव इति मन्यते। उत्तरमाह — **क्रिया नामेति**। तथा च 'ह्योऽपचत्' इत्यत्र लिट्प्रसङ्गो दृढ इति भावः।

---

[1] पदकृत्यमाह — अ.

[2] अकृत्यमिति छेदः।

[3] 'अव्ययीभावे शरत्प्रभृतिभ्यः' इत्यत्र शरदादिगणसूत्रम्।

[4] क्रियौपाधिकस्य — प, ब.

[5] पा. सू. ३.२.८४.

[6] भाष्ये 'अपरिदृष्टा' इत्यत्र 'अपरदृष्टा' इति निर्णयसागरमुद्रिते पाठः।

[7] लिडभावेत्यर्थः।

पक्षान्तरं परिगृह्णाति — **एवं तर्हि साधनेष्विति**। पुनः शङ्कते — **साधनेषु [च] भवत इति**। **गुणसमुदाय इति**। शक्तिसमुदाय इत्यर्थः। स एव पक्षान्तरे न दोष इति समाधानं बुद्ध्वाह — **अथान्यदिति**। **क्रियाकृता विशेषा [इति]**। तेऽपि परोक्षा अपरोक्षाश्च संभवन्तीति सोऽपि पक्षो युक्त एवेति भावः। **कथंजातीयकमिति**। कियत्कालव्यवहिते परोक्षे लिडिति प्रश्नः। उत्तरमाह [1]मतबाहुल्येन — **केचित्तावदिति**। तत्र 'कुड्यव्यवहिते' इति मते भूतानद्यतनपरोक्षत्वासंभवात् [2]लुङेव न्याय्यः। अनद्यतन इत्यस्याननुवृत्तौ तत्रापि लिड् भवत्येवेति सर्वमतसाम्येन लिट् [न] भवत्येवेति फलितम्। **सर्वथेति**। आत्मसाध्यायाः क्रियायाः प्रत्यक्षत्वादिति भावः। **सुप्तमत्तयोरिति**। सुप्तमत्तग्रहणं चित्तव्यग्रताप्रयुक्तपारोक्ष्यस्याप्युपलक्षणम्। तदेवोपपादयति — **अथवा भवति वा इति**। **अत्यन्तापह्नव इति**। न केवलं तद्देशसंबन्धिभोजनादेरेवापह्नवः, किं तु तद्देशगमनस्याप्यपह्नव इत्यत्यन्तापह्नवः। **खण्डिकाः** नाम जनपदः। त्वयायाज्यो[3] याजित इत्युक्तः कश्चिदाह — **न कारिसोममिति**। **कारी** याजक ऋत्विगुच्यते। तस्य सोमं नाहं पपौ। ऋत्विग् भूत्वा सोमं न पीतवान्, अपि तु यजमानो भूत्वेत्यर्थः। तथा च ऋत्विक्त्वमेवापह्नुतम्। तथा प्रतिग्रहस्त्वयायोग्याद् गृहीत इत्युक्तः कश्चिदाह — **न दार्वजस्येति**। [4]दार्वो नाम जनपदविशेषः, तत्र जातस्याहं न प्रतिजग्राह। तत्र प्रतिग्रहीतृत्वमेव मम नास्तीत्यत्यन्तापह्नवपरतयोपपत्तिर्बोध्या। **को मे मनुष्य इति**। को वा मनुष्यो मम वधायासत्यारोपणेन प्रहरेत्, न कोऽपीत्यर्थः॥

[३, २७०–२७४]

(नारायणीयम्) ननु परोक्षशब्दार्थस्य लोकव्यवहारादेव सुज्ञानत्वात् प्रश्नानुपपत्तिरित्याशङ्क्य परिहरति — **यद्यपीति**। **सर्वस्याः क्रियाया इति**। क्षणसमूहरूपाया धातुवाच्यायाः क्रियाया युगपदसंनिधानादप्रत्यक्षत्वादित्यर्थः। [5]**यद्वा प्रतिपरेति**। अस्मिन् पक्षे 'परोक्षायां क्रियायाम्' इति भाष्ये प्रयोगो नोपपन्नः, टित्त्वान्ङीप्प्रसङ्गादिति तदभावे यत्नः कार्यः। **समासान्तर इति**। तत्पुरुष इत्यर्थः। **वृत्तिविषय इति**। वृत्तिविषये शब्दानामर्थान्तरप्रादुर्भावदर्शनात्। [6]'अचं समासान्तं कुर्वन्ति' इत्यनेनायमेव पक्षः साधुरिति दर्शयति। 'इन्द्रियात् परम्' इत्येतदेव विशदयति — **इन्द्रियगोचरतामिति**। **सर्वमिन्द्रियमिति**। यथा चक्षुर्विषयं व्याप्नोति तथा श्रोत्रादिकमपीति सर्वस्याक्षिशब्दवाच्यता। तर्हि व्यापकं पदार्थान्तरमप्यक्षिशब्देनोच्येत, तन्न, रूढेरपि प्रवृत्तिनिमित्तत्वात्। तर्हि श्रोत्रादि न गृह्येतेत्यत्राह — **वृत्तिविषय इति**। **निर्भाग इति**। न ह्यत्र पूर्वपदोत्तरपदयोः साधुत्वे तदर्थ[7]पर्यालोचने च यतनीयमिति भावः। कथं पुनः कालस्य परोक्षत्वं विशेषणमुपपद्यत इत्यत्राह — **यथा कालस्येति**। **स्वत एवेति**। न तूपाधितः। ननु शब्दस्य श्रोत्रेन्द्रियेणानुभवसमये प्रत्यक्षत्वम्, अन्यदा तु परोक्षत्वं संभवत्येवेति कथं तदसंभव उच्यते, किमर्थं

---

[1] 'मतबाहुल्येन' इत्यस्यानन्तरं 'समादधाति' इत्यधिकम् — ब.

[2] लङेव — ब.

[3] अयाज्य इति छेदः।

[4] दार्वजो नाम — ब.

[5] 'यद्वा' इति नास्ति — ङ.

[6] प्रदीपे 'अक्ष्णोऽदर्शनादित्येवमच्समासान्तं कुर्वन्ति' इति हरयाणामुद्रिते। 'अक्ष्णोऽदर्शनादित्येवं समासान्तं कुर्वन्ति' इति निर्णयसागरचौखाम्बामुद्रितयोः पाठः। अत्र 'अक्ष्णोऽदर्शनादित्येवमचं समासान्तं कुर्वन्ति' इति पाठोऽभिमतः प्रतीयते।

[7] पर्यालोचने चेत्यस्यानन्तरं 'न' इत्यधिकम् — घ.

चाप्रकृतप्रत्यक्षत्वासंभवकथनमित्याशङ्क्य तस्य दृष्टान्तत्वेनोपयोगं दर्शयन् व्याचष्टे — **प्रत्यय-प्रकृतेरिति**। धात्वर्थस्य प्रसिद्धत्वात् प्रश्नानुपपत्तिमाशङ्क्याह — **यद्येकैक इति**। **युक्तं विशेषणमिति**। धात्वर्थत्वं तु तस्यानुपपन्नम्, समूहस्य धातुतः प्रतीतेरित्यत्र दोषः। अथैतद्दोष-परिहाराय समूहः क्रियेत्याश्रीयेत तदा दोषान्तरप्रसङ्ग [1]इत्याह — **अथ समूह इति**। 'क्रिया' इति सामान्यशब्देन किमत्र विवक्षितमित्यत्राह — **समूहेति**। साधनशब्देन शक्तिमद् द्रव्यं विवक्षितम्, न तु शक्तिरित्याह — **शक्तिशक्तिमतोरिति**। गुणशब्देनात्र द्रव्याश्रितत्वसाम्यात् शक्तय उच्यन्त इत्याह — **शक्तीनामिति**। नन्वेकैकस्याः शक्तेः साधनत्वमभ्युपगम्यते, न तु समूहस्येति कथं 'गुणसमुदायः' इत्युच्यत इत्यत्राह — **समुदायग्रहणमिति**। **शक्तीनां नित्यानुमेयत्वादिति**। कार्यकल्प्या हि शक्तयो नित्यमनुमेया एव, न कदाचित् प्रत्यक्षगम्या इत्यर्थः। 'भवति [2]प्रत्यक्ष-परोक्षतायाः संभवः' इत्येतद्व्याचष्टे — **तत्र द्रव्येति**। **क्रियाप्रत्यक्षत्वाभिमानि इति**। क्रिया-प्रत्यक्षत्वभ्रम इत्यर्थः। न हि समूहरूपायाः क्रियायाः सत्यतः प्रत्यक्षत्वम्। अनेन परोक्षे वर्तमानाद्धातोरिति विशेषणविशेष्यभावोपपत्तिर्दर्शिता। ननु [3]तण्डुलोदकदर्शनेन कथं 'पपाच' इति प्रयुङ्क्त इत्यत्राह — [4]**दृष्ट्वापीति**। 'भवन्ति हि तस्य साधनानि परोक्षाणि' इत्येतद्व्याचष्टे — **साधनत्वस्य [5]संरम्भरूपस्येति**। औदासीन्यप्रच्युतिः **संरम्भः**, **क्रिया** व्याप्रियमाणता। 'अथ य एते' इत्यादिनोक्तं पक्षान्तरं विशदयति — **क्रियाकृतविशेषेति**। [6]क्रियया कृता इति न तृतीया-समासो बोध्यः, क्रियायाः पूत्कारादेश्च भिन्नत्वापत्तेः। तस्मात् क्रियात्वावच्छिन्नाः, क्रियासंबन्धिन इति यावत्। ननु परोक्ष[7]शब्दार्थस्य पूर्वमेव कथितत्वात्किमर्थं पुनरपि तत्प्रश्नः क्रियत इत्यत्राह — **यस्मिन्निति**। **मतभेदप्रदर्शनायेति**। न तु सर्वेषां मतानां संग्राह्यत्वं दर्शयितुम्। तर्हि कः पक्षोऽत्रोपादेयत्वेन विवक्षित इत्यत्राह — **इन्द्रियागोचरेति**। कुड्यकटान्तरितमित्येतद् ग्राह्य-मित्यर्थः। [8]**तथा चेति**। पक्षान्तरे तु लिड् न स्यात्। **आत्मसाध्याया इति**। अत्र शरीरा-दिसंघातस्य कर्तुः प्रत्यक्षत्वात् क्रियायाः परोक्षत्वं न स्यात्। मनसोऽसांनिध्ये हेतुमाह — **विषयान्तरेणेति**। ततश्च मदस्वापादिभिश्चित्ते व्याक्षिप्ते कश्चित् स्वकृतमपि न जानाति। पश्चात् प्रबोधे सति पार्श्वस्थेभ्यः स्ववृत्तान्तं श्रुत्वा वाक्यं प्रयुङ्क्ते 'सुप्तोऽहम्' इत्यादि। अत्यन्त-शब्दार्थमाह — **न केवलमिति**। **अपह्नवः** अपलापः। भवान् कलिङ्गादिजुगुप्सितदेशं प्राप्य चिरकालं भोजनादि कृतवानित्युक्त आह — **नो कलिङ्गानित्यादि**। तत्र हेतुभूतगमनप्रतिषेधा-दत्यन्तापह्नवः। **कारी याजक इति**। क्रियासामान्यवाचिनः करोतेरत्र [9]तद्विशेषो याजनमर्थः। **ऋत्विक्त्वमेवेति**। तत्रायाज्ययाजनप्रतिषेधः कैमुतिकन्यायसिद्धः। **सर्वथा प्रतिग्रहीतृत्वमिति**। प्रति-ग्रह एव मम नास्ति, अयोग्याद् ग्रहणं तु सुतरां नोपपद्यते। **वधायेति**। पीडनायेत्यर्थः॥

---

[1] इत्यत्राह — घ, ङ.

[2] भाष्ये 'प्रत्यक्षपरोक्षतायां संभवः' इत्यत्र 'प्रत्यक्षपरोक्षतायाः संभवः' इति पाठोऽभिमतः।

[3] तण्डुलदर्शनेन — घ.

[4] दृष्ट्वापीति — घ.

[5] संरम्भिरूपस्येति — घ.

[6] 'क्रियया कृताः' इत्यादि 'क्रियासंबन्धिन इति यावत्' इत्यन्तं नास्ति — घ.

[7] शब्दार्थः पूर्वमेव कथितः, तत्किमर्थम् — ङ.

[8] प्रदीपे 'तथा ह्यः पपाचेत्याद्यपि भवति' इत्यत्र 'तथा च ह्यः पपाचेत्याद्यपि भवति' इति पाठोऽभिमत इति भाति।

[9] 'तत्' इति नास्ति — ङ.

लट् स्मे ३.२.११८.

[३, २७४–२७८]

(उद्द्योतनम्) वार्तिकद्वयस्य प्रयोजनं तावदाह — **इत इति**। अनेन को विभागः प्रतिपाद्यते, अत आह — **तस्येति**। द्वितीयवार्तिकार्थमाह — **स्मपुरेति**। द्वितीयवार्तिके स्मपुरायुक्तसूत्रत्रयमेव विवक्षितम्, न पञ्चसूत्रीत्यर्थः। एवं [1]व्याख्यानेन लब्धं कालविभागमाह — **एतदुक्तमिति**। [2]'अपरोक्षे च' इत्यत्रापि 'स्मे' इत्यनुवर्तनात् तदपि स्मलक्षणम्। **अनद्यतन इति**। [3]'नेक्षेतोद्यन्तम्' इतिवत् पर्युदासाश्रयेण द्वितीयवार्तिके कालविशेषो लभ्यते, स च सूत्रत्रयविषय इत्यर्थः। आद्यवार्तिकं तु सामान्यविषयत्वात् [4]पदाहवनीयन्यायेन सूत्रद्वयविषयमित्याह — **ननाविति**। ननु वार्तिकद्वयेऽपि स्मपुराशब्दः [5]पञ्चसूत्रीलक्षक एवास्तु। द्वितीयवार्तिके पर्युदासे लक्षणाप्रसङ्गात् प्रतिषेध एवास्तु, अत आह — **तत्रेति**। तस्यैव च निषेधादित्यन्वयः। **अत्यन्तेति**। अष्टदोषदुष्टविकल्पप्रसङ्गादित्यर्थः। [6]**पूर्वोक्तेति**। सूत्रत्रयविषयो निषेधः, सूत्रद्वयविषयो विधिरित्यर्थः। [7]'नार्षेयं वृणीते' इतिवद्विकल्पपरिहाराय लक्षणा युक्तैवेति भावः। भाष्योक्तप्रकारद्वयं विशदयति — **स्मपुरेति**। आद्यः प्रदीपे प्रागुक्त एव। **मध्यमौ** [8]'ननौ' [9]'नन्वोः' इति योगौ। **भूतमात्रे** भूतसामान्ये। द्वितीयस्य विवरणम् — **अथेति**। **मध्यमाविति**। यद्यपि पूर्वकल्पेऽप्याद्यवार्तिके मध्यमयोग[10]द्वयलक्षणाङ्गीकारे तयोर्भूत[11]मात्रे प्रवृत्तिरितरेषां त्रयाणामनद्यतन इति व्यवस्थासिद्धेः पञ्चसूत्रीलक्षणा व्यर्था, तथापि 'स्मादिविधिः पुरान्तः' इति भाष्यस्वारस्यात् [12]पञ्चसूत्रीलक्षणा तस्मिंस्तस्मिन्नुक्ता। तदनुसारेणैव स्वयमपि पूर्वं तदुक्तिः। द्वितीयकल्पे तु [13]'तत्र स्माद्यर्थम्' इति भाष्यदर्शनाद् [14]योगद्वयलक्षणोक्तिरिति विवेकः। पूर्वकल्पे आद्यवार्तिके [15]पञ्चसूत्रीलक्षणायां भूतस्य सामान्यत्वादनद्यतनस्य विशेषत्वात् सामान्यविशेषन्यायेन व्यवस्था सिध्यति। द्वितीयकल्पे त्वनद्यतनस्य सामान्यत्वाभावाद् [16]भूतसामान्यस्य विशेषत्वाभावाच्च व्यवस्था न सिध्यतीति द्वितीयवार्तिके [17]पञ्चसूत्रीलक्षणा नोक्तेति मन्तव्यम्। **प्रत्याख्यानायेति**। स्मयोगेऽनद्यतनानुवृत्त्या पुरायोगे च ज्ञापकेन तदनुवृत्त्येष्टसिद्धिरित्यर्थः। **इत्याह** प्राप्नोतीत्यंत आह। लुङ्ग्रहणं मण्डूकप्लुतिन्यायेनानद्यतनानुवृत्तिज्ञापकमित्याह — **पुरीति**। तदेवाह — **यदीति**। [18]द्वितीयकल्पानुवादार्थम् 'अथ बुद्धिः' इति। तद्व्याचष्टे — **लट् स्म इति**।

---

[1] व्याख्याने लब्धं — अ.
[2] पा. सू. ३.२.११९.
[3] मनुस्मृतिः ४, ३७.
[4] मीमांसाशास्त्रे १०.८.८. अधिकरणे ज्योतिष्टोमे 'पदे जुहोति' इति सोमक्रयणीसप्तमपदाधिकरणकत्वस्य होमे विधानात् 'यदाहवनीये जुहोति' इति सामान्यविहितस्याहवनीयाधिकरणकत्वस्य बाधः प्रतिपादितः। सोऽत्र बोध्यः।
[5] पञ्चसूत्रलक्षक एवास्तु — अ, ऋ, लृ.
[6] प्रदीपे 'पूर्वोक्तो विषयविभागः' इत्यत्र 'पूर्वोक्तविषयविभागः' इति निर्णयसागरमुद्रिते पाठः। अयमर्थो मीमांसायां १०.८.१. अधिकरणे निर्णीतः।
[8] पा. सू. ३.२.१२०.
[9] पा. सू. ३.२.१२१.
[10] द्वये लक्षणाङ्गीकारे — ऋ.
[11] मात्रवृत्तिः — अ.
[12] पञ्चसूत्रलक्षणा — अ.
[13] तत्रास्माद्यर्थमिति — ऋ.
[14] योगत्रय — ऋ.
[15] पञ्चसूत्रलक्षणायां — अ.
[16] सूत्रसामान्यस्य — अ.
[17] पञ्चसूत्रलक्षणा — अ, ऋ.
[18] द्वितीयकल्पानुपादानार्थम् — अ; द्वितीयकल्पानुपपादार्थम् — ऋ, लृ.

'अविशेषेण' इत्यास्यार्थकथनम् — **भूतमात्र इति**। 'तथा सति नञा किमिह कार्यम्' इत्येतद् द्वितीयकल्पे द्वितीयवार्तिक[1]वैयर्थ्यप्रतिज्ञापरत्वेन व्याचष्टे — **न स्मपुरेति**। **न कर्तव्यमेव** द्वितीयं वार्तिकम्। योगद्वयेऽद्यतनानुवृत्त्यैव तल्लाभात् तत्प्राप्त्यर्थं वार्तिकं व्यर्थमिति 'अपरोक्षे च' इत्यनेनोक्तम्। तावता कथं तदनुवृत्तिलाभः, अत आह — **अपरोक्षग्रहणमिति**। अनुमानप्रकारमेवाह — **यस्मादिति**। **अन्यतरनिवृत्तिः** परोक्षनिवृत्तिः। **द्वितीयस्य** अनद्यतनग्रहणस्य। ननु परोक्षनिवृत्तिः केन क्रियते, अत आह — **अपरोक्षग्रहणेनेति**। कथं तेन तदधिकारनिवृत्तिः, अत आह — **यथेति**। [2]'उपकादिभ्योऽन्यतरस्यामद्वन्द्वे'। एभ्यो गोत्रप्रत्ययस्य बहुषु वा लुक्। अत्र 'अद्वन्द्वे' इति [3]'तिककितवादिभ्यः' इत्यतः प्रसक्तद्वन्द्वाधिकारनिवृत्त्यर्थम्। अन्यथा अद्वन्द्व एव लुग्विकल्पः स्यात्। द्वन्द्वे चाद्वन्द्वे चाधिकारनिवृत्तिपक्षे सिध्यतीति [4]तत्रोक्तम्। [5]'एवमत्रापि न परोक्ष इत्यनुवर्तत इति तदधिकारनिवृत्त्यर्थमपरोक्षग्रहणमित्यर्थः। [6]'स्मादौ' इत्यस्य [6]पूर्वेणासंबन्धादाह — **इदानीमिति**। **स्मादिविधिः** 'किमयं स्मादिविधिः' इति प्रथमकल्पो भाष्योक्तः। स एव सिद्धान्त इति भावः। 'स्यादेषा' इत्यादि 'भवेन्नार्थः' इत्यन्तं भाष्यं प्रत्याख्यानप्रकारानुवादपरतया व्याख्याय 'तस्मात्' इत्यादिकं समाधानपरतया व्याचष्टे — **यस्मादिति**। **परोक्षानद्यतन इति**। [7]'अपरोक्षे च' इत्यनेनानद्यतनानुवृत्तेः परोक्षानुवृत्तेश्च सिद्धत्वादित्यर्थः। तस्मिन् सूत्रे परोक्षनिवृत्तिं प्रत्याख्यानवादिनोक्तां निराह — **यदि हीति**। इष्टापत्तिमाह — **तस्मादिति**। अनेन 'तस्माद्वाच्यं परार्थं तु' इत्येतद् भाष्यम् [8]'अपरोक्षे च' इति सूत्रमनद्यतनानुवृत्तिज्ञापनार्थं वक्तव्यमित्येवं व्याख्यातम्। [9]'एतज्ज्ञापयति' इत्यादिसंग्रहवाक्यतात्पर्यमाह — **अपरोक्षे चेति**। [10]'ननौ' इति सूत्रविषये लुङ्लङ्लिटः कथं न स्युः, अत आह — **ननाविति**। ननु समानविषयत्वाल्लुङो बाधो युक्तः, भिन्नविषययोर्लङ्लिटोः कथं बाधकः, भूतसामान्यविषयत्वादस्य, तयोर्भूतविशेषविषयत्वात्। अत्राहुः — एतद्विषये तयोरप्रयोगादभिधानलक्षणत्वाच्च कृतां तदप्रवृत्तिर्बाधमुखेनोक्तेति[11]। यद्यपि तत्सूत्रावसर एवेदं प्रयोजनं वक्तव्यम्, तथापि तत्सूत्रभाष्ये प्रत्याख्यानमेवास्ति, न तु प्रयोजनकथनमितीहैव सुहृद्भावेन तत्कथनमिति ज्ञेयम्॥

[३, २७४–२७८]

(रत्नप्रकाशः) इतः प्रभृति पञ्चसूत्र्यां कालविभागप्रतिपादनाय वार्तिकद्वयम् 'स्मपुरा भूतमात्रे, न स्मपुराद्यतने' इति। तस्यायमर्थः [इति] तयोर्वार्तिकयोर्यथानिर्देशं तावद् व्याचष्टे — **स्मपुरा भूतेति**। अन्यः कश्चित् तद्वार्तिके[12] आक्षिपति — **किमयमिति**। **स्मादिविधिः पुरान्त इति**। [13]'लट् स्मे, [14]अपरोक्षे च, [15]ननौ पृष्टप्रतिवचने, [16]नन्वोर्विभाषा, [17]पुरि लुङ् चास्मे' इति

---

[1] वैयर्थ्यज्ञापकत्वेन व्याचष्टे — अ.
[2] पा. सू. २.४.६९.
[3] पा. सू. २.४.६८.
[4] तत्तथोक्तम् — अ.
[5] एवमिहापि — ऋ.
[6] पूर्वेण संबन्धादाह — अ.
[7] पा. सू. ३.२.११९.
[8] पा. सू. ३.२.११९.
[9] भाष्ये 'एवं तर्हि ज्ञापयति' इत्यत्र 'एतज्ज्ञापयति' इत्यन्नंभट्टपाठ इति भाति।
[10] पा. सू. ३.२.१२०.
[11] इतिशब्दो नास्ति — अ.
[12] द्वितीयाद्विवचनमिदम्।
[13] पा. सू. ३.२.११८.
[14] पा. सू. ३.२.११९.
[15] पा. सू. ३.२.१२०.
[16] पा. सू. ३.२.१२१.
[17] पा. सू. ३.२.१२२.

पञ्चसूत्रीविहितः प्रत्यय इति भावः। **स्मलक्षणः पुरालक्षणश्चेति**। [1]'लट् स्मे, [2]'पुरि लुङ् चास्मे' इति सूत्राभ्यां विहितः प्रत्यय इति भावः। [3]एवमेकं विकल्पं [4]निदर्श्य तद्वैपरीत्येनान्यं विकल्पमाह — **आहोस्विदिति**। **स्माद्यर्थमिति**। 'लट् स्मे' इत्यादिपञ्चसूत्र्यर्थमिति भावः। **किं चात इति**। कस्मिन् सति किं स्यादिति भावः। तत्र प्रथमकल्पे तावद् वार्तिके व्यर्थे, सूत्राक्षरैरेव तदर्थस्य लब्धत्वादित्याशयेनाह — **स्मादिवधिरिति**। तत्र तावत् प्रतिषेधो 'लट् स्मे' इत्येतदर्थं न भवतीत्याशयेनाह — **अनुवृत्तिरनद्यतनस्येति**। 'लट् स्मे' इत्यत्रानुवृत्त्यैव तत् सिद्धमित्यर्थः। तथा च तादर्थ्येन प्रतिषेधवार्तिकं व्यर्थमित्याह — **नास्ति नञ्कार्यमिति**। 'न स्मपुराद्यतने' इति निषेधो व्यर्थ इति भावः। ननु 'लट् स्मे' इत्यत्रानुवृत्तमनद्यतनग्रहणमनुवर्तमानं [5]सदुत्तरार्थं भवति किमिति चेन्नेत्याह — **लट् स्म इत्यत्रेति**। तत्रैवेत्यर्थः। एवार्थव्यावर्त्यमाह — **अपरोक्षानद्यतनाविति**। [6]'अपरोक्षे च' इति सूत्रं स्वातन्त्र्येण विधायकमपि न भवति। तथा च व्यर्थमेवेत्याशयेन तत्प्रत्याख्यानेन सहानद्यतनग्रहणस्योत्तरद्विसूत्र्यां निवृत्तिमाह[7] — **अपरोक्षानद्यतनाविति**। [8]ननु पुरालक्षणनिषेधार्थत्वेन तत्प्रतिषेधांश, उपयुज्यत इति चेन्न [इत्याह] — **न पुराद्यतन इति**। **तत्र चापीति**। अनद्यतने लुङोऽप्राप्तत्वात् तत्रैतस्य विधानं भविष्यतीति तत्राप्यद्यतननिषेधो व्यर्थ इति भावः। इदानीं द्वितीयकल्पं दूषयितुमाह — **अथ बुद्धिरियमिति**। **अपरोक्षे चेत्येष इति**। योग इति शेषः। **प्राक् पुरिसंशब्दनादिति**। [9]'ननौ पृष्टप्रतिवचने' [10]'नन्वोर्विभाषा' इति सूत्रयोरित्यर्थः। **सर्वत्रेति**। [11]'ननौ पृष्टप्रतिवचने' इत्यादिद्विसूत्र्यामित्यर्थः। तथा च व्यर्थमेव निषेधवार्तिकमित्याह — **नञा किमिहेति**। न किंचिदित्यर्थः। [12]'अपरोक्षे च' इति सूत्रं प्रत्याख्यातं प्राक् प्रतिज्ञामात्रेण। तत्र हेतुमाह — **स्मादाविति**। [13]'लट् स्मे' [14]'पुरि लुङ् चास्मे' इति सूत्रयोर्विधीयमानस्य परोक्षे चापरोक्षे च प्रवर्तनार्थं तत्सूत्रं स्यादित्यपि न, परोक्षग्रह[ण]निवृत्त्यैव तत्सिद्धेरिति भावः। ननु 'लट् स्मे' इति सूत्रशेषत्वम् [15]'अपरोक्षे च' इति सूत्रस्य मा भून्नाम, [16]'पुरि लुङ् चास्मे' इत्येतच्छेषत्वमपेक्षितमिति चेन्न, लुङ्ग्रहणेन परोक्षापरोक्षसाधारण्येनानद्यतनभूतमात्रे तद् भवदीति ज्ञापनसंभवादित्याह — **स्यादेषा तव बुद्धिरिति**। [17]तदेवं वार्तिकद्वयम् [18]'अपरोक्षे च' इति सूत्रं च [19]प्रत्याख्यातम्॥

[३, २७४–२७८]

(नारायणीयम्) 'स्मपुरा' इत्यादिग्रन्थस्यात्यन्तं दुर्ग्रहत्वात् प्रथमं विषयविभागं प्रदर्शयन् व्याचष्टे — **इत आरभ्येति**। **वार्तिकद्वयमिति**। वाक्यद्वयमिदम्, न त्वेकं वाक्यमित्यर्थः। **प्रथमे**

---

[1] पा. सू. ३.२.११८.
[2] पा. सू. ३.२.१२२.
[3] एवमेवं — ब.
[4] निर्दिश्य — प.
[5] तदुत्तरार्थं — प, ब.
[6] पा. सू. ३.२.११९.
[7] अवतारिकान्तरमिदम् ।
[8] न पुरालक्षण — ब.
[9] पा. सू. ३.२.१२०.
[10] पा. सू. ३.२.१२१.
[11] पा. सू. ३.२.१२०.
[12] पा. सू. ३.२.११९.
[13] पा. सू. ३.२.११८.
[14] पा. सू. ३.२.१२२.
[15] पा. सू. ३.२.११९.
[16] पा. सू. ३.२.१२२.
[17] तदेव वार्तिकद्वयं — ब.
[18] पा. सू. ३.२.११९.
[19] प्रत्याख्याते — प.

वार्तिक इति। अत्र द्वितीय[१]वाक्यस्यापवादरूपनिषेधविधानादपवादपरिहारेणोत्सर्गस्य प्रवर्तनात् [२]तस्य प्रथमं प्राप्तत्वादर्थतः प्राथम्यमिति तत्रानुपसंजातविरोधित्वान्मुख्यार्थता युक्ता। प्रथमे तु तदभावाल्लक्षणाश्रयणीयेति भावः। [३]'अपरोक्षे च' इत्यत्र 'स्मे' इत्यनुवर्तनात् 'स्मपुरालक्षणः' इत्यनेन सूत्रत्रयविहितः प्रत्यय उच्यत इत्याह — **लट् स्म इति**। लक्षणाश्रयणे हेतुमाह — **तत्र स्मपुरेति वार्तिकेति**। 'नाद्यतने' इत्यनेनानद्यतने भूतविशेष इत्ययमर्थः कथं लभ्यत इत्यत्राह — **तस्यैव चेति**। वार्तिकद्वयार्थप्रत्याख्यानाय विकल्प्य दूषयितुम् 'किमयं स्मादिविधिः' इत्यादिचोद्यमित्याह — **स्मपुरेति**। ननु [४]पक्षद्वयभेदस्य स्पष्टत्वात् 'किं चातः' इति प्रश्नोऽनुपपन्न इत्यत आह — **एकतरस्मिन्निति**। [५]**तत्र पूर्वस्मिन्निति**। लक्षणाश्रयणं पक्षद्वयेऽपि [६]समानमित्येतावता विशेषाभावं मन्वानस्य प्रश्न इत्यर्थः। उत्तरवादिन आशयमाह — **इतर इति**। श्लोके 'स्मादिविधिः पुरान्तः' इत्यनेन पूर्वोक्ते विकल्पे [७]पूर्वपक्ष उत्तरमित्याह — **लट् स्मे अपरोक्षे चेति**। 'अनुवृत्तिरनद्यतनस्य लट् स्म इति' इत्येतदुक्तेऽर्थे हेतुत्वेन व्याचष्टे — **अनद्यतनग्रहणानुवृत्त्येति**। 'लट् स्मे' इत्युपलक्षणम्, [८]'अपरोक्षे च, [९]'पुरि लुङ् चास्मे' इत्यनयोः। [१०]उत्तरग्रन्थस्य शङ्कोत्तरत्वेन विनियोगमाह — **यदि लट् स्म इति**। **पुरि लुङ् चास्मे इत्यत्रापि** पूर्वस्मिन् योगे निवृत्तस्येहाधिकारायोगात्। तच्छब्दार्थमाह — **पुरि लुङ् चेति**। लुङ्ग्रहणस्य ज्ञापकत्वमनद्यतनग्रहणाननुवृत्तावनुपपत्ति [११]तदनुवृत्तावुपपत्ति च दर्शयन्नुपपादयति — [१२]**यदि हीति**। [१३]ननु भूतस्याद्यतनानद्यतनपरोक्षापरोक्षभेदेन सत्त्वाल्लङ्लिड्लुङ्षु [१४]प्राप्तेषु लुङेव यथा स्यादित्येवमर्थं लुङ्ग्रहणमस्त्विति चेन्न, अनद्यतनग्रहणानुवृत्तिज्ञापने विध्यर्थत्वसंपादनात्। न चैवं लुङ्लड्भ्यां परत्वेन लङ्लिटोर्बाध एव स्यात्। न चेष्टापत्तिः, फलभेदे ज्ञापकानुपपत्तेरिति वाच्यम्, विभाषाग्रहणानुवृत्तेः। एवं प्रथमे पक्षे वार्तिकद्वयं नारब्धव्यमित्युपपाद्य द्वितीयपक्षोपक्षेपाय [१५]'अथ तु बुद्धिरियम्' इत्यादिभाष्यमित्याह — **लट् स्म इति**। स्मपुराहेतू इति बहुव्रीहिः, योगावन्यपदार्थ इत्याह — **स्मपुराशब्दाविति**। **न कर्तव्य एवेति**। न स्मपुराद्यतन इति निषेध इत्यनुषङ्गः। अत्र हेतुत्वेन 'अपरोक्षे च' इत्यादिभाष्यं योजयति — **अपरोक्षग्रहणमिति**। 'सर्वत्रानद्यतनः' इत्येतद्व्याचष्टे — **तदनुवृत्त्येति**। कथमनुमास्यत इत्यत्राह — **यस्मादिति**। **अन्यतरनिवृत्तिरिति**। अपरोक्षग्रहणेन परोक्षाधिकारनिवृत्तिः क्रियते। तत् कथमित्याह[१६] — **अपरोक्षग्रहणेन हीति**। [१७]**स्वपक्ष इति**। 'स्मादिविधिः पुरान्तो यद्यविशेषण' इति पक्षमाश्रित्य येन वार्तिकप्रत्याख्यानं कृतं तेनैव सूत्रप्रत्याख्यानमपि क्रियत इति 'स्वपक्षः' इत्युक्तम्। 'अप-

---

[१] अर्थतः प्राथम्यमित्यत्रान्वयः।
[२] अपवादस्येत्यर्थः।
[३] पा. सू. ३.२.११९.
[४] पक्षद्वये भेदस्य — ङ.
[५] 'तत्र पूर्वस्मिन्निति' इति नास्ति — घ.
[६] प्रमाणमित्येतावता — ङ.
[७] प्रथमपक्ष इत्यर्थः।
[८] पा. सू. ३.२.११९.
[९] पा. सू. ३.२.१२०.
[१०] उत्तरत्र ग्रन्थस्य — ङ.
[११] तदनुवृत्तौ चोपपत्तिं दर्शयन् — ङ.
[१२] प्रदीपे 'यदि तु भूतमात्रे' इत्यत्र 'यदि हि भूतमात्रे' इति पाठोऽभिमतः।
[१३] 'ननु भूतस्य' इत्यादि 'विभाषाग्रहणानुवृत्तेः' इत्यन्तं नास्ति — घ.
[१४] प्राप्तस्य लुङ्येव — ङ.
[१५] 'अथ बुद्धिरियम्' इति भाष्ये दृश्यते। 'अथ तु बुद्धिरियम्' इति पाठोऽभिमत इति भाति।
[१६] इत्यत आहेत्यर्थः।
[१७] प्रदीपे 'इत्येष पक्षः' इत्यत्र 'इति स्वपक्षः' इति पाठोऽभिमत इति भाति।

रोक्षे च' इत्येतदप्यकार्यमित्यन्वयः। 'शक्यं हि' इत्यादिभाष्यं व्याचष्टे — [1]**लट् स्म इत्यादिष्विति**। **इदानीमाचार्य इति**। एवमाचार्यदेशीयेन [2]'अपरोक्षे च' इति सूत्रे प्रत्याख्याते तत्समर्थनाय सिद्धान्तिनो वचनमेतदित्यर्थः। 'स्यादेषा तव बुद्धिः' इत्येतद्व्याचष्टे — **यदि त्वं मन्यस इति**। [3]'स्मलक्षणेऽपि' इत्यादि 'भवेन्नार्थः' इत्यन्तं मननप्रकारकथनमित्याह — **लट् स्म इत्यत्रेति**। 'एवमेव सिद्धम्' इत्येतद्व्याचष्टे — **परोक्षग्रहणेति**। 'लट् स्मे' इति [4]स्मलक्षणेऽप्येवमेव सिद्धमित्यतो हेतोः [5]'अपरोक्षे च' इत्यनेन नार्थ इति यदि त्वं मन्यस इत्यन्वयः। यस्मात् परार्थमन्यार्थं ज्ञापनार्थं सूत्रं तस्माद्वाच्यमेवेति[6] भाष्ययोजनां दर्शयन्नाह — **यस्मादपरोक्षेति**। ननु 'लट् स्मे' इत्यत्र परोक्षग्रहणनिवृत्तौ [7]'अपरोक्षे च' इति सूत्रं न कर्तव्यमित्युक्तमित्यत्राह — **यदि हीति**। एवं चेष्टस्य [8]विषयविभागस्य यत्नमन्तरेण सिद्धत्वाद्वार्तिकद्वयं [9]न कर्तव्यमिति भाष्यकृदाशयमाह — **तस्मादिति**। **येन नाप्राप्तीति**। [10]भूतसामान्येऽस्य विधानात्॥

लट् स्म इत्यादियोगानामाद्यौ द्वावन्तिमश्च यः।
एतेऽनद्यतने ज्ञेया भूतमात्रे तु मध्यमौ॥ इति संग्रहश्लोकः॥

ननौ पृष्टप्रतिवचने ३.२.१२०.

[३, २७८]

(उद्द्योतनम्) ननु भूतेऽपि वर्तमानत्वविवक्षया लङङ्गीकारेऽनद्यतनादावपि स्यात्, अत आह — **निवृत्तायामपीति**। अत्यन्तासन्नकालेऽयं प्रयोग इष्यते, न भूतमात्रे। तत्र वर्तमानत्वविवक्षयैव [11]प्रयोगोपपत्तेरित्यर्थः। [12]दाढर्यार्थमेवाह — **यदीति**। **अथेति**। प्रश्नोत्तरस्यैव प्रतिवचन[13]शब्दार्थत्वादतिप्रसङ्गाभावादित्यर्थः। **नैतदिति**। अर्थान्तरनिवृत्त्यर्थं पृष्टग्रहणमित्यर्थः॥

[३, २७८]

(रत्नप्रकाशः) इदमपि सूत्रं प्रत्याचष्टे भगवान् — **ननौ पृष्टेत्यादि**। [14]**अ[त्र] समाप्ताविति**। समाप्तकल्पायां क्रियायामित्यर्थः। एतेन [15]'समाप्तायामपि क्रियायां तत्कृतश्रमादेरनुवृत्तौ तस्या असमाप्तिः' इति निरस्तम्, समाप्त्यसमाप्त्योर्विरोधात्॥

---

[1] प्रदीपे 'लट् स्म इत्यादिसूत्रेषु' इत्यत्र 'लट् स्म इत्यादिषु' इति पाठोऽभिमतः।
[2] पा. सू. ३.२.११९.
[3] स्मलक्षणे हीत्यादि — घ, ङ.
[4] स्मलक्षणे ह्येवमेव — घ.
[5] पा. सू. ३.२.११९.
[6] कार्यमित्यस्यार्थानुवादोऽयम्।
[7] पा. सू. ३.२.११९.
[8] विषयस्य विभिन्नस्य यत्नमन्तरेण — ङ.
[9] 'न' इति नास्ति — ङ.
[10] भूतसामान्यस्याभिधानात् — ङ.
[11] प्रयोगोपपत्तिरित्यर्थः — अ.
[12] वाक्यार्थमेवाह — अ.
[13] शब्दार्थत्वादपि प्रसङ्गाभाव इत्यर्थः — अ, ल.
[14] भाष्ये 'क्रियाया असमाप्तिर्विवक्षिता' इति दृश्यते। 'क्रियाया अत्र समाप्तावसमाप्तिविवक्षिता' इति रत्नप्रकाशकृदभिमतः पाठः स्यादित्यूहनीयं भवति।
[15] प्रदीपे 'निर्वृत्तायामपि' इत्यत्र 'समाप्तायामपि' इति पाठोऽभिमत इति भाति।

[३, २७८]

(नारायणीयम्) ननु समाप्तायां पाकादिक्रियायाम् 'अपाक्षीरोदनं देवदत्त, ननु पचामि भोः' इत्यादि प्रयुज्यते लोक इति [1]कथमसमाप्तिः क्रियाया उच्यत इत्यत आह — **निवृत्तायामपीति**। [2]अत्यन्तासन्ने कालेऽयं प्रयोगः। तत्र पाकादिकृतस्य श्रमादेरनुवृत्तिरिति तद्दर्शनादसमाप्तिर्विवक्ष्यत इत्यर्थः। **अनेनेति**। प्रत्याख्यानमेव ज्यायः, न त्वारम्भ इति दर्शयतीत्यर्थः। एतदेवोपपादयति — **यदि हीति**। **प्रश्नपूर्वकमेवेति**। उत्तरवचनं हि प्रतिवचनम्, तत्प्रश्नपूर्वकं कृतमेवेत्यर्थः। **विरुद्धमपीति**। प्रतेः प्रातिकूल्ये वर्तनात्। तथाभिमुख्ये वीप्सायामपि प्रतिर्वर्तत इत्याह — **वचनाभिमुख्यमिति**। [3]नचैतस्य सूत्रस्य भाष्ये वर्तमानत्वविवक्षया प्रत्याख्यानेऽनद्यतनपरोक्षभूतविवक्षायां लङ्लिटोर्दुर्वारत्वमिति वाच्यम्, अनभिधानेन तादृशविवक्षाया अभावात्। अत्र मानं तु भाष्यमेव। 'ननु मां कुर्वन्तं पश्य' इत्यादौ तु वर्तमानत्वविवक्षां कृत्वा [4]'वर्तमाने लट्' इति लटं विधाय शतृशानचौ बोध्याविति सूत्रहृदयम्॥

पुरि लुङ् चास्मे ३.२.१२२.

[३, २७८–२७९]

(उद्द्योतनम्) पुराशब्दस्य [5]'आतः' इति योगविभागादाकारलोपे [6]'क्त्वि' इतिवत् 'पुरि' इति सप्तम्यन्तम्, न तु पूश्शब्दस्तदन्तः, तस्य भूतानद्यतनार्थद्योतकत्वासंभवात्। ननु [7]परत्वात् हशश्वल्लक्षणं बाधताम्, पुरालक्षणं कथं [8]बाधेत, अत आह — **परेति**। पूर्वविप्रतिषेधे लाघवं भवतीत्याह — **तत इति**॥

[३, २७८–२७९]

(रत्नप्रकाशः) विप्रतिषेधप्रदर्शनपरे [9]वार्तिके व्याचष्टे — [10]**हशश्वद्भ्यामित्यादिना**॥

[३, २७८–२७९]

(नारायणीयम्) **परेति**। हशश्वल्लक्षणात् परविप्रतिषेधेन पुरालक्षणात् पूर्वविप्रतिषेधेन। ननु 'अस्मे' इति सूत्र एव निषेधात् किमर्थं पूर्वविप्रतिषेधाश्रयणमित्यत आह — **ततश्चेति**॥

---

[1] कथं समाप्तिः — घ, ङ.

[2] अत्यन्तासन्नकाले — ङ.

[3] 'न चैतस्य' इत्यादि 'सूत्रहृदयम्' इत्यन्तं नास्ति — घ, नन्वेतस्य — ङ.

[4] पा. सू. ३.२.१२३.

[5] आतो धातोरिति सूत्र इत्यादिः।

[6] क्त्वि स्कन्दिस्यन्दोरित्यत्रेत्यादिः।

[7] परत्वात् पूर्वं लक्षणं बाधताम्, परं लक्षणं कथं — अ.

[8] बाधते — ऋ.

[9] द्वितीयाद्विवचनमिदम्।

[10] 'हशश्वल्लक्षणादित्यादिना' इत्युचितं भाति। 'हशश्वद्भ्यां पुरा' इति तु वार्तिकनिर्देशः।

वर्तमाने लट् ३.२.१२३.

[३, २७९-२८५]

(**उद्द्योतनम्**) ननु मध्ये विजातीयक्रियया ध्ययनस्य विरामात् 'प्रवृत्तस्याविरामः' इत्ययुक्तम्, [1]अविरामश्चेत् 'प्रवृत्तस्य' इत्ययुक्तम्, अत आह — **इहेति**। **प्रवृत्तस्येति**। आरब्धस्येत्यर्थः। तस्य स्वाधीनोच्चारणपर्यन्तं न विरामः। मध्ये [2]किंचित्कालमननुवृत्तिरवर्तमानत्वमित्यर्थः। क्रियात्वाभावे साध्यत्वाभावो हेतुः, तत्र च सदातनत्वम्। **तद्धर्मस्य** क्रियाधर्मस्य। ननु विद्यमानकालसंबन्धिस्वरूपवर्तमानत्वमसाध्यस्यापि संभवतीत्याशङ्क्य 'भूत' इति भाष्यम्। तदुपपादयति — **साध्यस्येति**। **अनित्यत्वात्** प्रागभावप्रतियोगित्वात्। [3]विद्यमानप्रागभावप्रतियोगित्वमेव भविष्यत्त्वमित्यर्थः। [4]**विनाशादिति**। विनाशानन्तरं वर्तमानध्वंसप्रतियोगित्वलक्षणं भूतत्वमित्यर्थः। प्रतियोगि[5]सत्त्वकाले तयोरसंभवात् तद्विरोधि वर्तमानत्वम्। **वर्तमानत्वाभावः** भूतादिविरोधिवर्तमानत्वाभावः। तादृशमेव [6]वर्तमानत्वमत्र विवक्षितमिति भावः। ननु वर्तमानकालसंबन्धित्वमात्रं वर्तमानत्वम्, न तु भूतादिप्रतिद्वन्द्वित्वम्, गौरवात्, अत आह — **क्रियेति**। असाध्यस्य क्रियात्वाभावात् तद्गतवर्तमानत्वस्यैवात्राश्रयणादित्यर्थः। **न चेति**। क्रियायाः फलनाश्यत्वात् स्वाधीनोच्चारणरूपफलपर्यन्तमुपरतिर्नास्तीत्यर्थः। **अथवेति**। यथा फूत्कारादेः पचिक्रियोपकारकतया तदवयवत्वमेवं भोजनादिव्यतिरेकेण मासादिसाध्याध्ययनस्यानिर्वाहात् तस्यापि तदङ्गत्वमित्यर्थः। [7]कबलीकरणमुखप्रक्षेपचर्वणादिक्रियासमूहो भुज्यादिरन्तरालप्रवृत्तैर्हासादिभिर्व्यवधानमुपैतीव, निवृत्त इव [8]दृश्यते। वस्तुतस्तु स भुज्यादिर्नैव विच्छिन्नरूपः, नापि निवर्तते। उभयत्र हेतुः — **अविरामात् [इति।]** फलपर्यन्तत्वात् क्रियाया इत्यर्थः। ननु विजातीयैर्हासादिभिः कथमव्यवधानम्, अत आह — **सर्वैवेति**। तथा च नान्तरीयकत्वादव्यवधायकमित्यर्थः। एवं विजातीयक्रियाया नान्तरीयकतयाव्यवधायकत्वमुक्त्वा प्रधानक्रियावयवत्वमाह — [9]**तदन्तरेति**। अध्ययनादिक्रियाया [10]अन्तरानुवृत्ता भोजनादिक्रिया [11]तदवयव इत्यर्थः। अनुवृत्ताविति पाठे भोजनादेरन्तरानुवृत्तौ सत्यां सा सर्वावयवक्रियेत्यन्वयः। अवयवत्वाभावे प्रकारान्तरमाह — **भेदे सतीति**। अवयवत्वाभावे सतीत्यर्थः। यद्दर्भपवित्र[12]पाणित्वादिकमनवयवभूतमङ्गं तत्सादृश्याद् भोजनादिकमुपकारकत्वादध्ययनाङ्गम्, [13]अङ्गं च [14]न व्यवधायकमिति भावः। **प्रसिद्धेति**। सूर्यपरिस्पन्दगोदोहनादिक्रियाया अध्ययनस्वापादिक्रियापरिच्छेदकत्वात् कालत्वमिति [15]'भूते' इति सूत्र उक्तमित्यर्थः। **क्रियारूपत्वमिति**। पर्वतादिस्थिते [16]राजादिस्थित्यवच्छिन्नत्वेनौपचारिकं क्रियात्वम्,

---

[1] इति विरामश्चेन्निवृत्तत्वादित्ययुक्तम् — अ.

[2] कंचित् कालं — ऋ.

[3] अविद्यमान — ऋ, लृ.

[4] प्रदीपे 'उत्पन्नस्यापि नाशात्' इत्यत्र 'उत्पन्नस्य विनाशात्' इत्यन्नंभट्टपाठ इति भाति।

[5] सत्त्वकालयोरसंभवात् तद्विरोधि — अ.

[6] वर्तमानत्वमन्त्यं विवक्षितमिति — अ.

[7] कबलकरण — अ.

[8] उच्यते — अ.

[9] प्रदीपे 'तदन्तरालदृष्टा वा' इति वाक्यपदीयश्लोके 'तदन्तरानुवृत्ता वा' इत्यन्नंभट्टपाठ इति प्रतीयते।

[10] अन्तरानुवृत्तौ — अ; अपीतरानुवृत्तौ — ऋ, लृ.

[11] तदवयवेत्यर्थः — अ; तदवयवत्वमित्यर्थः — लृ.

[12] पाणीत्यादिकं — अ.

[13] 'अङ्गम्' इति नास्ति — अ; अनङ्गं च — ऋ, लृ.

[14] 'न' इति नास्ति — ऋ.

[15] पा. सू. ३.२.८४.

[16] राजादिस्थैर्यावच्छिन्नत्वेनौपचारिकं — अ.

[1]अत एव कालत्रययोगश्चेत्यर्थः। **सर्वम्** आकाशाद्येकं वस्तु, घटाकाशो मठाकाश इत्युपाधिभेदादेव [2]भिद्यते, न स्वरूपेण। **न विकल्प्यते** न भिद्यते। **पररूपेण** [3]राजस्थित्यादिक्रियया। राजस्थित्यादावपि भेदकान्तरापेक्षायामनवस्था, अत आह — **प्रसिद्धेति**। विरूपा अक्षयवरूपाः क्रिया येषां ते राजादिव्यापाराः, **प्रसिद्धभेदाः** स्पष्टभेदा इति नानवस्था। सरूपावयवक्रियास्तु पर्वतस्थित्यादयो राजस्थित्यादिभिः साहचर्येण भिद्यन्त इत्यर्थः। कालत्रयप्रयोगोपपत्तौ हेतुमाह — **तासामेवेति**। राजस्थित्यादिक्रियाणामित्यर्थः। **क्रियाधिकरणत्वात्** पर्वतादिस्थितिरूपक्रियाधिकरणत्वात्। तदतीतत्वादिना भूतादिप्रयोगोपपत्तिरिति भावः। वर्तमानकाल एव नास्तीति 'वर्तमाने लट्' इति सूत्रं निर्विषयमित्याक्षिपति — भाष्ये [4]**अपर आहुरिति**। नास्तीत्यत्र हेतुमाह — **निष्पन्नस्येति**। भूधातुरुत्पत्त्यर्थः, उत्पत्तिश्च क्षणिकेत्युत्पन्नं सर्वं भूतमेव, आवृत्तिरहितत्वादित्यर्थः। यद्वा, क्षणभङ्गपक्षाश्रयेणायं ग्रन्थः। 'चक्रं परिवर्तते, इषुः पात्यते, स्यन्दन्ते सरितः' इत्यत्र वर्तमानप्रयोगो निरालम्बनः, प्रतिक्षणापगम्ये क्षणानां वर्तमानत्वासंभवादिति। अन्यादृश्याश्चाभावादित्याह — 'न वर्तत 'इत्यादि भाष्यम्'। तद्व्याचष्टे — **परिवर्तनेति**। भाष्ये यो लोक इत्यन्वयः। अपिशब्द[6]सूचितमर्थमाह — **किं पुनरिति**। अविकृतमात्मतत्त्वं वस्तुतत्त्वमात्मनः संबन्धि [7]तद्विषयतज्ज्ञानमित्यर्थः। चक्रादेः क्रियावेशराहित्यज्ञानवान् योगितुल्य इति [8]समासार्थः। 'मीमांसकः' इत्यादिनापि क्रियाया [9]वर्तमानत्वाभावमेवाह। तद्व्याचष्टे — **विचारक इति**। क्रियाया वर्तमानत्वाभाव एव हेत्वन्तरम् 'अनागतम्' इति। तद्व्याचष्टे — **एक एवेति**। **न चैकस्येति**। अनेन क्षणभङ्गवादाश्रयेण पूर्वपक्ष इत्युक्तम्। भाष्ये **सर्वत्र** सर्वस्मिन् काले, भूते वर्तमाने भविष्यति च। ननु काले 'सर्वदा' इति भाष्यम्, अत आह — **कालेति**। **परिहारः** 'नास्ति वर्तमानः कालः' इत्यादि 'किमुच्यते' इत्यन्तेनोक्तार्थस्येत्यर्थः। क्षणभङ्गनये न वर्तमानत्वसंभवः, अत आह — **इहेति**। बाधकाभावाच्च [10]न प्रत्यभिज्ञा भ्रान्तिरित्यर्थः। **क्रियैव तस्या निमित्तमिति**। तस्या यन्निमित्तं सैव क्रियेत्यर्थः। यद्यपि 'गच्छति' [11]इत्यबाधकप्रतीत्यैव वर्तमानत्वमपि सिध्यति, तथापि युक्त्यन्तरमाह — [12]**क्रियाया इति**। तत्र हेतुः — [13]**वर्तमानो हीति**। [14]कदाचिदप्यवर्तमानस्य शशविषाणकल्पस्यात्यन्तासत्त्वाद् भूतभविष्यत्त्वे [15]न संभवत इत्यर्थः। ननु क्रियाक्षणानां फलपर्यन्तानां समूहस्यावर्तमानत्वात् कथं वर्तमानप्रयोगः, अत आह — **तत्रेति**। **क्रियाप्रबन्धः** क्रियासंतानः, [16]संततक्रियारूपमिति यावत्। वास्तवयौगपद्यरूप[17]समूहाभावेऽप्येकबुद्धिविषयत्वलक्षणं संभवतीत्यभिप्रेत्य 'बुद्ध्या' इत्युक्तम्।

---

[1] तत्र कालत्रय — अ.

[2] 'भिद्यते' इत्यस्यानन्तरम् 'इत्यर्थः' इत्यधिकम् — अ.

[3] 'राजस्थित्यादिक्रियया' इति नास्ति, 'कालस्थित्यादावपि' इति दृश्यते — अ.

[4] भाष्ये 'अपर आह' इत्यत्र 'अपरे आहुः' इति निर्णयसागरमुद्रिते पाठः।

[5] इति भाष्यम् — अ.

[6] सूचितमतिशयमाह — अ.

[7] तद्विषये तज्ज्ञानमर्थः — ऋ.

[8] संग्रहेणार्थ इति भावः।

[9] वर्तमानत्वमेवाह — अ.

[10] 'न' इति नास्ति — अ.

[11] बाधरहितप्रतीत्येत्यर्थः।

[12] प्रदीपपुस्तकेषु 'क्रियायाः' इत्यत्र वाक्यसमाप्तिर्दृश्यते। 'क्रियाया वर्तमानत्वाभावे' इति वाक्यारम्भोऽन्नंभट्टाभिमतः।

[13] वर्तमानोऽपीति — अ.

[14] कदाचिदस्य वर्तमानकालस्य शशविषाण — अ.

[15] न भवत इत्यर्थः — अ.

[16] ततः क्रियारूपमिति — अ.

[17] समूहाभावेऽप्येवं बुद्धिविषयत्व — ऋ.

भावना ध्यानम्। एकैकक्षणस्य प्रत्यक्षत्वात् कथं सूक्ष्मत्वम्, अत आह — **अनेकेति**। [1]**अनुमेयत्वमिति**। देशान्तरप्राप्त्यादिलिङ्गेनेत्यर्थः। भाष्ये 'अनुमितेन' इति भावे निष्ठा॥

इति श्रीमहाभाष्योद्द्योतने तृतीयाध्यायस्य
द्वितीये पादे द्वितीयमाह्निकम्॥

[३, २७९–२८५]

(**रत्नप्रकाशः**) क्रियायाः फललाभविरतत्वस्वभावादनेकदिनक्रियासाध्यं यत्र फलं तत्र संपूर्णायाः क्रियाया असमाप्तावपि तत्तद्दिने साध्यक्रियाया यदा विरतिस्तदा लड् न प्राप्नोतीति तत्रापि स विधेय इत्याह — **प्रवृत्तस्येति**। **भवन्तीति**। लट इयं संज्ञा प्राचाम्। अन्यत्रापि सा विधेयेत्याह — **नित्यप्रवृत्ते चेति**। **कालाविभागादिति**। नित्यस्य वस्तुनो भूतभविष्यत्कालयोगाभावेन तत्प्रतियोगिनो वर्तमानकालस्याप्यसंभवादिति भावः। तत्र प्रथमं वार्तिकं निरस्यति — **न्याय्या त्विति**। द्वितीयमपि निरस्यति — **सन्ति चेति**। इतर उपहसति — **किं शक्यन्त इति**। परिहरति — **नावश्यमिति**। तत्तत्क्रियोपाधिककालानां क्रियाणां विभागसंभवमाश्रित्योपपादयति — **इह हीति**। कालविषये मतभेदान् प्रसङ्गाद्वक्तुमाह — [2]**अपर आहुरिति**। **नास्तीति**। अवयवातिरिक्तोऽवयवी क्रियारूपो नास्ति, अवयवरूपाश्च क्रियाः क्षणिकाः। तथा च तासां भूतत्वं वा भविष्यत्त्वं वा संभवति, न तु वर्तमानत्वमिति भावः। **उदाहरन्तीति**। संमतित्वेनेति शेषः। **न वर्तते चक्रमिति**। वर्तमानपरिवर्तनक्रियाया आश्रयो न भवतीत्यर्थः। **न पात्यत इति**। वर्तमानपातनक्रियायाः कर्म न भवतीत्यर्थः। **कूटस्थ इति**। क्रियारहित इत्यर्थः। **लोक इति**। सर्वोऽपि पदार्थ इत्यर्थः। अतः कोऽपि **विवेष्टिता** चेष्टाश्रयो नास्ति। **पश्यतीति**। जानातीत्यर्थः। **सोऽप्यनन्ध इति**। किमु वक्तव्यं [3]तादृशज्ञानपूर्वकं यो निश्चलान्तःकरणो योगी सोऽनन्ध इतीति भावः। **मीमांसक इति**। विचारकः कश्चिदित्यर्थः। **मन्यमानः** विचारयन्। **युवेति**। तेनेन्द्रियपाटवं दर्शितम्। **मेधाविसंमत इति**। मेधाविभिः संमतः सम्यग् ज्ञातः। **अनुपृच्छतीति**। [4]"लट् स्मे' इति लट्। **पतितलक्षणमिति**। **पतितं** पतनं, तस्य लक्षणं स्वरूपं किम्, न किंचिदिति भावः। **अनागत इति**। पतने सतीति शेषः। **न पतसीति**। वर्तमानपतनाश्रयो न भवसीत्यर्थः। **काक नेति**। पतसीत्यनुषज्यते। **संप्रति पतसीति**। सर्वैः क्रियाशून्यतया दृश्यमानः पतसीत्यर्थः। तर्हीति शेषः। **सर्वो लोक इति**। क्रियाशून्यत्वाविशेषादिति भावः। **पततीति**। अभ्युपगन्तव्यं स्यादिति शेषः। **हिमवानपि गच्छतीति**। वक्तव्यं स्यादिति शेषः। **अनागतमिति**। कालत्रयातिरिक्तः कालोऽप्रसिद्धः। तत्र च क्रिया नास्त्येव, अनुभवाभावात्। तथा च पतसीति निरर्थकमिति भावः। **सर्वत्रेति**। दाप्रत्ययो वैकल्पिक इति न कृतः। समाधत्ते — **क्रियेति**। **यो हेतुरिति**। यत् [5]साध्यं देशान्तरप्राप्तिरूपं तत् केनचिन्निमित्तेन भवतीति विज्ञायाविचारयन् निर्विशङ्कः सन् गच्छतीति प्रयोक्तव्यमित्यर्थः। तदुपपादयितुमाह — **अपर इति**। **काल इति**। कालाधिकरणिका क्रिये-

---

[1] प्रदीपे 'अनुमीयत इत्यर्थः' इति दृश्यते। 'अनुमेयत्वमित्यर्थः' इत्यन्नंभट्टपाठ इति ज्ञायते।

[2] भाष्ये 'अपर आह' इत्यत्र 'अपरे आहुः' इति निर्णयसागरमुद्रिते पाठः।

[3] तादृशज्ञानपूर्वकं — प.

[4] पा. सू. ३.२.११८.

[5] साधनं — प.

त्यर्थः। तर्हि लोकैर्न दृश्यते कुत इति चेन्न, अतिसूक्ष्मतया तदनुपलब्धेरुपपत्तेरित्याह — **आदित्यगतिवदिति**। अस्मिन्नर्थे श्लोकान्तरं संमतित्वेनोदाहरन्तीत्याह — **अपि चेति**। **बिसस्य वाला इति**। कमलादिनालगताः सूक्ष्मास्तन्तव इत्यर्थः। **विकृतिः संनिपात इति**। साधनसंनिपाते विकृतिर्विकारः क्रियावश्यंभाविनीत्यर्थः। अत इति शेषः। **तां** क्रियामित्यर्थः। **वेदयन्ते** जानन्तीत्यर्थः। **त्रिभावा इति**। त्रिषु कालेषु भावः क्रियासद्भावो येषां त इत्यर्थः। केन प्रमाणेन जानन्तीत्यत आह — **सूक्ष्मो हि भाव इति**। सूक्ष्मः पदार्थ इत्यर्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥

[३, २७९–२८५]

(नारायणीयम्) यदि प्रवृत्तस्याविरामः [1]कथमवर्तमानत्वमित्याशङ्क्य हेतोरसिद्धिं परिहरति — **इहाध्ययनमिति**। **न च तद्विरतमिति**। फलस्यानवाप्तत्वात्। ननु संप्रतितनत्वं वर्तमानत्वं भूतभविष्यत्प्रतियोगि नित्येषु [2]च पर्वतादिष्वविच्छेदेन प्रवर्तमानेषु भूतभविष्यतोरभावात् सुतरामुपपद्यत इत्याशङ्क्याह — **साध्यस्यार्थस्येति**। [3]**अनित्यत्वादिति**। [4]साधनसंनियोगेऽभिमुखोत्पत्तित्वात्। **भूतभविष्यत्त्वाभावादिति**। भूतभविष्यदवधिमध्यवर्ति वर्तमानत्वं तदभावे [5]नोपपद्यते। अत एव कालावच्छेदाभावात् कालोपाधिलक्षणा [6]क्रियैवात्र नास्तीत्याह — **क्रियारूपत्वाभावश्चेति**। एवं च क्रियारूपत्वस्य वर्तमानत्वादेश्च परस्परापेक्षयावस्थानादेकतराभावेऽन्यतराभावः स्यादित्युक्तं भवति। अत एवोक्तम् 'पर्वतास्तिष्ठन्तीत्यादौ स्थानादेः' इत्यादि। **व्यवधानमिवेति**। [7]भुज्यादिः क्रियासमूहः पूर्वापरीभूतक्षणसमूहात्मकोऽन्तरालप्रवृत्तिभिर्हाससंकथनादिभिरतीतानागतानां क्षणानां व्यवधानमिव प्राप्नोति, न तु तत्त्वतो व्यवधानम्, तृप्तिफलत्वाद् भोजनस्य तदवधिकतत्संतानस्यानुवर्तनात्। क्षणानामेव व्यवधानात् [8]तावन्मात्रस्य तृप्तिरूपत्वाभावात्। [9]तथानागतावयवाभावं बुद्ध्या परिकल्प्यातीतावयवापेक्षया निवृत्त इव स क्रियासमूहो दृश्यते। तत्त्वतो निवृत्त्यभावादिवशब्दः, एवमवयवद्वारेण विच्छिन्नस्वभावोऽपि स भुज्यादिरविरामादाफल[10]प्राप्तेरनुवर्तते, न निवर्तते। वर्तमानरूपेणावतिष्ठत एवेत्यर्थः। न केवलं भुज्यादिरेवैवंस्वभावः, यावद्धास[11]संकथनादिरप्यन्येनाक्षिनिमेषादिना संकीर्णेव प्रतीयते, न तु सर्वथा संकीर्णा, आफलप्राप्तेर्विरामाभावात्। [12]एवं याजनादेरपि भोजनादिक्रियानान्तरीयकत्वान्न[13] व्यवधानं करोतीति पक्ष उक्तः। अध्ययनस्यैवावयवक्रिया भोजनादिरिति पक्षान्तरमाह — **तदन्त-**

---

[1] कथं वर्तमानत्वं — ङ.
[2] चकारो नास्ति — ङ.
[3] नित्यत्वादिति — घ, ङ.
[4] साधनसंनिधाने — ङ.
[5] नोपपाद्यते — घ.
[6] क्रियापि वात्र — ङ.
[7] भुज्यादिक्रिया — ङ.
[8] तावन्मात्रस्येति क्रियारूपत्वाभावात् — घ.
[9] 'तथा' इत्यतः प्राक् 'न' इत्यधिकम् — ङ.
[10] प्राप्तेरनुवर्तनान्न निवर्तते — ङ.
[11] अस्य क्रियेति विशेष्यं बोध्यम्।
[12] 'एवमध्ययनादेरपि' इत्युचितं भाति, तस्यैव प्रकृतत्वात्।
[13] 'न' इति नास्ति — ङ.

रालेति। तस्या भुज्यादिक्रियाया मध्यवर्तिनो ये क्रियाभेदा हसितादयस्ते भुज्यादेरवयवा एव, आचमनादिवत् तदुपकारित्वात्। ततश्च यानि प्रसिद्धतराणि दध्युपसेचनादीन्यङ्गानि तेभ्यो हासादीनामनियमात् सत्यपि भेदे आचमनादिभिः सादृश्याद् भुज्यङ्गत्वेन ते गृह्यन्ते। अप्यर्थे तुशब्दः। सुहृदोऽपि हृष्टमनस्काः परस्परं हाससंकथनादिकं कुर्वाणा भोजनं प्रतिपद्यन्ते, एवमध्ययनादेर्भोजनादिकमङ्गत्वान्न व्यवधायकमित्यर्थः। ततश्चारम्भानपवर्गान्मुख्यस्य फलस्यानभिनिवृत्तत्वादारम्भस्यानपवर्गादपरिसमाप्तत्वात् क्रियान्तरव्यवधानेऽपि न्याय्या भवन्तीति वर्तमानप्रत्यय उपपन्न इति वार्तिकार्थो दर्शितः। **प्रसिद्धपरिमाणेति।** यथा [1]'सूर्यादिक्रिया प्रसिद्धपरिमाणाध्ययनादिक्रियायाः परिच्छेदायोपात्ताहरादिव्यपदेशं लभते 'अहरधीते, गोदोहं स्वपिति' इति। **क्रियारूपत्वमिति।** पर्वतादिस्थित्यादेः साध्यरूपत्वमित्यर्थः। **परतो भिद्यत इति।** यस्मात् सर्वं वस्तुजातमुपाधिसंसर्गवशेन भिद्यते, न तु स्वरूपतो भिद्यते। यथोक्तम्—[2]''भिन्ना इति परोपाधिः' इत्यादि। [3]तस्मान्नित्यानामपि पर्वतनद्यादीनां स्थित्यादिः पररूपेण राज्ञां स्थित्यादिनोपाधिना भिद्यते, तत्र राजक्रियाणां साध्यमानत्वं त्रैकाल्यं च यथा भवति तथा तत्सहचरितपर्वतादीनां स्थित्यादेस्तदध्यारोपादिति गौणस्त्रिकालविषयः प्रयोगोऽत्रोपपन्न इत्यर्थः। अनेनोपाधिभेदेनैव पर्वतादिस्थित्यादेर्भेदः, [4]न स्वत इति दर्शितम्। इदानीं स्वत एव तस्या भेदः, सहचरितक्रियाभेदेन तु स भेदः सारूप्यादनधिगतस्वरूपो ज्ञाप्यत इति भेदमाह—**प्रसिद्धभेदा इति।** **विरूपाः** भिन्नरूपा अवयवक्रिया येषां ते पचिभिद्यादयो व्यापाराः प्रसिद्धभेदा भिन्नकाला विलक्षणस्वभावाः प्रसिद्धा एव अधिश्रयणादयो हि पच्यवयवा विलक्षणाः, एवं भिद्यवयवा उद्यमनादयः। ये तु पर्वतादिस्थित्यादयः सदृशावयवक्रियाः सादृश्यादेव दुरवधारभेदाः, ते राजक्रियाभिर्विलक्षणस्वभावाभिः साहचर्याद् भिद्यन्ते कालभिन्ना ज्ञाप्यन्त इत्यर्थः। **तासामेवेति।** राज्ञां क्रियाः प्रसिद्धपरिमाणा अप्रसिद्धपरिमाणानां पर्वतादि[5]स्थित्यादीनां परिच्छेदिकाः कालत्वेन व्यवह्रियन्ते। ते नलनहुषादिस्थितिकाले पर्वतास्तस्थुः, कल्किविष्णुकाले [6]स्थास्यन्ति, इदानींतनानां राज्ञां स्थितिकाले तिष्ठन्तीति कालत्रययोग उपपन्नः। भाष्ये प्रसिद्धतरत्वाद्राजक्रिया उपात्ताः, तेन सूर्यादिसंचारादयोऽपि पर्वतादिस्थित्यादेर्भेदिका इति द्रष्टव्यम्। सर्वत्रैव वर्तमानत्वं क्रियाया अनुपपन्नमित्याक्षिप्तं भाष्ये। तत्राशयमाह—**निष्पन्नस्यार्थस्येति।** यः क्षणः सिद्धस्वभावः सोऽतीतत्वाद् भूतव्यपदेश्यः, यश्चासौ साध्यरूपः स भावित्वाद् भविष्यदाख्यः। न चोभयरूपः कश्चित् समस्ति, विरुद्धस्वभावस्यैकत्वविरोधात्। न चानुभयरूपः, तस्य क्वचिदप्यदर्शनादित्यर्थः। उक्तं च—[7]'सदसद्वापि वस्तु स्यात् तृतीयं नास्ति किंचन। तेन भूतभविष्यन्तौ मुक्त्वा मध्यं न विद्यते॥ इति। **व्यापारस्येति।** वर्तमानकालयुक्तस्येत्यर्थः। **एवं य इति।** य एवं विद्वानस्मदादिरपि विशिष्टज्ञानवानित्यर्थः। अद्वैतवादिनः कस्यचिद्वचनमिदम्। अपिशब्दसूचितमर्थमाह—**किं पुनरिति।** अनुष्ठानमात्मभावनैव। तदेव दर्शयति—**स ह्यविकृतमिति।** जननादिभावविकारशून्यमित्यर्थः, [8]''न जायते न म्रियते' इत्यादिश्रुतेः। **भावयन्निति।** हेतौ शता। भावनावशादुक्तमात्मस्वरूपं प्रत्यक्षीकरोतीत्यर्थः। [9]**भगवता वासुदेवेनेति।** वसुदेवापत्यतां गतेन

[1] नित्यादिक्रिया — घ; दिव्यादिक्रिया — ङ.
[2] वाक्यपदीयम् ३.१.२०.
[3] तस्मान्नित्यादीनामपि — घ, ङ.
[4] न स्वतन्त्र इति — ङ.
[5] आदिशब्दो नास्ति — ङ.
[6] 'स्थास्यन्ति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ङ.
[7] वाक्यपदीयम् ३.९.८५.
[8] महोपनिषत् ४.१२०.
[9] प्रदीपे 'तथा चोक्तं भगवता' इति पाठो दृश्यते। 'तथा चोक्तं भगवता वासुदेवेन' इति पाठोऽत्राभिमतः।

कृष्णावतारेण **भगवता** ऐश्वर्यादिगुणयुक्तेन भूतानामुत्पत्त्यादिविदा च श्रीभगवद्गीतासूक्तम् — **ज्ञानेन त्विति**। येनाज्ञानेनावृतं ज्ञानं, तेन मुह्यन्ति जन्तवः, तदज्ञानं [1]येषां जन्तूनामात्मनः संबन्धि, आत्माश्रयं विवेकज्ञानेनात्मविषयेण, **नाशितं** मूलोच्छिन्नं भवति तेषाम्, **आदित्यवत्** यथा आदित्यः समस्तं वस्तुजातमवभासयति तद्वत् तत् **परम्** उत्कृष्टं परमार्थविषयं [2]तज्ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयतीत्यर्थः। [3]'आत्मनि विज्ञाते सर्वं विज्ञातं भवति' इति श्रुतेः। **विचारक इति**। [4]"मानेर्जिज्ञासायाम्' इति जिज्ञासापूर्वके विचारे सन्विधानात्। **प्रज्ञायां पाटवमिति**। बाल्यवार्धकयोः प्रज्ञाया उन्मेषाभावात्। **संमत इति**। [5]'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः। अत एवाह — **षष्ठीसमासस्येति**। लक्षणशब्दः स्वरूपवाचीत्याह — **तस्य किं स्वरूपमिति**। किंशब्दः क्षेप इत्याह — **नास्त्येवेति**। अत्र हेतुत्वेनोत्तरं श्लोकं योजयति — **अनागतत्वादेवेति**। **विशेषाभावादिति**। निर्मूले व्यवहारे [6]सर्वत्र तद्व्यवहार-प्रसङ्ग इति विपक्षे बाध उक्तः। नन्वेकस्य क्षणस्योपलभ्यमानत्वाद्वर्तमानत्वमुपपद्यत एवेत्यत आह — [7]**न चैकस्येति**। साध्यमानावस्थस्य क्रमिकस्य व्यापारस्य धातुवाच्यत्वात् क्रियात्वम्। तदेकस्य न संभवतीत्यर्थः। अत एवोक्तं 'सर्वत्र च गतिर्नास्ति' इति। सर्वदेत्यर्थः। यथा वर्तमानस्य क्षणस्य न क्रियात्वं तथा भूतभविष्यतोरपीत्यर्थः। कथं तर्हि त्रल्प्रयोगः, तत्राह — **कालवृत्तित्वेति**। **हेतुः प्रयोजनमिति**। फलस्यात्र हेतुत्वं विवक्षितमित्यर्थः। तत्र पूर्वपक्षिणा क्रियाया असत्त्वमुक्तं तावन्निराकरोति — **इह प्रत्यभिज्ञानादिति**। यदि देशान्तरस्थादन्यदेशस्थो विलक्षणस्तदा देशान्तरप्राप्तिलक्षणात् कार्यात् क्रियाख्यकारणानुमानं न संभवतीति क्षणभङ्गवादो निराक्रियते। सोऽयं देवदत्त इति बाधकाभावादभ्रान्तात् प्रत्यभिज्ञाप्रत्ययादेक एव देवदत्तो न प्रतिक्षणं भिन्न इत्यवगम्यत इति तस्य देशान्तरप्राप्तिलक्षणं कार्यं कादाचित्कं कारणमन्तरेण नोपपद्यते। तत्र यन्निमित्तं सा क्रियेति भण्यते। अनुमानान्तरमाह — **तदालम्बनश्चेति**। औदासीन्यावस्थायां सत्स्वपि साधनेषु गच्छतीत्यादिप्रत्ययाभावात् संरम्भावस्थायां च तद्भावादन्वयव्यतिरेकाभ्यां द्रव्यादन्या क्रियानुमीयत इत्यर्थः। विपक्षे [8]बाधप्रदर्शनपूर्वकं क्रियाया वर्तमानत्वमुपपादयति — **वर्तमानत्वाभावे चेति**। वर्तमानापेक्षत्वाद् भूतभविष्यद्व्यवहारस्य तदभावे तद्व्यवहारोऽपि न स्यादिति, तदाह — **वर्तमानो हीति**। ततश्च सर्वव्यवहारोत्सादप्रसङ्गाद्वर्तमानत्वमवश्याभ्युपेयमित्याह — [9]**तत्रानेकक्षणेति**। एकफलावच्छेदेन प्रवर्तमानमनेकक्षणसंतानात्मकं क्रियारूपं संकलनबुद्ध्यैकीकृत्य [10]गच्छतीत्यादिवर्तमानप्रत्ययः प्रयुज्यते। क्रमेणानुभूतानामपि संकलना भवत्येव, अनुभववासनायाः प्रत्यासन्नत्वात। अन्यथा शतादिप्रत्ययाभावप्रसङ्गात्। ततश्च क्षणान्तरे नष्टे क्षणान्तरे चानागतेऽपि प्रारब्धापरिसमाप्तत्वलक्षणं वर्तमानत्वं संकलनाबुद्ध्या परामृष्टस्य क्षणसमूहस्योपपद्यते। उक्तं च — [11]'क्रियाप्रबन्धरूपं यदध्यात्मं विनिगृह्यते। संक्रान्तबिम्बमेकत्र तामाहुर्वर्तमानताम्' इति। मीमांसकैरप्युक्तम् —

---

[1] एषां — ङ.
[2] ततः ज्ञानं — घ.
[3] बृहदारण्यकोपनिषत् ४.५.६.
[4] वृत्तिकारनिर्दशितोऽयमर्थः।
[5] पा. सू. ३.२.१८८.
[6] सर्वत्र व्यवहारप्रसङ्ग इति — ङ.
[7] न वैकस्येति — ङ.
[8] बाधनप्रदर्शनपूर्वकं क्रियावर्तमानत्वं — ङ.
[9] तत्रायमनेकक्षणेति — ङ.
[10] गच्छन्तीत्यादि — ङ.
[11] वाक्यपदीयम् ३.९.९०.

[1]'यदा त्वाद्यपरिस्पन्दात् प्रभृत्याफललाभतः।
क्रिया पूर्वापरीभूता लक्ष्यते वर्तते तदा॥' इति।

ननु यद्यविचार्य प्रयुज्यते तदा सतामसंमतिः स्यादित्यत आह — **कुविकल्पेति**। ये [2]पूर्वपक्षिणोद्भाविताः कुत्सिता विकल्पा न्यायाभासास्त एव दोषरूपत्वात् कलङ्काख्यास्तद्रहितम्, उक्तेन समीचीनेन न्यायेन तेषां निराकृतत्वात्। **बिसस्य — वाल इति**। बिसान्तर्गतास्तन्तव इत्यर्थः। **प्रत्यक्षेण नेति**। सूक्ष्मत्वादस्मदादिभिर्दुरवधारत्वात्। **योगिन इति**। ते हि सूक्ष्मविप्रकृष्टाद्यर्थवेदिनः प्रसिद्धाः। 'त्रिभावाः' इति व्यधिकरणपदो बहुव्रीहिरित्याह — **त्रिषु कालेष्विति**। **त्रीनपि कालानिति**। त्रिकालभवान् पदार्थानित्यर्थः। ननु क्रियाया योगिप्रत्यक्षवेद्यत्वे कथिते 'सूक्ष्मो हि भावः' इत्यनेनानुमेयत्वकथनं किमर्थमित्याशङ्क्यैकैकस्य क्षणस्य प्रत्यक्षत्वेऽपि धातुवाच्यस्य क्षणसमूहस्यानुमानैगम्यत्वं दर्शयितुमिदमुक्तमित्याह — **अनेकेति**। तथा चोक्तम् —

[3]'क्रमात् सदसतां तेषामात्मानो न समूहिनाम्।
सद्वस्तुविषयैर्यान्ति संबन्धं चक्षुरादिभिः॥' इति॥

इति [4]नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य
[5]द्वितीये पादे द्वितीयमाह्निकम्॥

---

[1] मीमांसाश्लोकवार्तिकम्. स्फोटवादे श्लो. ७९.

[2] पूर्वपक्षिणोद्भूताः — घ.

[3] वाक्यपदीयम् ३.८.१४. 'क्रमात् संभविनां तेषाम्' इति श्लोके 'संभविनाम्' इत्यस्य स्थाने 'सदसताम्' इति पाठान्तरत्वेन वाक्यपदीयेऽधः प्रादर्शि।

[4] नारायणीये महाभाष्य — ङ.

[5] द्वितीयपादे — ङ.

तृतीयाध्यायस्य द्वितीयपादे तृतीयमाह्निकम्

लटः शतृशानचावप्रथमासमानाधिकरणे ३.२.१२४.

[३, २८६–२९२]

(**उद्द्योतनम्**) 'लस्य' इत्यनेन सर्वस्यापि [1]लकारस्याप्रथमान्तेन सामानाधिकरण्यं नास्तीत्युक्तम्। तदुपपादयति — **इहेति**। **गुणभूते इति**। यद्यपि प्रत्ययार्थतया [2]तयोः प्राधान्यमायाति, तथापि पचतीत्युक्ते पाको निर्वर्त्यत इति पाकस्यैव प्राधान्यं प्रतीयते, न तु देवदत्तस्य। एवं 'पच्यते' इत्युक्तेऽपि पाक एव निर्वर्त्यतया प्राधान्येन [3]प्रतीयते, नौदनम्। तथा च प्रतीतिबलात् क्रियैव प्राधान्येन तिङन्ताद् गम्यते। अत एव [4]च 'क्रियाप्रधानमाख्यातम्' इति प्रसिद्धिः। भवतु [5]तयोरप्राधान्यम्, प्रकृते किमायातम्, अत आह — **तथा चेति**। **क्रियान्तरेति**। यद्यपि 'पश्य मृगो धावति' इति क्रियाया अपि क्रियान्तरयोगोऽस्ति, तथापि क्रियायाः कर्मत्वम्, न मृगस्य। धावनविशिष्टमृगस्य कर्मत्वे 'धावति मृगं पश्य' इति स्यात्। एवं च क्रियाप्राधान्यमिति स्वभावकथनम्। [6]अप्राधान्येऽपि व्युत्पत्तिविरहादेव तिङन्तधावनकर्तृकर्मणोः क्रियान्तरयोगाभाव इति मन्तव्यम्। **अन्ये** लकारव्यतिरिक्ताः। सामान्येनोक्तं प्रकृते योजयति — **ततश्चेति**। 'अपचत्' [7]इत्यत्राप्रथमासामानाधिकरण्याङ्गीकारेऽनिष्टमाह — **तथा चेति**। एकस्यापि लकारस्यादेशभेदेन शक्तिवैचित्र्यं प्रयोगाधीनमित्यभिप्रेत्याह — **तिङभाविन इति**। **प्रतिपत्तुमिति**। एवं च [8]तत्र योगायोगयोः स्वभावातिरिक्तं किं कारणं प्रतिपत्तुं शक्यम्, न किंचिदिति भाष्यार्थः। ननु लकारस्याप्रथमा[9]सामानाधिकरण्यज्ञानात् पूर्वमादेश एव नास्ति। तथा चादेशेन सामानाधिकरण्यानुमानम्, तस्माच्चादेश इति तदितरेतराश्रयं स्यात्, अत आह — **सिद्धानामिति**। [10]नित्यानामित्यर्थः। **न क्वचिदुपलब्धमिति**। तथा च साध्यानुपस्थितौ व्याप्तिनिश्चयाभावान्नानुमानमित्यर्थः। 'विषम उपन्यासः' इत्यनेन किं प्रत्यक्षविरोधादनुमानाप्रवृत्तिरुच्यते, किं वा [11]व्याप्तिग्रहणाभावादिति विकल्पं मनसि निधाय नाद्य इत्याह — **यद्यपीति**। अन्यथासिद्धिमेवाह — **लकारेति**। न द्वितीय इत्याह — **अनन्यथेति**। **सामान्यतो दृष्टेनेति**। विमतमप्रथमासमानाधिकरणम्, अप्रथमासमानाधिकरणादेशवत्त्वात्, तेमयाद्यादेशस्थानितवममादिवत्, इत्यनुमानेन। अनुमानस्यानन्यथासिद्धिमाह — [12]**न ह्यन्यथेति**। [13]चक्रभ्रमे हेतुमाह — **आशुसंचारादिति**। बाधकमनुमानमाह — **रूपेति**। **सहचारिणः** व्यापकस्य स्पर्शस्य। महत्त्व[14]समानाधिकरणोद्भूत-

---

[1] लकारस्य प्रथमान्तेन — अ, ऋ, लृ.

[2] कर्तृकर्मणोरित्यर्थः।

[3] गम्यते — ऋ.

[4] चकारो नास्ति — अ.

[5] तयोरेव प्राधान्यम् — अ.

[6] क्रियाया इति शेषः।

[7] इत्यत्र प्रथमासामानाधिकरण्यानङ्गीकारे — अ.

[8] 'तत्र' इति नास्ति — अ.

[9] सामानाधिकरण्याज्ञानात् पूर्वं — अ.

[10] 'नित्यानाम्' इत्यादि 'उपलब्धमिति' इत्यन्तं नास्ति — अ.

[11] व्याप्तिग्रहाभावादिति — अ.

[12] नान्यथेति — अ.

[13] तत्र भ्रमहेतुमाह — अनुसंचारादिति — अ.

[14] समानाधिकरणोद्भूतस्य यस्य तादृश — अ; समानाधिकरणोद्भूतस्य तादृश — लृ.

रूपस्य तादृशस्पर्शव्याप्यरूपविशेष एव हेतुः। तेनालोकादौ न व्यभिचारः। तप्तायसचक्रे युगपदनेकदिक्कोष्णस्पर्श उपलभ्यते। तथा च 'अलातं न चक्रम्, युगपदनेकदिक्कोष्णस्पर्शबुद्धचविषयत्वात्, अभ्राम्यमाणालातवत्। 'रूपसहचारिणः' इत्यनेनानुकूलतर्क उक्तः। **स्पर्शप्रबन्धः** [1]स्पर्शग्रहः। **चक्रस्य** प्रसिद्धस्य। **संततः** अविच्छिन्नः, सर्वदिक्क इति यावत्। **तत्** अलातम्। 'कस्यचित्' इत्यनेन भूयोदर्शन[2]नियमनिरास इत्याह — **न भूय इति**। [3]व्यभिचारज्ञानविरहसहकृत[4]सहचारदर्शनमात्रं व्याप्तिग्राहकमिति भावः। नन्वत्र सामान्यव्याप्तिग्रहात् वृक्षपर्णशब्दौ जातिपरौ। तथा च [5]'जातिरप्राणिनाम्' इत्येकवद्भावेन भाव्यम्, अत आह — **भाष्यकारेति**। कोटिद्वयस्य तुल्यत्वाभावात् संशयानुपपत्तिमाशङ्क्य परिहरति — **यद्यपीति**। देवदत्तस्य पचतोऽपत्यमित्यप्रथमासामानाधिकरण्य एव प्रत्ययोऽस्तु, अत आह — **कुर्वत इति**। **पदान्तरेण** अप्रथमान्तेन। **समानाधिकरणेति**। कुर्वती च सा भक्तिश्चेति प्रथमासामानाधिकरण्याच्छता न स्यादिति साधारणो दोषः स्यादित्यर्थः। **स चेति**। तथा च वक्ष्यमाणस्यात्र वचनं पौनरुक्त्यावहम्। षष्ठीसमासे तु न तच्छङ्का। प्रतिषेधपक्षे तावच्छतृशानचोरसिद्धिमाह — **अत्रेति**। **पूर्वस्मिन्** पर्युदासपक्षेऽपि। नेदं सूत्रान्तरम्, किं तु शेषपूरणमित्याह — **लक्षणशेष इति**। ननु 'कुर्वद्भक्तिः' इत्यत्रान्तर्वर्तिविभक्तेर्लुकः पूर्वमन्तरङ्गत्वात् प्रत्ययपरत्वेनैव [6]शत्रादेशसिद्धेरुत्तरपदग्रहणं व्यर्थम्, अत आह — **पृथगिति**। **अप्रत्ययेति**। अप्रत्ययपरत्वेऽप्यादेशार्थमित्यर्थः। उत्तरपदस्य सुबन्तनिमित्तत्वमुपपादयन् इतरेतराश्रयमाह — **सतीति**। **सुबुत्पत्ताविति**। समर्थषष्ठीविभक्ताविति[7] [अर्थः।] अत्र यद्यपि लकारस्य [8]कृत्त्वेन प्रातिपदिकत्वात् सुबुत्पत्तौ विभक्तिरूपप्रत्ययपरत्वेनैवादेशसिद्धेरणादिपरत्वं नापेक्ष्यते, अणादेः पूर्वं [9]च सुपो [10]न लुक्, तथापि 'प्रत्ययोत्तरपदयोश्च' इति वार्तिके प्रत्ययशब्देन सुबतिरिक्ताणादिकमेव गृह्यत [11]इतीतरेतराश्रयशङ्का[12]परिहारः। तथापि प्रातिपदिकादेवाणाद्युत्पत्तिरस्तु, किं सुबुत्पत्त्येति चेत्, अत्राहुः — 'प्राह्णेतराम्' इत्यादौ [13]'घकालतनेषु कालनाम्नः' इति [14]सप्तम्या अलुग्विधानाज्ज्ञापकात् सुबन्तादेव तद्धितः, [15]'ङ्याप्प्रातिपदिकात्' इति वृद्धादिविशेषणत्वेनोपयुज्यत इति पक्षाश्रयेणैतदुक्तम्, इति। नन्वत्र [16]'तिङश्च' इत्यनेन [17]'द्विवचनविभज्योपपदे' इत्यत्रानुवृत्तेन तरप् भविष्यति, अत आह — **तिङश्चेति**। **लकारान्तरं** लड्व्यतिरिक्तम्, लटः शतृशानचौ बाधकाविति भावः। लकारान्तरमुदाहरति — **अपचत्तरामिति**। नन्वत्र प्रत्ययपरत्वाभावात् कथं प्रसङ्गः, अत आह — **अत्रापीति**। पूर्वं सुब्व्यतिरिक्तप्रत्ययग्रहणमङ्गीकृत्यापीतरेतराश्रयः[18] परिहृतः, इदानीं लाघवात् प्रत्ययमात्रस्यैव ग्रहणम्, तथा सतीतरेतराश्रयशङ्कापि नास्तीत्यभिप्रेत्य 'पचति' इत्यत्रातिप्रसङ्ग उक्त

---

[1] स्पर्शाग्रहः — अ, ऋ.
[2] 'नियम' इति नास्ति — ऋ.
[3] व्यभिचारिज्ञान — अ, ऋ, लृ.
[4] समाचार — अ.
[5] पा. सू. २.४.६.
[6] तत्रादेशसिद्धेः — अ.
[7] 'इति' इति नास्ति — ऋ, लृ.
[8] कृत्त्वात् — अ.
[9] चकारो नास्ति — अ.
[10] 'न' इति नास्ति — अ.
[11] इतिशब्दो नास्ति — अ.
[12] परिहारौ — ऋ, लृ.
[13] पा. सू. ६.३.१७.
[14] 'सप्तम्याः' इति नास्ति — ऋ.
[15] पा. सू. ४.१.१.
[16] पा. सू. ५.३.५६.
[17] पा. सू. ५.३.५७.
[18] इतरेतराश्रयपरिहारः — अ.

इति ध्येयम्। व्यवस्थितविभाषयैव नित्ययोः सिद्धिरित्युक्तम्, अत आह — **व्यवस्थितविभाषाश्रयेणेति**॥

[३, २८६–२९२]

(रत्नप्रकाशः) अप्रयुज्यमानस्य लटोऽप्रथमासमानाधिकरणत्वस्याप्रसिद्धत्वात् तदाश्रयादेशविधानं न युज्यत इत्याशयेनाह — **लस्येति**। तत्सामानाधिकरण्याप्रसिद्धौ लकारान्तरं दृष्टान्तीकरोति — **यथान्यत्रेति**। लटः सामानाधिकरण्यं प्रसिद्धं चेल्लङोऽपि तत् स्यात्। तथा च सिद्धान्तविरोध इति भावेनाह — **योग इति चेदिति**। परिहरति — **न क्वचिदिति**। **शक्यं कर्तुमिति**। प्रतिपत्तुमित्यर्थः। प्रकारान्तरेण तत्सामानाधिकरण्यं ज्ञातुं शक्यत इत्याह — **अथवेति**। **धूमं दृष्ट्वेति**। विकृतिभू[तेन] तेनेति शेषः। **अग्निरत्रेति**। प्रकृतिभूत इति भावः। **विषम उपन्यास इति**। लटः प्रयोगाभावात् तदादेशेन सामानाधिकरण्यस्याप्रत्यक्षत्वाद्व्याप्तिग्रहाभावेऽनुमितिर्न प्रवर्तत इत्यर्थः। प्रत्यक्षाभावेऽप्यनुमानस्य सूक्ष्मविषये [प्रवृत्तिमाह] — **कस्यचित् खल्विति**। तथा च सामान्यतो दृष्टं त्वनुमानं प्रबलं प्रवर्तत इति भावः। तदेवं सामानाधिकरण्ये उपपादिते [1]विचा.........

[३, २८६–२९२]

(नारायणीयम्) [2]लस्याप्रथमान्तेन सामानाधिकरण्यायोगमुपपादयति — **इहायं लकार इति**। [3]एषु कृत्सु मध्ये लकारः कृदित्यर्थः। 'लङादिवत्' इत्यनेन भाष्ये लङीत्युपलक्षणमिति दर्शयति। **द्वितीयाद्यनुत्पत्ताविति**। [4]कृत्त्वात् प्रातिपदिकत्वेऽपीति शेषः। 'अन्यत्रापि योगः स्यात्' इत्येतदुदाहरणे योजयति — **तथा चेति**। ननूक्तेन न्यायेन लङादिसाम्ये दर्शिते 'स्वाभाविकमेतत्' इति किंभूतोऽयं परिहार इत्याशङ्क्याह — **तिङभाविन इति**। शब्दशक्तिवैचित्र्यमेवात्र हेतुरिति भावः। **प्रतिपत्तुमित्यर्थ इति**। ततश्चायं भाष्यार्थः — लटोऽप्रथमान्तेन योगो भवति लङो नेति यत् तत्र किं कारणं प्रतिपत्तुं शक्यम्, न किमपि, स्वाभाविकमेवेति। नन्वादेशतः स्थानिनोऽप्रथमासामानाधिकरण्यावगमेऽभ्युपगम्यमाने इतरेतराश्रयदोषः स्यात् — लटोऽप्रथमासामानाधिकरण्ये निश्चिते आदेशः, आदेशाच्च तदवगम इति, तत्राह — **सिद्धानां शब्दानामिति**। नित्यानामित्यर्थः। नित्यानामिति वा पाठः। लटोऽप्रथमासामानाधिकरण्यस्य क्वचित् प्रत्यक्षेणानुपलम्भात्, व्याप्तिग्रहणाभावादनुमानानुदयमभिप्रेत्य [5]वैषम्यमुक्तमित्याह — **अग्निधूमयोर्हीति**। [6]अनुमानस्य प्रत्यक्षविरोधं तावत् परिहरति — **यद्यपीति**। अन्यथासिद्धत्वादित्यत्र हेतुः — **लकाराप्रयोगेति**। व्याप्तिग्रहणाभावदोषं परिहरति — **अनन्यथासिद्धेन त्विति**। सामान्यव्याप्तिबलाद्रूपादिज्ञानं चक्षुरादेरनुमापकम्। ततश्चायं प्रयोगः — विमतम् [7]अप्रथमासमानाधिकरणम्, अप्रथमासमानाधिकरणादेशत्वात्, यदित्थं तत् तथा। [8]**सामान्यतो दृष्टेनेति**। यथा अस्मदादि

---

[1] 'प, ब' मातृकयोः 'विचा' इत्यस्यानन्तरं ग्रन्थलोपः। 'क्षिप्रवचने लृट्' (३.३.१३३) इति सूत्रात् प्राग्भागपर्यन्तं नास्ति।

[2] लस्य प्रथमान्तेन — ङ.

[3] येषु — ङ.

[4] तुल्यत्वात् — ङ.

[5] वैषम्यमुक्तमित्यभिप्रेत्याह — ङ.

[6] अनुमानप्रत्यक्षविरोधं — ङ.

[7] न प्रथमासमानाधिकरणम् — ङ.

[8] 'सामान्यतो दृष्टेनेति' इति नास्ति — ङ.

स्थान्यन्तरमिति। **रूपसहचारिणस्त्विति**। रूपव्यापकस्येत्यर्थः। 'अनन्यथासिद्ध' इत्यनेनानुमानस्याभ्रान्तत्वमुक्तम्। **स्पर्शप्रबन्ध इति**। यथा रथचक्रादे रूपप्रबन्धग्रहणात् स्पर्शप्रबन्धस्यानेकदिक्कस्य हस्तेन [1]युगपद्ग्रहणमुत्पद्यते, न तद्वदलातचक्रस्य तद् भवति, विच्छिद्य विच्छिद्य [2]तद्ग्रहणात्। तस्माद्व्यापकस्य स्पर्शस्याभावाद्व्याप्यस्य रूपस्याभावोऽनुमीयत इति रूपप्रतीतिर्भ्रान्तिरेव तत्रेति भावः। ननु भूयोदर्शनसंस्कारसहितेनेन्द्रियेण सर्वोपसंहारिणी व्याप्तिर्गम्यते। तथा चाहुः — 'भूयोदर्शनगम्या [तु] व्याप्तिः सामान्यधर्मयोः' इति, इति[3] 'सकृत्कृतोऽभिसंबन्धः' इत्ययुक्तम्। सत्यम्, न त्वयं नियमो भूयोदर्शनेनैव संबन्धग्रहणमिति, सकृदपि [4]धूमधूमध्वजौ दृष्ट्वा चक्षुषैव गृह्यते संबद्धाविमाविति। भूयोदर्शनं [5]तूपाधिविरहनिश्चयायानुज्ञायत इत्याह — [6]**न भूयोदर्शनेनैवेति**। ततश्च स्थान्यादेशयोरन्यत्र तुल्यधर्मत्वावगमादत्रादेशयोः शतृशानचोरप्रथमासमानाधिकरणत्वदर्शनात् स्थानिनोऽपि लटः प्रक्रियार्थं विहितस्य तदनुमानात् काल्पनिकमप्रथमासामानाधिकरण्यमत्रोपपद्यत इति स्थितम्। ननु सामान्ये व्याप्तिग्रहणं प्रदर्शयितुं वृक्षपर्णयोरुदाहृतत्वाज्जातिपरत्वादेकवद्भावेनात्र भाव्यमित्यत आह — **भाष्यकारेति**। ननु भाष्योपक्षिप्तयोः पक्षयोः पर्युदासपक्षस्यैव युक्तत्वात् प्रश्नानुपपत्तिरित्याशङ्क्य परिहरति — **यद्यपीति**। **शास्त्रे क्वचिदिति**। [7]'सुडनपुंसकस्य' इत्यादौ। ननु कुर्वतो देवदत्तस्यापत्यं, कुर्वतो देवदत्तस्य भक्तिरित्यप्रथमान्तेन सामानाधिकरण्यात् पर्युदासपक्षेऽपि न दोष इत्यत आह — **कुर्वतो देवदत्तस्येति**। **पदान्तरनिरपेक्षत्व इति**। कुर्वतोऽपत्यमिति [8]सामान्यमपेक्ष्यते न विशेष इति पूर्वोक्तदोषाभाव इत्यभ्युपगम इत्यर्थः। **आदेशाप्रसङ्ग इति**। प्रसज्यप्रतिषेधे तु प्रथमान्तेन सामानाधिकरण्याभावान्निषेधाप्रवृत्तावादेशसिद्धिरिति भावः। **समानाधिकरणसमासे त्विति**। कुर्वती भक्तिः कुर्वद्भक्तिरित्याश्रयणे प्रथमान्तेन सामानाधिकरण्यात् प्रतिषेधः स्यादित्यर्थः। **पूर्वस्मिन्नपीति**। पक्षद्वयसाधारणोऽयं दोषो [9]भाष्ये उक्तः, न प्रसज्यप्रतिषेधपक्ष एवेत्यर्थः। **लक्षणशेष इति**। न त्वप्रथमासमानाधिकरण इत्यपनीय प्रत्ययोत्तरपदयोरिति वक्तव्यम्, कथं तर्हि, आवापः कर्तव्य इति। अत एव चशब्दः पठित इत्यर्थः। ननूत्तरपदग्रहणं न कर्तव्यम्, तत्राप्यन्तर्वर्तिन्या विभक्त्या प्रत्ययपरत्वादित्यत आह — **पृथगुत्तरपदग्रहणमिति**। ननूत्तरपदस्य सुबन्तनिमित्तत्वमसिद्धमित्याशङ्क्य तद्व्युत्पादनायाह — **सत्युत्तरपद इति**। 'तिङादेशात् सुबुत्पत्तिः' इति विप्रतिषेधपाठस्यात्रासंगतिं परिहरति — **उत्तरपद इति**। ननु 'पचतितराम्' इत्यादौ शत्रादौ सति [10]'तिङश्च' इत्येतन्निरवकाशं स्यादिति, नेत्याह — **तिङश्चेत्येतत्त्विति**। पचतीत्यादौ शत्रादिप्राप्तिमुपपादयति — **अत्रापीति**। 'तदेतत्' इत्यादि सिद्धान्तवादिनो वचनम्। उक्तव्यवस्थितविभाषाविज्ञानस्य फलमाह — **व्यवस्थितेति**। **नित्ययोरिति**। पचन्तं देवदत्तं पश्येत्यादौ। कथं पुनरेकेन वाक्येन नित्यविकल्पयोरुभयोरर्थयोः प्रतिपादनमुपपद्यत इत्यत आह — **लटः शतृशानचाविति**। **इति तदर्थ इति**। वचनेन प्रतिपादने शास्त्रैकशरणानां मन्दमतीनां विस्पष्टा प्रतीतिर्भवतीत्येवमर्थोऽप्रथमासमानाधिकरण इतीत्यर्थः॥

---

[1] युगपद्ग्रहणमुपपद्यते — ङ.

[2] तद्ग्रहात् — ङ.

[3] इतिशब्दो नास्ति — ङ.

[4] धूमवह्नी इत्यर्थः।

[5] तुशब्दो नास्ति — ङ.

[6] प्रदीपे 'न भूयोदर्शनेन संबद्धग्रहणम्' इत्यत्र न' भूयोदर्शनेनैव संबन्धग्रहणम्' इति निर्णयसागरमुद्रिते पाठः।

[7] पा. सू. १.१.४३.

[8] सामान्यमपेक्षते — ङ.

[9] भाष्योक्तः — ङ.

[10] पा. सू. ५.३.५६.

लक्षणहेत्वोः क्रियायाः ३.२.१२६.

[३, २९२–२९४]

(उद्द्योतनम्) 'तिष्ठन् मूत्रयति' इत्यत्र मूत्रणं न गुणः, अत आह — **गुणशब्देनेति**। [1]क्रिया-विशेषणत्वात् साधनमपि गुणः। कारकलक्षणे सूत्रेणाप्राप्तेर्वचनसाफल्यमित्याह — **तिष्ठन्निति**। स्थानादेः कारकलक्षकत्वमदृष्टचरम्, अत आह — **बहुष्विति**। [2]**अशौचादिरिति**। गुणप्रतियो-गिकाभावोऽप्युपचाराद् गुणः। वस्तुतः शौचविरोध्यशौचमपि गुण एव। गुणशब्दव्याख्यानुरोधेन 'कर्तुश्च' [3]इत्यस्य प्रयोजनमाह — [4]**यदेति**। तत्त्वाख्यानादिलक्षणं प्रपञ्चेऽसंभावितम्, अत आह — **स्वभावेति**। ननु लक्ष्यलक्षणभावोऽपि स्वभाव एवेति वचनं व्यर्थम्, अत आह — **विनेति**। उक्तमर्थमुदाहरणे[5] योजयति — **न हीति**। नेदमपूर्ववचनमित्याह — **वाग्रहणस्येति**। [6]'नन्वोर्विभाषा' इत्यतोऽनुवृत्त[7]वाग्रहणस्येत्यर्थः। 'सदादयश्च' इत्यनेनैव सिद्धेः 'इङ्जुहोत्योः' इति व्यर्थम्, अत आह[8] — **सच्छब्द इति**। [8]**सत्सदृशाः** विद्यमानार्थकाः, आदिशब्दः प्रकारे, प्रकारश्च सादृश्यमित्यर्थः। **इत्याह** इत्यभिप्रेत्याह। माङि लटोऽभावात् कथमादेशः, अत आह — **लुङीति**। ननु तिष्ठतिक्रिया देवदत्तस्याशौचस्य वा लक्षणम्, न मूत्रक्रियाया इत्युक्तम्, अत आह — **स्थितिक्रियेति**। स्थितिक्रियया लक्षितमूत्रक्रियैव तल्लक्षणम्, न स्थिति[9]क्रियैवेत्यर्थः। नन्वासनक्रियालक्षिताध्ययनक्रिया चैत्रस्य लक्षणमस्तु, अत आह — **समुच्चीयमानमिति**। चकारेण क्रियाद्वयस्य समुच्चय एव प्रतीयते, न तु लक्ष्यलक्षणभाव इत्यर्थः। स्वभावाख्यानमेतत्, न लक्ष-णम्, अत आह — **तत्त्वेति**॥

[३, २९२–२९४]

(नारायणीयम्) ननु 'तिष्ठन् मूत्रयति' इत्यादौ सूत्रेणैव सिद्धत्वात् किमुपसंख्यानेनेत्याशङ्क्य तत्प्रयोजनं वक्तुं गुणशब्दार्थं तावदाह — **गुणशब्देनात्र साधनमिति**। क्रियां प्रति कारकाणां गुणत्वात्। कारकस्य [10]लक्ष्यत्वं स्फोरयति — **बहुष्विति**। [11]**अशौचादिरिति**। यदा बहुषु तिष्ठत्सु कोऽत्राशुचिरिति पृष्टे 'यस्तिष्ठन् मूत्रयति' इत्युच्यते तदा अशुचित्वलक्षणस्य गुणस्य लक्ष्यत्वात् क्रियालक्षणाभावात् [12]सूत्रेणासिद्धौ वचनमित्यर्थः। 'कर्तुश्च' इत्यस्य पूर्ववार्तिकेन गतार्थत्वमा-शङ्क्याह — **यदेति**। [13]लक्ष्यलक्षणभावाभावमेव दर्शयति — **न हीति**। ननु [14]'लटः शतृशानचौ'

---

[1] क्रियाविशेषत्वात् — अ.

[2] प्रदीपे 'अशौचादिगुणः' इत्यत्र 'अशौचादि-र्गुणः' इति पाठोऽभिमत इति भाति॥ आशौचादिरिति — ऋ.

[3] इत्यत्र — अ.

[4] यथेति — अ.

[5] उदाहरणेषु योजयति — ऋ.

[6] पा. सू. ३.२.१२१.

[7] वार्थकविभाषाग्रहणस्येति भावः।

[8] प्रदीपे 'तत्सदृशाः' इत्यत्र 'सत्सदृशाः' इति निर्णयसागरमुद्रिते पाठः। सोऽन्नंभट्टस्वीकृतः॥ सच्छब्दाः — अ.

[9] क्रियेत्यर्थः — अ.

[10] लक्षणं स्फोरयति — घ.

[11] प्रदीपे 'अशौचादिगुणः' इत्यत्र 'अशौचादि-र्गुणः' इति पाठोऽभिमत इति भाति॥ आशौचादिरिति — ङ.

[12] सूत्रेण सिद्धौ — घ, ङ.

[13] लक्ष्यलक्षणभावमेव दर्शयति — घ, ङ.

[14] पा. सू. ३.२.१२४.

इति योगविभागेन तत्र च विभाषाग्रहणानुवर्तनेन विकल्पेन सदादिषु शतृशानचौ सिद्धाविति किं वचनेनेत्यत आह — **वाग्रहणस्येति** । ननु 'सदादयश्च' इत्यादिशब्देनेङ्जुहोत्योरपि संग्रहः सिद्ध इति, नेत्याह — **सच्छब्द इति** । ननु माङ्युपपदे [1]'माङि लुङ्' इति लुङा भाव्यम्, न तु लडिति कथं तत्र शतृशानचोर्विधानमित्यत आह — **लुङि प्राप्त इति** । ननु देवदत्तस्य [2]तद्गतस्याशुचित्वस्य वा यदा लक्षणं तदा सूत्रेणासिद्धिरुक्तेति किंभूतोऽयं परिहारः 'तिष्ठतिक्रिया मूत्रयतिक्रियाया लक्षणम्' इति, तत्राह — **स्थितिक्रियालक्षिता त्विति** । **समुच्चीयमानमिति** । समुच्चीयमानत्वात् परस्परस्यालक्षणं सत् कर्तृविशेषस्य देवदत्तादेरेव लक्षणमिति योजना । **तत्त्वाख्यानमपीति** । लक्षणशब्देनात्र तन्त्रावृत्त्यादिन्यायाश्रयेणार्थद्वयमपि विवक्षितमित्यर्थः ॥

तौ सत् ३.२.१२७.

[३, २९४–२९७]

(उद्द्योतनम्) प्रत्ययविधिरिति । धातुमात्रात् सदिति प्रत्ययविधिरित्यर्थः । भाष्ये **प्रकृताविति** । अतस्तदनुवृत्तिसामर्थ्यात् [3]संज्ञैवेयम्, न प्रत्ययविधिरिति भावः । ननु 'तौ' इति [4]वर्तमानार्थकयोरेव परामर्शात् कथमसंसर्गसिद्धिः, अत आह — **तच्छब्देनेति** । स्वरूपमात्रपरामर्शार्थमेव 'तौ' इत्युक्तेरिति भावः । ननु [5]'लृटः सद्वा' इति भविष्यति सदस्ति, न तु भूते, अत आह— **वर्तमानेति** । [6]**भवत इति** । तयोः सिद्धौ सत्संज्ञापि सिद्धा । लृटस्तु [7]सत्संज्ञयैव [8]'विधीयेते ताविति भूतभविष्यतोः सत्संज्ञाविधानं व्यर्थमित्यर्थः । वर्तमानाधिकारविहितत्वात् संज्ञाया अप्यतिदेशमाशङ्क्य प्रत्ययस्यैवातिदेशो हेत्वन्तरमाह — **प्रत्ययेति** । [9]सत्संज्ञया विधानेऽपि संज्ञाविधिर्न लभ्यत इत्याह — **तयेति** । सिंहाकारपिष्टकरणे तद्वाक्यस्य तात्पर्यम्, न तु तस्मिन् सिंहसंज्ञायामपि, तथात्रापि सत्शब्दस्य सादृश्यपरत्वात् तत्सदृशौ शतृशानचौ [10]स्ताम्, न तु तयोः संज्ञासिद्धिः [11]सिंहवद् विशिष्टयोरेव [12]तत्संज्ञत्वात् भविष्यति च[13] [14]वर्तमानत्वविशिष्टयोरसंभवात् । स्वरूपसंज्ञायां तु [15]संज्ञिस्वरूपस्य लृडादेशेऽपि सत्त्वात् संज्ञासिद्धिरिति भावः । पूर्वोक्तं तौग्रहणप्रयोजनमाशङ्क्य निषेधति — **यद्यपीति** । 'तौ' इत्युक्ते योगविभागसंभवात् 'शब्दतः' इत्यधिकम्, अत आह — **शब्देनैवेति** । 'शब्दतः' इत्याद्यादित्वात् [16]तृतीयान्तात् तसिरिति भावः । प्रत्ययान्तरत्वनिरासाय 'परस्य प्रत्ययस्य' इति भाष्यम् । तत्र हेतुमाह — **पूर्वसूत्र इति** । इह प्रत्ययग्रहणमनुवर्तमानमर्थपरम्, तत्सामर्थ्यात् [17]षष्ठ्यैव विपरिणम्यत इति भावः । तृजादिकं

---

[1] पा. सू. ३.३.१७५.
[2] तद्गतस्य शुचित्वस्य वा — ङ.
[3] संज्ञेयम् — अ.
[4] वर्तमानार्थयोरेव — अ.
[5] पा. सू. ३.३.१४.
[6] अत्र 'भविष्यत इति' इति प्रतीको युक्तो भाति ।
[7] सत्संज्ञैव — अ.
[8] विधीयत इति तौ भूतभविष्यतोः — अ, ऋ, लृ.
[9] सत्संज्ञाया विधानेऽपि — अ.
[10] स्तः — अ.
[11] सिंहतद्विशिष्टयोरेव — अ.
[12] तत्संज्ञात्वात् — ऋ.
[13] चशब्दो नास्ति — अ.
[14] वर्तमानविशिष्टयोः — अ.
[15] संज्ञास्वरूपस्य — ऋ.
[16] 'तृतीयान्तात्' इति नास्ति — अ.
[17] षष्ठ्येव — ऋ.

विहाय ण्वुलुदाहरणस्य तात्पर्यमाह — **तृजादीनामिति**। **लोपविधानसामर्थ्यात्** न भविष्यतीत्यनुषङ्गः। **तद्धित इति**। [1]'क्रमादिभ्यो वुन्' क्रमकः, [2]'सायमादिभ्यष्ट्युटुलौ' सायंतनम्। 'वा भवतः' इत्युक्ते नित्यत्वं कथं लभ्यते, अत आह — **कथमिति**। आनत्वेन [3]द्वयोरेकीकरणाद् द्विवचनोपपत्तिरित्याशयेनाह — **इङित्यादि**। [4]संशयबीजमाह — **तत्रेति**। वासरूपेण प्रयोगद्वयसंभवाद् वावचनानर्थक्यम्, अत आह — **लादेशेष्विति**। नन्वनादेशत्वे[5]ऽपि [6]'कर्तरि कृत्' इति कर्त्रभिधानमिष्टम्, अत आह — **अनिष्टस्यापीति**। भावकर्मणोरपीत्यर्थः। ननु चित्करणसामर्थ्यात् लसार्वधातुकस्वरो [7]बाध्यते, अत आह — **चित्करणमिति**। 'निघ्नानाः' इत्यत्रादुपदेशात् परत्वाभावाल्लसार्वधातुकानुदात्तत्वाप्राप्तेः [8]'पचमानाः' इत्यादौ परत्वाच्चित्स्वरमनुदात्तत्वं बाधत इत्यर्थः। उपग्रहशब्दोऽत्रात्मनेपदसंज्ञापर इत्याह — **आत्मनेपदेति**। **अन्यथा** संज्ञाया अनिषेधे ॥

[३, २९४–२९७]

(नारायणीयम्) प्रत्ययविधिरिति। धातुमात्रात् सदित्ययं प्रत्ययः स्यात्। **न त्विति**। संज्ञाया अप्रस्तुतत्वात्। कथं पुनस्तौग्रहणे सत्यसंसक्तयोः संज्ञा सिध्येदित्यत आह — **तच्छब्देनेति**। विशेषशब्दार्थमाह — **लट्स्थानिकत्वादिधर्मेति**। आदिशब्देन वर्तमानकालत्वं संगृह्यते। **अस्वरितत्वादिति**। शास्त्रीयोऽधिकारो[9] निवर्त्यते, 'अनपेक्षणात्' इति लौकिकः। ननु [10]'वर्तमानवत्' इत्यनेन वर्तमानाधिकारे विधानात् संज्ञाया [11]अप्यतिदेशः स्यादिति, नेत्याह — **प्रत्ययाधिकाराद्धीति**। **सत्संज्ञकप्रतिरूपकेति**। सत्संज्ञकसदृशयोरेव, न तु सत्संज्ञासहितयोर्विधानं स्यात्। **तदाकाराः क्रियन्त इति**। [12]सिंहाकारत्वमेव तेषाम्, न तु सिंहत्वजातियोगः। तत्र को दोष इति चेदाह — **विहितयोस्त्विति**। ननु तौग्रहणसामर्थ्यादेतैर्धर्मैः संसक्तयोः संज्ञा सिध्यत्येवेत्याशङ्क्य परिहरति — **यद्यप्यनुवृत्त्येति**। 'शब्दतः' इत्याद्यादित्वात् तृतीयान्तात् तसिरिति व्याचष्टे — **शब्देनैवेति**। ननु प्रत्ययाधिकारात् 'तौ' इत्यनेन प्रत्ययविधानमेव स्यात्, न त्वादेशविधानमिति चेदाह — **पूर्वसूत्र इति**। ततश्च प्रत्ययग्रहणमनुवर्तमानं [13]'तस्मादित्युत्तरस्य' इति वचनात् षष्ठ्यन्तं संपद्यत इति भावः। ननु धात्वधिकारविहितानां तव्यादीनामप्यादेशप्रसङ्गात्ताननतिक्रम्य कस्माण्ण्वुलुदाहृत इत्याशङ्क्य तत्राशयमाविष्करोति — **तृजादीनामिति**। **तस्य तदादेशेति**। ततश्च 'कारकः, नन्दनः' इत्यादौ [14]'युवोरनाकौ' [15]'इत्यकानयोरपवादौ शतृशानचौ प्रसजतः। **कथमिति चेदिति**। [16]'लृटः सद्वा' इति योगविभागेन कथमप्रथमासमानाधिकरणे नित्यं शतृशानचोर्विधानं स्यादिति प्रश्नः। 'अप्रथमासमानाधिकरणादीन्' इत्यादिशब्देन संबोधनादिः संगृह्यते। **लट**

---

[1] पा. सू. ४.२.६१.
[2] सायंचिरंप्राह्णेप्रगेऽव्ययेभ्य इत्यर्थः।
[3] शानन्चानशोरित्यर्थः।
[4] संशये बीजमाह — ङ.
[5] आदेशत्वाभावेऽपीत्यर्थः।
[6] पा. सू. ३.४.६७.
[7] बाध्येत — अ.
[8] पवमाना इत्यादौ — ङ.
[9] 'अधिकारः' इत्यस्यानन्तरम् 'अयम्' इत्यधिकम् — ङ.
[10] पा. सू. ३.३.१३१.
[11] अपिशब्दो नास्ति — ङ.
[12] तदाकारकत्वमेव तेषाम् — ङ.
[13] पा. सू. १.१.६७.
[14] पा. सू. ७.१.१.
[15] इत्यत्रानयोः — घ.
[16] पा. सू. ३.३.१४.

इवेति । यथा [1]'लटः शतृशानचौ' इत्यत्र विभाषाग्रहणमनुवर्त्य प्रथमासमानाधिकरणे विकल्प उक्तः, तथा [2]लृटोऽपीत्यर्थः। 'शत्रानौ' इत्यानशब्देन [3]शानन्चानशोरुत्सृष्टानुबन्धयोर्ग्रहणमित्याह — **पूङ्यजोरिति** । [4]भाष्ये शतुः [5]पूर्वमुक्तत्वाद्व्यत्यासेन सूत्रोपन्यासः। ननु वासरूपविधिनैव विकल्पे सिद्धे किमर्थं वावचनमित्यत्राह — **लादेशेष्विति** । ननु साधनस्यैव शानन्नादिभिरभिधानमिति [6]कथमयं दोष इत्यत आह — **अनिष्टस्यापीति** । एतद्दर्शितं भाष्ये 'भावकर्मणोरपि [7]प्राप्नुतः' इति । ननु लसार्वधातुकानुदात्तत्वे चानशश्चित्करणं निरवकाशं स्यादिति, नेत्याह — **चित्करणं त्विति** । उपग्रहशब्देन पूर्वाचार्यप्रसिद्धयात्मनेपदसंज्ञोच्यत इत्याह — **आत्मनेपदेति** । **अन्यथेति** । प्रतिषेधाभावे लादेशत्वात् [8]'तङानौ' इत्यात्मनेपदसंज्ञायां [9]शानजिव चानश् परस्मैपदिभ्यो न स्यात् । [10]शतृशानन्नोऽस्तु धातुविशेषे विधानान्न दोष इत्यर्थः ॥

तृन् ३.२.१३५.

[३, २९८–२९९]

(उद्द्योतनम्) तच्छीलादौ सूत्रेणैव सिद्धेर्वचनानर्थक्यम्, अत आह — **अताच्छील्येति** । तृनभावे कथं प्रशास्ता, अत आह — **तृजेवेति** । तर्हि 'प्रशासिता' इति स्यात्, अत आह — **तृंस्तृचाविति** । तृन्तृचोः को विशेषः, अत आह — **स्वर इति** । ननु गतिसमासोऽयम्, तत्राव्ययपूर्वपदप्रकृतिस्वर उभयत्रापीति कथं स्वरे विशेषः, अत आह — [11]**तृनि सतीति** । **कृत्स्वरः** [12]'गतिकारकोपपदात् कृत्' इति कृदुत्तरपदप्रकृतिस्वरः। अवश्यं धात्वन्तरमेषितव्यमित्याह — **नयतेस्त्विति** । लघूपधत्वाभावादित्यर्थः। तर्हि 'नेषिता' इति स्यात्, अत आह — **नेषतेस्त्विति** । **वक्ष्यमाणात्** 'त्विषेर्देवतायाम्' इति वार्तिके। [13]स्वस्थानानन्वये विनिगमनाविरहात् सर्वत्रान्वय इत्यभिप्रेत्याह — **त्विषेरिति** ॥

[३, २९८–२९९]

(नारायणीयम्) ननु सूत्रेणैव सिद्धे किमुपसंख्यानेनेत्यत आह — **अताच्छील्येति** । ननु तृनभावे कथं 'प्रशास्ता' इति भवेदित्यत्राह — **तृजेवेति** । नन्वेवं 'प्रशासिता' इतीट् स्यादित्यत्राह — **तृंस्तृचाविति** । तेनैतदुक्तं भवति — [14]अस्यैव विषयविभागस्य प्रदर्शनार्थं वार्तिकम् — अनुपसर्गेभ्यस्तृन्, सोपसर्गेभ्यस्तृजिति । कथं पुनः स्वरभेदः, यावता तृनि तृचि च गतिसमासेऽव्य-

---

[1] पा. सू. ३.२.१२४.

[2] लुटोऽपीत्यर्थः — घ.

[3] शानच्चानशोः — घ, ङ.

[4] 'भाष्ये शतुः' इत्यादि 'सूत्रोपन्यासः' इत्यन्तं नास्ति — घ.

[5] पूर्वमुक्तत्वाद्व्यासेन — ङ.

[6] कथमर्थदोषः — ङ.

[7] प्राप्नोतीति — घ, ङ.

[8] पा. सू. १.४.१००.

[9] शानज्वच्चानश् — ङ.

[10] शतृशानचोऽस्तु — ङ.

[11] प्रदीपे 'तृनि तादौ' इति पाठ उपलभ्यते। 'तृनि सति तादौ' इति पाठोऽन्नंभट्टस्येति ज्ञायते।

[12] पा. सू. ६.२.१३९.

[13] स्वस्थानान्वयेन — अ.

[14] तस्यैव विषयविभागप्रदर्शनार्थम् — ङ.

यपूर्वपदप्रकृतिस्वरेण भाव्यमिति, नेत्याह — **तृनीति**। [1]**तृचि तु कृत्स्वर इति**। अव्ययपूर्वपदप्रकृतिस्वरमपवादत्वाद् बाधित्वा कृत्स्वर एव भवति। अवश्यं धात्वन्तरमेवाश्रयणीयमित्याह — **नयतेस्त्विति**। षुकः पूर्वान्तत्वादिगन्तत्वाभावात्। नन्वनन्तरेणैव संबन्धस्य युक्तत्वात् कथं सर्वशेषत्वमुच्यत इत्यत आह — **त्विषेरिति**॥

ग्लाजिस्थश्च क्स्नुः ३.२.१३९.

[३, २९९–३००]

(उद्द्योतनम्) ननु [2]'खरि च' इति [3]चर्त्वभूतगकारनिर्देशसंभवात् कथं कित्त्वनिश्चयः, अत आह — **क्स्नुरिति**। कितो गित्त्वं कथं क्रियते। तथा सति 'ग्स्नुः' इति निर्देशः स्यात्, अत आह — **गकारस्येति**। 'ककारे' इत्यस्य स्थानित्वशङ्कां निराह — **परभूत इति**। गकारप्रक्षेपे मानमाह — **एतच्चेति**। भाष्ये **उत्वमिति**। 'श्रयुको क्किति' निर्देशः प्राप्नोतीत्यर्थः। असिद्धत्वहेतोरभावः 'सौत्रः' इत्यनेनाभिप्रेत इत्याह — **तेनेति**। **संहितायामिति**। [4]"संहितैकपदे नित्या नित्या धातूपसर्गयोः। समासेऽपि तथा वाक्ये सा विवक्षामपेक्षते' इत्यसंहिता भवतीति भावः॥

[३, २९९–३००]

(नारायणीयम्) परभूत इति। [5]'क्ङिति च' इत्यत्र द्वौ ककारौ। तत्र [6]पूर्वो गकारस्य चर्त्वेन निर्दिष्ट इति भाष्यार्थः। अत्र किं प्रमाणमित्यत्राह — **एतच्चेति**। ननु सूत्रेऽपि लक्षणानुसारेणैव [7]निर्देशः कार्यः, सत्यम्, सूत्राणां छन्दोवद्भावात् छन्दसि च सर्वविधीनां [8]विकल्पाभ्युपगमाच्चर्त्वस्यासिद्धत्वाभावादुत्वाभावः सिद्ध इत्याह — **तेनेति**॥

शमित्यष्टाभ्यो घिनुण् ३.२.१४१.

[३, ३०१]

(उद्द्योतनम्) उकारस्योच्चारणार्थत्वसंभवात्[9] तत्त्यागे किं बीजम्, अत आह — **उकारे हीति**। कार्यार्थत्वे संभवति केवलोच्चारणार्थस्यायुक्तत्वादिति भावः। **स्थितमिति**। एतेन [10]'उकार

---

[1] प्रदीपे 'तृचि कृत्स्वरः' इत्यत्र 'तृचि तु कृत्स्वरः' इति पाठोऽभिमतः।

[2] पा. सू. ८.४.५५.

[3] चर्त्वे भूतगकार — अ.

[4] इदं हरिणोक्तमिति 'अइउण्' सूत्रे बालमनोरमायां दृश्यते। पूनामुद्रिते वाक्यपदीये तु न दृश्यते।

[5] पा. सू. १.१.५.

[6] पूर्वगकारस्य — ङ.

[7] निवेशः — ङ.

[8] विकल्पाभ्युपगमाच्चर्त्वस्यासिद्धत्वाभावः सिद्धः — ङ.

[9] उच्चारणार्थत्वासंभवात् — ऋ.

[10] 'उकार उच्चारणार्थः' इत्येतस्य सूत्रस्य व्याख्याने काशिकायामुक्तम्। तदाशयो विवृतो न्यासे शमिनितरेत्यादि।

उच्चारणार्थः, शमिनितरेति नित्यमेव ह्रस्वत्वम्' इति काशिका भाष्यविरुद्धा नोपादेयेत्युक्तम् ॥

[३, ३०१]

(नारायणीयम्) ननु घिनुण्यपि सत्युकारस्योच्चारणार्थत्वात् कथं दोषः [1]स्यादित्यत आह — **उकारे हीति**। **विकल्पेनेति**। [2]'उगितश्च' इत्यनेन। **न तु नित्यमिति**। [3]'घरूपकल्प' इत्यनेन ॥

निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ३.२.१४६.

[३, ३०१–३०२]

(उद्द्योतनम्) भाष्ये **स एवेति**। एकाचां धातूनां ञ्निति प्रकृतेराद्युदात्तत्वम्, ल्रिति [4]पूर्वस्योदात्तत्वमप्येकस्यैवेति न विशेष इत्यर्थः। अनेकाचि स्वरभेदोऽस्तीत्याह — **वुञ्मिति** भाष्यम्। तत्रैकस्मिन् बहुवचनं संगमयति — **जाताविति**। [5]'जात्याख्यायाम्' इत्यनेन। **एकस्यैवेति**। इतरेषां ण्यन्तानां णिलोपे एकाच्त्वात् ॥

[३, ३०१–३०२]

(नारायणीयम्) **जातौ बहुवचनमिति**। [6]'जात्याख्यायामेकस्मिन्' इत्यनेन। **असूयशब्दस्येति**। असूयशब्दः कण्ड्वादियगन्तः। [तत्र ण्वुलि] प्रत्ययात् पूर्वमुदात्तं स्यात्, वुञि त्वादेरुदात्तत्वं भवति। कथं पुनस्तृजादिप्रतिषेधो ज्ञाप्यत इत्यत्राह — **प्रत्ययसामान्येति** ॥

जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ३.२.१५०.

[३, ३०२–३०३]

(उद्द्योतनम्) वृत्तिकारमतं निषेधति — **न चेति**। [7]'अनुदात्तेतश्च' इत्यत्र पूर्वसूत्रादकर्मकादित्यनुवृत्तेः सकर्मकात्तेन न[8] प्राप्नोतीति भावः। **अनभिधानादिति**। इदमपि सूत्रमकर्मकविषयमेव। अनभिधाने च 'अनुदात्तेतश्च हलादेरित्येव' इत्यादिभाष्यमेव प्रमाणमिति भावः ॥

---

[1] स्यादित्यत्राह — ङ.
[2] पा. सू. ६.३.४५.
[3] पा. सू. ६.३.४३.
[4] पूर्वस्याद्युदात्तत्वमस्यैकस्यैवेति — अ.
[5] पा. सू. १.२.५८.
[6] पा. सू. १.२.५८.
[7] पा. सू. ३.२.१४९.
[8] 'न' इति नास्ति — अ.

[३, ३०२–३०३]

(नारायणीयम्) नन्वकर्मकाद्युज् विधीयते, सकर्मकार्थं त्वत्र पदिग्रहणं स्यादिति, नेत्याह — **न चेति** ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ३.२.१५८.

[३, ३०३–३०४]

(उद्द्योतनम्) ननु [१]'अतो दीर्घो यञि' इत्यत्र [२]'भूसूवोस्तिङि' इत्यतस्तिङीत्यनुवर्तते। कथं लुशि तेन दीर्घः, अत आह — **तुरुस्त्वति**। **तत्र** [३]'अतो दीर्घो यञि' इत्यत्र। **न त्विति**। व्यवहितत्वात्। लुशा रूपासिद्धिं शङ्कते — **नन्विति**। **लकारस्येति**। [४]'लशक्वतद्धिते' इत्यनेन। [५]**श्रद्दधुरिति**। [६]'जुहोत्यादिभ्यः श्लुः' [७]'श्लौ' इति द्विर्वचनम्। **लुप्तनिर्दिष्ट इति**। लकारात् पूर्वं यो निर्दिष्टस्तस्य [८]'लोपो व्योर्वलि' इति लोप इत्यर्थः। **प्रयोजनेति**। यथा काम्यचः ककारस्य, तथेत्यर्थः। स्वरभेदं प्रयोजनमाशङ्क्याह — **न हीति**। लिति धकाराकारस्योदात्तत्वम्, आलुचि प्रत्ययाद्युदात्तत्वे तेन सहैकादेशे धकाराकारस्योदात्तत्वमिति विशेषाभावः। नन्वालुचि [९]'चितः' इत्यन्तोदात्तत्वेन भाव्यमिति कथं स्वरभेदाभावः। अत्राहुः — श्रद्धालुरित्यत्र धकाराकारस्यैवोदात्तत्वमिष्यत इत्यालुचश्चकारो व्यर्थ एवेति। अत एव 'प्रत्ययस्वरयोः' इत्युक्तम्। **धेट इति**। तस्य भौवादिकत्वेन द्विर्वचनाभावात्। [१०]लुशि धेट आत्वाभावं शङ्कते — **नन्विति**। **एवं तर्हीति**। [११]आकारप्रश्लेषेऽकारे [१२]परतो धेट आत्वं कृत्वा सवर्णदीर्घे श्रद्धालुरिति निर्देश उपपन्न इत्यर्थः। यद्यपि लुशा [१३]आदिशित्त्वाभावादेशीवात्वं भविष्यति, [१४]तथापि शपि प्रतिषेधपक्षेऽयं प्रकार उक्तः। क्लिष्टकल्पनानिरासायाह — **अथवेति**। [१५]'श्लौ' इति द्विर्वचनं श्लुसंज्ञापूर्वकम् ॥

[३, ३०३–३०४]

(नारायणीयम्) केचित् [१६]'भूसुवोस्तिङि' इत्यतो दीर्घविधौ तिङीत्यनुवर्तयन्ति। तन्मतेऽत्र[१७] दीर्घेण न भाव्यमिति भाष्यकारस्य तदननुवृत्तिरेवाभिमतेत्याह — **तुरुस्तुशम्यम इति**। **ननु लुशि सतीति**। लकारस्य प्रत्ययादित्वात्। [१८]**श्रद्धालुरिति**। श्रत्पूर्वाद्धाधातोर्लुशि सति तस्य सार्व-

---

[१] पा. सू. ७.३.१०१.
[२] पा. सू. ७.३.८८.
[३] पा सू. ७.३.१०१.
[४] पा. सू. १.३.८.
[५] श्रद्दधालुरिति — ऋ, लृ.
[६] पा. सू. २.४.७५.
[७] पा. सू. ६.१.१०.
[८] पा. सू. ६.१.६६.
[९] पा. सू. ६.१.१६३.
[१०] लुकि — अ.
[११] अकारप्रश्लेषे — अ.
[१२] शबकार इत्यर्थः।
[१३] आदिशित्त्वाभावादात्वं — ऋ.
[१४] तथाप्यशितीति प्रतिषेधपक्षे — ऋ, लृ.
[१५] पा. सू. ६.१.१०.
[१६] पा. सू. ७.३.८८.
[१७] 'अत्र' इति नास्ति — ङ.
[१८] श्रद्दधुरिति — ङ.

धातुकत्वात् कर्तृवाचित्वाच्च शपि श्लौ च द्विर्वचनादिषु कृतेषु [1]लकारस्येत्संज्ञकत्वाल्लुप्तत्वादुकारे प्रत्यये परतः [2]'श्नाभ्यस्तयोः' इत्याकारलोपे 'श्रद्धुः' इति स्यात्, न तु 'श्रद्धालुः' इतीष्टं रूपं सिध्येत् ।[*] **लुप्तनिर्दिष्ट इति** । पूर्वं निर्दिष्टः पश्चात् [3]'लोपो व्योर्वलि' इति लुप्त इति व्याख्यानाल्लकारस्येत्संज्ञा न भविष्यति । **उभयत्रेति** । स्पृहय उश् इति स्थिते यदि लित्स्वरेण यशब्दाकार उदात्तः, अथ प्रत्ययस्वरेणोकारः, उभयथा गुणे कृते ओकार उदात्त इति प्रयोजनाभावाल्लकारस्येत्संज्ञा न भविष्यतीत्यर्थः । **धेटो भविष्यतीति** । धेट आत्वं कृत्वा सूत्रे निर्देशः क्रियते, तस्य भौवादिकत्वात् शपः श्लुर्नास्तीति [4]श्रद्धालुशब्दः सिध्यतीति भावः । यदि धेटोऽत्र ग्रहणं तर्हि शपि सति शिदाश्रय आत्वप्रतिषेधः स्यादिति चोदयति — **नन्विति** । **आकारप्रश्लेषादिति** । प्रत्ययसंनियोगेनाकारो विधीयत इति न दोष इत्यर्थः । नन्वेवं धेटो ग्रहणे दोषपरिहारस्य यत्नसाध्यत्वात् प्रतिपत्तिगौरवप्रसङ्गाद् दधातेरेव ग्रहणं युक्तम्, तत्र दोषपरिहारस्य सुकरत्वादित्याशयेनाह — **दधातेरेवेति** । **संज्ञापूर्वक इति** । द्विर्वचनस्य श्लुसंज्ञापूर्वकत्वात् ॥

आदृगमहनजनः किकिनौ लिट् च ३.२.१७१.

[३, ३०४–३०५]

(उद्द्योतनम्) ननु 'ॠकारगुणप्रतिषेधार्थम्' इत्ययुक्तम्, सूत्रे दीर्घाश्रवणात् । न च सवर्णग्रहणम्, तात्परत्वात्, अत आह — **दकार इति** । ननु सवर्णग्रहणं मास्तु, अत आह — **ॠकारगुणेति** । भाष्ये **ततुरिः ... जगुरिरिति** । तॄ गॄ अनयोः [5]'बहुलं छन्दसि' इति ॠत उत् । 'पापतिः' इत्यत्र [6]'नीग्वञ्चु' इत्यभ्यासस्य नीगागमः कथं न स्यात्, अत आह — **निपातनादिति** । 'सासहिं' इति प्रतीकोपादानम्, न तस्य नीक्प्रसङ्गः । ननु किकिनोर्विधिरयम्, न निपातनम्, अत आह — **विधौ त्विति** । ननु वार्तिकमिदम्, न भाष्यम्, अत आह — [7]**तेन हीति** । [8]**लादेशानामिति** । [9]'लः परस्मैपदम्' इति लादेशानां परस्मैपदसंज्ञा, न तु लकारस्य । तेन लिड्वदित्यतिदेशेन परस्मैपदसंज्ञा नातिदिश्यत इत्यर्थः । **भावेति** । [10]'लः कर्मणि' इति लकारस्यैव तत्र विधानादित्यर्थः । **उत्पन्नयोरिति** । लिट्कार्यमतिदिश्यते, प्रत्ययोत्पत्तिश्च [11]न लिट्कार्यमित्यर्थः । तर्हि तयोः कस्मिन्नर्थे उत्पत्तिः, अत आह — **उत्पत्तिश्चेति** । भूतकालस्याप्यतिदेशो नास्तीत्याह — **वर्तमानेति** । तथापि कानच्क्वसू लिडादेशौ किकिनोरपि स्याताम्, अत आह — **स्वरूपाबाधेनेति** । लिटि यत् कार्यं तदतिदिश्यते, न तु लिटो यत् कार्यम्, व्याख्यानादिति भावः ॥

---

[1] 'लकारस्य' इत्यस्यानन्तरम् 'इत्संज्ञकत्वात्' इत्यादि 'प्रयोजनाभावाल्लकारस्य' इत्यन्तं नास्ति — ङ.

[2] पा. सू. ६.४.११२.

[3] पा. सू. ६.१.६६.

[4] श्रद्धाशब्दः — ङ.

[*] पा. सू. ७.१.१०३.

[6] पा. सू. ७.४.८४.

[7] प्रदीपे 'तेनाप्युक्तम्' इत्यत्र 'तेन ह्युक्तम्' इत्यन्नंभट्टपाठ इति भाति ।

[8] आदेशानामिति — अ, ॠ, लृ.

[9] पा. सू. १.४.९९.

[10] पा. सू. ३.४.६९.

[11] 'न' इति नास्ति — अ.

[३, ३०४–३०५]

(नारायणीयम्) किमत्र तकारो जश्त्वेन निर्दिष्टः, दकार एवेति [१]विशये निर्णयार्थमाह — **दकार इति**। दकार एवायम्, स च मुखसुखार्थ इत्यर्थः। **असंदेहार्थो वेति**। 'अर्गम' इति निर्देशे संदेहः स्यात् — किमकाररेफावत्र निर्दिष्टौ, उत अकारऋकारौ, आहोस्विदाकारऋकाराविति। तन्निवृत्त्यर्थं दकारोच्चारणमित्यर्थः। **ऋकारग्रहणं न स्यादिति**। ततश्च 'ततुरिः' इत्यादि न सिध्येत्। ननु 'दृङ आदरे' [२]'दृ गतौ' इत्यादीनां ग्रहणं कुतो नेत्याशङ्क्याह — **किकिनोरिति**। **निपातनादिति**। अन्यथा [३]"नीग्वञ्चुस्रंसु' इत्यादिना यङ्यभ्यासस्य नीक् स्यात्। नन्वेवम् 'अपर आह' इत्यादिनोक्ते विधिपक्षे नीक् स्यादेवेत्यत आह — **विधौ त्विति**। **भाष्यकारवचनप्रामाण्यादिति**। यङि नीगभाव इत्यनुषङ्गः। किमत्र भाष्यकारवचनमित्यत्राह [४]— **तेन[४] हीति**। किकिनोः परस्मैपदसंज्ञायां को दोष इत्यत्राह — **तथा चेति**। **लादेशानामिति**। 'लः' इति षष्ठी, न तु प्रथमेति हि [५]तत्रोक्तम्। ततो लिटः परस्मैपदत्वाभावाल्लिड्वद्भावेन किकिनोस्तदभाव[६] इत्यर्थः। **वर्तमानाधिकाराच्च वर्तमान इति**। तयोरुत्पत्तिर्भवतीत्यनुषङ्गः। तस्माद् भूतकालतापि लिड्वद्भावान्नातिदिश्यत इति योजना। कुत इत्याह — **विरोधादिति**। यदविरुद्धं कार्यं तदेवातिदिश्यते, न तु विरुद्धमित्यर्थः। नन्वेवमपि लिड्वद्भावात् किकिनोः कानच्क्वसू स्यातामित्यत्राह — **स्वरूपाबाधेनेति**। स्वरूपे स्थिते [७]तत्प्रतिबद्धानि कार्याण्यतिदिश्यन्त इति स्वरूपहानिर्यत्र कार्येऽतिदिष्टे स्यात् तन्न भवतीत्यर्थः॥

अन्येभ्योऽपि दृश्यते ३.२.१७८.

[३, ३०५–३०७]

(उद्द्योतनम्) ननु [८]"क्विप् च' इत्यत्राप्युपपदं नास्ति, अत आह — **क्विप् चेत्यत्रेति**। 'अन्येभ्यः' इति सूत्रे सोपपदग्रहणाभावादाह — **पूर्वेति**। तत्रत्यक्विप एव विचार इति भावः। ननु मर्यादायामाङि न मतभेदसिद्धिः, अत आह — **अभिविधाविति**। ननु वचिप्रच्छ्योरप्यायतस्त्वादिवद् वचनसामर्थ्यादन्त्यस्य दीर्घोऽस्तु। तथा च [९]कथं संप्रसारणबाधः, अत आह — **दीर्घश्रुत्येति**। बाधकाभावात् परिभाषा न बाध्यत इति भावः। **अनर्थकमिति**। ह्रस्वदीर्घयोः पूर्वरूपत्वे विशेषाभावादित्यर्थः। विधौ लिङि विधेरेव निषेधः स्यात्, न तु पुनः प्रवृत्तेः, अत आह — **संभावन इति**। तदेवाह — **पूर्वमिति**। ननु जुहोतेः कथं दीर्घः, द्वित्वमात्रस्य विधानात्। न च 'द्वे च' इति चकारेण पूर्ववार्तिकस्थदीर्घसमुच्चयः, द्युतिगम्योरपि दीर्घप्रसङ्गात्,

---

[१] विषये — ङ.

[२] 'दृ हिंसायाम्' इत्येव स्वादौ निर्दिष्टो दृश्यते। अतस्तथैव पाठो युक्तः। 'द्रु गतौ' इत्यस्य दर्शनाद् भेदाग्रहणात् लेखकेन केनचिदेवं लिखितं स्यादिति भाति। यद्वा धातूनामनेकार्थत्वमाश्रित्योपपत्तिर्वक्तव्या।

[३] पा. सू. ७.४.८४.

[४] प्रदीपे 'तेनाप्युक्तम्' इत्यत्र 'तेन ह्युक्तम्' इति पाठोऽभिमत इति भाति।

[५] लः परस्मैपदमित्यत्र कैयट इत्यर्थः।

[६] परस्मैपदत्वाभाव इत्यर्थः।

[७] तत्प्रतिबद्धानि निर्दिश्यन्त इति — ङ.

[८] पा. सू. ३.२.७६.

[९] कथं प्रसारणबाधः — अ.

अत आह — **दीर्घ इति**। नन्वेवं वचिप्रच्छ्योरपि दीर्घो [1]न स्यात्, अचा तदन्तविध्याश्रयणादिति चेन्नैष दोषः, वचिप्रच्छिग्रहणसामर्थ्यात् तत्र तदन्तविधिर्नाश्रीयते। अत्र तु द्युतिगम्योर्द्वित्वसंबन्धे चरितार्थत्वान्न तदन्तविधिबाधः ॥

[३, ३०५–३०७]

(नारायणीयम्) ननु [2]'क्विप् च' इत्यनेनैवानुपपदेऽपि क्विप् सिद्ध इति चेन्नेत्याह — **क्विप् चेत्यत्रेति**। नन्वत्र सूत्रे सोपपदस्य ग्रहणं नास्तीत्यत्राह — **पूर्वसूत्र इति**। 'आ क्वेः' इति पाठे क्विपोऽन्तर्भावः कथमित्यत्राह — **अभिविधाविति**। वचनसामर्थ्यमुपपादयति — **दीर्घश्रुतयेति**। **तत्र कृत इति**। [3]पूर्वं दीर्घे कृत इत्यर्थः। **पुनर्दीर्घो [3]न प्रवर्ततेति**। ततश्च दीर्घविधानसामर्थ्यात् संप्रसारणाभावसिद्धिः। 'द्युतिगमिजुहोतीनां द्वे च' इति चकारेण यदि दीर्घः समुच्चीयते द्युतिगम्योरपि स्यात्। अथ न, जुहोतेरपि न स्यादित्याशङ्क्याह — [4]**दीर्घः समुच्चीयमान इति**। **जुहोतेरेवेति**। न तु द्युतिगम्योः, अजन्तत्वाभावादित्यर्थः ॥

विप्रसंभ्यो ड्वसंज्ञायाम् ३.२.१८०.

[३, ३०७–३०८]

(उद्द्योतनम्) भाष्ये **नोङ्धात्वोरिति**। धातोरूङश्चोदात्तस्थाने [5]यो यण् तस्मात् परा नद्यजाद्यसर्वनामविभक्तिश्चोदात्ता नेति निषेध उकारस्य प्रत्ययत्वान्न प्रवर्तत इत्यर्थः ॥

[३, ३०७–३०८]

(नारायणीयम्) **क्विपेति**। [6]'क्विप् च' इति सामान्येन विहितेन ॥

मतिबुद्धिपूजार्थेभ्यश्च ३.२.१८८.

[३, ३०८]

(उद्द्योतनम्) 'मतः' इत्यादेर्भूते प्रयोगं निरस्यति — **क्तस्येति**। ननु तृतीयान्तादुपज्ञाते

---

[1] 'न' इति नास्ति — ऋ.
[2] पा. सू. ३.२.७६.
[3] प्रदीपे 'न प्रवर्तत इत्यर्थः' इत्यत्र 'न प्रवर्ततेत्यर्थः' इति पाठोऽभिमतः स्यादिति भाति।
[4] प्रदीपे 'दीर्घे समुच्चीयमाने' इत्यत्र 'दीर्घः समुच्चीयमानः' इति पाठोऽभिमत इति भाति।
[5] 'यः' इति नास्ति — अ.
[6] पा. सू. ३.२.७६.

प्रत्ययविधाने कथं भूतकालनिश्चयः, अत आह — **वर्तमाने हीति**। अन्यथा [१]'तस्येदम्' इत्यनन्तरम् 'उपज्ञाते' इति पठेदिति भावः ॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यस्य
सूनोरन्नंभट्टस्य कृतौ भाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य
द्वितीयपादे तृतीयमाह्निकम्

पादश्च समाप्तः

[३, ३०८]

(नारायणीयम्) उपज्ञाते प्रत्ययविधानेन कथं भूते क्तो ज्ञाप्यत इत्यत्राह — **तेनेत्यधिकारादिति**। [२]'तेनैकदिक्' इत्यतः। एवमपि कथं ज्ञापकत्वमित्यत्राह — **वर्तमाने हीति**॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य
द्वितीये पादे तृतीयमाह्निकम् ॥

॥ पादश्च समाप्तः ॥

---

[१] पा. सू. ४.३.१२०.

[२] पा. सू. ४.३.११२.

तृतीयाध्यायस्य तृतीयपादे प्रथममाह्निकम्

उणादयो बहुलम् ३.३.१.

[३, ३०९–३१२]

(उद्द्योतनम्) प्रश्नाशयमाह — **उणादय इत्येवेति**। **साधुत्वेति**। अत्र तेषां सामान्येन विधाने कृत्संज्ञायां तदाश्रितकार्यं सर्वं प्रवर्तत इति वर्तमाने साधुत्वसिद्धिरिति भावः। 'प्रकृतिभ्यः' इति व्याख्यानानुरोधादेकोदाहरणार्थं बहुलग्रहणानर्थक्याच्चाह — **जाताविति**। तनुशब्दस्य [1]'धर्मि-परत्वे प्रकृतेरित्येतद्विशेषणत्वेन [2]दृष्टिशब्देन समासो न स्यात्, अत आह — **तनुशब्द इति**। सापेक्षत्वेऽपि गमकत्वात् समास इति भावः। पदार्थमुक्त्वा वाक्यार्थमाह — **प्रकृतीनामिति**। **बहुलशब्देति**। बहुलशब्दान्मनोज्ञादित्वाद् भावे वुञ्। अग्रिमवार्तिकद्वयं व्याचष्टे — **तथेति**। **प्रायेणेति**। सर्वे प्रत्यया नोक्ता इत्यर्थः। [3]'ऋफिडः' इत्यत्र [4]'संज्ञापूर्वको विधिरनित्यः' इति गुणाभावः, बहुलवचनाद्वा। **षण्ड इत्यत्र** [5]**'सत्वाभाव इति**। षणेर्डः षण्डः। [6]'धात्वादेः' इति सत्वाभावः, सत्वानन्तरं षत्वं वा अलाक्षणिकमित्यर्थः। [7]**प्रकृतयः** कृवापाज्यादयः। [8]'ते च कथम्' इति भाष्यं व्याचष्टे — [9]**तेऽपि सुष्ठ्विति**। शकटस्य तोकं शाकटायनः, नडादित्वात् फक्। 'पदार्थविशेषसमुत्थम्' इत्येतत् प्रकृत्यादिविभागेन व्युत्पादितमित्येतत्परतया व्याचष्टे — **पदमर्थ इति**। **प्रसिद्धामर्त्यादिकामिति**। 'ऋफिडः' इत्यत्र ऋधातोः प्रसिद्धत्वात् फिडप्रत्यय ऊह्यः। न त्विडः, डः इति वा, ऋफिधातोरप्रसिद्धत्वादित्यर्थः। अव्युत्पन्नेषु प्रत्ययाभावादाह — **प्रत्यय-त्वेनेति**। **न सर्वत्रेति**। गावीत्यत्रापि गमेर्डावीप्रत्ययसंभवादित्यर्थः॥

[३, ३०९–३१२]

(नारायणीयम्) उणादीनां शास्त्रान्तरपठितानामिति। यद्यप्युणादयः [10]'कृवापाजि' इत्यादि-कया [11]पञ्चपाद्या पठिता एव, तथापि तेषां वर्तमाने संज्ञायां च साधुत्वं यथा स्यादित्येवमर्थ-मेतावत् सूत्रमस्त्वित्यर्थः। कथं पुनः 'प्रकृतेस्तनुदृष्टेः' इत्यस्य 'तन्वीभ्यः प्रकृतिभ्यः' इति व्या-ख्यानमनुगुणं भवेदित्यत आह — **जातावेकवचनमिति**। ननु तनुशब्दस्य प्रकृतिविशेषणत्वेन दृष्टि-

---

[1] धर्मपरत्वे — अ, ऋ, ऌ.
[2] दृष्टशब्दस्य — अ; दृष्टशब्देन — ऋ, ऌ.
[3] ऋपिड्ड इत्यत्र — अ.
[4] परिभाषा ९४.
[5] सत्वाभाववत् — अ, ऋ, ऌ.
[6] पा. सू. ६.१.६४.
[7] प्रकृताः — अ, ऋ, ऌ.
[8] भाष्ये 'औणादिकाः सुसाधवः कथं स्युः' इत्यत्र 'औणादिकाः सुसाधवस्ते च कथं स्युः' इत्यन्नंभट्टाभिमतः पाठ इति भाति।
[9] प्रदीपे 'ते सुष्ठु' इति दृश्यते। 'तेऽपि सुष्ठु' इत्यन्नंभट्टपाठ इति ज्ञायते।
[10] उणादिसूत्रम् १.
[11] पञ्चपाद्यां — ङ.

शब्देन साक्षात्[1]सामर्थ्याभावात् कथं 'तनुदृष्टेः' इति समास इत्यत आह — **तनुशब्दोऽत्रेति। तानवमिति।** तनुत्वम्, अल्पत्वमित्यर्थः। [2]'इगन्ताच्च लघुपूर्वात्' इति भावेऽण्। ततश्च गुणस्य नित्यं गुण्यपेक्षत्वात् सापेक्षत्वेऽपि 'देवदत्तस्य गुरुकुलम्' इत्यादिवत् समास उपपद्यत इत्यर्थः। [3]**बहुलशब्दस्य प्रवृत्तिनिमित्तमिति।** 'ला आदाने', बहूनर्थान् लाति आदत्ते **बहुलम्।** [4]'आतोऽनुपसर्गे कः'। तस्य भावो बाहुलकम्, मनोज्ञादित्वाद्वुञ्। तच्च [5]'समासकृत्तद्धितेषु संबन्धाभिधानं भावप्रत्ययेन' इति बह्वर्थादानमुच्यत इत्यर्थः। **उक्तमिति।** उत्तरत्र [6]श्रूयमाणस्वपूर्वकसंबन्ध उक्तः। **समुच्चयनमिति।** पठनमित्यर्थः। **तेन षण्ड इत्यत्रेति।** 'षणु दाने' [7]अमन्ताड्डः। [**सत्वम्** [8]'धात्वादेः ष]स्सः। **अणृगयनादिभ्य इत्यणिति।** नियमेन गम्यतेऽनेनार्थ इति [9]'ग्रहवृदृनिश्चिगमश्च' इति करणेऽप्। ततश्च निगमशब्दः [10]'थाथघञ्क्त' इत्यन्तोदात्त इति [11]'बह्वचोऽन्तोदात्तात्' इति ठञि प्राप्ते ऋगयनादिपाठादणित्यर्थः। हिशब्दो हेत्वर्थ इति दर्शयति — **इत्येवमर्थमपरिपूर्णत्वमिति।** [12]समाहारे द्वन्द्वविधानादेकवचनम्। बहुलग्रहणाभावे नैगमानां संज्ञाशब्दानां चानन्तत्वात् पञ्चपाद्या कार्त्स्न्येन संग्रहायोगात् न तु सुष्ठु साधुत्वं स्यादित्यर्थः। एतदेव विशदयति — **अपरिपूर्णानां हीति।** शास्त्रान्तरप्रक्रियावर्णनेनात्र किं प्रयोजनमित्यत्राह — **अन्यैरिति।** उक्तस्यार्थस्य वृत्त्यन्तरसंवादात् प्रामाणिकत्वदाढर्चायैतदुक्तम्। अन्यथैकस्य[13] प्रतिभानं तु कृतकान्न विशिष्यत इति दोष आपतेदित्यर्थः। 'पदार्थ' इत्यभिधेयवचनेनार्थशब्देन [14]न षष्ठीसमासः, किं तर्हि प्रयोजनवचनेन बहुव्रीहिरित्याह — **पदमर्थ इति। प्रकृत्यादिरिति।** प्रकृतिप्रत्ययादिविभागकल्पनया हि पदं व्युत्पाद्यते। ततश्चायमर्थः संपद्यत इत्याह — **विशिष्टेति। प्रसिद्धामर्त्यादिकामिति।** 'ऋफिडः' इत्यादौ ऋशब्दो धातुः प्रसिद्धत्वात् प्रकृतिरिति निश्चीयते। तेन परिशिष्टस्य फिडादिशब्दस्य प्रत्ययत्वमूहितुं शक्यमित्यर्थः। एवं 'प्रत्ययं च दृष्ट्वा' इत्यादि व्याख्येयमित्याह — **प्रत्ययत्वेनेति।** 'संज्ञासु' इत्यादिश्लोकस्य पौनरुक्त्यमाशङ्क्योपयोगं दर्शयति — **न सर्वत्रेति।** श्लोकस्य [15]ह्ययमर्थः। धातुरूपाणां प्रकृतीनां ततः परेषां प्रत्ययानां च यत् कल्पनं तत् **संज्ञास्वेव** अनादिप्रयुक्तास्वेवेत्यर्थः। **कार्यात्** गुणप्रतिषेधादिकात् **अनूबन्धम्** अनुबन्धं ककारादिकं विद्यात्। [16]तेन फिडफिड्डौ कितौ कल्प्यौ। **एतत्** ऊहात्मकं शास्त्रम् **उणादिषु** अनुक्तेष्विति[17]॥

---

[1] सामर्थ्यभावात् कथं तेन दृष्टेरिति — ङ.
[2] पा. सू. ५.१.१३१.
[3] प्रदीपे 'बहुलशब्दप्रवृत्तिनिमित्तम्' इत्यत्र 'बहुलशब्दस्य प्रवृत्तिनिमित्तम्' इति व्यस्ततया पाठोऽभिमत इति भाति।
[4] पा. सू. ३.२.३.
[5] इदं वचनं महाभाष्यटीकायां हरिणोक्तमिति भूषणसारे भावप्रत्ययार्थनिर्णये उक्तम्।
[6] श्रूयमाणस्य संबन्धः — ङ.
[7] उणादिसूत्रम् ११९.
[8] पा. सू. ६.१.६४.
[9] पा. सू. ३.३.५८.
[10] पा. सू. ६.२.१४४.
[11] पा. सू. ४.३.६७.
[12] नैगमरूढिभवशब्दयोरित्यादिः॥ समाहारद्वन्द्व — ङ.
[13] एकस्य भानं तु — घ.
[14] 'न' इति नास्ति — ङ.
[15] हिशब्दो नास्ति — ङ.
[16] तेन ऋफिडऋफिड्डौ — घ.
[17] अस्य 'अयमर्थः' इत्यनेनान्वयः।

भविष्यति गम्यादयः ३.३.३.

[३, ३१२–३१३]

(उद्द्योतनम्) ननु भविष्यत्यनद्यतनोऽप्यस्ति, सामान्यस्य विशेषव्यापकत्वात्। अतो वचनानर्थक्यम्, अत आह— **भविष्यच्छब्द इति**। विद्यमानोऽपि विशेषो न भविष्यच्छब्दार्थः, किं तु भविताशब्दार्थ इत्यर्थः। **एतदिति**। सति [1]भविष्यतीत्यधिकारे [2]'लृट् शेषे च' इति भविष्यति लृड्विधिः, [3]तद्विधौ च भविष्यच्छब्दनिष्पत्त्या तेन शब्देन भविष्यदधिकारसिद्धिरित्यन्योन्याश्रय इत्यर्थः। नन्वनद्यतन उपसंख्यानाभावे गम्यादेः कथमनद्यतने प्रयोगसिद्धिः, अत आह— **विशेष इति**। **विशेषेति**। अनद्यतनत्वविशेषेत्यर्थः। **अपवादेति**। 'भविष्यति गम्यादयः' इत्यस्य [4]'लृट् शेषे च' [5]'अनद्यतने लुट्' इति विशेषविहितत्वादपवादयोर्मध्ये परत्वाल्लुड् भवतीत्यर्थः। लृड्विषयेऽपि वासरूपेण लुड् भवतीत्याह— **वासरूप इति**। **उपपद्यन्ते** अनद्यतनेऽपीत्यादिः। ननु वर्तमानकाले लटः पूर्वविधानात् पुनर्लड्विधानं भविष्यदर्थमेवेति कथमसाधुत्वशङ्का, येनाधिकारावश्यकता, अत आह— **सतीति**। ननु कथं भविष्यत्येव, वर्तमानेऽपि साधुत्वात्, अत आह— **भविष्यत्कालेनेति**। **शब्दोपात्तेति**। कालसामान्य इदं विधानं वर्तमानेऽपि स्यादित्यर्थः। वार्तिके **अनपशब्दत्वाय** भविष्यत्येव साधुत्वाय ॥

[३, ३१२–३१३]

(नारायणीयम्) नन्वपवादनिमित्तस्यानद्यतनत्वस्य भावात् कथं तदभाव उक्त इत्याशङ्कयाह— **विशेषे यत् सामान्यमिति**। यदा पूर्वमेव सामान्यमात्राश्रयेण पदं संस्क्रियते तदोत्तरकालं वाक्यवशाद्विशेषप्रतीतावप्यन्तरङ्गः संस्कारो न निवर्तत इत्यर्थः। यदा तु प्रथमत एव [6]विशेषविवक्षा तदा परत्वाल्लुडेव[7] भवतीति, [8]तदाह— [9]**विशेषविवक्षायां त्विति**। [10]नन्वसत्यपि भविष्यदधिकारे वचनसामर्थ्याद्वर्तमानकालताया निवर्तनाद् भविष्यति लट् सिद्ध इत्यत आह— [11]**असति त्विति**। **बाधो न स्यादिति**। तेन कालत्रयेऽपि लट् स्यात्। भविष्यत्येव यथा स्यादित्येवमर्थं भविष्यदधिकारः कृत इत्यर्थः ॥

---

[1] भविष्यत्यधिकारे — अ.
[2] पा. सू. ३.३.१३.
[3] तद्विशेषे च — अ.
[4] पा. सू. ३.३.१३.
[5] पा. सू. ३.३.१५.
[6] विशेषपक्षः — ङ.
[7] एवकारो नास्ति — ङ.
[8] तदापि — ङ.
[9] प्रदीपे 'विशेषविवक्षायां च' इत्यत्र 'विशेषविवक्षायां तु' इति पाठोऽभिमत इति भाति।
[10] ननु सत्यपि — ङ.
[11] प्रदीपे 'असति भविष्यदधिकारे' इत्यत्र 'असति तु भविष्यदधिकारे' इति पाठ आश्रितः।

लिप्स्यमानसिद्धौ च ३.३.७.

[३, ३१४]

(उद्द्योतनम्) ननु पूर्वसूत्रे किंवृत्तग्रहणं किमर्थम्, येनाकिंवृत्तार्थमेतत् स्यात्, अत आह — [१]**पूर्वत्रेति** । **लिप्स्यमानेति** । भवानद्य ब्रह्मणानामन्त्रयिष्यते [२]किलेत्यादौ ।।

[३, ३१४]

(नारायणीयम्) यद्यकिंवृत्ते किंवृत्ते च भविष्यति लिप्सायां लट् भवति तर्हि पूर्वसूत्रे किंवृत्त-[३]ग्रहणमकृत्वा 'लिप्सायाम्' इत्येव वाच्यम्, एतत् सूत्रं च न[४] कर्तव्यमित्यत्राह — **पूर्वत्रेति** । **लिप्स्यमानसिद्धिरहितायां लिप्सायामिति** । भवानद्य [५]ब्राह्मणानामन्त्रयिष्यत इत्यादौ ।।

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३.३.१०.

[३, ३१४–३१६]

(उद्द्योतनम्) शङ्कामुज्जीवयति — **सतीति** । स्पष्टस्यानुवादः सुकर इति भावः । अत्र याजकशब्दस्य भूतार्थत्वे प्रतिषेधाप्रसङ्गः, अत आह — **याजकशब्द इति** । अधिकारविधानप्रयोजनमाह — [६]**अस्येति** । भूताधिकारेऽविधानात् कथं भूतकालता, अत आह — **शब्दशक्तीति** । [भाष्ये] **धात्विति** । धात्वर्थयोर्विशेषणविशेष्यसंबन्धेऽयथाकाला अपि प्रत्ययाः साधवः । नन्वत्र 'यजताम्' इति यागस्यैव भविष्यत्त्वं प्रतीयते, न तु याजकत्वस्य, अत आह — **याजकत्वस्यैवेति** । कथं धातुसंबन्धाभावे भविष्यत्त्वप्रतीतिः, अत आह — **भावीति** । **कर्ता व्रजतीति** । करिष्यामीति व्रजतीत्यस्मिन्नर्थ इत्यर्थः ।।

[३, ३१४–३१६]

(नारायणीयम्) याजकशब्दो भविष्यतीति । यद्यपि भविष्यति न विहितः, तथाप्यर्थाद् भविष्यत्कालता गम्यत इत्यर्थः । एतदेवोपपादयति — **यस्मादिति** । **शब्दशक्तीति** । यो याजनं कृतवान् स याजकशब्दात् प्रतीयत इत्यर्थः । **याजकत्वस्यैवेति** । 'लप्स्यन्ते' इत्यनेनान्वये सति वाक्यवशाद् भूतयाजनकर्तृत्वस्यैव भविष्यत्कालताप्रतीतिः, यथाग्निष्टोमयाज्यस्य पुत्रो जनितेति । **भावीति** । यद्यप्येषां याजकत्वं भविष्यत्येव, तथापि तन्निश्चयादिदानीमारोपितमिति तदाश्रयेणायं प्रयोग इति प्रकरणादिवशादवगम्यत इत्यर्थः । **तेन कर्ता व्रजतीति** । करिष्यामीति व्रजतीत्यादिकेऽर्थ इति भावः ।।

---

[१] पूर्वसूत्रेति — अ, ऋ, लृ.
[२] किलेत्याह — अ.
[३] ग्रहणं कृत्वा — ङ.
[४] 'न' इति नास्ति — ङ.
[५] ब्राह्मणानामन्त्रयिष्यतीत्यादौ — घ, ङ.
[६] तस्येति — अ, ऋ, लृ.

भाववचनाश्च ३.३.११.

[३, ३१६–३१७]

(उद्द्योतनम्) अविशेषविधानमपि प्रतिपदविधानमेवेति नैतत् प्रयोजनम्, अत आह — **ज्ञापकेनेति**। विहितमनतिक्रम्य यथाविहितमित्यव्ययीभावे विहिता इति न सिध्यति, अत आह —— **येनेति**। ननु व्यतिकरेऽपि विधानसामर्थ्याद्वाचकत्वं स्यात्, अत आह — **लोकेति**। अन्यथा वचन[1]ग्रहणानर्थक्यं स्यादिति भावः ॥

[३, ३१६–३१७]

(नारायणीयम्) वचनग्रहणेन लोकप्रसिद्धमिति। वक्तीति वचनः, [2]'कृत्यल्युटो बहुलम्' इति ल्युट्। भावस्य वाचका भूत्वा भवन्तीत्यर्थः। ततश्च यथाभूता लौकिके प्रयोगे घञादयो भावस्य वाचकास्तथाभूता एव क्रियार्थायामुपपदे क्रियायां भविष्यति ते भवन्तीत्ययमर्थो वचनग्रहणसामर्थ्याल्लभ्यत इत्यर्थः। [3]**असामञ्जस्यं** व्यतिकरः, परस्परविषयावगाहनमिति यावत् ॥

अण् कर्मणि च ३.३.१२.

[३, ३१७–३१८]

(उद्द्योतनम्) अपूर्वविधानादिति। गोदायो व्रजतीत्यत्र कप्रत्ययेन बाधितस्याणोऽपूर्वविधिः, काण्डलावो व्रजतीत्यत्र कर्मण्यणः प्राप्तस्य ज्ञापकादप्राप्तौ प्रतिप्रसवः। तत्राप्राप्तप्राप्त्यपेक्षया प्राप्तस्य प्रतिप्रसवमात्रं लघ्विर्थः। ननु वचनग्रहणानुवृत्तौ कथमपवादविषये प्रवृत्तिः, अत आह— **ततश्चेति**। **कर्मण्येवेति**। केवलधातोरुत्पन्नस्याणोऽर्थबोधकत्वाभावाद्वचनग्रहणात् कर्मोपपदादेव भविष्यतीत्यर्थः। **कर्ममात्रेति**। अपवादस्थलीयस्यापीत्यर्थः। ननु प्रत्येकोपपदत्वे [4]'तुमुन्ण्वुलौ' [5]'कर्मण्यण्' एताभ्यामेव प्रत्ययद्वयसिद्धेः पुनरण्वचनं व्यर्थम्, अत आह — **वचनं त्विति**। गोदायो [6]व्रजतीत्यादौ कबाधनार्थमित्यर्थः। प्रत्येकोपपदत्वाभावे का हानिः, अत आह — **ततश्चेति**। **पृथगिति**। सप्तमीनिर्देशमात्रमुपपदसंज्ञायां नित्यम्, न तु सप्तम्यन्तान्तरासाहित्यमपीति भावः ॥

[३, ३१७–३१८]

(नारायणीयम्) [7]**अपूर्वविधानादिति**। अपूर्वविधौ ह्यदृष्टा शक्तिः कल्प्या। प्रतिप्रसवे तु क्लृप्ता शक्तिरनुगमनीयेति लाघवमित्यर्थः। [8]**ण्वुलं बाधित्वेति**। [9]'तुमुन्ण्वुलौ' इत्यनेन

---

[1] ग्रहणानर्थक्यादिति भावः — लू.
[2] पा. सू. ३.३.११३.
[3] आसमञ्जस्यं — ङ.
[4] पा. सू. ३.३.१०.
[5] पा. सू. ३.२.१.
[6] व्रजतीत्यत्र — अ.
[7] अपूर्वविधित्वादिति — ङ.
[8] एवं ण्वुलं — ङ.
[9] पा. सू. ३.३.१०.

[1]'कर्मण्यण्' इत्यणो बाधकत्वेन भविष्यति [2]विहितम्। **तथा चापवादविषये न स्यादिति**। [3]एकस्य वाक्यस्यैकार्थत्वनियमात्। **वचनग्रहणात् कर्मण्येवेति**। यो वचनोऽण् लौकिके प्रयोगेऽर्थस्य वाचकोऽण् सोऽस्मिन् विषये भवतीत्यर्थविज्ञानात् कर्मण्युपपदेऽण् [4]सिद्ध इत्यर्थः। ननु यद्वा कर्मण्युपपदेऽण्[5] तदा लक्षणान्तरेण सिद्धत्वात् किमर्थमिदमित्यत्राह — **वचनं त्विति**। प्रत्येकमुपपदसंज्ञाया अभावे को दोष इत्यत्राह — [6]**तत्र काण्डलाव इति**। **पृथक् सप्तमीनिर्देशादिति**। यस्य सप्तमीनिर्देशः तस्यैवोपपद[7]संज्ञेत्यन्यसहितत्वेऽपि निमित्तसद्भावात् कर्मणः केवलस्योपपदसंज्ञा [8]सेत्स्यतीत्यर्थः॥

लृट् शेषे च ३.३.१३.

[३, ३१८–३१९]

(उद्द्योतनम्) नन्वसति शेषग्रहणे 'क्रियायां क्रियार्थायाम्' इत्यधिकारात् तत्रैव स्यात्, नान्यत्र, अत आह — **क्रियायामिति**। ततश्च भविष्यन्मात्रे लृट् सिद्ध इति भावः। ननु शेषवचनेन क्रियायामुपपदे क्रियार्थायां कथं स्यात्, तद्भिन्नार्थकत्वाच्छेषशब्दस्य, अत आह — **अयं भाव इति**। सामान्यविधिना तावन्नोभयसिद्धिरित्याह — **लृडिति**। **संनिधिः** अनुवृत्तिः। अन्यथा शेषग्रहणवैयर्थ्यादिति भावः। 'साधीयः' इत्यनेन [9]विरुद्धार्थत्वमुच्यत इत्याह — **विपर्ययेति**। चकारोऽस्त्येवेति 'स तर्हि' इत्ययुक्तम्, अत आह — **इदानीमिति**। अत्र सामान्येन लृड्विधानेऽपि [10]वासरूपेण क्रियोर्थोपपदेऽपि लृट्सिद्धेः शेषग्रहणं व्यर्थमिति केचित्। तन्न, 'लृडपि तृजादिः' इति भाष्यदर्शनेन सामान्येनैव [11]वासरूपाभावज्ञापनात्॥

[३, ३१८–३१९]

(नारायणीयम्) नन्वसति शेषग्रहणे 'क्रियायां क्रियार्थायाम्' इत्यधिकारात् तत्रैव भविष्यति लृट् स्यात्, नान्यत्रेति कर्तव्यमेव शेषग्रहणमित्यत्राह — **क्रियायामिति**। ततश्च सर्वत्र भविष्यन्मात्रे लृड् भविष्यतीति भावः। **ण्वुला बाधितत्वादिति**। विशेषविहितत्वात्। **अस्य संनिधिरनुमीयत इति**। उपयुक्तापेक्षत्वाच्छेषव्यवहारस्य। **विपर्ययसाधनमिति**। न हि संनिध्यनुमानमात्रेण तत्र प्रत्ययविधानमुपपद्यते, तथा सत्यतिप्रसङ्गः स्यात्। तस्मात् केवलात् शेषग्रहणात् क्रियार्थायां क्रियायामुपपदे लृड् न स्यादिति वार्तिकमाक्षिप्तम्। 'एवं तर्हि' इत्यादिना 'लृटि

---

[1] पा. सू. ३.२.१.
[2] विहितः — घ, ङ.
[3] एकवाक्यस्यैकार्थत्व — ङ.
[4] सिध्यतीत्यर्थः — ङ.
[5] 'अण्' इत्यनन्तरं 'न' इत्यधिकम् — ङ.
[6] प्रदीपे 'ततश्च काण्डलावो व्रजतीति' इत्यत्र 'तत्र काण्डलावो व्रजतीति' इति पाठोऽभिमत इति भाति।
[7] संज्ञेत्यत्रासहितत्वेऽपि — ङ.
[8] सिध्यतीत्यर्थः — ङ.
[9] सिद्धार्थत्वमुच्यत इत्याह — अ.
[10] विशेषरूपेण — अ.
[11] वासरूपभाव — अ.

[1]'शेषवचनम्' इत्यत्र [2]चकारसहितशेषवचनमिति [3]विवक्षितं वार्तिककृतेति[4] दर्शितमित्याह — **चशब्दसहितादिति** ॥

लटः सद्वा ३.३.१४.

[३, ३२०]

(उद्द्योतनम्) सूत्रोपात्तानामिति। [5]'अप्रथमासमानाधिकरणे' [6]'संबोधने च' [7]'लक्षणहेत्वोः क्रियायाः' इत्युक्तानामित्यर्थः। व्यवस्थितविभाषयेष्टिसिद्धिः ॥

[३, ३२०]

(नारायणीयम्) अप्रथमेति। यथा [8]'लटः स्थाने शतृशानचौ भवतस्तथास्य लृटोऽपि व्यवस्थितविभाषाविज्ञानादप्रथमासमानाधिकरणादिषु [9]नित्यौ, प्रथमासमानाधिकरणे तु [10]विकल्पेन तौ भविष्यत इति वार्तिकार्थः ॥

अनद्यतने लुट् ३.३.१५.

[३, ३२०–३२१]

(उद्द्योतनम्) नन्वत्र योगविभागेनानद्यतने लुटि सिद्धेऽपि [11]'भविष्यति गम्यादयः' इत्यत्र भविष्यच्छब्दस्य सामान्यार्थत्वे कथमनद्यतने गम्यादिसिद्धिः, अनद्यतनार्थत्वे कथं सामान्ये तत्सिद्धिः, अत आह — **भविष्यच्छब्दस्येति**। **द्वयोरिति**। [12]'भविष्यति गम्यादयः' इत्यत्रेत्यर्थः। ननु मुख्यसंभवे गौणे कथं प्रत्ययः, अत आह — **प्रयोगेति** ॥

[३, ३२०–३२१]

(नारायणीयम्) भविष्यच्छब्दस्यानद्यतन इति। [13]'भविष्यति गम्यादयः' इत्यत्र भविष्यच्छब्दः 'अनद्यतने' इति योगविभागेनानद्यतने व्युत्पन्नत्वात् तदर्थवृत्तिरुपात्त इति गम्यादीनामनद्यतने भविष्यति साधुत्वसिद्धावुपसंख्यानं न कर्तव्यमित्यर्थः। नन्वेवमपि सकृच्छ्रुतस्यार्थद्वयायोगादनद्यतनादन्यत्र भविष्यति तेषां साधुत्वं न स्यादित्यत्राह — **तन्त्रेणेति**। ननु गौणमुख्यन्यायेन गौणस्यानद्यतनस्य

---

[1] शेषे वचनम् — घ.
[2] नकारसहितं — ङ.
[3] 'विवक्षितम्' इति नास्ति — ङ.
[4] 'इति' इति नास्ति — ङ.
[5] पा. सू. ३.२.१२४.
[6] पा. सू. ३.२.१२५.
[7] पा. सू. ३.२.१२६.
[8] लट्स्थाने — ङ.
[9] नित्यः — घ, ङ.
[10] विकल्पेन भविष्यतीति — घ.
[11] पा. सू. ३.३.३.
[12] पा. सू. ३.३.३.
[13] पा. सू. ३.३.३.

ग्रहणं न युक्तमित्यत्राह — **प्रयोगेति**। **गौणेऽपीति**। कालविप्रकर्षादनद्यतनसदृशे ॥

पदरुजविशस्पृशो घञ् ३.३.१६.

[३, ३२१]

(उद्द्योतनम्) उपतापशब्दस्य कर्मसंबन्धार्थत्वं निराह — **रोग इति**। रूपे विशेषाभावादाह — **स्वर इति**॥

[३, ३२१]

(नारायणीयम्) स्वरे विशेष इति। व्याधिविशेषे [1]"ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तः स्पर्शशब्दः। अन्यत्र [2]"चितोऽन्त उदात्तः' इत्यन्तोदात्तः॥

सृ स्थिरे ३.३.१७.

[३, ३२१]

(उद्द्योतनम्) कालान्तरस्य प्रापकः कालान्तरसंबन्धी, स्थायीति यावत्। स च **कालं** निर्दिष्टकालान्तरं, सरतीति सृधात्वर्थोऽनुगम्यते॥

[३, ३२१]

(नारायणीयम्) ननु गतिनिवृत्तियुक्तं वस्तु स्थिरमुच्यते। स्थिरशब्दो ह्युणादिषु तिष्ठतेः किरच्प्रत्ययान्तो निपातितः[3]। सर्तिस्तु गतिवाची। ततश्च स्थिरपदार्थः सरणे कर्ता न युक्त इत्यत आह — **स्थिरः कालान्तरस्येति**। [4]चिरं तिष्ठन् कालान्तरं सरति प्राप्नोतीति सारः स्थिर उच्यत इति न विरोध इत्यर्थः। **अस्थिरार्थमिति**। तत्र शरीरावस्थितं रुधिरादिद्रव्यमतिशयेन सारयतीत्यन्तर्भावितण्यर्थात् सरतेर्घञः [5]"उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः, **अतीसारः**। विविधं सरतीति **विसारः** मत्स्यः। सारयति चेष्टयत इति **सारः** बलम्॥

भावे ३.३.१८.

[३, ३२२–३२४]

(उद्द्योतनम्) 'योऽर्थः' इत्यस्यैव व्याख्या — **यल्लिङ्गेति**। लिङ्गविवक्षायामनिष्टमाह —

---

[1] पा. सू. ६.१.१९७.

[2] पा. सू. ६.१.१६३ 'चितः' इत्येव सूत्रम्। अन्त उदात्त इत्यनुवृत्तिप्रदर्शनम्।

[3] अजिरशिशिरेत्यादिनेति शेषः।

[4] स्थिरं तिष्ठन् — ङ.

[5] पा. सू. ६.३.१२२.

इति स्त्रियां भाव इति। **स्त्रियामकर्तरीति।** यद्यपि कारकशब्दस्य नपुंसकत्वात् स्त्रियामित्यनेन सामानाधिकरण्यं न संभवति, तथापि शक्तिवाचिनः कारकशब्दस्य नित्यनपुंसकत्वात् सामानाधिकरण्योपपत्तिरिति भावः। **भावे त्विति।** [1]'विशिष्टस्य निमित्तत्वासंभवा[2]दुभयाधिकाराच्चेति भावः। **सत्त्वभूत इति।** कृदभिहितस्य सत्त्वरूपत्वात्। प्रातिपदिकमात्रं निर्दिश्यताम्, अत आह — **शब्दसंस्कारेति।** [3]'न केवला प्रकृतिः' इति नियमात्। **गहादिष्विति।** ततः [4]'गहादिभ्यः' इति छः। [5]**स्वार्थिक इति।** [6]'सर्वप्रातिपदिकेभ्यः स्वार्थे कन्' इति वचनेन। तथा च नान्तरीयकत्वमविनाभूतत्वमित्यर्थः। ननु तत्रानुपयोगात् त्यागो युक्तः, इह तु त्यागे हेत्वभावः, अत आह — **प्रयोगेति।** **भिन्नेति।** पक्तिः पचनं पाक इति। 'पुंस्त्वानुगतं च' इत्यनेन भाव इति पुंल्लिङ्गोपपत्तिरुक्ता। **तदाश्रित्य** क्रियासामान्यमाश्रित्य। **प्रत्ययाः** घञादयः। ननु सामान्यमाश्रित्य [7]विशेषे प्रत्ययविधानाङ्गीकारे 'भवनं, भूतिः' इति न स्यात्, भवतेर्विशेषावाचकत्वात्, अत आह — **भूतिरिति।** स्वरूपे विशेषाभावेऽपि कारकविशेषाद्विशेष इत्यर्थः। **भावेति।** भावसामान्येनानुगत इत्यर्थः। [8]दृष्टान्तसाम्यात् प्रकृते विवक्षितमाह — **यथैकस्मिन्निति।** भिन्नसंबन्ध्याश्रयं भिन्नसंबन्धिप्रतियोगिकम्। **अर्थात्मा** अर्थस्वरूपम्, एकोऽर्थ इति यावत्। **स विधिः** स प्रकारः। **तत्प्रत्ययार्थत्वेनेति।** न च तस्यैकत्वात् पुंस्त्वाच्च लिङ्गसंख्यान्तरयोगो न स्यादिति वाच्यम्, सामान्योपलक्षितविशेषाणामेव प्रत्ययार्थत्वेन निर्देशात्। विशेषाणां च सर्वलिङ्गसंख्योपपत्तिः। 'स्त्रियां भावे' इति सामानाधिकरण्यमपि स्त्रीत्वभावयोरेकार्थवृत्तित्वात्। तथा चायमर्थः — भावशब्दार्थसामान्यावच्छिन्नस्त्रीत्वयुक्ते विशेषे क्तिन्निति। एवं [9]'नपुंसके भावे क्तः' इत्यत्रापीति। ननु विशेषस्याप्यसत्त्वभूतत्वात् कथं लिङ्गसंख्यायोगः, अत आह — **तत्रेति।** यथा आख्यातशब्दे **भागाभ्यां** प्रकृतिप्रत्ययाभ्यां, **साध्यसाधनवर्तिता** तत्प्रतिपादकता कल्पिता शास्त्रे, घञादिष्वपि स एव क्रमोऽ[10]त्रापीत्यन्वयः। तमेवाह — **साध्यत्वेनेति।** **तत्र** घञाद्यन्तेषु, साध्यत्वेन या क्रिया सा धातुरूपनिबन्धना। यस्तु तस्याः सत्त्वभावः स घञादिनिबन्धन इत्यन्वयः॥

[३, ३२२–३२४]

(नारायणीयम्) **लिङ्गस्योपलक्षणार्थत्वादिति।** एतच्च 'पुंल्लिङ्गेनायम्' इत्यादिभाष्याद्विज्ञायते। लिङ्गसंख्ययोर्विवक्षायां को दोष इत्यत्राह — **ततश्चेति।** **भावे तु पुंसीति।** क्तिन् प्रत्ययः स्यादित्यनुषङ्गः। **नपुंसके कर्तरीति।** भाव इति श्रुतेनान्वयायोगात् [11]'कर्तरि कृत्' इति वचनात् संनिहितं कर्तरीत्येतन्नपुंसकग्रहणेन विशेष्यते। लिङ्गसंख्ययोर्नान्तरीयकत्वमुपपाद-

---

[1] स्त्रीत्वविशिष्टस्य भावस्येत्यर्थः।

[2] भावे, अकर्तरि च कारके, इत्युभयेत्यर्थः।

[3] महाभाष्यम् १.२.६४.

[4] पा. सू. ४.२.१३८.

[5] प्रदीपे 'स्वार्थे कन् प्रत्ययः' इत्यत्र 'स्वार्थिकः कन् प्रत्ययः' इत्यन्नंभट्टपाठ इति भाति।

[6] 'अज्ञाते, कुत्सिते' इत्यादिना विधीयमानस्वार्थानुवादः।

[7] विशेषप्रत्यय — अ, ऋ, लृ.

[8] दृष्टान्तसामान्यात् — अ.

[9] पा. सू. ३.३.११४.

[10] 'अत्रापि' इति शब्दो यद्यपि श्लोके नास्ति, तथापि घञादिष्वपीत्यस्य विवरणं बोध्यम्।

[11] पा. सू. ३.४.६७.

यति — **सत्त्वभूत इति**। यदि प्रातिपदिकार्थ[1]मात्रविवक्षा प्रातिपदिकमेव निर्दिश्यतामित्यत्राह — **शब्दसंस्कारमात्रमिति**। [2]'न केवला प्रकृतिः प्रयोक्तव्या' इति वचनादवश्यं कयाचिद्विभक्त्या भाव्यमिति शब्दसंस्कार एव तदुपादाने प्रयोजनमित्यर्थः। नान्तरीयकशब्दस्य कथं साधुत्वमित्याशङ्क्य तद्व्युत्पत्तिं दर्शयति — **अन्तरशब्दो गहादिष्विति**। **उत्तरपदलोपीति**। शाकपार्थिवादित्वात्। **उभयलिङ्ग इति**। न तु पुँल्लिङ्ग एव, अपि तु नपुंसकलिङ्गोऽपीत्यर्थः। किं पुनः श्रुतयोर्लिङ्गसंख्ययोरविवक्षायां प्रमाणमित्यत्राह — **प्रयोगेति**। 'अथवा' इत्यादिनोक्तस्य कथं परिहारान्तरत्वमित्याशङ्क्य तत्राशयमाविष्कर्तुमाह — **पाकादिष्विति**। पूर्वं लिङ्गसंख्ययोरविवक्षामाश्रित्य परिहार उक्तः, इदानीं [3]तु पुंस्त्वैकत्वे विवक्षिते एव सामान्यभूते इत्युच्यत इति, तदाह — **तच्चैकमिति**। **तदाश्रित्येति**। सामान्यस्य महाविषयत्वात् सर्वविशेषस्वीकारसामर्थ्यात् 'पक्तिः पचनं पाकः पाकौ पाकाः' इत्यादिषु सर्वलिङ्गसंख्येषु विशेषेषु प्रत्ययसिद्धिरित्यर्थः। **भावः सामान्यमेवेति**। तेनान्योन्यस्वीकारसामर्थ्याभाव उक्तः। यदि तर्हि विशेषेष्वेव सामान्यानुगतेषु प्रत्ययः, 'भवनं भूतिः' इत्यादौ सामान्ये विशेषरूपाभावात् प्रत्ययो न सिध्येदित्यत्राह — **भूतिर्भवनमिति**। दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं स्फोरयति — **यथैकस्मिन्निति**। **आचार्य इति**। यथैकोऽर्थः कंचित् प्रत्युपाध्यायः कंचित् प्रति मातुलो व्यपदिश्यते, तथा **स विधिः** स प्रकारः पक्तिभावयोर्बोद्धव्य इत्यर्थः। तत्र यथोपाध्यायशब्देन मातुलरूपतयानभिधीयमानोऽपि मातुलो वस्तुतस्तत्त्वात् स्वकार्यं प्रतिपद्यते, तथा भावशब्देन साक्षादनभिधीयमानोऽपि पचादिविशेषसामर्थ्यात् तत्र संनिधानात् सामान्यप्रयुक्तं कार्यमनुभवति। यथा च नोपाध्यायरूपादन्यन्मातुलत्वं तथा [4]न भावादन्यत् पचादिरूपम्, सामान्यविशेषयोरत्यन्तभेदाभावाद्विशेषपरिहारेण सामान्यरूपाभावादिति सर्वत्र कार्यसिद्धिरित्यर्थः। 'पचतेः' इत्युपलक्षणम्। अर्थपरं चैतत्, [5]समवायसंबन्धे च षष्ठीति व्याचष्टे — **पचादीति**। **तत् प्रत्ययार्थत्वेनेति**। तत्र यथा 'गौरनुबन्ध्यः' इत्यादौ सामान्यचोदनायां विशेषेषु कार्यं भवति, एवमिहापि भावशब्दवाच्यसामान्योपलक्षितेषु विशेषेषु प्रत्ययाः प्रवर्तन्ते। ते च विशेषा द्वित्वबहुत्वयुक्ता लिङ्गत्रययुक्ताश्चेति वचनत्रयं लिङ्गत्रयं चोपपद्यते। तत्र पुंस्त्वविशिष्टे विशेषे विवक्षिते घञादि भवति। स्त्रीत्वविशिष्टे क्तिन्नादिः। नपुंसकत्वविशिष्टे ल्युडादिरिति विवेकः। 'स्त्रियां भावे' इति सामानाधिकरण्यमेकार्थसमवायादुपपद्यते। [6]एकस्मिन् हि विशेषे भावशब्दवाच्यं सामान्यं स्त्रीत्वं च समवेतम्। ततश्चायमर्थः — भावसामान्यानुगते स्त्रीत्वयुक्ते विशेषे क्तिन्नादिरिति। एवं [7]'नपुंसके भावे' इति व्याख्येयम्। तत्र धात्वर्थरूपस्य भावस्य [8]साध्यरूपत्वादनिष्पन्नलक्षणस्य घञादिवाच्यत्वात् कथं लिङ्गसंख्यायोगः स्यादित्याशङ्क्य प्रकृतिप्रत्ययवाच्ययोर्भावयोर्भेदं दर्शयति — **तत्र पाक इत्यादाविति**। **आख्यातशब्द इति**। यथा पचतीत्यादावन्वयव्यतिरेकाभ्यां धातुभागः साध्यरूपायां क्रियायां वर्तते, प्रत्ययभागस्तु कारकादाविति शास्त्रे परिकल्प्यते, घञादिष्वपि स एव प्रकारः, प्रकृतिप्रत्ययार्थयोर्भेद एवेत्यर्थः। एतदेवोपपादयति — **साध्यत्वेनेति**। **तत्र** घञाद्यन्तेषु पाकादिषु साध्यत्वेन या क्रिया साख्यातेष्विव **धातुरूपनिबन्धना** धातुभागवाच्येत्यर्थः। **तस्याः** क्रियाया यः **सत्त्वभावः** सिद्धरूपता द्रव्यधर्मलिङ्गसंख्याकारकशक्तिसंबन्धयोग्योऽर्थः स घञा-

---

[1] मात्रे विवक्षा — घ, ङ.
[2] महाभाष्यम् १.२.६४.
[3] तुशब्दो नास्ति — ङ.
[4] 'न' इति नास्ति — ङ.
[5] समाससंबन्धे — ङ.
[6] एकस्मिन् हि विशेषे — घ; एतस्माद्विशेषे — ङ.
[7] पा. सू. ३.३.११४.
[8] साध्यरूपत्वान्निष्पन्न — ङ.

दिवाच्य इत्यर्थः। ततश्च तिङन्तानां भावाभिधायिनां घञाद्यन्तानां च भेदोऽप्युपपन्न इत्येषा दिक् ॥

अकर्तरि च कारके संज्ञायाम् ३.३.१९.

[३, ३२५–३२७]

(उद्द्योतनम्) प्रतिषेधपक्षेऽपि वैयर्थ्यमाह — **प्रसज्येति**। भावे विधिः किं न स्यात्, अत आह — **भावे चेति**। अकारके विधिः किं न स्यात्, अत आह — **धात्वर्थेति**। 'अन्यः स भावः' इति वक्ष्यमाणमाह — **साध्यमानेति**। ननु कारकग्रहणाभावे 'अपूर्व एव' इत्ययुक्तम्, अन्तरङ्गत्वात् स्वार्थे घञि [1]विज्ञायमाने तत्र पूर्वेण सिद्धतयापूर्वत्वासंभवात्,[2] अत आह — **अन्यथेति**। नियमार्थत्व इत्यर्थः। **सार्वधातुक इति**। तत्र कृदभिहितस्य [3]तिङभिहितस्य [च] सिद्धसाध्यत्वादिरूपेण भेदो बहुधा प्रपञ्चितः। भाष्ये **घञनुक्रमणमिति**। "[4]'परिमाणाख्यायाम्' इत्यनेन विहितो घञ् अजपोरेव बाधकः, न तु स्त्रीप्रत्ययस्येति वक्तव्यम्"[5] इत्युत्तरसूत्रे वक्ष्यते। तस्य 'एका तिलोच्छ्रितिः' इत्यादिसिद्धिः प्रयोजनम्। तत्र 'कारके' इत्यनुवृत्तौ तन्न वक्तव्यमित्युक्तम्, तदुपपादयति — **तेनेति**॥

[३, ३२५–३२७]

(नारायणीयम्) 'अकर्तरि' इति पर्युदासे प्रसज्यप्रतिषेधे च कारकग्रहणं न कर्तव्यमित्यभिप्रायेण प्रश्न इत्याह — **अकर्तरीति**। [6]**कर्तृसदृशस्यैवेति**। वक्ष्यमाणेन नञिवयुक्तन्यायेन। ननु धात्वर्थ एव विधिसंभवे कथं तत्संबन्धिनि कारके घञ्विधानं स्यादित्यत्राह — **भावे चेति**। तथापि कारक एवेति नियमः कस्मादित्यत उक्तम् — **धात्वर्थेति**। **साध्यमानरूप इति**। न तु भावशब्दवाच्ये सिद्धरूपे, पूर्वसूत्रेणैव सिद्धत्वात्। 'भावभेदः' इत्युत्तरवादिन आशयमबुद्ध्वाहेत्यर्थः। **विवाहस्तु नयनमिति**। कन्याया इत्यनुषङ्गः। 'अपूर्वः' इत्ययुक्तम्, अन्तरङ्गत्वात् स्वार्थेऽनेन घञ् विज्ञायेत। तत्र च पूर्वेण सिद्धत्वादपूर्वत्वाभाव इत्यत आह — **अन्यथेति**॥

परिमाणाख्यायां सर्वेभ्यः ३.३.२०.

[३, ३२७–३३०]

(उद्द्योतनम्) पुनर्विधानसामर्थ्यादजपोरपि विषये स्यात्, अत आह — **अन्यथेति**। पुरस्तादपवादन्यायेनेत्युक्तं निराह — **बाध्यमात्रेति**। 'अस्त्यन्यत्' इति भाष्येण परिमाणाख्यायां घञर्थमिदं वचनम्। अतोऽजब्विषये प्रवृत्त्यर्थं 'सर्वेभ्यः' इति वक्तव्यमिति शङ्कितमिति सूचयितुमाह

---

[1] विज्ञायमानेऽत्र — अ.
[2] 'अपूर्वत्वासंभवात्' इति छेदः।
[3] 'तिङभिहितस्य' इति नास्ति — अ.
[4] पा. सू. ३.३.२०.
[5] वार्तिकार्थानुवादोऽयम्।
[6] प्रदीपे 'कर्तृसदृशस्य कारकस्य' इत्यत्र 'कर्तृसदृशस्यैव कारकस्य' इति पाठोऽभिमत इति भाति।

— **कर्मण्यपीति**। ननु 'सर्वेभ्यः' इति पञ्चम्या सर्वेष्विति कथं लभ्यते, अत आह — **तादर्थ्ये चतुर्थीति**। **घं बाधित्वेति**। संज्ञायां [1]'पुंसि संज्ञायां घः प्रायेण' इति विहितम्। ननु सर्वेभ्यः इति चतुर्थीत्युक्ते कथं 'प्रकृत्याश्रयः' इति लभ्यते, अत आह — **सर्वेभ्य इति पञ्चमीति**। [2]'णेरनिटि' इति णिलोपसिद्धेर्लुग्विधानं व्यर्थम्, अत आह — **णिलोपे सतीति**। दारशब्दस्तु णिचमाश्रित्य वृद्ध्यापि सिध्यतीति सूचयितुं 'जारशब्दः' इत्युक्तम्। जीर्यतेः [3]'जनीजॄष्' इति मित्संज्ञतया [4]णिजाश्रितवृद्धेः [5]'मितां ह्रस्वः' इति ह्रस्वविधानाद् घञाश्रयवृद्धिं विना 'जारः' इति [6]रूपासिद्धिरिति भावः। **घे प्राप्त इति**। [7]'पुंसि संज्ञायाम्' इत्यनेन करणाधिकरणयोर्घविधानात्॥

[३, ३२७–३३०]

(**नारायणीयम्**) ननु पुनर्विधानादेव बाधकबाधनार्थादजब्विषयेऽपि 'घञ्' भविष्यतीत्यत आह — **अन्यथेति**। **अनेनैव भवितुमर्हतीति**। यद्यप्यन्यथापि रूपसिद्धिर्भवति, तथापि न्यायादनेनैव घञा भाव्यमित्येतदुदाहृतमित्यर्थः। ननूक्ते प्रयोजने कथं प्रत्याख्यानं सर्वग्रहणस्य स्यादित्यत आह — **बाध्यमात्रेति**। यद्यद् बाध्यं तत्तद् बाधत इत्ययं पक्षः। **समुदायापेक्षायामिति**। समुदाय एव बाध्यत्वेनापेक्ष्यते, न तु प्रत्येकमिति। अत्र पक्षद्वये विशेषचिन्ताया अभावादेतन्न्यायानुत्थितिरित्यर्थः[8]। ननु 'सर्वेभ्यः' इति पञ्चमी धातुविशेषणमिति कथं सर्वेषु साधनेष्वित्यर्थो लभ्येतेत्यत आह — **सर्वेभ्य इति तादर्थ्य इति**। ननु [10]'इङश्च' इत्यत्र 'अकर्तरि कारके' इत्यनुवर्तनादेव करणादिकारके घञ् सिद्ध इति किं सर्वग्रहणेनेत्यत्राह — **तेनाधिकरणे घमिति**। [11]'पुंसि संज्ञायां घः' इति घः प्राप्तः। कथं पुनः 'सर्वेभ्यः' इत्यनेन प्रकृत्याश्रयस्यैव बाधः, न त्वर्थाश्रयस्येति लभ्यत इत्यत्राह — **सर्वेभ्य इति**। **उभयाधिकारादिति**। 'भावे, अकर्तरि च कारके' इत्युभयमप्यत्रानुवर्तत इत्यर्थः। ननु [12]'णेरनिटि' इति णिलोपेनैव सिद्धत्वात् किं लुग्विधानेनेत्यत आह — **णिलोप इति**। न च णिजाश्रया वृद्धिः स्यादिति वाच्यम्, तस्यां सत्यामपि [13]'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वात् ह्रस्वप्रसङ्गात्। **करणे घ इति**। [14]'पुंसि संज्ञायाम्' इत्यनेन॥

इङश्च ३.३.२१.

[३, ३३०]

(**उद्योतनम्**) ननु 'इङश्च' इति विशेषविहितेन घञाजपोरिव क्तिनोऽपि बाधात् [15]'अकर्तरि

---

[1] पा. सू. ३.३.११८.
[2] पा. सू. ६.४.५१.
[3] घटादिगणसूत्रम्।
[4] णिचमाश्रितवृद्धेः — अ.
[5] पा. सू. ६.४.९२.
[6] रूपसिद्धिरिति — अ.
[7] पा. सू. ३.३.११८.
[8] 'घञ्' इत्यस्यानन्तरं 'न' इत्यधिकम् — ङ.
[9] एतन्न्यायानुवृत्तिरित्यर्थः — ङ.
[10] पा. सू. ३.३.२१.
[11] पा. सू. ३.३.११८.
[12] पा. सू. ६.४.५१.
[13] इदं घटादिगणसूत्रम्।
[14] पा. सू. ३.३.११८.
[15] पा. सू. ३.३.१९.

च कारके' इत्यपादानेऽपि [1]संभवाद्वचनं व्यर्थम्, अत आह — **प्रकृत्याश्रयस्यैवेति**। भाष्ये 'गौः, इव' इति छेदः॥

[३, ३३०]

(नारायणीयम्) ननु सूत्रेणैव घञि सिद्धे ङीषेव विधेय [2]इति चेदाह — **प्रकृतीति**। **कर्मणि घञिति**। प्राप्तिरत्र धात्वर्थः, प्राप्यते स्पर्शार्थिभिरिति **शारः** वायुः। वर्णे तु संपर्को धात्वर्थः, वर्णान्तरेण संपृक्तश्वेतवर्णः **शारः**। **अकृताच्छादन इति**। तेन निव्रियते आव्रियतेऽनेन शरीरमिति निवृतमाच्छादनमुच्यत इति दर्शितम्। करणेऽत्र घञ्, आच्छादनं च धात्वर्थः॥

समि मुष्टौ ३.३.३६.

[३, ३३१]

(उद्द्योतनम्) नन्वङ्गुलिसंनिवेशो मुष्टिः, ततः कथमाशङ्का, अत आह — **परिमाणेति**॥

[३, ३३१]

(नारायणीयम्) **परिमाणवाचीति**। [3]"चतुरश्चतुरो मुष्टीन् निर्वपति' इति। **अङ्गुलिसंनिवेशेति**। यथा 'मुष्टचा हन्ति' इति॥

कर्मव्यतिहारे णच् स्त्रियाम् ३.३.४३.

[३, ३३१–३३२]

(उद्द्योतनम्) **प्रकरणेति**। [4]"स्त्रियां क्तिन्' इत्यनन्तरं 'कर्मव्यतिहारे णच्' इत्येव लाघवार्थं वक्तव्ये [5]पृथक्करणं बाधकबाधनार्थमित्यर्थः। भाष्ये **व्यावचोरीति**। 'चुर स्तेये, चर्च अध्ययने' आभ्यां चुरादिण्यन्ताभ्यां [6]"ण्यासश्रन्थो युच्' इति क्तिनो बाधके युचि प्राप्ते तद्बाधनेनानेन णच् भवतीत्यर्थः। [7]"गुरोश्च हलः' इत्यत्राकारप्रत्ययानुवृत्तिदर्शनार्थम् 'अप्रत्ययात्' इत्यस्य पाठः। भाष्ये **सिद्धं त्विति**। [8]"स्त्रियां क्तिन्' इत्यनन्तरं 'कर्मव्यतिहारे णच्' णिचश्च' इति वक्तव्यम्। तत्र व्यावक्रोशीत्यत्र क्तिनो बाधः, 'णिचश्च' इत्यनेन व्यावचोरीत्यादौ

---

[1] घञ् इत्यादिः।
[2] इत्यरुचेराह — घ, ङ.
[3] मीमांसा ११.४.१५. अधिकरणे एतद्विचारः।
[4] पा. सू. ३.३.९४.
[5] प्रकरणं — अ, ऋ, ऌ.
[6] पा. सू. ३.३.१०७.
[7] पा. सू. ३.३.१०३.
[8] पा. सू. ३.३.९४.

युचो बाधः। [1]'व्यतीक्षेत्यादौ [2]णचं बाधित्वा 'गुरोश्च हलः' इति परत्वादप्रत्यय एव भवतीति[3] सर्वेष्टसिद्धिरित्यर्थः। अत्रानिष्टं शङ्कते — **यद्येवमिति**। **न सिध्यतीति**। स्त्र्यधिकारविहितेषु वासरूपानङ्गीकारादिति भावः। **व्यात्युक्षीति**। 'उक्ष सेचने' अस्मात् [4]'गुरोश्च हलः' इत्यकारप्रत्ययो[5] णचं बाधित्वा व्यतीक्षादिष्विव स्यादित्यर्थः। **यथेष्टेति**। अत्र व्याचक्षुः — 'व्यात्युक्षी' इति च भाष्यवार्तिकस्वरसान्न भवितव्यम्, वृत्त्युक्तं तु प्रदीपकृतोक्तमित्याहुः[6]॥

[३, ३३१–३३२]

(नारायणीयम्) प्रकरणोत्कर्षादिति। [7]'स्त्रियां क्तिन्' इत्यत्रैव 'कर्मव्यतिहारे णच्' इति वक्तव्ये प्रकरणोत्कर्षेण विधानं क्तिनोऽपवादादस्मात् तदपवादेषु [8]'ण्यासश्रन्थो युच्' इत्यादिष्वपवादविप्रतिषेधात् प्राप्तेषु तद्बाधनार्थं विज्ञायत इत्यर्थः। **यद्येवमिति**। [9]'स्त्रियां क्तिन्' इत्यत्र प्रकरणे वासरूपविधेरभावादिति भावः। **व्यात्युक्षीति**। अपवादविप्रतिषेधात् [10]'गुरोश्च हलः' इत्यकारप्रसङ्गादिति भावः। एतत् सर्वं संपादयितुं बहुलग्रहणमेव प्रभवतीत्याशयेन परिहरति — **कृत्यल्युट इति**। **यथेष्टेति**। यथेष्टलाभः प्रयोजनमस्य तत्तथा॥

अभिविधौ भाव इनुण् ३.३.४४.

[३, ३३२–३३३]

(उद्द्योतनम्) ननु ['अकर्तरि च कारके' इति] [11]व्यावृत्तिरित्येवमर्थं भावग्रहणमिति प्रश्नायोगः, अत आह — **भाव इति**। ननु शब्दशक्तिस्वाभाव्याद् भावे भवन्नयं घञ इव क्तस्यापि बाधको भविष्यति, अत आह — **मध्य इति**। **वासरूप इति**। क्तप्रत्ययानन्तरमेतद्विधौ [12]वासरूपेणेनुण्विषयेऽपि क्तः स्यात्। स्त्र्यधिकारानन्तरं वासरूपाङ्गीकारादिति भावः॥

[३, ३३२–३३३]

(नारायणीयम्) ननु 'अकर्तरि च कारके' इत्यस्य निवृत्त्यर्थं भावग्रहणं स्यादिति, नेत्याह — **भावे कारक इति**। विध्यन्तरे प्राप्त इनुण आरम्भात् क्तादीनप्ययं बाधिष्यत इति तदर्थं भावग्रहणं मन्दप्रयोजनमित्यत आह — **मध्येऽपवादा इति**। **अधिकविधानार्थादिति**। वाक्यभेदेन पुनर्विधानार्थादित्यर्थः। **वासरूप इति**। स्त्र्यधिकार एव वासरूपविधेर्निषेधः, परत्र तु भवत्येवेति [13]स्थापितत्वादिति भावः॥

---

[1] 'व्यतीक्षेत्यादौ' इत्यस्यानन्तरं 'परत्वात्' इत्यधिकम् — अ, ऋ, लृ.
[2] णिचं — अ, ऋ, लृ.
[3] इतिशब्दो नास्ति — अ, ऋ, लृ.
[4] पा. सू. ३.३.१०३.
[5] प्रत्यये — अ, ऋ, लृ.
[6] 'आहुः' इत्यधिकं भाति।
[7] पा. सू. ३.३.९४.
[8] पा. सू. ३.३.१०७.
[9] पा. सू. ३.३.९४.
[10] पा. सू. ३.३.१०३.
[11] व्याघातिरित्येवमर्थं — अ, ऋ, लृ.
[12] वासरूपेण घिनुण्विषयेऽपि — अ, ऋ, लृ.
[13] ख्यापितत्वादिति — ङ.

एरच् ३.३.५६.

[३, ३३३–३३४]

(उद्द्योतनम्) ननु 'एरजण्यन्तानाम्' [1]इत्येव [2]कल्प्यादिभ्यो न भविष्यति, अत आह — **एरजिति। अपि प्राप्त इति।** 'जु गतौ, षुञ् अभिषवे' आभ्याम् [3]'ऋदोरप्' इत्यनेन॥

[३, ३३३–३३४]

(नारायणीयम्) घञेवेति। स्वरे विशेषः। घञि सत्याद्युदात्तं[4] पदं भवति। अचि सत्यन्तोदात्तं [5]स्यात्। कर्मणि च प्रत्ययः। कल्प्यत इति कल्पः, अर्थ्यंत इत्यर्थः, मन्त्र्यत इति मन्त्रः। **अनार्षमिति।** एतद्वार्तिकदर्शनात् कैश्चित् पठितमिदमित्यप्रमाणमित्यर्थः॥

ग्रहवृदृनिश्चिगमश्च ३.३.५८.

[३, ३३४–३३५]

(उद्द्योतनम्) भाष्ये **स एव स्वर इति।** अचि चित्स्वरेणान्तोदात्तत्वम्, अप्यपि थाथादिस्वरेणान्तोदात्तत्वमेव। **मध्योदात्तत्वमिति।** अपोऽनुदात्तत्वात् [6]'गतिकारकोपपदात् कृत्' इति चकाराकारस्योदात्तत्वमित्यर्थः। क्रमेण भावेऽधिकरणे च प्रत्यय[7]विधानादाह — **वचनमिति।** भावमात्रस्य घञर्थत्वशङ्कां निराह — **भाव इति॥**

[३, ३३४–३३५]

(नारायणीयम्) थाथादिस्वराभावे 'निश्चयः' इत्यत्र कः स्वरः प्रवर्तत इत्यत्राह — **मध्योदात्तत्वमिति।** अपः पित्त्वादनुदात्तत्वे धातुस्वरेण चशब्दाकारस्योदात्तत्वात्। **रणन्त्यस्मिन्निति।** शब्दायन्ते योधा अस्मिन्निति **रणः** संग्रामः॥

स्तम्बे क च ३.३.८३.

[३, ३३६]

(उद्द्योतनम्) निपातनेऽन्तोदात्तत्वं[8] निपात्यते। [9]अपि त्वादेशस्य धातुस्वरेणाद्युदात्तत्वं स्या-

---

[1] इत्येवं — अ, लृ.
[2] कल्पादिभ्यः — अ, ऋ, लृ.
[3] पा. सू. ३.३.५७.
[4] ञ्नित्यादिर्नित्यमित्यनेनेति भावः।
[5] चित इत्यनेनेति भावः।
[6] पा. सू. ६.२.१३९.
[7] विधानादित्याह — अ, ऋ, लृ.
[8] 'अन्तोदात्तत्वम्' इत्यस्यानन्तरं 'न' इत्यधिकम् — लृ.
[9] अप्प्रत्यये त्वित्यर्थः।

दित्याह — **अन्तेति**। [भाष्ये] **अकारान्ताः** उदात्ताकारान्ताः। तत्रान्तोदात्तत्वमपि सिध्यतीत्याह — **तत्रेति**। [१]"अनुदात्तस्य च यत्रोदात्तलोपः' इत्युदात्तनिवृत्तिस्वरः। **कप्रत्यय इति**। [२]"गमहन' इत्युपधालोपे [३]"हो हन्तेः' इति कुत्वम्॥

[३, ३३६]

(नारायणीयम्) अन्तोदात्तत्वं नेति। निपातने त्वन्तोदात्तत्वनिपातनात् स्वरसिद्धिः। आदेशस्याकारान्तत्वे कथं स्वरः सिध्येदित्यत्राह — **तत्रातो लोप इति**। घनादेशः स्थानिवद्भावाद् धातुस्वरेणान्तोदात्तः। तत्रातो लोपे [४]"अनुदात्तस्य च' इत्यादिनाप उदात्तत्वं सिध्यति। **तस्येति**। [५]कापोः प्रतिपदविधानात्॥

स्त्रियां क्तिन् ३.३.९४.

[३, ३३७]

(उद्द्योतनम्) भाष्ये **आबादिभ्य इति**। [६]"गुरोश्च हलः' इत्यस्य बाधनार्थम्। भाष्ये **निष्ठायामिति**। [७]तथा च 'आप्तिः' इत्यादेर्निष्ठायामनिट्त्वादकारप्रत्ययाभावे क्तिन् सिद्ध इत्यर्थः। भाष्ये **स्रंसेति**। स्रंसुध्वंस्वोरुदित्त्वेन क्त्वायां विकल्पितेट्त्वात् "यस्य विभाषा' इति निष्ठायामनिट्त्वादकारप्रत्ययो न प्राप्नोतीत्यर्थः। भाष्ये **परिगणनमिति**। स्रंसुध्वंस्वोरेवाकारप्रत्यय इष्टः, [८]अन्येषां क्तिनेवेत्यर्थः। भाष्ये **भेद इति**। अनयोरेवाकारप्रत्ययः, एतत्तुल्यानामन्येषां [१०]क्तिनिति भेद आश्रितः स्यात्। उदाहरणत्वे एतत्तुल्यानां सर्वेषामकार एव, न क्तिन्निति सर्वेषामैकरूप्याद् भेदो न भवतीत्यर्थः। क्तिनैव सर्वेषामैकरूप्यम्, नाकारप्रत्ययेनेति सिद्धान्तमाह — भाष्ये **स्रस्तिरिति**। तत् सावधारणमित्याह — **स्रंसेति**॥

[३, ३३७]

(नारायणीयम्) एवकारार्थमाह — **स्रंसेति**॥

स्थागापापचो भावे ३.३.९५.

[३, ३३८]

(उद्द्योतनम्) पुरस्तादपवादन्यायाश्रयणे सर्वापवादाप्रसङ्गादाह — **बाध्यमात्रेति**। लक्ष्यानु-

---

[१] पा. सू. ६.१.१६१.
[२] पा. सू. ६.४.९८.
[३] पा. सू. ७.३.५४.
[४] पा. सू. ६.१.१६१.
[५] काचोः — घ.
[६] पा. सू. ३.३.१०३.
[७] 'तथा च' इत्यादि 'स्रंसेति' इत्यन्तं नास्ति — लृ.
[८] पा. सू. ७.२.१५.
[९] अन्येषामबेवेत्यर्थः — अ.
[१०] किं नेति — अ.

रोधादत्र प्रत्येकं बाध्यमपेक्ष्यत इत्याशयेनाह — **अनन्तरेति**। **ल्युडिति**। [1]'करणाधिकरणयोश्च' इत्यादिना प्राप्तस्य[2]॥

[३, ३३८]

(नारायणीयम्) यद्यप्ययमङो बाधकः, तथापि कथं ण्वुलिञोरप्रवृत्तिरित्यत्राह — **अनन्तरेति**। **ल्युड्बाधनार्थमिति**। परत्वात् [3]'करणाधिकरणयोश्च' इति प्राप्तस्य ल्युटो बाधनार्थमित्यर्थः॥

व्रजयजोभावे क्यप् ३.३.९८.

[३, ३३९]

(उद्द्योतनम्) 'समज्या' इत्युदाहरणानुरोधादाह — **उत्तरेति**। संज्ञात्वाद्वीभावाभावः[4]। न हि वीभावे सति संज्ञा गम्यते। समज्या सभा॥

[३, ३३९]

(नारायणीयम्) **उत्तरसूत्र इति**। अन्यथा 'समज्या' इत्युदाहरणप्रदर्शनमनुपपन्नं स्यात्॥

कृञः श च ३.३.१००.

[३, ३३९]

(उद्द्योतनम्) चकारेण क्यप इव क्तिनोऽपि समुच्चयसंभवाद्वचनानर्थक्यम्, अत आह — **चकारेणेति**॥

[३, ३३९]

(नारायणीयम्) ननु चकारेण क्तिन्नपि समुच्चीयते। किं वावचनेनेत्यत्राह — **चकारेणानन्तरस्येति**। [5]'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायात्॥

षिद्भिदादिभ्योऽङ् ३.३.१०४.

[३, ३४०]

(उद्द्योतनम्) ननु क्तिनः कित्त्वात् कथं वृद्धिः, अत आह — **आङ इति**। आङ्पूर्व ऋतिः

---

[1] पा. सू. ३.३.११७.

[2] समस्तैकदेशेन 'ल्युटः' इति पृथक्कृतेनान्वयो बोध्यः।

[3] पा. सू. ३.३.११७.

[4] अजेर्व्यघञपोरित्यनेन वीभावस्य प्राप्तिः।

[5] परिभाषा ६२.

आर्तिः। गिर्यवयवो गुहा, न सर्वो गिरिः, अत आह — **गिरिशब्द इति**॥

[३, ३४०]

(नारायणीयम्) गिर्यवयव इति। [1]गुहाशब्दस्य तत्र रूढत्वात्॥

ण्यासश्रन्थो युच् ३.३.१०७.

[३, ३४०–३४१]

(उद्द्योतनम्) ननु [2]'युवोः' इत्यत्र चकाराभावात् कथं सामान्यग्रहणार्थत्वम्, अत आह — **अन्यथेति**। [3]'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति नियमात्। अनुनासिकत्वेऽपि निरनुबन्धकपरिभाषा कथं न प्रवर्तते, अत आह — [4]**ततश्चेति**॥

[३, ३४०–३४१]

(नारायणीयम्) [5]**ततश्चेति**। ल्युडादीनामप्यनुनासिकत्वं प्रतिज्ञायते, अस्यापि, [6]'युवोरनाकौ' इत्यत्रापि। तेन तत्सामर्थ्यान्निरनुबन्धकपरिभाषा बाध्यते॥

रोगाख्यायां ण्वुल् बहुलम् ३.३.१०८.

[३, ३४१–३४३]

(उद्द्योतनम्) अर्थशब्दस्य प्रयोजनार्थत्वशङ्कां निराह — **क्रियेति**। [7]श्तिपः शकारस्य प्रयोजनमाह — **शित्करणादिति**। **यगपीति**। भावकर्मवाचित्वाभावेऽपीत्यर्थः। तदुदाहरति — **यथेति**। स्वरूपग्रहणं वारयति — **वर्णवाचिन इति**। तथाप्यक्षरवर्णादावतिप्रसक्तिः, अतः — **वर्णानुकरणादिति**। **इत्संज्ञेति**। **प्रयोजनाभावात्**. धातोरविहितत्वेनार्धधातुकत्वाभावादेव गुणाप्राप्तेरिति भावः। कारप्रत्ययवैयर्थ्यं शङ्कते — **नन्विति**। [8]**एवं हीति**। सामान्यकरोतेरवयवकरोतिः कर्मेति कल्पना त्वगतिका गतिरिति भावः। **एवमिति**। प्रातिपदिकत्वाद्विभक्त्युत्पत्तिरित्यन्वयः। **अभत्वेऽपीति**। [9]छस्य स्वादित्वाभावादित्यर्थः। आर्धधातुकत्वाभावादतो लोपो न भवतीति भावः॥

---

[1] गुहाशब्दस्यात्र — ङ.

[2] पा. सू. ७.१.१.

[3] परिभाषा ८२.

[4] प्रदीपे 'तत्र ल्युडादीनामपि' इत्यत्र 'ततश्च ल्युडादीनामपि' इति पाठोऽभिसंहित इति भाति।

[5] प्रदीपे 'तत्र ल्युडादीनामपि' इत्यत्र 'ततश्च ल्युडादीनामपि' इति पाठोऽभिमत इति भाति।

[6] पा. सू. ७.१.१.

[7] शपः — अ, ऋ, लृ.

[8] प्रदीपे 'एवं विज्ञायमाने' इत्यत्र 'एवं हि विज्ञायमाने' इति निर्णयसागरमुद्रिते पाठः।

[9] छस्यादित्वाभावादित्यर्थः — अ, ऋ; छस्याप्यजादित्वाभावादित्यर्थः — लृ.

[३, ३४१–३४३]

(नारायणीयम्) धात्वर्थयोर्निर्देशो धात्वर्थनिर्देश इति भ्रमं वारयति — **क्रियानिर्देश इति।** **बहुलवचनादिति।** सूत्रस्थबहुलग्रहणस्य तत्रत्येषु वार्तिकेष्वपि संबन्धात् क्वचिन्न भवतीति। यथा [1]"गुप्तिज्किद्भ्यः सन्' इत्यादौ। **यगपीति।** यथा शित्करणसामर्थ्यादिकर्तृवाचिन्यपि श्तिपि शबादयो भवन्ति, एवं भावकर्मवाचिन्यपि क्वचिद्यगपि भवतीत्यर्थः। ननु [2]"लीयतेः' इति श्यना निर्देशः स्यादिति, नेत्याह — **अत्र हीति।** 'ली श्लेषणे' इति क्र्यादौ पठ्यते। 'लीङ् श्लेषणे' इति दिवादौ। उभयोरप्यात्वविधौ ग्रहणमिष्यते। एतच्च यका निर्देश एव सिध्यति, नान्यथेत्यर्थः। किं वर्णादुच्चार्यमाणात् कारो विधीयते, नेत्याह — **वर्णवाचिन इति।** कथं वर्णवाचित्वमित्यत्राह — **वर्णानुकरणादिति।** तत्र ह्यनुकरणस्यानुकार्यार्थत्वाद् वर्णवाचित्वं संभवतीति भावः। तेन ककार इत्यादौ साच्कसमुदायादपि कारः सिद्धो भवति, अकारस्योच्चारणार्थत्वेन वर्णमात्रस्यानुकार्यत्वात्। **तथा क्वचिदिति।** बहुलवचनादेवेत्यर्थः। [3]**एवं हीति।** सामान्यकरोतेरवयवकरोतिः कर्मेत्यगतिका गतिरिति परिहारत्वेन तन्नाश्रितम्। नन्वकार इत्यादौ कारप्रत्ययस्याधातुविहितत्वात् कृत्संज्ञा न स्यादिति प्रातिपदिकत्वाभावात् विभक्त्युत्पत्तिर्न स्यादित्यत आह — **कारप्रत्ययस्येति। एवं मत्वर्थीय इति।** प्रातिपदिकत्वाद्विभक्त्युत्पत्तिरित्यर्थः। एवमप्यधातुविहितत्वादतो लोपाभावे [4]"यस्य' इति लोपेन भाव्यम्, न चासौ प्राप्नोति, अस्य छप्रत्ययस्य स्वादित्वाभावात् [5]तस्मिन् भसंज्ञायोगादित्यत आह — **अकारलोपस्त्विति। क्तिन्नपि बहुलवचनादिति।** न तु वासरूपविधिना, 'अस्त्रियाम्' इति प्रतिषेधात्। बहुलग्रहणोपजीवनायात्रेदं पठितम्, न तु [6]"स्त्रियां क्तिन्' इत्यत्र॥

कृत्यल्युटो बहुलम् ३.३.११३.

[३, ३४३]

(उद्द्योतनम्) सूत्रादधिकवचनं न भवति, किं तु सूत्रस्यैव न्यासान्तरमुच्यत इत्याह — **कृत्येति॥**

[३, ३४३]

(नारायणीयम्) कृत्यग्रहणमिति। अस्मिन्नेवार्थे वार्तिकस्य तात्पर्यम्, न तु ल्युड्ग्रहणस्य कर्तव्यत्वे। तत्त्वेवं सति न वक्तव्यमेवेति, तदाह — **तस्मिश्चेति। अनद्यतनेऽपीति।** [7]लकारस्य कृत्त्वादुपाधिव्यभिचारात्॥

---

[1] पा. सू. ३.१.५.

[2] पा. सू. ६.१.५१.

[3] प्रदीपे 'एवं विज्ञायमाने' इत्यत्र 'एवं हि विज्ञायमाने' इति निर्णयसागरमुद्रिते पाठः।

[4] पा. सू. ६.४.१४८.

[5] तस्मिन् संज्ञाया अप्रसङ्गादित्यत आह — घ.

[6] पा. सू. ३.३.९४.

[7] 'लकारस्य' इत्यनन्तरं तुशब्दोऽधिकः — ङ.

गोचरसंचरवहव्रजव्यजापणनिगमाश्च ३.३.११९.

[३, ३४३]

(उद्द्योतनम्) [1]'हलश्च' इत्यस्यापवादोऽयम्। तत्र 'प्रायेण' इति नास्तीति कथं तेन सिद्धिः, अत आह — **हलश्चेत्यत्रेति** ॥

[३, ३४३]

(नारायणीयम्) 'प्रायवचनात्' इत्येतद्व्याचष्टे — **हलश्चेत्यत्र प्रायग्रहणानुवर्तनादिति**। [2]'हलश्च' इत्यनेन करणाधिकरणयोर्घञि प्राप्ते तदपवादत्वेन घप्रत्ययान्ता एते निपात्यन्ते। तत्र प्रायग्रहणानुवर्तनादसति घञि [3]'पुंसि संज्ञायाम्' इति घ एव बाधकाभावाद् भविष्यतीति नार्थोऽनेन वचनेनेत्यर्थः ॥

हलश्च ३.३.१२१.

[३, ३४४]

(उद्द्योतनम्) उत्तरसूत्रे 'आधारावाय' इति निपातनाद् वार्तिके तयोर्ग्रहणं व्यर्थम्, अत आह — **अध्यायेति** ॥

[३, ३४४]

(नारायणीयम्) **प्रक्षिप्ताविति**। अन्यथा वार्तिके तत्पाठोऽनर्थकः स्यात् ॥

उदङ्कोऽनुके ३.३.१२३.

[३, ३४४]

(उद्द्योतनम्) ननु घञभावेऽपि घः किं न स्यात्, अत आह — **घञ्वदिति** ॥

[३, ३४४]

(नारायणीयम्) ननु 'उदकोदञ्चनः' इत्यत्र घञभावे घः स्यादिति, नेत्याह — **घञ्वदिति**। प्रायवचनादेवेत्यर्थः। [4]**ल्युडेवेति**। बाधकाभावादित्यर्थः ॥

---

[1] पा. सू. ३.३.१२१.
[2] पा. सू. ३.३.१२१.
[3] पा. सू. ३.३.११८.
[4] इति ल्युडेवेति — घ.

कर्तृकर्मणोश्च भूकृञोः ३.३.१२७.

[३, ३४५–३४६]

(उद्द्योतनम्) व्यावर्त्यमाह — **तेनेति**। ननु [1]'स्वाढ्यंभवम्' इत्ययुक्तम्, सोर्गतित्वेन धातोः प्राक्प्रयोगावश्यकत्वात्, अत आह — **अत्रेति**। **प्राक्प्रयोगः** यद्यपि न्याय्य इति शेषः। **खिदिति**। [2]'अनव्ययस्य' इत्युक्तेः सोर्मुमागमासंभवादिति भावः। अभिधेयत्वमेव किं न स्यात्, अत आह — **एतच्चेति**। भवतु खित्त्वसामर्थ्यात् तयोरुपपदत्वम्। ईषदादेः कथम्, अत आह — **चकारस्येति**॥

[३, ३४५–३४६]

(नारायणीयम्) ननु 'स्वाढ्यंभवम्' इत्यादावपि गतित्वात् सुदुरोः प्राक् प्रयोगः स्याद्धातो[3]-रित्यत आह — **स्वाढ्यमिति**। **खलः खित्करणसामर्थ्यादिति**। अनव्ययस्य मुम् विधीयते। तत्रेषदादीनां धातोश्चानन्तर्ये सति खित्करणमनर्थकं स्यादिति कर्तृकर्मणोरेव धातोरनन्तरं प्रयोगोऽनुमीयत इत्यर्थः। ननु 'ईषदाढ्यंभवम्' इत्यादौ खित्करणस्य सावकाशत्वात् 'स्वाढ्यंभवम्' इत्यादौ [4]'ते प्राग् धातोः' इति वचनात् सुदुरोरेव प्राक् प्रयोगः स्यात्। नैतत्, 'स्वाढ्यंभवम्' इत्यत्रापि द्वयोरुपपदत्वात् पर्यायेण पूर्वनिपाते प्राप्ते यथा [5]'उपसर्जनं पूर्वम्' इत्येतत् खित्करणाद् बाध्यते, एवं सुदुरोरपि धातोः प्राक् प्रयोगस्तेनैव बाधिष्यते। [6]यद्वा कृतो बहुलवचनस्यायं महिमा, यदुत स्वाढ्यंभवमित्यादौ कर्तृकर्मणोरेव प्राक्प्रयोगः। 'कूलमुद्रुजः' इत्यादौ तु गतेः, खित्करणादिति। अन्यथेषदादिष्वेव प्रत्ययविधानात् खित्करणमनर्थकं स्यात्। **संनियोगार्थत्वादिति**। समुच्चयार्थत्वादित्यर्थः॥

अन्येभ्योऽपि दृश्यते ३.३.१३०.

[३, ३४६]

(उद्द्योतनम्) सूत्रादेव सिद्धेर्वचनं व्यर्थम्, अत आह — **छन्दसीति**। तथा च भाषायां शास्यादिव्यतिरिक्तेभ्यो युज् न भवतीति भावः॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य तृतीये पादे प्रथममाह्निकम्

[३, ३४६]

(नारायणीयम्) वार्तिकप्रयोजनमाह — **छन्दसीति**॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य तृतीये पादे प्रथममाह्निकम्॥

---

[1] स्वाढ्यंभवतीत्ययुक्तम् — अ.
[2] पा. सू. ६.३.६६.
[3] धातोः प्राक् प्रयोग इत्यन्वयः।
[4] पा. सू. १.४.८०.
[5] पा. सू. २.२.३०.
[6] यद्वा विकृतः — ङ.

तृतीयाध्यायस्य तृतीयपादे द्वितीयमाह्निकम्

वर्तमानसामीप्ये वर्तमानवद्वा ३.३.१३१.

[३, ३४६–३४८]

(उद्द्योतनम्) समीपमेवेति। अस्मिन्नपि पक्षे स षष्ठीसमास एव। **नन्विति**। असामर्थ्यादित्यर्थः। **पारम्पर्येणेति**। वर्तमाननिरूप्यत्वात् [1]सामीप्यस्येत्यर्थः। **अस्मिन्निति**। पूर्वस्मिन् समीपस्य गुणत्वाभावान्निषेधाप्रसङ्गः। सामान्यग्रहणेऽप्याह — **अन्ये त्विति**। **समासेति**। गुणस्येत्यादिः। तर्हि स्वार्थे [2]ष्यञ एव ज्ञापकमस्तु, अत आह — **अपरे त्विति**। **वर्तमानसहचरितानामिति**। 'वर्तमानः' इति प्रथमान्तशब्देन तत्कालविहिताः प्रत्यया लक्षणयोच्यन्त इत्यर्थः। ननु वर्तमानग्रहणेन तत्कालविहितप्रत्ययान्तधातुग्रहणे न धातुमात्रात् प्रसङ्गः, अत आह — **वर्तमानेति**। प्रत्ययस्यैव साक्षात् कालसंबन्धादित्यर्थः। संकरमेवाह — [3]**यस्मादिति**। कुत्रोदाह्रियते, अत आह — **वृत्तिष्विति**। भाष्यप्राचीनव्याकरणवृत्तिष्वित्यर्थः। ननु शतृशानचोर्वर्तमानकाले विधानात् तदर्थमतिदेशोऽनुपयुक्तः, अत आह — **लट इति**। कालान्तरविहितलडादेशार्थमतिदेश इत्युक्तं निराह — [4]**लण्मात्रस्येति**। न वर्तमानविहितस्यैवेत्यर्थः। **तत्र** शत्रादिविधौ। 'वर्तमानग्रहणस्य [5]'तत्रानपेक्षणात्' इत्युक्तं निराह — **लट् स्म इति**। ननु 'वर्तमानवत्' इत्यनेन भूतभविष्यतोर्विधीयमानः कथमविशेषविहितः, अत आह — **वर्तमानलक्षणादिति**॥

[३, ३४६–३४८]

(नारायणीयम्) समीपमेवेति। चातुर्वर्ण्यादित्वात् ष्यञ्। अस्मिन् पक्षेऽपि षष्ठीसमासः, वर्तमानस्य समीपे यौ भूतभविष्यन्तौ, अत्र वर्तमानवत् प्रत्यया भवन्तीत्यर्थः। **ननु भूतभविष्यतोरिति**। भूतभविष्यन्तौ प्रति वर्तमानस्य यत् सामीप्यं तत्रातिदेशोऽनर्थकः, ये हि वर्तमाने प्रत्ययास्ते समीपभूतेऽपि [6]तस्मिन् भवन्त्येव। तस्माद्वर्तमानं प्रति यद् भूतभविष्यतोः सामीप्यं तदत्र वर्तमानसामीप्यमिति भण्यत इति वर्तमानस्य [7]सामीप्येनासंबन्धात् समासानुपपत्तिरित्यर्थः। **पारम्पर्येणेति**। समीपभूतभविष्यद्द्वारक[8]सामीप्यस्य [9]वर्तमानेन संबन्ध इति देवदत्तस्य गुरुकुलमित्यादाविव समाससिद्धिरित्यर्थः। **शौक्ल्यादीनामिति**। लोकप्रसिद्धाः शुक्लादय एव गुणशब्देन तत्रोच्यन्ते, न तु [10]संसर्ग्यादिलक्षणलक्षित इत्यर्थः। **अनित्यः समासप्रतिषेध**

---

[1] सामीप्यत्वस्येत्यर्थः — अ, ऋ, लृ.
[2] ष्यञेव — अ, ऋ, लृ.
[3] अन्यस्मादिति — अ, ऋ, लृ.
[4] प्रदीपे 'लण्मात्रादेशौ' इत्यत्र 'लण्मात्रस्यादेशौ' इत्यत्रंभट्टपाठ इति भाति।
[5] तत्रानपेक्षत्वादित्युक्तं — अ.
[6] वर्तमान इत्यर्थः।
[7] सामीप्येन संबन्धात् — ङ.
[8] समीपस्य — ङ.
[9] 'वर्तमानेन' इत्यस्यानन्तरं 'न' इत्यधिकम् — घ.
[10] संसर्गादि — ङ.

इति। ततश्च 'यत्नगौरवम्' इत्यादीनां साधुत्वसिद्धिः[1]। **वर्तमान इत्येतावतेति**। सूत्रे प्रथमान्तो वर्तमानशब्दो निर्देष्टव्यः। तेन च वर्तमानसहचरिताः प्रत्यया [2]उपचारादुच्यन्त इत्यर्थः। 'संकरोऽपि स्यात्' इत्येतदेव दर्शयति — [3]**यस्माद्धातोरिति**। यथा पूङ्यजोः शानन् वर्तमाने विहितः तत्सामीप्येऽन्यस्मादपि स्यात्। वत्करणात्तु सर्वसादृश्याद् येन विशेषणेन प्रकृत्यादिना ये प्रत्यया विहितास्ते तथैव वर्तमानसामीप्ये भविष्यन्तीत्यर्थः। कुत्रोदाह्रियत इत्यत्राह — **वृत्तिष्विति**। ननु वर्तमाने यः प्रत्ययः स भूतभविष्यतोरनेनातिदिश्यते। शत्रादिस्तु लण्मात्रादेशत्वाद्वर्तमाने विहित इत्याशङ्क्याह — **लटः शतृशानचाविति**। **कालान्तरविहितस्येति**। [4]'लट् स्मे' इत्यादिना भूतादौ विहितस्येत्यर्थः। ननु शत्रादेर्लडादेशत्वं प्रयोजनवादिनोऽप्यभिमतमित्यत्राह — **लण्मात्रादेशाविति**। [**पूङ्यजोरिति**।] पूङ्यजोः शानन्नादयो न लादेशा इति स्थापितत्वात्। ननु [5]वर्तमानवदतिदेशेन भूतभविष्यतोर्विधीयमानः प्रत्ययः कथम् 'अविशेषविहितः' इत्युच्यत इत्यत आह — **वर्तमानलक्षणादिति**। **अन्यस्मिन्विशेष इति**। समाप्तायामपि क्रियायां वर्तमानस्य यः शेषः संस्कारानुवृत्तिलक्षणः, तद् भूतविषयं वर्तमानसामीप्यम्। यः प्रारम्भो मानसः संकल्पो वर्तमानस्य [6]तद् भविष्यद्विषयमिति विवेकः। उक्तं च —

> [7]'अध्वनो वर्तमानस्य यः शेषो य उपक्रमः।
> तद्वर्तमानसामीप्यं शास्त्रे भेदेन दर्शितम्॥' इति॥

आशंसायां भूतवच्च ३.३.१३२.

[३, ३४८–३५०]

(उद्द्योतनम्) नन्वनेन भविष्यति भूतवत् वर्तमानवच्च प्रत्ययविधिरिष्यते। स न संभवति, भविष्यत्कालबोधकाभावात्, आशंसायां [8]वर्तमानवत्त्वाभावाच्च, अत आह — **आशंसेति**। **विषयस्येति**। सिद्धे इच्छाविरहादिति भावः। तथाप्याशंसाया अभिधेयत्वे कथं भविष्यल्लाभः, अत आह — **इह चेति**। तथाप्यनद्यतने भूतत्वसत्त्वादतिप्रसङ्गतादवस्थ्यम्, अत आह — [9]**अत्रेति**। [10]**सामान्यातिदेश इति**। **यद्यविशेष इति**। [11]'विरूपाणामपि समानार्थानाम्' इत्येकशेषप्रसङ्गादिति भावः। [12]**शब्दस्वरूपेति**। तस्य भिन्नत्वाद् भिन्नार्थत्वान्नैकशेष इत्यर्थः। तर्हि 'अविशेषात्' इत्ययुक्तम्, अत आह — **आशंसेति**। अर्थाविशेषादिति वार्तिकार्थः। यद्वा, अर्थभेदे लक्षणविशेषाभावादित्यर्थः। अर्थाभेदमेवाह — **आशंसेति**। आशंसायाः संभावनावयवत्वे संभावनायां विहितमाशंसायामपि स्यात्, अत आह — **अवयवशब्द इति**। 'प्रधारितोऽर्थ आशंसा'

---

[1] 'सिद्धिः' इत्यस्यानन्तरम् इतिशब्दोऽधिकः—घ.
[2] लक्षणयेत्यर्थः।
[3] अन्यस्माद्धातोरिति – घ, ङ.
[4] पा. सू. ३.२.११८.
[5] समीपः — ङ.
[6] तद्भूतभविष्यद्विषयमिति — ङ.
[7] वाक्यपदीयम् ३.९.१०२.
[8] वर्तमानत्वाभावाच्च — अ.
[9] तत्रेति — अ, ऋ, लृ.
[10] इदं प्रतीकग्रहणमात्रं दृश्यते 'अ, ऋ, लृ' कोशेषु। उपरि विवरणं न दृश्यते।
[11] का. वा. १.२.६४–२३. एकार्थानामपि विरूपाणामित्यस्यार्थतोऽनुवादोऽयम्।
[12] शब्दरूपेति — अ, ऋ, लृ.

इत्ययुक्तम्, विषयविषयिणोर्भेदात्, अत आह — **इदमिति**। [1]**विरुद्धप्रत्ययः** विरोधिकारणम्, प्रतिबन्धकमिति यावत्। तस्य प्राप्तिः **उपनिपातः** तस्मिन्नसति, असति प्रतिबन्धक इति यावत्। 'अर्थासंदेहो वा' इत्येतद्वार्तिकं दूषयति भाष्यकारः — **आचार्यप्रवृत्तिरिति**। तद् व्याचष्टे — **यदीति**। [2]**अयमर्थः** अलमर्थः। अतः पूर्वसमाधानमेव सम्यगित्याह — भाष्ये **तस्मादिति**॥

[३, ३४८–३५०]

(रत्नप्रकाशः) ....[3]**रित इति**। इदं मे भूयादिति मनसा विषयीकृतोऽर्थ आशंसाविषयत्वादाशंसाशब्देनोक्तः। अन्ये त्वप्रधारित इति पठन्ति। अनिर्धारितोऽवश्यंभावितयानिश्चित[4] इत्यर्थः। संभावनं चासति विधुरप्रत्ययोपनिपाते[5] भवितव्यमनेनेति ज्ञानमित्यनयोर्भेद इत्यर्थः' इति। तदपि न, आशंसा नामाप्रधारितोऽर्थः, 'संभावनं नाम प्रधारितोऽर्थ इति भाष्येऽप्रधारितप्रधारितशब्दयोर्विषयभेदेनैव निर्दिष्टत्वेनैकस्मिन्नेव विषये उभयोर्निदर्शनानौचित्यात्। भाष्यकारानभिमतस्य प्रधारिताप्रधारितशब्दार्थस्य संभावनाशंसयोर्भेदस्य च कथने बीजाभावाच्च। इदानीमाशंसासंभावनयोरत्यन्तभिन्नार्थकत्वान्नोक्ताशङ्का युक्तेत्याशयेनाह — **अर्थासंदेहो वेति**। आशंसासंभावनार्थविषयकोऽसंदेहः, तदर्थैकत्वशङ्काभाव एवेत्यर्थः। **अस्येति**। आक्षेप्तुरित्यर्थः। उचित इति शेषः। इदं समाधानमयुक्तमित्याह — **आचार्येति**। आद्यमेव समाधानं युक्तमित्युपसंहरति — **तस्मादिति**॥

[३, ३४८–३५०]

(नारायणीयम्) भाष्ये प्रथममाशंसायाः स्वरूपमुक्तम् 'आशंसा नाम भविष्यत्काला' इति। तद् व्याचष्टे — **आशंसेति**। यद्याशंसा प्रार्थनास्वभावा तर्हि सा ज्ञानविशेषरूपत्वाद्वर्तमानैवेति कथं 'भविष्यत्काला' इत्युक्तेत्यत्राह — **सा वर्तमानापीति**। प्रार्थ्यमानस्य विषयस्य तदानीमनागतत्वाद्विषयधर्मेणाशंसा 'भविष्यत्काला' इति निर्दिष्टेत्यर्थः। नन्वेवंभूताया आशंसायाः प्रयोक्तृधर्मत्वात् कथं प्रत्ययार्थत्वं स्यादित्यत्राह — **इह चेति**। **आशंसायां विषय इति**। उपाध्यायागमनादिकाशंसायुक्तेन प्रयोक्त्रा वाक्यमिदं प्रयुक्तमिति गम्यमानत्वादाशंसायाः शब्दसंस्कारं प्रति निमित्तत्वमाबाधादिवदुपपद्यते। ततश्च भविष्यत्यर्थे भूतवद्वर्तमानवच्च प्रत्यया अनेन विधीयन्त इत्याह — **आशंस्यमानेति**। उक्तं च —

[6]'आशंसा वर्तमानापि विषयेण भविष्यता।
भाष्ये भविष्यत्कालेति कार्यार्थं व्यपदिश्यते॥' इत्यादि।

'अत्र' इत्यनेन नोदाहरणं निर्दिष्टम्, किं तर्हि, सूत्रमित्याह — **अत्र सूत्र इति**। **सामान्यातिदेश इति**। यथा 'ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्' इत्यत्र ब्राह्मणसामान्यप्रयुक्तं कार्यं क्षत्रियेऽतिदिश्यते,

---

[1] प्रदीपे 'विधुरप्रत्ययोपनिपाते' इत्यत्र 'विरुद्धप्रत्ययोपनिपाते' इत्यन्नंभट्टपाठ इति भाति।

[2] प्रदीपे 'नियमेनालमर्थो गम्यते' इत्यत्र 'नियमेनायमर्थो गम्यते' इत्यन्नंभट्टाभिमतः पाठ इति ज्ञायते।

[3] इतः प्राक्तनग्रन्थो नास्ति — 'प, ब' कोशयोः।

[4] अनिश्चित इति छेदः।

[5] 'संभावनं नाम प्रधारितोऽर्थः' इति नास्ति — ब.

[6] वाक्यपदीयम् ३.९.१०३.

न माठरादिविशेषप्रयुक्तम्, तद्वदत्रापीत्यर्थः। **यद्यविशेष इति**। [1]"विरूपाणामपि समानार्थानाम्' इत्येकशेषेण द्वन्द्वस्य बाधनात्। [2]**शब्दस्वरूपेति**। शब्दस्वरूपमिहानयोरर्थः, तच्च भिन्नमिति न समानार्थत्वमित्येकशेषाभावाद् द्वन्द्व इत्यर्थः। एवं [3]च सत्ययं वार्तिकार्थः संपद्यत इत्याह — **आशंसेति**। एतदेवोपपादयति — **आशंसानागतेति**। ततश्च द्वयोरप्यनागतवस्तुविषयत्वादविशेष इत्यर्थः। ननु संभावनावयवश्चेदाशंसा संभावनायां विधीयमानं कार्यमाशंसायामपि प्राप्नोतीत्यत आह — **अवयवशब्द इति**। प्रधारितत्वं मनसा विषयीकृतत्वम्, न तु निश्चितत्वमित्याह — **इदं मे भूयादिति**। नन्वस्याप्यर्थस्याशंसारूपत्वाभावात् कथं सामानाधिकरण्यमित्यत्राह — **आशंसाविषयत्वादिदि**। **कारणयोग्यतावशादिति**। कारणवशाद्या योग्यता तद्वशाद्यः प्राप्तुं शक्यः सोऽभिनीत उक्त इत्यर्थः। [4]"संभावनं नाम' इत्यादिभाष्यं व्याचष्टे — **संभावनं चासतीति**। **विधुरप्रत्ययः** विरोधिकारणम्, तस्योपनिपातः प्राप्तिस्तस्मिन्नसतीत्यर्थः। यथा 'अपि पर्वतं शिरसा भिन्द्यात्' इति। **अलमिति विशेषणं नोपाददीतेति**। उपादानात्तु ज्ञायते संभावने नालमर्थ्यमपि गम्यत इति। तस्मात् पूर्वोक्त एव परिहार इति भाष्यकृदाशयः॥

क्षिप्रवचने लृट् ३.३.१३३.

[३, ३५०–३५३]

(उद्द्योतनम्) [5]"आशंसायां भूतवच्च' इत्येव सिद्धत्वाद् वचनानर्थक्यम्, अत आह — **अनाशंसार्थमिति**। ननु 'वृष्टश्चेत्' इत्याशंसा प्रतीयते, कथमनाशंसार्थत्वम्, अत आह — **वृष्टश्चेदिति**। स्वरूपकथनं नाशंसेत्यर्थः। भविष्यत्प्रतिषेधमात्रेण निष्पन्नत्वं कथं लभ्यते, अत आह — **अप्शालिबीजेति**। उप्तानां बीजानामप्संयोगे[6] सति क्रमेण शालीनां निष्पत्तिरित्यप्संयोग एव निष्पत्त्युपचारादयं प्रयोग इत्यर्थः। **तत्रैव** अब्बीजसंयोग एव। तात्पर्यार्थं तावदाह — [7]**कारणसंबन्धीति**। सत्कार्यवादाश्रयेणेत्यर्थः। कारणकालव्यवस्थापनस्य प्रयोजनमाह — **कारणान्तरेति**। अक्षरार्थमाह — **हेतुभूतस्येति**। **संप्रेक्षितत्वात्** विवक्षितत्वात्। ननु तदसमानकालस्य तत्कालविवक्षा कथम्, अत आह — **कारणस्यैवेति**। तत्र हेतुः — **कार्यकारणयोरिति**। नन्विदं व्याख्यानं भाष्यविरुद्धम्, अत आह — **भाष्यकारस्त्विति**। **एतद्वस्तु** एतमर्थम्। स्वोक्तार्थपर्यवसायित्वेन [8]तद्व्याचष्टे — **हेतुत्वमिति**। [9]अथवा, भूतः कालो यस्य भूतकालं वर्षम्, हेतुत्वं तस्य विशेषणम्। अस्मिन् पक्षे कालस्य भूतत्वं श्रौतम्, पूर्वत्र सामर्थ्यलभ्यम्, मेघद्वारश्च [10]"वर्षकालसंबन्धः, इति विशेषो विज्ञेयः। निष्पन्नस्य जननप्रतीक्षा व्याहता, अत आह — **अभिव्यक्तिरिति**। निष्पत्तिमात्रमर्थक्रियायां तन्त्रम्, किमभिव्यक्त्या, अत आह — **एतदुक्तमिति**। तर्ह्यर्थक्रियाया-

---

[1] का. वा. १.२.६४–२३. 'एकार्थानामपि विरूपाणाम्' इत्यस्यार्थतोऽनुवादः।

[2] शब्दरूपेति — ङ.

[3] चकारो नास्ति — ङ.

[4] संभावितं नामेत्यादि — घ, ङ.

[5] पा. सू. ३.३.१३२.

[6] 'अप्संयोगे सति' इत्यादि 'निष्पत्तिरिति' इत्यन्तं नास्ति — अ.

[7] करणसंबन्धेति — अ; कारणसंबन्धेति — ऋ, लृ.

[8] 'तत् इति नास्ति — अ.

[9] अथवेति — अ, ऋ, लृ.

[10] वर्षस्य कालसंबन्धः — अ.

मसमर्थस्य कार्यस्य पूर्वं सत्त्वे किं मानम्, अत आह — **न चेति**। [1]अत्यन्तासतः शशविषाणवदुत्पादासंभवेन पूर्वं सूक्ष्मरूपेण विद्यमानस्यैव कार्यस्य स्थूलरूपेणोत्पत्त्यङ्गीकारादिति भावः। नन्वेवमब्बीजसंयोगात् पूर्वमपि 'संपन्नाः शालयः' इति प्रयोगः स्यात्, अत आह — **कारणसामग्र्येति**। यत्र स्थूलाभिव्यक्तिकारणं तत्रैव सूक्ष्मकार्यनिश्चयः, नान्यत्रेति भावः। **उत्पादः** सत्त्वम्। **अनुमानं** निश्चयः। केचित्तु सामग्र्या सूक्ष्म[2]कार्यस्योत्पादानुमानादित्यर्थः। न च कार्येण सामग्र्यनुमीयते, तया च तदित्यन्योन्याश्रयः, दृष्टकारण[3]मेलनेनादृष्टानुमानाय सामग्र्यनुमानस्य कार्यज्ञानं विनापि संभवात् तया कार्यानुमानसंभवादिति व्याचक्षते। तत्र सत्कार्यवादिपक्ष एव सूक्ष्मरूपोत्पत्तिरीषदभिव्यक्तिरित्यभ्युपेयम्, असत्कार्यपक्षे सूक्ष्मकार्योत्पत्तेरभावादिति ज्ञेयम्। अस्तिधात्वर्थकानामिति भ्रमं वारयति — **सतेति**। कर्तुर्विद्यमानत्वं न सर्वविभक्तिशासने हेतुः। तस्मिन् सत्यपि क्रियायाः कालत्रययोगे सर्वविभक्तिसंभवात्, अत आह — **ततश्चेति**। 'अवात्वात्' इत्यनेन स्वकाल एव विभक्तीनां प्रयोगो दृश्यते, न तु वर्तमानकाल एवेत्युक्तम्। तद्वचनकरणे न सिध्येदित्याह — **एतदुक्तमिति**। कूपसत्ताया वर्तमानत्वेऽपि कालत्रययुक्तेन्द्रियव्यापारविशिष्टतया भिन्नायाः कालत्रयविशेषयोगमौपाधिकं विवक्षित्वा सर्वविभक्तिप्रयोगोऽसंकरेणैव भवतीति वचनं व्यर्थमिति 'इह किंचित्' इत्यादिभाष्येणोक्तम्। तद् व्याचष्टे — **इन्द्रियव्यापारेति**। सतां विद्यमानानां या सत्ता सैवेन्द्रियसंबन्धाद्विशिष्यते, भूतादिरूपेण भिद्यत इत्यर्थः। नन्वौपाधिकभेदः किमर्थं ग्राह्यः, अत आह — **भेदेनेति**। एकस्मिन् भेदव्यवहारः सर्वत्रौपाधिक एवेति भावः। नन्वेवं भविष्यति भूते च कथं कूपोऽस्तीति प्रयोग इत्याशङ्क्य [4]'यदा बुद्धिकर्म' इति भाष्यम्। तत्तात्पर्यसंग्रहः — **अस्तित्वमिति**। **समासादनात्** इन्द्रियसंबन्धाद्यः सताभेदः स तत्र न विवक्षितः॥

[३, ३५०–३५३]

(रत्नप्रकाशः) सिद्धं त्विति। अप्शालिबीजसंयोग एव शालीनां निष्पत्तिरित्युपचारस्य लोकप्रसिद्धत्वादनिष्पन्ने निष्पन्नशब्दो न शिष्य इति भावः। यदैव वृष्टिर्भवति तदैवोप्ताः शालय उत्पन्नाः शालय इत्याशयेन समाधानान्तरमाह — [5]**हेतुभूतकालसंप्रेक्षित्वादिति**। हेतुभूतस्य हेतुस्वरूपस्य वर्षादेः कालो हेतुभूतकालः, तं संप्रेक्षत इति हेतुभूतकालसंप्रेक्षी, तस्य भावात् हेतुभूत[6]कालसंप्रेक्षित्वादित्यर्थः। प्रयोगस्येति शेषः। **सिद्धमिति**। 'निष्पन्नाः' इति रूपमिति शेषः। हेतुभूतकालशब्दस्य बहुव्रीह्याश्रयेणाप्युक्तवचनं व्याख्यातुं शक्यत इत्याशयेन व्याचष्टे — **हेतुभूतकालमिति**। हेतुभूतस्य मेघादेः काल एव कालो यस्य तदित्यर्थः। [7]**वर्षकालेति**। वर्षस्य काल एव कालोऽस्याः सेत्यर्थः। **क्रियेति**। निष्पत्तिक्रियेत्यर्थः। तत्र शङ्कते — **यदीति**। **निष्पन्नोऽर्थ इति**। वर्षकाल इति शेषः। सिद्धान्त्याह — **अन्यदिति**। वक्तव्यादन्यत् अवक्तव्यमित्यर्थः। **यत्तु तदिति**। यत्तु 'यदि तर्हि निष्पन्नोऽर्थः' इत्यादिवाक्यतात्पर्यविषयभूतमित्यर्थः।

---

[1] अत्यन्तासत्त्वस्य शशविषाणवत् — अ.

[2] कार्यस्योत्पादनानुमानादित्यर्थः — अ.

[3] मेलनेनादृष्टमनुमाय सामग्र्यनुमानस्य — ऋ, लृ.

[4] भाष्ये 'यदा हि बुद्धिकर्म' इत्यस्य हिशब्दं विनानुवादः।

[5] वार्तिके 'हेतुभूतकालसंप्रेक्षितत्वात्' इत्यत्र 'हेतुभूतकालसंप्रेक्षित्वात्' इति पाठोऽभिमतः॥ संप्रेक्षितत्वादिति — प.

[6] कालासंप्रेक्षितत्वादित्यर्थः — प; कालासंप्रेक्षित्वादित्यर्थः — ब.

[7] 'वर्षकाले काल इति शेषः' इत्येवास्ति। 'वर्षस्य' इत्यादि 'निष्पन्नोऽर्थ इति' इत्यन्तं नास्ति — ब.

[1]'यत्तत् सास्नालाङ्गूल' इत्यादिपस्पशाह्निक इवात्रापि यत्तदोः सहप्रयोगो ज्ञेयः। किं तदित्यत आह — **निष्पन्नो[ऽर्थो] न निष्पन्न इति**। सिद्धान्तिनो निष्पन्नत्वेन योऽभिमतः स न निष्पन्न इति तत्तात्पर्यविषयभूतमित्यर्थः। **स निष्पन्नोऽर्थ इति**। स तु निष्पन्न एवार्थ इत्यर्थः। 'निष्पन्न-कार्याणि किं न क्रियन्ते' इत्यस्यावक्तव्यत्वमुपपादयति — **अवश्यं खल्वपीति**। **जननादीनीति**। जननमभिव्यक्तिः। अयं भावः — विद्यमानोऽप्यर्थोऽनभिव्यक्तोऽर्थक्रियां न करोति। नैतावता तस्यानिष्पन्नत्वं भवति, कारणात्मकस्य कार्यस्य कारणकलापसमवधाने निष्पन्नस्य सूक्ष्मरूपेणाव-स्थितिसंभवादिति। **अस्त्यर्थानामिति**। सत्तावाचिनामित्यर्थः। पञ्चम्यर्थे पर्यवसन्ना सा षष्ठी ज्ञेयास्त्यर्थेभ्य इति। **भवन्त्यर्थ इति**। लडर्थ इत्यर्थः। **सर्वा विभक्तय इति**। सर्वे लकारा इत्यर्थः। तिङरूपविभक्तिस्थानित्वाल्लकाराणां विभक्तित्वोपचारः। **कर्तुर्विद्यमानत्वादिति**। तत्त-ल्लकारप्रयोगकाल इति शेषः। तथा च सर्वदा तत्र सत्ता वर्तमानैवेति लडर्थता युक्तेति भावः। [2]**यथास्वकालमिति**। स्वासां स्वो वा कालः स्वकालः, तमनतिक्रम्येत्यर्थः। **अवात्वादिति**। अविकल्पितत्वादित्यर्थः। तदेव विवृणोति — **यन्न वा भाष्यन्त इति**। **यत्** यस्मात् न विकल्पेन भाष्यन्ते तस्मादित्यर्थः। यदि विकल्पेन ता वर्तमानकाले विहिताः स्युस्तदा वर्तमानकाले प्रयुक्ता इति वक्तुं शक्यते, न तु ते विकल्पेन विहिताः। अतः स्वस्वकाल एव ताः प्रयुक्ता इति ज्ञायत इति भावः। ननु सर्वानुभवसिद्धोऽयमर्थः — वर्तमान एव तत्र सर्वा विभक्तयः प्रयुज्यन्त इति। तदनुसारेणैव सर्वा विभक्तयस्तत्र पर्यायेण विधेया इत्युच्यते। अस्मिन्नवसरे 'अवात्वात्' इति हेतुना स्वस्वकालप्रयोगसाधनं न युज्यते, बाधितार्थकत्वाद्धेतोरित्यत आह — **असिद्धविपर्यासश्चेति**। लडर्थे सर्वा विभक्तयः प्रयुज्यन्त इति [3]विपर्यासोऽसिद्धः, नानुभवारूढ इत्यर्थः। ननु कर्तुः सर्वदा वर्तमानत्वात् सर्वासां विभक्तीनां वर्तमाने प्रयुक्तत्वसंभवात् सूत्रकारेण वा ते वर्तमाने कुतो न विकल्पेन विहिताः। सूत्रकारेण ते विकल्पेन [न] विहिता इत्येतावता विपर्यासो वा कथं न सिद्ध इत्याशयेन पृच्छति — **किं पुनरिति**। उत्तरमाह — **इहेति**। **इन्द्रियकर्मेति**। इन्द्रिय-संनिकर्ष इत्यर्थः। **बुद्धिकर्मेति**। अन्तःकरणक्रिया, व्यवसायरूपेत्यर्थः। तथा चेन्द्रियसंनिकर्ष-भूतभविष्यद्वर्तमानताप्रयुक्तमिन्द्रियसंनिकृष्टसत्तायां भूतभविषयद्वर्तमानत्वमिति यथास्वकालमेव सर्वा विभक्तयो भवन्ति। अतः सिद्धो विपर्यासाभावः, युक्तश्च विकल्पानुशासनाभावश्चेति भावः। **इन्द्रियकर्मेति**। इन्द्रियकर्मप्रयुक्त इन्द्रियसंनिकृष्टसत्ताभेद इत्यर्थः। **एता इति**। सर्वा इति शेषः। **बुद्धिकर्मेति**। बुद्ध्यवगतं सर्वदा वर्तमानत्वमित्यर्थः। [4]**वर्तमानेति**। लडेवेत्यर्थः। तदुक्तं हरिणा —

> [5]सतामिन्द्रियसंबन्धात् सैव सत्ता विशिष्यते।
> भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः॥
> अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते।
> यः समासादनाद् भेदः स तत्र न विवक्षितः॥ इति॥

[३, ३५०–३५३]

(नारायणीयम्) अनाशंसार्थमिति। आशंसायां [6]पूर्वसूत्रेण भूतवदतिदेशाद् भूतप्रत्ययस्य सिद्ध-

---

[1] महाभाष्ये पस्पशाह्निके।

[2] वार्तिके 'यथा स्वं कालम्' इत्यत्र 'यथास्व-कालम्' इति निर्णयसागरमुद्रिते पाठः।

[3] विषयो नासिद्धः — ब.

[4] वर्तमानतेति — प, ब.

[5] वाक्यपदीयम् ३.९.११२, ११३.

[6] पूर्वोक्तसूत्रेण — घ.

त्वात्। एतदेव विशदयति — **वृष्टश्चेदिति**। न त्वाशंसात्र गम्यत इत्यर्थः। तदयं वार्तिकार्थः — **अनिष्पन्ने** भविष्यत्यर्थे, सामग्रीसंनिधानात् संभाव्यमाननिष्पत्तावित्यर्थः। तत्र भूतप्रत्यया वक्तव्याः, 'अनिष्पन्नत्वात्' इति हेतुकथनेनोपचारेणायं प्रयोगो नेति दर्शयति। अनागतरूपेणैवात्र कार्यं प्रतीयते, न त्वतीतावस्थोपचर्यते। अत एवोक्तं भाष्ये 'तत्र भवितव्यं [1]निष्पत्स्यन्ते शालयः' इति। 'भविष्यत्प्रतिषेधात्' इत्यत्र तात्पर्यं दर्शयति — **अप्शालीति**। समग्रसाधनसंपत्तौ फलनिष्पत्तिर्मुख्यो निष्पदिधात्वर्थः। स यदा जलशालिबीजसंबन्धमात्रेऽवयवेऽध्यारोपेण वर्तते तदा तावन्मात्रस्य वर्षमात्रेण संपत्तेर्धात्वर्थस्यातीतत्वाद् भूतप्रत्ययसिद्धिरित्यर्थः। उक्तं च —

[2]'अप्शालिबीजसंयोगे वर्तते निष्पदिर्यदा।
तत्रावयववृत्तित्वाद भविष्यत्प्रतिषेधनम्॥ इति।

यदा तु मुख्य एव निष्पत्त्यर्थस्तदा भूतप्रत्ययोपपत्ति वक्तुं पक्षान्तरमुक्तम् — वार्तिके 'हेतुभूतकालसंप्रेक्षितत्वाद्वा' इति। तद्व्याचष्टे — **कारणसंबन्धीति**। कारणस्य वर्षस्य संबन्धी योऽतीतः कालः स कार्ये निष्पत्तिलक्षण उपचाराद्व्यवस्थाप्यते। उपचारे प्रयोजनमाह — **कारणान्तरेति**। एवं तात्पर्यार्थमुक्त्वा तत्र वार्तिकं योजयति — **हेतुभूतस्येति**। ननूक्तेऽर्थे भाष्यं नानुगुणमित्यत आह — **भाष्यकारस्त्वेतदेव वस्त्विति**। वस्त्वर्थ एव भाष्ये व्याख्यातः, न शब्दार्थ इत्यर्थः। हेतुशब्दो वृत्तौ हेतुत्वलक्षणं भावमाचष्टे 'भू प्राप्तौ' इत्यस्मात् क्ते भूतशब्द इत्याह — **हेतुत्वं प्राप्तस्येति**। हेतुभूतस्य कालः कालो यस्येति समासार्थं दर्शयति — **यः कालः स एवेति**। ततश्च मेघोदयं दृष्ट्वा 'वृष्टश्चेत्' इत्यादि वाक्यं प्रयुङ्क्त इति दर्शयति। [3]**अथवेति**। अस्मिन् पक्षे हेतुशब्देन वर्षमेवोच्यते, न मेघोदयादि। ननु निष्पन्नस्य जननप्रतीक्षा विरुद्धेत्यत्राह — **जननमभिव्यक्तिरिति**। यद्यनभिव्यक्तस्तर्हि निष्पन्नत्वं कथमवसीयत इत्यत आह — **न चैतावतेति**। **कारणसामग्र्येति**। यद्यपि कार्यैकसमधिगम्या सामग्री, तया च कार्यानुमानेऽन्योन्यसंश्रयत्वदोषः, तथापि दृष्टकारणमेलनस्य प्रत्यक्षत्वाद् दृष्टोपसंहारमुखेनादृष्टस्यापि तत्र कारणत्वसंभावनया तत्सहितां सामग्रीमनुमाय तया कार्योत्पादज्ञानं संभवतीति भावः। **स्थूलेन तु रूपेणेति**। यद्यपि सूक्ष्मत्वाद् दुरवधारोऽर्थः क्रियां न करोति, महत्त्वादियोगेन त्वभिव्यक्त इतीन्द्रियविषयतादिकामर्थक्रियां संपादयतीत्यर्थः। यथोक्तम् —

[4]'घटस्य दृशिकर्मत्वे महत्त्वादीनि साधनम्॥' इति।

ननु 'अस्त्यर्थानाम्' इति किमुच्यते। न ह्यस्तिधातुः [5]केषांचिद्धातूनामर्थः संभवतीत्यत आह — **सत्तावाचिनामिति**। अस्तेरर्थो येषामिति बहुव्रीहिर्व्यधिकरणपद इत्यर्थः। [6]ननु कर्तुर्विद्यमानत्व एव क्रियायाः कालत्रययोग इति तस्य सर्वविभक्तिशासने हेतुत्वमयुक्तमित्याशङ्क्य प्रयोगकालेऽपि कूपस्य कर्तुरविनष्टस्यैवोपलम्भात् सत्ताया वर्तमानत्वात् सर्वविभक्तिशासनं कर्तव्यमेवेति व्याचष्टे — **ततश्चेति**। अत एवोक्तं भाष्ये 'कूपोऽनेन कदाचित्' इत्यादि। **तदेवेति**। पूर्ववाक्योक्तमविकल्पितत्वमसंकरप्रयोगदर्शनेन समर्थयत इत्यर्थः। वार्तिकद्वयोक्तमर्थं समर्थयितुम् 'इह किंचिदिन्द्रियकर्म' इत्यादिभाष्यम्। तद्व्याचष्टे — **इन्द्रियव्यापारकालस्येति**। **सत्तामिति**। इह येयं कूपसत्ता सा गृहीता सती शब्दप्रयोगनिमित्तं भवति, [7]अगृहीताया असत्कल्पत्वादिति ग्रहणोपाधि-

---

[1] भाष्ये 'संपत्स्यन्ते' इति दृश्यते। 'निष्पत्स्यन्ते' इति पाठोऽत्राभिमत इति प्रतीयते।

[2] वाक्यपदीयम् ३.९.१०६.

[3] प्रदीपे 'वर्षस्य च यः कालः' इत्यत्र 'अथवा वर्षस्य च यः कालः' इति पाठोऽभिसंहितः स्यादिति भाति।

[4] वाक्यपदीयम् ३.७.१०.

[5] कदाचिद्धात्वर्थः — घ.

[6] नन्वविद्यमानाया एव क्रियायाः — घ.

[7] अगृहीतायामसत्कल्पत्वादिति — घ.

र्व्यवहारपथमवतरति। ग्रहणं चेन्द्रियार्थसंनिकर्षजमिति पथि कूपस्येन्द्रियसंनिकर्षो यदा भावी तदा सत्ता भविष्यति, यदा संप्रतितनस्तदा वर्तमानता, यदा भूतस्तदा भूतेति कालत्रयविषयप्रयोगोपपत्तिः। एवं भूतविशेषविषया लङादयो भविष्यद्विशेषविषयाश्च [1]लुडादयो द्रष्टव्याः। न चौपाधिको भेदः कथं शब्दप्रयोगनिमित्तमिति वाच्यमित्याह — **भेदेनेति**। सर्वो हि व्यवहारः [2]संसर्गिधर्मान्तर-निमित्त एवेत्यत्रापि तदाश्रयणं नानुपपन्नमित्यर्थः। नन्वेवं सति भूते भविष्यति चेन्द्रियसंबन्धे 'कूपोऽस्ति' इति प्रयोगो न स्यात्, इष्यते चेत्यत आह — **अस्तित्वमिति**। यदा मनसा सन्मात्रं रूपं परामृश्यते, यः **समासादनात्** इन्द्रियसंबन्धात्, सत्ताया भेदः स तदा न विवक्ष्यत इति 'अस्ति' इति प्रयोगः सामान्येनात्रोपपद्यत इत्यर्थः। अनेन 'यदा बुद्धिकर्म' इत्यादिभाष्यं व्याख्यातम्॥

नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः ३.३.१३५.

[३, ३५३–३५४]

(उद्द्योतनम्) ननु वर्तमाने लडिष्ट एव, अत आह — **अपूर्वेति**। तथापि वर्तमाने विहि-तस्य 'अद्यतनवत्' इत्यनेन कथं भूतादौ प्रसङ्गः, अत आह — **अद्यतन इति**। **नन्विति**। लुङ भूताद्यतने दृष्टः, लृट् तु भविष्यदद्यतने। तावन्यत्र तथैव भवतश्चेत् सादृश्यम्, व्यतिकरे त्वसा-दृश्यमित्यर्थः। **अप्राप्तेति**। अनद्यतनभूतभविष्यतोरिवायथाकालमपि प्रसङ्ग इत्यर्थः। भूत-भविष्यतोर्विहितयोः कथं विपर्ययः, अत आह — **भूतेति**। **विस्पष्टार्थमिति**। अद्यतने दृष्टत्व-रूपसादृश्याश्रयणेनेति भावः। प्रतिषेधपक्षे वत्करणस्य विशेषस्यापि निषेधः प्रयोजनमित्याह — **प्रतिषेधेति**। प्रतिषेध्यविशेषमाह — **तेनेति**॥

[३, ३५३–३५४]

(रत्नप्रकाशः) अनद्यतनोऽस्यास्तीत्यनद्यतनवान् प्रत्ययः, सामान्यापेक्षणाच्छान्दसत्वाद्वा नपुंसक-त्वम्। **लङ्लुटोः प्रतिषेध इति**। उपलक्षणमिदम्, तेन [3]'परोक्षे लिट्' [4]'हशश्वतोर्लङ च' [5]'लट् स्मे' [6]'पुरि लुङ चास्मे' इत्येतत्सूत्रविहिता अपि प्रतिषिध्यन्त इति ज्ञेयम्। **लड्विधि-प्रसङ्ग इति**। लुङ्लृटोरिवाद्यतने लटोऽपि दृष्टत्वेन तस्यापि कालान्तरे विधानं स्यादिति भावः। **अयथाकालमिति**। यथाकालं तयोर्वचनान्तरेणैव सिद्धत्वादिति भावः। **लुङो[ऽपि] विषये लृट् स्यादिति**। यद्यपि 'अद्यतनवत्' इत्युक्त्यानद्यतने लङ्लुडादिविषय एव लुङ्लृटावापादयितुं युक्तौ, तथापि वचनस्याप्राप्तप्रापणार्थत्वादद्यतनशब्दस्याद्यतनसामान्यपरत्ववदद्यतनविशेषपरताया अपि संभवेनाद्यतनविशेषे दृष्टस्य लृटोऽद्यतनविशेषान्तरे लुङो विषये आपादयितुं शक्यत्वात्, तावतैवा-नद्यतनेऽतिप्रसङ्गापादनस्य कैमुतिकन्यायसिद्धत्वेन पृथगनुक्त्युपपत्तेश्च न दोषः। एतेन 'ननु वत्करणात् सादृश्यार्थात् संकरो न भविष्यति' इति निरस्तम्, वत्करणबलेनैव संकरपरतया वचनस्य सार्थक्यसंभवात्। यत्तच्छब्दाध्याहारेण वत्करणनिराकरणानौचित्यात्। वत्करणस्य मतुप्प्रत्य-

---

[1] लृडादयः — घ.
[2] संसर्गधर्मान्तर — ङ.
[3] पा. सू. ३.२.११५.
[4] पा. सू. ३.२.११६.
[5] पा. सू. ३.२.११८.
[6] पा. सू. ३.२.१२२.

यात्मकत्वेन सादृश्यार्थत्वासंभवाच्च। अत एव 'नैतदस्ति, अप्राप्तप्रापणार्थत्वादतिदेशस्य भूत-भविष्यच्छब्दोपादानेन विहितयोरपि लुङ्लृटोरद्यतने दृष्टत्वमात्रेणायथाकालमपि प्रसङ्ग उच्यते' इति समाधानमपि निरस्तम्, वत्करणस्य मतुबात्मकत्वेनास्य वाक्यस्यातिदेशत्वासंभवात्। कालान्तर-विहितप्रत्ययस्य कालान्तरप्रापकमात्रेणास्यातिदेशत्वे [1]'हशश्वतोर्लङ् च' [2]'लट् स्मे' [3]'पुरि लुङ् चास्मे' इत्यादीनामप्यतिदेशत्वापत्तेः। 'अद्यतनवद्वचने हि [4]'विधानमिदं विज्ञायेत' इति वदता भगवता स्पष्टमेवास्यातिदेशताभावस्य दर्शितत्वाच्च॥

[३, ३५३–३५४]

(नारायणीयम्) नन्वनद्यतने लटो विधानाभावात् कथं तस्यातिदेशः स्यादित्यत आह — **अपूर्व-विधान इति**। यद्यप्यनद्यतने कश्चित् प्रत्ययो न विहितस्तथापि तत्र दृष्टस्यातिदेशः स्यात्, लट् चाद्यतने दृष्ट इति तस्य भूतभविष्यतोः प्रसङ्ग इत्यर्थः। **संकरो न भविष्यतीति**। भूता-द्यतने लुङ् दृष्टः, स तद्वद् भूत एव क्रियाप्रबन्धसामीप्ययोर्भविष्यति, भविष्यदद्यतने लृट् दृष्टः स [5]भविष्यत्येवेति व्यवस्था सिध्यतीत्यर्थः। **अद्यतने दृष्टत्वमात्रेणेति**। अद्यतनवत् प्रत्यया भवन्ती-त्युक्तेऽद्यतने कस्यचित् प्रत्ययस्य विधानाभावादद्यतने ये दृष्टाः प्रत्ययास्ते सर्वे सर्वेषु कालेषु प्राप्नु-वन्तीति संकरोऽपरिहार्य इत्यर्थः। ननु 'नानद्यतनवत्' इत्युच्यमानेऽपि वत्करणं किमर्थम्, विनापि तेनानद्यतने विहितयोर्लङ्लुटोः प्रतिषेधस्य सिद्धत्वादित्यत्राह — **प्रतिषेधोपादाने त्विति**॥

भविष्यति मर्यादावचनेऽवरस्मिन् ३.३.१३६.

[३, ३५४–३५५]

(उद्द्योतनम्) कथं तादर्थ्यनिश्चयः, अत आह — **वचनेति**। तन्मात्रमेव प्रयोजनं नान्य-दिति भाष्ये प्रपञ्चितत्वादिति भावः। अस्मिन् सूत्रे तदभावादाह — [6]**उत्तरसूत्रेति**। तदपि सूत्रमक्रियाप्रबन्धार्थमेवेति कृत्वेदं प्रयोजनान्तरमेवेत्याशङ्क्य निषिध्यत इति भावः। **एतत्** अहो-रात्रप्रतिषेधरूपम्। क्रियाप्रबन्धसामीप्ययोरेव 'अनहोरात्राणाम्' इति प्रतिषेधः सूत्रस्य प्रयोजन-मिति शङ्किते तत्र प्रतिषेधो नेष्यत इति परिहार इत्याह — **क्रियाप्रबन्धेति**। **नियमार्थमिति**। भविष्यति क्रियाप्रबन्धसामीप्ययोः 'नानद्यतनवत्' इति प्रतिषेधो मर्यादावचन एवेत्येवंरूप इत्यर्थः। **विधीति**। अक्रियाप्रबन्धार्थत्वेन विधित्वे संभवति तद्विषयत्वमनङ्गीकृत्य नियमकल्पनमयुक्तमि-त्यर्थः। भाष्ये **तस्मादिति**। अक्रियाप्रबन्धार्थमिदं सूत्रम्, तत्र [7]'नानद्यतनवत्' इति न प्रवर्तत इत्यपूर्वः प्रतिषेधो विधीयते। तत्र सर्वविशेषणानां सार्थक्यम्, क्रियासातत्यविषयत्वे तु सविशेषणं सर्वमेव सूत्रं व्यर्थमिति तात्पर्यम्॥

---

[1] पा. सू. ३.२.११६.

[2] पा. सू. ३.२.११८.

[3] पा. सू. ३.२.१२२.

[4] भाष्ये 'विधिरयम्' इत्यत्र 'विधानमिदम्' इति निर्णयसागरमुद्रिते पाठः।

[5] क्रियाप्रबन्धसामीप्ययोरित्यनुकर्षः।

[6] प्रदीपे 'उत्तरसूत्रस्य प्रयोजनम्' इत्यत्र 'उत्तर-सूत्रप्रयोजनम्' इति समस्ततयान्नंभट्टपाठ इति भाति।

[7] पा. सू. ३.३.१३५.

[३, ३५४–३५५]

(रत्नप्रकाशः) अक्रियाप्रबन्धार्थमिति। उपलक्षणमिदमसामीप्यार्थं चेत्यस्य। अस्वरितत्वात् पृथग्वचनारम्भाच्च क्रियाप्रबन्धसामीप्ययोरिति नानुवर्तते। तदभिप्रायेणैवाह — **क्रियाप्रबन्धनार्थमिति चेदिति।** **वचनानर्थक्यमिति।** पूर्वसूत्रस्य निस्संकोचप्रवृत्तेरिष्टत्वात् नियमार्थताया अप्यस्यानिष्टत्वाद्वैयर्थ्यमेव स्यादिति भावः। तं [1]भावमजानानः पूर्वसूत्रसंकोचकतयास्य सार्थक्यं शङ्कते — **इदं तर्हीति।** **अनहोरात्राणामितीति।** उत्तरसूत्रेण सहैकवाक्यतामस्याश्रित्यैवमुक्तम्। **अनिष्टत्वादिति।** प्रतिषेधस्येति शेषः। **अत्रापीति।** अहोरात्राणां विभागेऽपीत्यर्थः। एवमुत्तरेष्वपि पूर्वसूत्रसंकोचप्रकारेषूहनीयम् ॥

[३, ३५४–३५५]

(नारायणीयम्) उत्तरसूत्रस्येति। उत्तरसूत्रेऽहोरात्रपर्युदासस्य विषयप्रदर्शनार्थमेतत् स्यादित्यर्थः। **प्रतिषेध इष्यत इति।** न प्रतिषेधपर्युदासः। **नियमार्थमिति।** क्रियाप्रबन्धसामीप्ययोः पूर्वसूत्रेण प्रतिषेधे सिद्धे नियमार्थमिदं सूत्रं स्यादित्यर्थः। **विधिनियमेति।** क्रियाप्रबन्धसामीप्ययोरित्यनुवृत्त्या किं नियमः, उत तदननुवृत्त्या विधिरिति विशये विधिरेव युक्त इत्यर्थः। एवं [2]'परस्मिन्' इत्यत्रापि योज्यम् ॥

कालविभागे चानहोरात्राणाम् ३.३.१३७.

[३, ३५६]

(उद्द्योतनम्) ननु विभजनक्रियायामहोरात्राणां कर्मत्वे कर्तृत्वे वा नेष्टसिद्धिः, अत आह — **अनहोरात्राणामिति।** **तेनेति।** योऽयं मास आगामी [3]तस्य योऽवरः पञ्चदशरात्रः, योऽयं त्रिंशद्रात्र आगामी तस्य योऽर्धमासः, योऽयं त्रिंशद्रात्र आगामी तस्य यः पञ्चदशरात्रः, तत्राध्येतास्मह इत्यहोरात्रप्रवेशमात्रेण 'नानद्यतनवत्' इत्यस्य 'अनहोरात्राणाम्' इत्यनेन प्रतिषेध इत्यर्थः ॥

[३, ३५६]

(रत्नप्रकाशः) 'अनहोरात्राणाम्' इत्यनेनाहोरात्राणामहोरात्रैर्योगे प्रतिषेध इत्येवार्थो गम्यते। स तु नेष्टः। किं त्वहोरात्राणामन्येन विभागेऽन्यस्याहोरात्रैर्विभागेऽपि प्रतिषेध इष्ट इति व्याचष्टे — **अनहोरात्राणामित्यादिना** ॥

[३, ३५६]

(नारायणीयम्) कथं पुनर्वार्तिकोक्तोऽर्थः सूत्रेण संगृह्यत इति, तत्राह — **अनहोरात्राणामिति।**

---

[1] भावमजानन् — ब.

[2] पा. सू. ३.३.१३८. अपरस्मिन्नित्यत्रापि — घ.

[3] 'तस्य योऽवरः पञ्चदशरात्रः, योऽयं त्रिंशद्रात्र आगामी' इति नास्ति — अ.

प्रसज्यप्रतिषेधश्चायम् — न चेदहोरात्रसंबन्धी विभाग इति। [1]**न तु कर्मणीति**। विभागापेक्षया [2]'कर्तृकर्मणोः कृति' इत्यनेन कर्मणि षष्ठ्यामहोरात्राणामन्येन विभागे स्यात्, कर्तरि त्वन्यस्याहोरात्रैः। संबन्धसामान्ये त्वहोरात्रगन्धमात्रे [3]प्रतिषेधसिद्धिरिति। तदाह — **कालेनेति**॥

परस्मिन् विभाषा ३.३.१३८.

[३, ३५६]

(उद्द्योतनम्) [4]'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्यस्यापि विभाषां शङ्कमानः पृच्छति — भाष्ये **कस्मिन्निति**। 'परस्मिन्' इत्यस्य कालविभागसूत्राद्विभागस्य प्रकृतानुपयोगादाह — **भविष्यतीति**॥

[३, ३५६]

(रत्नप्रकाशः) योगविभागकरणसामर्थ्यादिति। 'भविष्यति मर्यादावचनेऽवरस्मिन्ननहोरात्राणाम्' इत्येकयोगे कृतेऽपि [5]'नञिवयुक्तन्यायस्यानित्यत्वेन 'अनहोरात्राणाम्' इति प्रसज्यप्रतिषेधाश्रयणेन वा देशकालविभाग[6]साधारण्यसिद्धेः [7]'कालविभागे चानहोरात्राणाम्' इति कालविभागशब्दाधिक्येन पृथक्सूत्रकरणसामर्थ्यादिति भावः। ननु तर्हि 'भविष्यति मर्यादावचनेऽवरस्मिन्ननहोरात्राणां, कालविभागे परस्मिन् विभाषा' इति सूत्रद्वयमेव कुतो न कृतमिति चेन्न, [8]'नञिवयुक्तन्यायस्यानित्यत्वाश्रयणे क्लिष्टत्वात्। [9]प्रसज्यप्रतिषेधाश्रयणे वाक्यत्रयताया अनिवारणात् स्पष्टप्रतिपत्तये यथाश्रुतसूत्रत्रयस्यैवोचितत्वाच्च॥

[३, ३५६]

(नारायणीयम्) योगविभागकरणसामर्थ्यमुपपादयति — **भविष्यतीति**॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३.३.१३९.

[३, ३५७]

(उद्द्योतनम्) साधनातिपत्तिश्चेद्वचनानर्थक्यम्, अत आह — **साधनमिति**। **भोजनक्रियाया इति**। साधनान्तरेण भुक्तवन्तं प्रत्येवायं प्रयोग इति भावः। साधनातिपत्तावपि साधनान्तरेण

---

[1] प्रदीपे 'न कर्मणि' इत्यत्र 'न तु कर्मणि' इति पाठोऽभिमतः।

[2] पा. सू. २.३.६५.

[3] प्रतिषेधः सिध्येदिति — ङ.

[4] पा. सू. ३.३.१३६.

[5] परिभाषा ७५.

[6] साधारण्ये सिद्धे — प.

[7] पा. सू. ३.३.१३७.

[8] परिभाषा ७५.

[9] प्रत्ययप्रतिषेधाश्रयणे — ब.

क्रिया भवत्येव, अत आह — **करणभेदादिति**। भुजिक्रियाविषय एवायं प्रयोग इति भावः ॥

[३, ३५७]

(रत्नप्रकाशः) साधनातिपत्तौ साधनातिपत्तिरेव, न क्रियातिपत्तिः। न हि वन्ध्यापुत्रातिपत्त्या क्रियातिपत्तिर्गम्यत इति मन्यमान आह — **साधनातिपत्ताविति**। **क्रियातिपत्तिरपीति**। वन्ध्यापुत्रातिपत्तौ च तत्क्रियातिपत्त्यभ्युपगमे न किंचिद् बाधकमिति भावः ॥

[३, ३५७]

(नारायणीयम्) [१]**क्रियानिष्पत्ताविति**। अनेन सूत्रेणासिद्ध्या वार्तिकारम्भः समर्थितः। एतदेव विशदयति — **मांसस्येति**। कथं पुनः साधनातिपत्तौ क्रियातिपत्तिः स्यादित्यत्राह — **करणभेदादिति**। उक्तं च भाष्ये [२]'अन्यथा[३]साधनानि मांसौदने प्रवर्तन्ते, अन्यथा [४]शुष्कौदने' इति ॥

भूते च ३.३.१४०.

[३, ३५७]

(उद्द्योतनम्) अनेन नित्यो लृङ् विधीयते। तस्य [५]'भूते' इत्यनेन विषय उक्तः। तत्र हेतुमाह — **वक्ष्यमाणेति**। [६]'वोताप्योः' इति विभाषाधिकारः। प्रागुताप्योरिति वक्ष्यमाणेत्यर्थः। तेन [७]लभ्यमाह — **उताप्योरिति**। **लृङ् प्रत्ययः** नित्यमित्यादिः ॥

[३, ३५७]

(रत्नप्रकाशः) भूते लृङिति। [८]'वोताप्योः' इत्युत्तरसूत्रपर्यालोचनलब्धार्थनिबन्धनमेतत्। [९]'उताप्योः समर्थयोर्लिङ्' इत्यतः प्राग् यल्लिङनिमित्तं तत्रोत्तरसूत्रेण लृङो वैकल्पिकत्वे बोधिते हि तदारभ्य यल्लिङनिमित्तं तत्रानेन नित्यं लृङिति लभ्यते ॥

[३, ३५७]

(नारायणीयम्) भूते लृङुताप्यादिष्विति किं वचन[१०]साध्यमिति, नेत्याह — **वक्ष्यमाणेति**। ननु [११]'उताप्योः' इत्यस्मात् प्रागपि लिङनिमित्तसद्भावात् कथमस्याः प्रवृत्तिरित्यत आह —

---

[१] 'क्रिया' इति नास्ति — ङ.
[२] महाभाष्यम् १.३.१.
[३] कारकाणीत्यस्यार्थानुवादः।
[४] शुद्धौदने घ.
[५] वार्तिकेनेत्यर्थः।
[६] पा. सू. ३.३.१४१.
[७] शब्दमाह — अ, ऋ, लृ.
[८] पा. सू. ३.३.१४१.
[९] पा. सू. ३.३.१५२.
[१०] सामर्थ्यमिति — घ.
[११] पा. सू. ३.३.१५२.

प्राक् ततो विकल्प इति। अयं विभागः [1]"वोताप्योः' इत्यनेन प्रदर्श्यत इत्यर्थः ॥

वोताप्योः ३.३.१४१.

[३, ३५७–३५८]

(उद्द्योतनम्) 'गर्हायामित्यारभ्य' इति वक्तव्ये 'विभाषा गर्हा' इति किमर्थमुक्तम्, अत आह — **गर्हायामिति**। 'सुहृद् भूत्वा' इत्यस्य तात्पर्यमाह — **मर्यादायामिति**। 'वा आ उताप्योः' इत्याङ्प्रश्लेषः। [2]**गर्हाविशिष्ट इति**। गर्हाशब्देन तद्विशिष्टधात्वर्थलक्षणा। [3]प्रभृतिशब्देन प्रत्ययलक्षणा। ततश्चायं वार्तिकार्थः — गर्हाविशिष्टधात्वर्थे यो लृङ्प्रत्ययस्तस्य या विभाषा सा प्रागुताप्योरिति ॥

[३, ३५७–३५८]

(रत्नप्रकाशः) आ उताप्योः ओताप्योः, वा ओताप्योरिति स्थिते शकन्ध्वादित्वात् पररूपम्। तत्राङ मर्यादायां वर्तते, न त्वभिविधावित्याशयेन व्याचष्टे — **विभाषागर्हाप्रभृताविति** ॥

[३, ३५७–३५८]

(नारायणीयम्) 'गर्हाप्रभृतौ' इति वचनादनन्तर[4]सूत्रविषयेऽपि लृङ्विकल्पो भवतीति कश्चिद् भ्राम्येत्, तन्निराकरणायाह — **गर्हायामिति**। **मर्यादायां हीति**। वा आ उताप्योरित्याङ्प्रश्लेषोऽत्र, स च मर्यादायामिति वार्तिकेन प्रदर्श्यते, न त्वपूर्वोऽर्थः कथ्यत इत्यर्थः। [5]**गर्हाविशिष्ट इति**। प्रकृतिशब्देन प्रकृत्यर्थ उपचारादुच्यते। गर्हाविशिष्टा प्रकृतिर्गर्हाप्रकृतिरिति मध्यमपदलोपी समास इति दर्शितः ॥

गर्हायां लडपिजात्वोः ३.३.१४२.

[३, ३५८]

(उद्द्योतनम्) 'इष्येते' इत्यनेन सूत्रप्रत्याख्यानं दृढीकृतमित्याह — **तौ चेति**। एतेन कालसामान्य इदं लड्विधानं सर्वलकारापवादत्वेनेति काशिका भाष्यविरोधात् त्याज्येत्युक्तम् ॥

[३, ३५८]

(रत्नप्रकाशः) इष्येते चेति। तथा च दोषवानपि सूत्रारम्भ इति भावः ॥

---

[1] पा. सू. ३.३.१४१.

[2] प्रदीपे 'गर्हादिविशिष्टे' इति दृश्यते। 'गर्हाविशिष्टे' इत्यत्रभट्टपाठ इति भाति।

[3] प्रकृतिशब्देन — अ, ऋ, लृ.

[4] उत्तरसूत्र — घ.

[5] प्रदीपे 'गर्हादिविशिष्टे' इत्यत्र 'गर्हाविशिष्टे' इति पाठोऽभिमत इति प्रतीयते।

[३, ३५८]

(नारायणीयम्) 'इष्येते [च] शतृशानचौ' इत्यनेन प्रत्याख्यानपक्षस्यैव युक्तत्वमिति दर्शयतीत्याह — **तौ चेति** ।।

अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३.३.१४५.

[३, ३५८–३५९]

(उद्द्योतनम्) नन्वकिंवृत्तशब्देन किंवृत्ते नेति प्रतिषेधपक्षे कथमुपपदसंज्ञा, अत आह — **अकिंवृत्तशब्देनेति** । किंवृत्तसमुच्चयार्थादपिशब्दात् पर्युदासत्वनिश्चयः । ननु 'अतिङ' इत्युपपदविशेषणम् । तथा च कथं समासप्रतिषेधः, अत आह — **न विद्यत इति** । ननु तथापि लृटः सदादेशे तस्यातिङन्तत्वात् तेन [1]समासार्थमुपपदसंज्ञापेक्षेति शङ्कते — भाष्ये **यदा तर्हीति** । तत्र केवलोपपदसंज्ञाया अप्रयोजकत्वात् [2]तच्छब्देन समासलक्षणेत्याह — **उपपदेति** । 'भविष्यदधिकार' इति लुप्तसप्तमीकं पृथक्पदं कृत्वा द्विधा व्याचष्टे — **लृटः सद्वेति** । अधिकारपदस्वारस्यमाह — **कालमात्र इति** ।।

[३, ३५८–३५९]

(रत्नप्रकाशः) 'अकिंवृत्तेऽपि' इत्यंशं प्रत्याचष्टे — **किंवृत्तस्येति** । किंवृत्तस्याकिंवृत्तस्य चेति शेषः । **उपपदसंज्ञा भविष्यतीति** । सफलेति शेषः । **अविशेषविहित इति** । अस्य कदाचिद् भविष्यति प्रवर्तमानत्वेऽपि तदधिकारविहितत्वाभावात् सदादेशो न भविष्यतीति भावः ।।

[३, ३५८–३५९]

(नारायणीयम्) उपपदसंज्ञा सिध्यतीति । अन्यथा सप्तमीनिर्देशाभावादुपपदसंज्ञा न स्यात् । ननु [3]'अतिङ' इति पर्युदासाश्रयणे कथं प्रतिषेधवाचोयुक्तिरित्यत्राह — **न विद्यत इति** । संज्ञामात्रप्रवृत्तौ प्रयोजनाभावादाह — **उपपदसंज्ञाकार्यमिति** । **भविष्यतीत्येवमिति** । अनेन 'भविष्यति' इत्यस्य स्वरूपपरत्वं व्याख्येयमिति दर्शयति — **आनन्तर्यद्वेति** । प्रकरणस्य विशेषस्मृतिहेतुत्वात् । तदेवम् 'अकिंवृत्तेऽपि' इत्येतत् प्रत्याख्यातम् ।।

शेषे लृडयदौ ३.३.१५१.

[३, ३५९–३६०]

(उद्द्योतनम्) 'संभावनं गम्यते' इत्येतदुपपादयति — **आश्चर्यमिति** । [4]लकारेण संभावना व्यज्यते । यदिशब्दोऽपि संभावनायामेव प्रसिद्ध इत्याह — **संभावन इति** ।।

---

[1] समासोपपद — अ.
[2] उपपदसंज्ञाशब्देनेत्यर्थः ।
[3] पा. सू. २.२.१९.
[4] नकारेण — अ, ऋ, लृ.

[३, ३५९–३६०]

(रत्नप्रकाशः) न [हि] यदाविति। 'आश्चर्यं यदि स भुञ्जीत' इत्यत्र संभावनं तात्पर्येण प्रतीयत इति तन्निमित्तः [1]'संभावनेऽलमिति चेत्' इति लिङेव भविष्यति, न तु लृङिति भावः॥

[३, ३५९–३६०]

(नारायणीयम्) संभावनं तात्पर्येणेति। यद्यपि चित्रीकरणमपि गम्यते, तथापि वाक्यस्य तात्पर्यमिति तदेव प्राधान्येन प्रतीयते। कुत इत्याह — **संभावने हीति॥**

हेतुहेतुमतोर्लिङ् ३.३.१५६.

[३, ३६०]

(उद्द्योतनम्) शतृशानच्प्रसङ्गेनान्यदपि संगृहीतं 'देवत्रातः' इति श्लोके। तस्य प्रसिद्धिप्रकारमाह — **व्यवस्थितेति।** एतेषां प्रयोगव्यवस्थां तावद्दर्शयति — **तेनेति।** व्यवस्थितविभाषेत्युक्तम्। तत्सुखावगत्यर्थं 'मिथस्ते' इत्येतद्विवृणोति — **एषु चेति।** षट्स्वप्युदाहरणेषु॥

[३, ३६०]

(रत्नप्रकाशः) 'वर्षतीति धावति' इत्यादौ लटः शतृशानचौ कुतो न भवत इति शङ्कते — **अथेति।** व्यवस्थितविभाषाश्रयणात् यथा 'देवत्रातः' इत्यादौ नत्वादिकं न भवति तथा 'वर्षतीति धावति' इत्यादाविितिशब्दप्रयोगे शतृशानचौ न भवत इत्याशयेनोत्तरमाह — **देवत्रात इति।** संज्ञेयम्। अन्यत्र तु [2]नत्वं भवति 'देवत्राणः' इति। 'गलः' इति प्राण्यङ्गे [3]'अचि विभाषा' इति लत्वं भवति, विषे तु न भवति, 'गरः' इति। जलचरे [4]'विभाषा ग्रहः' इति णप्रत्ययो भवति 'ग्राहः' इति। ज्योतिषि न भवति 'ग्रहः' इति। 'वर्षतीति पलायते' इत्यादौ [5]'लक्षणहेत्वोः क्रियायाः' इति शतृशानचौ न भवतः, 'अर्जयन् वसति, अधीयानो वसति' इत्यादौ भवतः। [6]'नन्वोर्विभाषा' इत्यतो हि विभाषाग्रहणमनुवर्तते तत्र। **मिथस्ते न विभाष्यन्त इति।** ते देवत्रातादयो देवत्राणादयश्च मिथः परस्परमेकस्मिन् विषये न विकल्प्यन्त इत्यर्थः। तथैव तेषां भिन्नविषयता दर्शिता। वातायने [7]'अवङ् स्फोटायनस्य' इति नित्यमेवावङ् भवति 'गवाक्षः' इति। अन्यत्र तु विकल्पः 'गवाग्रम्', 'गोऽग्रम्' इति। व्रते [8]'शाच्छोरन्यतरस्याम्' इतीत्वं नित्यमेव भवति 'संशितव्रतः' इति। अन्यत्र विकल्पः 'शातम्, शितम्' इति॥

---

[1] पा. सू. ३.३.१५४.
[2] णत्वं — ब.
[3] पा. सू. ८.२.२१.
[4] पा. सू. ३.१.१४३.
[5] पा. सू. ३.२.१२६.
[6] पा. सू. ३.२.१२१.
[7] पा. सू. ६.१.१२३.
[8] पा. सू. ७.४.४१.

[३, ३६०]

(नारायणीयम्) व्यवस्थितेति। देवत्रातादिषु विषयभेदेन विकल्पप्रवृत्तौ हेतुर्व्यवस्थितविभाषाश्रयणं भाष्यकृतोऽभिप्रेतम्। तेन तुल्यन्यायत्वादप्रकृता अपि नत्वादय इहैव प्रदर्शिताः। **वातायन इति**। अन्यत्र विकल्पेन। **परस्परेणेति**। ते देवत्रातादयो देवत्राणादिभिः परस्परेण यत्रार्थे 'देवत्रातः' इति तत्रैव 'देवत्राणः' इत्येवं न विकल्प्यन्ते। कथं तर्हि, विषयभेदेनैवेत्यर्थः। उदाहरणेषु विकल्पविधीन् क्रमेण दर्शयति — **एषु चेति**॥

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३.३.१६१.

[३, ३६१–३६५]

(उद्द्योतनम्) विध्यधीष्टयोर्धातुप्रत्ययभेदेनार्थभेदात् प्रश्नायोगः, अत आह — **उभयोरपीति**। लोकप्रसिद्धार्थकथनमेतत्, न प्रक्रियार्थमुक्तार्थस्य। लोके चोभयं नियोग एव [1]प्रयुज्यत इति भावः। ननु सर्वत्र प्रवर्तनारूपस्येष्टसाधनत्वरूपस्य कार्यरूपस्य वा विधेरनुगतत्वान्निमन्त्रणादिग्रहणं व्यर्थम्, अत आह — **प्रपञ्चार्थमिति**। **न्यायेति**। विध्यादिशब्दानामपर्यायत्वं न्यायः। संनिधानस्य सप्रतियोगिकत्वात्, तदाह — **धात्वर्थेनेति**। तदुदाहरति — **यथेति**। संनिधाने निमन्त्रणस्य प्रयोजनमाह — **तदनुपरमेति**। निमन्त्रणं शब्दरूपम्, तत् कथं नित्यादिरूपम्, अत आह — **निमन्त्रणविषयत्वादिति**। अवश्यकर्तव्यत्वे हेतुः 'प्रत्याख्यातुरधर्मः' इति। तस्य [2]विषयमाह — **यदेति**। नित्यनैमित्तिकनियोगो निमन्त्रणम्, काम्यनियोग आमन्त्रणमिति भेदः। 'निमन्त्रणादीनामर्थे' [3]इत्यत्रार्थशब्दस्य भावप्रधानत्वमाश्रित्य तात्पर्यमाह — **किमिहेति**। विधिसंग्रहार्थमाह — **आदिशब्दस्येति**। एकसूत्रोपात्तत्वं प्रकारः। प्रकृत्यभिहितेऽपि स्वार्थिकः प्रत्ययोऽस्तु, अत आह — **प्रकृत्येति**। स्वार्थिकस्तु [4]सर्वदा प्रकृत्यर्थ एव भवति, अयं तु धात्वन्तरात् प्रकृत्यनभिहिते निमन्त्रणादौ भवन् प्रकृत्यभिहिते न प्राप्नोतीत्यर्थः। द्वितीयकल्पे तु नायं दोष इत्याह — **विषयपक्षेति**। निमन्त्रणस्यैकत्वेऽपि कर्तृगतद्वित्वबहुत्वयोर्द्विवचनबहुवचने भविष्यतः, अत आह — **नाप्राप्तेष्विति**। 'आमन्त्रयते' इत्यस्यापि कर्मकर्तृरूपद्वितीयाकाङ्क्षत्वादतिप्रसङ्गतादवस्थ्यम्, अत आह — **द्वितीयं विध्यादिकमिति**। द्वितीयशब्दो विध्यादिपर इत्यर्थः। 'आमन्त्रयते' इत्यत्रापि स्वरूपतो धात्वर्थस्य विध्याकाङ्क्षास्ति, अन्यथा तदपि न स्यात्, अत आह — **यदा चेति**। अत्र देवदत्तः स्वयं प्रवृत्तः कर्तानूद्यते, न तस्य नियोज्यत्वं विवक्षितमिति भावः। 'निमन्त्रयै' इत्यत्रापि प्रकृतिप्रत्ययार्थनिमन्त्रणयोर्भेदाद् धात्वर्थस्य निमन्त्रणाकाङ्क्षत्वमस्तीत्युक्तम् 'अत्रापि' इति भाष्येण। तदुपपादयति — **निमन्त्रया इति**। धात्वर्थनिमन्त्रणं देवदत्तादिकर्मकम्, प्रत्ययार्थनिमन्त्रणं प्रकृत्यर्थनिमन्त्रणकर्मकमिति कारकभेदात् तयोर्भेद इत्यर्थः। प्रकृत्यर्थप्रत्ययार्थनिमन्त्रणयोरन्वयप्रकारमाह — **तदयमिति**। 'अनुष्ठेयम्' इति प्रत्ययार्थकथनम्।

---

[1] प्रयुज्येतेति — अ, ऋ, लृ.
[2] 'विषयमाह' इति नास्ति — अ.
[3] इति सौत्रार्थशब्दस्य — अ.
[4] सर्वथा — अ.

प्रदीपे 'निमन्त्रयै निमन्त्रणमिति' इति प्रतीकतया मुद्रणं दृश्यते। 'निमन्त्रयै निमन्त्रणमिति प्रकृतिवाच्यम्' इति विशिष्टो भागः कैयटग्रन्थत्वेनाभिमतः।

भोजनादिष्विति। [1]अत इत्यादिः। निमन्त्रणमामन्त्रणमिति पदद्वयप्रयोगस्य प्रयोजनमाह— **अत्रेति**। इत्यत्रेत्यन्वयः। पदद्वयस्यापि लोडन्तेन कथमन्वय इत्याशङ्क्याध्याहारेण योजयति— **तदयमिति**। **आकाङ्क्ष्यमाणम्** प्रत्ययार्थभूतमन्यदिति शेषः। **एषितुमिति**। एष्टुमित्यस्यौदनादिकं कर्म, सर्वकालः [2]कालसामान्ये प्रत्ययः। प्रत्ययार्थस्य तु विशिष्टेषिः कर्म, वर्तमानकालः प्रत्यय इत्यर्थः। स्त्रीत्वस्य स्त्रीत्वान्तरयोगाभावेऽप्येकस्यैव विवक्षाभेदेन लिङ्गभेदप्रयोजकत्वमित्याह— **कुमारीत्यादाविति**। द्रव्यविशेषणत्वस्य स्पष्टप्रतिपत्त्यर्थं 'कुमारी' इत्युक्तम्। 'स्त्री' इत्यत्रापि [3]विशेषणत्वमस्त्येव। प्रागुक्तमेव प्रकृतिप्रत्यययोरर्थविभेदं मन्दानुग्रहायाह— **निमन्त्रया इति**। अवश्यकर्तव्यतालक्षणं निमन्त्रणमित्यनन्तरं प्रत्ययार्थ इति शेषः। उक्तबाधं निराह— **विध्यादिभिरिति**। ननु विरोधाभावेऽपि येन नाप्राप्तिन्यायेन बाधः स्यादेव, अत आह— **लः कर्मणि चेति**। लिङ्व्यतिरिक्तलकारपरत्वेऽपि बहुवचनसंगतिः, अत आह— **सर्वेति**। [4]'लः कर्मणि च' इति निर्देशेऽपि 'लस्य' इतिवत् सर्वसंग्रहसिद्धेर्बहुवचनमेतत्संग्रहार्थमेवेति व्याख्यायत इत्यर्थः। वस्तुतो 'देवदत्तौ गच्छतः, देवदत्ता गच्छन्ति' इत्याख्यातेन कर्त्रादिसंख्याया एव प्रतीतेः 'आमन्त्रयावहै' इत्यादावपि तत्संख्याया एव प्रतीतेर्न बाधो युक्त इत्याशयेनाह— **उभयेति**॥

[३, ३६१–३६५]

(रत्नप्रकाशः) को विशेष इति। प्रेरणत्वादुभयोरविशेषं मन्यते। **प्रेषणमिति**। भृत्यादेर्निकृष्टस्य प्रवर्तनमित्यर्थः। [5]**सत्कारपूर्विका प्रेरणेति**। उत्कृष्टस्य गुर्वादेरिति शेषः। **अथ निमन्त्रणामन्त्रणयोरिति**। अनयोः समानविषयत्वेनाविशेषं मन्यते। **संनिहितेनेति**। यथेह भवानासीतेति, संनिहितमासनम्। **असंनिहितेनेति**। यथेह भवान् भुञ्जीतेति, ओदनोऽसंनिहितः। **नियोगत इति**। अवश्यमित्यर्थः। **अधर्मः प्रत्याख्यातुरिति**। यदान्यो भोक्ता योग्यो न लभ्यते तदा [6]योग्यस्य दौहित्रादेः प्रत्याख्यातुर्दोष इति भावः। **कामचार इति**। विवाहादौ भोजनार्थमामन्त्रितस्य प्रत्याख्यातुर्न दोष इति भावः। यद्यपि विध्यादीनां चतुर्णां प्रवर्तनात्वात् 'प्रवर्तनासंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रयितुमुचितम्, तथापि प्रपञ्चार्थं चतुर्णां पृथगुपादानमिति न दोषः। **इदं** विध्यादिपदार्थः। **निमन्त्रणादीनामिति**। आदिशब्दः प्रकारे। तेन विधेः संग्रहः। सप्तम्यर्थेऽत्र षष्ठी। 'अर्थे' इति जातावेकवचनम्। विध्यादिष्वर्थेष्वित्यर्थः। **प्रकृत्यभिहितत्वादिति**। [7]'उक्तार्थानामप्रयोगः' इति न्यायेन प्रकृत्यभिहितेऽर्थे प्रत्ययो न स्यादिति भावः। **द्विवचनबहुवचनाप्रसिद्धिरिति**। [8]'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यस्यायमपवाद इति कर्मकर्तृवाचकत्वासंभवेन प्रेरणाया एकत्वेन च तदसिद्धिरिति भावः। **निमन्त्रणं नामेति**। निमन्त्रणादयो नामेत्यर्थः। 'गम्यमानेषु' इति पक्षं तावत् स्थापयति— **सिद्धं त्विति**। **द्वितीयाकाङ्क्षस्येति**।

---

[1] प्रदीपे 'ततो भोजनादिषु' इति पाठ उपलभ्यते। अन्नंभट्टपाठे 'ततः' इति न स्यादिति भाति।

[2] 'सर्वकालः' इत्यस्यैव विवरणं 'कालसामान्ये' इति।

[3] विशेषणमस्त्येव — अ.

[4] पा. सू. ३.४.६९.

[5] भाष्ये 'सत्कारपूर्विका व्यापारणा' इत्यत्र 'सत्कारपूर्विका प्रेरणा' इति रत्नप्रकाशकृत्पाठ इति भाति।

[6] योग्यदौहित्रादेः — प.

[7] महाभाष्यम् १.१.४४.

[8] पा. सू. ३.४.६९.

कर्त्रादिकं, ततो द्वितीयं विध्यादिकं [1]चाकाङ्क्षति यदा धात्वर्थः स्वसिद्धये तदा लिङ्विधानान्न दोष इति भावः। 'देवदत्तो भवन्तमामन्त्रयते' इत्यादौ त्वामन्त्रणरूपो धात्वर्थः कर्त्रपेक्षया द्वितीयमर्थं स्वसिद्धये [2]नाकाङ्क्षति, विनापि द्वितीयं [3]तत्र तस्य सिद्धिसंभवात्। तथा च तत्र विध्यादेरगम्यमानत्वाल्लिङ् न भवतीति फलितम्। **प्राप्नोतु भवानामन्त्रणमिति**। अत्र प्राप्तिरूपस्य धात्वर्थस्य कर्तृभिन्नामन्त्रणलक्षणद्वितीयाकाङ्क्षास्तीति लोड्विधानं युज्यत इति भावः। **आमन्त्रया इति**। आमन्त्रणमेव धात्वर्थ इति तस्यात्मसिद्धये आत्माकाङ्क्षा न युज्यत इति लोण्न स्यादिति भावः। **अत्रापि द्वितीय इति**। आमन्त्रणरूपो निमन्त्रणरूपश्चार्थ इति शेषः। सर्वेषां धातूनां सामान्यरूपेण करोत्यर्थत्वात् करोत्यर्थरूपस्य तत्र धात्वर्थस्य प्रातिस्विकरूपेण धातुनोक्तामन्त्रणकर्मकस्यामन्त्रणान्तराकाङ्क्षित्वाद्[4] युज्यते लोड्विधानमिति भावः। **निमन्त्रयै निमन्त्रणमिति**। यथा पचतीत्यस्य पाकं करोतीति विवरणं भवति, एवं [5]'निमन्त्रयै' इत्यस्य विवरणमिदम्। अत्र हि [6]'निमन्त्रयै' इत्यस्य 'करवै' इत्यस्यार्थे वृत्तिः। एतेन "प्रकृतिवाच्यं निमन्त्रणं विशिष्टकर्मकमन्यत्। तद्विषयं त्ववश्यकर्तव्यतालक्षणं निमन्त्रणमन्यदिति भिन्नत्वादस्त्येव द्वितीयाकाङ्क्षित्वम्। तदयमर्थः — त्वत्कर्मकं भोजनादिषु निमन्त्रणं [7]ममानुष्ठेयम्, ततो भोजनादिषु त्वां निमन्त्रयै' इति। अत्र च 'आमन्त्रयै आमन्त्रणं, निमन्त्रयै निमन्त्रणम्' इत्यामन्त्रणनिमन्त्रणशब्दौ प्रकृत्यर्थव्यतिरिक्तामन्त्रणनिमन्त्रणसद्भावप्रदर्शनाय प्रयुक्तौ, न त्वयं लौकिकः प्रयोगः, लोटेव प्रकृत्यर्थव्यतिरिक्तस्यामन्त्रणादेर्गमितत्वात्। तदयमर्थः — आमन्त्रयै आमन्त्रणमिति[8], 'आमन्त्रयै' इत्यत्र लोटि प्रयुज्यमाने आमन्त्रणं धात्वर्थविषयमाकाङ्क्ष्यमाणमस्ति" इति निरस्तम्। प्रकृतभाष्यस्यान्यथोपपद्यमानस्य तदर्थकत्वाभावात्। रैपोषं पुष्णातीत्यादौ करोतीत्यस्यार्थे पुष्णातीत्यादेः प्रयोगवत् 'आमन्त्रयै आमन्त्रणम्' इत्यादौ 'करवै' इत्यस्यार्थे 'आमन्त्रयै' इत्यादेर्लोकेऽपि प्रयोगसंभवाच्च। मदुक्तं भाष्यकाराशयमजानन् पृच्छति — **कथं पुनरिति**। एतस्याभिप्रायः प्रागेव 'आमन्त्रयै' इति प्रतीके दर्शितः। [9]यक्षानुरूपबलिन्यायेनोत्तरमाह — **दृष्टश्चेति**। ह्यर्थे चः। **इषिरिषिणेति**। एषितुमिच्छतीत्यादौ। यो ह्यत्यन्तासमर्थः पुरुषस्तस्य किमपि कर्तुमिच्छैव नोदेतीतीच्छाविषयिणीच्छा संभवति। **स्त्रीत्वं [च] स्त्रीत्वेनेति**। 'स्त्रीता' इत्यत्र हि तल्प्रत्यय[10]वाच्ये स्त्रीत्वे टापा द्योत्यं स्त्रीत्वं प्रकारतया भासते। तदेवं 'गम्यमानेषु' इति पक्षं समर्थ्य 'अर्थेषु' इति पक्षं समर्थयति — **यावतेति**। यत इत्यर्थः। **अत्रापीति**। 'आमन्त्रयै' इत्यादावपीत्यर्थः। **तर्हीति**। तत इत्यर्थः। **अर्थ इतीति**। पक्ष इति शेषः। **स एवेति**। तस्य प्रकृत्यानुक्तत्वान्न दोष इति भावः। [11]**एषोऽप्यदोष इति**। [12]'असति संभवे बाधनं भवति, अस्ति च संभवो यदुभयं स्यात्' इति न्यायेन कर्त्रादिवाचकत्वेन सह विध्यादिवाचकतायाः प्रकृतसूत्रेण बोधनादिति शेषः। **सुपां कर्मादय इति**। व्याख्यातोऽयं श्लोकः [13]'बहुषु बहुवचनम्' इति सूत्रे ॥

---

[1] चाकाङ्क्षते — प, ब.

[2] नाकाङ्क्षते — प, ब.

[3] तत्र स्वसिद्धि — प.

[4] आकाङ्क्षितत्वात् — प.

[5] आमन्त्रया इत्यस्य — प, ब.

[6] आमन्त्रया इत्यस्य — प, ब.

[7] मयानुष्ठेयम् — ब.

[8] 'इति' इत्यनन्तरम् 'अस्य' इत्यधिकम् — — ब.

[9] लौ. न्या. द्वितीयभागे पृष्ठम्. ६५

[10] वाच्यस्त्रीत्वे — ब.

[11] भाष्ये 'नैष दोषः' इत्यत्र 'एषोऽप्यदोषः' इति निर्णयसागरमुद्रिते पाठः।

[12] महाभाष्यम् ६.१.२.

[13] पा. सू. १.४.२१.

[३, ३६१–३६५]

(**नारायणीयम्**) विशेषाभावं मन्यमानस्य प्रश्न इत्याह — **उभयोरपीति**। **नियोगरूपत्वादिति**। अप्रवृत्तप्रवर्तनारूपत्वादित्यर्थः। निकृष्टविषयो नियोगो विधिः, उत्कृष्टविषयोऽधीष्टमिति विशेषं परिहारेऽभिप्रेतं दर्शयति — **भृत्यादेरिति**। **न्यायव्युत्पादनार्थं** [1]**वेति**। न्यायव्युत्पादनं नाम नियोगस्य विषयभेदेन भेदप्रदर्शनमेव। **अर्थभेदमिति**। अवान्तरभेदमित्यर्थः। उक्तं च —

[2]न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विध्यादीनामुपादानं चतुर्णामादितः कृतम्॥ इति॥

विधिरूपता हीति। अतस्तत्रैव लिङि विधातव्ये भेदेनोपादानमनर्थकं स्यात्। कस्य संनिहितत्वमित्यत्राह — **धात्वर्थेनेति**। यदि संनिहितं, किमर्थं नियुज्यत इत्यत्राह — **तदनुपरमार्थमिति**। **नित्यं नैमित्तिकं चेति**। **नित्यं** सन्ध्योपासनादिकम्, **नैमित्तिकं** [3]हविरार्त्यादिनिमित्तं श्रुतिविहितं कर्म, शुचित्वादिनिमित्तमाचमनादिकं वा। एते कर्मणी अकुर्वाणः प्रत्यवैतीत्यवश्यकर्तव्यम्। **तस्य चेति**। स दौहित्रादिर्यदि प्रत्याचष्टे तदा तस्याधर्मः स्यात्। अत्र किं प्रमाणमित्यत्राह — **इति स्मार्त इति**। मन्वादिस्मृतिसिद्धोऽयमर्थ इत्यर्थः। [4]**काम्ये कर्मणीति**। यथा कारीर्यां वृष्टिकामो यजेतेति यदि वृष्टिः काम्यते तदा तद्यागः क्रियते, न त्वसत्यां कामनायाम्, तथा कल्याणादावामन्त्रितोऽप्यभुञ्जानो न प्रत्यवैति, तत्र कामचार इत्यर्थः। 'निमन्त्रणादीनाम्' इत्युक्ते विधौ नायं विचार इति कश्चिद् भ्राम्येत्। तन्निराकरणायाह — **आदिशब्दस्येति**। **निमन्त्रणादीनां** निमन्त्रणप्रकाराणाम्, एतत्सूत्रोपात्तानामित्यर्थः। ननु निमन्त्रणस्यैकत्वेऽपि कर्त्रादिगतसंख्याश्रयेण द्विवचनबहुवचने भविष्यत इत्यत आह — **नाप्राप्तेष्विति**। अर्थद्वारकं धातोर्द्वितीयाकाङ्क्षत्वमित्याह — **द्वितीयमिति**। स्वव्यतिरिक्तमित्यर्थः। तदेव दर्शयति — **यदा चेति**। [5]प्रकृते द्वितीयाकाङ्क्षत्वाभावाद्दोषाभावं दर्शयति — [6]**इह त्विति**। 'प्राप्नोतु' इत्यादौ द्वितीयाकाङ्क्षत्वं स्फोरयति — **धात्वर्थस्येति**। 'आमन्त्रयै' इत्यत्र कथं लोटोऽसिद्धिरित्याशङ्क्य तत्राशयं दर्शयति — **आमन्त्रणस्येति**। **प्रकृतिवाच्यमिति**। 'श्राद्धेऽहं भवन्तं निमन्त्रयै' इत्यत्र भवत्कर्मकं श्राद्धविषयं निमन्त्रणं धातुवाच्यं प्रत्ययवाच्याद् भिन्नस्वभावमित्यर्थः। **तद्विषयमिति**। प्रकृतिवाच्यनिमन्त्रणविषयमित्यर्थः। एतदेव विशदयति — **तदयमिति**। उक्तेऽर्थे भाष्यं योजयति — **आमन्त्रया इत्यत्रेति**। **कालसाधनभेदादिति**। एषितुमित्यस्य भोजनादि बाह्यं साधनम्, सर्वकालश्च प्रत्ययः। इच्छतीत्यस्येषिः साधनम्, वर्तमानकालश्च प्रत्ययः। **यदा तु तदेव प्राधान्येनेति**। प्रातिपदिकवाच्यत्वाद्विशेष्यत्वेन, इदंतदादिपरामर्शयोग्यत्वेन च, तदा तस्य द्रव्यरूपत्वाल्लिङ्गान्तरयोगोपपत्तिरित्यर्थः। प्रकृतिवाच्यादर्थात् प्रत्ययार्थस्य वैलक्षण्यं स्फोरयति — **निमन्त्रयै भवन्तमिति**। यदा विरोधाभावेऽपि येन नाप्राप्तिन्यायेनं बाध्यबाधकभाव इति पक्षस्तदाप्याह— **लः कर्मणि चेति**। ल इति प्रथमाबहुवचनमित्याश्रयणात्। **उभयानुग्रहाच्चेति**। विध्यादीनां

---

[1] चेति — घ.

[2] इदं हरिणोक्तमिति भूषणसारव्याख्यान उच्यते। पूनामुद्रिते वाक्यपदीये तु नोपलभ्यते।

[3] तैत्तिरीयब्राह्मणे तृतीयाष्टके सप्तमप्रश्ने प्रथमानुवाके 'यस्योभयं हविरार्तिमार्च्छेति। ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इति विहितमित्यर्थः।

[4] प्रदीपे 'काम्यकर्मणि' इत्यत्र 'काम्ये कर्मणि' इति व्यस्ततया पाठोऽभिमत इति भाति।

[5] प्रकृतेर्द्वितीया — ङ.

[6] किमिह त्विति — ङ.

कर्त्रादीनां चार्थानां बाधाभावेऽनुग्रहः स्यादिति तथैवाश्रीयत इत्यर्थः। तदेवं प्रत्ययार्थपक्षोऽबाधितः ॥

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३.३.१६३.

[३, ३६५–३६६]

(उद्द्योतनम्) अत्र प्रैषाभावमाह — [1]**अग्नि स्तोकमिति**। प्रदीपकृता स्त्यधिकारादूर्ध्वमपि वासरूपविध्यङ्गीकारात् कृत्यग्रहणं तस्यानित्यत्वज्ञापनार्थमिति वृत्त्युक्तमनुमतमिति मन्तव्यम् ॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

॥ पादश्च समाप्तः ॥

[३, ३६५–३६६]

(रत्नप्रकाशः) बुसोपेन्ध्यमिति। सूक्ष्मोऽग्निर्बुसेन प्रज्वलनीय इति वस्तुस्वरूपकथनमिदम्, नात्र प्रैषादिप्रतीतिः। **घनघात्यमिति**। घनेनायःपिण्डेन [2]घात्यमित्यपि कठिनत्वमत्र प्रतिपाद्यम्, न तु [3]प्रैषादि ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे तृतीयस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

॥ पादश्च समाप्तः ॥

[३, ३६५–३६६]

(नारायणीयम्) घनघात्यमित्यत्रापि वस्तुस्वरूपकथनमेवेत्याह — **घनेनेति** ॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे तृतीयस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

॥ पादश्च समाप्तः ॥

---

[1] प्रदीपे 'अग्निस्तोकम्' इति दृश्यते। 'अग्नि स्तोकम्' इत्यन्नंभट्टपाठ इति भाति।

[2] घात्यमित्यतिकठिनत्वमत्र — प.

[3] प्रैषादिः — ब.

तृतीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्

धातुसंबन्धे प्रत्ययाः ३.४.१.

[३, ३६७–३६९]

(उद्द्योतनम्) [1]स्वार्थेन संबन्धाव्यभिचाराद् विशेषणानुपयोगात् सूत्रानुपयोगं परिहर्तुं विवक्षितं सूत्रार्थमाह — **संबन्धस्येति**। वृत्तावभेदैकत्वसंख्यानियमात् संख्याविशेषलाभे सामर्थ्यं बीजमुक्तम्। अर्थलक्षणायां हेतुमाह — **न हीति**। [2]'गुणानां च परार्थत्वात्' इति न्यायात्। अर्थद्वारा परम्परासंबन्धस्तु न मुख्यः, तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् प्रधानानुरोधेन [3]धातुशब्दे लक्षणाया युक्तत्वाच्चेति भावः। अर्थयोरपि क्रिययोर्न संयोगसमवायौ, अत आह — **धात्वर्थयोरिति**। पदार्थमुक्त्वा सूत्रार्थमाह — **तत्रेति**। सूत्रारम्भसामर्थ्यादिन्यस्मिन्निति लभ्यते। 'प्रत्ययः' इति [4]संज्ञाया अनुवृत्तेः कथं संज्ञिपरत्वम्, अत आह — **यद्यपीति**। [5]'तव्यत्तव्यानीयरः' इत्यादि-[6]संज्ञिनिर्देशस्थले 'ते च प्रत्ययसंज्ञाः' इति स्वरूपपरत्वम्। अत्र संज्ञचनिर्देशात् संज्ञिपर एवानुवर्तमानो भविष्यतीत्यर्थः। **अन्यथेति**। एतत्सूत्रात् प्राग् विहितानामेवोपपत्तिर्नोत्तरेषामिति भावः। 'इह' इति प्रश्नस्य सूत्रासंबन्धं निराह — **अग्निष्टोमेति**। **कालभेद इति**। [7]'करणे यजः' इति भूते णिनिः। 'जनिता' इति भविष्यति लुट्। **विशेषेति**। भविष्यति भूतप्रत्ययो भवतीत्येवंरूपेत्यर्थः। नन्विदं सूत्रविरुद्धम्, अत आह — [8]**सूत्रप्रत्याख्यानेनेति**। **भावीति**। जननानन्तरं तदनुष्ठाने वृत्ते [9]जातस्याग्निष्टोमयाजिशब्दो भविष्यतीति तद्वाक्यार्थ इत्यर्थः। उक्तेऽर्थे[10] प्रश्नायोगादाह — **इतर इति**। भाविव्यपदेशमज्ञात्वा भूतप्रत्ययेनैव [11]भविष्यत्प्रत्यय उक्त इति मत्वेत्यर्थः। तदेवाह — [12]**इत्यत्रेति**। 'अग्निष्टोमयाज्यस्य पुत्रो जनिता' इति वाक्य इत्यर्थः। 'यष्टा' इति लुट्। उपपदस्येत्यस्य विशेषणस्येत्यर्थं विवक्षित्वा समाधानाशयमाह — **भावीति**। **वाक्यार्थवशादिति**। व्यपदेशभावित्वस्यार्थभावित्वं [13]विनापर्यवसानादित्यर्थः। ननु विशेषणस्येव विशेष्यस्यापि कालान्यत्वमस्तु। 'अग्निष्टोमयाजी' इत्यस्यैव विशेष्यत्वं 'जनिता' इत्यस्य विशेषणत्वमिति वैपरीत्यं वा किं न स्यात्, अत आह — **विशेष्याया इति**। **आख्यातेति**। तथा च [14]कृदन्तवाच्याया न प्राधान्यमित्यग्निष्टोमयाजित्वस्य विशेषणत्वमेव, न विशेष्यत्वमित्यर्थः। **स्वकाल एवेति**। प्रधानस्यान्यानुरोधित्वासंभवादित्यर्थः। अत्रापि दोषस्य वक्ष्यमाणत्वादाह — **आचार्य-**

---

[1] 'धातुसंबन्धे' इत्यस्य धातोः स्वार्थेन संबन्ध इत्यर्थे आह — स्वार्थेनेति।

[2] मीमांसासूत्रम् ३.१.२२.

[3] परम्परासंबन्धे तूत्तरपदस्य लक्षणा स्यात्, सा चायुक्तेति भावः।

[4] संज्ञापरस्येत्यर्थः।

[5] पा. सू. ३.१.९६.

[6] संज्ञानिर्देशस्थले — अ.

[7] पा. सू. ३.२.८५.

[8] सूत्रप्रत्याख्यानेति — अ, ऋ, लृ.

[9] पुत्रस्येति शेषः।

[10] 'अर्थे' इति नास्ति — अ.

[11] भविष्यदर्थ इत्यर्थः।

[12] अयमत्रेति। — अ, ऋ, लृ.

[13] विना, अपर्यवसानादिति छेद

[14] कृद्वाच्यायाः — अ.

देशीय इति। व्याख्यानगम्योऽयमर्थः, न वाचनिक इत्याह — **धात्वधिकारादिति**। 'अस्त्यादिविषयाः' इत्यनेन विशेष्यस्य विशेषणानुरोधित्वशङ्का न परिहृता, अत आह — **अस्त्यादिविशेषणायेति**। भाष्ये **भावीति**। अस्तिभूजनीनामेव तत्र प्रयोगात् तत्र विपर्ययो न निरस्त इत्यर्थः। यदि तत्राख्यातवाच्यक्रियायाः प्राधान्यमङ्गीकृत्य विपर्ययनिरासः, तर्हि सूत्रानारम्भेऽपि न दोष इत्याह — **आचार्य इति**। सूत्रारम्भे न केवलं प्रयोजनाभावः, प्रत्युतानिष्टमपि प्राप्नोतीत्याह — **अवश्यं चेति**। 'भावि कृत्यमासीत्' इत्यस्य सूत्रानारम्भे भावित्वेनानुसंहितं यत् कृत्यं तदिदानीमासीदित्यर्थः। **पर्यायेति**। 'भूतमासीत्' इतिवदित्यर्थः॥

[३, ३६७–३६९]

(रत्नप्रकाशः) धातुशब्दो धात्वर्थपरः। धात्वर्थेन संबन्धे सति स धात्वर्थो येन कालेन संबद्धस्तस्मिन् काले कालान्तरे विहिताः प्रत्यया भवन्तीति सूत्रार्थः। एतेन 'संबन्धस्यानेकाधिष्ठानत्वात् सामर्थ्याद् वृत्तावपि संख्याविशेषो द्वित्वमवगम्यते — धात्वोः संबन्धो धातुसंबन्धः' इति निरस्तम्। संबन्धस्य द्विनिष्ठत्वेऽप्यत्र धातुना संबन्ध इत्येकवचनान्तेनैव विग्रहस्त्रोपपन्नत्वात्। 'देवदत्तो ग्रामं गतः, यज्ञदत्त एव पक्ष्यते भोक्ष्यते च' इत्यादौ क्तादेरपि भविष्यदादौ प्रसङ्गाच्च। एकवचनान्तेन विग्रहे सत्येव खलु द्वितीयः संबन्धी [1]**प्रत्ययान्तरकालसंबन्धी** लभ्यते। **प्रत्यय इत्यनुवर्तमान इति**। यद्यपि प्रत्ययशब्दोऽनुवर्तमानः स्वरूपपदार्थकः, तथाप्यत्र संज्ञिनोऽनिर्देशात् संज्ञिसमर्पको भविष्यतीति भावः। **अधातुप्रत्ययानामपीति**। अन्यथा प्रकृतानां धातुप्रत्ययानामेव कालान्तरसंबन्धः स्यादिति भावः। **गोमानासीदिति**। [2]'तदस्यास्त्यस्मिन्' इति वर्तमानसत्ताकार्थकाद् गोशब्दाद्विहितो मतुप् 'आसीत्' इति भूतधात्वर्थसंबन्धे सति भूते भवति। एवं 'गोमान् भविता' इत्यत्र [3]भविष्यति। **इह पश्याम इति**। अत्र कर्म 'भविष्यत्कालः संपद्यते' इत्यन्तवाक्यार्थः। **भूतकाल इति**। 'अग्निष्टोमयाज्यस्य पुत्रो भविता' इत्यत्र णिनिर्भूतकालः। **संपद्यत इति**। इतीति शेषः। शङ्काया दृढत्वात् तत्र यत् समाधानं तेनैव सूत्रानारम्भेऽपि निर्वाहान्मास्तु सूत्रमेवेदमित्याशयेनाह — **धातुसंबन्धे प्रत्ययस्येति**। **यथाकालविधानादिति**। स्वस्वकालमनतिक्रम्य विधानादित्यर्थः। **सिद्धमिति**। तथा च सूत्रमिदं नारभ्यमिति शेषः। 'अग्निष्टोमयाज्यस्य पुत्रो जनिता' इत्यत्र हि 'ओदनं पचति' इत्यत्रेव भाविसंज्ञाविज्ञानात् णिन्यन्तस्य भविष्यत्कालता गम्यते। सति सूत्रे यथा वैपरीत्यशङ्का भवति प्रत्याख्यातेऽपि सूत्रे तथा भवतीत्याशयेन पृच्छति — **कथं तर्हि कालान्यत्वं गम्यत इति**। अभिमतस्येति [4]शेषः। प्रधानमनुरोद्धव्यं गुणेनेति न्यायेन प्रधानभूततिङ्कालं कृदनुवर्तत इति कालान्यत्वमित्याशयेनोत्तरमाह — **उपपदस्य त्विति**। उपपदस्यैवेत्यर्थः। तदाशयमबुद्ध्वाह — **कुतो न्विति**। समीपोच्चारितं पदमुपपदमिति मन्यते। सिद्धान्ते तूपसर्जनं पदमुपपदम्। तदेवं यथाश्रुतसूत्रारम्भप्रत्याख्यानसाधारण्येन समाधानं कृतमेवेति निश्चित्य वचनान्तरमप्यत्र संभवतीत्याशयेनाह — **एवं तर्हीति**। **अस्त्यादिविषया इति**। अस्त्यादिविशेषणाय प्रयुक्ता इत्यर्थः। अत्रापि पूर्वकल्पयोरिव क्वचिद्विनिगमनाविरह इत्याशयेनाह — **एवमपीति**। एवं वचन आश्रितेऽपीत्यर्थः। 'भावि कृत्यमासीत्' इत्यादौ न कस्यापि कालान्तरसंबन्ध इति मनसैव समाधानं विधाय कुत्रापि न कालान्तर-

---

[1] 'प्रत्ययः कालान्तरसंबन्धी' इति युक्तं भाति।
[2] पा. सू. ५.२.९४.
[3] भविष्यत्काल इत्यर्थः, भवतीत्यनुषङ्गः।
[4] 'शेषः' इत्यस्यानन्तरम् 'उपपदस्येति' इति प्रतीकोऽधिकः — प, ब.

संबन्ध इत्याशयेन पक्षान्तरमाह — **एवं तर्हीति**। **इत्येतदिति**। पदमिति शेषः। **कदेति**। तत् पदं तस्मिन् भवितेति शेषः। इदं मतं प्रौढिवादमात्रम्। न हि तेन वाक्येनैतादृशः शाब्दबोधो भवतीति कस्यचिदनुभवारूढम्॥

[३, ३६७–३६९]

(नारायणीयम्) सूत्रस्य दुर्ग्रहार्थत्वात् [1]तद् व्याख्यातुमारभमाणो धातुसंबन्ध इत्यत्र समासे सुब्लुकि चाभेदैकत्वसंख्याया उपजनात् संख्याविशेषाप्रतिपत्तिशङ्कां निवारयति — **संबन्धस्येति**। यथा तावकादिष्वादेशादिना संख्याविशेषः प्रतीयते, एवमिहापि सामर्थ्यादित्यर्थः। एतदेव विग्रहप्रदर्शनेन स्पष्टयति — **धात्वोरिति**। धातुशब्दस्य मुख्यार्थवृत्तित्वशङ्कां व्यावर्तयति — **धात्वर्थश्चात्रोपचारादिति**। शब्दार्थयोरभेदोपचारादित्यर्थः। मुख्यार्थासंभवं प्रतिपादयति — **न हीति**। [2]'गुणानां च परार्थत्वादसंबन्धः' इति न्यायात्। गौणार्थग्रहणे संबन्धोपपत्तिमाह — **धात्वर्थयोस्त्विति**। 'अग्निष्टोमयाज्यस्य पुत्रो जनिता' इत्यादावाख्यात[3]वाच्या क्रिया विशेष्यभूता प्रधानम्। नामपदवाच्या तु विशेषणत्वादप्रधानम्। तत्र [4]'भूतं भव्यायोपदिश्यते' इति न्यायाद् गुणप्रधानभावेन[न्व]योपपत्तिरित्यर्थः। [5]स्वकालविहितानां स्वकाल एव साधुत्वाभ्यनुज्ञानायेदमनर्थकमिति सामर्थ्यात् [6]कालान्तरविहितानां कालान्तरेऽपि साधुत्वमनेनाभ्यनुज्ञायत इत्याह — **कालान्तरविहितानामिति**। अग्निष्टोमेनेष्टवानिति भूते प्रत्ययोऽन्वाख्यातो जनितेति भविष्यत्कालेन संबन्धे भविष्यत्यर्थेऽयं भवतीत्येवमर्थः सूत्रारम्भ इत्यर्थः। उक्तं च हरिणा —

[7]व्यभिचारे निमित्तस्य साधुत्वं न [8]प्रकल्पते।
भाव्यासीदिति सूत्रेण तत् कालेऽन्यत्र शिष्यते॥ इति॥

ननु संज्ञासंज्ञिनोरभेदाध्यारोपेण संबन्धप्रतिपादनपरत्वात् प्रकृतस्य प्रत्ययग्रहणस्य स्वरूपार्थत्वमेव युक्तम्, न तु संज्ञिप्रत्यायनपरत्वमित्याशङ्कामुद्भाव्य परिहरति — **यद्यपीति**। **अन्यथेति**। प्रकरणस्य विशेषस्मृतिहेतुत्वात्। **सर्वप्रत्ययेति**। अप्रकृतप्रत्ययपरिग्रहार्थं प्रत्ययग्रहणमित्यर्थः। **वर्तमानेति**। वर्तमाना या सत्ता तया विशिष्टो यः प्रकृत्यर्थस्तेन युक्ते षष्ठ्यर्थे सप्तम्यर्थे च विहित इत्यर्थः। **प्रकृत्यर्थस्येति**। ततश्चायमुदाहरणार्थः — यस्य गाव आसन् स आसीत्, यस्य गावो भवितारः स भवितेति। **सूत्रप्रत्याख्यानेनेति**। [9]'पक्षान्तराश्रयेणापि परिहारा भवन्ति' इति न्यायादारम्भपक्षे चोदिते प्रत्याख्यानमाश्रित्योत्तरमुक्तमित्यर्थः। **भूत एव णिनिरिति**। पदसंस्कारपक्षे स्वेषु स्वेषु कालेषु प्रत्यया विधीयन्ते। तर्हि कालान्तरप्रतीतिः कुतस्त्येत्याशङ्क्य वाक्यार्थवशात् तदुत्पत्तिमाह — **जनितेत्येतदिति**। **भाविव्यपदेशेति**। यो जातोऽभिवृद्धोऽग्निष्टोमयाजीतीमं व्यपदेशं लप्स्यते सोऽस्य पुत्रो जनितेति। उपपदशब्देन विशेषणं विवक्षितमित्याह — **विशेषणस्येति**। कुतः पुनरवसीयते विशेष्यकालं विशेषणकालोऽनुवर्तते, न पुनर्विपर्यय इति, तत्राह

---

[1] तद्व्याख्यानमारभमाणः — ङ.
[2] मीमांसासूत्रम् ३.१.२२.
[3] आख्यातवाच्यक्रिया — ङ.
[4] शाबरभाष्यम् ३.४.१४–४०.
[5] स्वकाले विहितानां — ङ.
[6] 'कालान्तरविहितानम्' इत्यादि 'अभ्यनुज्ञायत इत्याह' इत्यन्तं नास्ति — ङ.
[7] वाक्यपदीयम् ३.९.९३.
[8] प्रकल्प्यते — ङ.
[9] महाभाष्यम्. माहेश्वरसूत्रम् २.

—[1]**विशेष्यभूताया इति**। प्रधानानुरोधित्वाद् गुणानां विशेष्यप्रधानस्य कालं विशेषणं गुणोऽनुवर्तत इति युक्तम्। एतदारम्भपक्षेऽपि समानमित्याशयः। **विपर्ययो न भवतीति**। जनितेत्यनेन संबन्धेऽग्निष्टोमयाजीति कालान्तरे [2]साधु भवतीति सूत्र एव सिद्धत्वात्। **वाक्यार्थमितीति**। उदाहरणवाक्यस्यार्थमित्यर्थः। यद्वा, वार्तिकार्थमित्यर्थः। तदेवं प्रत्याख्यातं सूत्रम्। एतदेव च युक्तम्। आरम्भपक्षे तु क्वचिद्विवक्षितोऽर्थो न सिध्येदित्याह—**अवश्यं चेति**। यदि पुनः श्रुत्यावधारणमाश्रीयते, एवमपि विवक्षितोऽर्थो न प्रतीयेत। यदिदं कर्तव्यरूपं वस्तु तदानीदेवेति प्रतीतेरयमत्र विवक्षितोऽर्थः—भाव्यवस्थास्य कृत्यस्यातीता, संप्रतीदं वर्तमानं जातमिति। असौ वाक्यार्थपर्यालोचनादेव लभ्यत इति भावः। 'गोमानासीत्' इत्यत्रापि देवदत्तस्य विद्यमानत्वेऽपि [3]गोमत्त्वस्यातीतत्वावगतेरर्थाद् गवामप्यतीतत्वं प्रतीयत इति सूत्रेण न कृत्यमिति न कदाचिदनुपपत्तिः॥

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ३.४.२.

[३, ३६९–३७३]

(उद्द्योतनम्) ननु परत्वात् पूर्वं परस्मैपदात्मनेपदयोः कृतयोस्तयोरेव[4] हिस्वौ भविष्यत इति [5]वचनं व्यर्थम्, अत आह—**सामान्येति**। **हिस्वाभ्यामिति**। नेमौ तिङन्तःपातिनौ, किं तु शतृशानचाविवापूर्वावादेशाविति[6] भावः। लकारस्य [7]कृत्त्वे हिस्वान्तस्य किमायातम्, अत आह—**तत्रेति**। ननु हिस्वयोस्तिङादेशत्वाभावे शतृशानज्वद् विभक्तित्वाभावात् कथं तत्प्रतिरूपकत्वम्, अत आह—**विभक्तिसंज्ञकेति**। विभक्तित्वेऽनव्ययत्वमेव स्यात्। तत्सादृश्यादव्ययत्वमित्यर्थः। भाष्ये **इह तर्हीति**। 'लुनीहि' इत्यस्य तिङन्तत्वाभावे निघातो न स्यादित्यर्थः। ननु हिस्वौ शतृशानज्वत् पर्यायेण लोट आदेशौ। तत्र को व्यतिकरः, अत आह—**यदीति**। ननु 'तध्वमोः' इत्यनेन तयोः स्थानित्वं लभ्यते, अन्यत्र 'लोटः' इत्यस्यादेशलक्षकत्वं तेन कथं ज्ञाप्यते, अत आह—**यदीति**। 'तध्वमोः' इत्यत्र लोडादेशयोरिति वक्तव्यम्। ततश्च वृत्तिद्वयनिरासाय सर्वत्रादेशलक्षणैव युक्तेति भावः। ननु तिङा हिस्वौ विशेष्येते। न तु तावन्मात्रं पदम्, तदन्तस्य पदत्वात्। तदन्तस्य च नैतावादेशौ, अत आह—**पदशब्देनेति**। [8]"सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते॥" **ईत्वं न स्यादिति**। [9]'ई हल्यघोः' इत्यत्र [10]'गमहन' इत्यतः क्ङितीत्यनुवर्तते। अन्यथा लुनातीत्यत्रापि स्यात्। **अनुदात्तत्वमिति**। [11]'अनुदात्तौ सुप्पितौ' इत्यनेन। ननु 'स भवान् लुनीहि' इत्यत्र [12]'तिङ्ङतिङः' इति लुनीहीत्यस्यानुदात्तत्वात् [13]हेरनुदात्तत्वमिष्टमेव, अत आह—**लुनीहीति**। तर्हि द्वितीय-

---

[1] प्रदीपे 'विशेष्यायाः' इति दृश्यते। 'विशेष्यभूतायाः' इति पाठोऽत्राभिमतः।

[2] साधुर्भवतीति — ङ.

[3] गोरूपस्यातीतत्वावगतेः — ङ.

[4] तयोरेव द्वौ भविष्यतः — अ, ऋ, लृ.

[5] परस्मैपदात्मनेपदग्रहणमिति वार्तिकमित्यर्थः।

[6] अपूर्वादेशाविति — अ.

[7] कृत्त्वेऽपि स्वान्तस्य — अ.

[8] महाभाष्यम् १.१.२०.

[9] पा. सू. ६.४.११३.

[10] पा. सू. ६.४.९८.

[11] पा. सू. ३.१.४.

[12] पा. सू. ८.१.२८.

[13] टेरनुदात्तत्वम् — अ, ऋ, लृ.

स्यापि निघातो न स्यात्, तिङन्तात् परत्वात्, अत आह — **परस्य त्विति**। ननु योगविभागेऽपि [1]व्यवहितस्यास्यापित्त्वं न प्राप्नोति, अत आह — **योगेति**। अल्लोपाभावमुपपादयति — **परत्वादिति**। **उत्तमस्येति**। [2]'आडुत्तमस्य पिच्च' इत्यवयवद्वारावयविन एव पित्त्वातिदेशादित्यर्थः। परस्मैपदानां हिरेव, आत्मनेपदानां स्व एवेति, व्यवस्थानुपपत्तिः [3]समसंख्यार्थत्वम्, तदाह — **सर्वेषामिति**। **वृद्धेति**। वयसा वृद्धा पुरुषसंसर्गाभावात् कुमारी। सा इन्द्रं याचितवती–स्वस्याः पौत्रः सुवर्णपात्रेण भुङ्क्तामिति। तेन तत्साधनं सर्वं वृतमेवेति लभ्यते। 'कुतः' इत्यनेन ज्ञापकं निरस्यत इत्याह — **ज्ञापकमिति**। तदेवाह — **विध्यादीति**। सर्वेषामादेशाविष्येते इति भ्रमं निराह — **प्रसङ्ग इति**। अन्यादेशयोरन्यादेशत्वासंभवादाह — **तत्तुल्याविति**। सदृशविधानस्य प्रयोजनमाह — **तेनेति**। **हिस्वयोरिति**। हेः परस्मैपदसंज्ञा, स्वस्यात्मनेपदसंज्ञा। संज्ञयोः प्रयोजनमाह — **तेनेति**। नन्वेवं मध्यमपुरुषैकवचनसंज्ञे अपि स्याताम्, अत आह — **पुरुषेति**। सामर्थ्यमेवाह — **यदीति**। **वचनान्तरेणेति**। [4]'सेर्ह्यपिच्च' [5]'सवाभ्यां वामौ' इति वचनाभ्याम्। तथा च पुरुषत्रये वचनत्रये चैतौ भवत इति भावः। [6]**मुख्यार्थस्येति**। लोट एवैतावादेशावित्युक्तेरित्यर्थः॥

[३, ३६९–३७३]

(**रत्नप्रकाशः**) **हिस्वयोरिति**। स्थानिविशेषं समर्पयितुमिति शेषः। **परस्मैपदात्मनेपदग्रहणमिति**। परस्मैपदात्मनेपदयोरिति वक्तव्यमिति भावः। तस्मिन्नुक्ते हि यथासंख्यन्यायेन परस्मैपदस्य हिः, आत्मनेपदस्य स्व इति सिध्यति व्यवस्था। **लादेशाविति**। तथात्वे हि तयोस्ताभ्यां तिबादिबाधनं स्यादिति तदन्तस्य पदसंज्ञा न सिध्यति। **लकारः कृदिति**। तदादेशयोर्हिस्वयोरपि स्थानिवद्भावेन कृत्त्वात् तदन्तस्य प्रातिपदिकसंज्ञा सेत्स्यतीति भावः। **विभक्तिस्वरप्रतिरूपका इति**। विभक्त्यन्तप्रतिरूपकाः स्वरप्रतिरूपकाश्चेत्यर्थः। एतेन 'विभक्तिसंज्ञकहिस्वसदृशत्वादनयोर्हिस्वयोरव्ययत्वमित्यर्थः' इति निरस्तम्। अव्ययाद्विहितस्यापः सुपश्च लुको विहितत्वेन हिस्वयोरव्ययत्वोक्तेरानर्थक्यात्। **निघातो न प्राप्नोतीति**। हिस्वान्तस्येति शेषः। उपलक्षणमिदं लुनातीत्यादेरनुप्रयोगस्य[7] निघातः स्यादित्यस्य। **व्यतिकर इति**। लादेशत्वाविशेषेण हिस्वयोः परस्मैपदसंज्ञायां [8]"शेषात् कर्तरि' इत्यादिनात्मनेपदनिमित्तहीन[9]प्रकृतेरेव तौ स्यातामित्येवं व्यतिकर इति भावः। परिहरति — **न वेति**। **ज्ञापकमिति**। यदि लस्यैवैतावादेशौ स्यातां तर्हि लोडादेशौ तध्वमौ न स्त एवेति तयोर्हिस्वादेशावचनमयुक्तं स्यादिति ज्ञापकमिति भावः। **पदादेशस्येति**। परस्मैपदात्मनेपदादेशत्वस्येत्यर्थः। एतेन "पदशब्देन पदसंज्ञानिमित्तानि तिङ उच्यन्ते। अथवा [10]'सर्वे सर्वपदादेशाः' इति न्यायात् तिङन्तस्य हिस्वान्तादेशप्रवृत्तिः" इति निरस्तम्। 'हिस्वयोः परस्मैपदात्मनेपदग्रहणम्' इति प्रकृतवार्तिकानुसारेणैव

---

[1] व्यवहितस्यापित्त्वम् — लृ.

[2] पा. सू. ३.४.९२.

[3] समसंख्यात्वम् — अ, ऋ, लृ.

[4] पा. सू. ३.४.८७.

[5] पा. सू. ३.४.९१.

[6] प्रदीपे 'मुख्यार्थासंभवे' इत्यत्र 'मुख्यार्थस्यासंभवे' इत्यन्नंभट्टपाठ इति भाति।

[7] 'लुनीहि लुनीहि लुनाति' इति यदा प्रयुज्यतेऽव्यवधानेन तदेत्याशय इति भाति।

[8] पा. सू. १.३.७८.

[9] प्रभृतेरेव — प, ब.

[10] महाभाष्यम् १.१.२०.

पदशब्दस्य व्याख्यातुमुचितत्वात्। अन्यथा संमुग्धाकारेण तिङादेशज्ञापने परस्मैपदात्मनेपदव्यवस्था न स्यात्। **पित्त्वस्येति**। तिप्सिप्मिपां स्थाने विधीयमानो हिः स्थानिवद्भावात् पित् स्यात्। ततश्च ङित्त्वाभावात् 'लुनीहि' इतीत्वं[1] न स्यात्, [2]अनुदात्तत्वं च हेः प्रसज्यते। **यावानिति**। योगविभागसामर्थ्यात् हिमात्रस्यापित्त्वमिति भावः। [3]**आटि कृत इति**। परत्वादिति शेषः। **अकारलोपो न प्राप्नोतीति**। परत्वादाटि साट्कस्योत्तमस्य स्वादेशे कृते तस्य पित्त्वेन ङित्त्वाभावात् स न स्यादिति भावः। **समसंख्यार्थत्वमिति**। ज्ञापकस्य सामान्यतस्तिङादेशत्व[4]-विषयकत्वाभिप्रायेणेदम्। 'वा च तध्वमोः' इति विकल्पस्य यथासंख्यं प्रवर्तमानस्य विशेषापेक्षज्ञापकत्वे तु सिद्ध्येव पदव्यवस्था। न्यासान्तराश्रयेण समाधत्ते — **सिद्धं त्विति**। **एतदेवेति**। [5]वृद्धकुमारीवरन्यायेन क्रियासमभिहारे लोट् सिध्यतीति भावः। उक्तज्ञापकतां विघटयति — **कुतो नु खल्विति**। **अविशेषविहित इति**। लोण्मध्यमपुरुषैकवचनात्मकप्रत्यय इति शेषः। [6]**तस्येति**। तदन्तस्येत्यर्थः। भवतु तदन्तस्यैव द्वित्वम्, किं तत इत्यत आह — **लोण्मध्यमेति**। **इमाविति**। प्रकृतसूत्रेण विधीयमानावित्यर्थः। **इष्येते इति**। आदेशाविति शेषः। **लोटो याविति**। आदेशाविति शेषः। तथा च लोडादेशत्वशून्ययोस्तयोस्तत्त्वोक्त्या तद्धर्माणां परस्मैपदत्वात्मनेपदत्व[7]भावकर्मकर्तृवाचकत्वतिङत्वानामतिदेशलाभादभिमतसिद्धिरिति भावः॥

[३, ३६९–३७३]

(नारायणीयम्) ननु लोटः परस्मैपदात्मनेपदेषु कृतेषु [8]स्थानिवद्भावेन तेषां हिस्वौ भविष्यत इति किं वचनेनेत्यत आह — **सामान्येति**। लकारस्य कृत्त्वेन किं [9]हिस्वयोरागतमित्यत्राह — **तत्रेति**। **अयं व्यतिकर इति**। न तु स्वः परस्मैपदिभ्योऽपि स्यात्, हिरात्मनेपदिभ्योऽपीत्येवंरूपः। ज्ञापकत्वमुक्तं समर्थयते — **यदि लस्यैवेति**। ननु तिङो [10]हिस्वावुच्येते, तावन्मात्रं न पदम्, तदन्तस्य पदत्वादिति किमुच्यते पदादेशस्येति, तत्राह — **पदशब्देनेति**। कथं हिस्वयोः पित्त्वप्राप्तिः, कश्च पित्त्वे सति दोष इत्यत आह — **तिप्सिप्मिपामिति**। ननु 'स भवान् लुनीहि लुनीहि' इत्यादौ [11]'तिङ्ङतिङः' इति निघातेन भाव्यमिति [12]हेरनुदात्तत्व[13]प्रसङ्गदोषो नावतरतीत्यत आह — **लुनीहि लुनीहि स भवानित्यादाविति**। पूर्वस्मिन् रूपेऽयं दोषः, न परत्रेत्याह — **परस्य त्विति**। ननु योगविभागेऽप्यनन्तरत्वात् सेर्ह्यादेशस्यैव तत्र ग्रहणेन भाव्यमिति, नेत्याह — **योगविभागेति**। अलोपाप्राप्तिमुपपादयति — **परत्वादिति**। **ज्ञापकत्वं विघटयतीति**। अन्यथानुपपत्त्या हि ज्ञापकं भवति। इह त्वन्यथोपपद्यमानत्वान्न ज्ञापकत्वम्। एतदेवोपपादयति

---

[1] ई हल्यघोरित्यनेनेति भावः।

[2] पित्त्वात् 'अनुदात्तौ सुप्पितौ' इत्यनेनेति भावः।

[3] आत्वे कृत इति — प, ब.

[4] तिङादेशत्वाविषयकत्वाभिप्रायेणेदम् — ब.

[5] महाभाष्येऽयं न्यायः प्रतिपादितः ८.२.३. सूत्रे.

[6] भाष्ये 'तदास्य' इत्यत्र 'तदा तस्य' इति पाठो निर्णयसागरमुद्रिते।

[7] 'आत्मनेपदत्व' इत्यस्यानन्तरं 'कर्तृवाचकत्व' इत्यधिकम् — प; 'कर्तृवाचकत्वभावकर्मवाचकत्व' इत्यधिकं दृश्यते — ब.

[8] स्थानिवद्भावे तेषां — ङ.

[9] हिस्वयोर्विधानमित्यत्राह — घ.

[10] हिस्वावप्युच्येते — ङ.

[11] पा. सू. ८.१.२८.

[12] हेरुदात्तत्व — घ, ङ.

[13] 'प्रसङ्ग' इति नास्ति — ङ.

— **विध्यादिविषयस्येति**। ननु सर्वेषां पुरुषादीनामादेशौ हिस्वौ नेष्येते, तदपवादत्वेन लोट एव तद्विधानादित्यत आह — **प्रसङ्ग इति शेष इति**। मुख्यलोट्संबन्धिनो धर्मस्यातिदेशयोग्यस्यायोगात् प्रसिद्धस्य लोटः संबन्धिनौ यौ हिस्वौ तद्धर्मातिदेशोऽनेन क्रियत इत्याह — **लोडादेशाविति**। [1]**तत्तुल्याविति**। अन्यत्रान्यशब्दप्रयोगात् सादृश्यावगतिः। यथा कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इत्यग्निहोत्रधर्मातिदेशः क्रियते। तेन कथमिष्टसिद्धिरित्यत्राह — **तेन तदीयेति**। [2]यदि तद्धर्मातिदेशः क्रियते एकवचनमध्यमपुरुषसंज्ञे अपि स्याताम्, ततश्च वचनान्तरभाविनः पुरुषान्तरभाविनश्च लोटो हिस्वौ न स्यातामित्यत आह — **पुरुषैकवचनसंज्ञे त्विति**। **अनेन विधानमिति**। वचनान्तरेणैव तद्विषयो हि सिद्धः। 'लुनीहि लुनीहीत्येवायं लुनाति' इत्यादिप्रयोगसिद्ध्यर्थं वचनमिति, तदाह — **वचनान्तरेणेति**। गौणमुख्यन्यायेन तध्वंभाविनो ग्रहणमनुपपन्नमित्याह — **मुख्यार्थासंभव इति**। लोट एव हिस्वादेशे तध्वमोस्तत्स्थानित्वायोगात्। अत्र 'लुनीहि लुनीहीत्येवायं लुनाति' इत्यस्यायमर्थः — पुनःपुनर्लवनमयं करोतीति। लोडन्तं पुनःपुनर्लवनमात्रमाचष्टे। अनुप्रयोगधातुस्तु तद्विषयं करणं वदन् तद्गतं साधनादिकमभिव्यनक्ति। ततश्च सामान्यविशेषयोर्विशेषणविशेष्यभावाद् धातुसंबन्धोत्पत्तिरिति द्रष्टव्यम्॥

यथाविध्यनुप्रयोगः पूर्वस्मिन् ३.४.४.

[३, ३७३]

(**उद्द्योतनम्**) ['लुनीहि] लुनीहि' इत्यादौ धात्वर्थस्य [3]समभिहारस्य चाभिव्यक्तत्वादाह — **संख्येति**। [4]अस्य वर्तमानकालादावपि विधानादित्यर्थः। [5]'समुच्चये सामान्यवचनस्य' इत्यनेन कथमत्र यथाविध्यनुप्रयोगसिद्धिः, अत आह — **समुच्चय एवेति**। उभयत्र पदार्थाभिव्यक्त्यर्थं धात्वन्तरस्य तस्यैव वानियमेन[6] प्रयोगे प्रसक्ते समुच्चय एव धात्वन्तरमिति नियमात् पूर्वस्मिन् यथाविधि प्रयोगसिद्धिरित्यर्थः। उक्तनियमासिद्धिं शङ्कते — **नन्विति**। **ततश्चेति**। 'लुनीहि लुनीहीत्येवायं छिनत्ति' इत्यपि प्रयोगः स्यादित्यर्थः। 'समानार्थस्य' इत्यनेनार्थविरोधे धात्वन्तरस्य मा भूत् प्रयोग इति सूचितम्। [7]**चरितः** प्रवृत्तः। तदर्थाभिव्यक्तये तज्जातीय एव प्रयोक्तव्यः, न तु विजातीय इति न्यायार्थः। ननु "[8]कृञ् चानुप्रयुज्यते' इतिवद् व्यवहितप्रयोगनिरासः सूत्रस्य प्रयोजनं किं न स्यात्, अत आह — [9]**पूर्वेति**। **नेष्टेति**। [10]'एवायम्' इत्यनेन व्यवधानस्येष्टत्वादिति भावः॥

---

[1] 'तत्तुल्याविति' इति नास्ति — ङ.
[2] यदि धर्मातिदेशः — ङ.
[3] समभिव्याहारस्य — अ, ऋ, लृ.
[4] 'अस्य' इत्यतः प्राक् 'तस्येति' इति प्रतीकः 'अ' कोशे, 'तदिति' इति प्रतीकः 'ऋ, लृ' कोशयोश्चास्ति। प्रदीपे तादृशपदं तु न दृश्यते।
[5] पा. सू. ३.४.५.
[6] अनियमेनेति छेदः।
[7] प्रपञ्चितः — अ, ऋ, लृ.
[8] पा. सू. ३.१.४०.
[9] पूर्वस्येति — अ, ऋ, लृ.
[10] 'इत्येवायम्' इत्यभिप्रेतम्।

[३, ३७३]

(रत्नप्रकाशः) अव्यक्तपदार्थकमिति। अव्यक्ताः पदार्थाः कालपुरुषसंख्यारूपा यस्य तदित्यर्थः। **यथाविधीति**। अन्यथा 'याहि याहीति गच्छति' इत्यादिप्रयोगः स्यादिति भावः। **एतदपि नास्तीति**। समुच्चय एव धात्वन्तरस्यानुप्रयोग इति नियमात् क्रियासमभिहारे धात्वन्तरस्यानुप्रयोगो न भविष्यतीति भावः। ननु समुच्चये सामान्यवचनस्यैवेति [1]नियमस्तेन स्यादिति कथमिष्टसिद्धिरिति चेन्न, समुच्चये सामान्य[2]वचनानुप्रयोगस्यैवेष्टत्वेन तेन वचनेन प्रागुक्तस्यैव नियमस्य कर्तुमुचितत्वात्। एतेन तद्वचनस्य द्वितीयनियमपरत्वमभ्युपगम्य 'नैतदस्ति, न ह्येकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च भवतीति [3]न्यायाल्लोट्प्रकृतिरेवानुप्रयोक्ष्यते' इति समादधानो निरस्तः। तुच्छांशशङ्कामभ्युपगम्य भाष्यमुपेक्ष्यान्यपरन्यायेन समाधानस्यानुचितत्वात्। यदप्युक्तम् 'पूर्वव्यवहितप्रयोगनिवृत्तिरपि नेष्टा, यतस्तदर्थो योगः स्यात्' इति। तदपि न, अनिष्टेत्युक्त्या वचनस्य निराकरणे समस्तव्याकरणस्यैव तथा निराकरणापत्तेः। अनिष्टवारणार्थमेव हि शास्त्रमिदम्। तथा च पूर्वव्यवहितप्रयोगनिवृत्त्यर्थमिदं सूत्रमावश्यकमित्येव सारमिति सुधियो विदांकुर्वन्तु। भाष्यं तूक्तप्रयोजनान्यथासिद्धिकथनपरम्, न त्वनुक्तप्रयोजनासंभवपरमिति न तेन विरोधः॥

[३, ३७३]

(नारायणीयम्) संख्याकालेति। न हि लोण्मध्यमपुरुषैकवचनयोर्हिस्वयोरादेशत्वम्। अत एवोक्तं भाष्ये [4]'इमौ चान्यौ हिस्वौ' इत्यादि। ननु [5]'समुच्चये सामान्यवचनस्य' इत्यनेन क्रियासमभिहारे[6] यथाविध्यनुप्रयोगः कथं लभ्यत इत्यत आह — **समुच्चय एवेति**। **लोट्प्रकृतिसमानार्थस्येति**। 'लुनीहि लुनीहीत्येवायं छिनत्ति' इत्यादेः। भिन्नार्थस्य तु पचत्यादेरप्रसङ्गः, [7]लोडन्तेनान्वयायोगादिति भावः। **न ह्येकस्या इति**। यथा 'गवां स्वामी अश्वेषु च' इति प्रयोगो न भवति, तथा येनैव धातुना लोट्प्रयोगः प्रारब्धस्तेनैवासौ समापनीय इति लुनातीत्येवानुप्रयोक्ष्यत इत्यर्थः। ननु व्यवहितपूर्वप्रयोगनिवृत्त्यर्थम् **अनु** पश्चात् अनन्तरं प्रयोग इति प्रतिपादनायेदं स्यात्, यथा [8]'कृञ् चानुप्रयुज्यते लिटि' इति, तत्राह — **पूर्वव्यवहितेति**। **नेष्टेति**। 'लुनाति देवदत्तो लुनीहि लुनीहि' इति, 'लुनीहि लुनीहीत्येव देवदत्तो लुनाति' इत्यादिप्रयोगदर्शनात्॥

समुच्चये सामान्यवचनस्य ३.४.५.

[३, ३७३–३७४]

(उद्द्योतनम्) लाघवस्यातिप्रसङ्गं निराह — **एतच्चेति**॥

---

[1] नियमोक्तिस्तेन — प.
[2] वचनस्यैवानुप्रयोगस्यैवेष्टत्वेन — ब.
[3] परिभाषा १२७.
[4] महाभाष्यम् ३.४.२.
[5] पा. सू. ३.४.५.
[6] समभिहाराद्यथाविधि — घ.
[7] लोडन्तेऽन्वयायोगादिति — ङ.
[8] पा. सू. ३.१.४०.

[३, ३७३–३७४]

(रत्नप्रकाशः) लघुत्वादिति। समुच्चये यावद्भ्यो लोड्विधानं तावतां विशेषवचनानामनुप्रयोगापेक्षायैकस्य सामान्यवचनस्यानुप्रयोगे लाघवमिति भावः। वस्तुतस्तु गवादिपदेष्वनेकार्थेषु लघुभूतेषु सत्स्वपि [1]स्वर्गवाग्बाणादिशब्दानां सहप्रयोगस्य दृष्टत्वेन शब्दप्रयोगे लाघवस्याकिंचित्करत्वात् स्थितमिदमपि सूत्रम् ॥

[३, ३७३–३७४]

(नारायणीयम्) ननु यदि लौकिके प्रयोगे लाघवं प्रत्यादरः क्रियते तर्हि वृक्षार्थप्रतिपादनाय तरुद्रुमादिशब्दानामेव प्रयोगः स्यात्, न वनस्पत्यादिशब्दानाम्। तथा वृषार्थप्रतिपादनाय [2]वृषशब्दस्यैव प्रयोगः स्यात्, न वृषभशब्दस्य। 'अपूपौ द्वावानय' इत्यादिप्रयोगश्च न स्यादित्यत आह — **एतच्चेति** ॥

उपसंवादाशङ्कयोश्च ३.४.८.

[३, ३७४]

(उद्द्योतनम्) पूर्वसूत्रेऽन्यतरस्यामित्यनुवृत्तेर्नित्यार्थमिदमिति वृत्तिकृतोक्तं शङ्कते — **नित्यार्थमिति।** [3]दृष्टावप्याह — **व्यवस्थितेति।** हेतुहेतुमद्भावमाह — **उपसंवाद इत्यादिना।** ननु 'हेतुहेतुमतोः' इत्येव सिद्धः, किं वचनेन, अत आह — **करणमिति। अवधिः** [4]दातुरपेक्षितत्वमत्रावधित्वम्। भाविकरणानुसंधानेनापि दानसंभवान्न करणं दानहेतुरित्यर्थः। ननु वचनान्तरं कृत्वा सूत्रप्रत्याख्यानमयुक्तम्, अत आह — **लिङ्प्रयोगेति** ॥

[३, ३७४]

(रत्नप्रकाशः) लिङर्थत्वादिति। उपसंवादाशङ्कयोरित्यनुषज्यते। **हेतुहेतुमतोरिति।** उपसंवादः कर्तव्ये [5]पणबन्धः, यदि मे भवानिदं कुर्यात् अहमपि त इदं दद्यामिति। तत्र करणं हेतुः, दानं हेतुमत्। आशङ्कापि कारणात् कार्योत्प्रेक्षेत्यस्ति तत्र हेतुहेतुमद्भावः। **अपर इति।** करणमवधिः, दानमवधिमदित्यवध्यवधिमद्भाव उपसंवादे प्रतीयते, न तु हेतुहेतुमद्भावः। आशङ्कायामपि हेतुहेतुमद्भावनिश्चयो नास्तीति भावः। तथा च लिङ्प्रयोगसिद्धये उपसंवादाशङ्कयोर्लिङ् वक्तव्यः। तथा च व्यर्थमिदं सूत्रमिति फलितम् ॥

[३, ३७४]

(नारायणीयम्) ननु पूर्वसूत्रे लेड्विकल्पाभ्युपगमान्नित्यार्थमिदं वचनं स्यादिति कथं [6]प्रत्या-

---

[1] स्वर्गवाग्भारादिशब्दानां — प, ब.
[2] वृषस्यैव प्रयोगः — ङ.
[3] वृत्तावप्याह — अ.
[4] धातुः — अ, ऋ, ऌ.
[5] पणाबन्धः — ब.
[6] प्रत्याख्यातमिति — घ.

ख्यानमिति चोदयति — **नित्यार्थमिति**। परिहरति — **छन्दसीति**। [1]अत्र नित्य एव लेड् दृश्यत इति प्रत्यवतिष्ठमानं प्रत्याह — **व्यवस्थितविभाषया वेति**[2]। उपसंवादे तावद्धेतुहेतुमद्भावं दर्शयितुं तत्स्वभावमाह — **उपसंवाद इति**। [**कार्योत्प्रेक्षेति**]। यथा [3]'नेज्जिह्मायन्तो नरकं पताम' इत्यत्र जिह्मं कुटिलं पापम्, तदाचरणलक्षणेन कारणेन नरकपातलक्षणं कार्यमुत्प्रेक्ष्यते। ननु लक्षणान्तरेण लिङः सिद्धत्वे वचनमनर्थकमिति किमुच्यते 'वक्तव्य एव' इति, तत्राह — **करणमवधिरिति**। ननु वचनेन वचनान्तरस्य प्रत्याख्याने को गुण इत्यत आह — **लिङ्प्रयोगसिद्धय इति**। अत एवोक्तं भाष्ये 'प्रयुज्यते हि' इत्यादि॥

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ३.४.९.

[३, ३७५]

(उद्द्योतनम्) ननु प्रकृत्योपस्थितभाव एव स्यात्, नानुपस्थितेषु, अत आह — **क्रिययेति**। **तेष्वेवेति**। स्वार्थिकत्वस्यागतित्वादिति भावः। ननु क्त्वादेर्भावार्थत्वसिद्धये तद्वक्तव्यम्, अत आह — **तुमर्थग्रहणेति**। ननु भावाधिकार एव क्त्वादिविधिरस्तु, किं वचनेन ज्ञापकेन वा। यद्वा 'घञर्थे' इत्येवोच्यताम्, 'तुमर्थे' इति कथमुक्तम्, अत आह — **साध्यमानेति**। तुमर्थोऽपि साध्यमानरूप एवेत्यर्थः॥

[३, ३७५]

(रत्नप्रकाशः) कर्ता तुमर्थ इति। कृत्यक्तखलर्थभिन्नकृत्त्वात् [4]स तथेति भावः। **येनैवेति**। कृत्यादिभिन्नकृत्त्वेनैव। **कुतो न्विति**। भाववत् कर्मादीनामपि कर्तुरन्यत्वाविशेषाद् भाव एव तुमर्थ इत्यत्र को हेतुरिति भावः। परिहरति — **ज्ञापकात्तावदिति**। **आदिश्यत इति**। तुमुन्निति शेषः। **स्वार्थे भवन्तीति**। द्योतकत्वेनापि शब्दप्रयोगस्य दृष्टत्वेनार्थान्तरकल्पने मानाभावेन च स्वार्थवृत्तितैव तेषामाश्रयितुमुचितेति भावः। **एतन्न वक्तव्यमिति**। 'तुमर्थे' इति पदमनुवर्त्य तत्रैव क्त्वादीनां विधिसंभवादिति भावः। यत्तु 'साध्यमानरूपश्च भावः क्त्वादीनामर्थः। स एव धात्वर्थः। [5]'घञादीनां तु धात्वर्थव्यतिरिक्तः सिद्धरूपो वाच्यः' इति। तत् तुच्छम्, तादृशकल्पनायां मानाभावात्॥

[३, ३७५]

(नारायणीयम्) ननु यथा [6]'कर्तरि कृत्' इति कर्तार्थो निर्दिश्यते नैवं कर्मादिषु कृतो विधानमस्तीति 'कुतो न खलु' इत्यादिचोद्यानुपपत्तिरित्यत आह — **क्रिययेति**। **तेष्वेवेति**। न भावे,

---

[1] अनित्य एव — घ.

[2] चेति — घ, ङ.

[3] ऋ. सं. परिशिष्टानि. [म. १०. सू. १०६ अस्यानन्तरम्] तत्र 'नेज्जिह्मायन्त्यो नरके पताम' इति दृश्यते। 'नेज्जिह्मायन्तो नरकं पताम' इति काशिकायाम्।

[4] तुमुन् कर्त्रर्थक इत्यर्थः।

[5] घञा तु धात्वर्थ — ब.

[6] पा. सू. ३.४.६७.

हेत्वभावादित्यर्थः। ननु भावे [1]'विधीयमानानामव्ययकृतां लिङ्गसंख्यायोगो नास्ति। घञादीनां तु तत्रैव विहितानां दृश्यत इत्ययं विशेषः कुत इत्याशङ्क्याह — **साध्यमानरूपश्चेति**। अव्ययकृतां धातुवाच्ये भावे विधानात् तस्य च स्वभावतः साध्यरूपत्वात् सत्त्वधर्मलिङ्गसंख्यायोगाभावः। घञादयस्तु धात्वर्थव्यतिरिक्ते भावे विधीयन्ते। स च स्वभावतः सिद्धरूप इति लिङ्गसंख्यायोगोपपत्तिरित्यर्थः॥

उदीचां माङो व्यतीहारे ३.४.१९.

[३, ३७५–३७६]

(उद्द्योतनम्) नन्वनुबन्धानामनेकान्तत्वपक्षे ज्ञापनमनुपयुक्तम्, अत आह — [2]**एतच्चेति**। भाष्ये **असरूपेति**। [3]'वासरूपः' [4]इत्यत्र 'नानुबन्धकृतमसारूप्यम्' [5]'नानुबन्धकृतमनेकाल्त्वम्' इत्यनेन ज्ञापनेन सिद्धमित्यर्थः। 'पृथक्त्वनिर्देशः' इत्यादि 'त्वात्' इत्यन्तं दाप्प्रतिषेध एव समासोपात्तेऽप्यन्वेति, नेतरयोः, अनुपयोगादित्याह — **पृथक्त्वेति**। तद् व्याचष्टे — **दाधेति**। इदं वार्तिकं [6]'तस्य लोपः' इति सूत्रस्थम्॥

[३, ३७५–३७६]

(रत्नप्रकाशः) **मेङ इत्येवोच्येतेति**। उपदेशे एजन्तत्वाभावेनात्वाप्रवृत्तौ तथैव वक्तुमुचितमिति भावः। **अयमपीति**। अपिशब्देनौचित्यसमुच्चयः। **तद्विषयो हि स इति**। 'मेङ प्रणिदाने' इति साक्षाद् धातुपाठे व्यतिहारस्य दर्शितत्वात् तदर्थकस्यैव तस्यात्र ग्रहणं भविष्यतीति भावः। धातुपाठनिर्दर्शितार्थातिरिक्तोऽप्यर्थो धातूनामस्तीत्यनपेक्ष्यैवमुक्तम्। तदपेक्षायां तु 'व्यतिहारे' इत्यवश्यं वक्तव्यमेव। **एवं तर्हि सिद्धे सतीति**। 'उदीचां मेङो व्यतीहारे' इत्येव वक्तव्ये सतीत्यर्थः। **नानुबन्धकृतमनेजन्तत्वमिति**। [7]अनुबन्धानामारोपितमेकान्तत्वं वास्तविकमनेकान्तत्वमिति व्यवस्थितत्वेऽप्यारोपितैकान्तत्वेनोपदेशे एजन्तत्वं नेति शङ्कायाः संभवेन ज्ञापकानुसरणं युज्यते। एतेन 'अनुबन्धानामेकान्तपक्ष एव ज्ञापकाश्रयणम्। अनेकान्तत्वपक्षे तु स्वत एवैजन्तत्वात् ज्ञापनप्रयोजनाभावः' इति निरस्तम्। पक्षद्वयस्यैकपक्षपर्यवसानस्यैव वक्तुमुचितत्वात्, तथैवोपपादितत्वाच्च। न ह्यनेकान्तत्वपक्षः पार्थक्येनोपपादयितुं शक्यः, येन पक्षद्वयं स्यात्। स्पष्टमिदं [8]'तस्य लोपः' इति सूत्रे भाष्य एव। **उक्तमिति**। [9]'तस्य लोपः' इति सूत्र इति शेषः। तच्च तत्रैव व्याख्यातमिति तत एव तदर्थो ज्ञेयः। **अपमयत इति**। वस्त्रादिकं परिवर्तयतीत्यर्थः॥

---

[1] विधीयमानानामप्यव्यय — ङ.
[2] क्रियत एतेष्विति — अ, ऋ, लृ.
[3] पा. सू. ३.१.९४.
[4] इत्येतद्विषय इत्यर्थः।
[5] अनेकाल् सर्वस्येत्येतद्विषय इत्यादिः।
[6] पा. सू. १.३.९.
[7] अनुबन्धानामारोपितमेकान्तत्वमिति व्यवस्थितत्वेऽपि — ब.
[8] पा. सू. १.३.९.
[9] पा. सू. १.३.९.

[३, ३७५–३७६]

(नारायणीयम्) ज्ञापनफलस्य पाक्षिकत्वं दर्शयति — **एतच्चेति**। **दाप्प्रतिषेधग्रहणेनैवेति**। नासरूपसर्वदिशाभ्याम्, अन्वययोग्यत्वाभावात्। तदेतद्व्याचष्टे — **दाधाध्वदाबिति**। **दैपोऽपि पृथगिति**। अन्यथा 'दाप् लवने' इत्यस्यैव प्रतिषेधः स्यात्। अपमयस्यापूर्वकालत्वं दर्शयितुं तत्स्वरूपमाह — **वस्त्रादिकमिति**। पूर्वं याचित्वा याचनलब्धं वस्त्रादिकं पुनः परिवर्तयतीत्यर्थः॥

समानकर्तृकयोः पूर्वकाले ३.४.२१.

[३, ३७६–३७९]

(उद्द्योतनम्) ननु समानशब्दस्य सादृश्यवाचित्वात् 'देवदत्तो भुक्तवान्, यज्ञदत्तो व्रजति' इत्यत्रापि स्यात्, तयोरध्ययनादिना सादृश्यसंभवात्, अत आह — **समानशब्द इति**। ननु कर्तृशब्दस्य शक्तिवाचित्वात् क्रियाभेदे च तद्भेदात् कथमेकत्वम्, अत आह — **शक्तिशक्तिमतोरिति**। ननु 'पूर्वकाले' इत्यस्य विषयसप्तमीत्वात् 'स्वशब्देन' इत्ययुक्तम्, अत आह — [1]**पौर्वकाल्य इति**। ननु 'पूर्वं भुङ्क्ते [2]ततो व्रजति' इत्यत्र [3]'विभाषाग्रे' इति सूत्रेण पक्षे क्त्वा कथं न भवति, अत आह— **पूर्वशब्दस्येति**। तत्र हेतुः — **अग्रादीनामिति**। **द्विविधेति**। स्वकर्तृकव्रजिक्रियापेक्षा, अन्यकर्तृकभुजिक्रियापेक्षा चेत्यर्थः। ननु क्रियापौर्वापर्याभावे 'समानकर्तृकयोः' इत्यनेन कथमत्र क्त्वाप्रत्ययः, अत आह — **ततश्चाग्रादिसूत्रेणेति**। **भवतः** विकल्पेनेत्यादिः। ननु क्रिययोरेव पौर्वापर्यम्, न कर्त्रोः, अत आह — [4]**कर्तृपौर्वकाल्यं चेति**। तत्र क्त्वाप्रत्ययस्य प्रसङ्गमाह — **आसेरिति**। ननु [5]'स्त्रियाः' प्राग् वासरूपाङ्गीकारात् कथमत्र वासरूपेण लट्, अत आह — **वासरूप इति**। तत्र परिभाषापक्षाश्रयणे इदमेव भाष्यं ज्ञापकमिति भावः। तथापि 'आसित्वा भोक्तुम्' इत्यपि पक्षे प्राप्नोति, अत आह — **यदेति**। निर्देशस्यातन्त्रत्वे विवक्षितमर्थमाह — **समानकर्तृकेति**। **गुणानां चेति**। [6]'वर्षेष्टीनामाधानस्य चाग्न्यङ्गत्वान्न तासामाधानाङ्गत्वमिति सूत्रार्थः। कृत्स्नक्रियापेक्षया पूर्वत्वाभावेऽप्यवयवे समुदायारोपात् प्रयोगोपपत्तिरित्याह — **यद्यपीति**॥

[३, ३७६–३७९]

(रत्नप्रकाशः) अत्र समानशब्द एकवाची, एककर्तृकयोरित्यर्थः। यत्तु 'शक्तिशक्तिमतोरेकत्वविवक्षायां क्रिययोरेककर्तृकत्वम्' इति। तन्न, शक्तिशक्तिमतोर्भेदविवक्षायामपि तयोरेककर्तृकत्वसंभवात्। कर्तृसंज्ञा हि देवदत्तादेर्भवति। कर्तृत्वादिकं तु शक्तिशब्देनोच्यते, न तु कर्तृभूतदेवदत्तादिरेव। **स्वशब्देनोक्तत्वादिति**। तथा च [7]'उक्तार्थानामप्रयोगः' इति पौर्वकाल्येऽभिधेये विधीयमानस्य क्त्वस्तत्राप्रवृत्तिरिति भावः। **नैतत् क्रियापौर्वकाल्यमिति**। **एतत्** अत्रत्यपूर्व-

---

[1] पौर्वापर्य इति — अ, ऋ, लृ.

[2] भाष्ये 'पश्चाद् व्रजति' इति दृश्यते। अत्रार्थानुवादो बोध्यः।

[3] पा. सू. ३.४.२४.

[4] कर्तृतापौर्वापर्यं चेति — अ, ऋ, लृ.

[5] स्त्र्यधिकारात् प्रागित्यर्थः।

[6] अत्र 'पवमानेष्टीनाम्' इति युक्तं भाति।

[7] महाभाष्यम् १.१.४४.

शब्देनोच्यमानं भुजिगतं पौर्वकाल्यं श्रूयमाणव्रजिक्रियापेक्षं न भवतीत्यर्थः। **कर्तृपौर्वकाल्यमिति**। भुजिकर्त्रन्तरनिरूपितं पौर्वकाल्यमित्यर्थः। कर्त्रन्तरगतभुजिक्रियापेक्षं तदिति यावत्। क्रियापेक्षयैव हि पौर्वकाल्यमुपपद्यते। **यस्मादत्र लड् भवतीति**। वर्तमानासिक्रियाकर्तृविवक्षितत्वं 'यस्मात्' इत्यनेन हेतुतया निर्दिष्टं ज्ञेयम्। यदि कालकर्तृनैरपेक्ष्येणासिक्रियैव प्रतिपिपादयिषिता तदा स्यादेव क्त्वाप्रत्ययः — आसित्वा भोक्तुं गच्छतीति [इति] भावः। एवं च 'पूर्वं भुङ्क्ते पश्चाद् व्रजति' इत्यादावपि भुजिक्रियामात्रविवक्षायां पूर्वशब्देनोक्तेऽपि पौर्वकाल्ये तद्द्योतनाय क्त्वाप्रत्ययो भवति — पूर्वं भुक्त्वा पश्चाद् व्रजतीति [इति] सूचितम्। तं भावमजानन् मन्दबुद्धिः पृच्छति — **एतदत्रेति**। [1]यक्षानुरूपबलिन्यायेनोत्तरमाह — **लट् चात्रेति**। भावे हि विधीयमानस्य क्त्वाप्रत्ययस्य कर्तरि विधीयमानो लडपवाद इति न युक्तिमत्। एतद्भाष्याशयानभिज्ञानां केषांचित् कर्तरि क्त्वाप्रत्यय इति बुद्धिर्भ्रम इति स्पष्टमेव सुधियाम्। यत्तु 'यदा त्वासेः क्त्वा भवति तदा भुजेस्तुमुन्न भवति, अनभिधानात्' इति। तत्तुच्छम्, 'आसित्वा भोक्तुं गच्छति' इत्यादिप्रयोगस्य सर्वानुभवसिद्धत्वात्, युक्तत्वाच्च। यदप्युक्तम् 'तस्माल्लडादय एव भुजेर्भवन्ति — आसित्वा भुङ्क्त इति' इति। तदपि न, वर्तमानत्वादिविशिष्टभुजिक्रियाकर्तृत्वविवक्षायां भविष्यत्कालविशिष्टभावमात्रविवक्षाप्रयुक्तक्त्वाप्रत्ययस्य प्रसक्तेरेवाभावेनैवकारव्यावर्त्यालाभात्। **क्रियाप्रधानत्वादिति**। समानः कर्ता ययोः क्रिययोस्ते [2]समानकर्तृके, तयोः समानकर्तृकयोरिति निर्देशः क्रियाप्रधानः। तत्र गुणभूता संख्या नान्तरीयकत्वादुपात्तापि न विवक्षितेति भावः। **ब्राह्मणानामिति**। पङ्क्तिरूपेणोपविष्टानामिति शेषः। तदेवं द्वित्वसंख्याया विवक्षायामविवक्षायां च दोषेऽभिहिते इदानीं तद्विवक्षामाश्रित्यैव समाधत्ते — **सर्वेषामत्रेति**। यत्तु 'आख्यात[3]वाच्यक्रियाया विशेष्यत्वात् प्राधान्यात् तां प्रति सर्वासां विशेषणत्वात् परस्परेणासंबन्धः। यथोक्तम् — [4]गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्, इति' इति। तत् तुच्छम्, व्रजतीत्यादौ कर्तरि लकारस्य प्रवृत्तत्वेनाख्यातवाच्यक्रियाया अप्रसिद्धेः। विशेषणविशेष्यभावस्य कामचारत्वेन स्नानक्रियाया भुजिक्रियापूर्वत्वस्य भुजिक्रियायाः पानक्रियापूर्वत्वस्य पानक्रियाया व्रजिक्रियापूर्वत्वस्य च संभवाच्च। तर्हि प्रकृतभाष्यस्य कथमुपपत्तिरिति चेत्, व्रजिक्रियेतरक्रियाणां व्रजिक्रियापेक्षयैव [5]पूर्वत्वविवक्षयेति गृहाण। **व्यादाय मुहूर्तमपि स्वपितीति**। तथा च तत्स्वापांशापेक्षं व्यादानस्य पौर्वकाल्यमस्तीति तदुपपन्नमिति भावः॥

[३, ३७६–३७९]

(नारायणीयम्) समानशब्द एकवाचीति। न तुल्यवाची। ननु [6]कर्तृशब्देन शक्तेरभिधानात् तस्याश्च प्रतिक्रियं भेदात् समानकर्तृकत्वमयुक्तमित्यत आह — **शक्तिशक्तिमतोरिति**। शक्तिमतो देवदत्तादेर्द्वयोः क्रिययोर्बह्वीनां [7]चैकत्वात् समानकर्तृकत्वोपपत्तिरित्यर्थः। ननु 'पूर्वकाले' इति विषयसप्तम्याश्रयणात् स्वशब्देनोक्तेऽपि पौर्वकाल्ये क्त्वा भवत्येवेत्याशङ्क्याह — **पौर्वकाल्ये द्योत्य इति**। ततश्च पूर्वशब्देनोक्ते पौर्वकाल्ये [8]द्योत्यार्थाभावात् क्त्वा न भविष्यतीत्यर्थः। [9]नन्व-

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[2] समानक्रिये तयोः — ब.
[3] प्रदीपे 'वाच्यायाः क्रियायाः' इति व्यस्ततया दृश्यते।
[4] मीमांसासूत्रम् ३.१.२२.
[5] पूर्वत्वाविवक्षेति — ब.
[6] कर्तृशब्दे शक्तेरभिधानात् — घ, ङ.
[7] वैकत्वात् — घ.
[8] द्योत्य इत्यर्थाभावात् — ङ.
[9] नन्वनेन — ङ.

त्रानेन क्त्वः प्राप्त्यभावेऽप्यग्रादिसूत्रेणोत्पत्तिः स्यादित्यत्राह — **पूर्वशब्दस्यात्रेति**। ननु क्रियापौर्वकाल्यमत्र प्रतीयत इति किं तन्निषेधः क्रियत इत्याशङ्क्य साधनपौर्वकाल्यप्रतिपादनायैव पूर्वशब्दप्रयोग इति [1]भाष्यतात्पर्यमाह — **द्विविधेति**। **ततश्चेति**। साधनपौर्वकाल्यविषयत्वात् पूर्वशब्दस्येत्यर्थः। **क्रियाद्वारकमेवेति**। न हि स्वतः कर्तुः पौर्वकाल्यं संभवति, कुत [2]इत्याह — **क्रियाविषयत्वादिति**। उक्तं च — [3]क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका, इति। 'आस्यते भोक्तुम्' इत्यत्र क्त्वः प्राप्तिमुपपादयति — **आसेः पूर्वकालत्वादिति**। ननु वासरूपविधिना लटि सति कदाचिदासेः क्त्वापि भवति। तत्र 'आसित्वा भोक्तुम्' इत्यनिष्टं स्यादित्यत आह — **यदा त्विति**। **न ह्यासित्वेति**। 'आसित्वा भोक्तुम्' इत्युक्ते ह्युपक्रमत इत्याद्यर्थान्तरं प्रतीयते शब्दशक्तिस्वाभाव्यात्। तर्हि कथमत्र तथा सति प्रयोग इत्यत्राह — **तस्माल्लडादय एवेति**। ननु 'क्रियाप्रधानत्वात्' इत्यसिद्धो हेतुरित्याशङ्क्य व्याचष्टे — **समानकर्तृकेति**। समानकर्तृकं यत् क्रियान्तरं तदपेक्षं पौर्वकाल्यं यस्याः क्रियायास्तत्प्रतिपादनपरत्वात् समानकर्तृकयोरिति निर्देशस्येत्यर्थः। नान्तरीयकत्वादवश्यं येन केनचिद्वचनेन निर्देशः कर्तव्यः। समानकर्तृकत्वस्य भेदाधिष्ठानत्वात् तन्निबन्धने द्विवचने बहुवचने वा प्रयोक्तव्ये प्राथम्याद् द्विवचनं प्रयुक्तम्, न तु तदर्थो विवक्षितः, यथा [4]'भावे' इत्यत्र लिङ्गसंख्ये इत्यर्थः। लोकव्यवहाराश्रयेण सर्वपूर्वाया [5]एव प्रकृतेः क्त्वाप्रत्ययः प्राप्नोतीत्येतदुपपादयति — **अमीषामिति**। **गुणानां च परार्थत्वादिति**। यथाधानस्य पवमानेष्टीनां चाग्न्यर्थत्वाद् गुणत्वात् परस्परेणासंबन्धः समत्वान्नयविद्भिराश्रीयते, एवमिहाप्याख्यातवाच्यं प्रधानमर्थं प्रति स्नानादीनां सर्वासां क्रियाणां गुणत्वात् परस्परेणानन्वयात् तदपेक्षया पौर्वकाल्यस्याविशेषात् सर्वेभ्यः क्त्वाप्रत्ययोपपत्तिरित्यर्थः। [6]यद्यवरकालः स्वप्नस्तर्ह्युपसंख्यानोक्तिरनुपपन्नेत्याशङ्क्य पूर्वोत्तरवादिनोराशयं दर्शयति — **यद्यपीति**। **व्यादानानन्तरभावीति**। स्वप्नक्षणानां व्यादानात् पूर्वत्वं परत्वं च वस्तुतोऽस्तीति[7] तत्र व्यादानानन्तरभाविनी या स्वप्नक्रिया तत्प्रतिपादनाय 'व्यादाय स्वपिति' इति वाक्यं प्रयुज्यते। यदा तु स्वप्नोत्तरकालत्वं व्यादानस्य प्रतिपादयितुमिष्यते तदा 'सुप्त्वा व्याददाति' इति भवत्येव प्रयोग इति भावः। प्राभाकरैस्तु पूर्वं प्रयुज्यमानाद् धातोरिति व्याख्यातमनुष्ठानविषयं पौर्वकाल्यम्। तत्त्वस्मदाचार्यैरनभ्युपगतत्वादनादरणीयम्॥

विभाषाग्रेप्रथमपूर्वेषु ३.४.२४.

[३, ३७९–३८१]

(उद्द्योतनम्) उक्तार्थत्वात् [8]प्रत्ययानुपपत्तिर्भाष्यकृतैवोक्तेत्याह — **भाष्यकारेणेति**। एतत्सूत्रस्य क्रियापौर्वकाल्य[9]विषयत्वे 'किमियम्' इत्यादिभाष्यमप्ययुक्तं स्यादित्याह — **यदि चेति**।

---

[1] 'भाष्य' इति नास्ति — ङ.

[2] इत्यत आहेत्यर्थः।

[3] वाक्यपदीयम् ३.९.२.

[4] पा. सू. ३.३.१८.

[5] 'एव' इत्यस्यानन्तरं 'वा' इत्यधिकम् — घ.

[6] यद्यपरकालः — घ, ङ.

[7] इतिशब्दो नास्ति — घ.

[8] 'प्रत्ययानुत्पत्तिः' इत्युचितं भाति॥ प्रत्ययानुपपत्तेः — अ.

[9] विषयश्च — अ, ऋ, ऌ.

अप्राप्तविभाषैवेति। [1]'उक्तार्थानामप्रयोगः' इति क्त्वाणमुलोरप्राप्तयोर्विधानादित्यर्थः। संदेहान्निष्क्रान्ता निःसंदेहा। संशयानुपपत्तिमेवाह — **यस्मादिति।** 'तेषां हि क्रियापौर्वकाल्यविषयत्वे' इति यदुक्तं तत्रेयं शङ्का। उक्तेऽपि पौर्वकाल्ये आभीक्ष्ण्यद्योतनाय तयोर्विधानं स्यात्। तर्हि पूर्वेणैव सिद्धत्वाद् वैयर्थ्यमिति न वाच्यम्, द्विर्वचनमन्तरेणाभीक्ष्ण्यद्योतनाय [2]विध्युपपत्तेः, अत आह — **आभीक्ष्ण्यं चेति। तस्मादिति।** नन्वेवमेतस्य साधनपौर्वापर्यविषयत्वे आभीक्ष्ण्य इत्यनुवृत्तावप्राप्तविभाषैव, [3]'आभीक्ष्ण्ये णमुल् च' इत्यस्य क्रियापौर्वकाल्यविषयस्य साधनपौर्वकाल्येऽप्रवृत्तेः। अतः संशयभाष्यानुपपत्तिरत्रापि तुल्येति चेत्, नैष दोषः, क्रियापौर्वकाल्येन विशिष्टाभीक्ष्ण्यग्रहणानुवृत्तौ प्राप्तविभाषा, [4]तदननुवृत्तावप्राप्तविभाषेति संशयसंभवात्। **प्रभोरग्रे** प्रभोः पुरोदेशे। **तथापीति।** यद्यपि पूर्वप्रथमशब्दयोरपि न कालवृत्तित्वनियमः, [5]'पङ्क्त्युपविष्टं ब्राह्मणानां प्रथममानय [6]'पूर्वमानय' इत्यादावन्यत्रापि प्रयोगदर्शनात्। तथापि [7]समानसूत्रे पूर्वशब्दः कालपरो निर्दिष्टः, स एवेह गृहीत इति तत्साहचर्यादितरयोरपि कालपरत्वमित्यत्र तात्पर्यम्। 'अनिष्टा' इत्युक्ते विधिकोटेरप्यनिष्टत्वशङ्कां निराह — [8]**'आभीक्ष्ण्ये हीति।** तदेवाह — **अग्रे भुक्त्वेति।** 'नैवेष्यन्ते' इत्युक्तमेवाह — **अग्रे भुङ्क्त इति।** अप्राप्तविभाषायां तु 'अग्रे भुङ्क्ते ततो व्रजति' इतीष्यत इत्यर्थः। [9]अप्राप्तपक्षे समासप्रसङ्गं प्राप्तपक्षे तदप्रसङ्गं विशदयति — [10]**अप्राप्तेति। निमित्तस्येति।** [11]'तत्रोपपदम्' इति सूत्रे प्रत्ययोत्पत्तिनिमित्तस्योपपदत्वमित्येतदर्थं 'तत्र'ग्रहणमिति स्थितत्वादिति भावः। **अप्राप्तविभाषात्वमिति।** उपपदत्वमङ्गीकृत्य [12]समासप्रसङ्गस्यान्यथा निरासादित्यर्थः। नन्वाभीक्ष्ण्य इति निवृत्तावनेन सामान्यविधीनामुभयत्रविभाषास्तु। तत्रोपपदत्वसंभवात् 'न वक्तव्यः' इति [13]भाष्यासंगतिः, अत आह — **पूर्वविप्रतिषेधाच्चेति।** [14]तत्र च 'अनिष्टा विभाषा प्राप्नोति' इति भाष्यमेव मानम्। प्रकारान्तरेणोभयत्रविभाषां शङ्कते — **नन्विति। अप्राप्त इति।** आभीक्ष्ण्य इति निवृत्तत्वात्। नन्वत्र [15]विहितत्वाप्रत्ययस्यापि विकल्पाङ्गीकारात् समानादिसूत्रविहितस्यैव विकल्पोऽस्त्विति शङ्कते — **कः पुनरिति।** नन्वेवमप्यत्र विभाषाग्रहणं व्यर्थम्, वासरूपेणैव ळडादिसिद्धेः, अत आह — **णमुल्सहितेति।** ननु केवलणमुल्विधावपि विभाषाग्रहणं वासरूपविध्यभावज्ञापकं स्यादेवेत्यस्मिन् सूत्रे त्वाविधिर्व्यर्थः, अत आह — **तत्र यदीति।** [16]तर्हि [17]'स्वादुमि णमुल्' इत्यत्रापि वासरूपविध्य-

---

[1] महाभाष्यम् १.१.४४.
[2] विध्युपपत्तिः — अ.
[3] पा. सू. ३.४.२२.
[4] आभीक्ष्ण्यग्रहणाननुवृत्तौ, विशिष्टाभीक्ष्ण्यग्रहणाननुवृत्तौ चेत्यर्थः॥ तदनुवृत्तावप्राप्त —अ, ऋ, ऌ.
[5] पङ्क्त्युपविष्टे — अ, ऋ, ऌ.
[6] 'पूर्वमानय' इति नास्ति — अ.
[7] समानकर्तृकयोरिति सूत्र इत्यर्थः।
[8] प्रदीपे 'आभीक्ष्ण्ये नित्यौ' इति पाठो दृश्यते। 'आभीक्ष्ण्ये हि नित्यौ' इत्यन्नंभट्टपाठ इति प्रतीयते।
[9] अप्राप्तिपक्षे समासप्रसङ्गप्राप्तिपक्षे — अ, ऋ, ऌ.
[10] प्रदीपे 'अप्राप्तविभाषायामग्रादीनाम्' इति निर्णयसागरमुद्रिते दृश्यते। हरयाणामुद्रिते चौखाम्बामुद्रिते च 'अप्राप्त' इति त्यक्तम्।
[11] पा. सू. ३.१.९२.
[12] समासत्वप्रसङ्गस्यान्यथा — अ, ऋ, ऌ.
[13] भाष्यसंगतिः — ऋ.
[14] पूर्वविप्रतिषेधे चेत्यर्थः।
[15] विहितत्वात् प्रत्ययस्यापि — अ; विहिते विहितत्वात् प्रत्ययस्यापि — ऌ.
[16] 'न हीति' इति दृश्यते — 'अ, ऋ, ऌ' कोशेषु.
[17] पा. सू. ३.४.२६.

भावप्रसङ्गादिति भावः। **अभिमतमिति**। यत्रैव क्त्वाणमुलौ सह विधीयेते तत्र वासरूपविध्यभावमिष्टं ज्ञापयितुमित्यर्थः ॥

[३, ३७९–३८१]

(रत्नप्रकाशः) किमियमिति। यद्यपि [1]'नवेति विभाषा'सूत्रे 'अप्राप्ते त्रिसंशयाः' इति प्रघट्टके अप्राप्ते विभाषेयमिति व्यवस्थापितम्, तथापि विचारान्तरं कर्तुं स एवार्थः स्मार्यत इति न पौनरुक्त्यदोषः। एवमेव हि पूर्वमीमांसायां तत्र तत्र पौनरुक्त्यपरिहारः कृतः। एतेन "इहाग्रादयः साधनपौर्वकाल्यविषया गृह्यन्ते, न क्रियापौर्वकाल्यविषयाः। तेषां हि क्रियापौर्वकाल्यविषयत्वे तैरेव पौर्वकाल्यस्योक्तत्वात् क्त्वाणमुलोर्गतार्थत्वादुत्पत्त्या न भाव्यम्। न चैतत्सूत्रारम्भादुक्तेऽपि पौर्वकाल्ये तयोरुत्पत्तिरिति शक्यते वक्तुम्, अस्य साधनपौर्वकाल्यविषयाग्राद्युपपदत्वे चरितार्थत्वात्। भाष्यकारेण च समानादिसूत्रे पूर्वशब्देन क्रियापौर्वकाल्य उक्ते क्त्वाप्रत्ययस्यानुत्पत्तेः प्रतिपादितत्वात्। यदि चात्राग्रादयः क्रियापौर्वकाल्यविषया गृह्येरन् तदा अप्राप्तविभाषैव निःसंदेहा स्यादिति 'किमियं प्राप्ते विभाषा' इति संशयो नैवोपपद्येत। यस्मात् [2]'आभीक्ष्ण्ये णमुल् च' इति क्त्वाणमुलौ क्रियापौर्वकाल्य एव विधीयेते। तच्चेदग्रादिभिरुच्यते तदाभीक्ष्ण्यग्रहणानुवृत्तावप्यप्राप्तविभाषैव स्यात्। आभीक्ष्ण्यं च द्विर्वचनमन्तरेण क्त्वाणमुल्भ्यां न द्योत्यत इति तद्द्योतनायापि तयोर्विधानं नोपपद्यते। तस्मात् साधनपौर्वकाल्यविषया इहाग्रादय इति स्थितम्" इति निरस्तम्। पूर्वादिशब्दैरुक्तेऽपि पौर्वकाल्ये तद्द्योतनाय क्त्वाणमुलोर्विधानसंभवेन प्राप्तविभाषात्वस्य, आभीक्ष्ण्यपदाननुवृत्तौ क्त्वाणमुलोरुभयोरनाभीक्ष्ण्येऽप्राप्तत्वेनाप्राप्तविभाषात्वस्य च संभवेन पूर्वादिशब्दानां क्रियापौर्वकाल्यविषयत्वेऽपि संशयपरभाष्यस्योपपन्नत्वात्। तेषां साधनपौर्वकाल्यविषयत्व एवाभीक्ष्ण्यपदानुवृत्तावपि प्राप्तविभाषात्वस्य दुरुपपादत्वेन संदेहभाष्यस्यानुपपन्नत्वात्। 'व्यतिलुनीते' इत्यादौ कर्मव्यतिहारे आत्मनेपदस्य विहितत्वेऽपि तद्द्योतनाय व्यत्योः प्रयोगस्य, 'याहि याहीति याति' इत्यादौ क्रियासमभिहारे लोटो विहितत्वेऽपि तद्द्योतनाय [3]"क्रियासमभिहारे द्वे वाच्ये' इति द्वित्वविधेश्च दर्शनाच्च। तस्माद्यत्किंचिदेतत्। यदप्युक्तम् 'यद्यपि देशविशेषवचनोऽग्रशब्दोऽस्ति — प्रभोरग्रे भुङ्क्त इति, तथापि पूर्वप्रथमसाहचर्यात् कालविशेषवृत्तिरेव गृह्यते' इति। तदपि न, पूर्वप्रथमशब्दयोरपि देशवाचकत्वेन तत्र साहचर्यस्यानिर्णायकत्वात्। [4]"समानकर्तृकयोः पूर्वकाले' इत्यस्यानुवृत्त्यैवेष्टसिद्धेश्च। **अनिष्टा विभाषेति**। आभीक्ष्ण्ये नित्यतयैव क्त्वाणमुलाविष्टाविति भावः। यत्तु 'आभीक्ष्ण्ये लडादयो नैवेष्यन्ते — अग्रे भुङ्क्ते भुङ्क्ते ततो व्रजति' इति। तत् तुच्छम्, वर्तमानभुजिक्रियाकर्तृविवक्षायां क्त्वाणमुलोरप्रसक्तत्वेनाभीक्ष्ण्ये क्त्वाणमुलोर्नित्यत्वेऽपि तत्र कर्तरि वर्तमानादौ लडादिप्रवृत्तौ बाधकाभावात् तत्र ते नेष्यन्त इत्यत्र मानाभावात्। तत्र भावे घञादयो नेष्यन्त इत्येव वक्तुमुचितत्वाच्च। एतेन पक्षे 'अग्रे भुङ्क्ते ततो व्रजति' इति प्रकृतसूत्रविषयतयोदाहरन्तो निरस्ताः। क्त्वाणमुलोर्भावार्थकयोः कर्तृलटश्च समानविषयत्वासंभवात्। 'अग्रे भोजनं कृत्वा पश्चाद् व्रजति देवदत्तः' इति वा 'अग्रे भुज्यते देवदत्तेन, पश्चाद् व्रज्यते' इति वा, 'अग्रे भुक्तं देवदत्तेन, पश्चाद् गतम्' इत्यादेर्वा तत्र पाक्षिकस्योचितत्वाच्च। **अन्यत्र चेति**। अनाभीक्ष्ण्य इत्यर्थः। **अप्राप्तविधे-**

---

[1] पा. सू. १.१.४४.
[2] पा. सू. ३.४.२२.
[3] का. वा. ८.१.१२–६.
[4] पा. सू. ३.४.२१.

रिति। आश्रयण इति शेषः। **समासस्येति**। उपपदसमासस्येत्यर्थः। **प्रतिषेधो वक्तव्य इति**। अप्राप्तविभाषापक्षेऽग्रादीनां प्रत्ययविधावुपपदत्वेनाश्रयणादुपपदसमासः प्राप्नोति। प्राप्तविभाषात्वे तु पाक्षिके निषेधे तेषां निमित्ततयाश्रयणादुपपदत्वाभावेन समासाप्रसक्तिः। **अमैवाव्ययेनेति**। [1]तथा चाप्राप्तविभाषापक्षः स्थितः। उभयत्रविभाषात्वमस्य न भवति, पुनःप्रसङ्गविज्ञानेन [2]'आभीक्ष्ण्ये णमुल् च' इत्यस्य तत्र प्रवृत्त्या विकल्पस्याप्राप्तस्थल एव फलनात्। एतेन 'पूर्वविप्रतिषेधेनाभीक्ष्ण्ये णमुल् चेत्येव तत्र प्रवर्तते' इति वदन् निरस्तः। सूत्रस्वरससिद्धपरविप्रतिषेधेनेष्टसिद्धौ पूर्वविप्रतिषेधाश्रयणे मानाभावात्। अस्मिन् सूत्रे विभाषाग्रहणात् क्त्वाणमुल्विषये वासरूपविधिर्न प्रवर्तत इति। एतेन 'अत्र [3]वाकारात् णमुल्सहितक्त्वाविधिर्यत्र तत्र वासरूपविधिर्नास्तीति ज्ञायते' इति वदन् निरस्तः। [4]'समानकर्तृकयोः पूर्वकाले' इति सूत्रविषये, उत्तरणमुल्प्रकरणे च वासरूपविध्यभावस्येष्टत्वात्। न हि भवति 'भुक्त्वा व्रजति' इत्यर्थे 'भोजनं व्रजति' इति प्रयोग इष्टः, न वा 'स्वादुकरणं भुङ्क्ते' इत्यादिप्रयोग इष्टः। किं च [5]'समानकर्तृकयोः' इति सूत्रे वासरूपविध्यप्रवृत्तावेव क्त्वाणमुल्साधारण्येन प्रकृतसूत्रमप्राप्तविभाषापरमित्येवंपरं प्रकृतभाष्यमुपपद्यत आर्जवेन। अन्यथा णमुलंश एवाप्राप्तविभाषात्वं क्त्वांशे तु समासाभावफलकतैव स्यात्। णमुलंशे विभाषाग्रहणेनैव [6]'आभीक्ष्ण्ये णमुल्'सूत्रे वासरूपविध्यप्रवृत्तिज्ञापनसंभवात्। तथा च सामान्यतोऽप्राप्तविभाषापरं भाष्यं कुकविकृतिरिव व्याख्येयं स्यादिति स्पष्टमेव सुधियाम्। तस्माद्यत्किंचिदेतत्॥

[३, ३७९–३८१]

(नारायणीयम्) भाष्योपक्षिप्तं संदेहमुपपादयितुमग्रादीनां विषयविवेचनं तावत् करोति— **इहाग्रादय इति**। इह सूत्रे साधनपौर्वकाल्यविषयत्वमग्रादीनां पूर्वसूत्रे भाष्यकृता व्याख्यातम् 'पूर्वं ह्यसौ भुक्त्वा' इत्यादिना। प्रतिज्ञातेऽर्थे हेतुमाह— **तेषां हीति**। **अस्य साधनेति**। वचनसामर्थ्याद्धि युक्तेऽपि पौर्वकाल्ये क्त्वाणमुलोरुत्पत्तिराशङ्क्यते। वचनस्य त्वन्यथोपपत्तौ सामर्थ्यक्षयान्नैतच्छक्यते वक्तुमित्यर्थः। पूर्वसूत्रस्थभाष्यतात्पर्यविमर्शेऽप्युक्ते क्रियापौर्वकाल्ये तयोरनुत्पत्तिः [7]सिद्धेत्याह— **भाष्यकारेण चेति**। एतत्सूत्रगतभाष्यपर्यालोचनायामपि साधनपौर्वकाल्यविषयत्वमग्रादीनां सिद्धमित्याह— **यदि चेति**। **निःसंदेहा** संदेहान्निष्क्रान्ता, संदेहरहितेत्यर्थः। संशयानुपपत्तिमेव दर्शयति— **यस्मादिति**। तत्रैतत् स्यात्— आभीक्ष्ण्यद्योतनायोक्तेऽपि क्रियापौर्वकाल्ये **तयोर्विधानं स्यात्**, इति। न च पूर्वेण सिद्धत्वादानर्थक्यमिति वाच्यम्, द्विर्वचनमन्तरेणाभीक्ष्ण्यद्योतनाय तयोर्विधानसंभवादित्यत आह— **आभीक्ष्ण्यं चेति**। उक्तमर्थं निगमयति— **तस्मादिति**। **पूर्वप्रथमसाहचर्यादिति**। अत्र विषये पूर्वप्रथमशब्दयोः कालवर्तित्वात् साहचर्यं व्यवस्थाहेतुरिति न्यायादग्रेशब्दोऽपि कालवचन एव गृह्यत इत्यर्थः। आभीक्ष्ण्ये विकल्पस्यानिष्टत्वमुपपादयति— [8]**'आभीक्ष्ण्ये हीति**। **अग्रे भुङ्क्ते भुङ्क्त इति**। एवं प्रयोगो नेष्यत इत्यर्थः।

---

[1] तथा च प्राप्त— ब.

[2] पा. सू. ३.४.२२.

[3] विभाषाग्रहणादिति भावः। कैयटोक्तार्थानुवादोऽत्र बोध्यः॥ एवकारात्— प, ब.

[4] पा. सू. ३.४.२१.

[5] पा. सू. ३.४.२१.

[6] पा. सू. ३.४.२२.

[7] असिद्धेत्याह— ङ.

[8] प्रदीपे 'आभीक्ष्ण्ये नित्यौ' इत्यत्र 'आभीक्ष्ण्ये हि नित्यौ' इति पाठोऽभिमतः।

'अप्राप्तविधेः' इति हेतौ पञ्चमीति दर्शयति — [1]**अप्राप्तविभाषायामिति । निमित्तस्य चेति ।** 'तत्र'ग्रहणादिति भावः । अप्राप्तविभाषायामुक्तस्य दोषस्य 'न वक्तव्यः' इत्यादिना परिहाराभिधानादयमेव पक्षोऽत्र ग्राह्य इत्युक्तं भवतीत्याह — **अप्राप्तविभाषात्वमिति ।** नन्वाभीक्ष्य-[2]ग्रहणाननु[3]वृत्तावप्याभीक्ष्ण्ये परत्वादनेन विकल्पे सत्युभयत्र विभाषेयं स्यादित्यत आह — **पूर्वविप्रतिषेधाच्चेति ।** नन्वेवमप्युभयत्र विभाषैव युक्तेति चोदयति — **ननु चेति । समानादिसूत्रविहितमिति ।** तस्मात् [4]'आभीक्ष्ण्ये णमुल् च' इत्यनेन विहितौ यौ क्त्वाणमुलौ तावभिप्रेत्य [5]'अप्राप्तविभाषेयम्' इत्युच्यते, न तु क्त्वाणमुल्मात्रापेक्षयेत्याशयः । किमर्थं तर्ह्यनेन[6] क्त्वा विधीयत इत्याशयेन चोदयति — **किं पुनरिति ।** णमुल्सहितत्वेन किं कार्यमित्यत्राह — **णमुल्सहितेति ।** किं ज्ञाप्यत इत्यत्राह — **क्त्वाणमुलाविति ।** [7]ज्ञापनफलमाह — **तेनेति ।** एतदेव व्यतिरेकमुखेन स्फोरयति — **तत्र यदीति । क्त्वोऽप्यनुवाद इति ।** समानादिसूत्रेण सिद्धत्वेऽपि ज्ञापनार्थमनुवादः कार्य इत्यर्थः ॥

स्वादुमि णमुल् ३.४.२६.

[३, ३८१–३८५]

(उद्द्योतनम्) भावीति । 'स्वादुमि' इत्युकारान्तादेव निपातनादित्यर्थः । **विहतेति ।** उकारान्तत्वाभावादिति भावः । खमुञत्र रूपसिद्धिर्नास्तीत्याह — **खमुञ्यपीति । अव्ययार्थमेवेति ।** अपूर्वविधानात् प्रतिप्रसवस्य लघुत्वादिति भावः । स्पष्टप्रतिपत्तिरपि प्रयोजनमित्याह — **अवश्यमिति ।** कृञो णमुल्खमुञोः स्वरे [8]विशेषाभावात् स न नियामकः । समुच्चयान्तराभावादाह — **पूर्वोक्तेति ।** 'स्वादुमि मकारान्तनिपातनम्' इत्यादिवाक्यापेक्ष एवेत्यर्थः । तमेवाह — **न केवलमिति ।** [9]'तुमुन्ण्वुलौ क्रियायाम्' इत्यादितुमुन्ग्रहणशङ्कां निराह — **शकेति । असतीति ।** सत्यस्मिन् 'भुज्यते' इत्यनेन सामानाधिकरण्यात् 'स्वादुङ्कारम्' इति णमुलपि कर्मण्येवेति कर्तुरनभिधानात् तृतीया सिध्यतीत्यर्थः । ननु [10]'अनभिहिते' इति प्रसज्यप्रतिषेधे कथं तृतीया; अत आह — **अनभिहित इति ।** नन्वव्ययकृतां कर्मणि [11]विधानाभावात् 'यदि पुनः' इत्युक्तम्, अत आह — **अव्ययकृत इति ।** प्रयोजनं दर्शयितुमित्यन्वयः । प्रसज्यप्रतिषेधपक्षे न कश्चिद्दोषः । पर्युदासपक्षे शङ्कते — **यद्येवमिति । तृतीयेति ।** 'भुङ्क्ते देवदत्तः' इत्यत्र देवदत्तेनेति तृतीया, 'ओदनो भुज्यते' इत्यत्र ओदनमिति द्वितीया च कस्मान्न भवत इत्यर्थः । [12]प्रधानाप्रधानसंनिधौ प्रधानाश्रितमेव कार्यं भवति नाप्रधानाश्रितमिति न्यायेन परिहरति — **उच्यत**

---

[1] हरयाणाचौखाम्बामुद्रितयोः प्रदीपयोः 'विभाषायामग्रादीनाम्' इति दृश्यते । निर्णयसागरमुद्रिते तु 'अप्राप्तविभाषायामग्रादीनाम्' इति पाठः ।

[2] ग्रहणाद्यनुवृत्तौ — घ, ङ.

[3] 'वृत्तौ' इत्यनन्तरमपिशब्दो नास्ति — ङ.

[4] पा. सू. ३.४.२२.

[5] 'प्राप्तविभाषेयम् — ङ.

[6] 'अनेन' इत्यस्यानन्तरं 'न' इत्यधिकम् — घ.

[7] ज्ञापकफलमाह — घ, ङ.

[8] कृञ्धातोरेकाच्त्वेन लितीति प्रत्ययात् पूर्वोदात्तत्वे वा ञ्नित्यादिरित्याद्युदात्तत्वे वा विशेषाभाव इत्यर्थः ।

[9] पा. सू. ३.३.१०.

[10] पा. सू. २.३.१.

[11] विधानाभावादन्यदित्ययुक्तम् — अ, ऋ, ऌ.

[12] लौ. न्या. साहस्री. पृष्ठम् ३५.

इति। **आख्यातादीति**। आदीयत इत्यादिः, आख्यातव्यतिरिक्ते क्रियाप्राधान्यानवगमात्। क्रियायाः प्राधान्येऽपि कर्मादिशक्तेः कथं प्राधान्याप्राधान्ये, अत आह — **तत्रेति**॥

[३, ३८१–३८५]

(रत्नप्रकाशः) सोऽनुवर्तिष्यत इति। तदनुवृत्तौ मुमा स्वादुङ्कारमिति रूपं सिध्यतीति भावः। **ईकाराभावार्थमिति**। [१]'वोतो गुणवचनात्' इति [२]ङीषभावार्थमित्यर्थः। **च्व्यन्तस्य च मकारान्तार्थमिति**। खमुञ्यनुवर्तिते च्व्यन्तस्याव्ययत्वेन [३]मुमोऽप्रवृत्तेर्मान्तत्वं न सिध्यतीति तदर्थमपि मान्तनिपातनमिति भावः। **आ च तुमुन इति**। [४]'अव्ययकृतो भावे' इति वचनम्, प्राक्कृततुमर्थपदार्थनिर्णयम्, 'तुमर्थे' इत्यस्योत्तरत्रानुवृत्तिं चाजानतः [५]'कर्तरि कृत्' इत्युत्सर्गतः कर्तर्येव णमुलादयोऽपि भवन्तीति मन्यमानस्योक्तिरियम्। तत्र तुमुन् [६]'शकधृषज्ञा' इति सूत्रविहितो गृह्यते। आङभिव्याप्तौ। **अनुप्रयोगेणेति**। अनुप्रयुज्यमानेन [७]विशेष्यसमर्पकेण यवाग्वादिशब्देन कर्मपरेण, देवदत्तादिशब्देन कर्तृपरेण चेत्यर्थः। **स्वादुङ्कारं यवागूर्भुज्यत इति**। अत्र लटा कर्मणोऽभिधानेऽपि प्रकृतवचनबलात् कर्मण्येव णमुल् न तु कर्तरीति मन्यते। एवमुत्तरत्र क्वचिदभिहित एव कर्तरि प्रत्ययः क्वचिदभिहित एव कर्मणीति तस्याशय उन्नेयः। [८]**'णमुलाभिहितः कर्तेति**। उत्सर्गतः कृत् कर्तरीति मन्यमानस्योक्तिरियमित्युक्तमेव प्राक्। तथा चानभिहित इति पदस्य केनाप्यभिहितो न भवति यस्तस्य परिग्रहात् णमुलोक्ते कर्तरि तृतीया न स्यादिति भावः। येन केनचिदभिहितभिन्न एवानभिहितशब्देन गृह्यतामित्याशयेन शङ्कते — **ननु चेति**। प्रतिबन्द्या परिहरति — **यदीति**। ननु तर्हि [९]प्रकृते 'कर्मणि' इति वचनं क्रियतामित्याशयेन शङ्कते — **यदि पुनरिति**। परिहरति — **नैवं शक्यमिति**। तदेवं प्रकृतसूत्रविषये वचनस्य सार्थक्यमभ्युपगम्य [१०]'समानकर्तृकयोः पूर्वकाले' इति सूत्रविषये तस्य सार्थक्यं भवति वा न वेति संदेहात् पृच्छति — **अथानेनेति**। ननु प्रकृतसूत्रे पठितस्य वचनस्य प्रकृतसूत्रमेव पूर्वावधिर्भवितुमर्हतीति प्रकृतसूत्राद् यानि पूर्वसूत्राणि तद्विषये प्रकृतवचनफलप्रश्नो न युज्यत इति चेत्, सत्यम्, प्रकृतसूत्रादुत्तरत्र क्त्वाप्रत्ययस्यापि विहितत्वेन क्त्वात्वेन रूपेण पूर्वस्यापि क्त्वो ग्रहणान्न दोषः। एवमुत्तरत्र ज्ञेयम्। उत्तरमाह — **बाढमर्थ इति**। **भोक्तुमोदनः पच्यत इति**। [११]'तुमुन्ण्वुलौ क्रियायाम्' इत्यनेनात्र तुमुन्। इदानीं [१२]'समानकर्तृकयोः' इति सूत्रस्यैवोदाहरणविशेषे भिन्नकर्मकक्रिये प्रकृतवचनफलं पृच्छति — **अथानेनेति**। **अव्ययकृत इति**। अव्ययसंज्ञानिमित्तभूताः कृत इत्यर्थः। पक्त्वौदनं भुज्यते देवदत्तेनेत्यादौ क्त्वान्तकर्मण एवोदनादेर्भुजिकर्मत्वं भवति प्रत्यासत्त्या, ओदनमित्यस्यावृत्त्या वा। [१३]'पक्त्वौदनो भुज्यते देवदत्तेन' इत्यादौ तु किं पक्त्वेत्यपेक्षायां प्रत्यासत्त्या 'ओदनम्' इत्यादि गम्यते। एतेन ''पक्त्वौदनं भुङ्क्ते देवदत्तः, पक्त्वौदनो भुज्यते देवदत्तेन' इत्यत्र क्त्वाप्रत्ययेन कर्तृकर्मणोरनभिधानात् पाकापेक्षया तृतीयाद्वि-

---

[१] पा. सू. ४.१.४४.
[२] ङीबभावार्थमित्यर्थः — ब.
[३] मुमोऽप्रवृत्ते तत्त्वं — ब.
[४] महाभाष्यम् ३.४.९.
[५] पा. सू. ३.४.६७.
[६] पा. सू. ३.४.६५.
[७] विशेषसमर्पकेण — प, ब.
[८] णमुलभिहितः — ब.
[९] प्रकृतकर्मणीति — प, ब.
[१०] पा. सू. ३.४.२१.
[११] पा. सू. ३.३.१०.
[१२] पा. सू. ३.४.२१.
[१३] पक्त्वौदनं भुज्यते — ब.

तीये कस्मान्न भवतः" इति शङ्का निरस्ता। क्त्वाप्रत्ययेनानभिहितत्वेऽपि कर्तृकर्मणोर्लटाभिहितत्वेन सामान्यतोऽभिहितत्वेन [1]'सामान्यतोऽनभिहितत्वाभावेनानभिहितत्वाश्रययोस्तृतीयाद्वितीययोस्तत्रापादनानौचित्यात्। अत एव तच्छङ्काभ्युपगमेन प्रवृत्तम् 'उच्यते, आख्यातादि[2]पदवाच्या क्रिया विशेष्यत्वात् प्रधानम्। विशेषणभूता त्वप्रधानम्। तत्क्रियासाधन्योरपि शक्त्योस्तद्द्वारको गुणप्रधानभावः। तत्र प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते। प्रधानानुरोधाद् गुणानां तन्मुखप्रेक्षित्वात् [3]'पृथक् तद्विरुद्धस्वकार्यारम्भाभावात्' इति समाधानं च निरस्तम्। कर्तृकर्मणोर्लकारे आख्यातपदवाच्या क्रियेत्यस्यासंबद्धप्रलापत्वात्। क्रियाविशिष्टकर्तृकर्मणोरेव तद्वाच्यत्वस्य प्राधान्यस्य च वक्तुं युक्तत्वात्। 'ओदनं पक्त्वौदनं भुङ्क्ते, ओदनं पक्त्वौदनो भुज्यते' इति प्रयोगयोरसाधुतापत्त्या तादृशक्लिष्टकल्पनानौचित्याच्च ॥

[३, ३८१–३८५]

(नारायणीयम्) मान्तत्वे निपात्यमाने कथमीकाराभावः सिध्येदित्याशङ्क्याह — **मान्तत्वे भाविप्रत्ययविषय इति**। उपपदस्य प्रत्ययं प्रति निमित्तत्वान्मान्तत्वं निपात्यमानं प्रत्ययात् पूर्वं भवति। ततश्च स्त्रियां वृत्तावप्युपक्रान्तत्वात् ङीष् न भविष्यतीत्यर्थः। यस्य खमुञि मुमैव मकारान्तत्वं सिद्धमिति मतं तस्यापि सर्वत्रेष्टं न सिध्यतीत्याशयेन 'च्व्यन्तस्य च मकारान्तार्थम्' इत्युक्तमित्याह — **खमुञ्यपि सर्वत्रेति। अव्ययार्थमेवेति**। अपूर्वविधानात् प्रतिप्रसवस्य लघुत्वात् मुमः [4]'अनव्ययस्य' इति प्रतिषेधे प्राप्ते तस्याभ्यनुज्ञानार्थमेव मान्तत्वनिपातनं स्यादित्यर्थः। **अपूर्वं विधीयमानमिति**। अपूर्वविधाने सर्वत्र मान्तत्वमविशेषात् सिध्यतीत्यर्थः। खमुञोऽनुवर्तने लाघवमपि नास्तीत्याह — **अवश्यं चेति**। चशब्दस्यानन्वयमाशङ्क्य परिहरति — **पूर्वोक्तेति**। **अभिविधौ चायमिति**। तेन तुमुनोऽप्ययमर्थनिर्देशः सिध्यति। 'स्वादुंकारम्' इत्यादौ कर्तुरेवाभिधानमिति नियमः कथमित्यत्राह — **असत्यस्मिन्निति**। **न त्विति**। प्रसज्यप्रतिषेधे हि णमुला कर्तुरभिहितत्वात् [5]'तदाश्रयः प्रतिषेधः स्यादिति भावः। तत्र [6]'कर्तरि कृत्' इति वचने जीवति कथं कर्मणि विज्ञायेतेत्यत्राह — **अव्ययकृत इति**। ननु 'आ च तुमुनः' इत्यवधिनिर्देशात् क्त्वादिष्वप्येतद्वचनप्रयोजनस्यावगतत्वात् प्रश्नोऽयमसमञ्जस इत्याशङ्क्यास्यैव विवरणं प्रश्नद्वारेण क्रियत इति परिहरति — **अनेकेति**। ननु क्त्वायां प्रयोजनस्य दर्शितत्वात् 'पक्त्वौदनं गम्यते ग्रामः' इति पुनरुक्तमित्यत्राह — **भिन्नधात्वर्थेति**। **पाकापेक्षया तृतीयेति**। तृतीयाद्वितीये अपि कदाचित् स्याताम्, न तु नियोगतः प्रथमेत्यर्थः। 'आख्यातादि' इत्यादिशब्देन कृदन्तं गृह्यते। 'पक्त्वौदनो भुक्तो देवदत्तेन' इत्यादौ। **तत्र प्रधानशक्त्यभिधान इति**। सकृच्छ्रुतस्य शब्दस्य युगपद् द्वाभ्यां संबन्धायोगादेकेनैव प्रधानेन शाब्दोऽन्वयः, इतरेण संनिधानादार्थ इति 'अभिहितवत् प्रकाशते' इत्यनेन दर्शितः। उक्तं च —

[7]प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥

---

[1] सामान्यतोऽभिहितत्वाभावेनानभि — ब.
[2] पदे वाच्या — ब.
[3] प्रदीपे 'पृथक्त्वात् तद्विरुद्ध' इत्यत्र 'पृथक् तद्विरुद्ध' इति चौखाम्बामुद्रिते पाठः।
[4] पा. सू. ६.३.६६.
[5] तदाश्रयप्रतिषेधः — ङ.
[6] पा. सू. ३.४.६७.
[7] वाक्यपदीयम् ३.७.८१, ८२.

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रकाशते॥ इति॥

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ३.४.३२.

[३, ३८५]

(उद्द्योतनम्) प्रातीति। प्रा पूरणे। [१]वृषेरकर्मकत्वात् कथं द्वितीया, अत आह — **क्रियेति।** कल्पादिप्रत्यये [२]प्रकारश्रवणाय णमुल् विधेयः, ऊलोपश्च, अत आह — [३]**गोष्पदप्रंकल्पमिति।** संपूर्णसूत्रस्यैव प्रत्याख्यानं कुतो न कृतमिति शङ्कते — **गोष्पदेति।** स्वरभेदप्रसङ्गेन परिहरति — **स्वर इति। यदीति।** करणे भावे वा घञस्तु, तत्पुरुषेऽन्तोदात्तत्वं बहुव्रीहावाद्युदात्तत्वमिति न पकारोकारस्योदात्तत्वसिद्धिरित्यर्थः। [४]**गोष्पदपूरंतरामिति।** इदं भाष्यकारस्येष्टम्, णमुलोऽप्रत्याख्यानात्। कप्रत्ययस्थले स्वरभेदो नास्तीत्याह — **गोष्पदेति। कृत्स्वरेण** [५]"गतिकारकोपपदात् कृत्" इति कृदुत्तरपदप्रकृतिस्वरेण॥

[३, ३८५]

(रत्नप्रकाशः) सूत्रावयवं प्रत्याचष्टे — **ऊलोपश्चेत्यादिना। प्रातिः पूरणकर्मेति।** 'प्रा पूरणे' इति ह्यदादौ पठितः सः। **तस्मादेष क इति।** तस्मात् प्राधातोः [६]"घञर्थे कविधानम्" इति क इति भावः। 'गोष्पदप्रं वृष्टः' इत्यत्र क्रियाविशेषणत्वात् कर्मत्वं नपुंसकलिङ्गता च। एतेन "गोष्पदं प्रातीति [७]"आतोऽनुपसर्गे कः" इति कप्रत्ययः" इति निरस्तम्। क्रियाविशेषणत्वात् कर्मत्वनपुंसकत्वे इति स्वोत्तरग्रन्थविरोधात्। न हि [८]कर्तृकान्तस्य क्रियाविशेषणत्वं संभवति। अत्रेदमवधेयम् — गोष्पदप्रं वृष्टो देव इत्येतत्सूत्रोदाहरणस्य प्रसिद्धस्यान्यथासिद्धिमात्रपरमिदं प्रत्याख्यानम्। गोष्पदप्रंकल्पम्, गोष्पदप्रंतराम्, इत्यादिप्रयोगसिद्धये तु सोऽपि सूत्रावयवोऽपेक्षित एवेति। एतेन 'ऊलोपप्रत्याख्यानान्यथानुपपत्त्या भाष्यकारेण गोष्पदप्रंकल्पमित्यादयः प्रयोगा नाभ्युपगता इति विज्ञायते' इति निरस्तम्। उदाहरणान्यथासिद्धिपरत्वेन भाष्यस्योपक्षीणत्वेन तत्प्रयोगानभ्युपगमकल्पने मानाभावात्। एतज्जातीयभाष्यानुसारेण सूत्रावयवप्रत्याख्याने समस्तशास्त्रोपप्लवापत्तेः। 'गोष्पदपूरं वृष्टो देवः' इति प्रयोगस्यापि पूरेर्घञि सिद्धत्वेन 'गोष्पदपूरंकल्पम्, गोष्पदपूरंतराम्' इत्यादिप्रयोगस्य कृदुत्तरपदप्रकृतिस्वरस्य चानभ्युपगमकल्पनसंभवेन च सूत्रप्रत्याख्यानपरतयैवैकदेशप्रत्याख्यानमिति कल्पनापत्तेश्च। एतेन 'स्वरे दोषप्रसङ्गाद् घञा गोष्पदपूरमित्यादिप्रयोगसिद्धिमाश्रित्य समस्तमेवेदं सूत्रं न प्रत्याख्यायते' इति निरस्तम्। तत्र लित्स्वरानभ्युपगमस्य 'गोष्पदप्रंकल्पम्' इत्याद्यनभ्युपगमस्येव कल्पयितुं शक्यत्वात्। यदप्युक्तम् 'यदि करणे

---

[१] पुषेरकर्मकत्वात् — अ.
[२] 'गोष्पदप्रंकल्पम्' इत्यादौ प्रशब्दश्रवणायेत्यर्थः। एवकार इतिवत् 'प्र' इति समुदायात् कारप्रत्ययो बोध्यः॥ पकाराश्रवणाय — ॠ, ऌ.
[३] गोष्पदप्रकल्पमिति — अ.
[४] गोष्पदपूरतरामिति — अ, ॠ, ऌ.
[५] पा. सू. ६.२.१३९.
[६] का. वा. ३.३.५८–४.
[७] पा. सू. ३.२.३.
[८] कर्तरि कप्रत्ययान्तस्येत्यर्थः।

घञं विधाय षष्ठीतत्पुरुषः क्रियते तदा [1]'थाथादिसूत्रेणान्तोदात्तत्वं भवति। भावे तु घञि बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। णमुलि तु लित्स्वरेणोकार उदात्तः' इति। तदपि न, भावे णमुलि गोष्पदपूरशब्दस्य षष्ठीतत्पुरुषताया एव सर्वजनसंमतत्वेन करणघञन्ततत्पुरुषत्वेन भावघञन्तोत्तरपदबहुव्रीहित्वेन च 'गोष्पदपूरं वृष्टो देवः' इति प्रयोगगतगोष्पदपूरशब्दसाधनानौचित्यात्। तस्माद्यत्किंचिदेतत्॥

[३, ३८५]

(नारायणीयम्) **गोष्पदं प्रातीति।** पूरयतीत्यर्थः। 'प्रा पूरणे' इत्यदादौ पठ्यते। ननु 'गोष्पदप्रम्' इत्यस्य णमुलन्तत्वाभावेऽव्ययत्वाभावात् कथं 'गोष्पदप्रं वृष्टः' इत्यादिप्रयोगोपपत्तिरित्यत्राह — **क्रियाविशेषणत्वादिति।** यथा गोष्पदस्य पूरणं भवेत् तथा वृष्टवानित्यर्थः। नन्वव्ययत्वे सत्येव 'गोष्पदप्रंकल्पम्' इत्यादिप्रयोगसिद्धिरिति तदर्थमिदं [2]'स्यादित्यत आह — **गोष्पदप्रंकल्पमिति।** नन्वेवं सति 'वर्षप्रमाणे' इत्येतदपि प्रत्याख्यातुं शक्यमिति चोदयति — **गोष्पदपूरमिति। यदि करणे घञमिति।** [3]'अकर्तरि च कारके' इति वचनात् कर्तरि घञ् दुर्लभ इत्यर्थानुगुण्येन 'करणे' इत्युक्तम्। [4]पूर्यत इति पूरम्, गोष्पदस्य पूरं गोष्पदपूरमिति। **बहुव्रीहाविति।** गोष्पदस्य पूरो यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः। नवेवमेव 'गोष्पदप्रम्' इत्यत्रापि स्वरदोषः स्यादिति, नेत्याह — **गोष्पदप्रमित्यत्र त्विति। कृत्स्वरेण** प्रत्ययस्वरेणेति [भावः]। समासात् पूर्वमपवादाभावात् प्रत्ययस्वरो भवति। समासे सति [5]'गतिकारकोपपदात् कृत्' इति कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यत इत्यर्थः॥

करणे हनः ३.४.३७.

[३, ३८६]

(उद्द्योतनम्) अहिंसार्थकस्य ग्रहणशङ्कां निराह — **बाहुल्येनेति।** भाष्ये **नित्यसमासार्थमिति।** तेन चेत् [6]'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति समासविकल्पः स्यादित्यर्थः। पूर्वविप्रतिषेध[7]पक्षे वृत्तौ तत्सूत्रे वक्ष्यमाणोदाहरणविरोधं शङ्कते — **यद्येवमिति।** [8]'कषादिषु' इति विधिर्यत्र प्रवर्तते तत्रायं पूर्वविप्रतिषेधः, नान्यत्रेति परिहरति — **नैष इति॥**

[३, ३८६]

(रत्नप्रकाशः) प्रायेण हन्तिर्हिंसार्थक एव प्रयुज्यत इति प्रयोगानुसारेणाह — **हनः करण इति।** 'हन हिंसागत्योः' इति धातुपाठे गत्यर्थकताया अपि दर्शितत्वाद् [9]'धातूनां सामान्यतो धातुपाठ-

---

[1] पा. सू. ६.२.१४४.
[2] 'स्यात्' इति नास्ति — घ.
[3] पा. सू. ३.३.१९.
[4] पूर्यतेऽनेनेतीति विवक्षितम्।
[5] पा. सू. ६.२.१३९.
[6] पा. सू. २.२.२१.
[7] पक्षे निवृत्ता तत्सूत्रे — अ, ऋ, लृ.
[8] पा. सू. ३.४.४६.
[9] धातुना सामान्यतः — ब.

निर्दर्शितार्थातिरिक्तार्थकतायाः साधितत्वेन च सार्थकमेवेदं सूत्रमित्याशयेन समाधत्ते — **अर्थवत्त्विति**। **नित्यसमासार्थं चेति**। चेन यथाविध्यनुप्रयोगार्थं चेति समुच्चीयते। पाणिनोपघातं हन्तीति विशिष्ट एवासमस्तप्रयोगो हि नेष्टः। **हन्तेः पूर्वविप्रतिषेध इति**। धातुव्यक्तिभेदप्रयुक्तं समानकर्मत्वमाश्रित्य [१]"हिंसार्थानां च' इति सूत्रं प्रवर्तत इत्याशयेनेदम्। वस्तुतस्तु समानकर्मत्वमत्यन्तधातुभेदप्रयुक्तमेव न्याय्यमिति 'पाण्युपघातं वेदिं हन्ति' इत्यत्र [२]'हिंसार्थानां च' इत्यस्य प्रसक्तिरेव नास्तीत्यत्र भगवतस्तात्पर्यं ज्ञेयम्। तेन 'दण्डोपघातं गाः कालयति' 'दण्डेनोपघातं गाः कालयति' इति प्रयोगद्वयं परविप्रतिषेधेन सिध्यति। एतेन 'हन्तेः पूर्वविप्रतिषेधः' इति यथाश्रुतं भाष्यमाश्रित्य [३]"यत्रैक एव धात्वर्थः सामान्यविशेषभावेन भिद्यते तदा प्रकृतसूत्रप्रवृत्तिः। अत्यन्तभिन्नधात्वर्थसंबन्धे तु [४]'हिंसार्थानां च समानकर्मकाणाम्' इत्यस्य प्रवृत्तिः" इति वदन् निरस्तः। तथा सति सूत्रयोर्भिन्नविषयत्वेन पूर्वविप्रतिषेधपरभाष्यस्यात्यन्तासंगतत्वापत्तेः॥

[३, ३८६]

(नारायणीयम्) ननु 'हन हिंसागत्योः' इति पाठादहिंसार्थस्यापि हन्तेः सद्भावात् कथं हिंसार्थत्वेन सूत्रस्यानर्थक्यं पृच्छ्यत इत्यत्राह — **बाहुल्येनेति**। 'यद्येवम्' इत्यादिना यथाविध्यनुप्रयोगार्थं चेदं वचनमिति दर्शयति॥

अधिकरणे बन्धः ३.४.४१.

[३, ३८७]

(उद्द्योतनम्) णमुलि सति किमनिष्टम्, अत आह — **णमुलीति**॥

[३, ३८७]

(रत्नप्रकाशः) [५]**ग्रामे बद्ध इति**। अत्र णमुलि 'ग्रामबन्धं बद्धः' इति स्यादित्यापाद्यं रूपम्। **अधिकरणे बन्धः संज्ञायामिति**। एतेन 'अधिकरणे बन्धः' इति णमुलि [६]'संज्ञायाम्' इत्युत्तरसूत्रनैरपेक्ष्येण व्याख्याय 'चक्रबन्धं बध्नाति, चक्रे बध्नातीत्यर्थः' [७]इत्युदाहरणं दर्शयन्तो भाष्याशयानभिज्ञा यथाश्रुतसूत्रानुसारिणो निरस्ताः। 'यथोत्तरं मुनीनां प्रामाण्यम्' [८]इति भाष्यानुसारेणैव सूत्रस्य व्याख्यातुमुचितत्वात्। शङ्कते — **कथमिति**। **अट्टालिकाबन्धमिति**। अट्टालिकायां बद्ध इत्यर्थेऽयं प्रयोग इति मन्यते। परिहरति — **उपमान इति**। अट्टालिकेव बद्धः, चण्डालिकेव बद्ध इति तयोरर्थ इति भावः॥

---

[१] पा. सू. ३.४.४८.
[२] पा. सू. ३.४.४८.
[३] कैयटार्थानुवादोऽयम्।
[४] पा. सू. ३.४.४८.
[५] 'ग्रामे बन्धः' इति प्रदीपे प्रतीकग्रहणम्। 'ग्रामे बद्धः' इति त्वपपाठ इति नागेशः।
[६] पा. सू. ३.४.४२.
[७] इदं कौमुद्यां दृश्यते।
[८] इति हेतोरित्यर्थः।

[३, ३८७]

(नारायणीयम्) ग्रामे बन्ध इत्यत्र णमुलि सति को दोष इत्यत्राह — **णमुलीति**॥

तिर्यच्यपवर्गे ३.४.६०.

[३, ३८७]

(उद्द्योतनम्) ननु 'तिर्यक्कृत्य गतः' इत्युदाहरणस्थस्य तिर्यक्छब्दस्येदमनुकरणम्। ततश्च 'तिरश्चि' इत्युक्ते तद्रूपविनाशप्रसङ्ग इति समाधानं किमिति नोक्तम्, अत आह — **अनुक्रियमाणेति**। तिर्यक्छब्दस्य [1]स्वरूपपरत्वेऽपि 'तिरश्चि' इत्येव[2] सप्तम्येकवचने लक्षणतो भाव्यमेवेति भावः॥

[३, ३८७]

(रत्नप्रकाशः) अयुक्तोऽयं निर्देश इति। अनुकार्यानुकरणयोर्भेदमजानतो मन्दबुद्धेरियमुक्तिः। [3]'तुष्यतु दुर्जनः' इति न्यायेनोत्तरमाह — [4]**सौत्रो निर्देश इति**। एतेन 'अनुक्रियमाणरूपविनाशप्रसङ्गस्तु न परिहारः। न हि [5]"प्रयोजनानुवर्ति प्रमाणम्' इति मूर्खशङ्कासमाधाने निरस्ते। अनुकार्यानुकरणयोर्भेदस्य न्यायसिद्धत्वेनानुकार्ये प्रवर्तमानस्य शास्त्रस्यानुकरणे प्रसक्त्यभावात्। [6]"यत्तदेतेभ्यः' इति निर्देशेन ज्ञापितस्त्वनुकरणस्यानुकार्यकार्यलाभो वैकल्पिक इति युज्यत एव हि 'तिर्यचि' इति प्रयोगोऽत्र॥

[३, ३८७]

(नारायणीयम्) न हीति। [7]प्रमाणानुवर्तित्वं हि प्रयोजनस्य न्याय्यम्, प्रमाणेन प्रयोजनस्यावस्थाप्यमानत्वादित्यर्थः॥

नाधार्थप्रत्यये च्व्यर्थे ३.४.६२.

[३, ३८७–३८८]

(उद्द्योतनम्) धमुञो धादेशत्वादर्थग्रहणस्य कथमेतत् प्रयोजनम्, अत आह — [8]**यदेति**।

---

[1] स्वरपरत्वेऽपि — अ, ऋ, लृ.
[2] अत्रैवकारोऽधिको भाति, उपरि विद्यमानत्वात्।
[3] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[4] भाष्ये 'सौत्रोऽयं निर्देशः' इत्यत्र 'सौत्रो निर्देशः' इति निर्णयसागरमुद्रिते पाठः।
[5] प्रयोजनानुवृत्ति — ब.
[6] पा. सू. ५.२.३९.
[7] प्रमाणानुवृत्तित्वं हि — घ, ङ.
[8] यथेति — अ.

प्रत्ययपक्षे इदमेव भाष्यं ज्ञापकम्। आदेशपक्षेऽपि [१]बिन्दुरहितमर्थग्रहणप्रयोजनमित्याह — [२]**तदेति**। **द्वैधकृत्येति**। द्वैधंशब्दात् स्वार्थे डे सति टिलोपे स्वार्थिकस्यापि स्वाभाव्यात् सत्त्ववाचित्वेन लिङ्गसंख्यायोगात् 'द्वैधं कृत्वा' इत्यत्र [३]'तृतीयाप्रभृतीन्यन्यतरस्याम्' [४]'क्त्वा च' इति समासे क्त्वो ल्यपि [५]'सुपो धातु' इति सुपो लुकि रूपम्॥

[३, ३८७–३८८]

(रत्नप्रकाशः) द्वैधंकृत्येति। [६]'द्वित्र्योश्च धमुञ्' इत्यादिना प्रत्यया एव विधीयन्त इत्याश्रयेणेदमुदाहरणं ज्ञेयम्। आदेशा विधीयन्त इति पक्षे तु स्थानिवद्भावेन धात्वादेर्वं सिद्धम्। तस्मिन् पक्षे [७]'धमुञन्तात् स्वार्थे डदर्शनम्' इति डप्रत्ययान्त उदाहार्यः 'द्वैधकृत्य' इति। नार्थमप्यर्थग्रहणं कर्तव्यम्, अन्यथा [८]निरनुबन्धकपरिभाषया नाम्नो ग्रहणं न स्यात्॥

[३, ३८७–३८८]

(नारायणीयम्) आदेशपक्षेऽप्यर्थग्रहणस्य प्रयोजनमाह — [९]**तदा त्विति**। भाष्येऽर्थग्रहणस्य [१०]धार्थत्वप्रदर्शनान्नार्थत्वमस्य नेति भाति। तदपनयनायाह — **नार्थमपीति**॥

कर्तरि कृत् ३.४.६७.

[३, ३८८–३९३]

(उद्द्योतनम्) वक्ष्यमाण इति। परिशेषात् कर्तर्येव भविष्यतीत्यर्थः। स्वार्थे भवतीत्यत्र हेतुः — **प्रत्यासत्त्येति**। ननु धातुमात्राद् घञ्विधानार्थं [११]'भावे' इति सूत्रं कथं प्रत्ययान्तरं भावे निवर्तयेत्, अत आह — **असत्येतस्मिन्निति**। **तत इति**। भावे 'घञ्' इत्यनेन सिद्धत्वात् कर्त्रर्थं [१२]तदित्यर्थः। **आक्षिप्त इति**। यद्यपि कारकान्तरस्याप्याक्षेपः संभवति, तथापि वक्ष्यमाणरीत्या तन्निरासः। उपस्थितिसंपादनाय [१३]'आक्षेप' इत्युक्तम्। प्रसक्तिमाह — **तस्यापीति**।

---

[१] अनुस्वाररहितमित्यर्थः।

[२] प्रदीपे 'तथा च धमुञन्तात्' इति पाठो दृश्यते। 'तथा च' इत्यस्य 'तदा चेत्यर्थः' इति नागेशेन व्याख्यातं च। अन्नंभट्टस्य तु 'तदा च धमुञन्तात्' इति पाठ इति प्रतीयते।

[३] पा. सू. २.२.२१.

[४] पा. सू. २.२.२२.

[५] पा. सू. २.४.७१.

[६] पा. सू. ५.३.४५.

[७] का. वा. ५.३.४५–१.

[८] परिभाषा ८२.

[९] प्रदीपे 'तथा च धमुञन्तात्' इत्यत्र 'तदा तु धमुञन्तात्' इति पाठोऽभिमत इति भाति।

[१०] धात्वर्थप्रदर्शनात् — घ, ङ.

[११] पा. सू. ३.३.१८.

[१२] पदरुजेति सूत्रमित्यर्थः।

[१३] आक्षिप्त इत्यत्र प्रकृत्यर्थे तात्पर्यमस्य बोध्यम्।

धः ष्ट्रन्, ततः 'कर्मणि' इति नियमार्थमिति वाक्यभेदमङ्गीकृत्योक्तमिति मत्वा शङ्कते — [1]**यद्येवमिति**। [2]**एकमिति**। एकस्मिन्नपि वाक्ये 'कर्मणि' इति विशेषणान्नियमो भविष्यतीति भावः। एकस्मिन्नेव वाक्ये विधिनियमद्वयं न संभवति, अत आह — **अथवेति**। वाक्यभेदमङ्गीकृत्य कर्मण्येव [3]ष्ट्रन्, कर्मणि ष्ट्रन्नेवेति नियमद्वयमङ्गीक्रियत इत्यर्थः। कर्तुरपि नियमं शङ्कते — **नन्विति**। [4]**करणनिवृत्त्यर्थेति**। [5]'कर्तरि भुवः' इत्यत्रापि [6]'आढ्यसुभग' इत्यतः करणप्रसक्तिः। [7]'कर्तरि चर्षिदेवतयोः' इत्यत्रापि [8]'दाम्नीशस' इति सूत्रात्[9]। विधिनियमयोर्विधेरेव युक्तत्वादिति भावः। **विशेष इति**। घञादिवाच्यस्य [10]लिङ्गसंख्यायोगः, न धातुवाच्यस्य भावस्येति भावभेदस्तत्रोक्त इत्यर्थः। यद्यपि [11]'तुमर्थे सेसेन्' इत्याभ्यन्तरभावे तुमर्थे सयादीनां नियमान्न तत्र कृतः प्राप्नुवन्तीति परिशेषात् कर्तरि भवन्तीति सूत्रं व्यर्थम्, तथाप्यसत्यस्मिन् सूत्रे तुमर्थग्रहणेन धात्वर्थसंबन्धी कर्ता गृह्येत, कर्मादीनां नियतत्वात्। अन्ये तु कृतोऽन्तरङ्गे भावे स्युः। यदि चान्तरङ्गत्वात् [12]तुमर्थान्तिरङ्गभावो गृह्यते तदा कर्तृव्यावृत्त्या विध्यर्थत्वसंभवान्न नियमार्थत्वम्। कृदन्तस्याप्यन्तरङ्गभावे प्राप्तिर्विनिगमकाभावादनिवार्यैवेति सूत्रमावश्यकमिति भावः। ननूभयत्र संभवात् कथं कर्तुर्बाधकः, अत आह — **विशेषेति**। तक्रकौण्डिन्यन्यायेनेति भावः। ननु नानावाक्येऽपि तक्रेण दधिबाधो दृश्यते, अत आह — **दधीति**। समानवाक्यत्वमेककालोच्चरितत्वं विवक्षितमिति भावः। अस्त्विहाप्येकवाक्यत्वम्, अत आह — **तथेहापीति**। कथं तर्हि [13]'इको गुणवृद्धी' इति सूत्रे नानावाक्येऽपवादत्वमुक्तम्, अत आह — **यत्त्विति**। [14]**तच्च** 'अलोऽन्त्यस्य' [इति]। **इदम्** [15]'इको गुणवृद्धी' इति। असंभवमेवाह — **यदेति**। असंभवो नास्तीत्याह — **ल्युनादयस्त्विति**। ननु द्वयोर्युगपत्प्रतीतिविरोधाद् बाधकत्वं स्यात्, अत आह — **तत्रेति**। तच्छब्दार्थमाह — **योऽयमिति**। [16]कृत्त्वात् कर्तरीत्ययमर्थः। तेनार्थेनैवकारस्य कथं तुल्यत्वमित्याशङ्क्य तद्द्योतकत्वं तत्तुल्यत्वमभिप्रेतमिति 'एवं च कृत्वा' इति भाष्य उक्तम्। तदुपपादयति — **तथा हीति**। 'भावे चाकर्मकेभ्यः' इत्यस्यानुपयोगं निराह — **भावे चेति**। [17]'तयोः' इत्यनेन भावकर्मणोर्ग्रहणमिति ज्ञापयितुं तदुक्तिरित्यर्थः। ननु कृत्यादीनां कर्तर्यप्रवृत्तिः

---

[1] 'यद्येवमिति' इत्यस्यानन्तरम् 'कर्मणीति विशेषणान्नियमो भविष्यतीति भावः, एकस्मिन्निति वाक्ये, इति 'अ, ऋ' कोशयोर्वर्तते। 'यद्येवमिति' इत्यस्यानन्तरम् 'एकमिति' इति प्रतीक एवास्ति — 'ऌ' कोशे।

[2] 'एकमिति' इति प्रतीकानन्तरम् 'एकस्मिन्नेव वाक्ये' इत्यादि 'अथवेति' इत्यन्तम् — 'अ, ऋ, ऌ' कोशेषु वर्तते।

[3] 'ष्ट्रन्' इत्यस्यानन्तरं 'कर्मणीति विशेषणान्नियमो भविष्यतीति भावः। एकस्मन्नपि वाक्ये कर्मणि ष्ट्रन्नेवेति' इत्यानुपूर्वी 'ऌ' कोशे दृश्यते। एवं कोशेषु दर्शनेऽप्यर्थौचित्यमनुसृत्य किंचिद्विपर्यस्य निवेशः कृतः।

[4] प्रदीपे 'करणनिवृत्त्या कर्तृश्रुतिः' इत्यत्र 'करणनिवृत्त्यर्था कर्तृश्रुतिः' इत्यन्नंभट्टपाठ इति भाति।

[5] पा. सू. ३.२.५७.

[6] पा. सू. ३.२.५६.

[7] पा. सू. ३.२.१८६.

[8] पा. सू. ३.२.१८२.

[9] करणप्रसक्तिरित्यनुषङ्गः। करणरूपार्थस्य प्रसक्तिरित्यर्थः।

[10] 'लिङ्ग' इत्यादि 'धातुवाच्यस्येति' इत्यन्तं नास्ति — अ.

[11] पा. सू. ३.४.९.

[12] तुमर्थान्तरभावः — अ.

[13] पा. सू. १.१.३.

[14] तस्य, अलोऽन्त्यस्य — अ, ऋ, ऌ.

[15] पा. सू. १.१.३.

[16] कृत्यात् — अ, ऋ.

[17] पा. सू. ३.४.७०.

प्रयोजनमित्युक्तत्वात् प्रश्नोऽनुपपन्नः, अत आह — **एवकारेणेति**। तत्र वाग्रहणादेव समावेशसिद्धेः किं ज्ञापकेन, अत आह — **भव्येति**। आनन्तर्याद् भव्यादिविषयत्वशङ्कां निराह — **इदानीमिति**। [1]'पुवः संज्ञायाम्' इति करणे इत्रो विहितः। पुव एव [2]'कर्तरि चर्षिदेवतयोः' इतीत्रो विधीयते। तत्र चकाराभावेऽप्यनेन कर्तरि, [3]पूर्वेण करणे स्यादिति करणसमावेशार्थं चकारकरणं ख्युनादावसमावेशज्ञापनार्थमिति वार्तिकार्थः। तत्र **कृद्भिः** कृत्प्रत्ययेनेत्रेणार्थद्वयस्य समावेशार्थं चकारवचनमिति वार्तिके विवक्षितम्। तत्रैकस्मिन् बहुवचनानुपपत्तिं निराह — **जाताविति**। तत्र करणे ऋषौ, देवतायां च कर्तरि, इति व्यवस्था वृत्तावुक्ता। तत्र समावेशाभावाच्चकारस्य कथमसमावेशज्ञापकत्वम्, अत आह — **अत्र चेति**। ज्ञापकत्वस्य भाष्यकृता दूषितत्वाद् यथासंख्येऽपि न दोष इति [4]ज्ञापयितुं 'वार्तिककारस्य' इत्युक्तम्। भाष्ये भव्यादीनां कृत्याः कर्तरि, चाद् भावकर्मणोरपीत्यर्थः। भव्यादिसूत्रेणैव समावेशसिद्धेश्चकारो व्यर्थः, अत आह — **भव्येति**। तर्हि भव्यादिव्यतिरिक्तकृत्या अपि कर्तरि स्युः, अत आह — **अन्ये त्विति**। भाष्ये 'भव्यादीनाम्' इत्युक्तेरिति भावः। देशपदं कालपरं कृत्वा व्याचष्टे — **न कालेति**। उपलक्षणत्वे हेतुः — **शब्दक्रमस्येति**। [5]अनेकाख्यातयोगेऽपि [6]**न्याय्यः** उत्सर्गः, न्याय्यापवादयोरेकमेव वाक्यमिष्यत इत्यन्वयः। **भिन्नरूपं** भिन्नवाक्यम्। यद्यप्युत्सर्गापवादयोर्भिन्नार्थत्वान्न मुख्यमेकवाक्यत्वम्, तथाप्यपवादव्यतिरिक्तस्थले उत्सर्गः प्रवर्तत इत्युत्सर्गवाक्यार्थस्यापवादवाक्यार्थाधीनत्वात् तयोरेकवाक्यत्वं ज्ञेयम्। एतादृशमेव नियमप्रतिषेधयोरपि विधिनैकवाक्यत्वमित्याह — **नियम इति**। [7]**विधिशेषः** विध्येकवाक्यतां गतः। **तथा सति** आख्यातभेदेऽप्येकवाक्यत्वे सति। 'तद्यथा' इति भाष्यार्थं संगृह्णाति — **द्वितीय इति**। [8]'सुपो धातुप्रातिपदिकयोः' इति [9]'यस्कादिभ्यो गोत्रे' इति च यो लुगुक्तस्तस्य [10]'अलुगुत्तरपदे' [11]'गोत्रेऽलुगचि' इत्यलुक् शेषः, [12]तद्व्यतिरिक्ते लुकः पर्यवसानादिति भावः। प्रयोगप्रसिद्ध्यानेकार्थत्वं निपातानाम्, न स्वेच्छयेत्यभिप्रेत्याह — **लौकिक इति**। [13]भव्यादिसूत्रस्य [14]'तयोरेव' इति सूत्रादुत्तरत्वाभावादाह — **कर्तरि कृदिति**। तत्र वाकारेणैव समावेश[15]सिद्धेः किं ज्ञापकेन, अत आह — **भव्यगेयादीति**। [16]एवकारेण [17]'तयोरेव' इत्येवकारेण ॥

---

[1] पा. सू. ३.२.१८५.

[2] पा. सू. ३.२.१८६.

[3] पुवः संज्ञायामित्यनेनेत्यर्थः।

[4] 'ज्ञापयितुम्' इति नास्ति — अ.

[5] 'अनेकाख्यातयोगेऽपि' इति नास्ति — अ.

[6] 'न्यायः, उत्सर्गः' इत्युद्द्योते दृश्यते। प्रदीपे हरिकारिकापाठो 'न्यायापवादयोः' इत्येव दृश्यते। अन्नंभट्टस्य पाठः 'न्याय्यापवादयोः' इति। अयं च पाठः पूनामुद्रिते वाक्यपदीयेऽधो न्यदर्शि।

हरिकारिकायां 'नियमः प्रतिषेधश्च विशेषश्च तथा सति' इति पाठ उपलभ्यते। 'नियमः प्रतिषेधश्च विधिशेषस्तथा सति' इति पाठोऽन्नंभट्टस्य। नागेशेन च पाठान्तरमिदं प्रादर्शि।

[7] पा. सू. २.४.७१.

[8] पा. सू. २.४.६३.

[10] पा. सू. ६.३.१.

[11] पा. सू. ४.१.८९.

[12] तद्व्यतिरिक्तलुकः — अ.

[13] भव्यादिपूर्वस्य — अ.

[14] पा. सू. ३.४.७०.

[15] सिद्धिः — अ.

[16] प्रदीपे 'समावेशोऽप्येवकारज्ञापितः' इत्यत्र 'समावेशोऽप्येवकारेण ज्ञापितः' इति पाठोऽन्नंभट्टस्येति भाति।

[17] पा. सू. ३.४.७०.

[३, ३८८–३९३]

(रत्नप्रकाशः) सूत्रप्रयोजनवार्तिकमवतारयति — **किमर्थमिति**। तद्वार्तिकं पठति — **कर्तरीति**। **अनादेश इति**। **आदेशः** अर्थविशेषे विधानम्, तदभावे सतीत्यर्थः। तत्फलतो व्याचष्टे—**अनिर्दिष्टार्था इति**। [1]**भावे घञिति**। घञित्यनुवर्तमाने [2]'भावे' इति सूत्रेणेत्यर्थः। भावे घञ्विधानं ज्ञापयति — अनिर्दिष्टार्थः कृत् स्वार्थे न भवतीति [इति] भावः। ननु [3]'भावे' इति सूत्राभावे [4]'पदरुजविशस्पृशो घञ्' [5]'सृ स्थिरे' इति सूत्राभ्यां पञ्चभ्य एव धातुभ्यो घञ् भावे स्यात्। सति तु [6]'भावे' इत्यस्मिन् सर्वेभ्यो धातुभ्य इति [7]'भावे' इत्यस्य सार्थक्यात् कथमुक्तार्थज्ञापकतेति चेन्न, [8]'भावे' इति सूत्रे विद्यमानेऽपि [9]'पदरुजविशस्पृशः' इत्यादिद्विसूत्र्या नियमार्थतापत्त्या [10]'भावे' इत्यनेन धातुमात्राद् घञोऽप्रसक्त्या तस्यानर्थकताध्रौव्येणोक्तज्ञापकतायाः सुस्थत्वात्। एतेन "अस्त्यस्मिन् सूत्रे 'घञ्' इत्येतावत् सूत्रं कर्तव्यम्। धातोर्घञ् भवतीति। तत्रानिर्दिष्टार्थत्वाद् भावे घञ् भविष्यति। ततः [11]'पदरुजविशस्पृशः' इति द्वितीयं सूत्रं कर्तव्यम्। ततश्च [12]'भावे इति न कर्तव्यम्। क्रियमाणं तु नियमार्थं भविष्यति घञेव भावे, नान्य इति। ततो धात्वर्थाक्षिप्ते कर्तर्येव कृद् भविष्यतीति नार्थः सूत्रेणेत्यर्थः" इति निरस्तम्। घञित्येतावति सूत्रे कृतेऽपि [13]'पदरुज' इत्यादिसूत्रद्वयस्य नियमार्थतापत्त्या घञिति सूत्रेण सर्वेभ्यो धातुभ्यो घञोऽप्राप्तत्वेन सर्वेभ्यो धातुभ्यो घञं विदधतो [14]'भावे' इति सूत्रस्य नियामकत्वासंभवात्। **कर्मणि तर्हीति**। स्वार्थान्वितत्वाविशेषात् कर्तरीव कर्मण्यपि प्रसक्तौ कर्तर्येव भवत्वितीतेतदर्थं सूत्रं स्यादिति भावः। परिहरति — **कर्मण्यपीति**। **धः कर्मणि ष्ट्रन्निति**। ननु धः कर्मण्येव ष्ट्रन्निति वा धः कर्मणि ष्ट्रन्नेवेति वा ध एव कर्मणि ष्ट्रन्निति वा विनिगमनाविरहात् त्रेधा वा नियमफलकं विशिष्टं तत् सूत्रं स्यात्। ष्ट्रन्निति सूत्रिते हि ण्वुलादिवत् सर्वेभ्यो धातुभ्यः कर्तरि कर्मणि च ष्ट्रन् स्यादिति चेन्न, [15]'विधिनियमसंभवे विधिरेव ज्यायान्' इति परिभाषितत्वेन विधित्वाश्रयेण कृत् कर्मणि न भवतीत्येतज्ज्ञापकतोपयोगिविधित्वस्यैव विशिष्टतत्सूत्रस्योचितत्वात्। एतेन 'ष्ट्रन्नेव कर्मणि नान्य इति नियमो विज्ञास्यते। यद्येवं कर्मणो नियमात् प्रत्ययो न नियत इति कारकान्तरेऽपि ष्ट्रन् प्राप्नोति। नैष दोषः, एकमिदं वाक्यं धः कर्मणि ष्ट्रन्निति। तेन च कर्मणि विधीयमानः कथं कारकान्तरे स्यात्। अथवा द्वितीयो नियमः करिष्यते — कर्मण्येव ष्ट्रन्निति' इति निरस्तम्। [16]'विधिनियमसंभवे विधिरेव ज्यायान्' इति परिभाषामनाश्रित्य नियमार्थताश्रयणानौचित्यात्। नियमार्थताश्रयणे प्रकृतभाष्यासंगतेश्च। न हि [17]'धः कर्मणि' इति सूत्रस्य नियमपरत्वे सामान्यतः कृत्प्रत्ययः कर्मणि न भवतीति सिध्यति, येन प्रकृतभाष्यमुपपद्येत। **ल्युट् करणाधिकरणयोरिति**। [18]'ल्युट् च' इत्यत्र चकारो भिन्नक्रमः, 'नपुंसके भावे'

---

[1] भावे घञितीति — ब.
[2] पा. सू. ३.३.१८.
[3] पा. सू. ३.३.१८.
[4] पा. सू. ३.३.१६.
[5] पा. सू. ३.३.१७.
[6] पा. सू. ३.३.१८.
[7] पा. सू. ३.३.१८.
[8] पा. सू. ३.३.१८.
[9] पा. सू. ३.३.१६.
[10] पा. सू. ३.३.१८.
[11] पा. सू. ३.३.१६.
[12] पा. सू. ३.३.१८.
[13] पा. सू. ३.३.१६.
[14] पा. सू. ३.३.१८.
[15] परिभाषा १०९.
[16] परिभाषा १०९.
[17] पा. सू. ३.२.१८१.
[18] पा. सू. ३.३.११५.

इत्यनेन संबध्यते। तेनैव च कारकाणि समुच्चीयन्त इति करणाधिकरणयोर्ल्युटि संभवति विशिष्य तत्र ल्युड्विधानं ज्ञापयति — कृद् भावकर्म[1]भिन्ने न भवतीति [इति] भावः। **सोऽन्तरेण वचनं कर्तव्येवेति**। अत्रेदमवधेयम् — [2]"कर्तरि भुवः खिष्णुच्खुकञौ' [3]'कर्तरि चर्षिदेवतयोः' इति खिष्णुजादीनां कर्तरि विधानात् कर्तृभिन्ने एव कृद् भवतीति ज्ञाप्यताम्। तथा च कुत्रापि कारके कृन्न प्राप्त इत्येव सारम्, इति। तदेतत् सर्वमभिप्रेत्याह — **तदेव तर्हि प्रयोजनमिति**। एतेन "'ननु [4]'कर्तरि भुवः खिष्णुच्खुकञौ' [5]'कर्तरि चर्षिदेवतयोः' इति कर्तुरपि नियमः प्राप्नोतीत्याशङ्क्य नैष दोषः, उभयत्र करणनिवृत्त्या कर्तृश्रुतिर्विध्यर्थैव न नियमार्थेति समादधानो निरस्तः। विधायकत्वाश्रयेणैव सर्वत्र ज्ञापकत्वस्य भगवतोऽभिमतत्वेन शङ्कासमाधानयोरसंबद्धप्रलापत्वात्। **कर्तृग्रहणमिति**। 'कर्तरि कृत्' इति प्रकृतसूत्रमित्यर्थः। **उक्त इति**। [6]'सार्वधातुके यक्' इति सूत्र इति शेषः। **तेन [च] करणे ल्युर्नेन [च] कर्तरीति**। एकैकस्य शब्दस्यानेकार्थतासंभवेनार्थांशे वचनानां बाध्यबाधकभावासंभवादर्थसमुच्चयः प्रसज्यत इति भावः। [7]सत्यपि संभवे बाधनं भवतीति न्यायमाश्रित्याह — **ननु चेति**। **ल्युनादयो बाधका इति**। ल्युनादिषु वाच्यतया विशिष्य निर्दिष्टाः करणादयोऽर्था बाधका इत्यर्थः। **नानावाक्यत्वादिति**। नानाविषयकवाक्यत्वात्, भिन्नविषयकवाक्यत्वादिति [8]यावत्। भिन्नदेशस्थितत्वात् तयोर्वाक्ययोर्भिन्नार्थकत्वमिति मन्यते। [9]'इको गुणवृद्धी' इति सूत्रगते [10]'अथ नानावाक्ये तच्चेदं च, तदा तस्यापवादः' इति भाष्ये [11]नानावाक्येशब्दो भिन्नवाक्ये इत्यर्थकः सिद्धान्तिन इति [12]न तेनास्य विरोधे दोषः। अत्रापि सिद्धान्तिना तदनुगुणतयैव वक्ष्यमाणत्वात्। एतेन प्रकृतभाष्यस्य तेन भाष्येण विरोधमाशङ्क्य तत्परिहाराय "[13]'इको गुणवृद्धी' इति सूत्रे 'अथ नानावाक्ये' इति यत् तदसंभवाश्रयेण। यदा 'अङ्गस्य' इतीगपेक्षयावयवषष्ठी तदा स्थानषष्ठ्यभावात् [14]'अलोऽन्त्यस्य' इत्यस्यानुपस्थानम्, तदेव चापवादत्वम्" इति वदन् निरस्तः। सूत्रद्वयापेक्षयाङ्गस्येत्यस्य स्थानषष्ठीत्वस्यैवोचितत्वात्। तथैव भाष्यकृताभ्युपगमात्, युक्तिसहत्वाच्च। किं च यद्यनुपस्थानमेवापवादत्वं स्यात्, तर्हि [15]'इको यणचि' इत्यादौ [16]'एचोऽयवायावः' इत्यादेरनुपस्थानमिति तस्याप्यपवादत्वं स्यादिति यत्किंचिदेतत्। [17]**समाने वाक्य इति**। एकविषये वाक्य इत्यर्थः। उत्सर्गे चापवादे च वाक्ये एकविषये सति तत्रापवादेनोत्सर्गस्य बाधनं भवतीत्यर्थः। **तद्वदिति**। **सः** अपवादत्वाभावपक्षः ज्ञाप्योऽस्यास्तीति तद्वदित्यर्थः। अपवादत्वाभावात् समावेशे प्राप्ते ह्येवकारेण व्यावर्त्यते सः। **भावे चाकर्मकेभ्य इति**। इदं [18]'तयोरेव' इति तच्छब्दार्थनिदर्शनोपयोगितया पठितम्, न तु चार्थप्रदर्शनमत्रोपयुज्यत इति ज्ञेयम्। चार्थप्रदर्शनं हि प्रकृतार्थविरोधि।

---

[1] भिन्न एव भवतीति — प, ब.
[2] पा. सू. ३.२.५७.
[3] पा. सू. ३.२.१८६.
[4] पा. सू. ३.२.५७.
[5] पा. सू. ३.२.१८६.
[6] पा. सू. ३.१.६७.
[7] अयं न्यायः मिदचोऽन्त्यात्सूत्रे भाष्य उक्तः।
[8] भावात् — प, ब.
[9] पा. सू. १.१.३.
[10] महाभाष्यम् १.१.३. भाष्ये 'अथ नानावाक्यम्' इत्यत्र 'नानावाक्ये' इति रत्नप्रकाशकृत्पाठः।
[11] नानावाक्ये इति शब्द इत्यर्थः।
[12] मतेनास्य — प, ब.
[13] पा. सू. १.१.३.
[14] पा. सू. १.१.५२.
[15] पा. सू. ६.१.७७.
[16] पा. सू. ६.१.७८.
[17] भाष्ये 'समानवाक्ये' इत्यत्र 'समाने वाक्ये' इति निर्णयसागरमुद्रिते पाठः
[18] पा. सू. ३.४.७०.

किं प्रयोजनमिति। तज्ज्ञापनस्येति शेषः। **तच्चेति**। तज्ज्ञापनं चेत्यर्थः। विशेषणविशेष्य-भाववैपरीत्यमात्रेणाप्युत्तरं भवतीति बहुधोक्तं न विस्मर्तव्यम्। **समावेशः सिद्ध इति**। तथा च समावेशार्थं भव्यादिसूत्रे वाग्रहणं न कर्तव्यमिति भावः। तदेवं वार्तिकानुसारेणापवादत्वाभावपक्षे व्युत्पादिते आचार्यदेशीयो ज्ञापकेनेदानीं वार्तिकनिरासायापवादपक्षं साधयति — **ऋषिदेवतयोरिति**। **कृद्भिरिति**। जातौ बहुवचनम्। कृदर्थेन करणेनेत्यर्थः। **समावेशवचनमिति**। [1]"कर्तरि चर्षि-देवतयोः' इत्येतस्मिन् चकारकरणमित्यर्थः। **असमावेशस्येति**। अर्थानां बाध्यबाधकभावस्ये-त्यर्थः। **चार्थ इति**। तथा च तत्रैवकारश्चार्थे वर्तमानोऽनुपयोगी सन्नुत्तरसूत्रे[2] संबध्नाति। उत्तरसूत्रे तु वाग्रहणं न कर्तव्यमिति वार्तिककृन्मतेऽपि स्थितमेवेति भावः। एतेन 'भव्यगेयादि-सूत्रं न कर्तव्यं भवति। अन्ये तु कृत्यादयोऽनभिधानात् कर्तरि न भविष्यन्तीति भावः' इति निरस्तम्। अनभिधानाश्रयेणार्थविशेषपरवचननिराकरणे [3]"तयोरेव' इत्यादेः सर्वस्यापि निराकर-णौचित्येनार्धजरतीयानौचित्यात्। इदानीं भगवानाह — **यत् तावदुच्यत इति**। [4]**एष एव हि न्याय्य इति**। अपवादैरुत्सर्गा बाध्यन्त इति पक्षः **न्याय्यः** न्यायादनपेतः। तथा च तस्य ज्ञापक-साध्यता न युक्तेत्यर्थः। ननु वार्तिककारेणात्र नानावाक्यत्वादपवाद्यापवादकभावो न घटत इति साधितमिति कृत्वा तदनुसारेण मया ज्ञापकेनापवाद्यापवादकभावः साधित इत्याशयेनाह — **ननु चेति**। वार्तिककारोक्तमप्ययुक्तमेवेत्याह भगवान् — [5]**न वा इति**। **एकं वाक्यमिति**। एकविषयं वाक्यद्वयं भवतीत्यर्थः। प्रकृतभाष्याशयानभिज्ञानामुत्सर्गापवादयोरेकवाक्यत्वबुद्धिर्भ्रम एवेति स्पष्ट-मेव वाक्यमर्यादां विदुषाम्। एतदभिप्रायेणैवोक्तं हरिणा —

> [6]अनेकाख्यातयोगेऽपि वाक्यं न्यायापवादयोः।
> एकमेवेष्यते कैश्चिद् भिन्नरूपमिव स्थितम्॥
> नियमः प्रतिषेधश्च विशेषश्च तथा सति।
> द्वितीये यो लुगाख्यातस्तच्छेषमलुकं विदुः॥ इति॥

तत्र 'कैश्चित्' इत्युक्त्या हि स्वेन तन्नाभिमतमिति सूचितम्। 'नियमः' इत्यादिना विधिनियमयो-र्विधिनिषेधयोरुत्सर्गापवादयोश्चैकवाक्यत्वमिति तन्मतनिष्कर्ष उक्तः। 'द्वितीये यो लुक्' इत्या-दिना प्रकृतभाष्यं तन्मतस्य मूलमिति सूचितम्। **चतुर्थषष्ठयोरिति**। चतुर्थे [7]"गोत्रेऽलुगचि' इति। षष्ठे तु [8]"अलुगुत्तरपदे' इत्यादिना। एकदेशिनैवकारस्य चार्थवृत्तित्वं यदुक्तं तन्निरा-कर्तुमाह — **यदप्युच्यत इति**। **कथं पुनरन्य इति**। एवकारस्य लौकिके प्रयोगे न क्वचि-च्चार्थे वर्तनं दृष्टमिति भावः। [9]**किं पुनः प्रयोजनमिति**। [10]"तयोरेव' इत्यत्रैवकारस्येति शेषः। **ज्ञापकार्थमिति**। ज्ञापकत्वार्थम्, ज्ञापनार्थमिति यावत्। **इत उत्तरमिति**। **इतः** 'कर्तरि कृत्' इति प्रकृतसूत्रादुत्तरमित्यर्थः। यद्यपि ज्ञाप्यकोटावित उत्तरत्वं न लभ्यते, तस्य तद्विशिष्टज्ञापक-त्वासंभवात्। तथापि कृदर्थविषयकबाध्यबाधकभावोऽनित्य इत्येतावति ज्ञापिते तत्फलं भव्यादिसूत्रे

---

[1] पा. सू. ३.२.१८६.

[2] एतस्मात् कर्तरि कृदिति सूत्रादुत्तरत्वं विवक्षितम्। भव्येत्यादिसूत्र इत्यर्थः। एवमुपर्यपि।

[3] पा. सू. ३.४.७०.

[4] भाष्ये 'एष एव न्यायः' इत्यत्र 'एष एव हि न्याय्यः' इति रत्नप्रकाशकृत्पाठः।

[5] भाष्ये 'न विदेशस्थम्' इत्यत्र 'न वै विदेशस्थम्' इति रत्नप्रकाशकृत्पाठ इति भाति।

[6] वाक्यपदीयम् २.३४९.

[7] पा. सू. ४.१.८९.

[8] पा. सू. ६.३.१.

[9] भाष्ये 'किं प्रयोजनम्' इत्यत्र 'किं पुनः प्रयोजनम्' इति रत्नप्रकाशकृत्पाठ इति भाति।

[10] पा. सू. ३.४.७०.

समावेशरूपं भवतीत्याशयेनैवमुक्तमिति न दोषः। एवं च [1]'वसेस्तव्यत् कर्तरि णिच्च' इत्यनेन वसेस्तव्यतः कर्तरि विशेषबोधितेऽपि तेन भावकर्मणोर्बाधाभावोऽपि सिध्यति। **तच्च भव्याद्यर्थमिति**। तथा च भव्यादिसूत्रे वाग्रहणं न्यायसिद्धसमुच्चयानुवादकमेवेति भावः। **सिद्धे समावेश इति**। एवकारेण ज्ञापिते सतीति भावः। **प्रागमुत इति**। [2]'आदिकर्मणि' इति सूत्रात् प्रागेव ज्ञापकसिद्धः समावेशो न तदुत्तरत्रेति ज्ञापयतीति भावः॥

[३, ३८८–३९३]

(नारायणीयम्) स्वशब्देन प्रकृतिरुच्यत इत्याह — **प्रकृत्यर्थ एवेति**। कुतोऽयं नियम इत्यत उक्तम् — **प्रत्यासत्त्येति**। ननु [3]'भावे' इत्येतस्मिन्नसति धातुमात्राद् घञ् न लभ्यत इति तदर्थमेतत् स्यादिति कथं प्रत्ययान्तरं भावे निवर्तयेदित्यत आह — **असत्यस्मिन्निति**। **ततः पदरुजेति**। घञित्यनेन धात्वर्थे विधानाद् धात्वर्थसंबन्धिनि कर्तरि विधानार्थमेतत् सूत्रमिति सामर्थ्यात् सिद्धं भवतीत्यर्थः। एवं सिद्धत्वात् [4]'भावे' इत्यतिरिक्तमित्याह — **ततश्चेति**। नियमेनान्येषां [5]कृतां भावार्थत्वे निवर्तिते कर्त्रर्थत्वं कस्माल्लभ्यत इत्यत्राह — **धात्वर्थाक्षिप्त इति**। कर्तारमन्तरेण क्रियाया अभावात्। **तस्यापीति**। यथा धात्वर्थेन कर्तुराक्षेपस्तथा कर्मणोऽप्याक्षेपात् तत्र कृतो मा भूवन्नित्येतद्वक्तव्यमिति भाष्यार्थ इत्यर्थः। **यद्येवमिति**। 'धः ष्ट्रन्' इत्येकेन वाक्येन प्रत्ययं विधाय 'कर्मणि' इति द्वितीयेन नियमः क्रियते। तेनार्थस्य नियमात् प्रत्ययः कारकान्तरेऽपि स्यादित्यर्थः। **एकमिदमिति**। [7]एकवाक्यत्वेऽपि विशेषणोपादानसामर्थ्यान्नियमः फलतीत्याशयः। नन्वेवं सति 'ष्ट्रन्नेव कर्मणि' इति नियमवाचोयुक्त्यभावात् प्रत्ययान्तरस्य कर्मणि विधानं दुष्परिहरमित्यपरितुष्यन् पक्षान्तरमाह — **अथवेति**। तन्त्रादिन्यायेन वाक्यद्वयं संपाद्य नियमद्वयमास्थेयमित्यर्थः। [8]**उभयत्रापीति**। यथा 'कर्तरि कृत्' इति [9]सूत्रारम्भे करणाधिकारनिवृत्तिः [10]कर्तृग्रहणस्य प्रयोजनम्, एवमनारम्भेऽप्येतत्प्रयोजनसद्भावाद् विध्यर्थत्वे संभवति नियमार्थत्वानुपपत्तिरित्यर्थः। **बाह्याभ्यन्तरयोर्भावयोर्विशेष[11] इति**। बाह्यस्य भावस्य लिङ्गसंख्यादियोगः, आभ्यन्तरस्य [12]तु भावस्य तदभाव इति।

अत्र चोदयन्ति — [13]'तुमर्थे सेसेनसेऽसेन्' इत्यतस्तुमर्थग्रहणाधिकारात् सयादीनामाभ्यन्तरे भावे नियमात् पारिशेष्यात् कर्तरि कृतो भविष्यन्तीति। नैष दोषः, सति ह्यस्मिन् सूत्रे तुमर्थग्रहणान्यथानुपपत्त्या तुमुनः कर्तुरन्योऽर्थ इति विज्ञायते। स च भाव इति तुमर्थग्रहणादाभ्यन्तरे भावे सयादिसिद्धिः, नासति। तस्मात् कर्तरि कृतो यथा स्युः। भावे मा भूवन्नित्येवमर्थं सूत्रमारब्धव्यमिति स्थितम्।

ननु यदि नानावाक्यत्वे बाध्यबाधकभावो न भवेत् तर्ह्येकवाक्यतात्रास्त्वित्याशङ्क्य लोकव्युत्पत्तिप्रदर्शनेन तदभावमुपपादयति — **इह [ब्राह्मणेभ्यो] दधीति**। 'विशिष्टस्य दानस्य' इत्य-

---

[1] का. वा. ३.१.९६–२.

[2] पा. सू. ३.४.७१.

[3] पा. सू. ३.३.१८.

[4] पा. सू. ३.३.१८.

[5] इत्युक्तमित्याह — ङ.

[6] कृतामभावार्थत्वे — घ, ङ.

[7] एकवाक्यत्वेन विशेषणोपादान — घ.

[8] प्रदीपे 'उभयत्र करणनिवृत्त्या' इत्यत्र 'उभयत्रापि करणनिवृत्त्या' इति पाठोऽभिमतः।

[9] 'सूत्रारम्भे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — घ.

[10] कर्तरि भुवः, कर्तरि चर्षीत्यत्रेत्यादिः।

[11] भावयोर्विरोध इति — ङ.

[12] तुशब्दो नास्ति — ङ.

[13] पा. सू. ३.४.९.

नेनैकार्थत्वादेकवाक्यतां दर्शयति । **पूर्वाह्णे ब्राह्मणभोजनप्रकरण इति**। यथा कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इत्यत्र प्रकरणभेदान्नित्याग्निहोत्रात् कर्मान्तरत्वं मीमांसकैरवस्थापितम्, एवमिहापि प्रकरणभेदाद्वाक्यभेद इत्यर्थः। कथं तर्हि [1]'इको गुणवृद्धी' इत्यत्र नानावाक्यत्वमङ्गीकृत्यापवादत्वमुक्तमित्यत्राह — **यत्त्विति**। ननु निमित्ताभावादनुपस्थानं न[2] बाध इति, नेत्याह— **तदेव** [3]**चापवादत्वमिति**। अप्राप्त्यनुमानमेव बाधेति सिद्धान्तस्थितेः। तर्हि ख्युनादिष्वप्ययं [4]न्यायोऽस्त्वित्याशङ्क्य वैधर्म्यं दर्शयति — **ख्युनादयस्त्विति**। भाष्ये यौगपद्येन ख्युनादीनामर्थद्वयं प्राप्नोतीति न विवक्षितम्। किं तर्हि, पर्यायप्राप्तिरेवेत्याह — [5]**तत्रानेकेति**। कर्तुः स्वातन्त्र्यात् करणादेश्च पारतन्त्र्याद् भिन्नकक्षत्वादिति भावः। तच्छब्दस्य वतेश्चार्थमाह — **योऽयमिति**। कर्तुः करणादेश्च समावेशः प्राप्नोतीति यदुक्तं **तेन तुल्यं** तदनुगुणम्, तस्य ज्ञापकमित्यर्थः। **एवकारेण कर्तुरिति**। बाध्यबाधकभावे तु कर्तुर्भावकर्मभ्यां बाधनादेवकारोऽनर्थकः स्यात्। कृतस्त्वन्यत्रार्थानां [6]समावेशस्य ज्ञापक इत्यर्थः। **अधिकारसहितमिति**। [7]'तयोरेव' इति सूत्रे 'भावे चाकर्मकेभ्यः' इत्येतदनुवर्तत इति भाष्यकारो दर्शयतीत्यर्थः। ननु कृत्यादीनां कर्तरि वृत्त्यभाव एव प्रयोजनमेवकारकरणस्येति ज्ञातत्वात् प्रयोजनप्रश्न एवानुपयुक्त इत्यत आह — **एवकारेणेति**। ननु भव्यादिषु समावेशार्थं वाग्रहणं कृतमेवेत्याशङ्क्याह — **भव्यगेयादिसूत्र इति**। ननु [8]'कर्तरि चर्षिदेवतयोः' इत्यनेनैकस्य प्रत्ययस्य विधानात् 'कृद्भिः' इति बहुवचनमनुपपन्नमित्यत आह — **जाताविति**। [9]'जात्याख्यायामेकस्मिन्' इति वचनेनेत्यर्थः। **समावेशाभावादिति**। [10]ऋषौ कर्तरि, देवतायां करणे, इत्येवं विधानात्। ननु भावकर्मणोः कर्तरि च कृत्यादयो भवन्तीति सूत्रार्थे विज्ञायमाने कर्तव्यादयोऽपि कदाचित् कर्तरि स्युरित्यत आह — **अन्ये त्विति**। भव्यादिभ्योऽन्य इत्यर्थः। [11]**वार्तिकदूषणायेति**। न्यायसिद्धेऽर्थे प्रयोजनाभावात् ज्ञापकोपन्यासो न युक्तः, एवकारस्य चार्थवृत्तित्वकथनं चानुपपन्नमिति। **शास्त्रे विदेशस्थानामिति**। यद्यपि लोके कालभेदेन वाक्यद्वयोच्चारणे बाध्यबाधकभावो नास्ति, तथापि शास्त्रे [12]'विप्रतिषेधे परम्' इत्यादिकार्यसिद्धये प्रकरणोत्कर्षेण प्रदेशान्तरे पठितानामप्याकाङ्क्षावशाद् बुद्धौ संनिहितत्वाद् योग्यत्वाच्च वाक्यानामेकस्य विशिष्टस्य प्रतिपादनादेकवाक्यत्वमुपपद्यत इत्यर्थः। **अनेकाख्यातेति**। **न्यायः** उत्सर्गः, उत्सर्गापवादयोः। कर्मण्युपपदे धातोरण् भवति, आकारान्तादनुपसर्गे को भवतीत्येवमनेकक्रियापदसंबन्धेऽपि वाक्यैकवाक्यतया विशिष्टस्यार्थस्य प्रतिपादकमेकं महावाक्यं संपद्यते। ततश्च पूर्वमेवापवादविषयादुक्तस्योत्सर्गवाक्यस्य प्रवर्तनादाकारान्तेभ्यो धातुभ्यो नेत्यर्थः संपद्यते। तस्य चाश्रूयमाणस्यापि वाक्यशेषस्यान्यत्र श्रूयमाणाकारान्तलक्षणा प्रकृतिरनुमि[ते]ति तदेव बाधकमुच्यते। [13]'भिन्नरूपमिव' इत्यनेन केवलमनेकाख्यातसंबन्धदर्शनाद् भिन्नवाक्यत्वं भ्रम एव। वस्तुतस्त्वेक-

---

[1] पा. सू. १.१.३.

[2] 'न' इति नास्ति — ङ.

[3] चशब्दो नास्ति — ङ.

[4] न्यायोऽस्तीत्याशङ्क्य — ङ.

[5] प्रदीपे 'तत्रानेकस्यार्थस्य' इत्यत्र 'तत्रानेकार्थस्य' इति समस्ततया पाठोऽभिमत इति भाति।

[6] 'समावेशस्य' इत्यस्मात् परं 'स्त्रीपुंसाभ्याम्' (४.१.८७) इति सूत्रपर्यन्तं नास्ति — घ.

[7] पा. सू. ३.४.७०.

[8] पा. सू. ३.२.१८६.

[9] पा. सू. १.२.५८.

[10] 'ऋषौ करणे देवतायां कर्तरि' इति काशिकायां कौमुद्यां च दृश्यते।

[11] प्रदीपे 'वार्तिकदूषणमाह' इत्यत्र 'वार्तिकदूषणायाह' इति पाठोऽभिमत इति ज्ञायते।

[12] पा. सू. १.४.२.

[13] भिन्नरूपमेवेत्यनेन — ङ.

वाक्यमेवेति दर्शयति। लोकेऽपि 'दधि ब्राह्मणेभ्यो दीयताम्, तक्रं कौण्डिन्याय' इत्यत्र कौण्डिन्यवर्जं दधि ब्राह्मणेभ्यो दीयतामित्येव व्युत्पत्तिः। सामान्यशब्दो हि विशेषसंनिधाने तं विशेषं मुक्त्वा विषयान्तरे प्रवर्तते। उक्तं च—

[1]ब्राह्मणानां श्रुतिर्दध्नि प्रक्रान्ता माठरादिना।
माठरस्तक्रसंबन्धात् तत्राचष्टे यथार्थताम्॥ इति॥

योऽयमुत्सर्गापवादयोरेकवाक्यतायामुक्तो न्यायः स नियमप्रतिषेधयोरपि द्रष्टव्य इत्याह—**नियम इति**। यथा [2]'तिप्तस्झि' इत्यादिना विहितानां तिङाम् [3]'अनुदात्तङितः' इत्यादिना प्रकरणेनानुदात्तङिद्भ्य एवात्मनेपदमित्यादि नियमः क्रियते। तत्र विधिकाल एवोत्सृष्टानां[4] पुनः श्रुतेरप्राप्तिरनुमीयते, न तु प्राप्तानां निवृत्तिः क्रियते। न हि शब्दान्तरेण प्रापितस्य शब्दान्तरेण बाधनं भवति। उभयोरपि चार्थपरित्यागे कारणाभावात्। तथा [5]'न धातुलोपे' इत्यादीनि प्रतिषेधवाक्यानि गुणवृद्धिविषये धातुलोपार्धधातुकादिविशेषे गुणवृद्ध्योरप्राप्तिं ज्ञापयति। नञा हि स्वाभाविकनिवृत्तिर्द्योत्यते, न तु प्रतिषेधः क्वचिदपि साक्षाद्वचाप्रियते। तत्र सामान्यशब्दबलाद्विशेषे प्राप्तिं बुद्धौ समारूढां व्यावर्तयन् प्रतिषेधो बाध इत्युपचर्यते। बुद्धिप्रसङ्गव्यावृत्तिरेव बाध इत्यपवादनियमप्रतिषेधेषु समानोऽयं न्याय इत्याशयः। तथा [6]'सुपो धातुप्रातिपदिकयोः' इति द्वितीये लुगन्वाख्यायते, तस्य [7]'पञ्चम्याः स्तोकादिभ्यः' इत्यादिनोत्तरपदविशेषं वर्जयित्वा लुग् भवतीति विधिना प्रकल्पितः शेषोऽनुमीयते। एवं [8]'यस्कादिभ्यो गोत्रे' इत्यादिना [9]विहिते, तस्य [10]'गोत्रेऽलुगचि' इत्यनेन। निपातानामनेकार्थत्वादेवकारस्य चार्थवृत्तित्वमुपपन्नमेवेत्यत आह—**एवकारस्येति**। समावेशार्थस्य चशब्दस्योक्तेऽर्थे ज्ञापकत्वमुपपादयति—**आदिकर्मणीति**। **अस्मात् सूत्रात् परेष्विति**। अनेन 'अमुतः प्राक्' इति भाष्यस्य [11]'आदिकर्मणि क्तः' इत्यस्मात् प्रागेव समावेशः, न परत्रेत्यर्थो दर्शितः॥

[३; ३९३–३९६]

(उद्द्योतनम्) ननु सिद्धशब्दान्वाख्यानाङ्गीकारात् कथमाचार्यनियोगाधीनार्थप्रतीतिः, अत आह—**सिद्ध इति**। कार्यशब्दाश्रयेणायं पक्ष इत्याह—**कार्येति**। **अस्य** आचार्यनियोगादर्थाभिधानपक्षस्य। **अयं पक्षः** [12]संज्ञानियमपक्षः। तदुपपादयति—**यः स्वभावत इति**। भाष्ये **अकारः** [13]'कर्मण्यण्', **अकः** ण्वुल्। **यद्येवमिति**। तेषां करणादिवाचकत्वेन कर्तर्यनुत्पत्तेरित्यर्थः। **एतदिति**। 'कर्तरि कृत्' इत्येतत् सूत्रमित्यर्थः। **अयम्** एतादृशः। तमेवाह—**किमिति**। पूर्वं संज्ञानियमस्योक्तत्वान्नात्र तन्नियमसंभव इत्यभिप्रेत्याह—**तस्य साधुत्वमिति**[14]। ....त आह—**कृत्संज्ञेति**।

---

[1] वाक्यपदीयम् २.३४८.
[2] पा. सू. ३.४.७८.
[3] पा. सू. १.३.१२.
[4] उत्सर्गतः सामान्यतो विहितानामित्यर्थः।
[5] पा. सू. १.१.४.
[6] पा. सू. २.४.७१.
[7] पा. सू. ६.३.२.
[8] पा. सू. २.४.६३.
[9] विहिते लुकि तस्याजादिप्राग्दीव्यतीयव्यतिरिक्तविषयकत्वं गोत्रेऽलुगचीत्यनेन बोध्यत इत्यर्थः।
[10] पा. सू. ४.१.८९.
[11] पा. सू. ३.४.७१.
[12] संभाषे नियमपक्षः—अ, ऋ, ऌ
[13] पा. सू. ३.२.१.
[14] 'साधुत्वमिति' इत्यस्यानन्तरम् 'अ, ऋ, ऌ मातृकासु तिसृषु ग्रन्थपातः।

'कृत्' इति प्रतिप्रत्ययमनुवर्तत इत्यर्थः। 'कर्तरि कृत्' इत्यत्र तु प्रत्ययविध्यभावात् 'संज्ञानियमः' इत्युक्तम्। 'काष्ठभिदब्राह्मणः' इत्यत्र [1]भिदाकारस्य कर्त्रभिधानं प्राप्नोतीत्युक्तम्। तदयुक्तम्, [2]नञोऽकारस्याकृत्प्रत्ययत्वात्, अत आह — **अनित्यशब्देति**। **विशेषाभावादिति**। अनुबन्धानामनेकान्तत्वेन भिदः परोऽकारः कर्तरीति नञकारस्यापि कर्तरि नियोगप्रसङ्ग इत्यर्थः। ननु 'काष्ठभिद' इत्यकारान्तस्य वा कर्तृवाचकत्वं दकारान्तस्य वा, रूपे न कश्चिद्विशेषः। अकारस्य ब्राह्मणशब्देनान्वयसंभवाद् [3]भिन्नार्थोऽपि, अत आह — **आचार्येति**। कर्तृवाचकाकारमात्रस्यैव कृत्प्रत्ययसंज्ञयोः संभवादित्यर्थः। तथा सति किमनिष्टम्, अत आह — **तत्र कृत्संज्ञायामिति**। [4]अकारस्य कृत्संज्ञायामण्प्रत्ययवदकारस्यापि [5]भिदावयवत्वप्रसङ्गात् कृदन्तत्वेन प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिप्रसङ्ग इत्यर्थः। **गुण इति**। ततश्च 'काष्ठ[6]भेदब्राह्मणः' इति प्राप्नोतीत्यर्थः। **नन्विति**। धातोर्विहितस्याकारस्य कर्तरि नियोगः क्रियते। तथा चास्य कथं कर्तरि नियोगप्रसङ्ग इत्यर्थः। 'विशेषाभावात्' इति यदुक्तं तदेव विशदयति — **नैतदिति**। अस्य धातोः परत्वमुपपादयति — **काष्ठेति**। धातोः परमात्रस्याकारस्य कर्तरि नियोगाविशेषादित्यर्थः। [7]**अनेनार्थेति**। 'कर्तरि कृत्' "तयोरेव' इत्यादिनेत्यर्थः। क्विबन्तधातूनां[8] कर्तुरभिधानात् नाकारवाच्यत्वमिति शङ्कते — **क्विप इति**। **यावकादिष्विवेति**। यावादिभ्यः स्वार्थे कविधानात् प्रकृतिप्रत्ययाभ्यामेक एवार्थोऽभिधीयते, तद्वदित्यर्थः। उक्तातिप्रसङ्गे हेतुः — **लौकिकेति**। एतावता प्रपञ्चेन भाष्यं संभवदुक्तिकम्। वस्तुतः कार्यशब्दपक्षेऽपि धातोर्विहितानामेव कृत्प्रत्ययसंज्ञा, अर्थनियोगश्च, न धातोः परमात्रस्येति नातिप्रसङ्ग इति ज्ञेयम्। नित्यशब्दपक्षे उक्तदोषो न भवतीत्याह — **न हीति**। **अत्र** काष्ठभिदब्राह्मण इत्यत्र। कर्तरि क्तप्रत्ययस्यासाधुत्वमत्र विवक्षितमित्याह — **क्रियेति**। **प्रकारान्तरेण** मत्वर्थीयाकारेण। **साधुत्वं** विभक्तपदस्य कर्तर्यपि साधुत्वम्, [10]न क्तप्रत्ययस्य। **अयं** विभक्तादिषु क्तप्रत्ययस्य कर्तरि साधुत्वप्रसङ्गदोषः। संज्ञानियमपक्षेऽप्यतिप्रसङ्गनिरासप्रकारमाह — **ममापीति**। तावता कथं नियमसिद्धिः, अत आह — **तत्रेति**। 'प्रकृतेः' इति विशेषपरमित्याह — [11]**गत्यर्थादिकाया इति**। [12]कार्यत्वप्रसङ्गं निराह — **क्तप्रत्ययस्येति**। [13]'सिद्धे शब्दार्थसंबन्धे' इत्येतत् स्मारयितुमिति यदुक्तं तदुपसंहरति — **तदेवमिति**। 'कर्मण्येव' इत्येतदुदाहरति — **विभक्तमि[ती]ति**। [14]केन मत्वर्थीयोऽकारः, अत आह — **आकृतीति**। उत्तरपदलोपे शब्दानित्यत्वप्रसङ्गाल्लक्षणाभावाच्चाह — **गम्यमानेति**। उभयत्र लक्षणया तदवगतिरित्याह — **विभक्ता इति**॥

---

[1] भिदशब्दाकारस्येत्यर्थः॥ भिदोऽकारस्य — अ.

[2] नञकारस्याकृत् — अ.

[3] भिन्न इत्यर्थोऽपीत्यर्थः स्यादिति भाति॥ 'संभवात्' इत्यस्यानन्तरं 'च' इति, उपरि 'पि' इत्यस्मात् प्राग्ग्रन्थपातः — अ.

[4] लकारस्य — अ.

[5] भिदशब्दावयवत्वप्रसङ्गादित्यर्थः॥ भिदवयवत्व — अ, ऋ, लृ.

[6] 'भेदः' इति युक्तं भाति।

[7] अनेकार्थेति — अ, ऋ, लृ.

[8] पा. सू. ३.४.७०.

[9] यद्यपि 'उभयप्राप्तौ कर्मणि' इति तृतीयात्र युक्ता, तथापि 'शेषे विभाषा' इति वचनेनाविशेषेण विभाषापक्षे षष्ठ्या उपपत्तिर्बोध्या।

[10] न तु क्तप्रत्ययस्य — ऋ.

[11] प्रदीपे 'गत्यादिकायाः' इति दृश्यते। 'गत्यर्थादिकायाः' इति पाठोऽन्नंभट्टाभिमत इति भाति।

[12] कार्यसत्त्वप्रसङ्गं — अ, ऋ, लृ.

[13] का. वा. १.

[14] तेन — अ, ऋ, लृ.

[३, ३९३–३९६]

(**रत्नप्रकाशः**) [1]'सिद्धे शब्दार्थसंबन्धे शास्त्रेण धर्मनियमः' इत्युक्तं पस्पशाह्निके। तन्मनसि निधाय पृच्छति कश्चित् — **किं पुनरिति**। **अयं प्रत्ययनियम इति**। **अयं** 'कर्तरि कृत्' इति योगः, **प्रत्ययस्य** अजादेः, **नियमः** कर्तृबोधकतासामर्थ्यसंपादक इत्यर्थः। **अकार इति**। [2]अजण्कशादीनामुत्सृष्टानुबन्धकानां ग्रहणम्। **अकशब्द इति**। ण्वुल्क्वुन्प्रभृतीनां ग्रहणम्। **नियोगत इति**। धातोः परोऽकारादिः कर्तरि भवतीत्याचार्यवचनादित्यर्थः। **संज्ञानियम इति**। संज्ञामात्रबोधक इत्यर्थः। **स्वभावत इति**। आचार्यवचननैरपेक्ष्येणेति शेषः। **काष्ठभिदब्राह्मण इति**। अत्र 'अब्राह्मणः' इति नञोऽकारस्य धातोः परस्य कर्तृवाचकत्वं कृत्प्रत्ययसंज्ञे च स्युरिति कृत्संज्ञानिमित्ते प्रातिपदिकत्वे स्वाद्युत्पत्तिः स्यात्, प्रत्ययसंज्ञानिमित्ताङ्गसंज्ञायां 'काष्ठभेदोब्राह्मणः' इति स्यादिति मन्यते। वस्तुतस्तु साधनांशगन्धशून्यस्य पण्डितंमन्यस्येयमुक्तिरिति तदुक्तदोषस्य स्पर्श एव नास्ति। तथाहि — 'कर्तरि कृत्' इति प्रकृतसूत्रेण यः कृत् स कर्तरि भवतीत्येतावन्मात्रमेव बोध्यते। धातोरिति प्रत्यय इति चानुवर्तमानमप्युपेक्ष्यते, प्रयोजनाभावात्। न हि कृत् अधातोः परोऽस्ति, अप्रत्ययो वा। एवं च नञो धातोः परत्वेन विधानाभावात् प्रत्ययसंज्ञापि न भवति, कृत्संज्ञा चेति न तदुक्तदोषसंस्पर्श इति।' यत्तु 'लक्षणवशात् शब्दार्थसंबन्धव्यवस्थानुविधाने कुतोऽयं नियमः — अयं धातोर्विहितो नायमिति। काष्ठशब्दो हि कर्मोपपदम्, भिदिर्धातुः, तस्माच्च परोऽकार इति तस्य कर्तरि स्यादेव नियोगः' इति। तत् तुच्छम्, [3]आनुपूर्व्यणैव लक्षणानां प्रवर्तनीयत्वेन काष्ठशब्दे कर्मवाचके समर्थे उपपदे भिदेर्धातोः परोऽण् भवति, स प्रत्ययसंज्ञः कृत्संज्ञश्चेति [4]'कर्मण्यण्' इति सूत्रेण बोधिते तदनन्तरं 'कर्तरि कृत्' इति कृत्संज्ञस्य कर्तृसंबन्धो बोध्यत इति नञः प्रत्ययसंज्ञादेरप्रसक्तेः। अन्यथा तस्य दुर्बुद्धेरब्राह्मण इति नञ्समास इति ज्ञानमपि न स्यात्। यदप्युक्तम् 'यदा हि स्ववाक्यैर्विहितानां प्रत्ययानामनेनार्थविशेषे नियोगः क्रियते, तदा विशेषाभावादस्यापि नियोगः प्राप्नोति,' इति। तदपि तुच्छम्, स्ववाक्येन पाणिनिना धातोः परत्वेन विहितत्वाभावस्यैव विशेषस्य बालकेनापि ज्ञातुं शक्यत्वात्। यदप्युक्तम् 'क्विपो लुप्तत्वाद् धातुरेव [5]कर्तरि वर्तत इत्यकारस्य कर्तार्थो न भविष्यतीति चेत्, यावकादिष्विव सर्वाभिधानमस्तु। लौकिकार्थानपेक्षायां हि धातोः परस्य कृत्प्रत्ययसंज्ञाकर्तृनियोगप्रसङ्गः' इति। तदपि तुच्छम्, नञो धातोर्विहितत्वाभावेन कृत्संज्ञादेरप्रसक्तत्वेन शङ्कासमाधानयोर्मौर्ख्यमूलकत्वात्। तस्माद्यत्किंचिदेतत्। **संज्ञानियमे सतीति**। संज्ञामात्रनियमे सतीत्यर्थः। [6]**सिध्यतीति**। उक्तदोषाभाव इति शेषः। तत्रान्यं दोषमाह — **यदीति**। **इति न सिध्यतीति**। इत्यस्यासाधुत्वं न सिध्यतीति भावः। ननु प्रत्ययनियमपक्षे तस्यासाधुत्वं कथं सिध्यतीत्यत आह — **प्रत्ययनियमे पुनरिति**। **परिगणिताभ्य इति**। [7]'गत्यर्थाकर्मक' इत्यादिसूत्रेणेति शेषः। परिहरति — **विभक्तादिषु चेति**। संज्ञामात्रनियमपक्षेऽपि विभक्तादिषु साधुत्वस्य न प्राप्तिरित्यर्थः। तत्रोपपत्तिमाह — **प्रकृतेरित्यादि**। मध्यस्थः कश्चित् पृच्छति — **न तर्हीति**। उत्तरमाह — **भवति साधुरिति**। भावकर्मणोः कर्तरि च साधुत्वमुक्तमिति भ्रमं

---

[1] का. वा. १.

[2] अजण्कणादीनां — प.

[3] आनुपूर्व्येणेव — ब.

[4] पा. सू. ३.२.१.

[5] अर्थानुवादोऽयम्।

[6] भाष्ये 'संज्ञानियमे सति सिद्धं भवति' इत्यत्र 'संज्ञानियमे सति सिध्यति' इति रत्नप्रकाशकृत्पाठ इति भाति।

[7] पा. सू. ३.४.७२.

वारयति — **न तु कर्तरीति**। तथा च भावकर्मणोरेव तत्र क्तः साधुरिति फलितम्। **अकारो मत्वर्थीय इति**। अर्शआदेराकृतिगणत्वादिति भावः। **विभक्तमिति**। कर्मण्यत्र धनादिरूपे क्तः। **उत्तरपदलोप इति**। मत्वर्थलक्षणया गम्यमानार्थत्वाद् बहुव्रीह्यनाश्रयणमिति भावः। एतेन 'विभक्ता भ्रातर इत्यत्र धनस्य यद्विभक्तत्वं तद् भ्रातृषूपचर्यते। पीता गाव इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते' इति निरस्तम्। भ्रातृषु गोषु च तत्र विभक्तत्वपीतत्वारोपो भाष्यकृतः संमत इत्यत्र मानाभावात्॥

[३, ३९३–३९६]

(नारायणीयम्) विचारे प्रयोजनं तावदाह — **सिद्ध इति**। **तत् स्मारयितुमिति**। शब्दार्थसंबन्धस्य नित्यत्वमेवावस्थापयितुमित्यर्थः। प्रत्ययस्यार्थविशेषे नियमः प्रत्ययनियम इति व्याचष्टे — **धातोः पर इति**। ननु नित्यशब्दान्वाख्याने कथमाचार्यनियोगादर्थविशेषे वृत्तिरुपपद्यत इत्यत आह — **कार्यशब्देति**। ननु कार्यशब्दिकस्य मते स्वभावतः कर्तुरभिधानमनुपपन्नमित्याशङ्क्य नैत्यशब्दिकमतावष्टम्भेन द्वितीयः पक्ष इत्याह — **नित्येति**। संज्ञानियमं विशदयति — **यः स्वभावत इति**। यदि कर्तरि वर्तमानस्यैव कृत्संज्ञेति नियमः क्रियते तर्हि करणादिषु वर्तमानानां ल्युनादीनां संज्ञा न प्राप्नोतीत्याशङ्क्य परिहरति — **यद्येवमिति**। ननु साधुत्वमात्रस्यान्वाख्याने कृत्संज्ञाप्रवृत्तिः कथमित्यत आह — **कृत्संज्ञा त्विति**। ननु 'काष्ठभिदब्राह्मणः' इत्यादावकारस्य निषेधार्थत्वावगमात् कथं कर्त्रर्थता स्यादित्याशङ्कां परिहर्तुमारभते — **अनित्यशब्देति**। ननु कार्यशब्दपक्षेऽपि यस्याकारस्य कर्तरि नियोगः स एव तस्यार्थस्याभिधायको नान्य इति नातिप्रसङ्ग इत्यत आह — **उत्पाद्येति**। नन्वत्र नञ्समासविधानादाचार्यनियोगादेव निषेधार्थतावगमात् कथं दोषप्राप्तिरित्यत्राह — **आचार्यनियोगाच्चेति**। **आर्धधातुकनिमित्तो गुण इति**। [1]'क्ङिति' इति निमित्तसप्तम्याश्रयणात् प्रत्ययलक्षणेन क्विपः परत्वेऽपि निषेधाप्रसङ्गाद् गुणः स्यादेवेत्याशयेनाह — **ननु नायमिति**। यो हि धातोर्विहितः कृत्प्रत्ययस्तस्य कर्तरि नियोगः क्रियते। अयमकारो धातोर्न विहित इति न दोषप्रसङ्ग इत्यर्थः। अस्मिन् पक्षे धातुविहितत्वाविहितत्वनियमावगमोऽहेतुक इत्याशयेन परिहरति — **नैतदिति**। नियमाभावे हेतुमाह — **काष्ठशब्दो हीति**। न तावत् स्वरूपतो विहितावगमोऽस्ति, तद्गतविशेषाभावात्। नास्त्यर्थतः, अर्थस्यानेन नियोक्ष्यमाणत्वात्। तस्मादुपलक्षणभावेनोपपदादिदर्शनाद् धातुविहित इत्यवगन्तव्यम्। ततश्च यथा 'काष्ठभेदः' इत्यत्रोपपदं धातुं समासात्परमकारं च दृष्ट्वा धातुविहितत्वमवगम्यते, एवमत्राप्यविशेषात् तदवगतिरित्यर्थः। एतदेव विशदयति — **यदा हीति**। चोदयति — **क्विपो लुप्तत्वादिति**। यत्र प्रत्ययो लुप्यते तत्र परिशिष्टा प्रकृतिस्तदर्थमभिदधातीति वैयाकरणानां समयः। [काष्ठभित्] इत्यत्र धातुनैव कर्तुरभिधानादकारस्य तदर्थाभिधायकत्वकथनमसमञ्जसमिति प्रश्नः। परिहरति — **यावकादिष्विति**। यथा यावशब्देनैव तदर्थेऽभिहितेऽपि कन्नपि कदाचित् प्रयुज्यते, एवमिहापि स्यात्। तस्माद् भाष्योक्तोऽनिष्टप्रसङ्गः स्थित एवेति निगमयति — **लौकिकार्थेति**। संज्ञानियमपक्षेऽतिप्रसङ्गनिवृत्तिप्रकारं दर्शयति — **न हीति**। ननु 'पीता गाव इति न सिध्यति' इत्ययुक्तम्, [2]शब्दस्वरूपासिद्धौ हेत्वभावादित्याशङ्क्य 'असाधुत्वं न सिध्यति' इत्यध्याहारेण भाष्ययोजनां दर्शयन् साधुत्वप्राप्तिप्रदर्शनपूर्वकं साधुत्वाप्राप्तिमाह —

---

[1] पा. सू. १.१.५.

[2] शब्दस्वरूपात् सिद्धौ — ङ.

अत्र हीति। ननु 'विभक्ता भ्रातरः' इत्यादिप्रयोगः साधुरेवेति वक्ष्यत इति [1]कथम् 'असाधुत्वं न सिध्यति' इत्युच्यत इत्यत आह — **क्रियाकारकेति**। विभजनकर्तरि विभक्तशब्दो नेष्टः, पानकर्तरि च पीतशब्दः। संज्ञानियमपक्षे तत्रापि साधुत्वं प्राप्नोतीत्ययमत्र दोषः। 'प्रत्ययनियमे पुनः' इत्यादिभाष्यं व्याचष्टे — **प्रत्ययनियमवादिनस्त्विति**। **ममापीति**। नित्यशब्दपक्षेऽप्यर्थविशेषे क्तप्रत्ययस्य साधुत्वप्रतिपादनाय सूत्रस्य कर्तव्यत्वात्। [2]'प्रकृतेश्च प्रत्ययपरवचनात्' इति वार्तिकावयवमुक्तेऽर्थे योजयति — [3]**गत्यर्थादिकाया इति**। अत्र विचार्य निर्णीतोऽर्थः सर्वत्रार्थनिर्देशे द्रष्टव्य इति दर्शयन् निगमयति — **तदेवमिति**। ननु 'विभक्तधनाः विभक्ताः' इत्युत्तरपदलोपलक्षणं न पश्याम इत्यत आह — [4]**गम्यमानार्थस्येति**। गम्यमानार्थत्वमेव दर्शयति — **विभक्ता इति**। धनेन मुख्यार्थेन भ्रातृणां स्वस्वामिभावलक्षणात् संबन्धात् स्वधर्मः स्वामिषूपचर्यते, एवं पीता गाव इत्यत्र कर्मधर्मः कर्तृषूपचर्यत इत्याह — **पीता गाव इति**॥

लः कर्मणि च भावे चाकर्मकेभ्यः ३.४.६९.

[३, ३९६–४००]

(उद्द्योतनम्) षष्ठीपक्षे स्थानिनादेशा आक्षिप्यन्त इत्याह — [5]**लस्य य आदेशा इति**। पक्षद्वयेऽपि सूत्रप्रयोजनमाह — **तत्रेति**। **कर्तर्येवेति**। ततश्च शानच्कानचोः कर्मणि साधुत्वं न स्यादित्यर्थः। [6]**वक्ष्यमाण** 'नैतदस्ति' इति भाष्येण। प्रथमापक्षे 'स्यात्' इत्येकवचनं समर्थयते — **लकार इति**। षष्ठीपक्षेऽप्याह — **अथवेति**। नन्वनेन प्रथमाबहुवचनपक्षे लस्यार्था उच्यन्ते, अन्यत्र त्वादेशानामिति कथमेतद्वैयर्थ्यम्, अत आह — **असत्यस्मिन्निति**। **अनुमास्यन्त इति**। स्थान्यादेशयोरेकार्थत्वनियमादिति भावः। सत्यप्यस्मिन् सूत्रे आदेशानामेवैतेऽर्था लकारद्वारेणोच्यन्ते, न तु लकारस्य, तस्य प्रयोगाभावात्। तच्चान्यतः सिद्धमित्येतद्वैयर्थ्यं दुष्परिहरमित्याह — **लकारस्येति**। षष्ठीपक्षे तु वैयर्थ्यं स्फुटमिति भावः। नियममाक्षिपति — **नन्विति**। **नैष इति**। आदेशद्वारा प्रयोगार्थ एतावानेवेत्यर्थः। सकर्मकनिवृत्त्यर्थमित्येतदुपपादयति — **यवागूमिति**। भावे आत्मनेपदेन कर्तृकर्मणोरनभिधानादित्यर्थः। सामर्थ्यमेवाह — **अकर्मकाणामिति**। **सूत्रारम्भेति**। तत्र 'अकर्मकात्' इति प्रवेशे गौरवमित्यर्थः। 'ननु' इत्यादिना गौरवमेव दृढीकृतम्, अत आह — [7]**त्वयापीति**। 'यावदिह' [8]इत्यादिना किमिति साम्यमापाद्यते, अत आह — **कर्मणि चेति**। **द्वाभ्यामिति**। उत्तरार्थस्यावश्यकत्वादित्यर्थः। तथापि वर्णलाघवमपरि-

---

[1] कथं साधुत्वं — ङ.

[2] भाष्ये 'प्रकृतेः प्रत्ययपरवचनात्' इति वार्तिकपाठो दृश्यते। प्रकृतेश्चेति चकारसहितः पाठोऽभिमत इति भाति।

[3] प्रदीपे 'गत्यादिकायाः' इत्यत्र 'गत्यर्थादिकायाः' इति पाठः स्वीकृत इति भाति।

[4] तदवगम्यमानार्थस्येति — ङ.

[5] प्रदीपे 'लस्य य आदेशः' इति पाठ उपलभ्यते। 'लस्य य आदेशाः' इत्यन्नंभट्टपाठः स्यादिति भाति।

[6] प्रदीपे 'वक्ष्यमाणोऽभिप्रायः' इत्यत्र 'वक्ष्यमाणाभिप्रायः' इत्यन्नंभट्टपाठ इति प्रतीयते।

[7] द्वयेऽपीति — अ, ऋ, लृ.

[8] इत्यादिना शिति साम्यमापद्यसे — अ; इत्यादिना शिति साम्यमापाद्यसे — ऋ, लृ.

हृतम्, अत आह — **पदेनेति**। विशेषं स्फोरयति — [१]**आनस्येति**। **कर्तर्यपीति**। लकारस्याकर्मकात् कर्तर्यपि विधानादित्यर्थः। द्वयोः सावकाशत्वे सति विप्रतिषेधः, नान्यथेति तदाह — **भावकर्मणोरित्यस्येति**। कर्तर्यात्मनेपदाप्रसङ्गमुपपादयति — **भावकर्मणोरिति**। [२]'अनुदात्त' इत्यनेन कर्तरि तङस्तु, अत आह — **अनुदात्तेति**। तस्य नियमार्थत्वेन विध्यर्थत्वाभावादित्यर्थः। [३]उभयार्थत्वमस्तु, अत आह — **अर्थैकत्वादिति**। नन्वनुवृत्तौ विधिरेव स्यान्न नियमः, अत आह — **अनुदात्तेति**। स्वस्थाने नियमपरस्यानुवृत्त्या विधिपरत्वं वाक्यभेदेनाविरुद्धमित्यर्थः। अनुवृत्तौ सत्यामेकवाक्यता स्यादित्यन्वयः। 'आस्यते गुरुणा' इत्यनुदात्तेतो भावे। 'अतिशय्यते गुरुः' इति ङितः कर्मणि। 'भूयते' इति भावे, 'गम्यते' इति कर्मण्यनुदात्तेत्त्वङित्त्वयोरभावादात्मनेपदं न स्यात्। 'शेते, आस्ते' इत्यत्र कर्तरि तन्न स्यात्, कर्तर्यात्मनेपदविधायकाभावात्, [४]'अनुदात्त' इत्यस्य नियमार्थत्वाङ्गीकारादित्यर्थः। 'निविशमानः' इत्यादावानस्याप्राप्तिमाह — [५]**अस्येति**। अस्यानस्येत्यन्वयः। **अस्य** निपूर्वविशेर्वा। सर्वशब्देन भावकर्मणी विवक्षिते, सर्वशब्दस्य प्रकृतपरत्वादिति व्याचष्टे — **असत्यस्मिन्निति**। 'भूयमानम्' इति भावे प्रयोगः। पक्षद्वयेऽप्युभयोः सावकाशत्वमाह — **यदीति**। **तिङभावीति**। [६]'कर्तरि कृत्' इत्यस्य तु [७]तृजादय एव। 'कर्तरि' इति विधौ कथं भावकर्मणोर्निवृत्तिः, अत आह — **कर्तर्येवेति**। अनेन सर्वत्र प्राप्तौ तन्नियमार्थमित्यर्थः। ननु ल इति षष्ठीपक्षे आदेशस्यायमर्थनिर्देशो वाच्यः। स न युक्तः, लुकोऽप्यर्थनिर्देशप्रसङ्गादित्याशङ्क्येष्टापत्तिमाह — **ल इत्यादेशापेक्षेति**। लुको रूपरहितस्यादेशत्वाभावादनेन कथमर्थनिर्देशः, अत आह — [८]**न हीति**। शब्दस्यार्थवत्त्वं नाभावस्येति शङ्कते — **लुक इति**। यथा प्रयोगायोग्यस्यापि क्विबादेः [९]'कर्तरि कृत्' इत्यर्थाभिधायित्वमिष्यते तथा लुकोऽप्यनेन तदभिधायित्वमस्तु, प्रयोगाभावस्योभयत्र तुल्यत्वादिति भावः॥

[३, ३९९–४००]

(रत्नप्रकाशः) प्रयोजनवार्तिकमवतारयति — **किमर्थमिति**। **इदमिति**। सूत्रमित्यर्थः। **ल इति**। उच्चारणार्थेनाकारेण सह लडादीनामुत्सृष्टानुबन्धानां निर्देशोऽयम्। जात्यामेकवचनम्। यत्तु 'ल इति षष्ठ्येकवचनम्' इति। तन्न, 'लग्रहणं सकर्मकनिवृत्त्यर्थम्' इति वार्तिकाननुगुणत्वात्। **भावकर्मणोरात्मनेपदं विधीयत इति**। लकाराणां प्रयोगासमवायित्वेन तेषामर्थनिदर्शनं तदादेशेष्वेव फलतीति साक्षात् तदादेशानामर्थनिदर्शनेनैव सिद्धे व्यर्थमिदं सूत्रमिति भावः। **एतावानिति**। अर्थनिदर्शनप्रयोजक इति शेषः। तथा चाम्विषयस्य लस्यात्मनेपदपरस्मैपदादेश-

---

[१] प्रदीपे 'आन इति' इति प्रतीकानन्तरम् 'आत्मनेपदसंज्ञत्वात्' इति दृश्यते। 'आनस्यात्मनेपदसंज्ञत्वात्' इति पाठोऽन्नंभट्टाभिमत इति भाति।

[२] पा. सू. १.३.१२.

[३] उभयार्थत्वमस्ति — अ, ऋ, लृ.

[४] पा. सू. १.३.१२.

[५] प्रदीपे 'यस्यैवात्रेति' इति प्रतीकानन्तरम् 'अनुदात्तङित इत्यनेनानस्य' इति पाठो दृश्यते। 'अस्यानुदात्तङित इत्यनेनानस्य' इत्यन्नंभट्टपाठः स्यादिति भाति।

[६] पा. सू. ३.४.६७.

[७] क्यङादय एव — अ, ऋ, लृ.

[८] 'न हि' इति पदं प्रदीपपुस्तकेषु न दृश्यते। 'अ, ऋ, लृ' मातृकासु प्रतीक उपलभ्यते। अतः प्रदीपे 'अभावस्याप्यादेशत्वात्' इत्यतः पूर्वं न हि भावस्यैवादेशत्वम्' इति पाठः स्यादिति भाति।

[९] पा. सू. ३.४.६७.

शून्यस्य सत्त्वेऽपि न दोषः। तस्य लुका लुप्यमानस्य प्रयोगासमवायित्वेन कर्तृकर्मादिप्रतीतेरनुप्रयोगेण सिद्धया च तस्यार्थनिदर्शनाप्रयोजकत्वात्। **परस्मैपदमात्मनेपदं चेति**। परस्मैपदस्थान्यात्मनेपदस्थानी चेत्यर्थः। **स चायमिति**। **सः** आत्मनेपदपरस्मैपदरूप आदेशः, **एवं** भावकर्मणोः कर्तरि च विहित इत्यर्थः। वार्तिकं पठति — **लग्रहणमिति**। एकदेशनिर्देशद्वारा प्रकृतसूत्रमनेन निर्दिष्टं ज्ञेयम्। **सकर्मकाणां भावे लो मा भूदिति**। सति हि तत्र तस्मिन् 'पच्यते ओदनं देवदत्तेन' इत्याद्यनिष्टं स्यादिति भावः। **तत्रैवेति**। भावकर्मणोरित्यत्रैवेत्यर्थः। तत्राकर्मकादित्युक्तेऽकर्मकात् कर्मणीत्यंशस्य बाधितत्वाद् भावेऽकर्मकादिति फलिष्यतीति भावः। [1]**'क्रियेतेति**। तदा किं स्यादिति शेषः। उत्तरमाह — **तत्रेति**। **कर्तव्यमिति**। तथा च तत्प्रयुक्तं गौरवमेव दोष इति भावः। प्रकृतसूत्रारम्भ एव गौरवमित्याशयेनाह — **ननु चेति**। **इहापीति**। प्रकृतसूत्रेऽपीत्यर्थः। **भावे चाकर्मकेभ्य इति**। 'कर्मणि च' इत्यस्योपलक्षणमेतत्, ल इत्येतदभिप्रायेण पक्षद्वयसाम्यस्य वक्ष्यमाणत्वात्। **परार्थमिति**। उत्तरार्थमित्यर्थः। तथा च सूत्रारम्भपक्षे गौरवं नेति भावः। **यावदिह लग्रहणमिति**। पदप्रयुक्तं साम्यमस्याभिमतम्। अक्षरप्रयुक्तगौरवं प्रकृतसूत्रानारम्भपक्षेऽस्त्येव। आरम्भवाद्याह — **अयमस्तीति**। **आनः कर्तरीति**। लकारस्य भावकर्मकर्तृष्वर्थेषु सत्सु तदादेशस्यानस्यापि तेऽर्था भवन्ति। नो चेदानस्य भावकर्मणी एवार्थौ स्यातामिति मन्यते। सोऽपि न विशेष इत्याहानारम्भवादी — **तत्रापीति**। [2]**'यदन्यदिति**। [3]'अनुदात्तङित आत्मनेपदम्' [4]'कर्तरि कर्मव्यतिहारे' इत्यादिरूपम्। **कर्त्रर्थमिति**। संपद्यते, [5]'भावकर्मणोः' इत्यनेन यथायथं सर्वेभ्य आत्मनेपदस्य सिद्धत्वादिति शेषः। इदानीं पक्षद्वयसाधारण्येन दोषं स एवाह — **विप्रतिषेधाद्वेति**। विप्रतिषेधादानः कर्तरीति पक्षे दोषमाह — **सर्वप्रसङ्गस्त्विति**। अयं दोषोऽनारम्भपक्ष एव। आरम्भपक्षे तु परत्वात् [6]'कर्तरि कृत्' इत्येतद् बाधित्वा 'लः कर्मणि' इति प्रकृतमेव वर्तत इति न तस्य स्पर्शः। **कर्तरीति**। कर्तर्येव, न तु भावकर्मणोरित्यर्थः। पुनःप्रसङ्गविज्ञाने तु भावकर्मणोरपि सिध्यत्यान इति सर्वप्रसङ्ग एव दोषः। **नियमार्थ इति**। अनुदात्तङित एवात्मनेपदम्, नान्येभ्य इत्येवंरूपो नियमः। तथा च परस्मैपदिभ्य आनो न भविष्यतीति भावः। **नियमार्थ इति**। शानजंश इति शेषः। **विधिर्न प्रकल्पत इति**। तङंश इति शेषः। अयं दोषस्तदा ज्ञेयः, यदा नियमस्य निषेधमुखेन प्रवृत्तिः। विधिमुखेन प्रवृत्तौ तु [7]'कृत्तद्धितसमासाश्च' इति सूत्रेणेव विधिनियमयोरेकेनैव वाक्येनोपपत्तिर्भवति। अनारम्भवाद्याह — **अस्तु तर्हीति**। इतर आह — **ननु चेति**। **एतदनुवर्तिष्यत इति**। तथा चानुदात्तङितो भावकर्मणोरात्मनेपदमिति द्वितीयेन वाक्येन विधिर्भविष्यति [8]तङंश इति भावः। तादृशद्वितीयवाक्याश्रयणे दोषमाह — **यद्यनुवर्तते, एवमपीति**। **अनुदात्तङित एवेति**। 'आस्यते गुरुणा, अतिशय्यते गुरुणा' इत्यादावेव स्यात्, 'भूयते, गम्यते' इत्यादौ न स्यादिति भावः। **ततो भावकर्मणोरिति**। अस्य [9]'अनुदात्तङितः' इत्यनेनैकवाक्यता न भवति, मण्डूकप्लुत्योत्तरत्रैव तस्य संबध्यमानत्वादिति भावः। तदेवम् [10]'अनुदात्तङित आत्मनेपदम्' इत्यस्य वाक्य-

---

[1] 'क्रियेतेति' इत्यादि 'दोष इति भावः' इत्यन्तं नास्ति — ब.

[2] भाष्ये 'भावकर्मणोरित्यतोऽन्यद्यत्' इत्यत्र 'भावकर्मणोरित्यतो यदन्यत्' इति निर्णयसागरमुद्रिते पाठः।

[3] पा. सू. १.३.१२.

[4] पा. सू. १.३.१४.

[5] पा. सू. १.३.१३.

[6] पा. सू. ३.४.६७.

[7] पा. सू. १.२.४६.

[8] तिङंश इति भावः — ब.

[9] पा. सू. १.३.१२.

[10] पा. सू. १.३.१२.

भेदेन विधिनियमरूपतां प्रतिपाद्येदानीं [1]'नेर्विशः' इत्यादिषु द्वैविध्यं वक्तुमुक्तदोषमनुवदति — **यदपीति**। **यथैवात्रेति**। [2]'भावकर्मणोः' इति नियमादप्राप्तास्तङो यथानेन [3]'नेर्विशः' इत्याद्यनुक्रमणेन विधीयन्ते तथा [4]'अनुदात्तङित आत्मनेपदम्' इति नियमेनाप्राप्त आनो विधास्यत इति भावः। आरम्भवाद्याह — **सर्वत्राप्रसङ्ग इति**। **सर्वेषु [च] साधनेष्विति**। भावकर्मकर्तृरूपेष्वित्यर्थः। कुतो न प्राप्नोतीति चेत्, त्वया प्रागुक्तविप्रतिषेधप्रवृत्त्येति गृहाणेत्याशयेनाह — **विप्रतिषेधाद्धेति**। **कर्तर्येव स्यादिति**। सकृद्गतिन्यायाश्रयणादिति भावः। पुनःप्रसङ्गविज्ञाने तु नैष दोष इत्युक्तं प्रागेव। आरम्भवाद्याह — **इह पुनर्लग्रहण इति**। **विप्रतिषेधेनेति**। सकृद्गतिन्यायाश्रयणादानांशे [5]'कर्तरि कृत्' इत्यस्य पुनरप्रसङ्ग इति भावः। अनारम्भवाद्याह — **सर्वप्रसङ्गस्त्विति**। सर्वे लादेशाः सर्वेषु साधनेषु प्रसज्यन्त इत्यर्थः। परिहरति — **नैष दोष इति**। यद्यपि प्रकृतसूत्रानारम्भेऽपि पुनःप्रसङ्गविज्ञानपक्षे दोषोद्धारो भवति, तथाप्यारम्भपक्षे ल इत्येकमक्षरम्, अनारम्भपक्षे त्वकर्मकेभ्य इति पञ्चाक्षराणीति ते गौरवमपाणिनीयत्वं च दोष इति भावः॥

[३, ३९६–४००]

(नारायणीयम्) केचिल्लकाराणामयमर्थनिर्देश इति मन्यन्ते, अपरे लादेशानाम्। तयैतस्य मतद्वयस्य सूत्रेण संग्रहं दर्शयति — **केचिदिति**। ल इत्युत्सृष्टानुबन्धं सामान्यं गृह्यते। तस्यैकत्वेऽपि [6]'जात्याख्यायामेकस्मिन्' इति [बहुवचनमिति] प्रथमः पक्षः। ल इति षष्ठ्येकवचनमिति द्वितीयः। मतद्वयेऽपि सूत्रस्य प्रयोजनं दर्शयति — **तत्र लकार इति**। **कर्तर्येवेति**। न भावकर्मणोः, आस्यमानं शय्यमानं पच्यमानमित्यादौ। ल इति प्रथमाबहुवचनपक्षे भाष्यं योजयति — **लकार इत्यर्थ इति**। षष्ठीपक्षे योजयति — **अथवेति**। ननु [7]'भावकर्मणोः' इत्यादिनात्मनेपदादेर्विधानात् कथं लकारस्य लादेशानां वा भावकर्मकर्तारोऽर्थाः स्युरित्यत आह — **असत्यस्मिन्निति**। 'एतावान्' इत्युक्तस्य नियमस्य व्यभिचारमाशङ्क्य परिहरति — **नन्वाम्विषय इति**। ननु सकर्मकाणां कर्मण्येव लकारेण भाव्यम्, न भाव इत्यत्राह — **यदीदमिति**। ततश्च 'पच्यते यवागूं देवदत्तेन' इति कर्तृकर्मणोरनभिधानादनभिहिताधिकारे विधीयमाना द्वितीया यवागूशब्दात् स्यादित्यर्थः। तच्छब्देन [8]'भावकर्मणोः' इति सूत्रं परामृश्यत इत्याह — **भावकर्मणोरिति**। नन्वेवं सूत्रन्यासेऽकर्मकाद[पि] कर्मण्यात्मनेपदं स्यादित्यत आह — **सामर्थ्याच्चेति**। सामर्थ्यमेव दर्शयति — **अकर्मकाणामिति**। अग्रिमग्रन्थविभागस्य दुर्ज्ञानत्वादाह — **सूत्रारम्भेति**। [9]'यश्चोभयोः समो दोषः' इति न्यायेन त्वयाहमेतत्र [10]चोद्य इत्याशयेन 'ननु चेहापि क्रियते' इत्युक्तमित्याह — **त्वयापीति**। प्रत्याख्यानवादी पक्षद्वयेऽपि [11]कृत्यविशेषं समर्थयत इत्यर्थः। अविशेषमेव दर्शयति — **कर्मणि चेति**। पदेनैव पदस्य साम्यम्, न तु मात्रातः। अकर्मकग्रहणे तासामाधिक्यात्। तदाह — **मात्रालाघवं त्विति**। **सूत्रारम्भे तु कर्तरीति**। चकारद्वयेन सकर्मकेभ्योऽकर्मकेभ्यश्च कर्तरि लादेशानां विधानादित्यर्थः। 'तत् कर्त्रर्थम्' इत्येतद्व्याचष्टे — **अनुदात्तेति**। भावकर्मणोः सूत्रा-

---

[1] पा. सू. १.३.१७.
[2] पा. सू. १.३.१३.
[3] पा. सू. १.३.१७.
[4] पा. सू. १.३.१२.
[5] पा. सू. ३.४.६७.
[6] पा. सू. १.२.५८.
[7] पा. सू. १.३.१३.
[8] पा. सू. १.३.१३.
[9] लौ. न्या. साहस्री. पृष्ठम् २४५.
[10] चोद्यमित्याशयेन — ङ.
[11] कृतेः सूत्रकरणस्याविशेषमित्यर्थः।

न्तरेणात्मनेपदस्य सिद्धत्वात् कर्तरि विधानार्थमेव [१]'अनुदात्तङितः' इत्याद्यनुक्रमणम्। ततश्च 'आस्ते, शेते' इत्यादौ [२]तत् कर्तरि भवति। एवं शानजपीत्याह — **आनः कर्तरीति**। विप्रतिषेधमुपपादयति — **भावकर्मणोरिति**। यदि परत्वात् [३]'कर्तरि कृत्' इत्यनेन लः कर्तरि भवति तर्हि परस्मैपदिभ्योऽपि स्यादिति वार्तिकार्थं दर्शयति — **परस्मैपदिभ्य इति**। [४]नियमार्थत्वं दर्शयति — **अनुदात्तङित इति**। एकेन वाक्येन विधिनियमयोरुभयोः सिद्धिमभिप्रेत्य 'यद्येष योगः' इत्याद्युक्तमिति दर्शयितुमाह — **भावकर्मणोरिति**। **न प्राप्नुवन्तीति**। कर्तरीति शेषः। [५]'भावकर्मणोः' इत्यत्र [६]'अनुदात्तङितः' इत्यनुवृत्तौ कथं विधिनियमयोरुभयोः सिद्धिरित्यत्राह — **अनुदात्तङित इति**। **एकवाक्यता सत्यामनुवृत्तौ स्यादिति**। संभवत्येकवाक्यत्वे वाक्यभेदस्यानिष्टत्वात्। तत्र को दोष इत्यत्राह — [७]**ततश्चेति**। कथं पुनः [८]'नेर्विशः' इत्यादिना विध्यर्थेनैकेन वाक्येनानस्य नियमः सिध्येदित्याशङ्कां परिहारभाष्याभिप्रायप्रदर्शनेन निरस्यति — **अनुदात्तङित इत्यनेनेति**। **तत्राविशेषादिति**। तदा तयोरप्राप्त्यविशेषादित्यर्थः। **तदास्य तिङभावी लकार इति**। [९]'अतिङ' इत्यनेन तिङभाविनो लकारस्य कृत्संज्ञानिषेधात् स एव 'लः कर्मणि च' इत्यस्यावकाश इत्यर्थः। ननु [१०]'शेषात् कर्तरि' इत्यनेन परस्मैपदस्य विधानात् कथं शतृक्वसू कर्तर्येव स्यातामित्यत आह — **कर्तर्येवेति**। [११]'तिप्तस्झि' इत्यनेन लादेशानां विधानात् [१२]'अनुदात्तङितः' इत्यादिप्रकरणं नियमार्थमित्याशयः। षष्ठीनिर्देशपक्षे आम्विषये दोषमाशङ्क्य परिहरति — **ल इत्यादेशेति**। **लोपस्याप्यजादेशस्येति**। [१३]'पटयति, अवधीत्' इत्यादौ। ननु श्रूयमाणशब्दोऽर्थस्य प्रत्यायक इति कथमादेशस्यापि लुकोऽर्थाभिधानमुपपद्यत इति चोदयति — **लुकोऽभावरूपत्वादिति**। ननु क्विबादिषु प्रत्ययस्य लोपेऽपि प्रकृतिस्तदर्थस्य प्रत्यायिकेत्यभ्युपगम्यते। इह तु कुतस्तदर्थाभिव्यक्तिरित्यत्राह — **अनुप्रयोगात्त्विति**॥

लस्य ३.४.७७.

[३, ४००–४०२]

(उद्द्योतनम्) लकाराकार[१४]समुदायस्यात्र ग्रहणम्, न वर्णमात्रस्य, अत आह — **उच्चारणार्थ इति**। अन्यथा लिडादीनामादेशा न स्युः। ततश्च [१५]'परस्मैपदानां णलतुस्' इत्याद्यसंबन्धं[१६] स्यादिति भावः। वर्णनिर्देशेऽपि विद्यमानार्थवत्ता कथमविवक्षिता, अत आह — **तथा चेति**। अन्यथा देवदत्तशब्दाकारस्य [१७]'यस्य' इति लोपो न स्यादिति भावः। धातोः परस्येति विवक्षायाम् 'अग्निचिल्लभते' इत्यत्र क्विबन्तो धातुत्वं न जहातीत्यतिप्रसङ्गः स्यात्, अत आह — **विहित-**

---

[१] पा. सू. १.३.१२.
[२] आत्मनेपदं तङित्यर्थः।
[३] पा. सू. ३.४.६७.
[४] नियमार्थं दर्शयति — ङ.
[५] पा. सू. १.३.१३.
[६] पा. सू. १.३.१२.
[७] तत एवेति — ङ.
[८] पा. सू. १.३.१७.
[९] पा. सू. ३.१.९३.
[१०] पा. सू. १.३.७८.
[११] पा. सू. ३.४.७८.
[१२] पा. सू. १.३.१२.
[१३] औपगवीति — ङ.
[१४] समुदायस्याग्रहणम् — अ, ऋ, लृ.
[१५] पा. सू. ३.४.८२.
[१६] असंबन्धमिति बहुव्रीहिर्मन्तव्यः
[१७] पा. सू. ६.४.१४८.

विशेषणमिति । लोपस्य स्थानिवद्भावादादेशशङ्कां निराह — **अल्विधित्वादिति** । लस्येत्यल्मात्राश्रयणादित्यर्थः । न च लोपं बाधित्वा परत्वादादेशप्रसङ्ग इति वाच्यम्, धातोर्विहितत्वापेक्षादेशापेक्षया लोपस्यान्तरङ्गत्वात् । ननु ल् इदिति कर्मधारये प्रत्ययलक्षणेन लित्परत्वं संभवति, अत आह — [1]**ल इद्यस्येति** । णमुलादेर्लित्करणं बहुव्रीहिज्ञापकमिति भावः । **ज्ञापकादिति** । णलो लिडादेशत्वेनैव लित्त्वे सिद्धे पुनर्लित्स्मरणं [2]स्थानिवत्त्वं लादेशे नास्तीति ज्ञापयतीत्यर्थः । ननु शालादिलकारव्यावृत्तः को विशेषोऽत्र, अत आह — **अनुनासिक इति** । तथा च लडादिलकारा अपि सानुनासिका एवेति भावः । एवं सति लादेशस्य स्थान्यान्तरतम्यात् सानुनासिकत्वं स्यात्, अत आह — **अथवेति** । ल् इति लुप्तषष्ठीकं पृथक्पदम् । ननु 'पचति अत्र' इति स्थिते एरुर्भवति यण्वेति[3] पूर्वविप्रतिषेधेनोत्वं भवतीत्युक्तम् । तत् कथम्, अत्रेत्येतन्नैरपेक्ष्येण पचत्वित्यस्यान्वाख्याने यणः प्रसङ्गाभावात्, अत आह — **वाक्यस्येति** । **बहिरङ्गेति** । [4]'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषायाः ॥

[३, ४००–४०२]

(रत्नप्रकाशः) अर्थवद्ग्रहणादिति । पूर्वसूत्रे ल इति प्रथमानिर्देशात् प्रत्ययाप्रत्ययपरिभाषया लडादीनामेव भावाद्यर्थकत्वबोधनात् तेषामेवात्र ग्रहणमिति भावः । एतेनापि पूर्वसूत्रे 'ल इति षष्ठ्यन्तम्' इति वदन्तो निरस्ताः । **न वर्णग्रहणेष्विति** । लस्येत्यत्र लकाराकारस्योच्चारणार्थत्वाद्वर्णनिर्देशः स इति तत्रार्थवत्परिभाषा निषिध्यत इति भावः । एतेन 'वर्णनिर्देशेषु विद्यमानाप्यर्थवत्ता शब्देन नाश्रिता, वर्णरूपमात्रस्याश्रयणात्' इति निरस्तम् । तथा च [5]वकबन्धनन्यायापत्त्या साक्षान्निषेधस्यैवाश्रयितुमुचितत्वात् । **विशिष्टस्य** [6]**लस्येति** । भावाद्यर्थस्य लस्येति वक्तव्यमिति भावः । **धातोरिति वर्तत इति** । धातोर्विहितस्य लस्येत्याश्रयणात् 'अग्निचिल्लभते' इत्यादावपि न दोष इति भावः । **शालेति** । शामामलिभ्य औणादिको लन्प्रत्ययः । [7]**नन्दन इत्यत्रेति** । ल्युप्रत्ययस्य धातोर्विधानात् लकारस्यापि विधानमिति मन्यते । [8]यक्षानुरूपबलिन्यायेनोत्तरमाह — **इत्संज्ञात्रेति** । अन्तरङ्गत्वादित्संज्ञालोपयोः सतोर्लकाराभावादेवादेशाप्रसङ्गः । स्थानिवद्भावस्त्वल्विधित्वान्न भवति । **न चात्र लितं पश्याम इति** । ल् इत् यस्य तस्मिन् लितीत्याश्रयणादन्यपदार्थाप्रसिद्ध्या न तत् प्रयोजनमिति भावः । ननु लितीति बहुव्रीहेर्न सप्तमी, किं तु कर्मधारयात् । लस्येति प्रकृतसूत्रेण चेत्संज्ञक एव लकारो निर्दिश्यत इति तस्यादेशविधानसामर्थ्याल्लोपो न भविष्यति । अनुबन्धप्रयुक्तसंज्ञायां च प्रायेण [9]'अनल्विधौ' इति निषेधो नेति कथमित्कार्याभाव इति चेन्न, लादेशेषु लित्कृतं नेति ज्ञापनादित्याशयेनाह — **अथापीति** । **वचनादिति** । लस्यादेशवचनादित्यर्थः । अनित्संज्ञकस्यापि लस्य संभवादाह — **अनुवर्तनाद्वेति** । धातोरित्यस्येति शेषः । एतेन 'भावादीनामनुवृत्त्या भावकर्मकर्तृवाचिनो लस्यादेशः । न च

---

[1] प्रदीपे 'ल इदस्येति' इत्यत्र 'ल इद् यस्येति' इत्यन्नंभट्टपाठ इति भाति ।
[2] स्थानिवत्त्वमादेशे— अ, ऋ, लृ.
[3] विचार इति शेषः ।
[4] परिभाषा ५०.
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ५१.
[6] भाष्ये 'विशिष्टस्य लकारस्य' इत्यत्र 'विशिष्टस्य लस्य' इति पाठो रत्नप्रकाशकृदभिमत इति भाति ।
[7] भाष्ये 'नन्दनः, अत्रापि' इत्यत्र 'नन्दन इत्यत्रापि' इति निर्णयसागरमुद्रिते पाठः ।
[8] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[9] पा. सू. १.१.५६.

लोपे सति 'भावाद्यर्थाभिधायी लः संभवतीत्यकृतलोपानां लकाराणामादेशाः[2] करिष्यन्ते। ज्ञापकात्तु लित्स्वरो न भविष्यतीत्यर्थः' इति निरस्तम्। प्राग्दर्शितधातोरित्यस्यानुवृत्तेस्त्यागे बीजाभावात्। भावादिपदानां स्वरितत्वकल्पने मानप्रयोजनयोरभावाच्च। उणादीनां व्युत्पन्नत्वेऽपि शालामालादौ नास्त्यतिप्रसङ्ग इत्याह — **अथापीति**। **क्रियते विशिष्टग्रहणमिति**। अनुनासिको लकारः स्थानित्वेनोपात्त इति भावः। एतेन 'ल् अस्य लस्येति निर्देशः कृतः। अस्येति सर्वनाम्ना भावाद्यर्थाभिधायी परामृश्यते' इति निरस्तम्। ल् इति प्रथमान्तस्य 'अस्य' इति षष्ठ्यन्तस्य च सामानाधिकरण्यस्यासंभवात्। लुप्तषष्ठीकताश्रयणे तु क्लिष्टकल्पनेति तस्य द्वितीयत्वेन परिग्रहानौचित्याच्च। अस्वरसग्रस्तो हि पक्ष आदौ निर्देष्टुमुचितः। **लादेशो वर्णविधेरिति**। वाक्यसंस्कारपक्षाश्रयेणेदम्। **उक्तं वेति**। [3]'विप्रतिषेधे परम्' इति सूत्र इति शेषः॥

[३, ४००–४०२]

(नारायणीयम्) लिडादीनामप्यर्थवत्त्वमसिद्धमिति प्रत्यवतिष्ठमानं प्रत्याह — **लडादय इति**। ननु 'लस्य' इति समुदायग्रहणात् कथं 'वर्णग्रहणमिदम्' इत्युक्तमित्यत आह — **लस्येत्यत्रेति**। **अकार उच्चारणार्थ इति**। नानुबन्धः, अन्यथा लिडादीनां तिबादयो न स्युः, लड्लङोरेवात्र ग्रहणात्। [4]'परस्मैपदानां णलतुस्' इत्याद्यप्यनन्वितं स्यात्, लिडादेस्तिबादीनामभावादिति भावः। **तथा चेति**। अन्यथा 'औपगविः' इत्यादावर्थवत एव स्यात्। विशिष्टग्रहणं कथं कर्तव्यमित्यत्राह — **भावाद्यर्थेति**। ननु धातोरित्यस्यानुवृत्तावपि 'अग्निचिल्लभते' इत्यादौ धातोः परस्य लस्यादेशः स्यादित्यत्राह — **विहितेति**। 'शाला' इत्यादौ लशब्दस्य धातुविहितत्वं दर्शयति — **शामामलिभ्य इति**। एतेभ्यो बाहुलकाल्लप्रत्ययः। ननु [5]'सत्यामित्संज्ञायां लकारस्यादेशः कथमित्यत आह — **स्थानित्वेनाश्रयणादिति**। कस्यानुवर्तनसामर्थ्यादित्संज्ञानामादेश इत्यत आह — **भावादीनामिति**। 'एवमपि न दोषः' इत्यादिभाष्यं व्याचष्टे — **ज्ञापकादिति**। कथं विशिष्टग्रहणमित्यत्राह — **अननुनासिक इति**। शालादौ लकारो निरनुनासिक इत्यतिप्रसङ्गाभावः। **ल् अस्येति**। ल् इति षष्ठ्यां छान्दसो लुक्। **अस्येति सर्वनाम्नेति**। इदंशब्दस्यात्र प्रकृतपरामर्शित्वात्। ननु लादेशस्यान्तरङ्गत्वात् कथं विप्रतिषेधोपन्यास उपपद्यत इत्याशङ्क्य [वाक्य]संस्कारपक्षे तदुपपत्तिं दर्शयति — **वाक्यस्येति**। कुत्रेदमुक्तमित्यत्राह — **विप्रतिषेधसूत्र इति**॥

टित आत्मनेपदानां टेरे ३.४.७९.

[३, ४०३–४०५]

(उद्द्योतनम्) भाष्ये **ज्ञापकं** [6]**वेति**। [7]'गाङ लिटि' इति सूत्रस्थम्। इङो ङित्त्वात् स्था-

---

[1] प्रदीपे 'भावाद्यर्थाभिधायित्वं संभवति' इत्यत्र 'भावाद्यर्थाभिधायी लः संभवति' इति रत्नप्रकाशकृत्पाठ इति भाति।
[2] आदेशः करिष्यते — प, ब.
[3] पा. सू. १.४.२.
[4] पा. सू. ३.४.८२.
[5] सत्यामपि संज्ञायां — ङ.
[6] चेति — अ, ऋ, लृ.
[7] पा. सू. २.४.४९.

निवत्त्वेनैव गादेशस्यापि ङित्त्वे सिद्धे गाङिति ङित्करणं [1]'स्थान्याश्रितमित्कार्यमादेशे न भवतीति ज्ञापनार्थमिति वार्तिकार्थः। टितामात्मनेपदानां टेरेत्वोक्तौ स परिहारः, टितो लस्य स्थाने यान्यात्मनेपदानि तेषामित्युक्तौ न स परिहारः, आत्मनेपदटित्त्वस्यापुरस्कारादिति स परिहारोऽत्र न संभवतीत्याह — भाष्ये **एवं किल तदुक्तमिति**। एकवचनबहुवचनान्तयोः सामानाधिकरण्यायोगादाह — **टित इत्येकवचनमिति**। [2]पर्यवपाद्यशब्देनेहागम उच्यत इत्याह — [3]**पर्यवपाद इति**। इटष्ठित्त्वे [4]'आदि' इति रूपं न सिध्यतीत्युपपादयति — **दाञो लङ इति**। **उत्तमेति**। आत्मनेपदस्येत्यादिः। नन्विटः सार्वधातुकत्वाट्टित्त्वेऽपि कथमातो लोपः, अत आह — **अत्र चेति**। अष्टादशमध्ये इटः पृथक्करणात् सप्तदशादेशाः। तत्र [5]"विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् [6]सधर्मत्वम्' इति द्वादशाधिकरणन्यायेन त एवानुरोध्या इत्याह — [7]**लस्येत्येकेति**। **अवयवेति**। आगमस्यावयवत्वात्। इटो बहिरङ्गत्वमाह — **वलादीति**। **तत्र** तस्मिन्। तिबादिनवकानुवृत्तेः प्रयोजनाभावादाह — **अथवेति**। "आग्नेय्याग्नीध्रमुपतिष्ठते' इत्यत्र ज्योतिष्टोमप्रकरणगताग्नेयीग्रहणवदिति भावः। [8]'आने' इत्यस्य ज्ञापकत्वमाह — **यदीति**। **इत्याह** इत्यत आह। **लाघवायेति**। एकारापेक्षयैकारस्य मात्रिकत्वादित्यर्थः। ज्ञाप्यमाह — [10]**लादेशादेशानामिति**। डारौरस्स्वेत्वाभावज्ञापनाय एकारोच्चारणम्। अन्यथैकारमेवोच्चारयेतेत्यध्याहारेण 'इशिसीरिचः डारौरस्सु' इति श्लोकैकदेशस्य योजना। **एत्वं न भवतीति**। टितः स्थाने विहितस्यैत्वविधानात्। 'गुणे कथम्' इत्यस्य प्रकृतानुपयोगादाह — **श्लोकेति**। तद् व्याचष्टे — **एत इति**। **बहिरङ्ग इति**। ऐभावे कर्तव्ये गुणोऽसिद्ध इति नैत्वमित्यर्थः॥

[३, ४०३–४०५]

(रत्नप्रकाशः) लस्येत्यनुवर्त्य टितो लस्य यान्यात्मनेपदानि तेषां टेरेत्वं स्यादिति सूत्रार्थोऽवश्यमाश्रयणीयः। तथा चातिप्रसङ्ग इत्याशयेनाह — **टित [एत्वे] आत्मनेपदेष्विति**। टित आत्मनेपदस्येति समानाधिकरणपरं व्याख्यानमवलम्ब्य परिहरति — **उक्तं वेति**। यत्रोक्तं तत् स्थलमत्र त्वरावशान्न दर्शितम्। आवश्यकं तु भवति। **नैतदस्त्युक्तमिति**। एतदुक्तं प्राग् यत् तदतिप्रसङ्गवारणसमर्थं न भवतीति भावः। कुत इत्यत आह — **एवं किलेति**। एवं हीत्यर्थः। **टिदात्मनेपदमिति**। टित इत्येकवचनानुरोधेनात्मनेपदानामिति [11]"जात्याख्यायामेकस्मिन् बहुवचनम्' इति भावः। **तच्च नेति**। तादृशार्थाश्रयणं तस्य न युज्यत इति भावः। तर्हि तस्य कीदृशार्थाश्रयणं युक्तमित्यत आह — **टितो लकारस्येति**। अर्थान्तराश्रयणे को दोष इत्यत आह — **अवश्यमिति**। **अकुर्वीति**। लङ उत्तमैकवचनमिट्, तत् आत्मनेपदं टिच्च भवतीति तस्याप्येत्वं स्यादिति भावः। **नैष टिदिति**। तथा च टिद्यदात्मनेपदमिति सामानाधिकरण्याश्रयणे न दोष इति भावः। **आदिर्मा भूदिति**। इटष्टित्त्वसामर्थ्यात् तदपेक्षया 'लस्य'

---

[1] स्थान्याश्रितकार्यं — अ.
[2] पर्यपवाद्य — अ, ऋ, लृ.
[3] पर्यपवाद इति — अ, ऋ, लृ.
[4] लादीति — लृ.
[5] मीमांसासूत्रम् १२.२.२२.
[6] स्वधर्मत्वं — अ, ऋ, लृ.
[7] लस्येत्येवेति — अ, ऋ, लृ.
[8] मीमांसातृतीयाध्यायद्वितीयपादाष्टमाधिकरणेऽयमर्थो निर्णीतः।
[9] पा. सू. ७.२.८२.
[10] लादेशानामिति — अ, ऋ, लृ.
[11] पा. सू. १.२.५८.

इत्यवयवावयविभावे षष्ठी, तिबादिसप्तदशापेक्षया तु स्थाने [1]सेति मन्यते। **कथमिटोऽदिति।** ठित्वे 'इठोऽत्' इति निर्देशस्यैव न्याय्यत्वात् 'इटोऽत्' इति छान्दसो हल्व्यत्यय आश्रयणीयः स्यादिति भावः। ननु 'इठोऽत्' इत्युच्यमानेऽपाणिनीयं स्यादित्यत आह — [2]**अवश्यं चेति।** तथा च [3]'इटोऽत्' इत्येतत् 'इठोऽत्' इत्येवंपरतया हल्व्यत्ययेन व्याख्येयमिति भावः। **पर्यवपाद्यस्येति।** **पर्यवपादः** रूपान्तरप्राप्तिः, [4]'तत्र साधुः' इति यति **पर्यवपाद्यः** आगमः। **आदीति।** दाञो लङ उत्तमैकवचनम्। शपः श्लुः। [5]'द्विर्वचनप्रसङ्गे छन्दसि वा' इति वचनाद् द्वित्वाभावः। यदि तत् ठित् स्यात् तर्हि 'ययिथ' इत्यादिसाधारण्येनेडादौ विधीयमान आतो लोपस्तस्मिन् न स्यात्। न ह्यत्र [6]'इठि' इत्येवंपरतया हल्व्यत्ययेन व्याख्यानं युज्यते, आगमस्य टितोऽग्रहणापत्त्या 'ययिथ' इत्यादेरसिद्धेरिति भावः। **तस्मादिति।** यस्मादिटीत्यनेन टिदादेष्ठिदादेश्च संग्रहो न युज्यते तस्मादित्यर्थः। इटीत्यनेन तन्त्रावृत्त्यादिना हल्व्यत्ययेनेठोऽपि ग्रहणमिति व्याख्यानं निर्युक्तिकं तुच्छमिति भावः। **टिदेष इति।** इड् य उत्तमपुरुष इति शेषः। **आदिरिति।** लस्येति शेषः। **न भवतीति।** स इडिति शेषः। **स्थानेयोगत्वं प्रयोजयन्तीति।** लस्येति षष्ठ्या इति शेषः। स्थानेयोगत्वं नाम स्थानार्थकता। **तानेक इति।** संभावितावयवत्वक इडित्यर्थः। **नोत्सहते विहन्तुमिति।** अनिर्धारितसंबन्धविशेषा षष्ठी स्थाने भवतीतीडपेक्षयावयवावयविभावार्थकत्वे तस्याः षष्ठ्या आश्रीयमाणे निर्धारितसंबन्धविशेषैव सा संपन्नेति तस्याः स्थानेयोगत्वं न स्यादिति भावः। ननु तत्र स्थानेयोगत्वाभावे किं स्यादिति चेत्, तिबादीनामप्यवयवत्वे सति लात्पूर्वत्वं परत्वं च पर्यायेण स्याद् विनिगमनाविरहादिति गृहाण। ननु तर्हि तिबादीनां बहुत्वेऽपि [7]'शतमप्यन्धानां न पश्यति' इति न्यायेन निर्धारितसंबन्धविशेषायाः षष्ठ्याः स्थानार्थकतां संपादयितुं न शक्नुवन्तीति चेन्न, तिबादीनामष्टादशानां द्वन्द्वनिर्दिष्टत्वेन तदपेक्ष[या] लस्येति षष्ठ्या अवयवावयविभावार्थकत्वे आश्रीयमाणे सप्तदशानामनियतदेशावयवत्वं स्यादिति शास्त्रस्याव्यवस्थाकारितापत्त्या लस्येति षष्ठ्या निर्धारितसंबन्धविशेषत्वाभावेन स्थानषष्ठ्या एव तत्र युक्तत्वात्। नन्विटष्टित्त्वे आश्रीयमाणे [8]'इटोऽत्' इत्यदादेश आगमस्यापि कुतो नेति पृच्छति — **पर्यवपाद्यस्येति।** **असिद्धं बहिरङ्गलक्षणमिति।** अङ्गात् परस्य वलाद्यार्धधातुकस्य विधीयमान इड् बह्वाश्रयत्वाद् बहिरङ्गः। इट एव विधीयमानोऽत् अल्पाश्रयत्वादन्तरङ्ग इति भावः। [9]'प्रत्ययग्रहणे नाप्रत्ययस्य, [10]'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषाभ्यामपि तत्रेडागमस्य व्यावृत्तिर्बोध्या। तदेवं टितो लस्यात्मनेपदानां टेरेत्वं स्यादिति प्रकृतसूत्रार्थस्यावश्याश्रयणीयत्वेनानस्याप्येत्वं प्राप्नोति, तस्य प्रतिषेधो वक्तव्य इति स्थिते परिहारमाह — **इदं तर्ह्युक्तमिति।** उक्तप्रायत्वादुच्यमानस्याप्युक्तत्वारोपः। **प्रकृतानामिति।** एकदेशे स्वरितत्वप्रतिज्ञानात् तातामादिपदमनुवर्त्य टितो लस्य तातामादेरात्मनेपदस्य टेरेत्वं स्यादिति व्याख्यानान्नानस्यैत्वमिति भावः। तादिपदाननुवृत्तावप्यानस्य ज्ञापकबलेनैत्वं न भवतीत्याशयेनाह

---

[1] षष्ठीत्यर्थः।

[2] भाष्ये 'तच्चावश्यम्' इत्यत्र 'अवश्यं च तत्' इति पाठो रत्नप्रकाशकृदभिमत इति भाति।

[3] पा. सू. ३.४.१०६.

[4] पा. सू. ४.४.९८.

[5] का. वा. ६.१.८–२. अर्थानुवादोऽयम्।

[6] इति — ब.

[7] महाभाष्ये हयवरट्सूत्रे 'एकोऽन्धो दर्शनेऽसमर्थः, तत्समुदायश्च शतमप्यसमर्थम्' इत्युक्तोऽयं न्यायः।

[8] पा. सू. ३.४.१०६.

[9] परिभाषा १११.

[10] परिभाषा १४.

— **आने मुगिति**। निर्देशनमिति शेषः। यद्यानस्यैत्वं स्यात् तर्ह्यन्तरङ्गत्वादेत्वे कृते मुकः प्रवृत्ति-रुचितेति मुक्प्रवृत्तिवेलायामानस्यैकारान्ततायाः संपन्नत्वेन 'आनयि मुक्' इति निर्देशस्यौचित्येन 'आने मुक्' इति निर्देश आनस्यैत्वाभावं ज्ञापयतीति भावः। **एत्वे** एत्वाभाव इत्यर्थः। **टित्त-ङामिति**। टितो लस्यादेशानां तङामित्यर्थः। एत्वाभावपरम् 'एत्वे' इत्यनुषज्यते। ते के इत्यपेक्षायामाह — **डारौरस्स्विति**। व्यत्ययेन षष्ठ्यर्थो सप्तमी। **इशिसीरिच इति**। ज्ञापक-मिति, एत्व इति चानुषज्यते। तत्र शीति शकारोपरीकार उच्चारणार्थः। 'लिटस्तझयोरि-शिरिच्, थासः सिः' इति सूत्रन्यासस्य [1]'लिटस्तझयोरेशिरेच्, [2]थासः से' इति सूत्रस्थाने उचित-त्वेन तथानिर्दिश्यमाना इश्सीरिचो डारौरसामेत्वाभावं ज्ञापयन्तीति भावः। 'लिटस्तझयोरिशि-रिच्, थासः सिः' इति सूत्रयितव्ये यथान्यासं गुरुसूत्रकरणं ज्ञापयति डारौरसामेत्वं नेतीति फलि-तम्। **टिदटित इति**। 'अकुर्वि' इत्यादावेिट् अटितो लकारस्यादेश इति तस्य टित्त्वेऽपि नैत्व-मिति भावः। तथा च प्रकृतस्यात्मनेपदस्य टेरेत्वं फलितम्, दोषश्च नास्तीत्याशयेनाह — **प्रकृत इति**। आत्मनेपदे टेरेत्वं व्यवस्थितमिति शेषः। प्रकृतानुपयोगेऽपि श्लोकपूरणव्याजेन प्रश्नान्तरं निदर्शयति — **गुणे कथमिति**। ऐत्वं न प्रवर्तत इति शेषः। 'पचावेदम्' इत्यादौ वाद्यकारस्येदमश्चैकादेशो गुणे 'एत ऐ' इत्यैत्वं कुतो न प्रवर्तत इति भावः। तदुत्तरं तु [3]'एत ऐ' इति सूत्रे भविष्यति॥

[३, ४०३–४०५]

(नारायणीयम्) ननु भिन्नवचनयोष्टिदात्मनेपदयोः कथं सामानाधिकरण्येन संबन्ध उपपद्यत इत्यत आह — **यदि टित इति**। **तत्र साधुरिति**। तव्यस्येतव्यरूपापत्तिरागमेन क्रियत इति तत्र तस्य साधुत्वम्। 'आदि' इत्यत्राकारलोपप्राप्तिं दर्शयितुं प्रक्रियामाह — **दाञ्च इति**। ननु श्लौ सति द्विर्वचनं स्यादिति, नेत्याह — **द्विर्वचनेति**। 'सप्तदशादेशाः' [4]इत्यनागमत्वपुरस्कृतां युक्तिं स्फोरयति — **लस्येत्येकेति**। इटो बहिरङ्गत्वमद्भावस्यान्तरङ्गत्वं चोपपादयति — **वला-दीति**। **तत्र कर्तव्य इति**। स्थानिनोऽसत्त्वादादेशाभाव इत्यर्थः। **तैरात्मनेपदानीति**। तिबा-दिषु यान्यात्मनेपदानीत्येवं विशेषणाच्छानच एत्वाभाव इत्यनुवृत्तिमाश्रित्योक्तम्। यद्वा मा भू-दनुवृत्तिः, तथाप्यात्मनेपदशब्दः प्रकृतेष्वेवात्मनेपदेषु वर्तत इति पक्षान्तरमाह — **अथ वेति**। **ज्ञापकमपीति**। उक्तेऽर्थे संवादकत्वेन ज्ञापकोपन्यासः, न त्वपूर्वोऽर्थो ज्ञापकेन प्रतिपाद्यत इत्यर्थः। टित्तङामेत्वे आने मुगिति वचनं ज्ञापकमिति योजयन्नर्थमाह — **यद्येत्वमिति**। 'टित्तङाम्' इति षष्ठीतत्पुरुष इत्याह — **टितः स्थान इति**। 'इशिसीरिचः, डारौरस्सु' इति श्लोकावयवस्य शङ्कोत्तरत्वेन विनियोगं दर्शयति — **अथाध्येतेति**। 'इङ् अध्ययने' लुट्, ङित्त्वादात्मनेपदम्। [5]तं सोपस्कारं योजयति — **[लिट इति।]** सामान्येन ज्ञापकाश्रयणात् डारौरसामप्येत्वं न भव-तीत्याह — **लादेशादेशानामिति**। लादेशानां तादीनां ये आदेशा डादयस्तेषामित्यर्थः। 'टिदटितः प्रकृते तत्' इति पूर्वोक्तस्यार्थस्य सुग्रहत्वायेत्याह — **अकुर्वीति**। **इत्यैत्वं नेति**। टितो लकारस्य स्थाने यान्यात्मनेपदानि तेषामित्वमित्यर्थाश्रयणात्। 'गुणे कथम्' इत्यस्यात्रासंगतिमाशङ्क्य परि-हरति — **श्लोकपूरणायेति**। **पचावेदमिति**। गुणस्यान्तवद्भावाल्लोड्ग्रहणेन ग्रहणात्। **बहिरङ्ग**

---

[1] पा. सू. ३.४.८१.
[2] पा. सू. ३.४.८०.
[3] पा. सू. ३.४.९३.
[4] इत्यागमिकृतां — ङ.
[5] श्लोकावयवमित्यर्थः।

आद्गुण इति। द्विपदाश्रयत्वात्। ऐत्वस्यैकपदाश्रयत्वादन्तरङ्गत्वमित्यसिद्धपरिभाषया तदभाव इत्यर्थः॥

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३.४.८२.

[३, ४०५–४०८]

(**उद्द्योतनम्**) शकारस्य देशानिरूपणाच्छित्करणमाक्षिपति — **क्व पुनरिति**। **शस्येति**। अनादित्वादेवेत्यर्थः। [1]लशि वृद्धिः कथम्, अत आह — [2]**लशुत्तमो वेति**। तथापि तिपो [3]लशादेशे कथं नित्या वृद्धिः, अत आह — **योगेति**। [4]लशित्येकं सूत्रम्। तत्र [5]'गोतो णित्' इति णिदित्यनुवर्तनान्नित्यं णित्त्वम्। ततः 'उत्तमो वा'। उत्तमो लश् [वा] णिद् भवतीति सर्वेष्टसिद्धिः। ननु [6]'आदेः परस्य' इत्यस्यालोऽन्त्यापवादत्वात् कथम् [7]'अन्त्यस्य' इत्युक्तम्, अत आह — **एतच्चेति**। भाष्ये **अनित्त्वात् सिद्धमिति**। आदेशत्वानन्तरं प्रत्ययत्वाण्णकारस्येत्संज्ञा। [8]'पूर्वं त्वनित्त्वादनेकाल्त्वात् सर्वादेशः सिध्यतीत्यर्थः। स्पष्टप्रतिपत्तये शकार एव क्रियताम्, किं णकारेणेत्याह — भाष्ये [**क एष इति**। भाष्ये **एवं तर्हि लकार इति**।] णकारस्योक्तरीत्यानुपयोगेऽपि 'लः' इत्यादेशः कर्तव्यः, न तु शकार इत्यर्थः। प्रत्ययाद्युदात्तस्य धातुस्वरापवादत्वात् कथं धातुस्वरः, अत आह — **प्रत्ययस्येति**। तिबादेशस्यापि पित्त्वादित्यर्थः। एकाच्पदकृत्यमाह — **योऽनेकाजिति**। द्विरुक्तस्य सर्वस्यानुदात्तत्वं गकाराकारस्योदात्तत्वमित्यर्थः। **निरूप्यते** विचार्यते। 'व्यपदेशिवत्' [9]इति सूत्रस्यैवोपलक्षणमित्याह — **आद्यन्तवदिति**। धातोराद्युदात्तशास्त्राभावात् कथमतिदेशः, अत आह — **कार्यातिदेशमिति**। स्थाने द्विर्वचनपक्षे कथंचिद् द्विरुक्तस्यान्तोदात्तत्वमुच्येत। द्विःप्रयोगे तु द्वयोरप्यन्तोदात्तत्वं स्यात्। तच्चानिष्टमिति 'द्विः प्रयोगे' इति भाष्य उक्तम्। तद्दूषणमपरिहार्यमित्याह — [10]**षाष्ठिकेति**। आष्टमिक एव स्थाने द्विर्वचनपक्ष इत्यर्थः। णकारो भाष्यकारेण प्रत्याख्यात एवेत्यभिप्रेत्याह — **ततश्चेति**। [11]णल्ग्रहणप्रसङ्गशङ्कां निराह — [12]**यस्थस्येति**। अत्रापि पूर्ववदन्त्यादेशप्रसङ्गनिरासायाकारद्वयोक्तिरित्याह — **एतदपीति**। **सिद्धमिति**। यथाश्रुतैकाकारेणेत्यर्थः। **समुदायस्येति**। प्रयोगे पररूपेणैक एवाकार इति भावः॥

---

[1] अणि — अ; अकि — लृ.

[2] णलुत्तमो वेति — अ, ऋ, लृ.

[3] लादेशे — अ, ऋ, लृ.

[4] लचीत्येकं — अ; लचित्येकं — लृ.

[5] पा. सू. ७.१.९०.

[6] पा. सू. १.१.५४.

[7] अन्त्यजस्य — अ, ऋ, लृ.

[8] 'पूर्वं त्वनित्त्वात्' इत्यस्यानन्तरम् 'अला' इत्यधिकम् — अ.

[9] इत्येतदित्यर्थः।

[10] प्रदीपे 'षाष्ठिकं द्विर्वचनम्' इति दृश्यते। षाष्ठिकद्विर्वचनम्' इति समस्तपाठोऽन्नंभट्टस्येति प्रतीयते।

[11] 'अकारस्य शित्करणम्' इति वार्तिकेऽकारस्येत्यनेन णल्ग्रहणविचारस्यैव पूर्वं प्रस्तुतत्वात् तस्यैव ग्रहणं स्यादिति शङ्कायां तदपाकरणाय प्रदीपे 'यस्थस्य स्थाने विधीयते तस्येत्यर्थः' इत्युक्तम्। 'परस्मैपदानां णलतुसुस्थलथुस' इत्यनेन मध्यमपुरुषबहुवचनस्य थस्य थप्रत्ययस्य स्थाने योऽकारो विधीयते तस्येत्यर्थः। प्रदीपे 'यस्थस्य स्थाने' इति भाव्यम्। 'यस्य स्थाने' इत्येव दृश्यते मुद्रितपुस्तकेषु।

[12] यस्तस्येति — अ, ऋ, लृ.

[३, ४०५-४०८]

(रत्नप्रकाशः) **णलः शित्करणमिति**। शल् कर्तव्य इति भावः। [1]'णलुत्तमो वा' इत्यत्र 'शलुत्तमो वा' इति सूत्रं कृत्वा 'शल्' इति विभज्य शल् णित् स्यादिति व्याख्याय ततः 'उत्तमो वा' इत्यत्र शलित्यनुवर्त्य उत्तमः शल् णिद्वा स्यादिति व्याख्यानादिष्टसिद्धिः। **अन्त्यस्य प्रसज्येतेति**। अनुबन्धप्रयुक्तस्यानेकाल्त्वस्य निषिद्धत्वाद् धातोरित्यधिकारस्य प्रागेव लादेशान्निवृत्तेरिति भावः। **अनित्त्वादिति**। सर्वादेशत्वात् प्रागिति शेषः। **सिद्धमिति**। अनेकाल्त्वात् सर्वादेशत्वमिति शेषः। णल् वा न्याय्यः शल् वा न्याय्य इत्याशयेन पृच्छति मध्यस्थः कश्चित्—**क एष इति**। **एषः** णित्त्वशित्त्वयोरन्यतराश्रयः परिहारः को [2]न्याय्य इत्यर्थः। **शकारमसि चोदित इति**। चुदेः प्रच्छचर्थत्वेन द्विकर्मकत्वात् [3]'गौणे कर्मणि दुह्यादेः' इति क्तः। **शकारं न करिष्यामीति**। वदसि चेति शेषः। [4]**ततोऽलिति**। 'अलुत्तमो वा' इति सूत्रं कृत्वा विभज्य व्याख्यानाद्वृद्धिसिद्धिरिति भावः। **लकारः क्रियत इति**। ल इति क्रियते न त्वलिति भावः। **अनित्त्वादिति**। तथा चानुपूर्व्यात् सर्वादेशतासिद्धिरिति भावः। स एव मध्यस्थः पुनः पृच्छति—**एवमपीति**। **धातुस्वरे कृत इति**। अन्तरङ्गत्वात् [5]'धातोः' इत्यनेनान्तोदात्तत्वे कृत इत्यर्थः। **अन्तोदात्त आदेश इति**। स्थाने द्विर्वचनपक्षाश्रयेणैवमुक्तम्। **यदेकाजिति**। य एकाजित्यर्थः। यत्तु 'योऽनेकाच् जजागारेति, तत्र धातुस्वरे कृते शिष्टस्यानुदात्तत्वे प्रथमैकाचो द्विर्वचनं सर्वानुदात्तं सिध्यतीत्येकाजेव धातुर्निरूप्यते' इति। तन्न, ऊर्णुञोऽनेकाचः [6]'अजादेर्द्वितीयस्य' इति द्वितीयैकाचो द्वित्वे दोषसंभवेन 'एकाजेव निरूप्यते' इत्यवधारणाश्रयणे मानप्रयोजनयोरभावात्। **व्यपदेशिवद्भावेनेति**। [7]'आद्यन्तवदेकस्मिन्' इत्यनेन व्यपदेशातिदेशस्यैव स्वीकारो भवतीत्यनेनापि सूचितः। **यथैव तर्हीति**। [8]'स्थानेऽन्तरतमः' इत्यत्र गुणतो यदान्तर्यं तत् शास्त्रविहितगुणकृतमेवाश्रयणीयं न तु वस्तुस्वभावसिद्धगुणकृतमित्यत्र मानाभावात् शास्त्रसिद्धान्तोदात्तत्वकृतमिव स्वभावसिद्धाद्युदात्तत्वकृतमप्यान्तर्यं संभवतीत्यनिष्टं स्यादिति भावः। एतेन 'कार्यातिदेशं मन्यते' इति निरस्तम्। असंबद्धप्रलापत्वात्। न हि स्थानेऽन्तरतमसूत्रेण कार्यमतिदिश्यत इति वा शास्त्रमतिदिश्यत इति वा संभवति। येन तद् युक्तं स्यात्। अत एव 'न त्विदम्' इति प्रतीकगतं 'शास्त्रातिदेश इति भावः' इति निरस्तम्। ननु तत्र स्थानिवत्सूत्रेण कार्यातिदेशः शास्त्रातिदेशश्चाभिमत[9] इति चेन्न, स्थानिवत्सूत्रस्य शङ्कित्रा समाधात्रा वास्पृष्टत्वात्[10]। [11]'स्थानेऽन्तरतमः' इति सूत्रमादायैव शङ्कासमाधानयोः प्रवृत्तत्वाच्च। शङ्कित्रभिप्रायमाविष्कर्तुं शास्त्रविहितगुणप्रयुक्तमेव तत्र गुणप्रयुक्तमान्तर्यमाश्रीयत इत्याश्रित्यार्धाङ्गीकारेण परिहरति—**सत्यमिति**। व्यपदेशिवद्भावेनान्तोदात्त आद्युदात्तश्चेत्यङ्गीकृतम्, विनिगमनाविरहस्तु नाङ्गीकृतः। शङ्किता मद्दर्शिताशयेनाह—**एतदपीति**। लक्षणमपीत्यर्थः। कीदृशं लक्षणं नास्तीति वदसीत्यत आह—

---

[1] पा. सू. ७.१.९१.

[2] 'परिहारो न्याय्यः' इति भाष्ये 'परिहारः, न्याय्यः' इति छेदो रत्नप्रकाशकृदभिमतः। 'परिहारः, अन्याय्यः' इति छेदं कृत्वा व्याचष्टे नागेशः।

[3] श. कौ. द्वितीयभागे पृष्ठम् १३४.

[4] ततः शलिति। शलुत्तमो वेति—प, ब.

[5] पा. सू. ६.१.१६२.

[6] पा. सू. ६.१.२.

[7] पा. सू. १.१.२१.

[8] पा. सू. १.१.५०.

[9] चाभिप्रेत इति—प.

[10] अस्पृष्टत्वात्, इति छेदः॥ चास्पृष्टत्वात्—प.

[11] पा. सू. १.१.५०.

आदेशस्यान्त उदात्त इति। तर्ह्यादेशेनान्तोदात्तत्वं कुतो लभ्यमित्यत आह — **प्रकृतित इति।** स्थान्यान्तर्येणेत्यर्थः। भवतु तथैव, किं तत इत्यत आह — **प्रकृतिश्चास्येति। एवमाद्युदात्तापीति।** तथा चादेशः कदाचिदाद्युदात्तः स्यादिति दोषपरिहारायादेशो ल एवाश्रयणीयो न तु श इति भावः। ननु स्थाने द्विर्वचनपक्षे स दोषः। स तु पक्षो न स्थित इति चेन्न, [1]'द्विःप्रयोगो द्विर्वचनम्' इति पक्षेऽपि तस्य प्रसक्तत्वादित्याशयेनाह — **'द्विः प्रयोगे खल्वपीति। एकवर्जमि-[ती]ति।** उक्तत्वादिति शेषः। **संभव इति।** उभयोरन्तोदात्तत्वस्येति शेषः। **पर्यायः प्रसज्येतेति।** द्विर्वचनोत्तरम् [2]'अनुदात्तं पदमेकवर्जम्' इति प्रवर्तते। तत्र विनिगमनाविरहात् कदाचित् पूर्वं वर्जयित्वानुदात्ताच्कं पदं स्यात्। कदाचित् परं वर्जयित्वेति भावः। उपसंहरति समाधाता स्वमतम् — **तस्मादिति। लकारः कर्तव्य इति।** 'ल उत्तमो वा' इति सूत्रं कर्तव्यम्, ल इति च योगविभाग आश्रयणीय इति भावः। सूत्रकारेण तु योगविभागापेक्षया णकारानुबन्धाश्रयणमेव युक्तमभ्युपगतमिति यथाश्रुतसूत्रन्यास उपपन्न इति ज्ञेयम्। **अकारस्येति।** थादेशत्वेन निर्दिष्टस्येति भावः। **प्रश्लिष्टनिर्देशोऽयमिति।** [3]'अतो गुणे' इति पररूपेणेति शेषः। कस्यायं प्रश्लिष्टनिर्देश इत्यत आह — **अ अ इतीति।** अस्येति शेषः। किं तत इत्यत आह — **सोऽनेकालिति ॥**

[३, ४०५–४०८]

(नारायणीयम्) ननु लशि विहिते णित्त्वाभावात् 'पपाच' इत्यादौ वृद्धिर्न स्यादित्यत आह — **लशुत्तमो वेति करिष्यते, योगविभागश्चेति।** लशित्येको योगः। लश् णिद्वद् भवति। ततः 'उत्तमो वा' इति। लशित्येव। **नानुबन्धकृतमिति।** [4]'शित्सर्वस्य' इत्यनेन ज्ञापितमेतत्। ननु सतिशिष्टत्वाद् धातुस्वरं प्रत्ययस्वरो बाधत इत्यत आह — **प्रत्ययस्य पित्त्वादिति।** नन्वनेकाजपि धातुर्विद्यते जागर्त्यादिरित्यत आह — **योऽनेकाजिति। कार्यातिदेशमिति।** [5]'आद्यन्तवत्' इत्यनेनान्तकार्यमुदात्तत्वमतिदिश्यते। तत्रोदात्तवत्यादेशे कदाचिदाद्युदात्तोऽपि स्यादित्यर्थः। **शास्त्रातिदेश इति।** अस्मिन् पक्षे [6]'धातोरन्तः' इत्यन्तोदात्तत्वं विधीयते। तत्रान्तरतम्यादन्तोदात्तस्यान्तोदात्तो भविष्यतीत्यर्थः। **कार्यातिदेशः प्राधान्यादिति।** सर्वातिदेशानां कार्यार्थत्वात्। ततश्च स्थानिकार्यमुदात्तत्वं भवत् कदाचिदादेरपि प्राप्नोतीत्यर्थः। [7]प्रकृतिशब्देनात्र णल्प्रत्ययान्तं न विवक्ष्यते। अनन्वयादित्याह — **स्थानित इति।** 'द्विः प्रयोगे चापि' इत्यनेन स्थानेयोगपक्षोऽप्यत्र स्थित इति प्रतिभाति, तन्निराकुर्वन्नाह — **षाष्ठिकं द्विर्वचनमिति।** ततश्च प्रौढ्याभ्युपगम्यवादोऽयम्। 'प्रकृतितोऽनेन स्वरः' इति भाष्ये निगदितं पक्षं विशदयति — **ततश्चेति।** ननु तिप्थमिबादेशानामकाररूपत्वात् कस्यात्र शित्त्वं कर्तव्यमित्यत्राह — [8]**'यस्थस्येति। अकारद्वयेति।** कृते त्वादेशे पररूपेणैकाकारो भविष्यतीति भावः ॥

---

[1] भाष्ये 'द्विः प्रयोगे चापि' इत्यत्र 'द्विः प्रयोगे खल्वपि' इति निर्णयसागरमुद्रिते पाठः।
[2] पा. सू. ६.१.१५८.
[3] पा. सू. ६.१.९७.
[4] पा. सू. १.१.५५.
[5] पा. सू. १.१.२१.
[6] पा. सू. ६.१.१६२. अन्त इत्यनुवृत्तिलभ्यम्।
[7] प्रकृतशब्देनात्र घञ्प्रत्ययान्तं — ङ.
[8] प्रदीपे 'यस्थस्य स्थाने' इति भाष्यम्। 'यस्य स्थाने' इति मुद्रितेषूपलभ्यते।

लोटो लङ्वत् ३.४.८५.

[३, ४०८–४०९]

(उद्द्योतनम्) नन्वडाटोः प्रतिषेधः कथं नोक्तः, अत आह — **लोट इति**। उत्वस्य कथं [1]जुस्बाधकत्वम्, अत आह — **नाप्राप्त इति**। **तस्य** लङ्वद्भावस्य॥

[३, ४०८–४०९]

(रत्नप्रकाशः) लोट इत्युपमेये षष्ठीदर्शनात् लङ इव लङ्वदिति षष्ठ्यन्ताद्वतिरिति लङो यत् कार्यं तल्लोटोऽतिदिश्यते, न तु लङि परे यत् कार्यमट् आट् च, तत्। जुस् तु लङ एव कार्यमिति तस्यातिदेशप्रसक्तावाह — **लङ्वदतिदेश इति**। **लङः शाकटायनस्यैति**। [2]'सिजभ्यस्तविदिभ्यश्च' इति जुस उपलक्षणमेतत्। 'विदन्तु, बोभुवतु' इत्यत्र हि स प्राप्नोति। **उत्वमत्र बाधकमिति**। जुसि प्राप्ते उत्वमारब्धमित्येतावतोत्वं जुसोऽपवाद इति मन्यते। **अत्रापीकारलोप इति**। अपचदित्यादौ तस्य लङादेशत्वेन दर्शनादिति भावः। [3]**नाप्राप्त इकारलोप इति**। 'यान्तु, वान्तु, विदन्तु, बोभुवतु' इत्यादावपि हीकारलोपः प्राप्नोति। **प्राप्ते चाप्राप्ते चेति**। 'यान्तु, वान्तु' इत्यादौ प्राप्ते, 'यातु, वातु, [4]पचतु' इत्यादावप्राप्त इति भावः। अपवादत्वं तस्याभ्युपेत्यापि समाधातुं शक्यत इति प्रौढ्याह — **अथवेति**। **वक्ष्यतीति**। [5]'आतः' इति सूत्र इति शेषः। **लङेव यो लङिति**। यद्यपि प्रकृतसूत्रेण लोटो लङ इव कार्यमतिदिश्यते, न तु व्यपदेशः, अडाटोर्दोषात्। तथापि शङ्कित्रा यथोत्वं जुसोऽपवाद इति स्वीकृत्य परिहार उक्तस्तथास्य व्यपदेशातिदेशत्वमभ्युपगम्य समाधीयत इत्याशयेनैवमुक्तम्। अभिमतं तु लङ एव भवतु, न त्वलङो लोटोऽतिदेशेनेत्येवमर्थं तत्र लङ्ग्रहणमिति ज्ञेयम्। [6]'सामान्यातिदेशे विशेषानतिदेशः' इत्यनेन तु व्यापकेन [7]'सिजभ्यस्तविदिभ्यश्च' इति जुसपि वार्यत इति सर्वमनवद्यम्॥

[३, ४०८–४०९]

(नारायणीयम्) ननु लोटो लङ्वद्भावे सत्यडाटावपि स्याताम्। यद्वा लङ्याहत्य विधानात् तयोरेवातिदेशो युक्त इत्याशङ्क्याह — **लोट इति**। **इत्युपमेयेति**। उपमानोपमेययोरेकविभक्तित्वनियमात्। [8]ननूत्ववचने सत्यपि लङ्वद्भावाज्जुस्भावः प्राप्नोत्येवेत्यत्राह — **नाप्राप्त इति**॥

सेर्ह्यपिच्च ३.४.८७. मेर्निः ३.४.८९.

[३, ४०९]

(उद्द्योतनम्) ननूभयोरपि मात्रिकत्वात् कथमुकारस्य लघुत्वम्, अत आह — **उकारे सतीति**॥

---

[1] जुस्साधकत्वम् — अ, ऋ, लृ.
[2] पा. सू. ३.४.१०९.
[3] भाष्ये 'न नाप्राप्त इकारलोपे' इति दृश्यते।
[4] पचन्त्वित्यादौ — ब.
[5] पा. सू. ३.४.११०.
[6] परिभाषा ११०.
[7] पा. सू. ३.४.१०९.
[8] ननूक्तवचने — ङ.

[३, ४०९]

(**रत्नप्रकाशः**) नन्विकारोच्चारणस्योकारोच्चारणाद् गौरवाभावात् कथं तदुच्चारणस्य सामर्थ्यमित्यत आह — **अलघीय इति**। गरीय इत्यर्थः। स्वार्थे ईयसुन्। इकारोच्चारणे हि [१]'एरुः' इति सूत्रेणोत्वे कृते सति रूपसिद्धिः, उकारोच्चारणे तु तावतैव रूपसिद्धिरिति प्रक्रियाद्वारकमिकारोच्चारणस्य गौरवमिति भावः॥

[३, ४०९]

(**नारायणीयम्**) नन्विकारोकारयोरुच्चारणे मात्रातो विशेषाभावे सत्युकारोच्चारणस्य सामर्थ्यं कथमुपपद्यत इत्याशङ्क्य भाष्येऽभिसंहितं प्रक्रियागौरवं दर्शयन्नलघीयस्त्वोक्तिं संगमयति — **उकारे सतीति**॥

एत ऐ ३.४.९३.

[३, ४०९]

(**रत्नप्रकाशः**) **आड्गुणस्य प्रतिषेध इति**। [२]अन्तवद्भावात् स्थानिवद्भावाद्वा तस्य लोट्त्वात् प्राप्तिरैत्वस्य॥

लिङः सीयुट् ३.४.१०२.

[३, ४१०–४११]

(**उद्द्योतनम्**) ननु यासुटः सीयुडपवादत्वात् कथं [३]तदादेस्तत्प्रसङ्गः, अत आह — **यथैवेति**। अन्यथा सुडपि सीयुटो बाधकः स्यादित्यर्थः। **सुटि कृत इति**। तकारथकारादेर्लिङः [४]सुडिति मत्वा दृष्टान्तोपन्यासः। अविरोधेऽपि तक्रन्यायेन बाधक इत्याह — **विनापीति**। **भाष्ये सुट्तिथोरिति**। सुडपि सीयुटो बाधकः स्यादित्यर्थः। ननु [५]'तिथोः' इति षष्ठीपक्षेऽनादेरपि भविष्यति, किं वचनेन, अत आह — **तिथोरिति**। ननु द्वितीयस्यैवायं परिहारः, न पूर्वस्य, अत आह — [६]**अनेन चोद्यद्वयमिति**। आद्यस्य परिहारं तावदाह — **सुट इति**। द्वितीयस्याह — **तिथोरिति**॥

[३, ४१०–४११]

(**रत्नप्रकाशः**) [७]'अस्ति च संभवो यदुभयं स्यात्' इति न्यायेन यासुटः सीयुडपवादत्वाभावं मत्वा

---

[१] पा. सू. ३.४.८६.
[२] आदिवद्भावात् — प, ब.
[३] यासुडादेः सीयुट्प्रसङ्ग इत्यर्थः।
[४] सीयुडिति — अ, ऋ, लृ.
[५] पा. सू. ३.४.१०७.
[६] प्रदीपे 'न वेति' इति प्रतीकानन्तरं 'चोद्यद्वयमपि' इति दृश्यते। 'अनेन चोद्यद्वयमपि' इत्यन्नंभट्टपाठः।
[७] महाभाष्यम् ६.१.२.

परस्मिन् यासुटि कृते पुनःप्रसङ्गविज्ञानेन [1]सीयुडपि स्यादिति तस्य प्रतिषेधमाह — **यासुडादेरिति**। परिहरति — **न वेति**। **वाक्यापकर्षादिति**। वाक्यस्य **अपकर्षात्** बाधादित्यर्थः। [2]सत्यपि संभवे सामान्यवाक्यस्य विशेषवाक्येन बाधादिति फलितम्। इदानीं [3]'सुट् तिथोः' इति सूत्रस्य तकारथकारादेर्लिङः सुडित्यर्थकतामाश्रित्य यासुटेव सुटापि सीयुटो बाधः स्यादित्याशयेन शङ्कते — **सुट् तिथोरिति**। **कृषीष्टेति**। 'भूयात्, भूयास्ताम्' इत्यादौ यासुटोऽपि सुटा बाधः स्यादित्येतदुपलक्षणं ज्ञेयमिदम्। **अनादेश्चेति**। अतकारथकारादेर्लिङ इत्यर्थः। परिहरति — **न वेति**। **तकारथकारयोः सुडिति**। तथा च सुटो भिन्नविषयत्वात् सीयुड्यासुड्बाधकत्वं न युज्यते। अनाद्योरपि तकारथकारयोर्लिङवयवत्वाविशेषात् सुट् स्यादिति सर्वमनवद्यमिति भावः॥

[३, ४१०–४११]

(नारायणीयम्) ननु यासुड् विशेषविहितत्वात् सीयुटं बाधत इति कथं यासुडादेः सीयुट्प्राप्तिरित्यत आह — **यथैवेति**। तकारथकारादेर्लिङः सीयुडित्याशयेन दृष्टान्तोपन्यासः। 'वाक्यापकर्षात्' इत्यस्य हेतोरसिद्धिमाशङ्क्याप्रतिपत्तिमपनयन् व्याचष्टे — **लिङः सीयुडित्यस्येति**। पूर्ववादिनोक्तां युक्तिं निरस्यति — **विनापीति**। [भाष्ये] **सुटोऽपीदानीं तिथोरपकर्ष इति**। कर्तृषष्ठी। ननु लिङ्संबन्धिनोस्तकारथकारयोः सुड् विधीयमानोऽनादेरपि सिध्यतीति किं वचनेनेत्यत आह — **तिथोरिति सप्तमीमिति**। लिङ इति षष्ठ्यन्तं प्रकृतं सप्तम्यन्तत्वेन विपरिणम्यते, तद्विशेषणं तिथोरिति। ततश्च [4]'यस्मिन् विधिस्तदादौ' इति वचनेन तदादिविधिरित्याह — **ततस्तदादीति**। **लिङादेशस्येति**। अनेनागमिनोऽधिकरणत्वविवक्षया सप्तमीति दर्शयति। प्रथमस्य चोद्यस्य परिहारं दर्शयति — **सुटस्तकारेति**। द्वितीयस्याह — **तिथोरिति चेति**॥

यासुट् परस्मैपदेषूदात्तो ङिच्च ३.४.१०३.

[३, ४११]

(रत्नप्रकाशः) यासुटो ङित्त्वमिति। यासुटः संनियोगेन लिङो ङित्त्वमित्यर्थः। लिङ एव हि ङित्त्वमपेक्षितम्, [5]'क्ङिति प्रतिषेधे तन्निमित्तग्रहणम्' इति वार्तिकस्वरसात्। **पिदर्थमेवेति**। [6]'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वे प्राप्ते आद्युदात्तता [7]तेषां यथा स्यादित्येवमर्थमित्यर्थः। **आगमानुदात्तार्थं वेति**। प्रत्ययसंज्ञासंनियोगेनान्तरङ्गे आद्युदात्तत्वे कृते ततो यासुटि तस्य वर्ज्यमानस्वरेणानुदात्तत्वे प्राप्ते उदात्तविधानं सफलमिति भावः। **ज्ञापयत्याचार्य इति**। 'ञ्नित्यादिर्नित्यम्' 'प्रत्ययः' इति सूत्रन्यासे कृते [8]'अन्तरङ्गानपि विधीन्' इति न्यायेन यासुटि सति ततः प्रत्ययाद्युदात्तत्वेनेष्टसिद्धौ व्यर्थमुदात्तवचनं सत् आगमानामनुदात्तताफलकमसिद्धत्वं ज्ञापयति प्रत्ययाद्युदात्ते कर्तव्य इति भावः॥

---

[1] सुडपि — ब.

[2] 'सत्यपि' इत्यतः प्राक् 'अर्थयोः' इत्यधिकम् — ब.

[3] पा. सू. ३.४.१०७.

[4] का. वा. १.१.७२–२९.

[5] का. वा. १.१.५–१.

[6] पा. सू. ३.१.४.

[7] पितामित्यर्थः।

[8] 'अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' इति 'न बहुव्रीहौ' इति सूत्रभाष्यानुसारेणेदमुक्तमिति बोध्यम्।

आतः ३.४.११०.

[३, ४१२–४१४]

(उद्द्योतनम्) आकारान्तादेव सिचः परस्य झेर्जुस्, इत्युक्ते 'अकार्षुः' इत्यत्र न[1] प्राप्नोतीत्याह — **अत्रेति**। आकारान्ताद्विहितत्वं परत्वं वा सिचो विशेषणम्। उभयथाप्यत्र न प्राप्नोति। सिज्लुग्ग्रहणे तु सिचो लुक्यादन्तादेवेति नियमात् 'अकार्षुः' इत्यत्र सिज्लुगभावात् जुस् सिध्यतीति भावः। पूर्वसूत्रे सिज्ग्रहणसामर्थ्यादत्र जुस् भविष्यतीति शङ्कते — **नन्विति**। [2]**असुरिति**। 'षो अन्तकर्मणि'। अत्र [3]'विभाषा घ्रा' इति सिचो लुक्। **अस्थुरिति**। [4]'गातिस्था' इति सिचो लुक्। अत्र प्रत्ययलक्षणेन सिचः परस्य झेर्जुसर्थं पूर्वसूत्रे सिज्ग्रहणमित्यर्थः। नन्वातः सिजन्तादेवेति नियमात् 'असुः' इत्यादावप्यवकाशासंभवः, अत आह — **विषयेति**। पूर्वसूत्रे सिज्ग्रहणसामर्थ्यात् 'अकार्षुः' इत्यत्र भवति 'अभूवन्' इत्यत्र न भवतीति व्यवस्था न संभवति, अनेन नियमेन 'अकार्षुः' इत्यत्रेव 'अभूवन्' इत्यत्रापि [5]व्यावर्त्यभावादित्यर्थः। **यद्येवमिति**। पूर्वसूत्रे सिज्ग्रहणस्य प्रयोजनाभावे लाघवायात्रैव तद्ग्रहणं युक्तमित्यर्थः। **नैतदिति**। अत्र सिज्ग्रहणे संनियोगशिष्टत्वादात इत्यस्यानुवृत्तौ सिचोऽप्यनुवृत्तिः स्यादित्यर्थः। सिच इत्युक्तेऽपि स्वरितत्वमात इत्यस्यैव, न तु सिच इति तस्य नानुवृत्तिः, लङ इत्युक्तेश्च, अत आह — **अथवेति**। पूर्वेण प्राप्तावनेन नियमः संभवतीत्यर्थः। नियमस्य प्रयोजनमाह — **अस्य हीति**। आतो विहितादेव सिचः परस्य झेर्जुस् इति नियमे, शाकटायनस्यैव आतः परस्य झेर्जुस् [6]इत्येव ङित इत्यनुवृत्त्या लङ एव जुस् भविष्यतीति लङो ग्रहणं व्यर्थमित्यर्थः। विधिपक्षे तु लङ इति वक्तव्यम्, अन्यथा [7]लुङोऽपि विकल्पप्रसङ्गादिति भावः। विधिपक्षे एवकारोपयोगः, न नियमपक्ष इत्येतदुपपादयति — **यदेति**। विपरीतनियमेऽनिष्टमाह — **लङः एवेति**। भाष्ये **लङ्ग्रहणं चेति**। 'आतः शाकटायनस्य' इत्युक्ते लुङ्यपि विकल्पः स्यादिति भावः। सिचो लुकि प्रत्ययलक्षणेनोभयानन्तर्यं संभवति नान्यथेति सिज्लुक्यादन्तादेव झेर्जुस् इति नियमपर्यवसानात् 'अकार्षुः, अभूवन्' इत्यत्र नाप्रसङ्गातिप्रसङ्गाविति भावः। आर्धधातुक[8]संज्ञापरिहाराय विकरणो न स्यात्, अत आह — **आर्धधातुकसंज्ञेति**॥

[३, ४१२–४१४]

(रत्नप्रकाशः) ततो नियमार्थमिति। सिचः परस्य झेर्जुस् चेद् भवति तर्ह्यातः परो यः सिच् ततः परस्यैवेत्येवंरूपः, स्थानिवद्भावेन सिचः परत्वे, वास्तविके च धातोः परत्वे सति झेर्जुस् चेत् स्यात् तर्हि वास्तविकाकारात्परत्वे सत्येवेत्येवंरूपो वा नियम इति भावः। **ततः प्रापकमिति**। अयुः, अवुः, इत्यादौ लङो झेर्जुस्भावस्येति शेषः। आतः परस्य ङितो झेर्जुस् स्यादिति हि सूत्रा-

---

[1] न प्राप्नोतीत्यत्राह — अ.

[2] प्रदीपे 'अगुः, अस्थुः, इत्यादेः' इत्यत्र 'असुः, अस्थुः, इत्यादेः' इति पाठोऽन्नंभट्टस्येति प्रतीयते।

[3] पा. सू. २.४.७८.

[4] पा. सू. २.४.७७.

[5] व्यावर्त्यस्य सत्त्वादित्यर्थः॥ व्यावर्त्याभावादित्यर्थः — अ.

[6] इति नियम एव ङितः — अ, ऋ, लृ.

[7] लुकोऽपि — अ, ऋ, लृ.

[8] संज्ञावैयर्थ्यपरिहारायेत्यर्थः।

र्थस्तदा स्यात्। उक्तनियमद्वयमध्ये आद्यं नियममादायाह — **सिज्लुग्ग्रहणमिति**। 'सिचः' इत्यनुवृत्तेरभ्युपगतत्वेन लुकीत्येतावदेवाधिकं कर्तव्यमित्यापाद्यते। सिज्लुगन्तादिति वक्तव्यम्। सिज्लुगन्तात्परस्य जुस् चेद् आदन्तादेवेति नियमफलकतया 'लुकि' इत्यधिकं वक्तव्यमिति भावः। **अकार्षुरिति**। अत्र सिच आतः परत्वाभावाज्जुस् न स्यादिति भावः। **प्रत्ययलक्षणस्येति**। स्थानिवद्भावेन यः सिच् प्रत्ययसंज्ञकस्तन्निमित्तस्य जुस इत्यर्थः। **एवकारकरणं चेति**। प्रकृतसूत्रस्य प्रापकत्वपक्षे हि [1]'लङः शाकटायनस्य' इति सूत्रं नियमार्थमिति तत्रैवकारः पठनीयः। प्रकृतसूत्रस्य नियमार्थतापक्षे तु [2]'लङः शाकटायनस्य' इति सूत्रं विध्यर्थं भवतीत्येवकारो व्यर्थ इति भावः। [3]**अदुरयुरिति**। लुङि [4]'गातिस्था' इति सिचो लुकि [5]पररूपे रूपमिदम्। **लङ्ग्रहणं चेति**। लुङो [6]व्यावृत्त्यर्थं लङ्ग्रहणं कर्तव्यमिति भावः। **न चान्य आकारादनन्तर इति**। अप्राप्तजुस्क इति शेषः। तेन लुङः प्राप्तजुस्कस्य सत्त्वेऽपि न दोषः। तदेवं प्रकृतसूत्रस्याद्यनियमपक्षे प्रापकत्वपक्षे च दूषिते द्वितीयनियमपरतामङ्गीकरोति — **अस्तु तर्हीति**। तदाशयं जिज्ञासुराह — **ननु चेति**। इतरः स्वाशयमाह — **तुल्यजातीयस्येति**। प्रकृतसूत्रे निर्दिश्यमानतुल्यजातीयो यस्तस्य **नियमः** निवृत्तिरित्यर्थः। **कश्च तुल्यजातीय इति**। यस्य नियम इष्टस्तत्तुल्यजातीयोऽत्र को वा निर्दिष्ट इत्यर्थः। उत्तरमाह — **यो द्वाभ्यामिति**। आदन्ताद् धातोः सिचश्च परो झिः स्थानित्वेन निर्दिष्ट इत्यर्थः। तथा च तत्तुल्यजातीयोऽनाकारान्तधातोः सिचश्च पर एव जुस् भवति 'अभूवन्' इति, न तु 'अकार्षुः' इत्यादौ केवलसिचः पर इति न तस्य नियम इति भावः। ननु नियमपक्षपरिग्रहे उत्तरसूत्रे एवकारो व्यर्थ एव स्यादित्याशयेनाह — **अथेति**। न व्यर्थः स इत्याशयेनोत्तरमाह — **कर्तव्यं चेति**। चकारान्न कर्तव्यमित्यर्थः समुच्चीयते। उत्तरसूत्रे [7]लुङर्थं न कर्तव्यम्, [8]'लिट् च' इत्यादावनुवृत्त्यर्थं तु कर्तव्यमिति भावः। ननु तर्हि 'लिट् चैव' इत्येव कुतो न सूत्रितमिति चेन्न, लिडादेशतिङेवार्धधातुकसंज्ञश्चेति विपरीतनियमापत्तेः। तद्व्यावर्त्या हि तिङन्तरस्य स्थानिवद्भावप्रयुक्तार्धधातुकसंज्ञा स्यात्। उत्तरसूत्रे एवकारे त्वार्धधातुकशब्देन सह "लिट् च' इत्यादौ सोऽनुवर्तमान आर्धधातुकशब्देनैव संबध्यत इतीष्टसिद्धिर्भवति। ननु [9]'आर्धधातुकं शेषः' इति शेषग्रहणसामर्थ्यात् तिङन्तरस्यातिदेशिकमार्धधातुकत्वं न भवतीति विपरीतनियमासंभवात् 'लिट् चैव' इत्येव सूत्रयितुं युक्तमिति चेत्, सत्यम्, शेषग्रहणं विनापि निर्वाहो भवतीति सूचनार्थमुत्तरसूत्र एवैवकारो निर्दिष्ट इति संतोष्टव्यम्। ननु शेषग्रहणं विना निर्वाहः कथं भवतीति चेच्छृणु, **आर्धधातुकम्**। धातोर्यो विहितः स आर्धधातुकसंज्ञः स्यात्। **लिट् च**। लिडादेशस्तिङेवार्धधातुकसंज्ञः स्यात्। **लिङाशिषि**। आशिषि लिङस्तिङेवार्धधातुकसंज्ञः स्यात्। **तिङ्शित् सार्वधातुकम्**। तिङः शितश्च धातोरिति विहिताः सार्वधातुकसंज्ञाः स्युः। **छन्दस्युभयथा**। धातोरिति विहिताः प्रत्यया आर्धधातुकसंज्ञाः सार्वधातुकसंज्ञाश्च स्युरिति सूत्रन्यासतद्व्याख्यानाभ्यामिति गृहाण। अस्मिन् पक्षे हि लिडादेशतिङेव, आशीर्लिङादेशतिङेवेति नियमेन तिङन्तरस्यार्धधातुकत्वं व्यावर्त्यते। ननु लिडादेशतिङेवेत्यादिरूपे नियमेऽङ्गीक्रियमाणे लिडादेशतिङादेः सार्वधातुकसंज्ञा न वारिता स्यादिति चेन्न, लिडादेशस्ति-

---

[1] पा. सू. ३.४.१११.

[2] पा. सू. ३.४.१११.

[3] भाष्ये 'अदुः, अपुः' इत्यत्र 'अदुः, अयुः' इति निर्णयसागरमुद्रिते पाठः।

[4] पा. सू. २.४.७७.

[5] उस्यपदान्तादितीत्यादिः।

[6] जुसर्थं — प.

[7] पा. सू. ३.४.११५.

[8] पा. सू. ३.४.११५.

[9] पा. सू. ३.४.११४.

ङार्धधातुकसंज्ञ एव स्यादित्यादिद्वितीयनियमपरताया अपि तयोः सूत्रयोरभ्युपगमात्। न चैकस्य वाक्यस्य नियमद्वयपरता न युज्यत इति वाच्यम्, एकस्यापि वाक्यस्यानेकनियमपरतायाः [1]'ब्रह्म-भ्रूणवृत्रेषु क्विप्' इत्यादौ भाष्यकारादिसंमतत्वात्। सिद्धे सत्यारम्भस्य नियमार्थत्वेन विधि-मुखेन प्रवृत्ते नियमे विनिगमनाविरहेणानेकनियमफलसंभवाच्च। नन्वेवं तर्ह्येवकारमन्तरेणैव नियमद्वयस्य सिद्धत्वेन तत्रानुवृत्त्यर्थमेवकारकरणमिति भाष्यं कथं युज्यत इति चेन्न, नियमपक्षे एवकारोऽपेक्षित इत्येतत्प्रसङ्गमात्रेण [2]'लिट् च' इत्यादिसूत्रयोर्नियमसूत्रतानिश्चयेन तत्रानुवृत्त्यर्थ एवकार इत्युक्तत्वेन व्यर्थस्तत्रैवकार इत्यत्रैव भगवतस्तात्पर्यात्। ननु तद्भाष्यस्य सत्येव शेष-ग्रहणे प्रवृत्तत्वेन शेषग्रहणेन चातिदेशिक्या अप्यार्धधातुकसंज्ञाया व्यावर्तितत्वेन [3]'लिट् च' इत्यादि-सूत्रद्वयं विध्यर्थमेव संपद्यते। विधिसूत्रे चैवकारो व्यर्थ इति तद्भाष्यानुपपत्तिस्तदवस्थैवेति चेन्न, [4]'न ह्याचार्याः सूत्राणि कृत्वा निवर्तयन्ति' इति न्यायेन [5]'तिङ्शित्सार्वधातुकम्' इति सूत्रस्यादौ कृतस्य विशेषसूत्रत्वात् तदनन्तरता [6]'आर्धधातुकम्' इति सामान्यसूत्रस्य न युज्यत इति दोषपरि-हारमात्रफलकतया निर्दिष्टस्य शेषपदस्यौपदेशिकार्धधातुकसंज्ञामात्रव्यावर्तकत्वेनातिदेशिकार्धधातुक-संज्ञामादाय 'लिट् च' इति सूत्रद्वयस्य नियमपरताया एवौचित्यात्। **इतरथा हीति**। [7]'लिट् च' इत्यादिनियमसूत्रद्वयाभावे हीत्यर्थः। **वचनादिति**। [8]'स्थानिवदादेशः' इति वचनादित्यर्थः। ननु 'इतरथा हि' इति भाष्यस्य 'एवकारस्याननुवृत्तौ हि' इत्यर्थ उचितः, एवकारप्रयोजनप्रस्तावात्। 'वचनात्' इत्यस्य तु [9]'लिट् च, [10]'लिङाशिषि' इति सूत्रद्वयादित्यर्थ इति चेन्न, [11]'लिट् च' इत्यादिसूत्रद्वयस्य विधिपरत्वे संभवति तस्यैवकारसंबन्धमात्रेण नियमपरत्वासंभवात्। यद्युच्येत —एवकारानुवृत्तिबलेन वाक्यभेदमङ्गीकृत्याद्यवाक्येनार्धधातुकसंज्ञा विधीयते। द्वितीयवाक्येन तु नियमपरेण सार्वधातुकसंज्ञा व्यावर्त्यते, इति। तदपि न, एतादृशकुसृष्टयपेक्षया मद्वर्णित-रीत्या शेषग्रहणस्यौपदेशिकार्धधातुकसंज्ञाव्यावृत्तिमात्रफलकत्वाभ्युपगमेनैव भाष्योपपादनस्योचित-त्वात्। **लङेव यो लङिति**। व्याख्यातमिदं [12]'लोटो लङ्वत्' इति सूत्रे॥

[३, ४१२–४१४]

(नारायणीयम्) आतः सिजन्तादित्यासत्त्या 'आत एव सिजन्ताज्जुस्, नान्यस्मात्' इति नियमे सति 'अकार्षुः' इत्यादौ जुस् न स्यादिति भाष्यार्थं दर्शयति—**अत्र नाकारान्तादिति**। विहितविशेषणत्वे परत्वे चेष्टं न सिध्यतीत्यर्थः। **अगुरस्थुरित्यादेरिति**। तत्र प्रत्ययलक्षणेन सिजन्तत्वात्। नियमेन तु यत्र सिचः श्रूयमाणत्वं तत्रैव व्यावृत्तिः क्रियते। **विषयविभागश्चेति**। सर्वत्र नियमेन निवृत्तिप्रसङ्गात्। **यद्येवमिति**। यद्यगुरित्यादिः सिज्ग्रहणस्यावकाशस्तदा 'आतः सिचः' इति विध्यर्थो योगः कर्तव्यः। आतः सिचश्चानन्तरस्य झेर्जुस् भवति। तत्र द्वाभ्यामा-नन्तर्यस्यासंभवात् सामर्थ्यासिज्लुगन्तादेव झेर्जुसित्युक्तं भवति। **उत्तरत्रात इत्यस्येति**। अन्यथा

---

[1] पा. सू. ३.२.८७.
[2] पा. सू. ३.४.११५.
[3] पा. सू. ३.४.११५.
[4] महाभाष्ये पस्पशाह्निके व्याकरणपदार्थ-विचारावसर इदमुक्तम्।
[5] पा. सू. ३.४.११३.
[6] पा. सू. ३.४.११४.
[7] पा. सू. ३.४.११५.
[8] पा. सू. १.१.५६.
[9] पा. सू. ३.४.११५.
[10] पा. सू. ३.४.११६.
[11] पा. सू. ३.४.११५.
[12] पा. सू. ३.४.८५.

सिच इत्यस्याप्यनुवृत्तिराशङ्क्येत। नन्वेवमपि स्वरितलिङ्गासङ्गात् 'आतः' इत्येवानुवर्तिष्यते, न तु सिच इति। अतस्तदर्थो योगविभागो मन्दफल इति पूर्वत्रापरितोषात् पक्षान्तरमाह— [**अथवेति**।] ननु विध्यर्थत्वे नियमार्थत्वे वा [1]कंचिद्विशेषं न पश्याम इत्यत्राह— [**अस्य हीति**।] आत इत्यस्य विध्यर्थत्वे सत्येवकारस्य कर्तव्यतां दर्शयति— **यदा सिज्ग्रहणमिति**। नियमार्थत्वे तदकरणप्रकारं स्फोरयति— **यदा त्विति**। **लङः शाकटायनस्यैति**। शाकटायनस्य मतेन जुसो विधानम्, अन्येषां मते तदप्रवृत्तेरयमर्थः सिद्ध एव। 'लङ एव' इति नियमे नित्यविकल्पयोर्वैपरीत्यं [2]स्यादित्याह— **लङ एवेति**। तुल्यजातीयस्य नियमे सतीष्टसिद्धिप्रकारमाह — **सिज्लुकं विनेति**। सिज्लुकि तु सति प्रत्ययलक्षणेन सिचः, श्रुत्या चात इति झिर्द्वाभ्यामनन्तरो भवति। **सिज्लुगन्तमेवेति**। ततश्चाभूवन्नित्यादौ प्रत्ययलक्षणेन जुस् न भवति। ननु [3]'तिङशित् सार्वधातुकम्' इति सामान्येन विहिता सार्वधातुकसंज्ञा [4]'लिङाशिषि' इति विहितार्धधातुकसंज्ञया बाध्यत इत्युत्तरार्थ एवकारो न कर्तव्य इत्यत आह— **अन्यथेति**। **संज्ञासमावेशस्य दृष्टत्वादिति**। विरोधाभावाद् बाध्यबाधकभावाभावात्। यथा[कृत्]कृत्यप्रत्ययसंज्ञानां समावेशो भवति, तथात्रापि स्यादित्यर्थः। समावेशे को दोष इत्यत्राह— **तत इति**॥

आर्धधातुकं शेषः ३.४.११४.

[३, ४१४–४१५]

(उद्द्योतनम्) अनुक्रान्तेति निष्ठया तद्धितव्यावृत्तिरित्याह— **अनुक्रान्ता इति**। 'श्रीकाम्यति' इत्यत्रापि धातोर्विहितत्वमस्ति, अतः 'संकीर्त्य धातोः' इति भाष्यम्। तद् व्याचष्टे— **धातोरित्येवमिति**॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावतंसश्रीमत्तिरुमलार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने तृतीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्

पादश्च समाप्तः। अध्यायश्च।

[३, ४१४–४१५]

(रत्नप्रकाशः) प्राग्लादेशाद् धात्वधिकार इति मतमवलम्ब्याह— **आर्धधातुकसंज्ञायामिति**। **अनुक्रान्तेति**। [5]'गुप्तिज्किद्भ्यः' इत्यारभ्यानुक्रान्ता ये प्रत्ययास्तेषु ये तिङशिद्भिन्नास्तेषामार्धधातुकसंज्ञा विधीयत इति नोक्तातिप्रसङ्ग इति भावः। सुपो ह्यनुक्रंस्यमाना भवन्ति, न त्वनुक्रान्ताः। **धातोरेकाच इति**। 'धातोरिति' इत्येव पाठः साधुः, तस्मिन्नेव सूत्रे 'प्राग्लादेशात्' इति पक्षस्य 'आतृतीयसमाप्तेः' इति पक्षस्य च भाष्ये व्यवस्थापितत्वात्। 'एकाचो हलादेः'

---

[1] कथंचिद्विशेषं — ङ.
[2] स्यादित्यत आह — ड.
[3] पा. सू. ३.४.११३.
[4] पा. सू. ३.४.११६.
[5] पा. सू. ३.१.५.

इति तु केनचित् प्रक्रियानुसारेण प्रक्षिप्तम्। **तद्विधानात्सिद्धमिति।** **तत्** श्रीकाम्यतीत्यादावतिप्रसङ्गवारणं विधानाश्रयणात् सिद्धमित्यर्थः। विहितविशेषणाश्रयणेऽपि स दोषस्तदवस्थ इत्याशयेनाह — **धातोरेष विहित इति।** परिहरति — **संकीर्त्य धातोरित्येवमिति।** धातोरिति शब्दमुच्चार्येत्यर्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्य-
श्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
तृतीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्।
पादोऽध्यायश्च समाप्तः॥

[३, ४१४–४१५]

(नारायणीयम्) न त्वनुक्रंस्यमाना इति। ततश्च लूभ्यामित्यादौ वक्ष्यमाणेषु स्वादिष्वतिप्रसङ्गो न भवतीत्यर्थः। **धातुशब्दमुच्चार्येति।** श्रीकाम्यतीत्यादौ सुप इत्युच्चार्य विधानादार्धधातुकसंज्ञा न भविष्यतीति सिद्धमिष्टमिति॥

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे
तृतीयस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्

॥ पादश्चाध्यायश्च समाप्तः[1] ॥

---

[1] 'समाप्तः' इत्यस्यानन्तरं 'संवत् १६५४ समये माल्ववदि ५. ग्रन्थसंख्या शत १२ टीक [?] सर्वसहस्र ५००.
दन्तावलिर्विगलिता गलितं शरीरं केशाश्च फेनधवला न हि मे विषादः।
एताः सरोजनयनाः सरसास्तरुण्यस्तातेति भाषणपरा इति मे विषादः॥'
इत्यस्ति — ङ.

आकरग्रन्थानां सूची

ऋ. सं. — ऋक्संहिता
का. वा.— कात्यायनवार्तिकम्
चौ. — चौखाम्बामुद्रितं महाभाष्यं नवाह्निकपर्यन्तं प्रदीपोद्द्योतसहितम्, उपरि प्रदीप-मात्रसहितम्
तै. आ. — तैत्तिरीयारण्यकम्
तै. ब्रा. — तैत्तिरीयब्राह्मणम्
तै. सं. — तैत्तिरीयसंहिता
नि. — निर्णयसागरमुद्रितं महाभाष्यं प्रदीपोद्द्योतसहितम्
परिभाषा. — परिभाषेन्दुशेखरः चौखाम्बा. १९४३ विद्याविलासमुद्रितः
पा. शि. — पाणिनीयशिक्षा
पा. सू. — पाणिनिसूत्रम्
पू. — पुण्यपत्तन (पूना) प्रकाशितं महाभाष्यम् F. Kielhorn महाशयशोधितम्.
प्रवर्तकीयम् — प्रवर्तकोपाध्यायकृतमहाभाष्यप्रदीपप्रकाशः आस्माकीनकोशालये T. No.99 अङ्कितः
रामायणम् — मद्रपुरी ला-जर्नल्-मुद्रणालये मुद्रितम्
लौ. न्या. — लौकिकन्यायाञ्जलिः
लौ. न्या. साहस्री — (भुवनेश) लौकिकन्यायसाहस्री
श. कौ. — शब्दकौस्तुभः
श्लो. वा. — श्लोकवार्तिकं महाभाष्यस्थम्
ह. — हरयाणासाहित्यसंस्थानप्रकाशितं प्रदीपोद्द्योतसहितं महाभाष्यम्

तृतीयाध्यायप्रथमपादादिचतुर्थपादान्तविषयसूचिका

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१.	प्रत्ययः ३.१.१.	...	१
२.	परश्च ३.१.२.	...	१५
३.	आद्युदात्तश्च ३.१.३.	...	२३
४.	गुप्तिज्किद्भ्यः सन् ३.१.५.	...	३१
५.	मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ३.१.६.	...	३२
६.	धातोः कर्मणः समानकर्तृकादिच्छायां वा ३.१.७.	...	३४
७.	सुप आत्मनः क्यच् ३.१.८.	...	५१
८.	काम्यच्च ३.१.९.	...	६१
९.	उपमानादाचारे ३.१.१०.	...	६२
१०.	कर्तुः क्यङ् सलोपश्च ३.१.११.	...	६२
११.	भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ३.१.१२.	...	६४
१२.	लोहितादिडाज्भ्यः क्यष् ३.१.१३.	...	६८
१३.	कष्टाय क्रमणे ३.१.१४.	...	७०
१४.	कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ३.१.१५.	...	७२
१५.	शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३.१.१७.	...	७२
१६.	सुखादिभ्यः कर्तृवेदनायाम् ३.१.१८.	...	७३
१७.	नमोवरिवश्चित्रङः क्यच् ३.१.१९.	...	७३
१८.	मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ३.१.२१.	...	७६
१९.	धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३.१.२२.	...	७८
२०.	नित्यं कौटिल्ये गतौ ३.१.२३.	...	८३
२१.	लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् ३.१.२४.	...	८३
२२.	सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३.१.२५.	...	८४
२३.	हेतुमति च ३.१.२६.	...	८५
२४.	कण्ड्वादिभ्यो यक् ३.१.२७.	...	१०५
२५.	कमेर्णिङ् ३.१.३०.	...	१०८
२६.	आयादय आर्धधातुके वा ३.१.३१.	...	११०
२७.	सनाद्यन्ता धातवः ३.१.३२.	...	११३
२८.	स्यतासी लृलुटोः ३.१.३३.	...	११५
२९.	सिब् बहुलं लेटि ३.१.३४.	...	११७
३०.	इजादेश्च गुरुमतोऽनृच्छः ३.१.३६.	...	१२०
३१.	उषविदजागृभ्योऽन्यतरस्याम् ३.१.३८.	...	१२५
३२.	भीह्रीभृहुवां श्लुवच्च ३.१.३९.	...	१२६
३३.	कृञ् चानुप्रयुज्यते लिटि ३.१.४०.	...	१२७

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
३४.	च्लि लुङि ३.१.४३.	...	१३२
३५.	च्लेः सिच् ३.१.४४.	...	१३८
३६.	शल इगुपधादनिटः क्सः ३.१.४५.	...	१४२
३७.	श्लिष आलिङ्गने ३.१.४६.	...	१४४
३८.	णिश्रिद्रुस्रुभ्यः कर्तरि चङ ३.१.४८.	...	१४५
३९.	अस्यतिवक्तिख्यातिभ्योऽङ ३.१.५२.	...	१४७
४०.	जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ३.१.५८.	...	१४८
४१.	चिण् ते पदः ३.१.६०.	...	१४८
४२.	चिण् भावकर्मणोः ३.१.६६.	...	१४८
४३.	सार्वधातुके यक् ३.१.६७.	...	१४९
४४.	रुधादिभ्यः श्नम् ३.१.७८.	...	१६२
४५.	तनादिकृञ्भ्य उः ३.१.७९.	...	१६४
४६.	धिन्विकृण्व्योर च ३.१.८०.	...	१६५
४७.	हलः श्नः शानज्झौ ३.१.८३.	...	१६६
४८.	छन्दसि शायजपि ३.१.८४.	...	१६७
४९.	लिङ्याशिष्यङ ३.१.८६.	...	१६८
५०.	कर्मवत् कर्मणा तुल्यक्रियः ३.१.८७.	...	१७०
५१.	न दुहस्नुनमां यक्चिणौ ३.१.८९.	...	१८३
५२.	कुषिरजोः प्राचां श्यन् परस्मैपदं च ३.१.९०.	...	१८३
५३.	धातोः ३.१.९१.	...	१८५
५४.	तत्रोपपदं सप्तमीस्थम् ३.१.९२.	...	१९०
५५.	कृदतिङ ३.१.९३.	...	१९५
५६.	वासरूपोऽस्त्रियाम् ३.१.९४.	...	१९८
५७.	कृत्याः ३.१.९५.	...	२०५
५८.	तव्यत्तव्यानीयरः ३.१.९६.	...	२०६
५९.	अचो यत् ३.१.९७.	...	२०७
६०.	अजर्यं संगतम् ३.१.१०५.	...	२०८
६१.	वदः सुपि क्यप् च ३.१.१०६.	...	२१०
६२.	भुवो भावे ३.१.१०७.	...	२११
६३.	हनस्त च ३.१.१०८.	...	२११
६४.	एतिस्तुशास्वृदृजुषः क्यप् ३.१.१०९.	...	२१२
६५.	ई च खनः ३.१.१११.	...	२१३
६६.	भृञोऽसंज्ञायाम् ३.१.११२.	...	२१४
६७.	राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ३.१.११४.	...	२१६
६८.	अमावस्यदन्यतरस्याम् ३.१.१२२.	...	२१६
६९.	छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्या-पृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ३.१.१२३.	...	२१८

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
७०.	ओरावश्यके ३.१.१२५.	...	२१९
७१.	आनाय्योऽनित्ये ३.१.१२७.	...	२२०
७२.	अग्नौ परिचाय्योपचाय्यसमूह्याः ३.१.१३१.	...	२२१
७३.	चित्याग्निचित्ये च ३.१.१३२.	...	२२१
७४.	ण्वुल्तृचौ ३.१.१३३.	...	२२१
७५.	नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३.१.१३४.	...	२२३
७६.	इगुपधज्ञाप्रीकिरः कः ३.१.१३५.	...	२२४
७७.	पाघ्राध्माधेड्दृशः शः ३.१.१३७.	...	२२४
७८.	कर्मण्यण् ३.२.१.	...	२२५
७९.	आतोऽनुपसर्गे कः ३.२.३.	...	२३०
८०.	सुपि स्थः ३.२.४.	...	२३३
८१.	तुन्दशोकयोः परिमृजापनुदोः ३.२.५.	...	२३४
८२.	गापोष्टक् ३.२.८.	...	२३५
८३.	हरतेरनुद्यमनेऽच् ३.२.९.	...	२३६
८४.	शमि धातोः संज्ञायाम् ३.२.१४.	...	२३६
८५.	अधिकरणे शेतेः ३.२.१५.	...	२३७
८६.	चरेष्टः ३.२.१६.	...	२३९
८७.	दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ३.२.२१.	...	२३९
८८.	नासिकास्तनयोर्ध्माधेटोः ३.२.२९.	...	२४०
८९.	आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ३.२.५६.	...	२४०
९०.	कर्तरि भुवः खिष्णुच्खुकञौ ३.२.५७.	...	२४२
९१.	स्पृशोऽनुदके क्विन् ३.२.५८.	...	२४३
९२.	त्यदादिषु दृशोऽनालोचने कञ् च ३.२.६०.	...	२४४
९३.	सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ३.२.६१.	...	२४४
९४.	अदोऽनन्ने ३.२.६८.	...	२४५
९५.	क्रव्ये च ३.२.६९.	...	२४५
९६.	मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ३.२.७१.	...	२४५
९७.	स्थः क च ३.२.७७.	...	२४७
९८.	सुप्यजातौ णिनिस्ताच्छील्ये ३.२.७८.	...	२४८
९९.	व्रते ३.२.८०.	...	२४८
१००.	आत्ममाने खश्च ३.२.८३.	...	२५०
१०१.	भूते ३.२.८४.	...	२५३
१०२.	ब्रह्मभ्रूणवृत्रेषु क्विप् ३.२.८७.	...	२५८
१०३.	कर्मणीनिर्विक्रियः ३.२.९३.	...	२६०
१०४.	अन्येष्वपि दृश्यते ३.२.१०१.	...	२६१

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१०५.	निष्ठा ३.२.१०२.	...	२६१
१०६.	लिटः कानज् वा ३.२.१०६.	...	२६६
१०७.	क्वसुश्च ३.२.१०७.	...	२६६
१०८.	भाषायां सदवसश्रुवः ३.२.१०८.	...	२६७
१०९.	उपेयिवाननाश्वाननूचानश्च ३.२.१०९.	...	२६८
११०.	लुङ् ३.२.११०.	...	२७२
१११.	अनद्यतने लङ् ३.२.१११.	...	२७४
११२.	विभाषा साकाङ्क्षे ३.२.११४.	...	२७५
११३.	परोक्षे लिट् ३.२.११५.	...	२७७
११४.	लट् स्मे ३.२.११८.	...	२८१
११५.	ननौ पृष्टप्रतिवचने ३.२.१२०.	...	२८५
११६.	पुरि लुङ् चास्मे ३.२.१२२.	...	२८६
११७.	वर्तमाने लट् ३.२.१२३.	...	२८७
११८.	लटः शतृशानचावप्रथमासमानाधिकरणे ३.२.१२४.	...	२९४
११९.	लक्षणहेत्वोः क्रियायाः ३.२.१२६.	...	२९८
१२०.	तौ सत् ३.२.१२७.	...	२९९
१२१.	तृन् ३.२.१३५.	...	३०१
१२२.	ग्लाजिस्थश्च क्स्नुः ३.२.१३९.	...	३०२
१२३.	शमित्यष्टाभ्यो घिनुण् ३.२.१४१.	...	३०२
१२४.	निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ३.२.१४६.	...	३०३
१२५.	जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ३.२.१५०.	...	३०३
१२६.	स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ३.२.१५८.	...	३०४
१२७.	आदृगमहनजनः किकिनौ लिट् च ३.२.१७१.	...	३०५
१२८.	अन्येभ्योऽपि दृश्यते ३.२.१७८.	...	३०६
१२९.	विप्रसंभ्यो ड्वसंज्ञायाम् ३.२.१८०.	...	३०७
१३०.	मतिबुद्धिपूजार्थेभ्यश्च ३.२.१८८.	...	३०७
१३१.	उणादयो बहुलम् ३.३.१.	...	३०९
१३२.	भविष्यति गम्यादयः ३.३.३.	...	३११
१३३.	लिप्स्यमानसिद्धौ च ३.३.७.	...	३१२
१३४.	तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३.३.१०.	...	३१२
१३५.	भाववचनाश्च ३.३.११.	...	३१३
१३६.	अण् कर्मणि च ३.३.१२.	...	३१३
१३७.	लृट् शेषे च ३.३.१३.	...	३१४
१३८.	लृटः सद्वा ३.३.१४.	...	३१५
१३९.	अनद्यतने लुट् ३.३.१५.	...	३१५
१४०.	पदरुजविशस्पृशो घञ् ३.३.१६.	...	३१६

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१४१.	सृ स्थिरे ३.३.१७.	...	३१६
१४२.	भावे ३.३.१८.	...	३१६
१४३.	अकर्तरि च कारके संज्ञायाम् ३.३.१९.	...	३१९
१४४.	परिमाणाख्यायां सर्वेभ्यः ३.३.२०.	...	३१९
१४५.	इङश्च ३.३.२१.	...	३२०
१४६.	समि मुष्टौ ३.३.३६.	...	३२१
१४७.	कर्मव्यतिहारे णच् स्त्रियाम् ३.३.४३.	...	३२१
१४८.	अभिविधौ भाव इनुण् ३.३.४४.	...	३२२
१४९.	एरच् ३.३.५६.	...	३२३
१५०.	ग्रहवृदृनिश्चिगमश्च ३.३.५८.	...	३२३
१५१.	स्तम्बे क च ३.३.८३.	...	३२३
१५२.	स्त्रियां क्तिन् ३.३.९४.	...	३२४
१५३.	स्थागापापचो भावे ३.३.९५.	...	३२४
१५४.	व्रजयजोर्भावे क्यप् ३.३.९८.	...	३२५
१५५.	कृञः श च ३.३.१००.	...	३२५
१५६.	षिद्भिदादिभ्योऽङ् ३.३.१०४.	...	३२५
१५७.	ण्यासश्रन्थो युच् ३.३.१०७.	...	३२६
१५८.	रोगाख्यायां ण्वुल् बहुलम् ३.३.१०८.	...	३२६
१५९.	कृत्यल्युटो बहुलम् ३.३.११३.	...	३२७
१६०.	गोचरसंचरवहव्रजव्यजापणनिगमाश्च ३.३.११९.	...	३२८
१६१.	हलश्च ३.३.१२१.	...	३२८
१६२.	उदङ्कोऽनुदके ३.३.१२३.	...	३२८
१६३.	कर्तृकर्मणोश्च भूकृञोः ३.३.१२७.	...	३२९
१६४.	अन्येभ्योऽपि दृश्यते ३.३.१३०.	...	३२९
१६५.	वर्तमानसामीप्ये वर्तमानवद्वा ३.३.१३१.	...	३३०
१६६.	आशंसायां भूतवच्च ३.३.१३२.	...	३३१
१६७.	क्षिप्रवचने लृट् ३.३.१३३.	...	३३३
१६८.	नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः ३.३.१३५.	...	३३७
१६९.	भविष्यति मर्यादावचनेऽवरस्मिन् ३.३.१३६.	...	३३८
१७०.	कालविभागे चानहोरात्राणाम् ३.३.१३७.	...	३३९
१७१.	परस्मिन् विभाषा ३.३.१३८.	...	३४०
१७२.	लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३.३.१३९.	...	३४०
१७३.	भूते च ३.३.१४०.	...	३४१
१७४.	वोताप्योः ३.३.१४१.	...	३४२
१७५.	गर्हायां लडपिजात्वोः ३.३.१४२.	...	३४२
१७६.	अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३.३.१४५.	...	३४३
१७७.	शेषे लृडयदौ ३.३.१५१.	...	३४३

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१७८.	हेतुहेतुमतोर्लिङ् ३.३.१५६.	...	३४४
१७९.	विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३.३.१६१.	...	३४५
१८०.	प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३.३.१६३.	...	३४९
१८१.	धातुसंबन्धे प्रत्ययाः ३.४.१.	...	३५०
१८२.	क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ३.४.२.	...	३५३
१८३.	यथाविध्यनुप्रयोगः पूर्वस्मिन् ३.४.४.	...	३५६
१८४.	समुच्चये सामान्यवचनस्य ३.४.५.	...	३५७
१८५.	उपसंवादाशङ्कयोश्च ३.४.८.	...	३५८
१८६.	तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ३.४.९.	...	३५९
१८७.	उदीचां माङो व्यतीहारे ३.४.१९.	...	३६०
१८८.	समानकर्तृकयोः पूर्वकाले ३.४.२१.	...	३६१
१८९.	विभाषाग्रेप्रथमपूर्वेषु ३.४.२४.	...	३६३
१९०.	स्वादुमि णमुल् ३.४.२६.	...	३६७
१९१.	वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ३.४.३२.	...	३७०
१९२.	करणे हनः ३.४.३७.	...	३७१
१९३.	अधिकरणे बन्धः ३.४.४१.	...	३७२
१९४.	तिर्यच्यपवर्गे ३.४.६०.	...	३७३
१९५.	नाधार्थप्रत्यये च्व्यर्थे ३.४.६२.	...	३७३
१९६.	कर्तरि कृत् ३.४.६७.	...	३७४
१९७.	लः कर्मणि च भावे चाकर्मकेभ्यः ३.४.६९.	...	३८६
१९८.	लस्य ३.४.७७.	...	३९०
१९९.	टित आत्मनेपदानां टेरे ३.४.७९.	...	३९२
२००.	परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३.४.८२.	...	३९६
२०१.	लोटो लङ्वत् ३.४.८५.	...	३९९
२०२.	सेर्ह्यपिच्च ३.४.८७.	...	३९९
२०३.	मेर्निः ३.४.८९.	...	३९९
२०४.	एत ऐ ३.४.९३.	...	४००
२०५.	लिङः सीयुट् ३.४.१०२.	...	४००
२०६.	यासुट् परस्मैपदेषूदात्तो ङिच्च ३.४.१०३.	...	४०१
२०७.	आतः ३.४.११०.	...	४०२
२०८.	आर्धधातुकं शेषः ३.४.११४.	...	४०५

तृतीयाध्यायव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका

सूत्राणि		पृष्ठाङ्काः
अकर्तरि च कारके संज्ञायाम् ३.३.१९.	...	३१९
अग्नौ परिचाय्योपचाय्यसमूह्याः ३.१.१३१.	...	२२१
अचो यत् ३.१.९७.	...	२०७
अजर्यं संगतम् ३.१.१०५.	...	२०८
अण् कर्मणि च ३.३.१२.	...	३१३
अदोऽनन्ने ३.२.६८.	...	२४५
अधिकरणे बन्धः ३.४.४१.	...	३७२
अधिकरणे शेतेः ३.२.१५.	...	२३७
अनद्यतने लङ् ३.२.१११.	...	२७४
अनद्यतने लुट् ३.३.१५.	...	३१५
अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३.३.१४५.	...	३४३
अन्येभ्योऽपि दृश्यते ३.२.१७८.	...	३०६
अन्येभ्योऽपि दृश्यते ३.३.१३०.	...	३२९
अन्येष्वपि दृश्यते ३.२.१०१.	...	२६१
अभिविधौ भाव इनुण् ३.३.४४.	...	३२२
अमावस्यदन्यतरस्याम् ३.१.१२२.	...	२१६
अस्यतिवक्तिख्यातिभ्योऽङ् ३.१.५२.	...	१४७
आढ्यसुभगस्थूलपलिततनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ३.२.५६	...	२४०
आतः ३.४.११०.	...	४०२
आतोऽनुपसर्गे कः ३.२.३.	...	२३०
आत्ममाने खश्च ३.२.८३.	...	२५०
आदृगमहनजनः किकिनौ लिट् च ३.२.१७१.	...	३०५
आद्युदात्तश्च ३.१.३.	...	२३
आनाय्योऽनित्ये ३.१.१२७.	...	२२०
आयादय आर्धधातुके वा ३.१.३१.	...	११०
आर्धधातुकं शेषः ३.४.११४.	...	४०५
आशंसायां भूतवच्च ३.३.१३२.	...	३३१
इगुपधज्ञाप्रीकिरः कः ३.१.१३५.	...	२२४
इङश्च ३.३.२१.	...	३२०
इजादेश्च गुरुमतोऽनृच्छः ३.१.३६.	...	१२०
ई च खनः ३.१.१११.	...	२१३
उणादयो बहुलम् ३.३.१.	...	३०९
उदङ्कोऽनुदके ३.३.१२३.	...	३२८
उदीचां माङो व्यतीहारे ३.४.१९.	...	३६०

सूत्राणि पृष्ठाङ्काः

सूत्राणि	पृष्ठाङ्काः
उपमानादाचारे ३.१.१०. ...	६२
उपसंवादाशङ्कयोश्च ३.४.८. ...	३५८
उपेयिवाननाश्वाननूचानश्च ३.२.१०९. ...	२६८
उषविदजागृभ्योऽन्यतरस्याम् ३.१.३८. ...	१२५
एत ऐ ३.४.९३. ...	४००
एतिस्तुशास्वृदृजुषः क्यप् ३.१.१०९. ...	२१२
एरच् ३.३.५६. ...	३२३
ओरावश्यके ३.१.१२५. ...	२१९
कण्ड्वादिभ्यो यक् ३.१.२७. ...	१०५
कर्मणिङ ३.१.३०. ...	१०८
करणे हनः ३.४.३७. ...	३७१
कर्तरि कृत् ३.४.६७. ...	३७४
कर्तरि भुवः खिष्णुच्खुकञौ ३.२.५७. ...	२४२
कर्तुः क्यङ सलोपश्च ३.१.११. ...	६२
कर्तृकर्मणोश्च भूकृञोः ३.३.१२७. ...	३२९
कर्मणीनिर्विक्रियः ३.२.९३. ...	२६०
कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ३.१.१५. ...	७२
कर्मण्यण् ३.२.१. ...	२२५
कर्मवत् कर्मणा तुल्यक्रियः ३.१.८७. ...	१७०
कर्मव्यतिहारे णच् स्त्रियाम् ३.३.४३. ...	३२१
कष्टाय क्रमणे ३.१.१४. ...	७०
काम्यच्च ३.१.९. ...	६१
कालविभागे चानहोरात्राणाम् ३.३.१३७. ...	३३९
कुषिरजोः प्राचां श्यन् परस्मैपदं च ३.१.९०. ...	१८३
कृञः श च ३.३.१००. ...	३२५
कृञ् चानुप्रयुज्यते लिटि ३.१.४०. ...	१२७
कृत्यल्युटो बहुलम् ३.३.११३. ...	३२७
कृत्याः ३.१.९५. ...	२०५
कृदतिङ ३.१.९३. ...	१९५
क्रव्ये च ३.२.६९. ...	२४५
क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ३.४.२. ...	३५३
क्वसुश्च ३.२.१०७. ...	२६६
क्षिप्रवचने लृट् ३.३.१३३. ...	३३३
गर्हायां लडपिजात्वोः ३.३.१४२. ...	३४२
गापोष्टक् ३.२.८. ...	२३५
गुप्तिज्किद्भ्यः सन् ३.१.५. ...	३१
गोचरसंचरवहव्रजव्यजापणनिगमाश्च ३.३.११९. ...	३२८

सूत्राणि पृष्ठाङ्काः

ग्रहवृदृनिश्चिगमश्च ३.३.५८. ... ३२३
ग्लाजिस्थश्च क्स्नुः ३.२.१३९. ... ३०२
चरेष्टः ३.२.१६. ... २३९
चिण् ते पदः ३.१.६०. ... १४८
चिण् भावकर्मणोः ३.१.६६. ... १४८
चित्याग्निचित्ये च ३.१.१३२. ... २२१
च्लि लुङि ३.१.४३. ... १३२
च्लेः सिच् ३.१.४४. ... १३८
छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्य-प्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ३.१.१२३. ... २१८
छन्दसि शायजपि ३.१.८४. ... १६७
जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ३.२.१५०. ... ३०३
जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ३.१.५८. ... १४८
टित आत्मनेपदानां टेरे ३.४.७९. ... ३९२
णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३.१.४८. ... १४५
ण्यासश्रन्थो युच् ३.३.१०७. ... ३२६
ण्वुल्तृचौ ३.१.१३३. ... २२१
तत्रोपपदं सप्तमीस्थम् ३.१.९२. ... १९०
तनादिकृञ्भ्य उः ३.१.७९. ... १६४
तव्यत्तव्यानीयरः ३.१.९६. ... २०६
तिर्यच्यपवर्गे ३.४.६०. ... ३७३
तुन्दशोकयोः परिमृजापनुदोः ३.२.५. ... २३४
तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ३.४.९. ... ३५९
तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३.३.१०. ... ३१२
तृन् ३.२.१३५. ... ३०१
तौ सत् ३.२.१२७. ... २९९
त्यदादिषु दृशोऽनालोचने कञ् च ३.२.६०. ... २४४
दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्र-क्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ३.२.२१. ... २३९
धातुसंबन्धे प्रत्ययाः ३.४.१. ... ३५०
धातोः ३.१.९१. ... १८५
धातोः कर्मणः समानकर्तृकादिच्छायां वा ३.१.७. ... ३४
धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३.१.२२. ... ७८
धिन्विकृण्व्योर च ३.१.८०. ... १६५
न दुहस्नुनमां यक्चिणौ ३.१.८९. ... १८३
ननौ पृष्टप्रतिवचने ३.२.१२०. ... २८५
नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३.१.१३४. ... २२३

सूत्राणि		पृष्ठाङ्काः
नमोवरिवश्चित्रङः क्यच् ३.१.१९.	...	७३
नाधार्थप्रत्यये च्व्यर्थे ३.४.६२.	...	३७३
नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः ३.३.१३५.	...	३३७
नासिकास्तनयोर्ध्माधेटोः ३.२.२९.	...	२४०
नित्यं कौटिल्ये गतौ ३.१.२३.	...	८३
निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ३.२.१४६	...	३०३
निष्ठा ३.२.१०२.	...	२६१
पदरुजविशस्पृशो घञ् ३.३.१६.	...	३१६
परश्च ३.१.२.	...	१५
परस्मिन् विभाषा ३.३.१३८.	...	३४०
परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३.४.८२.	...	३९६
परिमाणाख्यायां सर्वेभ्यः ३.३.२०.	...	३१९
परोक्षे लिट् ३.२.११५.	...	२७७
पाघ्राध्माधेड्दृशः शः ३.१.१३७.	...	२२४
पुरि लुङ् चास्मे ३.२.१२२.	...	२८६
प्रत्ययः ३.१.१.	...	१
प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३.३.१६३.	...	३४९
ब्रह्मभ्रूणवृत्रेषु क्विप् ३.२.८७.	...	२५८
भविष्यति गम्यादयः ३.३.३.	...	३११
भविष्यति मर्यादावचनेऽवरस्मिन् ३.३.१३६.	...	३३८
भाववचनाश्च ३.३.११.	...	३१३
भावे ३.३.१७.	...	३१६
भाषायां सदवसश्रुवः ३.२.१०८.	...	२६७
भीह्रीभृहुवां श्लुवच्च ३.१.३९.	...	१२६
भुवो भावे ३.१.१०७.	...	२११
भूते ३.२.८४.	...	२५३
भूते च ३.३.१४०.	...	३४१
भृञोऽसंज्ञायाम् ३.१.११२.	...	२१४
भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ३.१.१२.	...	६४
मतिबुद्धिपूजार्थेभ्यश्च ३.२.१८८.	...	३०७
मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ३.२.७१.	...	२४५
मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ३.१.६.	...	३२
मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ३.१.२१.	...	७६
मेर्निः ३.४.८९.	...	३९९
यथाविध्यनुप्रयोगः पूर्वस्मिन् ३.४.४.	...	३५६
यासुट् परस्मैपदेषूदात्तो ङिच्च ३.४.१०३.	...	४०१
राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ३.१.११४.	...	२१६

सूत्राणि पृष्ठाङ्काः

रुधादिभ्यः श्नम् ३.१.७८. ... १६२
रोगाख्यायां ण्वुल् बहुलम् ३.३.१०८. ... ३२६
लः कर्मणि च भावे चाकर्मकेभ्यः ३.४.६९. ... ३८६
लक्षणहेत्वोः क्रियायाः ३.२.१२६. ... २९८
लटः शतृशानचावप्रथमासमानाधिकरणे ३.२.१२४. ... २९४
लट् स्मे ३.२.११८. ... २८१
लस्य ३.४.७७. ... ३९०
लिङः सीयुट् ३.४.१०२. ... ४००
लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३.३.१३९. ... ३४०
लिङ्याशिष्यङ् ३.१.८६. ... १६८
लिटः कानज्वा ३.२.१०६. ... २६६
लिप्स्यमानसिद्धौ च ३.३.७. ... ३१२
लुङ् ३.२.११०. ... २७२
लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् ३.१.२४. ... ८३
लृटः सद्वा ३.३.१४. ... ३१५
लृट् शेषे च ३.३.१३. ... ३१४
लोटो लङ्वत् ३.४.८५. ... ३९९
लोहितादिडाज्भ्यः क्यष् ३.१.१३. ... ६८
वदः सुपि क्यप् च ३.१.१०६. ... २१०
वर्तमानसामीप्ये वर्तमानवद्वा ३.३.१३१. ... ३३०
वर्तमाने लट् ३.२.१२३. ... २८७
वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ३.४.३२. ... ३७०
वासरूपोऽस्त्रियाम् ३.१.९४. ... १९८
विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३.३.१६१. ... ३४५
विप्रसंभ्यो ड्वसंज्ञायाम् ३.२.१८०. ... ३०७
विभाषाग्रेप्रथमपूर्वेषु ३.४.२४. ... ३६३
विभाषा साकाङ्क्षे ३.२.११४. ... २७५
वोतोप्योः ३.३.१४१. ... ३४२
व्रजयजोर्भावे क्यप् ३.३.९८. ... ३२५
व्रते ३.२.८०. ... २४८
शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३.१.१७. ... ७२
शमित्यष्टाभ्यो घिनुण् ३.२.१४१. ... ३०२
शमि धातोः संज्ञायाम् ३.२.१४. ... २३६
शल इगुपधादनिटः क्सः ३.१.४५. ... १४२
शेषे लृडयदौ ३.३.१५१. ... ३४३
श्लिष आलिङ्गने ३.१.४६. ... १४४
षिद्भिदादिभ्योऽङ् ३.३.१०४. ... ३२५

सूत्राणि पृष्ठाङ्काः

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३.१.२५. ... ८४
सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ३.२.६१. ... २४४
सनाद्यन्ता धातवः ३.१.३२. ... ११३
समानकर्तृकयोः पूर्वकाले ३.४.२१. ... ३६१
समि मुष्टौ ३.३.३६. ... ३२१
समुच्चये सामान्यवचनस्य ३.४.५. ... ३५७
सार्वधातुके यक् ३.१.६७. ... १४९
सिब्बहुलं लेटि ३.१.३४. ... ११७
सुखादिभ्यः कर्तृवेदनायाम् ३.१.१८. ... ७३
सुप आत्मनः क्यच् ३.१.८. ... ५१
सुपि स्थः ३.२.४. ... २३३
सुप्यजातौ णिनिस्ताच्छील्ये ३.२.७८. ... २४८
सृ स्थिरे ३.३.१७. ... ३१६
सेर्ह्यपिच्च ३.४.८७. ... ३९९
स्तम्बे क च ३.३.८३. ... ३२३
स्त्रियां क्तिन् ३.३.९४. ... ३२४
स्थः क च ३.२.७७. ... २४७
स्थागापापचो भावे ३.३.९५. ... ३२४
स्पृशोऽनुदके क्विन् ३.२.५८. ... २४३
स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ३.२.१५८. ... ३०४
स्यतासी लृलुटोः ३.१.३३. ... ११५
स्वादुमि णमुल् ३.४.२६. ... ३६७
हनस्त च ३.१.१०८. ... २११
हरतेरनुद्यमनेऽच् ३.२.९. ... २३६
हलः श्नः शानज्झौ ३.१.८३. ... १६६
हलश्च ३.३.१२१. ... ३२८
हेतुमति च ३.१.२६. ... ८५
हेतुहेतुमतोर्लिङ् ३.३.१५६. ... ३४४

TABLE DES MATIÈRES

उपोद्घात:		v
तृतीयाध्यायप्रथमपादे	प्रथममाह्निकम्	१
	द्वितीयमाह्निकम्	५१
	तृतीयमाह्निकम्	१०५
	चतुर्थमाह्निकम्	१३२
	पञ्चममाह्निकम्	१७०
	षष्ठमाह्निकम्	१९८
तृतीयाध्यायद्वितीयपादे	प्रथममाह्निकम्	२२५
	द्वितीयमाह्निकम्	२५३
	तृतीयमाह्निकम्	२९४
तृतीयाध्यायतृतीयपादे	प्रथममाह्निकम्	३०९
	द्वितीयमाह्निकम्	३३०
तृतीयाध्यायचतुर्थपादे	प्रथममाह्निकम्	३५०
आकरग्रन्थानां सूची		४०७
तृतीयाध्यायप्रथमपादादिचतुर्थपादान्तविषयसूचिका		४०८
तृतीयाध्यायव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका		४१४

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

Nos.

1. Kārāvelane —*Kāreikkālammeiyār*, œuvres éditées et traduites. Introduction par Jean Filliozat. 1956.
2. Jean Filliozat — *Les relations extérieures de l'Inde* (1)
   1. *Les échanges de l'Inde et de l'Empire Romain aux premiers siècles de l'ère chrétienne.*
   2. *La doctrine brahmanique à Rome au IIIème siècle.* 1956.
3. Madeleine Biardeau — *Le Tattvabindu de Vācaspatimiśra.* Édition critique, traduction et introduction. 1956. 2ème tirage, 1979.
4. J. Monchanin, J. Filliozat, A. Bareau — *Entretiens* 1955. 1956.
5. Louis Renou — *Etudes sur le vocabulaire du Ṛgveda.* Première série. 1958.
6. Suzanne Siauve — *La voie vers la connaissance de Dieu (Brahma-Jijñāsā) selon l'Anuvyākhyāna de Madhva.* 1957.
7. Dev Raj — *L'esclavage dans l'Inde ancienne d'après les textes palis et sanskrits.* Avec une préface du Dr. Jean Filliozat. 1957.
8. Alain Daniélou — *Tableau comparatif des intervalles musicaux.* 1958.
9. Alain Daniélou — *La musique du Cambodge et du Laos.* 1957.
10. André Bareau — *La vie et l'organisation des communautés bouddhiques modernes de Ceylan.* 1957.
11. Alain Daniélou et N.R. Bhatt — *Textes des Purāṇa sur la théorie musicale.* Vol. I, Édition critique, traduction française et introduction. 1959.
12. Charlotte Vaudeville —*Kabīr Granthāvalī (Dohā).* Avec introduction, traduction et notes. 1957.
13. Madeleine Biardeau — *Sphoṭa Siddhi (La Démonstration du Sphoṭa) par Maṇḍana Miśra.* Introduction, traduction et commentaire. Texte sanskrit établi par N.R. Bhatt avec la collaboration de T. Ramanujam. 1958.
14. Suzanne Siauve — *Les noms védiques de Viṣṇu dans l'Anuvyākhyāna de Madhva (Brahma-Sūtra* I, 1, *adhikaraṇa* 2 *à* 12). Texte avec traduction et notes. 1959.
15. Charlotte Vaudeville — *Etude sur les sources et la composition du Rāmāyaṇa de Tulsī-Dās.* Traduction en hindi par J.K. Balbir. तुलसीदास रचित रामचरितमानस का मूलाधार व रचनाविषयक समालोचनात्मक एक अध्ययन, fasc. I. 1959, fasc. II. 1965.
16. Alain Daniélou et N.R. Bhatt — *Le Gītālaṃkāra.* L'ouvrage original de Bharata sur la musique. Édition critique, traduction française et introduction. 1959.
17. Rasik Vihari Joshi — *Le rituel de la dévotion kṛṣṇaïte.* Préface par Jean Filliozat. 1959.
18. N.R. Bhatt — *Rauravāgama,* édition critique, Vol. I. Introduction : Les Āgama çivaïtes, par Jean Filliozat. 1961. Vol. II, 1972.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

19. R. Dessigane, P.Z. Pattabiramin et J. Filliozat — *La légende des jeux de Çiva à Madurai d'après les textes et les peintures.* Vol. I Texte — Vol. II Planches. 1960.
20. Claude Jacques — *Gayāmāhātmya.* Introduction, édition critique et traduction française. 1962.
21. Charlotte Vaudeville — *Les duhā de Dhola Mārū.* Avec introduction, traduction et notes. 1962.
22. Sayida Surriya Hussain — *Garcin de Tassy, Biographie et étude critique de ses œuvres.* 1962.
23. N.R. Bhatt — *Mṛgendrāgama (Kriyāpāda et Caryāpāda) avec le commentaire de Bhaṭṭa Nārāyaṇakaṇṭha,* édition critique. 1962.
24. N.R. Bhatt — *Ajitāgama,* édition critique. Vol. I. 1963. Vol. II. 1967.
25. Hélène Brunner-Lachaux — *Le rituel quotidien dans la tradition śivaïte de l'Inde du Sud selon Somaśambhu — Somaśambhupaddhati,* Introduction, traduction et notes. Vol. I : Le Rituel quotidien. 1963. Vol. II : Rituels occasionnels I. 1968. Vol. III : Rituels occasionnels II. 1977.
26. Pierre-Sylvain Filliozat — *Le Pratāparudrīya de Vidyānātha* — avec le commentaire *Ratnāpaṇa* de Kumārasvāmin. Traduction, introduction et notes. 1963.
27. Dessigane, P.Z. Pattabiramin et J. Filliozat — *Les légendes çivaïtes de Kāñcipuram.* 1964.
28. Ch. Vaudeville — *Bārahmāsā.* Les chansons des douze mois dans les littératures indo-aryennes. 1965.
29. J. Filliozat et P.Z. Pattabiramin — *Parures divines du Sud de l'Inde.* 1966.
30. Michèle Lupsa — *Chants à Kālī de Rāmprasād.* Introduction, texte bengali, traduction et notes. 1967.
31. R. Dessigane et P.Z. Pattabiramin — *La légende de Skanda.* 1967.
32. M.E. Adicéam — *Contribution à l'étude d'AiyaNār-Śāstā.* 1967.
33. J. Filliozat — *Un catéchisme tamoul du XVIe siècle en lettres latines.* 1967.
34. P. Joshi — *Industrialisation et Société dans l'Inde du Nord.* Introduction par J. Filliozat : Observations sur l'étude des sociétés et de l'économie de l'Inde. 1967.
35. F. Gros — *Le Paripāṭal,* Texte tamoul, introduction, traduction et notes. 1967.
36. P.S. Filliozat — *Œuvres poétiques de Nīlakaṇṭha Dīkṣita.* I. Texte, traduction et notes. 1967.

Nos.

37. *Index des mots de la littérature tamoule ancienne*, Vol. I. 1967; Vol. II. 1968; Vol. III. 1970.
38. Suzanne Siauve — *La Doctrine de Madhva.* 1968.
39. François Gros et R. Nagaswamy — *Uttaramērūr.* Légendes, Histoire, Monuments, avec le *Pañcavaradakṣetramāhātmya* édité par K. Srinivasacharya. 1970.
40. B. Dagens — *Mayamata.* Traité sanskrit d'architecture. Édition critique, traduction et notes. 1ère partie 1970. 2ème partie 1976.
41. N.S. Shukla — *Le Karṇānanda de Kṛṣṇadāsa.* Édition et traduction annotée. 1971.
42. P.Z. Pattabiramin — *Sanctuaires rupestres du Sud de l'Inde.* Vol. I. Andhra. 1971. Vol. II. Tamilnad et Kerala. 1975.
43. Suzanne Siauve — *Les hiérarchies spirituelles selon l'Anuvyākhyāna de Madhva.* 1971.
44. Capitaine de Vaisseau Cordier — *Historique et Statistique de Karikal.* Texte rédigé en 1825. Présentation par François Gros. Vol. I. 1971.
45. Jean Filliozat — Un texte tamoul de dévotion vishnouïte. *Le Tiruppāvai d'Āṇṭāḷ.* 1971.
46. Marie-Claude Porcher — *Rāghavayādavīya* par Veṅkaṭādhvarin. Texte sanskrit édité par M.S. Narasimhacharya. Etude et Traduction. 1972.
47. Neelakanta Sarma — *Textes sanskrits et tamouls de Thailande.* Introduction par Jean Filliozat. 1972.
48. Marie-Claude Porcher — Un poème satirique sanskrit, la *Viśvaguṇādarśacampū.* Introduction, traduction et notes. 1972.
49. Jean Filliozat — Un texte de la religion kaumāra, le *TirumurukāRRuppaṭai.* 1973.
50. Association Internationale des études Tamoules. Compte rendu de la IIIème Conférence Internationale (Proceedings of the Third International Conference Seminar, Paris 1970) édité par François Gros et X.S. Thani Nayagam. 1973.
51. *Mahābhāṣyapradīpavyākhyānāni*, Commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa, édition critique par M.S. Narasimhacharya. Présentation par P.S. Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1973. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1975. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1976. Vol. IV. : Adhyāya I, Pāda 2-4. 1977. Vol. V. : Adhyāya 2, Pāda 1-4. 1978. Vol. VI.: Adhyāya 3. 1979.
52. Alix Raison — *La Hārītasaṃhitā* : Texte médical sanskrit avec un Index de nomenclature âyurvédique. 1974.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

53. Tara Michaël — Le joyau du Śiva-yoga, *Śivayogaratna* de Jñānaprakāśa. Édition, traduction et notes. 1975.

54. *Le Mahābhāṣya de Patañjali* avec le Pradīpa de Kaiyaṭa et l'Uddyota de Nāgeśa. Traduction par Pierre Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1975. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1976. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1978.

55. Vasundhara Filliozat — *Le Temple de TirumaṅkaiyāLvār à Hampi.* 1976.

56. N.R. Bhatt — *Mataṅgapārameśvarāgama,* avec le commentaire de Rāmakaṇṭha, Vol. I. : *Vidyāpāda,* édition critique, 1977.

57. B. Dagens — *Les Enseignements architecturaux de l'Ajitāgama et du Rauravāgama, Études sur les āgama śivaïtes,* I. 1977.

58. S. Siauve — *Aṣṭādaśabhedanirṇaya,* Explication des dix-huit différences entre les deux branches de l'École de Rāmānuja, de Śrī Vātsya Raṅganātha, Édit. critique, traduction et notes, 1978.

59. F. L'Hernault — *L'Iconographie de Subrahmaṇya au Tamilnad,* 1978.

60. B. Dagens — Le florilège de doctrine śivaïte, *Śaivāgamaparibhāṣāmañjarī* de Vedajñāna, Édit. critique, traduction et notes, 1979.

61. N.R. Bhatt — *Sārdhatriśatikālottara* avec le commentaire de Rāmakaṇṭha, édition critique, 1979.

62. J. Filliozat — *Yogaśataka,* Texte médical attribué à Nāgārjuna, textes sanskrit et tibétain, traduction française, notes, indices, 1979.